The Department of Public Instruction, Bombay.

S'RÎ-BHÂSHYA

BY

RÂMÂNUJÂCHÂRYA

EDITED

with Notes in Sanskrit

BY

VASUDEV SHASTRI ABHYANKAR

PANDIT, FERGUSSON COLLEGE, POONA.

Part I—Text.

300 COPIES.

(Registered for Copy-right under Act XXV 1867.)

1914.

[All rights reserved]

Price Rs. Eleven.

SOLD AT

GOVERNMENT CENTRAL PRESS, BOMBAY.

Bombay Sanskrit and Prakrit Series, No. LXVIII.

http://acharya.org

http://acharya.org

आदर्शपुस्तकविचारः ।

एतच्छ्रीभाष्यमुद्रणसमये यान्यादर्शपुस्तकानि लब्धानि तेषु त्रीणि प्राचीनलिखितपुस्तकानि A, B, C इति चिह्नितानि । एतानि च ‘ एम्. ए. ’ इत्युपपदधारिभिः श्रीमद्भिर्भांडारकरोपाह्वैः श्रीधरेति सुगृहीतनामभिर्महाशयैः प्रयत्नेन संपाद्य मत्सकाशं प्रेषितानि । तथा तैलङ्गदेशे तैलङ्गलिप्यां मुद्रितं श्रुतप्रकाशिकासमेतं महाशयेभ्यो डा. सर् भांडारकर इत्येतेभ्यो लब्धम् ।

तत्र प्रथमं ‘जयपूर’ राजधानीस्थ–गालवाश्रमग्रन्थसंग्रहालयस्थं A इति संज्ञितम् । एतच्चापूर्णं प्रथमाध्यायरहितम् । पृष्ठानि चास्य महान्ति वर्तन्ते । अक्षराणि च स्थूलानि । द्वितीयोध्यायस्त्र्यशीतिपृष्ठात्मकः । तृतीयोध्यायो द्विसप्ततिपृष्ठात्मकः । चतुर्थोध्यायस्त्रयस्त्रिंशत्पृष्ठात्मकः । एतत्पुस्तकं केनापि विदुषा दृष्टं स्वबुद्ध्यनुसारेण शुद्धं च कृतमस्ति । गालवाश्रमोयं रामानुजमतानुसारी । पुस्तकं चैतत्पण्डितदुर्गाप्रसादसूनुपण्डितकेदारनाथसाहाय्येन लब्धम् ।

द्वितीयं च ‘अलवार’ राजधानीगतपण्डितरमेशचन्द्रजीस्वामिकग्रन्थसंग्रहालयस्थं B इति संज्ञितम् । एतच्च संपूर्णमस्ति । पृष्ठानि चास्य तनूनि वर्तन्ते । अक्षराणि तु स्थूलान्येव । अस्य प्रथमोध्यायो विंशत्यधिकद्विशतपृष्ठात्मकः । द्वितीयो द्विनवतिपृष्ठात्मकः । तृतीयः षट्सप्ततिपृष्ठात्मकः । चतुर्थोऽष्टत्रिंशत्पृष्ठात्मकः । अस्य पुस्तकस्य तु लेखकेनैव तज्ज्ञेन भवितव्यम् । यतः प्राय एतत्पुस्तकं शुद्धमेव लिखितमास्ते ।

तृतीयं तु ‘ बिकानेर ’ राजधानीगतमहाराजग्रन्थसंग्रहालयस्थं C इति संज्ञितं संपूर्णम् । तस्यामेव राजधान्यां ‘पोलिटिकल एजंट ’ इत्यधिकारारूढानां महाशयानां साहाय्येन लब्धमेतत्पुस्तकम् । पृष्ठानि चास्य महान्ति भूर्जपत्रसदृशानि वर्तन्ते । अक्षराणि त्वणुतराणि । अस्य संपूर्णपुस्तकस्य पृष्ठसंख्या षडधिकत्रिशतपरिमिता । त्रिषष्ट्यधिकशतसंख्याकपृष्ठपर्यन्तः प्रथमोध्यायः । तदुत्तरं सप्तदशाधिकद्विशतसंख्याकपृष्ठपर्यन्तो द्वितीयः । तदुत्तरं द्व्यशीत्यधिकद्विशतसंख्याकपृष्ठपर्यन्तस्तृतीयः । ततोऽवशिष्टपृष्ठात्मकश्चतुर्थः । एतत्पुस्तकं न केनापि शुद्धं कृतम् । नाप्यस्य लेखकेन तज्ज्ञेन भवितव्यम् । यतोऽत्राशुद्धानि कतिपयानि दृश्यन्ते । कतिपयपाठभेदाश्चेतरेषु सर्वेषु पुस्तकेष्वनुपलब्धा अमुत्रैकस्मिन्नेव पुस्तक उपलभ्यन्ते । एतत्पुस्तकत्रयं टीकारहितं मूलमात्रम् ।

http://acharya.org

चतुर्थं D इति संज्ञितं 'कलकत्ता' नगरे मूलमात्रं मुद्रितं 'कर्मकर्तृव्यपदेशाच्च' (अ. १ पा. २ सू. ४) इतिसूत्रपर्यन्तमपूर्णमेव लब्धम् ।

पञ्चमं E इति संज्ञितं काश्यां श्रुतप्रकाशिकासमेतं मुद्रितं सपूर्णम् ।

षष्ठं च F इति संज्ञितं तैलङ्गलिप्यां मुद्रितमुपरि निर्दिष्टम् । तैलङ्गलिपेस्तादृशज्ञानाभावेनैतत्पुस्तकस्य न सर्वत्रोपयोगः कृतः । किं तु संदिग्धेषु कतिपयपाठभेदेष्वेव ।

इमानि च येषां पुस्तकानि येषां च साहाय्येन लब्धानि यैश्च मत्सकाशं प्रेषितानि तेषां निरपेक्षपरोपकारबुद्धीनां महाशयानामतीवोपकारभारं मन्ये ।

आश्विन व० ५ शके १८३५
आक्टोबर २०, १९१३ } वासुदेवशास्त्री अभ्यंकर.

http://acharya.org

॥ श्रीः ॥

अनुक्रमणिका ।

	पृ.	पं.
मङ्गलश्लोकः	१	१
प्रथमसूत्रम्	१	११
अथशब्दार्थः	१	१२
अतःशब्दार्थः	१	१२
षष्ठ्यर्थः	२	१
ब्रह्मशब्दार्थः	२	७
जिज्ञासाशब्दार्थः	२	१४
सूत्रार्थः	२	१६
मीमांसाद्वयस्य संभूयैकशास्त्रत्वम्	२	१९
कर्मब्रह्ममीमांसयोः क्रमनियमः	२	२३
अध्ययनविधिनिरूपणम्	३	१
अध्ययनस्य स्वाध्यायसंस्कारत्वम्	३	१०
मीमांसायां रागतः प्रवृत्तिः	३	१५
कर्मविचारस्य पूर्ववृत्तत्वसमर्थनम्	३	२०
साधनचतुष्टयपूर्ववृत्तत्ववादिनो लघुपूर्वपक्षः	४	२४
समुच्चयवादिन आक्षेपः	५	१२
पूर्वपक्षिकृतं समुच्चयवादनिरसनम्	५	१६
श्रवणादीनामुपयोगः	६	१५
साधनचतुष्टयम्	६	२२
लघुसिद्धान्तः	७	९
वाक्यजन्यं ज्ञानं न मोक्षसाधनम्	७	१३
ध्यानविधानम्	८	११
ध्यानस्योपासनारूपत्वम्	९	५
ध्यानस्य ध्रुवस्मृतिरूपत्वम्	९	१२
ध्रुवस्मृतिरेव भक्तिः	१०	१९
ध्रुवस्मृतेः कर्मापेक्षा	११	५
ध्रुवस्मृतेः साधनीभूतं विवेकादिसप्तकम्	११	१४
साधनचतुष्टयपूर्ववृत्तत्वनिरासः	१३	५

http://acharya.org

	पृ.	प.
महापूर्वपक्षः । तत्र ब्रह्मणः सत्यत्वमन्यस्य मिथ्यात्वम् ...	१३	१८
मिथ्यात्वलक्षणम्	१५	१९
अविद्यास्वरूपम्	१६	२
ब्रह्मात्मैकत्वज्ञानेनाविद्यानिवृत्तिः	१७	४
प्रत्यक्षापेक्षया शास्त्रस्य प्राबल्यम्	१८	१०
कर्मशास्त्रान्मोक्षशास्त्रस्य प्राबल्यम्	१९	३
सगुणवाक्यान्निर्गुणवाक्यस्य प्राबल्यम्	१९	४
सत्यादिवाक्यस्य वस्तुमात्रपरत्वम्	१९	१८
निर्गुणत्वोपपत्तिः	२१	२
प्रत्यक्षस्य सन्मात्रग्राहित्वम्	२१	२१
प्रत्यक्षेण भेदाग्रहणम्	२२	८
भेददूषणम्	२२	११
घटादीनामसत्यत्वम्	२३	१५
सदनुभूत्योरैक्यम्...	२४	१
अनुभूतेः स्वयंप्रकाशत्वम्	२४	५
अनुभूतेर्नित्यत्वम्...	२५	१०
अनुभूतेर्निर्विकारत्वम्	२५	२०
अनुभूतेरेकत्वम्	२५	२१
अनुभूतेरात्मत्वम्	२६	५
आत्मनो न ज्ञातृत्वम्	२६	७
अहमर्थस्यानात्मत्वम्	२६	१९
आत्मनोहंकारव्यङ्ग्यत्वम्	२६	२०
महासिद्धान्तारम्भः	२७	१७
निर्विशेषवस्तुनोप्रामाणिकत्वम्	२८	२
स्वानुभवस्य सविशेषविषयत्वम्	२८	४
शब्दस्य सविशेषविषयत्वम्	२८	१९
प्रत्यक्षस्य सविशेषविषयत्वम्	२९	१
निर्विकल्पलक्षणम्	२९	५
भेदाभेदवादनिरासः	३०	३
अनुमानादीनां सविशेषविषयत्वम्	३०	१९
सन्मात्रग्राहिप्रत्यक्षखण्डनं भेददूषणनिरासश्च	३१	५
जातेः संस्थानरूपत्वम्	३२	१३
जातिरेव भेदः	३२	१५

http://acharya.org

	पृ.	प.
घटादीना सत्यत्वम्...	३३	४
सदनुभूत्योर्भेद	३३	१८
अनुभूतेः स्वयंप्रकाशत्वनियमः	३३	२१
अनुभूतिलक्षणम्	३४	१०
अनुभूतिनित्यत्वनिरासः	३५	१
निर्विषयानुभूतिनिरासः	३६	१०
अनुभूतिनिर्विकारत्वनिरासः	३७	१५
अनुभूत्येकत्वनिरासः	३८	१
संविद आत्मत्वनिरासः	३९	६
अहमर्थस्यात्मत्व तस्यैव ज्ञातृत्वं च	४०	१३
•आत्मनो ज्ञानस्वरूपत्व ज्ञानगुणकत्वं च	४२	७
ज्ञातृत्व न मिथ्या	४४	१२
ज्ञातृत्वं न विकारो नाप्यन्त·करणस्य धर्म	४४	१८
परोक्तज्ञातृत्वनिर्वाहस्य निरास·	४५	७
अनुभूतेरहंकाराभिव्यङ्ग्यत्वनिरास	४६	१२
• सुषुप्त्यादावहमर्थस्फुरणम्	४९	१०
मोक्षेहमर्थानिवृत्तिः	५१	७
अहंभावाहंकारयोर्भेदः	५३	८
शास्त्रप्रत्यक्षविरोधे शास्त्रप्राबल्यनिरासः	५४	५
असत्यात्सत्यप्रतिपत्तिनिरासः	५६	३
स्फोटवादनिरास·	५७	१६
निर्विशेषवस्तुनः श्रुतिसिद्धत्वनिरासः	५८	१५
सद्विद्यायाः सविशेषविषयत्वम्...	५८	१६
परविद्यायाः सविशेषविषयत्वम्	५८	२४
अखण्डार्थसामानाधिकरण्यनिरासेन सत्यादिवाक्यस्य सविशेषविषयत्वसमर्थनम्	५९	४
अद्वितीयश्रुत्यर्थः	६०	५
ज्ञातृत्वप्रतिपादकश्रुतयः	६१	४
निर्गुणसगुणवाक्ययोर्विषयविभागेनाविरोधः	६१	१७
यतो वाच इति श्रुत्यर्थः, ज्ञेयत्वनिषेधनिरासश्च	६२	१७
आनन्दो ब्रह्मेति श्रुत्यर्थः, ज्ञातृत्वनिषेधनिरासश्च	६३	८
द्वैतनिषेधनिरासः	६३	१७
स्मृतिपुराणवाक्यान्न निर्विशेषवस्तुसिद्धिः	६५	५

http://acharya.org

	पृ	प.
भगवच्छब्दार्थः	६६	९
जगतः सत्यत्वं परोक्तवचनानां समीचीनार्थकथनं च ...	६९	१४
ज्ञानस्वरूपमित्यादिश्लोकार्थः	७१	१०
उपबृंहणस्वरूपम्	७२	५
जीवब्रह्मणोर्न स्वरूपैक्यम्	७७	१४
मुक्तावपि तयोर्न स्वरूपैक्यम्	७९	१
ब्रह्मैव भवतीति श्रुतेस्तात्पर्यम्...	८०	८
क्षेत्रज्ञं चापि मां विद्धीत्यस्यार्थः	८२	३
अविद्यानिरासारम्भः	८३	१
आश्रयानुपपत्तिः	८३	८
तिरोधानानुपपत्तिः	८५	४
स्वरूपानुपपत्तिः	८५	८
अनिर्वचनीयत्वानुपपत्तिः	८६	४
भावरूपमज्ञानं प्रमाणसिद्धमिति पूर्वपक्षः...	८६	१०
तमसो द्रव्यत्वम्	८८	७
प्रमाणानुपपत्तिः । तत्राविद्याप्रत्यक्षनिरासः	८८	९
ब्रह्मणो नाज्ञानानुभवः	८९	७
अविद्यानुमाननिरासः	९१	१९
प्रत्यनुमानानि	९३	१
ख्यात्यन्तरदूषणम्	९५	८
सर्वत्र सत्ख्यातिः	९६	३
स्वप्ने सत्ख्यातिः	९७	१२
पित्तादौ सत्ख्यातिः	९८	१६
द्विचन्द्रज्ञाने सत्ख्यातिः	९९	१९
अविद्यायां न श्रुतिः प्रमाणम्...	१०१	८
अविद्यायां नार्थापत्तिः प्रमाणम्	१०३	१
स्मृतिपुराणानामविद्यापरत्वनिरासः	१०३	९
निवर्तकानुपपत्तिः	११०	१
तत्त्वमसिवाक्यार्थविचारः	११०	१०
परमते श्रुतिविरोधः	११३	६
स्वमतेऽभेदश्रुतिसंगतिः	११३	२१
संग्रहेण सिद्धान्तोपन्यासः	११६	१०

http://acharya.org

	पृ॰	पं॰
निर्गुणवादसमर्थनम्	१२१	३
ब्रह्मणो ज्ञानस्वरूपत्वोक्तिसमर्थनम्	१२१	८
नानात्वनिषेधसमर्थनम्	१२१	१८
निवृत्त्यनुपपत्तिः	१२३	२०
अविद्यानिवृत्तेस्तर्कविरुद्धत्वम्	१२४	९
निवर्तकज्ञानानुपपत्तिः	१२४	१६
प्रथमसूत्रतात्पर्यम्	१२५	८
अधिकरणपूर्वपक्षे शब्दस्य कार्यरूपार्थकत्वम्	१२५	१७
सिद्धान्तोपन्यासः	१२७	३
बुद्धिपूर्वकव्युत्पत्तौ शब्दस्य सिद्धार्थपरत्वम्	१२७	६
यादृच्छिकव्युत्पत्तौ शब्दस्य सिद्धार्थपरत्वम्	१२७	१५
शब्दस्य कार्यरूपार्थकत्वेपि ब्रह्मविचारस्य कर्तव्यत्वम् .	१२८	४
कार्यस्य दुर्निरूपत्वम्	१२८	१५
जन्माद्यधिकरणम्	१३२	७
पूर्वपक्षे ब्रह्मलक्षणानुपपत्तिः	१३२	१९
सिद्धान्ते ब्रह्मलक्षणोपपत्ति.	१३३	१७
मायावादे दोषः	१३५	१९
शास्त्रयोनित्वाधिकरणम्	१३६	१२
पूर्वपक्षे ब्रह्मणः शास्त्रप्रमाणकत्वाभावः	१३६	१९
ब्रह्मणि प्रत्यक्षादिप्रमाणाभावः...	१३७	१
ब्रह्मणोऽनुमानसिद्धत्वम्	१३९	१५
सिद्धान्ते ब्रह्मणः शास्त्रैकप्रमाणकत्वम्	१४२	१८
पूर्वपक्ष्युक्तानुमाने दोषाः	१४३	१६
समन्वयाधिकरणम्	१४६	११
पूर्वपक्षे ब्रह्मणः शास्त्रप्रमाणकत्वाभावः	१४७	१४
नियोगादीनां वक्तुमशक्यत्वम्...	१४८	१८
ध्यानविधिवादिमतम्	१५१	३
जीवन्मुक्तिखण्डनम्	१५७	५
भेदाभेदमतोपन्यासः	१५९	२१
पूर्वपक्षिमते जीवब्रह्मभेदस्यौपाधिकत्वम्	१६२	२१
भेदाभेदमतखण्डनम्	१६३	१७
पूर्वपक्षिकृतं ध्याननियोगवादिमतखण्डनम्	१६७	३
सिद्धान्ते ब्रह्मणः शास्त्रप्रमाणकत्वम्	१६८	४

http://acharya.org

	पृ	प.
प्रधानादीनामशब्दत्वम्	१७०	६
ईक्षणस्य न गौणत्वम्	१७३	३
प्रधानस्य सच्छब्दवाच्यत्वाभावे हेतवः	१७३	१९
आनन्दमयस्य जीवादन्यत्वम्	१७५	२०
जीवस्य न जगत्कारणत्वम्	१८६	१०
ब्रह्मण· सविशेषत्वम्	१९०	१
सामानाधिकरण्यस्वरूपम्	१९१	१९
अरुणैकहायनीन्यायः	१९३	१०
मयटो न विकारार्थत्वम्	२०३	११
आनन्दमयस्य जीवादन्यत्वे हेतवः	२०५	४
अक्ष्यादित्यमण्डलान्तर्वर्ती परमात्मैव	२१०	८
छान्दोग्यश्रुतावाकाशशब्दार्थो ब्रह्म	२१७	९
छान्दोग्यश्रुतौ प्राणशब्दार्थो ब्रह्म	२२१	९
छान्दोग्योक्तज्योतिर्ब्रह्मैव	२२२	९
गायत्रीशब्देन न च्छन्दोभिधानम्	२२३	१५
इन्द्रप्राणशब्दनिर्दिष्टं ब्रह्मैव	२२६	३
प्रथमपादप्रतिपाद्यम्	२३२	३
मनोमयत्वादिगुणकः परमात्मा	२३४	५
सर्वं खल्विदमित्यत्र परमात्मैव प्रतिपाद्यते	२३६	३
यस्य ब्रह्म चेत्यत्रात्ता परमात्मैव	२४४	१
अक्ष्यन्तरः परमात्मा	२४९	१९
पृथिव्याद्यन्तर्यामी परमात्मा	२५६	१२
प्रधानजीवयोर्नान्तर्यामित्वम्	२५९	९
अदृश्यत्वादिगुणकः परमात्मा	२६०	८
वैश्वानरः परमात्मा	२६६	१५
द्युपृथिव्याद्याश्रय· परमात्मा	२७६	३
भूमगुणविशिष्टः परमात्मा	२८०	१३
अक्षरशब्दनिर्दिष्टः परमात्मा	२९०	१
परमात्मैवेक्षतिकर्म	२९३	१७
दहराकाशः परमात्मा	२९६	१२
परमात्मगुणानामन्वेष्टव्यत्वम्	२९८	१३
दहराकाशो न जीवः	३०३	९
अनुकृतेरित्यादिसूत्रद्वय पूर्वाधिकरणशेष इति	३०९	७

http://acharya.org

	पृ.	प.
अङ्गुष्ठमात्रप्रमितः परमात्मा	३०९	१६
ब्रह्मविद्याया देवादीनामप्यधिकारः	३११	९
मध्वादिविद्यास्वपि देवानामधिकारः	३२०	१
ब्रह्मविद्यायां शूद्रस्य नाधिकार	३२२	५
शूद्रशब्देन शोक सूचितो न जातिः	३२३	१८
जानश्रुतेः क्षत्रियत्वम्	३२६	१
निर्विशेषब्रह्मवादिमते शूद्रादेरधिकारापादनम्	३२८	१५
अङ्गुष्ठप्रमितस्य परमात्मत्वे हेत्वन्तराणि	३३१	१७
आकाशो ह वै नामरूपयोरित्यत्र परमात्मैव निर्दिष्टः... ...	३३३	१३
परमात्मा जीवाद्भिन्नः	३३६	९
अव्यक्तशब्देन प्रधान नोच्यते किं तु शरीरम्	३३८	३
अजामेकामित्यत्र ब्रह्मात्मिका प्रकृतिरभिधीयते	३५२	१
यस्मिन्पञ्च पञ्चेत्यत्र न सांख्यतत्त्वप्रतिपादनम्	३५८	१
जगत्कारण परमात्मा न प्रधानम्	३६१	१७
जीवादन्यः परमात्मैव जगत्कारणम्	३६५	३
आत्मनस्तु कामायेत्यत्र सर्वेश्वर एव प्रतीयते	३७१	२२
निमित्तकारणमात्रं ब्रह्मेति सेश्वरसांख्यमतखण्डनम्	३८३	४
निमित्तोपादानयोर्भेदः श्रुतौ न प्रतीयते	३८५	८
सांख्यमतखण्डनम्	३९७	३
जगतो ब्रह्मविलक्षणत्वेपि ब्रह्मकार्यत्वम्	४०७	४
जीवब्रह्मणोः स्वभावविभागोपपत्तिः	४१६	१४
कार्यस्य कारणादन्यत्वमिति काणादमतम्...	४१९	१०
कार्यस्य कारणादनन्यत्वमिति जीवाज्ञानवादिमतम्	४२०	१८
ब्रह्माज्ञानवादिमतम्	४२५	३
तत्खण्डनत्वेन पुनः काणादमतोपन्यासः...	४३२	८
सिद्धान्तिमते सत्यस्यापि जगतो ब्रह्मणः सकाशादनन्यत्वम् ...	४३९	६
कार्यस्य कारणे सत्त्वम्	४५०	४
ब्रह्मणो जीवादन्यत्वान्न हिताकरणादयो दोषाः	४५३	११
जीवस्य न ब्रह्मत्वम्	४५४	११
असहायस्यापि ब्रह्मणः संकल्पमात्रेण स्रष्टृत्वम्	४५६	८
निरवयवस्यापि ब्रह्मणोऽचिन्त्यशक्तिकत्वान्न कृत्स्नस्य ब्रह्मणः कार्यत्वेनोपयोगः	४५८	२१

http://acharya.org

	पृ.	प.
ब्रह्मणो जगत्सृष्टौ लीलैव प्रयोजनम्	४६२	११
कर्मापेक्षत्वान्न ब्रह्मणि वैषम्यनैर्घृण्ये	४६२	१८
प्रधानकारणवादः	४६५	१४
प्रधानकारणवादखण्डनम्	४६८	१०
परमाणुकारणवादखण्डनम्	४७९	९
बाह्यार्थवादिबौद्धमतखण्डनम्	४८४	५
क्षणिकत्ववादखण्डनम्	४९०	१
केवलसौत्रान्तिकमतखण्डनम्	४९१	१३
योगाचारमतखण्डनम्	४९३	१
माध्यमिकमतखण्डनम्	४९५	११
जैनमतखण्डनम्	४९६	२०
पशुपतिमतखण्डनम्	५००	१३
पञ्चरात्रतन्त्रं नाप्रमाणम्	५०४	६
पञ्चरात्रतन्त्रं न वेदविरुद्धम्	५०६	२०
आकाशस्योत्पत्तिः	५१४	२
महदादीनामपि तत्तदनन्तरवस्तुशरीरकः परमात्मैव कारणम् ...	५१८	६
जीवस्य नोत्पत्तिः	५२०	२०
जीवस्य ज्ञातृत्वं स्वरूपम्	५२४	१६
जीवस्याणुत्वम्	५२६	१८
गुणभूतज्ञानस्यात्मस्वरूपाद्यतिरेकः	५२९	११
जीवात्मनः कर्तृत्वम्	५३२	१९
जीवस्य कर्तृत्वं परमात्मायत्तम्	५३६	११
जीवस्य ब्रह्मांशत्वम्	५३९	६
इन्द्रियाणामुत्पत्तिः	५४७	३
प्राणशब्दस्य परमात्मवाचित्वमपि	५४८	१२
इन्द्रियाण्येकादश	५५०	१२
इन्द्रियाणामणुत्वम्...	५५१	९
विशेषमापन्नो वायुरेव मुख्यप्राणः	५५२	७
मुख्यप्राणस्याणुत्वम्	५५४	१३
अभिमानिदेवतानामिन्द्रियादिष्वधिष्ठानं परमात्मायत्तम् ...	५५४	२१
मुख्यप्राणव्यतिरिक्तानामेवेन्द्रियत्वम्	५५६	९
नामरूपव्याकरणं परब्रह्मकृतम्	५५७	१०

http://acharya.org

	पृ.	प.
भूतसूक्ष्मैर्युक्तस्यैव जीवस्य देहान्तरगमनम्	५६४	३
जीवोनुशयसहितः प्रत्यवरोहति	५७०	१८
अनिष्टादिकारिणा न चन्द्रप्राप्तिः	५७५	१६
आकाशप्राप्तिप्रभृति व्रीह्यादिप्राप्तिपर्यन्तं न विलम्बः	५७८	१५
अवरोहता जीवानां पापिजीवान्तराधिष्ठितव्रीह्यादिषु संबन्धमात्रम्	५७९	४
स्वप्नस्थरथादयः परमपुरुषसृष्टाः	५८४	६
सुषुप्तौ नाड्यादीनां स्थानाना समुच्चयः	५८६	१४
सुषुप्त एव प्रबोध उत्तिष्ठति	५८७	१८
मूर्छा मरणस्यार्धसंपत्तिः	५८९	३
परस्य ब्रह्मणो न तत्तत्स्थानप्रयुक्ता दोषाः	५८९	१४
• जडस्य ब्रह्मरूपत्वं विशेषणविशेष्यतयांशांशिभावेन	६०२	८
परस्माद्ब्रह्मणः पर नास्ति	६०६	११
परस्माद्ब्रह्मण एव फलप्राप्तिः	६१०	१०
एकैव वैश्वानरविद्या	६१४	३
वाजिनां छन्दोगाना चोद्गीथविद्या भिन्ना	६२०	६
वाजिनां छन्दोगानां चैकैव प्राणविद्या	६२२	६
ब्रह्मस्वरूपगुणानामानन्दादीनामुपसहारः	६२४	१३
आचमनीयानामपां प्राणवासस्त्वानुसंधानम्	६२८	१०
अग्निरहस्ये बृहदारण्यके चैकैव शाण्डिल्यविद्या	६२९	१९
उपास्यरूपविशेषाद्विद्याभेदादुपनिषदोर्नोपसंहारः	६३१	६
सम्भृत्यादिगुणाना नोपसहारः	६३१	१८
तैत्तिरीयके छान्दोग्ये च पुरुषविद्या भिन्ना	६३२	१८
उपनिषदारम्भेष्वधीतानां मन्त्राणां न विद्याङ्गत्वम्	६३४	१
हान्युपायनयोरेकस्य श्रवणेप्यन्यस्य संग्रहः	६३५	१६
देहापक्रमणकाल एव सुकृतदुष्कृतत्यागः	६३८	७
सर्वोपासननिष्ठानामर्चिरादिगतिः	६४२	७
अक्षरब्रह्मसंबन्धिधियां सर्वब्रह्मविद्यासूपसंहारः	६४३	१६
उषस्तसंवादे कहोलसंवादे च न विद्याभेदः	६४६	१
व्यतिहारः सैव हीति सूत्रद्वयं नाधिकरणान्तरम्	६५१	११
ताण्डिनां वाजिनां च दहरविद्यैकैव	६५३	१
कर्माङ्गोद्गीथाद्युपासनानामनुष्ठानानियमः	६५७	१०
दहराकाशचिन्तनं तद्गुणचिन्तनेप्यावर्तनीयम्	६५८	१२

http://acharya.org

	पृ.	प.
सहस्रशीर्षमित्यादि दहरविद्याया एव शेष इति न	६५९	१३
मनश्चितादीनां विद्यारूपत्वम्	६६२	२१
प्रत्यगात्मनोपहृतपाप्मत्वादिरूपेणानुसंधानम्	६६७	२२
कर्माङ्गोद्गीथाद्युपासनानां सर्वशाखासु संबन्ध.	६६९	१
वैश्वानरविद्यायां समस्तस्यैवोपासनम्	६७०	९
सद्विद्याभूमविद्यादिका विद्या नानाभूताः	६७३	९
समानफलानां विद्यानां विकल्प.	६७४	९
कर्माङ्गोद्गीथाद्युपासनानामनुष्ठानानियमः	६७५	१९
विद्यातः पुरुषार्थः	६८०	३
उद्गीथादिषु रसतमादिदृष्टिविधानम्	६९३	१
सर्वाख्यानानां न पारिप्लवार्थत्वम्	६९४	८
ऊर्ध्वरेतःसु विद्याया नाग्नीन्धनाद्यपेक्षा	६९५	५
गृहस्थेषु विद्यायाः सर्वकर्मापेक्षा	६९५	१९
विद्याङ्गतया शमादिविधिः	६९७	७
प्राणात्यय एव सर्वान्नानुमतिः	६९८	४
यज्ञादिकर्माणि केवलाश्रमिणाप्यनुष्ठेयानि	७००	५
विधुराणां ब्रह्मविद्याधिकारः	७०१	१३
नैष्ठिकाद्याश्रमनिष्ठस्यानाश्रमित्वेन नावस्थानम्	७०३	९
उद्गीथाद्युपासनं ऋत्विक्कर्म	७०६	१०
मौनस्यापि विधिरेव	७०७	५
स्वभावानाविष्काररूपमेव बाल्यं विदुषोपादेयम्	७१०	१५
अभ्युदयफला विद्या प्रतिबन्धे विलम्बेनापि सिध्यति	७११	१३
मोक्षफलापि विद्या प्रतिबन्धे विलम्बेनापि सिध्यति	७१२	८
वेदनस्यासकृदावृत्तिः	७१३	३
आत्मत्वेनोपास्यं ब्रह्म	७१५	५
प्रतीके नात्मत्वानुसंधानम्	७१७	७
उद्गीथादावादित्यादिदृष्टिः	७१८	६
उपासनमासीनस्यैव	७१८	१७
मरणपर्यन्तमुपासना	७२०	११
ज्ञानिनः पापकर्मासंबन्धः	७२०	२०
ज्ञानिनः पुण्यकर्मासंबन्धः	७२२	२१
प्रारब्धकर्मणां भोगादेव क्षयः	७२३	१२

http://acharya.org

	पृ.	प.
नित्यकर्म ज्ञानिनाप्यनुष्ठेयम्	७२४	६
प्रारब्धकर्मक्षये मोक्षः	७२५	१६
वाचो मनसि लयः...	७२७	३
मनसः प्राणे लयः	७२८	८
प्राणस्य जीवे लय.	७२९	१
भूतेष्वेव प्राणसंपत्तिः	७२९	१६
नाडीप्रवेशात्प्राग्विदुषोप्युत्क्रान्तिः	७३०	१६
जीवयुक्तभूतसूक्ष्माणां परस्मिन्संपत्ति.	७३६	१
संपत्तिरविभागरूपा	७३६	१४
विदुषो मध्यनाड्योत्क्रान्तिः	७३७	५
रात्रावपि सूर्यरश्म्यनुसरणम्	७३८	९
निशि मृतस्यापि ब्रह्मप्राप्ति	७३९	१०
दक्षिणायने मृतस्यापि ब्रह्मप्राप्ति.	७४०	९
अर्चिरादिरेक एव मार्ग	७४३	३
अर्चिर्मार्गे संवत्सरादूर्ध्वं वायु·	७४५	५
विद्युतोनन्तरं वरुणः	७४७	५
अर्चिरादय आतिवाहिकाः	७४८	१२
हिरण्यगर्भोपासकानामर्चिरादिना गमनम्	७५०	५
परब्रह्मोपासकानामर्चिरादिना गमनम्	७५२	१५
प्रतीकालम्बनव्यतिरिक्ताना सर्वेषां गमनम्	७५४	१२
मोक्षे स्वाभाविकस्य स्वरूपस्याविर्भाव	७५७	३
मुक्तः स्वात्मानं परब्रह्मप्रकारत्वेनानुभवति	७६०	२०
आत्मनो विज्ञानस्वरूपत्वेपि सत्यकामत्वाद्यविरोध.	७६३	१७
ज्ञानिनः सकल्पादेवेष्टसिद्धि	७६५	५
मुक्तः सशरीरोऽशरीरो वा	७६७	६
जगद्व्यापारवर्जं मुक्तस्यैश्वर्यम्	७७०	१०

॥ अनुक्रमणिका समाप्ता ॥

http://acharya.org

श्रीभाष्यम् ।

श्रीमते रामानुजाय नमः ।

अखिलभुवनजन्मस्थेमभङ्गादिलीले
विनतविविधभूतव्रातरक्षैकदीक्षे ।
श्रुतिशिरसि विदीप्ते ब्रह्मणि श्रीनिवासे
भवतु मम परस्मिन् शेमुषी भक्तिरूपा ॥ १ ॥

पाराशर्यवचःसुधामुपनिषद्दुग्धाब्धिमध्योद्धृतां
संसाराग्निविदीपनव्यपगतप्राणात्मसंजीवनीम् ।
पूर्वाचार्यसुरक्षितां बहुमतिव्याघातदूरस्थिता-
मानीतां तु निजाक्षरैः सुमनसो भौमाः पिबन्त्वन्वहम् ॥२॥

भगवद्बोधायनकृतां विस्तीर्णां ब्रह्मसूत्रवृत्तिं पूर्वाचार्याः संचिक्षिपुः । तन्मतानुसारेण सूत्राक्षराणि व्याख्यास्यन्ते ।

अथातो ब्रह्मजिज्ञासा ॥ १ ॥

अत्रायमथशब्द आनन्तर्ये भवति । अतःशब्दो वृत्तस्य हेतुभावे । अधीतसाङ्गसशिरस्कवेदस्याधिगताल्पास्थिरफलकेवलकर्मज्ञानतया संजातमोक्षाभिलाषस्यानन्तस्थिरफलब्रह्मजिज्ञासा ह्यनन्तरभाविनी । ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा । ब्रह्मण

4. B. reads मम भवतु for भवतु मम.

http://acharya.org

इति कर्मणि षष्ठी। कर्तृकर्मणोः कृति (पा. सू. २।३।६५) इति विशेषविधानात्। यद्यपि संबन्धसामान्यपरिग्रहेऽपि जिज्ञासायाः कर्मापेक्षत्वेन कर्मार्थत्वसिद्धिस्तथाप्याक्षेपतः प्राप्तादाभिधानिकस्यैव ग्राह्यत्वात्कर्मणि षष्ठी गृह्यते। न च प्रतिपदविधाना षष्ठी न समस्यत इति कर्मणि षष्ठ्याः समासनिषेधः शङ्कनीयः। कृद्योगा षष्ठी समस्यत इति प्रतिप्रसवसद्भावात्। ब्रह्मशब्देन स्वभावतो निरस्तनिखिलदोषोनवधिकातिशयासंख्येयकल्याणगुणगणः पुरुषोत्तमोभिधीयते। सर्वत्र बृहत्त्वगुणयोगेन ब्रह्मशब्दः। बृहत्त्वं च स्वरूपेण गुणैश्च यत्रानवधिकातिशयं सोस्य मुख्योर्थः। स च सर्वेश्वर एव। अतो ब्रह्मशब्दस्तत्रैव मुख्यवृत्तः। तस्मादन्यत्र तद्गुणलेशयोगादौपचारिकः। अनेकार्थकल्पनायोगाद्भगवच्छब्दवत्। तापत्रयातुरैरमृतत्वाय स एव जिज्ञास्यः। अतः सर्वेश्वरो जिज्ञासाकर्मभूतं ब्रह्म। ज्ञातुमिच्छा जिज्ञासा। इच्छाया इष्यमाणप्रधानत्वादिष्यमाणं ज्ञानमिह विधीयते।

मीमांसापूर्वभागज्ञातस्य कर्मणोल्पास्थिरफलत्वादुपरितनभागावसेयस्य ब्रह्मज्ञानस्यानन्ताक्षयफलत्वाच्च पूर्ववृत्तात्कर्मज्ञानादनन्तरमत एव हेतोर्ब्रह्म ज्ञातव्यमित्युक्तं भवति। तदाह वृत्तिकारः वृत्तात्कर्माधिगमादनन्तरं ब्रह्मविविदिषेति। वक्ष्यति च कर्मब्रह्ममीमांसयोरैकशास्त्र्यं संहितमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेति शास्त्रैकत्वसिद्धिरिति। अतः प्रतिपिपादयिषितार्थभेदेन षट्कभेदवदध्यायभेदवच्च पूर्वोत्तरमीमांसयोर्भेदः।

मीमांसाशास्त्रम्—अथातो धर्मजिज्ञासा (जै. सू. १।१।१) इत्यारभ्यानावृत्तिः शब्दादनावृत्तिः शब्दात् (ब्र. सू. ४।४।२२)

---

13. B. has एव after अतः.

18. B. C. read ततः for अतः.

http://acharya.org

इत्येवमन्तं संगतिविशेषेण विशिष्टक्रमम् । तथाहि । प्रथमं तावत् स्वाध्यायोऽध्येतव्य इत्यध्ययनेनैव स्वाध्यायशब्दवाच्यवेदाख्याक्षरराशेर्ग्रहणं विधीयते । तच्चाध्ययनं किंरूपं कथं च कर्तव्यमित्यपेक्षायामष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीतेत्यनेन

श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधि ।
युक्तश्छन्दांस्यधीयीत मासान् विप्रोऽर्धपञ्चमान् ॥

इत्यादिव्रतनियमविशेषोपदेशैश्चापेक्षितानि विधीयन्ते । एवं सत्सन्तानप्रसूतसदाचारनिष्ठात्मगुणोपेतवेदविदाचार्योपनीतस्य व्रतनियमविशेषयुक्तस्याचार्योच्चारणानूच्चारणमक्षरराशिग्रहणफलमध्ययनमित्यवगम्यते । अध्ययनं च स्वाध्यायसंस्कारः । स्वाध्यायोऽध्येतव्य इति स्वाध्यायस्य कर्मत्वावगमात् । संस्कारो हि नाम कार्यान्तरयोग्यताकरणम् । संस्कार्यत्वं च स्वाध्यायस्य युक्तम् । धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयतत्साधनावबोधित्वात् । जपादिना स्वरूपेणापि तत्साधनत्वाच्च । एवमध्ययनविधिर्मन्त्रवन्नियमवदक्षरराशिग्रहणमात्रे पर्यवस्यति । अध्ययनगृहीतस्य स्वाध्यायस्य स्वभावत एव प्रयोजनवदर्थावबोधित्वदर्शनात् गृहीतात् स्वाध्यायादवगम्यमानान् प्रयोजनवतोऽर्थानापाततो दृष्ट्वा तत्स्वरूपप्रकारविशेषनिर्णयफलवेदवाक्यविचाररूपमीमांसाश्रवणेऽधीतवेदः पुरुषः स्वयमेव प्रवर्तते ।

तत्र कर्मविधिस्वरूपे निरूपिते कर्मणामल्पास्थिरफलत्वं दृष्ट्वाध्ययनगृहीतस्वाध्यायैकदेशोपनिषद्वाक्येषु चामृतस्वरूपानन्तस्थिरफलापातप्रतीतेस्तन्निर्णयफलवेदान्तवाक्यविचाररूपशारीरकमीमांसायामधिकरोति । तथाच वेदान्तवाक्यानि केवलकर्मफलस्य

7. C. om. the word विशेष.
8. C. reads सुकुल after प्रसूत.
21. B. C. read रूप for स्वरूप.

http://acharya.org

क्षयित्वं ब्रह्मज्ञानस्य चाक्षयफलत्वं दर्शयन्ति। तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते (छा. ८।१।६)। अन्तवदेवास्य तद्भवति (बृ. ३।८।१०)। न ह्यध्रुवैः प्राप्यते ध्रुवं कर्मभिः (का. २।१०)। प्लवा ह्येते अदृढा यज्ञरूपाः (मु. २।७)। परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्। तस्मै स विद्वानुपसन्नाय सम्यक्प्रशान्तचित्ताय शमान्विताय। येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् (मु. १।२।१२-१३)। ब्रह्मविदाप्नोति परम् (तै. २।१।१)। न पुनर्मृत्यवे तदेकं पश्यति न पश्यो मृत्युं पश्यति (छां. ७।१६।२)। स स्वराड् भवति (छा. ७।२५।२)। तमेवं विद्वानमृत इह भवति (नृ. पू. १।६)। तमेवं विदित्वातिमृत्युमेति नान्यः पन्था अयनाय विद्यते (श्वे. ३।८)। पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति (श्वे. १।६) इत्यादीनि।

ननु च साङ्गवेदाध्ययनादेव कर्मणां स्वर्गादिफलत्वं स्वर्गादीनां च क्षयित्वं ब्रह्मोपासनस्यामृतफलत्वं च ज्ञायत एव। अनन्तरं मुमुक्षुर्ब्रह्मजिज्ञासायामेव प्रवर्ततां किमर्था धर्मविचारापेक्षा। एवं तर्हि शारीरकमीमांसायामपि न प्रवर्तताम्। साङ्गवेदाध्ययनादेव कृत्स्नस्य ज्ञातत्वात्। सत्यम्। आपाततः प्रतीतिर्विद्यत एव। तथापि न्यायानुगृहीतस्य वाक्यस्यार्थनिश्चायकत्वादापातप्रतीतोप्यर्थः संशयविपर्ययौ नातिवर्तते। अतस्तन्निर्णयाय वेदान्तवाक्यविचारः कर्तव्य इति चेत् तथैव धर्मविचारोपि कर्तव्य इति पश्यतु भवान्।

ननु च ब्रह्मजिज्ञासा यदेव नियमेनापेक्षते तदेव पूर्ववृत्तं व-

---

1. B. reads अक्षयफलत्व श्च for चाक्षयफलत्वं.

3. B. has तत् for ध्रुव.

http://acharya.org

क्तव्यम्। न धर्मविचारापेक्षा ब्रह्मजिज्ञासायाः। अधीतवेदान्तस्यानधिगतकर्मणोपि वेदान्तवाक्यार्थविचारोपपत्तेः। कर्माङ्गाश्रयाण्युद्गीथाद्युपासनान्यत्रैव चिन्त्यन्ते। तदनधिगतकर्मणो न शक्यं कर्तुमिति चेत्। अनभिज्ञो हि भवान् शारीरकशास्त्रविज्ञानस्य। अस्मिन् शास्त्रेनाद्यविद्याकृतविविधभेददर्शननिमित्तजन्मजरामरणादिसांसारिकदुःखसागरनिमग्नस्य निखिलदुःखमूलभूतमिथ्याज्ञाननिबर्हणायात्मैकत्वविज्ञानं प्रतिपिपादयिषितम्। अस्य हि भेदावलम्बि कर्मज्ञानं क्वोपयुज्यते। प्रत्युत विरुद्धमेव। उद्गीथादिविचारस्तु कर्मशेषभूत एव ज्ञानस्वरूपत्वाविशेषादिहैव क्रियते। स तु न साक्षात्संगतः। अतो यत्प्रधानं शास्त्रं तदपेक्षितमेव पूर्ववृत्तं किमपि वक्तव्यम्।

बाढम्। तदपेक्षितं च कर्मविज्ञानमेव। कर्मसमुच्चिताज्ज्ञानादपवर्गश्रुतेः। वक्ष्यति च सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् (ब्र. सू. ३।४।२६) इति। अपेक्षिते च कर्मण्यज्ञाते केन समुच्चयः केन नेति विभागो न शक्यते ज्ञातुम्। अतस्तदेव पूर्ववृत्तम्।

नैतद्युक्तम्। सकलविशेषप्रत्यनीकचिन्मात्रब्रह्मविज्ञानादेवाविद्यानिवृत्तेः। अविद्यानिवृत्तिरेव हि मोक्षः। वर्णाश्रमविशेषसाध्यसाधनेतिकर्तव्यताद्यनन्तविकल्पास्पदं कर्म सकलभेददर्शननिवृत्तिरूपाज्ञाननिवृत्तेः कथमिव साधनं भवेत्। श्रुतयश्च कर्मणामनित्यफलत्वेन मोक्षविरोधित्वं ज्ञानस्यैव मोक्षसाधनत्वं च दर्शयन्ति। अन्तवदेवास्य तद्भवति (बृ. ३।८।१०)। तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते (छा. ८।६।१)।

---

4 B. om. the word हि.

5. C has हि after शास्त्रे.

7. B. C. om. the word भूत.

19. B. om. the word निवृत्तिरूपाज्ञान.

ब्रह्मविदाप्नोति परम् (तै. २।१।१)। ब्रह्म वेद ब्रह्मैव भवति (मु. ३।२।९)। तमेव विदित्वातिमृत्युमेति (श्वे. ३।८) इत्याद्याः।

यद्यपि चेदमुक्तं यज्ञादिकर्मापेक्षा विद्येति। तद्वम्नुविरोधाच्छ्रुत्यक्षरपर्यालोचनया चान्तःकरणनैर्मल्यद्वारेण विविदिषोत्पत्तावुपयुज्यते न फलोत्पत्तौ। विविदिषन्तीति श्रवणात्। विविदिषायां जातायां ज्ञानोत्पत्तौ शमादीनामेवान्तरङ्गोपायतां श्रुतिरेवाह। शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येत् (बृ. ४।४।२३) इति। तदेवं जन्मान्तरशतानुष्ठितानभिसंहितफलविशेषकर्ममृदितकषायस्य विविदिषोत्पत्तौ सत्यां सदेव सोम्येदमग्र आसीत्। एकमेवाद्वितीयम् (छा. ६।२।१)। सत्यं ज्ञानमनन्तं ब्रह्म (तै. २।१।१)। निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् (श्वे. ६।१९)। अयमात्मा ब्रह्म (बृ. २।५।१९)। तत्त्वमसि (छां. ६।८।७) इत्यादिवाक्यजन्यज्ञानादेवाविद्या निवर्तते।

वाक्यार्थज्ञानोपयोगीनि च श्रवणमनननिदिध्यासनानि। श्रवणं नाम वेदान्तवाक्यान्यात्मैकत्वविद्याप्रतिपादकानीति तत्त्वदर्शिन आचार्यान्न्याययुक्तार्थग्रहणम्। एवमाचार्योपदिष्टार्थस्य स्वात्मन्येवमेव युक्तमिति हेतुतः प्रतिष्ठापनं मननम्। एतद्विरोध्यनादिभेदवासनानिरसनायास्यार्थस्यानवरतभावना निदिध्यासनम्। एवं श्रवणादिभिर्निरस्तसमस्तभेदवासनस्य वाक्यार्थज्ञानमविद्यां निवर्तयतीत्येवंरूपस्य श्रवणस्यावश्यापेक्षितमेव पूर्ववृत्तं वक्तव्यम्। तच्च नित्यानित्यवस्तुविवेकः शमदमादिसाधनसंपत् इहामुत्रफलोपभोगविरागः मुमुक्षुत्वं चेत्येतत्साधनचतुष्टयम्। अनेन विना जिज्ञासानुपपत्तेरर्थस्वभावादेवेदमेव पूर्ववृत्तमिति ज्ञायते। एतदुक्तं भवति। ब्रह्मस्वरूपाच्छादिकाविद्यामूलमपारमार्थिकं भेददर्शनमेव बन्धमूलम्। बन्धश्चापारमा-

http://acharya.org

र्थिकः । स च समूलोपारमार्थिकत्वादेव ज्ञानेनैव निवर्त्यते। निवर्तकं च ज्ञानं तत्त्वमस्यादिवाक्यजन्यम् । तस्यैतस्य वाक्यजन्यज्ञानस्य स्वरूपे तदुत्पत्तौ कार्ये वा कर्मणो नोपयोगः। विविदिषायामेव तु कर्मणामुपयोगः । स च पापमूलरजस्तमोनिबर्हणद्वारेण सत्त्ववृद्ध्या भवतीति । इममुपयोगमभिप्रेत्य ब्राह्मणा विविदिषन्ति (बृ. ४।४।२२) इत्युक्तमिति । अतः कर्मणो ज्ञानस्यानुपयोगादुक्तमेव साधनचतुष्टयं पूर्ववृत्तमिति वक्तव्यम् ।

अत्रोच्यते । यदुक्तम् अविद्यानिवृत्तिरेव मोक्षः सा च ब्रह्मविज्ञानादेव भवतीति । तदभ्युपगम्यते । अविद्यानिवृत्तये हि वेदान्तवाक्यैर्विधित्सितं ज्ञानं किंरूपमिति विवेचनीयम् । किं वाक्याद्वाक्यार्थज्ञानमात्रमुत तन्मूलमुपासनात्मकं ज्ञानमिति । न तावद्वाक्यजन्यं ज्ञानम् । तस्य विधानमन्तरेणापि वाक्यादेव सिद्धेः । तावन्मात्रेणाविद्यानिवृत्त्यनुपलब्धेश्च । न च वाच्यं भेदवासनायामनिरस्तायां वाक्यमविद्यानिवर्तकं ज्ञानं न जनयति । ज्ञाने जातेपि सर्वस्य सहसैव भेदज्ञानानिवृत्तिर्न दोषाय । चन्द्रैकत्वे ज्ञातेपि द्विचन्द्रज्ञानानिवृत्तिवदनिवृत्तमपि छिन्नमूलत्वेन न बन्धाय भवतीति । सत्यां सामग्र्यां ज्ञानानुत्पत्त्यनुपपत्तेः । सत्यामपि विपरीतवासनायामाप्तोपदेशलिङ्गादिभिर्बाधकज्ञानोत्पत्तिदर्शनात् । सत्यपि वाक्यार्थज्ञानेनादिवासनया भेदज्ञानमनुवर्तत इति भवता न शक्यते वक्तुम् । भेद-

---

3. B C read स्वरूपोत्पत्तौ for स्वरूपे तदुत्पत्तौ.

3. B. reads च for वा

7. B. C. read कर्मज्ञानस्य for कर्मणो ज्ञानस्य.

8. C. has इति after वक्तव्यम्.

11. B. om. the word हि.

16. B. om. the word ज्ञाने.

http://acharya.org

ज्ञानसामग्र्या अपि वासनाया मिथ्यारूपत्वेन ज्ञानोत्पत्त्यैव निवृत्तत्वात् । ज्ञानोत्पत्तावपि मिथ्यारूपायास्तस्या अनिवृत्तौ निवर्तकान्तराभावात्कदाचिदपि नास्या वासनाया निवृत्तिः । वासनाकार्यं भेदज्ञानं छिन्नमूलम् अथ चानुवर्तत इति बालिशभाषितम् । द्विचन्द्रज्ञानादौ तु बाधकसंनिधावपि मिथ्याज्ञानहेतोः परमार्थतिमिरादिदोषस्य ज्ञानबाध्यत्वाभावेनाविनष्टत्वात् मिथ्याज्ञानानुवृत्तिरविरुद्धा । प्रबलप्रमाणबाधितत्वेन भयादिकार्यं तु निवर्तते । अपि च भेदवासनानिरसनद्वारेण ज्ञानोत्पत्तिमभ्युपगच्छतां कदाचिदपि ज्ञानोत्पत्तिर्न सेत्स्यति । भेदवासनाया अनादिकालोपचितत्वेनापरिमितत्वात्तद्विरोधिभावनायाश्चाल्पत्वादनया तन्निरसनानुपपत्तेः । अतो वाक्यार्थज्ञानादन्यदेव ध्यानोपासनादिशब्दवाच्यं ज्ञानं वेदान्तवाक्यैर्विधित्सितम् । तथा च श्रुतयः विज्ञाय प्रज्ञां कुर्वीत (बृ. ४।४।२१)। अनुविद्य विजानाति (छा. ८।७।१)। ओमित्येवात्मानं ध्यायत (मु. २।२।६)। निचाय्य तन्मृत्युमुखात्प्रमुच्यते (का. ३।१५)। आत्मानमेव लोकमुपासीत (बृ. १।४।१५)। आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः (बृ. २।४।५)। सोन्वेष्टव्यः। स विजिज्ञासितव्यः (छा. ८।७।१) इत्येवमाद्याः । अत्र निदिध्यासितव्य इत्यादिनैकार्थ्यात् अनुविद्य विजानाति विज्ञाय प्रज्ञां कुर्वीतेत्येवमादिभिर्वाक्यार्थज्ञानं ध्यानोपकारकत्वात् अनुविद्य विज्ञायेत्यनूद्य प्रज्ञां कुर्वीत विजानातीति ध्यानं विधीयते। श्रोतव्य इति चानुवादः। स्वाध्यायस्यार्थपरत्वेनाधीतवेदः पुरुषः प्रयोजनवदर्थावबोधित्वदर्शनात्त-

---

13. B. has यथा for तथा.

18. B. om. the word एवम्.

20. C has वाक्यार्थज्ञानस्य for वाक्यार्थज्ञानं.

23. B. reads दर्शनवत् for दर्शनात्.

http://acharya.org

न्निर्णयाय स्वयमेव श्रवणे प्रवर्तत इति श्रवणस्य प्राप्तत्वात् । श्रवणप्रतिष्ठार्थत्वान्मननस्य मन्तव्य इति चानुवादः । तस्माद्ध्यानमेव विधीयते । वक्ष्यति चावृत्तिरसकृदुपदेशात् (ब्र. सू. ४।१।१) इति ।

तदिदमपवर्गोपायतया विधित्सितं वेदनमुपासनमित्यवगम्यते । विद्युपास्त्योरव्यतिरेकेणोपक्रमोपसंहारदर्शनात् । मनो ब्रह्मेत्युपासीत (छा. ३।१८।१) इत्यत्र भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद (छा. ३।१८।३) । न स वेद । अकृत्स्नो ह्येषः । ...आत्मेत्येवोपासीत (बृ. १।४।७) । यस्तद्वेद यत्स वेद स मयैतदुक्तः (छा. ४।१।४) इत्यत्र अनु म एतां भगवो देवतां शाधि यां देवतामुपास्से (छा. ४।२।२) इति । ध्यानं च तैलधारावदविच्छिन्नस्मृतिसंतानरूपम् । ध्रुवा स्मृतिः । स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्ष इति ध्रुवायाः स्मृतेरपवर्गोपायत्वश्रवणात् । सा च स्मृतिर्दर्शनसमानाकारा ।

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे (मुं. २।२।८) ॥

इत्यनेनैकार्थ्यात् । एवं च सत्यात्मा वारे द्रष्टव्यः (बृ. २।४।५) इत्यनेन निदिध्यासनस्य दर्शनरूपता विधीयते । भवति च स्मृतेर्भावनाप्रकर्षाद्दर्शनरूपता । वाक्यकारेणैतत्सर्वं प्रपञ्चितम् । वेदनमुपासनं स्यात्तद्विषये श्रवणादिति । सर्वासूपनिषत्सु मोक्षसाधनतया विहितं वेदनमुपासनमित्युक्तम् । सकृत्प्रत्ययं कुर्याच्छब्दार्थस्य कृतत्वात्प्रयाजादिवदिति पूर्वपक्षं कृत्वा सिद्धं तूपासनशब्दादिति वेदनमसकृदावृत्तं मोक्षसाधनमिति निर्णीतम् । उपासनं

1. B. om. the word श्रवणे.

http://acharya.org

स्याद्ध्रुवानुस्मृतिर्दर्शनान्निर्वचनाच्चेति तस्यैव वेदनस्योपासनरूपस्यासकृदावृत्तस्य ध्रुवानुस्मृतित्वमुपवर्णितम् ।

सेयं स्मृतिर्दर्शनरूपा प्रतिपादिता । दर्शनरूपता च प्रत्यक्षतापत्तिः । एवं प्रत्यक्षतापन्नामपवर्गसाधनभूतां स्मृतिं विशिनष्टि । नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् (का. २।२३) इति । अनेन केवलश्रवणमनननिदिध्यासनानामात्मप्राप्त्यनुपायत्वमुक्त्वा यमेवैष आत्मा वृणुते तेन लभ्य इत्युक्तम् । प्रियतम एव हि वरणीयो भवति । यस्यायं निरतिशयप्रियः स एवास्य प्रियतमो भवति । यथायं प्रियतम आत्मानं प्राप्नोति तथा स्वयमेव भगवान्प्रयतत इति भगवतैवोक्तम् ।

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥

(गी. १०।१०) इति ।

प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ।

(गी. ७।१७) इति च ।

अतः साक्षात्काररूपा स्मृतिः स्मर्यमाणात्यर्थप्रियत्वेन स्वयमत्यर्थप्रिया यस्य स एव परेणात्मना वरणीयो भवतीति तेनैव लभ्यते पर आत्मेत्युक्तं भवति । एवंरूपा ध्रुवानुस्मृतिरेव भक्तिशब्देनाभिधीयते । उपासनपर्यायत्वाद्भक्तिशब्दस्य । अत एव श्रुतिस्मृतिभिरेवमभिधीयते । तमेव विदित्वाति मृत्युमेति (श्वे. ३।८) । तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते (नृ. पू. १।६) ।

1. C reads सा ध्रुवा स्मृतिः for स्याद्ध्रुवानुस्मृतिः.
2. C. reads उपनिर्णीतम् for उपवर्णितम्.
8 B. om. the word आत्मा.

http://acharya.org

नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ॥ (गी. ११।५३)
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ।
पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ॥ (गी. ११।५४)

इति। एवंरूपाया ध्रुवानुस्मृतेः साधनानि यज्ञादीनि कर्माणीति यज्ञादिश्रुतेरश्ववत् (ब्र. सू. ३।४।२६) इत्यभिधास्यते। यद्यपि विविदिषन्तीति यज्ञादयो विविदिषोत्पत्तौ विनियुज्यन्ते। तथापि तस्यैव वेदनस्य ध्यानरूपस्याहरहरनुष्ठीयमानस्याभ्यासाधेयातिशयस्याप्रायणादनुवर्तमानस्य ब्रह्मप्राप्तिसाधनत्वात्तदुत्पत्तये सर्वाण्याश्रमकर्माणि यावज्जीवमनुष्ठेयानि । वक्ष्यति च आ प्रायणात्तत्रापि हि दृष्टम् (ब्र. सू. ४।१।१२)। अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् (ब्र. सू. ४।१।१६)। सहकारित्वेन च (ब्र. सू. ३।४।३३) इत्यादिषु ।

वाक्यकारश्च ध्रुवानुस्मृतेर्विवेकादिभ्य एव निष्पत्तिमाह। तल्लब्धिर्विवेकविमोकाभ्यासक्रियाकल्याणानवसादानुद्धर्षेभ्यः संभवान्निर्वचनाच्चेति। विवेकादीनां स्वरूपं चाह।जात्याश्रयनिमित्तादुष्टादन्नात्कायशुद्धिर्विवेक इति। अत्र निर्वचनम् आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः (छा. ७।२६।२) इति। विमोकः कामानभिष्वङ्ग इति। शान्त उपासीत (छा. ३।१४।१) इति निर्वचनम्। आरम्भणसंशीलनं पुनः पुनरभ्यास इति। निर्वचनं च स्मार्तमुदाहृतं भाष्यकारेण सदा तद्भावभावितः (गी. ८।६) इति। पञ्चमहायज्ञाद्यनुष्ठानं शक्तितः क्रियेति। निर्वचनं क्रियावानेष ब्रह्मविदां वरिष्ठः (मु. ३।१।४)। तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन (बृ. ४।४।२) इति च। सत्यार्जवदयादानाहिंसानभिध्याः कल्याणानीति। निर्वचनं सत्येन लभ्यस्तपसा ह्येष आत्मा...

१।१६) इत्यादि । देशकालवैषम्याच्छोकवस्त्वाद्यनुस्मृतेश्च त ज्जन्यं दैन्यमभास्वरत्वं मनसोवसाद इति । तद्विपर्ययोनवसाद: । निर्वचनं नायमात्मा बलहीनेन लभ्य: (मु. ३।२।४ इति । तद्विपर्ययजा तुष्टिरुद्धर्ष: । तद्विपर्ययोनुद्धर्ष इति । अतिसंतोषश्च विरोधीत्यर्थ: । निर्वचनमपि शान्तो दान्त: (बृ ४।४।२३) इति ।

एवं नियमयुक्तस्याश्रमविहितकर्मानुष्ठानेनैव विद्यानिष्पत्तिरित्युक्तं भवति । तथा च श्रुत्यन्तरं विद्यां चाविद्यां च यस्तद्वेदोभयं स ह। अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते (ई. ११) इति । अत्राविद्याशब्दाभिहितं वर्णाश्रमविहितं कर्म । अविद्यया कर्मणा मृत्युं ज्ञानोत्पत्तिविरोधि प्राचीनं कर्म तीर्त्वापोह्य विद्यया ज्ञानेनामृतं ब्रह्माश्नुते प्राप्नोतीत्यर्थ: । मृत्युतरणोपायतया प्रतीताविद्या विद्येतरद्विहितं कर्मैव । यथोक्तम् ।

इयाज सोपि सुबहून्यज्ञान् ज्ञानव्यपाश्रय: ।
ब्रह्मविद्यामधिष्ठाय तर्तुं मृत्युमविद्यया (वि. पु. ६।६।१२) इति।

ज्ञानविरोधि च कर्म पुण्यपापरूपम् । ब्रह्मज्ञानोत्पत्तिविरोधित्वेनानिष्टफलतयोभयोरपि पापशब्दाभिधेयत्वम् । अस्य च ज्ञानविरोधित्वं ज्ञानोत्पत्तिहेतुभूतशुद्धसत्त्वविरोधिरजस्तमोविवृद्धिद्वारेण । पापस्य च ज्ञानोदयविरोधित्वम् एष एवासाधु कर्म कारयति तं यमधो निनीषति (कौ. ३।८) इति श्रुत्यावगम्यते । रजस्तमसोर्यथार्थज्ञानावरणत्वं सत्त्वस्य च यथार्थज्ञानहेतुत्वं भगवतैव प्रतिपादितम् । सत्त्वात्संजायते ज्ञानम् (गी. १४।१७) इत्यादिना । अतश्च ज्ञानोत्पत्तये पापं कर्म निरसनीयम् । तन्निरसनं चानभिसंहितफलेनानुष्ठितेन धर्मेण । तथाच श्रुति: धर्मेण पापमपनुदति (म. ना. २२।१) इति ।

http://acharya.org

तदेवं ब्रह्मप्राप्तिसाधनभूतं ज्ञानं सर्वाश्रमधर्मापेक्षम् । अतोपेक्षितं कर्मस्वरूपज्ञानं केवलकर्मणामल्पास्थिरफलत्वज्ञानं च कर्ममीमांसावसेयमिति सैवापेक्षिता ब्रह्ममीमांसायाः पूर्ववृत्ता वक्तव्या ।

अपिच नित्यानित्यवस्तुविवेकादयश्च मीमांसाश्रवणमन्तरेण न संपत्स्यन्ते । फलसाधनेतिकर्तव्यताधिकारिविशेषनिश्चयादृते कर्मस्वरूपतत्फलतत्स्थिरत्वास्थिरत्वात्मनित्यत्वादीनां दुरवबोधत्वात् । एषां साधनत्वं च विनियोगावसेयम् । विनियोगश्च श्रुतिलिङ्गादिभ्यः । स च तार्त्तीयः । उद्गीथाद्युपासनानि कर्मसमृद्ध्यर्थान्यपि ब्रह्मदृष्टिरूपाणीति ब्रह्मज्ञानापेक्षाणीतीहैव चिन्तनीयानि । तान्यपि कर्माण्यनभिसंहितफलानि ब्रह्मविद्योत्पादनानीति तत्साद्गुण्यापादनान्येतानि सुतरामिहैव संगतानि । तेषां च कर्मस्वरूपाधिगमापेक्षा सर्वसंमता ।

यदप्याहुरशेषविशेषप्रत्यनीकचिन्मात्रं ब्रह्मैव परमार्थः । तद्व्यतिरेकि नानाविधज्ञातृज्ञेयतत्कृतज्ञानभेदादि सर्वं तस्मिन्नेव परिकल्पितं मिथ्याभूतम् । सदेव सोम्येदमग्र आसीत् । एकमेवाद्वितीयम् (छा. ६।२।१) । अथ परा यया तदक्षरमधिगम्यते । यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादम् । नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः (मु. १।१।५–६) । सत्यं ज्ञानमनन्तं ब्रह्म (तै. २।१।१) ।

1. B. C read कर्म for धर्म
2. B. C read अपेक्षित for अपेक्षितम्.
3. C. reads ब्रह्मजिज्ञासाया. for ब्रह्ममीमांसाया..
6. B C. read करण for साधन.
7. B. om. the word तत् after फल.
10. B. C. om. the word इति after रूपाणि.
11. C. reads उत्पादकानि for उत्पादनानि.
12. C. reads आपादकानि for आपादनानि.

http://acharya.org

निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् । (श्वे. ६।१९)

यस्यामतं तस्य मतं मतं यस्य न वेद सः ।
अविज्ञातं विजानतां विज्ञातमविजानताम् ॥ (के. ११)

न दृष्टेर्द्रष्टारं पश्येर्न मतेर्मन्तारं मन्वीथाः (बृ. ३।४।२) । आनन्दो ब्रह्म (तै. ३।६।१) । इदं सर्वं यदयमात्मा (बृ. २।४।५) । नेह नानास्ति किंचन । मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति (बृ. ४।४।१६) । यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति । यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं विजानीयात् (बृ. २।४।१४) । वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् (छा. ६।१।४) । यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवति (तै. २।७।१) । न स्थानतोपि परस्योभयलिङ्गं सर्वत्र हि (ब्र. सू. ३।२।११) । मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् (ब्र. सू. ३।२।३) ।

प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरम् ।
वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥ (वि. पु. ६।७।५३)

ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः ।
तदेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम् ॥ (वि. पु. १।[illegible])

परमार्थस्त्वमेवैको नान्योस्ति जगतः पते । (वि. पु. १।४।३८)

यदेतद्दृश्यते मूर्तमेतज्ज्ञानात्मनस्तव ।
भ्रान्तिज्ञानेन पश्यन्ति जगद्रूपमयोगिनः ॥

ज्ञानस्वरूपमखिलं जगदेतदबुद्धयः ।
अर्थस्वरूपं पश्यन्तो भ्राम्यन्ते मोहसंप्लवे ॥

8. B om. the words तत्केन कं पश्येत्.

http://acharya.org

ये तु ज्ञानविदः शुद्धचेतसस्तेखिलं जगत्।
ज्ञानात्मकं प्रपश्यन्ति त्वद्रूपं परमेश्वर ॥
(वि. पु. १।४।३९-४०-४१)
तस्यात्मपरदेहेषु सतोप्येकमयं हि यत्।
विज्ञानं परमार्थो हि द्वैतमिथ्यात्वदर्शिनः॥ (वि.पु.२।१४।३१)
यद्यन्योस्ति परः कोपि मत्तः पार्थिवसत्तम।
तदैषोहमयं चान्यो वक्तुमेवमपीष्यते॥ (वि. पु. २।१३।८५)
वेणुरन्ध्रविभेदेन भेदः षड्जादिसंज्ञितः।
अभेदव्यापिनो वायोस्तथासौ परमात्मनः॥ (वि.पु.२।१४।३२)
सोहं स च त्वं स च सर्वमेतदात्मस्वरूपं त्यज भेदमोहम्।
इतीरितस्तेन स राजवर्यस्तत्याज भेदं परमार्थदृष्टिः॥
(वि. पु. २।१६।२४)
विभेदजनकेज्ञाने नाशमात्यन्तिकं गते।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति॥ (वि. पु. ६।७।९४)
अहमात्मा गुडाकेश सर्वभूताशयस्थितः। (गी. १०।२०)
क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत। (गी. १३।२)
न तदस्ति विना यत्स्यान्मया भूतं चराचरम्। (गी. १०।३९)

इत्यादिभिर्वस्तुस्वरूपोपदेशपरैः शास्त्रैर्निर्विशेषचिन्मात्रं ब्रह्मैव सत्यमन्यत्सर्वं मिथ्येत्यभिधानात्। मिथ्यात्वं नाम प्रतीयमानत्वपूर्वकयथावस्थितवस्तुज्ञाननिवर्त्यत्वम्। यथा रज्ज्वाद्यधिष्ठानकसर्पादेः। दोषवशाद्धि तत्र तत्कल्पनम्। एवं चिन्मात्रवपुषि परे ब्रह्मणि दोषपरिकल्पितमिदं देवतिर्यङ्मनु-

---

5. B. C. read द्वैतिनोतथ्यदर्शिन. for द्वैतमिथ्यात्वदर्शिनः.
7. B. reads तदैकोहम् for तदैषोहम्.
15. B reads सर्वभूताशये for सर्वभूताशय.
21. B. reads अधिष्ठानसर्पादिः for अधिष्ठानकसर्पादेः.
22. C. om. the word परे after वपुषि.

http://acharya.org

ष्यस्थावरादिभेदं सर्वं जगद्यथावस्थितब्रह्मस्वरूपाववबोधबाध्यं मिथ्यारूपम् । दोषश्च स्वरूपतिरोधानविविधविचित्रविक्षेपकरी सदसदनिर्वचनीयानाद्यविद्या । अनृतेन हि प्रत्यूढाः (छा. ८।३।२)। तेषां सत्यानां सतामनृतमपिधानम् (छा. ८।३।१)। नासदासीन्नो सदासीत्तदानीम् (तै. ब्रा. २।८।९) । तम आसीत्तमसा गूढमग्रे प्रकेतम् (तै. ब्रा. २।८।९)। मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् (श्वे. ४।१०) । इन्द्रो मायाभिः पुरुरूप ईयते (बृ. २।५।१९) । मम माया दुरत्यया (गी. ७।१४)। अनादिमायया सुप्तो यदा जीवः प्रबुध्यते (गौ. पा. का. १।१६) इत्यादिभिर्निर्विशेषचिन्मात्रं ब्रह्मैवानाद्यविद्यया सदसदनिर्वाच्यया तिरोहितस्वरूपं स्वगतनानात्वं पश्यतीत्यवगम्यते । यथोक्तम् ।

ज्ञानस्वरूपो भगवान्यतोसावशेषमूर्तिर्न तु वस्तुभूतः ।
ततो हि शैलाब्धिधरादिभेदान् जानीहि विज्ञानविजृम्भितानि ॥

यदा तु शुद्धं निजरूपि सर्वकर्मक्षये ज्ञानमपास्तदोषम् ।
तदा हि संकल्पतरोः फलानि भवन्ति नो वस्तुषु वस्तुभेदाः ॥
(वि. पु. २।१२।३९-४०)

तस्मान्न विज्ञानमृतेस्ति किंचित्कचित्कदाचिद्द्विज वस्तुजातम् ।
विज्ञानमेकं निजकर्मभेदविभिन्नचित्तैर्बहुधाभ्युपेतम् ॥

ज्ञानं विशुद्धं विमलं विशोकमशेषलोभादिनिरस्तसङ्गम् ।
एकं सदैकं परमः परेशः स वासुदेवो न यतोन्यदस्ति ॥

---

11. C. reads स्वस्वरूप for स्वरूप.
11. B. reads स्वगत for स्वगत.
15. B. reads निजरूप for निजरूपि.

http://acharya.org

सद्भाव एवं भवतो मयोक्तो ज्ञानं यथा सत्यमसत्यमन्यत् ।
एतत्तु यत्संव्यवहारभूतं तत्रापि चोक्तं भुवनाश्रितं ते ॥

(वि. पु. २।१२।४३-४४-४५) इति ।

अस्याश्चाविद्याया निर्विशेषचिन्मात्रब्रह्मात्मैकत्वविज्ञानेन निवृत्तिं वदन्ति । न पुनर्मृत्यवे तदेकं पश्यति । न पश्यो मृत्युं पश्यति (छा. ७।२६।२) । यदा ह्येवैष एतस्मिन्नदृश्येनात्म्येनिरुक्ते- निलयनेभयं प्रतिष्ठां विन्दते । अथ सोभयं गतो भवति (तै. २।७।१) ।

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥ (मु. २।२।८)

ब्रह्म वेद ब्रह्मैव भवति (मु. ३।२।९) । तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेयनाय (श्वे. ३।८) इत्याद्याः श्रुतयः । अत्र मृत्युशब्देनाविद्याभिधीयते । यथा सनत्सुजातवचनम् । मोहो वै मृत्युः संमतो यः कवीनामिति । प्रमादं वै मृत्युमहं ब्रवीमि । सदाप्रमादममृतत्वं ब्रवीमि (स. १।४) इति । सत्यं ज्ञानमनन्तं ब्रह्म (तै. २।१।१) । विज्ञानमानन्दं ब्रह्म (बृ. ३।९।२८) इत्यादिशोधकवाक्यावसेयनिर्विशेषचिन्मात्रस्वरूपब्रह्मात्मैकत्वविज्ञानं च अथ योन्यां देवतामुपास्ते अन्योसावन्योहमस्मीति न स वेद (बृ. १।४।१०) । आत्मेत्येवोपासीत (बृ. १।४।७) । तत्त्वमसि (छा. ६।८।७) । त्वं वाहमस्मि भगवो देवते अहं वै त्वमसि भगवो देवते (जा.) । तद्योहं सोसौ योसौ सोहम् (ऐ.) इत्यादिवाक्यसिद्धम् । वक्ष्यति चैतदेव

12. B om. विद्यतेयनाय
14 B om. मोहो वै मृत्यु' समतो यः कवीनामिति.
18. C. om. च्चिन्मात्र.

http://acharya.org

आत्मेति तूपगच्छन्ति ग्राहयन्ति च (ब्र. सू. ४।१।३) इति। तथा चाह वाक्यकारः। आत्मेत्येव तु गृह्णीयात्सर्वस्य तन्निष्पत्तेरिति। अनेन च ब्रह्मात्मैकत्वविज्ञानेन मिथ्यारूपस्य सकारणस्य बन्धस्य निवृत्तिरुक्ता।

ननु च सकलभेदनिवृत्तिः प्रत्यक्षविरुद्धा कथमिव शास्त्रार्थजन्यविज्ञानेन क्रियते। कथं वा रज्जुरेषा न सर्प इति ज्ञानेन प्रत्यक्षविरुद्धा सर्पनिवृत्तिः क्रियते। तत्र द्वयोः प्रत्यक्षयोर्विरोध इह तु प्रत्यक्षमूलस्य शास्त्रस्य प्रत्यक्षस्य चेति चेत्तुल्ययोर्विरोधे कथं बाध्यबाधकभावः। पूर्वोत्तरयोर्दुष्टकारणजन्यत्वतदभावाभ्यामिति चेच्छास्त्रप्रत्यक्षयोरपि समानमेतत्। एतदुक्तं भवति। बाध्यबाधकभावे तुल्यत्वसापेक्षत्वनिरपेक्षत्वादि न कारणम्। ज्वालाभेदानुमानेन प्रत्यक्षोपमर्दायोगात्। तत्र हि ज्वालैक्यं प्रत्यक्षेणावगम्यते। एवं सति द्वयोः प्रमाणयोर्विरोधे यत्संभाव्यमानान्यथासिद्धि तद्बाध्यम्। अनन्यथासिद्धमनवकाशमितरद्बाधकमिति सर्वत्र बाध्यबाधकभावनिर्णय इति। तस्मादनादिनिधनाविच्छिन्नसंप्रदायासंभाव्यमानदोषगन्धानवकाशशास्त्रजन्यनिर्विशेषनित्यशुद्धमुक्तबुद्धस्वप्रकाशचिन्मात्रब्रह्मात्मभावावबोधेन संभाव्यमानदोषसावकाशप्रत्यक्षादिसिद्धविविधविकल्परूपबन्धनिवृत्तिर्युक्तैव। संभाव्यते च विविधविकल्पभेदप्रपञ्चग्राहिप्रत्यक्षस्यानादिभेदवासनादिरूपाविद्याख्यो दोषः।

---

4. B C read मुक्ता for उक्ता.

5. B C. read शास्त्रजन्म for शास्त्रार्थजन्य.

6. C reads इह for एषा

13. B. C. read च after एव; B. om. प्रमाणयोः.

http://acharya.org

नन्वनादिनिधनाविच्छिन्नसंप्रदायतया निर्दोषस्यापि शास्त्रस्य ज्योतिष्टोमेन स्वर्गकामो यजेतेत्येवमादेर्भेदावलम्बिनो बाध्यत्वं प्रसज्येत । सत्यम् । पूर्वापरापच्छेदे पूर्वशास्त्रवन्मोक्षशास्त्रस्य निरवकाशत्वात्तेन बाध्यत एव । वेदान्तवाक्येष्वपि सगुणब्रह्मोपासनपराणां शास्त्राणामयमेव न्यायः । निर्गुणत्वात्परस्य ब्रह्मणः ।

ननु च यः सर्वज्ञः सर्ववित् (मु. १।१।९)। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च (श्वे. ६।८)। सत्यकामः सत्यसंकल्पः (छा. ८।१।५)। इत्यादिब्रह्मस्वरूपप्रतिपादनपराणां कथं बाध्यत्वम् । निर्गुणवाक्यसामर्थ्यादिति ब्रूमः । एतदुक्तं भवति । अस्थूलमनण्वह्रस्वम् (बृ. ३।८।८)। सत्यं ज्ञानमनन्तं ब्रह्म (तै. २।१।१)। निर्गुणम (चू. ७।२)। निरञ्जनम् (श्वे. ६।१९)। इत्यादिवाक्यानि निरस्तसमस्तविशेषकूटस्थनित्यचैतन्यं ब्रह्मेति प्रतिपादयन्ति । इतराणि च सगुणम् । उभयविधवाक्यानां विरोधे तेनैवापच्छेदन्यायेन निर्गुणवाक्यानां गुणापेक्षत्वेन परत्वाद्बलीयस्त्वमिति न किंचिदवहीनम् ।

ननु च सत्यं ज्ञानमनन्तं ब्रह्म (तै. २।१।१) इत्यत्र सत्यज्ञानादयो गुणाः प्रतीयन्ते । नेत्युच्यते । सामानाधिकरण्येनैकार्थत्वप्रतीतेः । अनेकगुणविशिष्टाभिधानेप्येकार्थत्वमविरुद्धमिति चेत् । अनभिधानज्ञो हि देवानांप्रियः । एकार्थत्वं नाम सर्वपदानामर्थैक्यम् । विशिष्टपदार्थाभिधाने विशेषणभेदेन पदानामर्थभेदोवर्जनीयः । ततश्चैकत्वं न सिध्यति । एवं तर्हि स-

---

16. C. reads अहीन for अवहीन.

20. B. C. om. हि; B reads देवताना for देवाना.

http://acharya.org

र्वपदानां पर्यायता स्यात् । अविशिष्टार्थाभिधायित्वात् । एकार्थाभिधायित्वेऽप्यपर्यायत्वमवहितमनाः शृणु । एकत्वतात्पर्यनिश्चयादेकस्यैवार्थस्य तत्तत्पदार्थविरोधिप्रत्यनीकपरत्वेन सर्वपदानामर्थवत्त्वमेकार्थत्वमपर्यायता च । एतदुक्तं भवति । लक्षणतः प्रतिपत्तव्यं ब्रह्म सकलेतरपदार्थविरोधिरूपम् । तद्विरोधिरूपं सर्वमनेन पदत्रयेण फलतो व्युदस्यते । तत्र सत्यपदं विकारास्पदत्वेनासत्याद्वस्तुनो व्यावृत्तपरम् । ज्ञानपदं चान्याधीनप्रकाशाज्जडरूपाद्वस्तुनो व्यावृत्तपरम् । अनन्तपदं च देशतः कालतो वस्तुतश्च परिच्छिन्नाद्व्यावृत्तपरम् । नच व्यावृत्तिर्भावरूपोभावरूपो वा धर्मः । अपि तु सकलेतरविरोधि ब्रह्मैव । यथा शौक्ल्यादेः कार्ष्ण्यादिव्यावृत्तिस्तत्तत्पदार्थस्वरूपमेव न धर्मान्तरम् । एवमेकस्यैव वस्तुनः सकलेतरविरोध्याकारतामवगमयदर्थवत्तरमेकार्थमपर्यायं च पदत्रयमिति । तस्मादेकमेव ब्रह्म स्वयंज्योतिर्निर्धूतनिखिलविशेषमित्युक्तं भवति । एवं वाक्यार्थप्रतिपादने सत्येव सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् (छा. ६।२।१) इत्यादिभिरैकार्थ्यम् । यतो वा इमानि भूतानि जायन्ते (तै. ३।१।१) । सदेव सोम्येदमग्र आसीत् (छा. ६।२।१) । आत्मा वा इदमेक एवाग्र आसीत् (ऐ. १।१) इत्यादिभिर्जगत्कारणतयोपलक्षितस्य ब्रह्मणः स्वरूपमिदमुच्यते सत्यं ज्ञानमनन्तं ब्रह्म (तै. २।१।१) इति । तत्र सर्वशाखाप्रत्ययन्यायेन कारणवाक्येषु सर्वेषु सजातीयविजातीयव्यावृत्तमद्वितीयं ब्रह्मावगतम् । जगत्कारण-

---

7. B. C. read ब्रह्म after व्यावृत्त; C. reads प्रकाश for प्रकाशाद्.

8. B. C. read ब्रह्म after व्यावृत्त.

9. C. reads ब्रह्म after व्यावृत्त.

11. B. om. एवम्.

13. B. C. om. इति.

http://acharya.org

तथोपलक्षितस्य ब्रह्मणोद्वितीयस्य प्रतिपिपादयिषितं स्वरूपं तदविरोधेन वक्तव्यम्। अद्वितीयत्वश्रुतिर्गुणतोपि सद्वितीयतां न सहते। अन्यथा निरञ्जनं निर्गुणमित्यादिभिश्च विरोधः। अतश्चैतल्लक्षणवाक्यमखण्डैकरसमेव प्रतिपादयति।

ननु च सत्यज्ञानादिपदानां स्वार्थप्रहाणेन स्वार्थविरोधिव्यावृत्तवस्तुस्वरूपोपस्थापनपरत्वेन लक्षणा स्यात्। नैष दोषः। अभिधानवृत्तेरपि तात्पर्यवृत्तेर्बलीयस्त्वात्। सामानाधिकरण्यस्य ह्यैक्य एव तात्पर्यमिति सर्वसंमतम्। ननु च सर्वपदानां लक्षणा न दृष्टचरी। ततः किम्। वाक्यतात्पर्यविरोधे सत्येकस्यापि न दृष्टा। समभिव्याहृतपदसमुदायस्यैतत्तात्पर्यमिति निश्चिते सति द्वयोस्त्रयाणां सर्वेषां वा तदविरोधायैकस्येव लक्षणा न दोषाय। तथाच शास्त्रज्ञैरभ्युपगम्यते कार्यवाक्यार्थवादिभिर्लौकिकवाक्येषु सर्वेषां पदानां लक्षणा समाश्रीयते। अपूर्वकार्ये एव लिङादेर्मुख्यवृत्तत्वाल्लिङादिभिः क्रियाकार्यं लक्षणया प्रतिपाद्यते। कार्यान्वितस्वार्थाभिधायिनां चेतरेषां पदानामपूर्वकार्यान्वित एव मुख्योर्थ इति क्रियाकार्यान्वितप्रतिपादनं लाक्षणिकमेव। अतो वाक्यतात्पर्याविरोधाय सर्वपदानां लक्षणापि न दोषः। अत इदमेवार्थजातं प्रतिपादयन्तो वेदान्ताः प्रमाणम्।

प्रत्यक्षादिविरोधे च शास्त्रस्य बलीयस्त्वमुक्तम्। सति च विरोधे बलीयस्त्वं वक्तव्यम्। विरोध एव न दृश्यते। निर्विशे-

---

2. B. reads अद्वितीय for अद्वितीयत्व.
4. C. has ब्रह्म after एव.
6. B. C. read परत्वे for परत्वेन.
12 B. has अपूर्वं before कार्य.
20. C. om. च after सति.

http://acharya.org

षसन्मात्रग्राहित्वात्प्रत्यक्षस्य । ननु च घटोस्ति पटोस्तीति नानाकारवस्तुविषयं प्रत्यक्षं कथमिव सन्मात्रग्राहीत्युच्यते। विलक्षणग्रहणाभावे सति सर्वेषां ज्ञानानामेकविषयत्वेन धारावाहिकविज्ञानवदेकव्यवहारहेतुतैव स्यात्। सत्यम्। तथैवात्र विविच्यते। कथम्। घटोस्तीत्यत्रास्तित्वं तद्भेदश्च व्यवह्रियते। न च द्वयोरपि व्यवहारयोः प्रत्यक्षमूलत्वं संभवति। तयोर्भिन्नकालज्ञानफलत्वात्। प्रत्यक्षज्ञानस्यैकक्षणवर्तित्वात्। तत्र स्वरूपं भेदो वा प्रत्यक्षस्य विषय इति विवेचनीयम्। भेदग्रहणस्य स्वरूपग्रहणतत्प्रतियोगिस्मरणसव्यपेक्षत्वादेव स्वरूपविषयत्वमवश्याश्रयणीयमिति न भेदः प्रत्यक्षेण गृह्यते। अतो भ्रान्तिमूल एव भेदव्यवहारः। किं च भेदो नाम कश्चित्पदार्थो न्यायविद्भिर्निरूपयितुं न शक्यते। भेदस्तावन्न वस्तुनः स्वरूपम्। वस्तुस्वरूपे गृहीते स्वरूपव्यवहारवत्सर्वस्माद्भेदव्यवहारप्रसक्तेः। न च वाच्यं स्वरूपे गृहीतेपि भिन्न इति व्यवहारस्य प्रतियोगिसव्यपेक्षत्वात्तत्स्मरणाभावेन तदानीमेव न भेदव्यवहार इति। स्वरूपमात्रभेदवादिनो हि प्रतियोगिसव्यपेक्षा च नोत्प्रेक्षितुं क्षमा। स्वरूपभेदयोः स्वरूपत्वाविशेषात्। यथा स्वरूपव्यवहारो न प्रतियोग्यपेक्षः। भेदव्यवहारोपि तथैव स्यात्। हस्तः कर इतिवद्धटो भिन्न इति पर्यायत्वं च स्यात्। नापि

---

1 B has चिन्मात्रावगाहित्वात् for सन्मात्रग्राहित्वात्

2. B. reads अवगाही for ग्राही.

7 B has परत्वात् for फलत्वात्, B C. have च after ज्ञानस्य; B. C read वा after स्वरूप

10 B has सं after न

15. C. reads स्मरण after प्रतियोगि.

16. C. reads प्रतियोग्यपेक्षा for प्रतियोगिसव्यपेक्षा.

http://acharya.org

धर्मः। धर्मत्वे सति तस्य स्वरूपाद्भेदोवश्याश्रयणीयः । अन्यथा स्वरूपमेवं स्यात्। भेदे च तस्यापि भेदस्तद्धर्मस्तस्यापीत्यनवस्था। किं च जात्यादिधर्मविशिष्टवस्तुग्रहणे सति भेदग्रहणं भेदग्रहणे सति जात्यादिधर्मविशिष्टवस्तुग्रहणमित्यन्योन्याश्रयणम्। अतो भेदस्यापि दुर्निरूपत्वात्सन्मात्रस्यैव प्रकाशकं प्रत्यक्षम्।

किं च घटोस्ति पटोस्ति घटोनुभूयते पटोनुभूयत इति सर्वे पदार्थाः सत्तानुभूतिघटिता एव दृश्यन्ते। अत्र सन्मात्रं सर्वासु प्रतिपत्तिष्वनुवर्तमानं दृश्यत इति तदेव परमार्थः। विशेषास्तु व्यावर्तमानतयापरमार्थाः । रज्जुसर्पादिवत्। यथा रज्जुरधिष्ठानतयानुवर्तमाना सती परमार्था । व्यावर्तमानाः सर्पभूदलनाम्बुधारादयोपरमार्थाः। ननु च रज्जुसर्पादौ रज्जुरियं न सर्प इत्यादिरज्ज्वाद्यधिष्ठानयाथार्थ्यज्ञानेन बाधितत्वात्सर्पादेरपारमार्थ्यं न व्यावर्तमानत्वात्। रज्ज्वादेरपि पारमार्थ्यं नानुवर्तमानतया किं त्वबाधितत्वात् । अत्र त्वबाधितानां घटादीनां कथमपारमार्थ्यम्। उच्यते। घटादौ दृष्टा व्यावृत्तिः सा किंरूपेति विवेचनीयम्। किं घटोस्तीत्यत्र पटाभावः। सिद्धं तर्हि घटोस्तीत्यनेन पटादीनां बाधितत्वम्। अतो बाधफलभूता विषयनिवृत्तिर्व्यावृत्तिः । सा व्यावर्तमानानामपारमार्थ्यं साधयति । रज्जुवत्सन्मात्रमबाधितमनुवर्तते। तस्मात्सन्मात्रातिरेकि सर्वमपरमार्थम्। प्रयोगश्च भवति। सत् परमार्थम्। अनुवर्तमानत्वात्। रज्जुसर्पादौ रज्ज्वादिवत्। घटादयोपरमार्थाः। व्यावर्तमानत्वात्। रज्ज्वाद्यधिष्ठानसर्पादिवदिति।

---

2 B reads अपि after भेदे

5. B. C. om. अपि

12 C. reads याथात्म्य for याथार्थ्य.

एवं सत्यनुवर्तमानानुभूतिरेव परमार्थो । सैव सती । ननु च सन्मात्रमनुभूतेर्विषयतया ततो भिन्नम् । नैवम् । भेदो हि प्रत्यक्षाविषयत्वाद्दुर्निरूपत्वाच्च पुरस्तादेव (पृ० २२ पं० १०) निरस्तः । अत एव सतोनुभूतिविषयभावोपि न प्रमाणपदवीमनुसरति । तस्मात्सदनुभूतिरेव । सा च स्वतःसिद्धा । अनुभूतित्वात् । अन्यतः सिद्धौ घटादिवदननुभूतित्वप्रसङ्गः । किं चानुभवान्तरापेक्षा चानुभूतेर्न शक्या कल्पयितुम् । स्वसत्तयैव प्रकाशमानत्वात् । न ह्यनुभूतिर्वर्तमाना घटादिवदप्रकाशा दृश्यते । येन परायत्तप्रकाशाभ्युपगम्येत । अथैवं मनुषे उत्पन्नायामप्यनुभूतौ विषयमात्रमवभासते घटोनुभूयत इति । नहि कश्चिद्घटोयमिति जानंस्तदानीमेवाविषयभूतामनिदंभावामनुभूतिमप्यनुभवति । तस्माद्घटादिप्रकाशनिष्पत्तौ चक्षुरादिकरणसंनिकर्षवदनुभूतेः सद्भाव एव हेतुः । तदनन्तरमर्थगतकादाचित्कप्रकाशातिशयलिङ्गेनानुभूतिरनुमीयते । एवं तर्ह्यनुभूतेरजडाया अर्थवज्जडत्वमापद्येतेति चेत् । किमिदमजडत्वं नाम । न तावत्स्वसत्तायाः प्रकाशाव्यभिचारः । सुखादिष्वप्येतत्संभवात् । न हि कदाचिदपि सुखादयः सन्तो नोपलभ्यन्ते । अतोनुभूतिः स्वयमेव नानुभूयते । अर्थान्तरं स्पृशतोप्यङ्गुल्यग्रस्य स्वात्मस्पर्शवदशक्यत्वादिति । तदिदमनाकलितानुभवविभवस्य स्वमतिविजृम्भितम् । अनुभूतिव्यतिरेकिणो विषयधर्मस्य प्रकाशस्य रूपादिवदनुपलब्धेः । उभया-

---

1. B. C. read परमार्थः for परमार्थो.

7. B. C. om. अन्तर; B. om. च after अपेक्षा; B. C. om. स्व.

17. B. C. read तत् for एतत्.

19. C. om. अपि.

http://acharya.org

भ्युपेतानुभूत्यैवाशेषव्यवहारोपपत्तौ प्रकाशाख्यार्थधर्मकल्पनानुपपत्तेश्च। अतो नानुभूतिरनुमीयते। नापि ज्ञानान्तरसिद्धा। अपि तु सर्वं साधयन्त्यनुभूतिः स्वयमेव सिध्यति। प्रयोगश्च। अनुभूतिरनन्याधीनस्वधर्मव्यवहारा। स्वसंबन्धादर्थान्तरे तद्धर्मव्यवहारहेतुत्वात्। यः स्वसंबन्धादर्थान्तरे तद्धर्मव्यवहारहेतुः स तयोः स्वस्मिन्ननन्याधीनो दृष्टः। यथा रूपादिश्चाक्षुषत्वादौ। रूपादिर्हि पृथिव्यादौ स्वसंबन्धाच्चाक्षुषत्वादि जनयन्स्वस्मिन्न रूपादिसंबन्धाधीनश्चाक्षुषत्वादौ। अतोनुभूतिरात्मनः प्रकाशमानत्वे प्रकाशत इति व्यवहारे च स्वयमेव हेतुः। सेयं स्वयंप्रकाशानुभूतिर्नित्या च। प्रागभावाद्यभावात्। तदभावश्च स्वतःसिद्धत्वादेव। न ह्यनुभूतेः स्वतःसिद्धायाः प्रागभावः स्वतोन्यतो वावगन्तुं शक्यते। अनुभूतिः स्वाभावमवगमयन्ती सती तावन्नावगमयति। तस्याः सत्त्वे विरोधादेव तदभावो नास्तीति कथं स्वाभावमवगमयति। एवमसत्यपि नावगमयति। अनुभूतिः स्वयमसती कथं स्वाभावे प्रमाणं भवेत्। नाप्यन्यतोवगन्तुं शक्यते। अनुभूतेरनन्यगोचरत्वात्। अस्याः प्रागभावं साधयत्प्रमाणमनुभूतिरियमिति विषयीकृत्य तदभावं साधयेत्। स्वतःसिद्धत्वेनेयमिति विषयीकारानर्हत्वात्तत्प्रागभावो नान्यतः शक्यावगमः। अतोस्याः प्रागभावाद्यभावादुत्पत्तिर्न शक्यते वक्तुमिति। उत्पत्तिप्रतिबद्धाश्चान्येपि भावविकारास्तस्या न सन्ति। अनुत्पन्नेयमनुभूतिरात्मनि नानात्वमपि न सहते। व्यापकविरुद्धोपलब्धेः। न ह्यनुत्पन्नं नानाभूतं

---

1. B. C. om. अर्थ.

5. C. reads यद्धर्म for तद्धर्म.

14. C. has सा after कथं.

दृष्टम् । भेदादीनामनुभाव्यत्वेन च रूपादेरिवानुभूतिधर्मत्वं न संभवति । अतोनुभूतेरनुभवस्वरूपत्वादेवान्योपि कश्चिदनुभाव्यो नास्या धर्मः । यतो निर्धूतनिखिलभेदा संविदत एव नास्याः स्वरूपातिरिक्त आश्रयो ज्ञाता नाम कश्चिदस्तीति स्वप्रकाशरूपा सैवात्मा । अजडत्वाच्च । अनात्मत्वव्याप्तं जडत्वं संविदि व्यावर्तमानमनात्मत्वमपि हि संविदो व्यावर्तयति ।

ननु चाहं जानामीति ज्ञातृता प्रतीतिसिद्धा । मैवम् । सा भ्रान्तिसिद्धा । रजततेव शुक्तिशकलस्य । अनुभूतेः स्वात्मनि कर्तृत्वायोगात् । अतो मनुष्योहमित्यत्यन्तबहिर्भूतमनुष्यत्वादिविशिष्टपिण्डात्माभिमानवज्ज्ञातृत्वमप्यध्यस्तम् । ज्ञातृत्वं हि ज्ञानक्रियाकर्तृत्वम् । तच्च विक्रियात्मकं जडं विकारिद्रव्याहंकारग्रन्थिस्थमविक्रिये साक्षिणि चिन्मात्रात्मनि कथमिव संभवति । दृश्यधीनसिद्धित्वादेव रूपादेरिव कर्तृत्वादेर्नात्मधर्मत्वम् । सुषुप्तिमूर्छादावहंप्रत्ययाभावेप्यात्मानुभवदर्शनेन नात्मनोहंप्रत्ययगोचरत्वम् । कर्तृत्वेहंप्रत्ययगोचरत्वे चात्मनोभ्युपगम्यमाने देहस्येव जडत्वपराक्त्वानात्मत्वादिप्रसङ्गो दुष्परिहरः । अहंप्रत्ययगोचरात्कर्तृतया प्रसिद्धाद्देहात्क्रियाफलस्य स्वर्गादेर्भोक्तुरात्मनोन्यत्वं प्रामाणिकानां प्रसिद्धमेव । तथाहमर्थाज्ज्ञातुरपि विलक्षणः साक्षी प्रत्यगात्मेति प्रतिपत्तव्यम् । एवमविक्रियानुभवस्वरूपस्यैवाभिव्यञ्जको जडोप्यहंकारः स्वा-

---

1. C om. च.
2. C. reads सिध्यति for संभवति.
3. B. reads अत for यत
4. C. has अपि after आश्रयः.
6. C. om. हि.
12. B. reads सन्मात्र for चिन्मात्र.
14. C. reads अपाये for अभावे.
17. B. C. read तद् before क्रियाफलस्य.

श्रयतया तमभिव्यनक्ति । आत्मस्थतयाभिव्यङ्ग्याभिव्यञ्जनमभिव्यञ्जकानां स्वभावः । दर्पणजलखण्डादिर्हि मुखचन्द्रबिम्बगोत्वादिकमात्मस्थतयाभिव्यनक्ति । तत्कृतोयं जानाम्यहमिति भ्रमः । स्वप्रकाशाया अनुभूतेः कथमिव तदभिव्यङ्ग्यजडरूपाहंकारेणाभिव्यङ्ग्यत्वमिति मा वोचः । रविकरनिकराभिव्यङ्ग्यकरतलस्य तदभिव्यञ्जकत्वोपदर्शनात् । जालकरन्ध्रनिष्क्रान्तद्युमणिकिरणानां तदभिव्यङ्ग्येनापि करतलेन स्फुटतरप्रकाशो हि दृष्टचरः । यतोहं जानामीति ज्ञातायमहमर्थश्चिन्मात्रात्मनो न पारमार्थिको धर्मोत एव सुषुप्तिमुक्त्योर्नान्वेति । तत्र ह्यहमुल्लेखविगमेन स्वाभाविकानुभवमात्ररूपेणात्मावभासते । अत एव सुप्तोत्थितः कदाचिन्मामप्यहं न ज्ञातवानिति परामृशति । तस्मात्परमार्थतो निरस्तसमस्तभेदविकल्पनिर्विशेषचिन्मात्रैकरसकूटस्थनित्यसंविदेव भ्रान्त्या ज्ञातृज्ञेयज्ञानरूपविविधविचित्रभेदा विवर्तत इति तन्मूलभूताविद्यानिबर्हणाय नित्यशुद्धबुद्धमुक्तस्वभावब्रह्मात्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्त इति ।

तदिदमौपनिषदपरमपुरुषवरणीयताहेतुगुणविशेषविरहिणामनादिपापवासनादूषिताशेषशेमुषीकाणामनधिगतपदवाक्यस्वरूपतदर्थयाथात्म्यप्रत्यक्षादिसकलप्रमाणवृत्ततत्तदितिकर्त्तव्यतारूपसमीचीनन्यायमार्गाणां विकल्पासहविविधकुतर्ककल्ककल्पितमिति

---

2. B. om बिम्ब.

6. C. om. उप.

8. B. om. हि; B reads अत for यत.

10. B reads चित् for अनुभव.

19. B. C. om तत् after वृत्त.

http://acharya.org

न्यायानुगृहीतवाक्यप्रत्यक्षादिसकलप्रमाणवृत्तयाथात्म्यविद्भिरनादरणीयम् । तथाहि । निर्विशेषवस्तुवादिभिर्निर्विशेषे वस्तुनीदं प्रमाणमिति न शक्यते वक्तुम् । सविशेषवस्तुविषयत्वात्सर्वप्रमाणानाम् । यस्तु स्वानुभवसिद्धमिति स्वगोष्ठीनिष्ठः समयः सोप्यात्मसाक्षिकसविशेषानुभवादेव निरस्तः । इदमहमदर्शमिति केनचिद्विशेषेण विशिष्टविषयत्वात्सर्वेषामनुभवानाम् । सविशेषोप्यनुभूयमानोनुभवः केनचिद्युक्त्याभासेन निर्विशेष इति निष्कृष्यमाणः सत्तातिरेकिभिः स्वासाधारणैः स्वभावविशेषैर्निष्कृष्टव्य इति निष्कर्षहेतुभूतैः सत्तातिरेकिभिः स्वासाधारणैः स्वभावविशेषैः सविशेष एवावतिष्ठते । अतः कैश्चिद्विशेषैर्विशिष्टस्यैव वस्तुनोन्ये विशेषा निरस्यन्त इति न क्वचिन्निर्विशेषवस्तुसिद्धिः । धियो हि धीत्वं स्वयंप्रकाशता च । ज्ञातुर्विषयप्रकाशनस्वभावतयोपलब्धेः । स्वापमदमूर्छासु च सविशेष एवानुभव इति स्वावसरे निपुणतरमुपपादयिष्यामः । स्वाभ्युपगताश्च नित्यत्वादयो ह्यनेकविशेषाः सन्त्येव । ते च न वस्तुमात्रमिति शक्योपपादनाः । वस्तुमात्राभ्युपगमे सत्यपि विधाभेदविवाददर्शनात् । स्वाभिमततद्विधाभेदैश्च स्वमतोपपादनात् । अतः प्रामाणिकविशेषैर्विशिष्टमेव वस्त्विति वक्तव्यम् ।

शब्दस्य तु विशेषेण सविशेष एव वस्तुन्यभिधानसामर्थ्यम् । पदवाक्यरूपेण प्रवृत्तेः । प्रकृतिप्रत्यययोगेन हि पदत्वम् । प्रकृतिप्रत्यययोरर्थभेदेन पदस्यैव विशिष्टार्थप्रतिपादनमवर्जनीयम् । पदभेदश्चार्थभेदनिबन्धनः । पदसंघातरूपस्य वाक्यस्यानेकपदार्थसंसर्गविशेषाभिधायित्वेन निर्विशेषवस्तुप्रतिपादनासामर्थ्यान्न निर्विशेषवस्तुनि शब्दः प्रमाणम् ।

---

1. C. om. वाक्य.
5. B. reads विशेष for सविशेष.
12. B C. read स्व for स्वय

http://acharya.org

प्रत्यक्षस्य निर्विकल्पकसविकल्पकभेदभिन्नस्य न निर्विशेषवस्तुनि प्रमाणभावः । सविकल्पकं जात्याद्यनेकपदार्थविशिष्टविषयत्वादेव सविशेषविषयम् । निर्विकल्पकमपि सविशेषविषयमेव । सविकल्पके स्वस्मिन्ननुभूतपदार्थविशिष्टप्रतिसंधानहेतुत्वात् । निर्विकल्पकं नाम केनचिद्विशेषेण वियुक्तस्य ग्रहणं न सर्वविशेषरहितस्य । तथाभूतस्य कदाचिदपि ग्रहणादर्शनात् । अनुपपत्तेश्च । केनचिद्विशेषेणेदमित्थमिति हि सर्वा प्रतीतिरुपजायते । त्रिकोणसास्नादिसंस्थानविशेषेण विना कस्यचिदपि पदार्थस्य ग्रहणायोगात् । अतो निर्विकल्पकमेकजातीयद्रव्येषु प्रथमपिण्डग्रहणम् । द्वितीयादिपिण्डग्रहणं सविकल्पकमित्युच्यते । तत्र प्रथमपिण्डग्रहणे गोत्वादेरनुवृत्ताकारता न प्रतीयते । द्वितीयादिपिण्डग्रहणेष्वेवानुवृत्तिप्रतीतिः । प्रथमप्रतीत्यनुसंहितवस्तुसंस्थानरूपगोत्वादेरनुवृत्तिधर्मविशिष्टत्वं द्वितीयादिपिण्डग्रहणावसेयमिति द्वितीयादिग्रहणस्य सविकल्पकत्वम् । सास्नादिवस्तुसंस्थानरूपगोत्वादेरनुवृत्तिर्न प्रथमपिण्डग्रहणे गृह्यत इति प्रथमपिण्डग्रहणस्य निर्विकल्पकत्वम् । न पुनः संस्थानरूपजात्यादेरग्रहणात् । संस्थानरूपजात्यादेरप्यैन्द्रियकत्वाविशेषात् । संस्थानेन विना संस्थानिनः प्रतीत्यनुपपत्तेश्च प्रथमपिण्डग्रहणेपि ससंस्थानमेव वस्त्वित्थमिति गृह्यते । अतो द्वितीयादिपिण्डग्रहणेषु गोत्वादेरनुवृत्तिधर्मविशिष्टता संस्था-

---

1. C. reads निर्विशेषे for निर्विशेष.

12. B. reads अनुवृत्ति प्रतीयते for अनुवृत्तिप्रतीति.

14. C. om. आदि before पिण्ड, B. reads द्वितीयादिपिण्डग्रहणे for द्वितीयादिग्रहणस्य.

16. C. om. पिण्ड.

19. B. om. पिण्ड.

http://acharya.org

निवत्संस्थानवच्च सर्वदैव गृह्यत इति तेषु सविकल्पकत्वमेव । अतः प्रत्यक्षस्य कदाचिदपि न निर्विशेषविषयत्वम् ।

अत एव सर्वत्र भिन्नाभिन्नत्वमपि निरस्तम् । इदमित्थमिति प्रतीताविदमित्थंभावयोरैक्यं कथमिव प्रत्येतुं शक्यते । अत्रेत्थंभावः सास्नादिसंस्थानविशेषस्तद्विशेष्यं द्रव्यमिदमंश इत्यनयोरैक्यं प्रतीतिपराहतमेव । तथाहि । प्रथममेव वस्तु प्रतीयमानं सकलेतरव्यावृत्तमेव प्रतीयते । व्यावृत्तिश्च गोत्वादिसंस्थानविशेषविशिष्टतयेदमित्थमिति प्रतीतेः । सर्वत्र विशेषणविशेष्यभावप्रतिपत्तौ तयोरत्यन्तभेदः प्रतीत्यैव सुव्यक्तः । तत्र दण्डकुण्डलादयः पृथक्संस्थानसंस्थिताः स्वनिष्ठाश्च कदाचित्कचिद्द्रव्यान्तरविशेषणतयावतिष्ठन्ते । गोत्वादयस्तु द्रव्यसंस्थानतयैव पदार्थभूताः सन्तो द्रव्यविशेषणतयावस्थिताः । उभयत्र विशेषणविशेष्यभावः समानः । अत एव तयोर्भेदप्रतिपत्तिश्च । इयांस्तु विशेषः । पृथक्स्थितिप्रतिपत्तियोग्या दण्डादयः । गोत्वादयस्तु नियमेन तदनर्हा इति । अतो वस्तुविरोधः प्रतीतिपराहत इति प्रतीतिप्रकारनिह्नवादेवोच्यते । प्रतीतिप्रकारो हीदमित्थमित्येव सर्वसंमतः । तदेतत्सूत्रकारेण नैकस्मिन्नसंभवात् (ब्र. सू. २।२।३१) इति सुव्यक्तमुपपादितम् । अतः प्रत्यक्षस्य सविशेषविषयत्वेन प्रत्यक्षादिदृष्टसंबन्धविशिष्टविषयत्वादनुमानमपि सविशेषविषयमेव । प्रमा-

---

1. C reads सर्वथैव for सर्वदैव.

4 B. C. read तत्र for अत्र.

7. B. reads व्यावर्तमानम् for व्यावृत्तम्.

8. B. reads विशेषस्तद्द्रव्य for विशेष; C. om. इदम्. B. reads सर्वं for सर्वत्र.

13. B. C. read तत. for अत; B. reads प्रतीति for प्रतिपत्ति..

http://acharya.org

णसंख्याविवादेपि सर्वाभ्युपगतप्रमाणानामयमेव विषय इति न केनापि प्रमाणेन निर्विशेषवस्तुसिद्धिः । वस्तुगतस्वभावविशेषैस्तदेव वस्तु निर्विशेषमिति वदन् जननीवन्ध्यात्वप्रतिज्ञावत्स्ववाग्विरोधित्वमपि न जानाति ।

यत्तु प्रत्यक्षं सन्मात्रग्राहित्वेन न भेदविषयं भेदश्च विकल्पासहत्वाद्दुर्निरूप इत्युक्तम् (पृ. २२ पं. १) तदपि जात्यादिविशिष्टस्यैव वस्तुनः प्रत्यक्षविषयत्वाज्जात्यादेरेव प्रतियोग्यपेक्षया वस्तुनः स्वस्य च भेदव्यवहारहेतुत्वाच्च दूरोत्सारितम् । संवेदनवद्रूपादिवच्च परत्र व्यवहारविशेषहेतोः स्वस्मिन्नपि तद्व्यवहारहेतुत्वं युष्माभिरभ्युपेतं भेदस्यापि संभवत्येव । अत एव नानवस्थान्योन्याश्रयणं च । एकक्षणवर्तित्वेपि प्रत्यक्षज्ञानस्य तस्मिन्नेव क्षणे वस्तुभेदरूपतत्संस्थानगोत्वादेर्गृहीतत्वात्क्षणान्तरग्राह्यं न किंचिदिह तिष्ठति ।

अपि च सन्मात्रग्राहित्वे घटोस्ति पटोस्तीति विशिष्टविषया प्रतिपत्तिर्विरुध्यते । यदि च सन्मात्रातिरेकिवस्तुसंस्थानरूपजात्यादिलक्षणो भेदः प्रत्यक्षेण न गृहीतः किमित्यश्वार्थी महिषदर्शनेन निवर्तते । सर्वासु प्रतिपत्तिषु सन्मात्रमेव विषयश्चेत्तत्प्रतिपत्तिविषयसहचारिणः सर्वे शब्दा एकैकप्रतिपत्तिषु किमिति न स्मर्यन्ते । किंचाश्वे हस्तिनि च संवेदनयोरेकविषयत्वेनोपरितनस्य गृहीतग्राहित्वाद्विशेषाभावाच्च स्मृतिवैलक्षण्यं न स्यात् । प्रतिसंवेदनं विशेषाभ्युपगमे प्रत्यक्षस्य विशिष्टार्थवि-

3. B. C. read प्रतिज्ञायामिव स्ववाग्विरोधम् for प्रतिज्ञावत्स्ववाग्विरोधित्वम्.

10. C. has अपि after युष्माभिः.

12. C. has रूप after संस्थान.

16. B. reads लक्षण for लक्षणः.

18. C. has तत् before तत्प्रतिपत्ति.

http://acharya.org

षयत्वमेवाभ्युपगतं भवति । सर्वेषां संवेदनानामेकविषयतायामेकेनैव संवेदनेनाशेषग्रहणादन्धबधिराद्यभावश्च प्रसज्येत ।

न च चक्षुषा सन्मात्रं गृह्यते । तस्य रूपरूपिरूपैकार्थसमवेतपदार्थग्राहित्वात् । नापि त्वचा । स्पर्शवद्वस्तुविषयत्वात् । श्रोत्रादीन्यपि न सन्मात्रविषयाणि । किंतु शब्दरसगन्धलक्षणविशेषविषयाण्येव । अतः सन्मात्रस्य ग्राहकं न किंचिदिह दृश्यते । निर्विशेषसन्मात्रस्य च प्रत्यक्षेणैव ग्रहणे तद्विषयागमस्य प्राप्तविषयत्वेनानुवादकत्वमेव स्यात् । सन्मात्रब्रह्मणः प्रमेयभावश्च । ततो जडत्वनाशित्वादयस्त्वयैवोक्ताः । अतो वस्तुसंस्थानरूपजात्यादिलक्षणभेदविशिष्टविषयमेव प्रत्यक्षम् । संस्थानातिरेकिणोनेकेष्वेकाकारबुद्धिबोध्यस्यादर्शनात्तावतैव गोत्वादिजातिव्यवहारोपपत्तेरतिरेकवादेपि संस्थानस्य संप्रतिपन्नत्वाच्च संस्थानमेव जातिः। संस्थानं नाम स्वासाधारणरूपमिति यथावस्तु संस्थानमनुसंधेयम्। जातिग्रहणेनैव भिन्न इति व्यवहारसंभवात्पदार्थान्तरादर्शनादर्थान्तरवादिनाप्यभ्युपगतत्वाच्च गोत्वादिरेव भेदः । ननु च जात्यादिरेव भेदश्चेत्तस्मिन्गृहीते तद्व्यवहारवद्भेदव्यवहारोपि स्यात् । सत्यम् । भेदश्च व्यवह्रियत एव गोत्वादिव्यवहारात् । गोत्वादिरेव हि सकलेतरस्य व्यावृत्तिः । गोत्वादौ गृहीते सकलेतरसजातीयबुद्धिव्यवहारयोर्निवृत्तेः । भेद-

---

3. C. om. रूप after तस्य

4 B om. वस्तु

6 A. reads च before ग्राहकम्

7 B C. om. च before प्रत्यक्षेण.

11. C. reads अतिरेकेण for अतिरेकिणः.

13. B. C. read असाधारणम् for असाधारण.

15. C. om. अपि.

18. C. om. हि.

http://acharya.org

ग्रहणेनैव ह्यभेदनिवृत्तिः। अयमस्माद्भिन्न इति तु व्यवहारे प्रतियोगिनिर्देशस्य *तदपेक्षत्वात्प्रतियोग्यपेक्षया भिन्न इति व्यवहार इत्युक्तम्।

यत्पुनर्घटादीनां विशेषाणां व्यावर्तमानत्वेनापारमार्थ्यमुक्तम् (पृ० २३ पं० ९) तदनालोचितबाध्यबाधकभावव्यावृत्त्यनुवृत्तिविशेषस्य भ्रान्तिप्रकल्पितम्। द्वयोर्ज्ञानयोर्हि विरोधे बाध्यबाधकभावो बाधितस्यैव व्यावृत्तिः। अत्र घटपटादिषु देशकालभेदेन विरोध एव नास्ति। यस्मिन्देशे यस्मिन्काले यस्य सद्भावः प्रतिपन्नस्तस्मिन्देशे तस्मिन्काले तस्याभावः प्रतिपन्नश्चेत्तत्र विरोधाद्बलवतो बाधकत्वम्। बाधितस्य च निवृत्तिः। देशान्तरकालान्तरसंबन्धितयानुभूतस्यान्यदेशकालयोरभावप्रतीतौ न विरोध इति कथमत्र बाध्यबाधकभावः। अन्यत्र निवृत्तस्यान्यत्र निवृत्तिर्वा कथमुच्यते। रज्जुसर्पादिषु तु तद्देशकालसंबन्धितयैवाभावप्रतीतेर्विरोधो बाधकत्वं व्यावृत्तिश्चेति देशकालान्तरदृष्टस्य देशकालान्तरव्यावर्तमानत्वं मिथ्यात्वव्याप्तं न दृष्टमिति न व्यावर्तमानत्वमात्रमपारमार्थ्ये हेतुः। यत्त्वनुवर्तमानत्वात्सत्परमार्थ इति (पृ० २३ पं० ८) तत्सिद्धमेवेति न साधनमर्हति। अतो न सन्मात्रमेव वस्तु। अनुभूतिसद्विशेषयोश्च विषयविषयिभावेन भेदस्य प्रत्यक्षसिद्धत्वादबाधितत्वाच्चानुभूतिरेव सतीत्येतदपि निरस्तम्।

यत्त्वनुभूतेः स्वयंप्रकाशत्वमुक्तम् (पृ० २५ पं० ३) त-

---

2. C. reads अपेक्षितत्वात् for अपेक्षत्वात्

6. B C. read परिकल्पितम् for प्रकल्पितम्; C reads विरोधे हि for हि विरोधे..

16 C. reads अपारमार्थ्यं for अपारमार्थ्ये.

18. B. reads विषय for विशेष.

http://acharya.org

द्विषयप्रकाशनवेलायां ज्ञातुरात्मनस्तथैव न तु सर्वेषां सर्वदा तथैवेति नियमोस्ति । परानुभवस्य हानोपादानादिलिङ्गकानुमानज्ञानविषयत्वात् । स्वानुभवस्याप्यतीतस्याज्ञासिषमिति ज्ञानविषयत्वदर्शनाच्च । अतोनुभूतिश्चेत्स्वतःसिद्धेति वक्तुं न शक्यते । अनुभूतेरनुभाव्यत्वेननुभूतित्वम् (पृ० २४ पं० ६) इत्यपि दुरुक्तम् । स्वगतातीतानुभवानां परगतानुभवानां चानुभाव्यत्वेनाननुभूतित्वप्रसङ्गात् । परानुभवानुमानानभ्युपगमे च शब्दार्थसंबन्धग्रहणाभावेन समस्तशब्दव्यवहारोच्छेदप्रसङ्गः । आचार्यस्य ज्ञानवत्त्वमनुभूय तदुपसत्तिश्च क्रियते सा च नोपपद्यते । नचान्यविषयत्वेननुभूतित्वम् । अनुभूतित्वं नाम वर्तमानतादशायां स्वसत्तयैव स्वाश्रयं प्रति प्रकाशमानत्वम् । स्वसत्तयैव स्वविषयसाधनत्वं वा । ते चानुभवान्तरानुभाव्यत्वेपि स्वानुभवसिद्धे नापगच्छत इति नानुभूतित्वमपगच्छति । घटादेस्त्वननुभूतित्वमेव । तत्स्वभावविरहात् । नानुभाव्यत्वात् । तथानुभूतेरननुभाव्यत्वेप्यननुभूतित्वप्रसङ्गो दुर्वारः । गगनकुसुमादेरननुभाव्यस्याननुभूतित्वात् । गगनकुसुमादेरननुभूतित्वमसत्त्वप्रयुक्तं नाननुभाव्यत्वप्रयुक्तमिति चेदेवं तर्हि घटादेरप्यननुभूतित्वनिबन्धनमज्ञानाविरोधित्वमेव नानुभाव्यत्वमित्यास्थीयताम् । अनुभूतेरनुभाव्यत्वेज्ञानाविरोधित्वमपि तस्या घटादेरिव प्रसज्यत इति चेदननुभाव्यत्वेपि गगनकुसुमादेरिवाज्ञानाविरोधित्वमपि प्रसज्यत एव । अतोनुभाव्यत्वेननुभूतित्वमित्युपहास्यम् ।

---

1. A. B read तदैव for तथैव.
2 C om. तथैवेति.
9 B. C. read अनुमाय for अनुभूय
14. B reads एतत् for एव । तत्
16 C has अपि after अननुभाव्यस्य.
17. B C read अज्ञानाविरोधित्वमेवाननुभूतित्वनिबन्धनम् for अननुभूतित्वनिबन्धनमज्ञानाविरोधित्वम्

http://acharya.org

यत्तु संविदः स्वतःसिद्धायाः प्रागभावाद्यभावादुत्पत्तिर्निरस्यते (पृ० २५ पं० १०) तदन्धस्य जात्यन्धेन यष्टिः प्रदीयते। प्रागभावस्य ग्राहकाभावादभावो न शक्यते वक्तुम्। अनुभूत्यैव ग्राहणात्। कथमनुभूतिः सती तदानीमेव स्वाभावं विरुद्धमवगमयतीति चेत्। न ह्यनुभूतिः स्वसमानकालवर्तिनमेव विषयीकरोतीत्यस्ति नियमः। अतीतानागतयोरविषयत्वप्रसङ्गात्। अथ मन्यसेऽनुभूतिप्रागभावादेः सिध्यतस्तत्समकालभावनियमोऽस्तीति। किं त्वया कचिदेवं दृष्टं येन नियमं ब्रवीषि। हन्त तर्हि तत एव दर्शनात्प्रागभावादिः सिद्ध इति न तदभावनिह्नवः। तत्प्रागभावं च तत्समकालवर्तिनमनुन्मत्तः को ब्रवीति। इन्द्रियजन्मनः प्रत्यक्षस्य ह्येष स्वभावनियमो यत्स्वसमानकालवर्तिनः पदार्थस्य ग्राहकत्वं न सर्वेषां ज्ञानानां प्रमाणानां च। स्मरणानुमानागमयोगिप्रत्यक्षादिषु कालान्तरवर्तिनोऽपि ग्रहणदर्शनात्। अत एव च प्रमाणस्य प्रमेयाविनाभावः। न हि प्रमाणस्य स्वकालवर्तिनाविनाभावोऽर्थसंबन्धः। अपि तु यद्देशकालादिसंबन्धितया योऽर्थोऽवभासते तस्य तथाविधाकारमिथ्यात्वप्रत्यनीकता। अत इदमपि निरस्तं स्मृतिर्न बाह्यविषया नष्टेऽप्यर्थे स्मृतिदर्शनादिति। अथोच्येत न तावत्संवित्प्रागभावः प्रत्यक्षावसेयः। अवर्तमानत्वात्। न च प्रमाणान्तरावसेयः। लिङ्गाद्यभावात्। न हि संवित्प्रागभावव्याप्तमिह लिङ्गमुपलभ्यते। नानुपलब्धिरपि कस्यचिद्दृश्यते। न चागमस्तद्विषयो दृष्टचरः। अतस्तत्प्रागभावः प्रमाणाभावादेव न सेत्स्यतीति। यद्येवं स्वतःसिद्धत्वविभवं परित्यज्य प्रमाणाभावेवरूढश्चेद्योग्यानुपलब्ध्यैवाभावः समर्थित इत्युपशाम्यतु भवान्।

---

14. B C. om. च after एव, C. has सम after स्व.

20. C. reads अनुपपत्तिः for अनुपलब्धि.,

http://acharya.org

किंच प्रत्यक्षज्ञानं स्वविषयं घटादिकं स्वसत्ताकाले सन्तं साधयत्तस्य न सर्वदा सत्तामवगमयद्दृश्यते इति घटादेः पूर्वोत्तरकालसत्ता न प्रतीयते । तदप्रतीतिश्च संवेदनस्य कालपरिच्छिन्नतया प्रतीतेः । घटादिविषयमेव संवेदनं स्वयं कालानवच्छिन्नं प्रतीतं चेत्तत्संवेदनविषयो घटादिरपि कालानवच्छिन्नः प्रतीयत इति नित्यः स्यात् । नित्यं चेत्संवेदनं स्वतःसिद्धं नित्यमित्येव प्रतीयेत । न च तथा प्रतीयते । एवमनुमानादिसंविदोपि कालानवच्छिन्नाः प्रतीताश्चेत्स्वविषयानपि कालानवच्छिन्नान्प्रकाशयन्तीति ते सर्वे कालानवच्छिन्ना नित्याः स्युः । संविदनुरूपस्वरूपत्वाद्विषयाणाम् । न च निर्विषया संवित्काचिदस्ति । अनुपलब्धेः । विषयप्रकाशनस्वभावतयैवोपलब्धेरेव हि संविदः स्वयंप्रकाशता समर्थिता । संविदो विषयप्रकाशनसत्तास्वभावविरहे सति स्वयंप्रकाशत्वासिद्धेरनुभूतेरनुभवान्तराननुभाव्यत्वाच्च संविदस्तुच्छतैव स्यात् । न च स्वापमदमूर्छादिषु सर्वविषयशून्या केवलैव संवित्परिस्फुरतीति वाच्यम् । योग्यानुपलब्धिपराकृतत्वात् । तास्वपि दशास्वनुभूतिरनुभूता चेत्तस्याः प्रबोधसमयेनुसंधानं स्यात् । न च तदस्ति । नन्वनुभूतस्य पदार्थस्य स्मरणनियमो न दृष्टचरः । अतः स्मरणाभावः कथमनुभवाभावं साधयेत् । उच्यते । निखिलसंस्कारतिरस्कृतिकरदेहविगमादिप्रबलहेतुविरहेप्यस्मरणनियमोनु-

---

9. B. C. read च after ते.

10. C. om. स्वरूप.

11. C. om. स्वभाव.

13. B. C. read प्रकाशता for प्रकाशनसत्ता; B. C. om. अनूभूतेः.

16. C. reads पराहत for पराकृत.

17. B. reads इदम् for तत्.

19. B. has एव after अनुभवाभावम्.

http://acharya.org

भवाभावमेव साधयति । न केवलमस्मरणनियमादनुभवाभावः । सुप्तोत्थितस्येयन्तं कालं न किंचिदहमज्ञासिषमिति प्रत्यवमर्शेनैव सिद्धेः । न च सत्यप्यनुभवे तदस्मरणनियमो विषयावच्छेदविरहादहंकारविगमाद्वेति शक्यते वक्तुम् । अर्थान्तरानुभवस्यार्थान्तराभावस्य चानुभूतार्थान्तरास्मरणहेतुत्वाभावात् । तास्वपि दशास्वहमर्थोनुवर्तत इति च वक्ष्यते । ननु स्वापादिदशास्वपि सविशेषोनुभवोस्तीति पूर्वमुक्तम् । सत्यमुक्तम् । स त्वात्मानुभवः स च सविशेष एवेति स्थापयिष्यते । इह तु सकलविषयविरहिणी निराश्रया च संविन्निषिध्यते । केवलैव संविदात्मानुभव इति चेन्न । सा च साश्रयेति ह्युपपादयिष्यते । अतोनुभूतिः सती स्वयं स्वप्रागभावं न साधयतीति प्रागभावासिद्धिर्न शक्यते वक्तुम् । अनुभूतेरनुभाव्यत्वसंभवोपपादनेनान्यतोप्यसिद्धिर्निरस्ता । तस्मान्न प्रागभावाद्यसिद्ध्या संविदोनुत्पत्तिरुपपत्तिमती ।

यदप्यस्या अनुत्पत्त्या विकारान्तरनिरसनम् (पृ० २५ पं० २०) तदप्यनुपपन्नम् । प्रागभावे व्यभिचारात् । तस्य हि जन्माभावेपि विनाशो दृश्यते । भावेष्विति विशेषणे तर्ककुशलताविष्कृता भवति । तथा च भवदभिमताविद्यानुत्पन्नैव विविधविकारास्पदं तत्त्वज्ञानोदयादन्तवती चेति तस्यामनैकान्त्यम् । तद्विकाराः सर्वे मिथ्याभूता इति चेत् । किं भवतः परमार्थभूतोप्यस्ति विकारः । येनैतद्विशेषणमर्थवद्भवति । न ह्यसावभ्युपगम्यते ।

---

4. B. C. read अननुभवस्य for अनुभवस्य.

6. C. om. अनु.

9. C. om. च.

18. B. C. read विकारास्पदा for विकारास्पदम्.

21. C. om. हि.

http://acharya.org

यदप्यनुभूतिरजत्वात्स्वस्मिन्विभागं न सहत इति (पृ० २५ पं० २१) तदपि नोपपद्यते। अजस्यैवात्मनो देहेन्द्रियादिभ्यो विभक्तत्वात्। अनादित्वेन चाभ्युपगताया अविद्याया आत्मनो व्यतिरेकस्यावश्याश्रयणीयत्वात्। स विभागो मिथ्यारूप इति चेत्। जन्मप्रतिबद्धः परमार्थविभागः किं कचिद्दृष्टस्त्वया। अविद्याया आत्मनः परमार्थतो विभागाभावे हि वस्तुतो ह्यविद्यैव स्यादात्मा। अबाधितप्रतिपत्तिसिद्धदृश्यभेदसमर्थनेन दर्शनभेदोपि समर्थित एव। छेद्यभेदाच्छेदनभेदवत्।

यदपि नास्या दृशेर्दृशिस्वरूपाया दृश्यः कश्चिदपि धर्मोस्ति। दृश्यत्वादेव तेषां न दृशिधर्मत्वमिति च (पृ० २६ पं० १३) तदपि स्वाभ्युपगतैः प्रमाणसिद्धैर्नित्यत्वस्वयंप्रकाशत्वादिधर्मैरुभयमनैकान्तिकम्। न च ते संवेदनमात्रम्। स्वरूपभेदात्। स्वसत्तयैव स्वाश्रयं प्रति कस्यचिद्विषयस्य प्रकाशनं हि संवेदनम्। स्वयंप्रकाशता तु स्वसत्तयैव स्वाश्रयाय प्रकाशमानता। प्रकाशश्च चिदचिदशेषपदार्थसाधारणं व्यवहारानुगुण्यम्। सर्वकालवर्तमानत्वं हि नित्यत्वम्। एकत्वमेकसंख्यावच्छेद इति। तेषां जडत्वाद्यभावरूपतायामपि तथाभूतैरपि तैश्चैतन्यधर्मभूतैरप्यनैकान्त्यमपरिहार्यम्। संविदि तु स्वरूपातिरेकेण जडत्वादिप्रत्यनीकत्वमित्यभावरूपो भावरूपो वा धर्मो नाभ्युपेतश्चेत्तन्निषेधोक्त्या किमपि नोक्तं भवेत्।

---

1. C reads अपि after स्वस्मिन्.
5. C reads प्रतिबन्ध॰ for प्रतिबद्ध॰.
6. B. om हि.
17. C reads चैतन्यधर्मभूतैस्तैः for तैश्चैतन्यधर्मभूतैरपि; B reads चेतन for चैतन्य.
18. B. reads तत् for तु.
19. C. reads तत्तत् for तत्.

http://acharya.org

अपि च संवित्सिध्यति वा न वा । सिध्यति चेत्सधर्मता स्यात् । नो चेत्तुच्छता । गगनकुसुमादिवत् । सिद्धिरेव संविदिति चेत्कस्य कं प्रतीति वक्तव्यम् । यदि न कस्यचित्किंचित्प्रति सा तर्हि न सिद्धिः । सिद्धिर्हि पुत्रत्वमिव कस्यचित्किंचित्प्रति भवति । आत्मन इति चेत्कोयमात्मा । ननु संविदेवेत्युक्तम् । सत्यमुक्तम् । दुरुक्तं तु तत् । तथा हि । कस्यचित्पुरुषस्य किंचिदर्थजातं प्रति सिद्धिरूपतया तत्संबन्धिनी सा संवित्स्वयं कथमिवात्मभावमनुभवेत् । एतदुक्तं भवति । अनुभूतिरिति स्वाश्रयं प्रति स्वसद्भावेनैव कस्यचिद्वस्तुनो व्यवहारानुगुण्यापादनस्वभावो ज्ञानावगतिसंविदाद्यपरनामा सकर्मकोनुभवितुरात्मनो धर्मविशेषो घटमहं जानामीममर्थमवगच्छामि घटमहं संवेद्मीति सर्वेषामात्मसाक्षिकः प्रसिद्धः । एतत्स्वभावतया हि तस्याः स्वयंप्रकाशता भवताप्युपपादिता । अस्य सकर्मकस्य कर्तृधर्मविशेषस्य कर्मत्ववत्कर्तृत्वमपि दुर्घटमिति । तथा ह्यस्य कर्तुः स्थिरत्वं कर्तृधर्मस्य संवेदनाख्यस्य सुखदुःखादेरिवोत्पत्तिस्थितिनिरोधाश्च प्रत्यक्षमीक्ष्यन्ते । कर्तृस्थैर्यं तावत्स एवायमर्थः पूर्वं मयानुभूत इति प्रत्यभिज्ञासिद्धम् । अहं जानाम्यहमज्ञासिषं ज्ञातुरेव ममेदानीं ज्ञानं नष्टमिति च संविदुत्पत्त्यादयः प्रत्यक्षसिद्धा इति कुतस्तदैक्यम् । एवं क्षणभङ्गिन्याः संविद आत्मत्वाभ्युपगमे पूर्वेद्युर्दृष्टमिदमपरेद्युरिदमहमदर्शमिति प्रत्यभिज्ञा च न घटते । अन्येनानुभूतस्य न ह्यन्येन प्रत्यभिज्ञानसंभवः । किंचानुभूतेरा-

1. C. reads सधर्मकता for सधर्मता.

14. B reads कर्मभाववत् for कर्मत्ववत्.

18 B. C. read प्रत्यक्ष after प्रत्यभिज्ञा.

21. B. C. om. इदम् after दृष्टम्.

http://acharya.org

त्मत्वाभ्युपगमे तस्या नित्यत्वेपि प्रतिसंधानासंभवस्तदवस्थः । प्रतिसंधानं हि पूर्वापरकालस्थायिनमनुभवितारमुपस्थापयति नानुभूतिमात्रम् । अहमेवेदं पूर्वमप्यन्वभूवमिति भवतोनुभूतेर्न ह्यनुभवितृत्वमिष्टम् । अनुभूतिरनुभूतिमात्रमेव । संविन्नाम काचिन्निराश्रया निर्विषया वात्यन्तानुपलब्धेर्न संभवतीत्युक्तम् । उभयाभ्युपगता संविदेवात्मेत्युपलब्धिपराहतम् । अनुभूतिमात्रमेव परमार्थ इति निष्कर्षहेत्वाभासाश्च निराकृताः ।

ननु चाहं जानामीत्यस्मत्प्रत्यये योनिदमंशः प्रकाशैकरसश्चित्पदार्थः स आत्मा । तस्मिंस्तद्बलनिर्भासिततया युष्मदर्थलक्षणोहं जानामीति सिध्यन्नहमर्थश्चिन्मात्रातिरेकी युष्मदर्थ एव । नैतदेवम् । अहं जानामीति धर्मधर्मितया प्रत्यक्षप्रतीतिविरोधादेव । किं च

अहमर्थो न चेदात्मा प्रत्यक्त्वं नात्मनो भवेत् ।
अहंबुद्ध्या परागर्थात्प्रत्यगर्थो हि भिद्यते ॥
निरस्ताखिलदुःखोहमनन्तानन्दभाक् स्वराट् ।
भवेयमिति मोक्षार्थी श्रवणादौ प्रवर्तते ॥
अहमर्थविनाशश्चेन्मोक्ष इत्यध्यवस्यति ।
अपसर्पेदसौ मोक्षकथाप्रस्तावगन्धतः ॥
मयि नष्टेपि मत्तोन्या काचिज्ज्ञप्तिरवस्थिता ।
इति तत्प्राप्तये यत्नः कस्यापि न भविष्यति ॥
स्वसंबन्धितया ह्यस्याः सत्ताविज्ञप्तितादि च ।
स्वसंबन्धवियोगे तु ज्ञप्तिरेव न सिध्यति ॥

---

1. C. om. अपि.
2. B. C. read अवस्थायिनम् for स्थायिनम्.
3. C. om. अपि.
6. B. om. एव.
7. C. reads निष्कर्षक for निष्कर्ष.

http://acharya.org

छेत्तुश्छेद्यस्य चाभावे छेदनादेरसिद्धिवत् ।
अतोहमर्थो ज्ञातैव प्रत्यगात्मेति निश्चितम् ॥
विज्ञातारमरे केन जानात्येवेति च श्रुतिः ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति च स्मृतिः ॥
नात्मा श्रुतेरित्यारभ्य सूत्रकारोपि वक्ष्यति ।
ज्ञोत एवेत्यतो नात्मा ज्ञप्तिमात्रमिति स्थितम् ॥

अहंप्रत्ययसिद्धो ह्यस्मदर्थः । युष्मत्प्रत्ययविषयो युष्मदर्थः । तत्राहं जानामीति सिद्धो ज्ञाता युष्मदर्थ इति वचनं जननी मे वन्ध्येतिवद्व्याहतार्थं च । न चासौ ज्ञाताहमर्थोन्याधीनप्रकाशः । स्वयंप्रकाशत्वात् । चैतन्यस्वभावता हि स्वयंप्रकाशता । यः प्रकाशस्वभावः सोनन्याधीनप्रकाशो दीपवत् । न हि दीपादेः स्वप्रभाबलनिर्भासितत्वेन प्रकाशित्वमन्याधीनप्रकाशत्वं च । किं तर्हि दीपः प्रकाशस्वभावः स्वयमेव प्रकाशतेन्यानपि प्रकाशयति प्रभया । एतदुक्तं भवति । यथैकमेव तेजोद्रव्यं प्रभाप्रभावद्रूपेणावतिष्ठते । यद्यपि प्रभा प्रभावद्द्रव्यगुणभूता तथापि तेजोद्रव्यमेव । न शौक्ल्यादिवद्गुणः । स्वाश्रयादन्यत्रापि वर्तमानत्वात् । रूपवत्त्वाच्च शौक्ल्यादिधर्मवैधर्म्यात् । प्रकाशवत्त्वाच्च तेजोद्रव्यमेव । नार्थान्तरम् । प्रकाशवत्त्वं च स्वस्वरूपस्यान्येषां च प्रकाशकत्वात् । अस्यास्तु गुणत्वव्यवहारो नित्यतदाश्रयत्वतच्छेषत्वनिबन्धनः । न चाश्रयावयवा एव विशीर्णाः प्रचरन्तः प्रभेत्युच्यन्ते । मणिद्युमणिप्रभृतीनां विनाशप्रसङ्गात् । दीपेप्यवयवविप्रतिपत्तिः कदाचिदपि न स्यात् । न हि

---

9. C. om. च after व्याहतार्थम्.

12. B. C. read अप्रकाशत्वम् for प्रकाशित्वमन्याधीनप्रकाशत्वम्.

17. B. C. om. धर्म.

http://acharya.org

विशरणस्वभावावयवा दीपाश्चतुरङ्गुलमात्रनियमेन पिण्डीभूता ऊर्ध्वमुद्गम्य ततः पश्चाद्युगपदेव तिर्यगूर्ध्वमधश्चैकरूपा विशीर्णाः प्रचरन्तीति वक्तुं शक्यते । अतः सप्रभाका एव दीपाः प्रतिक्षणमुत्पन्ना विनश्यन्तीति पुष्कलकारणक्रमोपनिपातात्तद्विनाशे विनाशाच्चावगम्यते । प्रभायाः स्वाश्रयसमीपे प्रकाशाधिक्यमौष्ण्याधिक्यमित्याद्युपलब्धिव्यवस्थाप्यम् । अग्न्यादीनामौष्ण्यादिवत् । एवमात्मा चिद्रूप एव चैतन्यगुण इति । चिद्रूपता हि स्वयंप्रकाशता ।

तथा हि श्रुतयः स यथा सैन्धवघनोनन्तरोबाह्यः कृत्स्नो रसघन एव। एवं वा अरेयमात्मानन्तरोबाह्यः कृत्स्नः प्रज्ञानघनः (बृ. ४।५।१३) । विज्ञानघन एव (बृ. २।४।१२) । अत्रायं पुरुषः स्वयंज्योतिर्भवति (बृ.४।३।९) । न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते (बृ. ४।३।३०) । अथ यो वेदेदं जिघ्राणीति स आत्मा (छा. ८।१२।४) । कतम आत्मा योयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः (बृ. ४।३।७)। एष हि द्रष्टा श्रोता रसयिता घ्राता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः (प्र. ४।९)। विज्ञातारमरे केन विजानीयात् (बृ. २।४।१४)।जानात्येवायं पुरुषः । न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम् (छा. ७।२६।२) । स उत्तमः पुरुषः ...नोपजनं स्मरन्निदं शरीरम् (छा. ८।१२।३) । एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति (प्र.६।५) । तस्माद्वा एतस्मान्मनोमयात् । अन्योन्तर आत्मा विज्ञानमयः

---

1. C. reads विशरणस्वभावा दीपावयवाः for विशरणस्वभावावयवा दीपाः.

3. C. reads शक्यते वक्तुम् for वक्तुं शक्यते.

7. C. reads चैतन्यगुणकः for चैतन्यगुणः.

16. C. reads घ्राता रसयिता for रसयिता घ्राता.

http://acharya.org

(तै.२।४।१) इत्याद्याः। वक्ष्यति च ज्ञोत एव (ब्र. सू. २।३।१९) इति । अतः स्वयंप्रकाशोयमात्मा ज्ञातैव न प्रकाशमात्रम् । प्रकाशत्वादेव कस्यचिदेव भवेत्प्रकाशः प्रदीपादिप्रकाशवत् । तस्मान्नात्मा भवितुमर्हति संवित् । संविदनुभूतिज्ञानादिशब्दाः संबन्धिशब्दा इति च शब्दार्थविदः । न हि लोकवेदयोर्जानात्यादेरकर्मकस्याकर्तृकस्य च प्रयोगो दृष्टचरः ।

यच्चोक्तम् (पृ. २६ पं. ५) अजडत्वात्संविदेवात्मेति । तत्रेदं प्रष्टव्यम् । अजडत्वमिति किमभिप्रेतम् । स्वसत्ताप्रयुक्तप्रकाशत्वमिति चेत् । तथा सति दीपादिष्वनैकान्त्यम् । संविदतिरिक्तप्रकाशधर्मानभ्युपगमेनासिद्धिरिति विरोधश्च । अव्यभिचरितप्रकाशसत्ताकत्वमपि सुखादिषु व्यभिचारान्निरस्तम् । यद्युच्येत सुखादिरव्यभिचरितप्रकाशोप्यन्यस्मै प्रकाशमानतया घटादिरिव जडत्वेन नात्मेति । ज्ञानं किं स्वस्मै प्रकाशते । तदपि ह्यन्यस्यैवाहमर्थस्य ज्ञातुरवभासते । अहं सुखीतिवज्जानाम्यहमिति । अतः स्वस्मै प्रकाशमानत्वमेवंरूपमजडत्वं संविद्यसिद्धम् । तस्मात्स्वात्मानं प्रति स्वसत्तयैव सिध्यन्नजडोहमर्थ एवात्मा । ज्ञानस्यापि प्रकाशता तत्संबन्धायत्ता । तत्कृतमेव हि ज्ञानस्य सुखादेरिव स्वाश्रयचेतनं प्रति प्रकटत्वमितरं प्रत्यप्र-

---

3. C. reads दीपादिवत् for प्रदीपादिप्रकाशवत्.

7. C. om. एव.

8. B. reads द्रष्टव्यम् for प्रष्टव्यम्; B. om. प्रयुक्त.

11. C. reads दुःख after सुख.

13. C. reads वा after ज्ञानम्.

15. B. C. om. एवम्.

16. B. reads स्वमात्मानम् for स्वात्मानम्.

17. C. om. हि.

http://acharya.org

कटत्वं च। अतो न ज्ञप्तिमात्रमात्मा। अपि तु ज्ञातैवाहमर्थः।

अथ यदुक्तम् (पृ. २६ पं. ८) अनुभूतिः परमार्थतो निर्विषया निराश्रया च सती भ्रान्त्या ज्ञातृतयावभासते रजततयेव शुक्तिः। निरधिष्ठानभ्रमानुपपत्तेरिति। तदयुक्तम्। तथा सत्यनुभवसामानाधिकरण्येनानुभविताहमर्थः प्रतीयेतानुभूतिरहमिति। पुरोवस्थितभास्वरद्रव्याद्याकारतया रजतादिरिव। अत्र तु पृथगवभासमानैवेयमनुभूतिरर्थान्तरमहमर्थं विशिनष्टि दण्ड इव देवदत्तम्। तथा ह्यनुभवाम्यहमिति प्रतीतिः। तदेवमस्मदर्थमनुभूतिविशिष्टं प्रकाशयन्ननुभवाम्यहमिति प्रत्ययो दण्डमात्रे दण्डी देवदत्त इतिप्रत्ययवद्विशेषणभूतानुभूतिमात्रावलम्बनः कथमिव प्रतिज्ञायेत।

यदप्युक्तम् (पृ. २६ पं. ९) स्थूलोहमित्यादिदेहात्माभिमानवत एव ज्ञातृत्वप्रतिभासनाज्ज्ञातृत्वमपि मिथ्येति। तदयुक्तम्। आत्मतयाभिमताया अनुभूतेरपि मिथ्यात्वं स्यात्। तद्वत एव प्रतीतेः। सकलेतरोपमर्दितत्वज्ञानाबाधितत्वेनानुभूतेर्न मिथ्यात्वमिति चेत्। हन्तैवं सति तदबाधादेव ज्ञातृत्वमपि न मिथ्या।

यदप्युक्तम् (पृ. २६ पं. १०) अविक्रियस्यात्मनो ज्ञानक्रियाकर्तृत्वरूपं ज्ञातृत्वं न संभवति। अतो ज्ञातृत्वं विक्रियात्मकं जडं विकारास्पदाव्यक्तपरिणामाहंकारग्रन्थिस्थमिति न ज्ञातृत्वमात्मनः। अपि त्वन्तःकरणरूपस्याहंकारस्य। कर्तृत्वादिर्हि रूपादिवद्दृश्यधर्मः। कर्तृत्वे चाहंप्रत्ययगोचरत्वे चात्म-

1. B. reads ज्ञानं नाम पुरुषस्यार्थविशेष प्रत्युपादानादिधर्मविशेषः। after अर्थः.

7. B. reads वत् for इव.

10 C reads अवलम्बिनः for अवलम्बनः.

22. B reads रूपादिरिव for रूपादिवत्; B. om. च after कर्तृत्वे.

http://acharya.org

नोभ्युपगम्यमाने देहस्येवानात्मत्वपराक्त्वजडत्वादिप्रसङ्गश्चेति। नैतदुपपद्यते। देहस्येवाचेतनत्वप्रकृतिपरिणामित्वदृश्यत्वपराक्त्वपरार्थत्वादियोगादन्तःकरणरूपस्याहंकारस्य चेतनासाधारणस्वभावत्वाच्च ज्ञातृत्वस्य। एतदुक्तं भवति। यथा देहादिर्दृश्यत्वपराक्त्वादिभिर्हेतुभिस्तत्प्रत्यनीकद्रष्टृत्वप्रत्यक्त्वादेर्विविच्यत एवमन्तःकरणरूपाहंकारोपि तद्दृश्यत्वादेव तैरेव हेतुभिस्तस्माद्विविच्यत इति। अतो विरोधादेव न ज्ञातृत्वमहंकारस्य। दृशित्ववत्। यथा दृशित्वं तत्कर्मणोहंकारस्य नाभ्युपगम्यते तथा ज्ञातृत्वमपि न तत्कर्मणोभ्युपगन्तव्यम्। न च ज्ञातृत्वं विक्रियात्मकम्। ज्ञातृत्वं हि ज्ञानगुणाश्रयत्वम्। ज्ञानं चास्य नित्यस्य स्वाभाविकधर्मत्वेन नित्यम्। नित्यत्वं चात्मनो नात्मा श्रुतेः (ब्र. सू. २।३।१८) इत्यादिषु वक्ष्यति। ज्ञोत एव (ब्र. सू. २।३।१९) इत्यत्र ज्ञ इति व्यपदेशेन ज्ञानगुणाश्रयत्वं च स्वाभाविकमिति वक्ष्यति। अस्य ज्ञानस्वरूपस्यैव मणिप्रभृतीनां प्रभाश्रयत्वमिव ज्ञानाश्रयत्वमप्यविरुद्धमित्युक्तम्। स्वयमपरिच्छिन्नमेव ज्ञानं संकोचविकासार्हमित्युपपादयिष्यामः। अतः क्षेत्रज्ञावस्थायां कर्मणा संकुचितस्वरूपं तत्तत्कर्मानुगुणतरतमभावेन वर्तते। तच्चेन्द्रियद्वारेण व्यवस्थितम्। इममिन्द्रियद्वारा ज्ञानप्रसरमपेक्ष्योदयास्तमयव्यपदेशः प्रवर्तते। ज्ञानप्रसरे तु कर्तृत्वमस्त्येव। तच्च न स्वाभाविकम्। अपितु कर्मकृतमित्यविक्रियस्वरूप एवात्मा। एवंरूपाविक्रियात्मकं ज्ञातृत्वं ज्ञानस्वरूप-

---

2. B reads परिणामत्व for परिणामित्व.
4. C reads यदा for यथा
5. C reads तत्तत् for तत्.
6. B. C read द्रव्यत्वात् for दृश्यत्वात्.
13 B. C. om. गुण
14. C. reads च after अस्य; B reads द्युमणि for मणि.
18. B. reads तम् before इमम्; B. reads द्वार for द्वारा.

http://acharya.org

स्यात्मन एवेति न कदाचिदपि जडस्याहंकारस्य ज्ञातृत्वसंभवः । जडस्वभावस्याहंकारस्य चित्संनिधानेन तच्छायापत्त्या तत्संभव इति चेत् । केयं चिच्छायापत्तिः । किमहंकारच्छायापत्तिः संविद उत संविच्छायापत्तिरहंकारस्य । न तावत्संविदः । संविदि ज्ञातृत्वानभ्युपगमात् । नाप्यहंकारस्य । तस्य जडस्योक्तरीत्या ज्ञातृत्वायोगात् । द्वयोरप्यचाक्षुषत्वाच्च । न ह्यचाक्षुषाणां छाया दृष्टा । अथाग्निसंपर्कादयःपिण्डौष्ण्यवच्चित्संपर्काज्ज्ञातृत्वोपलब्धिरिति । नैतत् । संविदि वास्तवज्ञातृत्वानभ्युपगमादेव न तत्संपर्कादहंकारे ज्ञातृत्वं तदुपलब्धिर्वा । अहंकारस्य त्वचेतनस्य ज्ञातृत्वासंभवादेव सुतरां न तत्संपर्कात्संविदि ज्ञातृत्वं तदुपलब्धिर्वा ।

यदप्युक्तमुभयत्र वस्तुतो न ज्ञातृत्वमस्ति । अहंकारस्त्वनुभूतेरभिव्यञ्जकः स्वात्मस्थामेवानुभूतिमभिव्यनक्त्यादर्शादिवदिति । तदयुक्तम् । आत्मनः स्वयंज्योतिषो जडरूपाहंकाराभिव्यङ्ग्यत्वायोगात् । तदुक्तम्

शान्ताङ्गार इवादित्यमहंकारो जडात्मकः ।
स्वयंज्योतिषमात्मानं व्यनक्तीति न युक्तिमत् ॥ (आ. सि. पृ. २७) इति ।

स्वयंप्रकाशानुभवाधीनसिद्धयो हि सर्वे पदार्थाः । तत्र तदायत्तप्रकाशोचिदहंकारोनुदितानस्तमितस्वरूपप्रकाशमशेषार्थसिद्धिहेतुभूतमनुभवमभिव्यनक्तीत्यात्मविदः परिहसन्ति । किं चा-

---

2 B. reads अपि after स्वभावस्य; C. reads चिति for चित्.

3. C reads चिति for चित्.

5. B C. read उक्तरीत्या तस्य जडस्य for तस्य जडस्योक्तरीत्या.

7. B. C. read छायापत्तिः for छाया, C. reads चिति for चित्.

हंकारानुभवयोः स्वभावविरोधादनुभूतेरननुभूतित्वप्रसङ्गाच्च न व्यङ्ग्यव्यञ्जकभावः¹। तथोक्तम्

व्यङ्ग्यव्यञ्जकत्वमन्योन्यं न च स्यात्प्रातिकूल्यतः।
व्यङ्ग्यत्वेननुभूतित्वमात्मनि स्याद्यथा घटे॥ (आ. सि. पृ० २७) इति।

नच रविकरनिकराणां स्वाभिव्यञ्जककरतलाभिव्यङ्ग्यत्ववत्संविदभिव्यङ्ग्याहंकाराभिव्यङ्ग्यत्वं संविदः साधीयः। तत्रापि रविकरनिकराणां करतलाभिव्यङ्ग्यत्वाभावात्। करतलप्रतिहतगतयो हि रश्मयो बहुलाः स्वयमेव स्फुटतरमुपलभ्यन्त इति तद्बाहुल्यमात्रहेतुत्वात्करतलस्य नाभिव्यञ्जकत्वम्। किं चास्य संविद्रूपस्यात्मनोहंकारनिर्वर्त्याभिव्यक्तिः किंरूपा। न तावदुत्पत्तिः। स्वतःसिद्धतयानन्योत्पाद्यताभ्युपगमात्। नापि तत्प्रकाशनम्। तस्या अनुभवान्तराननुभाव्यत्वात्। तत एव च न तदनुभवसाधनानुग्रहः। स हि द्विधा। ज्ञेयस्येन्द्रियसंबन्धहेतुत्वेन वा। यथा जातिनिजसुखादिग्रहणे व्यक्तिदर्पणादीनां नयनादीन्द्रियसंबन्धहेतुत्वेन। बोद्धृगतकल्मषापनयनेन वा। यथा परतत्त्वावबोधसाधनस्य शास्त्रस्य शमदमादिना। यथोक्तम्

करणानामभूमित्वान्न तत्संबन्धहेतुता। (आ. सि. पृ. २८) इति।

किं चानुभूतेरनुभाव्यत्वाभ्युपगमेऽप्यहमर्थेन न तदनुभवसाधनानुग्रहः सुवचः। स ह्यनुभाव्यानुभवोत्पत्तिप्रतिबन्धक-

---

12. C. reads तत् before उत्पत्ति; B. reads उत्पाद्यत्व for उत्पाद्यता.
13. B. reads तस्य for तस्याः.
17. B. reads अवबोधन for अवबोध; B. reads शमदमादीनाम् for शमदमादिना.
20. C. reads असमर्थेन for अहमर्थेन.
21. C. reads प्रतिबन्ध for प्रतिबन्धक.

निरसनेन भवेत् । यथा रूपादिग्रहणोत्पत्तिविरोधिसंतमसनिरसनेन चक्षुषो दीपादिना । न चेह तथाविधं निरसनीयं संभाव्यते । न तावत्संविदात्मगतं तज्ज्ञानोत्पत्तिविरोधि किंचिदप्यहंकारापनेयमस्ति । अस्ति ह्यज्ञानमिति चेन्न । अज्ञानस्याहंकारापनोद्यत्वानभ्युपगमात् । ज्ञानमेव ह्यज्ञानस्य निवर्तकम् । न च संविदाश्रयत्वमज्ञानस्य संभवति । ज्ञानसमानाश्रयत्वात्तत्समानविषयत्वाच्च । ज्ञातृभावविषयभावविरहिते ज्ञानमात्रे साक्षिणि नाज्ञानं संभवितुमर्हति । यथा ज्ञानाश्रयत्वप्रसक्तिशून्यत्वेन घटादेर्नाज्ञानाश्रयत्वं तथा ज्ञानमात्रेपि ज्ञानाश्रयत्वाभावेन नाज्ञानाश्रयत्वं स्यात् । संविदोज्ञानाश्रयत्वाभ्युपगमेप्यात्मतयाभ्युपेतायास्तस्या ज्ञानविषयत्वाभावेन ज्ञानेन न तद्गताज्ञाननिवृत्तिः । ज्ञानं हि स्वविषय एवाज्ञानं निवर्तयति । यथा रज्ज्वादौ । अतो न केनापि कदाचित्संविदाश्रयमज्ञानमुच्छिद्येत । अस्य च सदसदनिर्वचनीयस्याज्ञानस्य स्वरूपमेव दुर्निरूपमित्युपरिष्टाद्वक्ष्यते । ज्ञानप्रागभावरूपस्य चाज्ञानस्य ज्ञानोत्पत्तिविरोधित्वाभावेन न तन्निरसनेन तज्ज्ञानसाधनानुग्रहः । अतो न केनापि प्रकारेणाहंकारेणानुभूतेरभिव्यक्तिः ।

न च स्वाश्रयतयाभिव्यङ्ग्याभिव्यञ्जनमभिव्यञ्जकानां स्वभावः । प्रदीपादिष्वदर्शनात् । यथावस्थितपदार्थप्रतीत्यनुगुणस्वाभाव्याच्च ज्ञानतत्साधनयोरनुग्राहकस्य च । तच्च स्वतःप्रामाण्यं न्यायसिद्धम् । न च दर्पणादिर्मुखादेरभिव्यञ्जकः ।

---

2. B. reads तथाविध for तथाविधम्.
5. C. reads अपोद्यत्व for अपनोद्यत्व.
8. B. C. read भवितुम् for संभवितुम्.
11. B. reads न ज्ञानेन for ज्ञानेन न.
17. C. om. अहंकारेण.
21. B. C. read प्रामाण्य for प्रामाण्यम्.

http://acharya.org

अपि तु चाक्षुपतेजःप्रतिफलनरूपदोपहेतुः । तद्दोषकृतश्च तत्रान्यथावभासः । अभिव्यञ्जकस्त्वालोकादिरेव । न चेह तथाहंकारेण संविदि स्वप्रकाशायां तादृशदोषापादनं संभवति । व्यक्तेस्तु जातिराकार इति तदाश्रयतया प्रतीतिः । न तु व्यक्तिव्यङ्ग्यत्वात् । अतोन्तःकरणभूताहंकारस्थतया संविदुपलब्धेर्वस्तुतो दोषतो वा न किंचिदिह कारणमिति नाहंकारस्य ज्ञातृत्वं तथोपलब्धिर्वा । तस्मात्स्वत एव ज्ञातृतया सिध्यन्नहमर्थ एव प्रत्यगात्मा न ज्ञप्तिमात्रम् । अहंभावविगमे तु ज्ञप्तेरपि न प्रत्यक्त्वसिद्धिरित्युक्तम् । तमोगुणाभिभवात्परागर्थानुभवाभावाच्चाहमर्थस्य विविक्तस्फुटप्रतिभासाभावेप्याप्रबोधादहमित्येकाकारेणात्मनः स्फुरणात्सुषुप्तावपि नाहंभावविगमः । भवदभिमताया अनुभूतेरपि तथैव प्रथेति वक्तव्यम् । न हि सुप्तोत्थितः कश्चिदहंभाववियुक्तार्थान्तरप्रत्यनीकाकारा ज्ञप्तिरहमज्ञानसाक्षितयावतिष्ठ इत्येवंविधां स्वापसमकालामनुभूतिं परामृशति । एवं हि सुप्तोत्थितस्य परामर्शः सुखमहमस्वाप्समिति । अनेन प्रत्यवमर्शेन तदानीमप्यहमर्थस्यैवात्मनः सुखित्वं ज्ञातृत्वं च ज्ञायते। न च वाच्यं यथेदानीं सुखं भवति तथा तदानीमस्वाप्समित्येषा प्रतिपत्तिरिति । अतद्रूपत्वात्प्रतिपत्तेः । न चाहमर्थस्यात्मनोस्थिरत्वेन तदानीमहमर्थस्य सुखित्वानुसंधानानुपपत्तिः । यतः सुषुप्तिदशायाः प्रागनुभूतं वस्तु सुप्तोत्थितो मयेदं कृतं मयेदमनुभूतमहमेवेदमवोचमिति परामृशति । एतावन्तं कालं न किंचिदहमज्ञासिषमिति च परामृशतीति चेत् । ततः किम् । न

---

5. C. reads रूप for भूत.
7. B. reads स्वभावतः before स्वतः.
10 B reads प्रकाश for प्रतिभास.
20. B. reads च after प्रागनुभूतम्.
21. B. reads एवम् for एवेदम्.

किंचिदिति कृत्स्नप्रतिषेध इति चेन्न । अहमवेदिषमिति वेदितुरहमर्थस्यानुवृत्तेः । वेद्यविषयो हि स प्रतिषेधः । न किंचिदिति निषेधस्य कृत्स्नविषयत्वे भवदभिमतानुभूतिरपि प्रतिषिद्धा स्यात् । सुषुप्तिसमयेप्यनुसंधीयमानमहमर्थमात्मानं ज्ञातारमहमिति परामृश्य न किंचिदवेदिषमिति वेदने तस्य प्रतिषिध्यमाने तस्मिन्काले प्रतिषिध्यमानाया वित्तेः सिद्धिमनुवर्तमानस्य ज्ञातुरहमर्थस्य चासिद्धिमनेनैव न किंचिदहमवेदिषमिति परामर्शेन साधयंस्तमिममर्थं देवानामेव प्रियः साधयतु। मामप्यहं न ज्ञातवानित्यहमर्थस्यापि तदानीमननुसंधानं प्रतीयत इति चेत्स्वानुभवस्ववचनयोर्विरोधमपि न जानन्ति भवन्तः । अहं मां न ज्ञातवानिति ह्यनुभववचने मामिति कि निषिध्यत इति चेत्साधु पृष्टं भवता । तदुच्यते । अहमर्थस्य ज्ञातुरनुवृत्तेर्न स्वरूपं निषिध्यते । अपि तु प्रबोधसमयेनुसंधीयमानस्याहमर्थस्य वर्णाश्रमादिविशिष्टता । अहं मां न ज्ञातवानित्युक्तेर्विषयो विवेचनीयः । जागरितावस्थानुसंहितजात्यादिविशिष्टोस्मदर्थो मामित्यंशस्य विषयः । स्वापावस्थाप्रसिद्धोविशदस्वानुभवैकतानश्चाहमर्थोहमित्यंशस्य विषयः । अत्र सुप्तोहमीदृशोहमिति च मामपि न ज्ञातवानहमित्येव खल्वनुभवप्रकारः।

किं च सुषुप्तावात्माज्ञानसाक्षित्वेनास्त इति हि भवदीया प्रक्रिया । साक्षित्वं च साक्षाज्ज्ञातृत्वमेव । न ह्यजानतः साक्षित्वम् । ज्ञातैव लोकवेदयोः साक्षीति व्यपदिश्यते न ज्ञान-

4. C. reads तु for अपि.
6. B. C. read निषिध्यमानायाः for प्रतिषिध्यमानायाः.
7. B. C. om. अहम् after किंचित्.
8. B. C om. प्रियः.
16 C. reads स्वाप्यय for स्वाप; B. reads प्रसिद्ध for प्रसिद्धः.
18. C. om. न.
21. B. C. read हि after ज्ञातैव.

http://acharya.org

मात्रम् । स्मरति च भगवान्पाणिनिः साक्षाद्द्रष्टरि संज्ञायाम् (पा० सू० ५।२।९१) इति साक्षाज्ज्ञातर्येव साक्षिशब्दम् । सचायं साक्षी जानामीति प्रतीयमानोस्मदर्थ एवेति कुतस्तदानीमहमर्थो न प्रतीयेत । आत्मने स्वयमवभासमानोहमित्येवावभासत इति स्वापाद्यवस्थास्वप्यात्मा प्रकाशमानोहमित्येवावभासत इति सिद्धम् ।

यत्तु मोक्षदशायामहमर्थो नानुवर्तेत इति । तदपेशलम् । तथा सत्यात्मनाश एवापवर्गः प्रकारान्तरेण प्रतिज्ञातः स्यात् । न चाहमर्थो धर्ममात्रं येन तद्विगमेप्यविद्यानिवृत्ताविव स्वरूपमवतिष्ठेत । प्रत्युत स्वरूपमेवाहमर्थ आत्मनः । ज्ञानं तु तस्य धर्मः । अहं जानामि ज्ञानं मे जातमिति चाहमर्थधर्मतया ज्ञानप्रतीतेरेव । अपि च यः परमार्थतो भ्रान्त्या वाध्यात्मिकादिदुःखैर्दुःखितयात्मानमनुसंधत्तेहं दुःखीति सर्वमेतद्दुःखजातम[illegible]निर्भवमपोह्य कथमहमनाकुलः स्वस्थो भवेयमित्युत्पन्नमोक्ष[illegible]गः स एव तत्साधने प्रवर्तते । स साधनानुष्ठानेन यद्यहमे[illegible] न भविष्यामीत्यवगच्छेदपसर्पेदेवासौ मोक्षकथाप्रस्ताव[illegible] ततश्चाधिकारिविरहादेव सर्वं मोक्षशास्त्रमप्रमाणं स्यात् । अ[illegible] लक्षितं प्रकाशमात्रमपवर्गेवतिष्ठत इति चेत् । किमनेन । [illegible]मा[illegible]नष्टेपि किमपि प्रकाशमात्रमवतिष्ठत इति मत्वा न हि [illegible]वात्म्पूर्वमधिकारी प्रयतते । अतोहमर्थस्यैव ज्ञातृतया [illegible]अप्रत्यगात्मत्वम् ।

अ[illegible]

3. reads साक्षिशब्दः for साक्षिशब्दम्.

इ[illegible] C. reads एवम् for मे.

[illegible]. reads तम् before आत्मानम्; B. reads एव तत् for एतत्.

6. . C. om. कथा.

19. [illegible]. reads नष्टे for विनष्टेपि.

20. [illegible]. reads बुद्धिपूर्वकारी for बुद्धिपूर्वमधिकारी.

http://acharya.org

स च प्रत्यगात्मा मुक्तावप्यहमित्येव प्रकाशते । स्वस्मै प्रकाशमानत्वात् । यो यः स्वस्मै प्रकाशते स सर्वोहमित्येव प्रकाशते यथा तथावभासमानत्वेनोभयवादिसंमतः संसार्यात्मा । यः पुनरहमिति न चकास्ति नासौ स्वस्मै प्रकाशते यथा घटादिः । स्वस्मै प्रकाशते चायं मुक्तात्मा । स तस्मादहमित्येव प्रकाशते । न चाहमिति प्रकाशमानत्वेन तस्याज्ञत्वसंसारित्वादिप्रसङ्गः । मोक्षविरोधादज्ञत्वाद्यहेतुत्वाच्चाहंप्रत्ययस्य । अज्ञानं नाम स्वरूपाज्ञानमन्यथाज्ञानं विपरीतज्ञानं वा । अहमित्येवात्मनः स्वरूपमिति स्वरूपज्ञानरूपोहंप्रत्ययो नाज्ञत्वमापादयति कुतः संसारित्वम् । अपि तु तद्विरोधित्वान्नाशयत्येव । ब्रह्मात्मभावापरोक्षनिर्धूतनिरवशेषाविद्यानामपि वामदेवादीनामहमित्येवात्मानुभवदर्शनाच्च । श्रूयते हि तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेहं मनुरभवं सूर्यश्चेति (बृ० १।४।१०) । अहमेव च संवर्तामि भविष्यामीत्यादि । सकलेतराज्ञानविरोधिनः सच्छब्दप्रत्ययमात्रभाजः परस्य ब्रह्मणो व्यवहारोप्येवमेव । हन्ताहमिमा[illegible]स्रो देवताः (छा० ६।३।२) । बहु स्यां प्रजायेय (छा० १[illegible]३) । स ऐक्षत लोकान्नु सृजै (ऐ० १।१) इति । तथा

अहमात्मा गुडाकेश (गी० १०।२०) । न त्वेव नासम् (गी० २।१२) ।

---

1. B D. read स्वयम् after स्वस्मै.
6. B. om. आदि after ससारित्व.
7. B. reads मोक्षाविरोधात् for मोक्षविरोधात्.
13. reads वर्तामि for सवर्तामि.
17. C. reads ईक्षत for ऐक्षत.
19. B. om. अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तमः.

http://acharya.org

अहं कृत्स्नस्य जगत: प्रभव: प्रलयस्तथा। (गी० ७।६)
अहं सर्वस्य प्रभवो मत्त: सर्वं प्रवर्त्तते। (गी० १०।८)
तेषामहं समुद्धर्ता मृत्युसंसारसागरात्। (गी० १२।७)

अहं बीजप्रद: पिता (गी० १४।४)। वेदाहं समतीतानि (गी० ७।२६) इत्यादिषु। यद्यहमित्येवात्मन: स्वरूपं कथं तर्ह्यहंकारस्य क्षेत्रान्तर्भावो भगवतैवोपदिश्यते।

महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च। (गी० १३।५) इति।

उच्यते। स्वरूपोपदेशेषु सर्वेष्वहमित्येवोपदेशात्तथैवात्मस्वरूपप्रतिपत्तेश्चाहमित्येव प्रत्यगात्मन: स्वरूपम्। अव्यक्तपरिणामभेदस्याहंकारस्य क्षेत्रान्तर्भावो भगवतोपदिश्यते स त्वनात्मनि देहेऽहंभावकरणहेतुत्वेनाहंकार इत्युच्यते। अस्य त्वहंकारशब्दस्याभूततद्भावेऽर्थे च्विप्रत्ययमुत्पाद्य व्युत्पत्तिर्द्रष्टव्या। अयमेव त्वहंकार उत्कृष्टजनावमानहेतुर्गर्वापरनामा शास्त्रेषु बहुशो हेयतया प्रतिपाद्यते। तस्माद्बाधकापेताहंबुद्धि: साक्षादात्मगोचरैव। शरीरगोचरा त्वहंबुद्धिरविद्यैव। यथोक्तं भगवता पराशरेण

श्रूयतां चाप्यविद्याया: स्वरूपं कुलनन्दन।
अनात्मन्यात्मबुद्धिर्येति।

यदि ज्ञप्तिमात्रमेवात्मा तदानात्मन्यात्माभिमाने शरीरे ज्ञप्तिमात्रप्रतिभास: स्यान्न ज्ञातृत्वप्रतिभास:। तस्माज्ज्ञाताहमर्थ एवात्मा। तथोक्तम्

अत: प्रत्यक्षसिद्धत्वादुक्तन्यायागमान्वयात्।
अविद्यायोगतश्चात्मा ज्ञाताहमिति भासते॥ (आ. सि. पृ. ३२)

इति। तथा च

---

6. C om. एव after भगवता.

19. C. reads अवभास: for प्रतिभास: after मात्र; B. om. त्व

देहेन्द्रियमनःप्राणधीभ्योन्योनन्यसाधनः ।
नित्यो व्यापी प्रतिक्षेत्रमात्मा भिन्नः स्वतः सुखी ॥ (आ. सि. पृ. ६) इति । अनन्यसाधनः स्वप्रकाशः । व्याप्यतिसूक्ष्मतया सर्वाचेतनान्तःप्रवेशस्वभावः ।

यदुक्तम् (पृ. १८) दोषमूलत्वेनान्यथासिद्धिसंभावनया सकलभेदावलम्बिप्रत्यक्षस्य शास्त्रबाध्यत्वमिति । कोयं दोष इति वक्तव्यं यन्मूलतया प्रत्यक्षस्यान्यथासिद्धिः । अनादिभेदवासनैव हि दोष इति चेत् । भेदवासनायास्तिमिरादिवद्यथावस्थितवस्तुविपरीतज्ञानहेतुत्वं किमन्यत्र ज्ञातपूर्वम् । अनेनैव शास्त्रविरोधेन ज्ञास्यत इति चेन्न । अन्योन्याश्रयणात् । शास्त्रस्य निरस्तनिखिलविशेषवस्तुबोधित्वनिश्चये सति भेदवासनाया दोषत्वनिश्चयो भेदवासनाया दोषत्वनिश्चये सति शास्त्रस्य निरस्तनिखिलविशेषवस्तुबोधित्वनिश्चय इति । किं च यदि भेदवासनामूलत्वेन प्रत्यक्षस्य विपरीतार्थत्वं शास्त्रमपि तन्मूलत्वेन तथैव स्यात् ।

अथोच्येत दोषमूलत्वेपि शास्त्रस्य प्रत्यक्षावगतसकलभेदनिरसनज्ञानहेतुत्वेन परत्वात्तत्प्रत्यक्षस्य बाधकमिति । तन्न । दोषमूलत्वे ज्ञाते सति परत्वमकिंचित्करम् । रज्जुसर्पज्ञाननिमित्तभये सति भ्रान्तोयमिति परिज्ञातेन केनचिन्नायं सर्पो मा भैषीरित्युक्तेपि भयानिवृत्तिदर्शनात् । शास्त्रस्य च दोषमूलत्वं श्रवणवेलायामेव ज्ञातम् । श्रवणावगतनिखिलभेदोपमर्दिब्रह्मात्मैकत्वविज्ञानाभ्यासरूपत्वान्मननादेः । अपिचेदं शास्त्र-

3. B. reads स्वयंप्रकाश॰ for स्वप्रकाशः.
9. C. reads अत्र for अन्यत्र.
10. B. om. न after चेत्.
17. B. om. तत् before प्रत्यक्षस्य.

http://acharya.org

मसंभाव्यमानदोषं प्रत्यक्षं तु संभाव्यमानदोषमिति केनावगतं त्वया । न तावत्स्वतःसिद्धा निर्धूतनिखिलविशेषानुभूतिरिममर्थमवगमयति । तस्याः सर्वविषयविरक्तत्वात् । शास्त्रपक्षपातविरहाच्च । नाप्यैन्द्रियकं प्रत्यक्षम् । दोषमूलत्वेन विपरीतार्थत्वात् । तन्मूलत्वादेव नान्यान्यपि प्रमाणानि । अतः स्वपक्षसाधनप्रमाणानभ्युपगमान्न स्वाभिमतार्थसिद्धिः ।

ननु व्यावहारिकप्रमाणप्रमेयव्यवहारोस्माकमप्यस्त्येव । कोयं व्यावहारिको नाम । आपातप्रतीतिसिद्धो युक्तिभिर्निरूपितो न तथावस्थित इति चेत् । किं तेन प्रयोजनम् । प्रमाणतया प्रतिपन्नेपि यौक्तिकबाधादेव प्रमाणकार्याभावात् । अथोच्येत शास्त्रप्रत्यक्षयोर्द्वयोरप्यविद्यामूलत्वेपि प्रत्यक्षविषयस्य शास्त्रेण बाधो दृश्यते । शास्त्रविषयस्य सद्द्वितीयस्य ब्रह्मणः पश्चात्तनबाधादर्शनेन निर्विशेषानुभूतिमात्रं ब्रह्मैव परमार्थ इति । तदयुक्तम् । अबाधितस्यापि दोषमूलस्यापारमार्थ्यनिश्चयात् । एतदुक्तं भवति । यथा सकलेतरकाचादिदोषरहितपुरुषान्तरागोचरगिरिगुहासु वसतस्तैमिरिकजनस्याज्ञातस्वतिमिरस्य सर्वस्य तिमिरदोषाविशेषेण द्विचन्द्रज्ञानमविशिष्टं जायते । तत्र न बाधकप्रत्ययोस्तीति न तन्मिथ्या न भवतीति तद्विषयभूतं चन्द्रद्वित्वमपि मिथ्यैव । दोषो ह्ययथार्थज्ञानहेतुः । तथा ब्रह्मज्ञानमविद्यामूलत्वेन बाधकज्ञानरहितमपि स्वविषयेण ब्रह्मणा सह मिथ्यैवेति । भवन्ति चात्र प्रयोगाः । विवादाध्यासितं ब्रह्म मिथ्या । अविद्यावदुत्पन्नज्ञानविषयत्वात् । प्रपञ्चवत् । ब्रह्म मिथ्या ।

12. C. reads अद्वितीय for सद्द्वितीयस्य.
15. C. E. om. अन्तर.
16. B. reads अपि after सर्वस्य.
18. C. om. न after मिथ्या.
22. C. reads अविद्यावत उत्पन्नाज्ञान for अविद्यावदुत्पन्नज्ञान.

http://acharya.org

मिथ्याज्ञानविषयत्वात् । प्रपञ्चवत् । ब्रह्म मिथ्या । असत्यहेतुजन्यज्ञानविषयत्वात् । प्रपञ्चवदेव ।

न च वाच्यं स्वाप्नस्य हस्त्यादिज्ञानस्यासत्यस्य परमार्थशुभाशुभप्रतिपत्तिहेतुभाववदविद्यामूलत्वेनासत्यस्यापि शास्त्रस्य परमार्थभूतब्रह्मविषयप्रतिपत्तिहेतुभावो न विरुद्ध इति । स्वाप्नज्ञानस्यासत्यत्वाभावात् । तत्र हि विषयाणामेव मिथ्यात्वम् । तेषामेव हि बाधो दृश्यते न ज्ञानस्य । न हि मया स्वप्नवेलायामनुभूतं ज्ञानमिह न विद्यत इति कस्यचिदपि प्रत्ययो जायते । दर्शनं तु विद्यतेऽर्था न सन्तीति बाधकप्रत्ययः । मायाविनो मन्त्रौषधादिप्रभवं मायामयं ज्ञानं सत्यमेव प्रीतेर्भयस्य च हेतुः । तत्रापि ज्ञानस्याबाधितत्वात् । विषयेन्द्रियादिदोषजन्यं रज्ज्वादौ सर्पादिविज्ञानं सत्यमेव भयादिहेतुः । सत्यैवादष्टेऽपि स्वात्मनि सर्पसंनिधानाद्दष्टबुद्धिः । सत्यैव शङ्काविषबुद्धिर्मरणहेतुभूता । वस्तुभूत एव जलादौ मुखादिप्रतिभासो वस्तुभूतमुखगतविशेषनिश्चयहेतुः । एतेषां संवेदनानामुत्पत्तिमत्त्वादर्थक्रियाकारित्वाच्च सत्यत्वमवसीयते । हस्त्यादीनामभावे कथं तद्बुद्धयः सत्या भवन्तीति चेन्न । एतद्बुद्धीनां सालम्बनत्वमात्रनियमात् । अर्थस्य प्रतिभासमानत्वमेव ह्यालम्बनत्वेपे-

---

1. B. om. मिथ्या after मिथ्या, B om. ब्रह्म मिथ्या.

3. B. C. read विज्ञानस्य for ज्ञानस्य.

8. C. reads अपि for इह

9. B. om. तु; B. reads हि after इति.

10. B. reads प्रभव for प्रभवम्; C. reads प्रतीतेर्भ्रमस्य for प्रीतेर्भयस्य.

12 C. reads ज्ञानम् for विज्ञानम्.

15 C. reads एषाम् for एतेषाम्.

16. C. reads तत् before अर्थ.

18. C. reads सालम्बनत्वे विवक्षितम् for ह्यालम्बनत्वेपेक्षितम्.

क्षितम् । प्रतिभासमानता चास्त्येव दोषवशात् । स तु बाधितोसत्य इत्यवसीयते । अबाधिता हि बुद्धिः सत्यैवेत्युक्तम् ।

रेखया वर्णप्रतिपत्तावपि नासत्यात्सत्यबुद्धिः। रेखायाः सत्यत्वात् । ननु वर्णात्मना प्रतिपन्ना रेखा वर्णबुद्धिहेतुः । वर्णात्मता त्वसत्या । नैवम् । वर्णात्मताया असत्याया उपायत्वायोगात् । असतो निरुपाख्यस्य ह्युपायत्वं न दृष्टमनुपपन्नं च । अथ तस्यां वर्णबुद्धेरुपायत्वम् । एवं तर्ह्यसत्यात्सत्यबुद्धिर्न स्यात् । बुद्धेः सत्यत्वादेव । उपायोपेययोरैक्यप्रसङ्गश्च । उभयोर्वर्णबुद्धित्वाविशेषात् । रेखाया अविद्यमानवर्णात्मनोपायत्वे चैकस्यामेव रेखायामविद्यमानसर्ववर्णात्मकत्वस्य सुलभत्वादेकरेखादर्शनात्सर्ववर्णप्रतिपत्तिः स्यात् । अथ पिण्डविशेषे देवदत्तादिशब्दसंकेतवच्चक्षुर्ग्राह्यरेखाविशेषे श्रोत्रग्राह्यवर्णविशेषसंकेतवशाद्रेखाविशेषो वर्णविशेषबुद्धिहेतुरिति । हन्त तर्हि सत्यादेव सत्यप्रतिपत्तिः । रेखायाः संकेतस्य च सत्यत्वात् । रेखागवयादपि सत्यगवयबुद्धिः सादृश्यनिबन्धना । सादृश्यं च सत्यमेव । न चैकरूपस्य शब्दस्य नादविशेषेणार्थविशेषभेदबुद्धिहेतुत्वेप्यसत्यात्सत्यप्रतिपत्तिः । नानानादाभिव्यक्तस्यैकस्यैव शब्दस्य तत्तन्नादाभिव्यङ्ग्यस्वरूपेणार्थविशेषैः सह संबन्धग्रहणवशादर्थभेदबुद्ध्युत्पत्तिहेतुत्वात् । शब्दस्यैकरूपत्वमपि न सा-

---

5. C reads तु after वर्णात्मताया, B. reads असत्यतया for असत्याया.

8 B. reads एवमुपायोपेययो· for एव । उपायोपेययो.

9. C reads अपि after उपायत्वे.

12. C. reads संकेतवत् for संकेतवशात्

13. C reads विशेष after बुद्धि.

16. C. om. भेद.

http://acharya.org

धीयः । गकारादेर्बोधकस्यैव श्रोत्रग्राह्यत्वेन शब्दत्वात् । अतोऽसत्याच्छास्त्रात्सत्यब्रह्मविषयप्रतिपत्तिर्दुरुपपादा ।

ननु न शास्त्रस्य गगनकुसुमवदसत्यत्वम् । प्रागद्वैतज्ञानात्सद्बुद्धिबोध्यत्वात् । उत्पन्ने तत्त्वज्ञाने ह्यसत्यत्वं शास्त्रस्य । न तदा शास्त्रं निरस्तनिखिलभेदचिन्मात्रब्रह्मज्ञानोपायः । यदोपायस्तदास्त्येव शास्त्रमस्तीति बुद्धिः । नैवम् । असति शास्त्रेऽस्ति शास्त्रमिति बुद्धेर्मिथ्यात्वात् । ततः किम् । इदम् । ततो मिथ्याभूतशास्त्रजन्यज्ञानस्य मिथ्यात्वेन तद्विषयस्यापि ब्रह्मणो मिथ्यात्वम् । यथा धूमबुद्ध्या गृहीतबाष्पजन्याग्निज्ञानस्य मिथ्यात्वेन तद्विषयस्याग्नेरपि मिथ्यात्वम् । पश्चात्तनबाधादर्शनं चासिद्धम् । शून्यमेव तत्त्वमिति वाक्येन तस्यापि बाधदर्शनात् । तत्तु भ्रान्तिमूलमिति चेत् । एतदपि भ्रान्तिमूलमिति त्वयैवोक्तम् । पाश्चात्यबाधादर्शनं तु तस्यैवेत्यलमप्रतिष्ठितकुतर्कपरिहसनेन ।

यदुक्तम् (पृ. १३ पं. १६) वेदान्तवाक्यानि निर्विशेषज्ञानैकरसवस्तुमात्रप्रतिपादनपराणि सदेव सोम्येदमग्र आसीत् (छा. ६।२।१) इत्येवमादीनीति । तदयुक्तम् । एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपादनमुखेन सच्छब्दवाच्यस्य परस्य ब्रह्मणो जगदुपादानत्वं जगन्निमित्तत्वं सर्वज्ञता सर्वशक्तियोगः सत्यसंकल्पत्वं सर्वान्तरत्वं सर्वाधारता सर्वनियमनमित्याद्यनेककल्याणगुणविशिष्टतां कृत्स्नस्य जगतस्तदात्मकतां च प्रतिपाद्यैवंभूतब्रह्मात्मकस्त्वमसीति श्वेतकेतुं प्रत्युपदेशाय प्रवृत्तत्वात्प्रकरणस्य । प्रपञ्चितश्चायमर्थो वेदार्थसंग्रहे । अत्राप्यारम्भणाधिकरणे (२।१।१५) निपुणतरमुपपादयिष्यामः । अथ परा यया

13. C reads पश्चात्तन for पाश्चात्य; C. om. एव after तस्य.

24. B. C. read उपपादयिष्यते for उपपादयिष्यामः.

http://acharya.org

तदक्षरमधिगम्यते (मु. १।१।५) इत्यत्रापि प्राकृतान्हेयगुणान्प्रतिषिध्य नित्यत्वविभुत्वसूक्ष्मत्वसर्वगतत्वाव्ययत्वभूतयोनित्वसर्वज्ञत्वादिकल्याणगुणगणयोगः परस्य ब्रह्मणः प्रतिपादितः ।

सत्यं ज्ञानमनन्तं ब्रह्म (तै. २।१।१) इत्यत्रापि सामानाधिकरण्यस्यानेकविशेषणविशिष्टैकार्थाभिधानव्युत्पत्त्या न निर्विशेषवस्तुसिद्धिः। प्रवृत्तिनिमित्तभेदेनैकार्थवृत्तित्वं सामानाधिकरण्यम् । तत्र सत्यज्ञानादिपदमुख्यार्थैर्गुणैस्तत्तद्गुणविरोध्याकारप्रत्यनीकाकारैर्वैकस्मिन्नेवार्थे पदानां प्रवृत्तौ निमित्तभेदोवश्याश्रयणीयः । इयांस्तु विशेषः । एकस्मिन्पक्षे पदानां मुख्यार्थतापरस्मिंश्च तेषां लक्षणा । न चाज्ञानादीनां प्रत्यनीकता वस्तुस्वरूपमेव । एकेनैव पदेन स्वरूपं प्रतिपन्नमिति पदान्तरप्रयोगवैयर्थ्यात् । तथा सति सामानाधिकरण्यासिद्धिश्च । एकस्मिन्वस्तुनि वर्तमानानां पदानां निमित्तभेदानाश्रयणात् । न चैकस्यैवार्थस्य विशेषणभेदेन विशिष्टताभेदादनेकार्थत्वं पदानां सामानाधिकरण्यविरोधि । एकस्यैव वस्तुनोनेकविशेषणविशिष्टताप्रतिपादनपरत्वात्सामानाधिकरण्यस्य । भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यमिति शाब्दिकाः ।

यदुक्तम् (पृ. २१ प. २) एकमेवाद्वितीयमित्यत्राद्वितीयपदं गुणतोपि सद्वितीयतां न सहते । अतः सर्वशाखाप्रत्यय-

---

5. B. reads विशिष्टैकार्थ्यविधान for विशिष्टैकार्थाभिधान.

6. B. C. read हि after वृत्तित्वम्.

9. C. reads पक्षे after अपरस्मिंश्च

10. C. reads अज्ञानादि for अज्ञानादीनाम्.

13. B. reads प्रवृत्ति before निमित्त.

17 C reads हि शाब्दा for शाब्दिका..

18. B. reads अपि after अत्र.

http://acharya.org

न्यायेन कारणवाक्यानामद्वितीयवस्तुप्रतिपादनपरत्वमभ्युपगमनीयम्। कारणतयोपलक्षितस्य तस्याद्वितीयस्य ब्रह्मणो लक्षणमिदमुच्यते सत्यं ज्ञानमनन्तं ब्रह्म (तै॰२।१।१)इति। अतो हि लिलक्षयिषितं ब्रह्म निर्गुणमेव। अन्यथा निर्गुणं निरञ्जनमित्यादिभिर्विरोधश्चेति। तदनुपपन्नम्। जगदुपादानस्य ब्रह्मणः स्वव्यतिरिक्ताधिष्ठात्रन्तरनिवारणेन विचित्रशक्तियोगप्रतिपादनपरत्वाद्द्वितीयपदस्य। तथैव विचित्रशक्तियोगमेवावगमयति तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोसृजत (छा. ६।२।३) इत्यादि। अविशेषेणाद्वितीयमित्युक्ते निमित्तान्तरमात्रनिषेधः कथं ज्ञायत इति चेत्। सिसृक्षोर्ब्रह्मण उपादानकारणत्वं सदेव सोम्येदमग्र आसीदेकमेव (छा. ६।२।१) इति प्रतिपादितम्। कार्योत्पत्तिस्वाभाव्येन बुद्धिस्थं निमित्तान्तरमिति तदेवाद्वितीयपदेन निषिध्यत इत्यवगम्यते। सर्वनिषेधे हि स्वाभ्युपगताः सिषाधयिषिता नित्यत्वादयश्च निषिद्धाः स्युः। सर्वशाखाप्रत्ययन्यायश्चात्रभवतो विपरीतफलः। सर्वशाखासु कारणान्वयिनां सर्वज्ञत्वादीनां गुणानामत्रोपसंहारहेतुत्वात्। अतः कारणवाक्यस्वभावादपि सत्यं ज्ञानमनन्तं ब्रह्म (तै. २।१।१) इत्यनेन सविशेषमेव प्रतिपाद्यत इति विज्ञायते। न च निर्गुणवाक्यविरोधः। प्राकृतहेयगुणविषयत्वात्तेषां निर्गुणम् (चू. ७।२)। निरञ्जनम् (श्वे. ६।१९)। निष्कलं निष्क्रियं शान्तम् (श्वे. ६।१९) इत्यादीनाम्। ज्ञानमात्रस्वरूपवादिन्योपि श्रुतयो ब्रह्मणो ज्ञान-

2 C reads अभि before उपलक्षितस्य, B om तस्य.

3. B C. om हि.

6 B. om प्रतिपादन

12. B. reads तथा for तत्

15. B reads कारणवाक्यगतानाम् for कारणान्वयिनाम्.

http://acharya.org

स्वरूपतामभिदधति। न तावता निर्विशेषज्ञानमात्रमेव तत्त्वम्। ज्ञातुरेव ज्ञानस्वरूपत्वात्। ज्ञानस्वरूपस्यैव तस्य ज्ञानाश्रयत्वं मणिद्युमणिप्रदीपादिवदित्युक्तमेव। ज्ञातृत्वमेव हि सर्वाः श्रुतयो वदन्ति। यः सर्वज्ञः सर्ववित् (मु. १।१।९)। तदैक्षत (छा. ६।२।३)। सेयं देवतैक्षत (छा. ६।३।२)। स ऐक्षत लोकान्नु सृजै (ऐ. १।१) इति।

नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् (श्वे. ६।१३)। ज्ञाज्ञौ द्वावजावीशानीशौ (श्वे. १।९)।

तमीश्वराणां परमं महेश्वरं तं दैवतानां परमं च दैवतम्।
पतिं पतीनां परमं परस्ताद्विदाम देवं भुवनेशमीड्यम्॥
न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते।
परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च॥

(श्वे. ६।७–८) एष आत्मापहतपाप्मा विजरो विमृत्युर्विशोकोविजिघत्सोपिपासः सत्यकामः सत्यसंकल्पः (छा. ८।१।५) इत्याद्याः श्रुतयो ज्ञातृत्वप्रमुखान्कल्याणगुणाञ्ज्ञानस्वरूपस्यैव ब्रह्मणः स्वाभाविकान्वदन्ति समस्तहेयगुणरहिततां च। निर्गुणवाक्यानां सगुणवाक्यानां च विषयमपहतपाप्मेत्याद्यपिपास इत्यन्तेन हेयगुणान्प्रतिषिध्य सत्यकामः सत्यसंकल्प इति ब्रह्मणः कल्याणगुणान्विदधतीयं श्रुतिरेव विविनक्तीति सगुणनिर्गुणवाक्ययोर्विरोधाभावादन्यतरस्य मिथ्याविषयताश्रयणमपि नाशङ्कनीयम्। भीषास्माद्वातः पवते (तै. २।८।१) इत्यादिना ब्रह्मगुणानारभ्य ते ये शतम् (तै. २।८।१) इत्यनुक्रमेण क्षेत्रज्ञानन्दातिशयमुक्त्वा यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान् (तै. २।९।१) इति ब्रह्मणः कल्याणगुणानन्त्यमत्यादरेण वदतीयं श्रुतिः। सोश्नुते

3. B. C. read युक्तम् for इत्युक्तम्; B. reads इत्युक्तम् after एव.

http://acharya.org

सर्वान्कामान्त्सह ब्रह्मणा विपश्चिता (तै. २।१।१) इति ब्रह्मवेदनफलमवगमयद्वाक्यं परस्य विपश्चितो ब्रह्मणो गुणानन्त्यं ब्रवीति। विपश्चिता ब्रह्मणा सह सर्वान्कामानश्नुते। काम्यन्त इति कामाः कल्याणगुणाः। ब्रह्मणा सह तद्गुणान्त्सर्वानश्नुत इत्यर्थः। दहरविद्यायां तस्मिन्यदन्तस्तदन्वेष्टव्यम् (छा. ८।१।१) इतिवद्गुणप्राधान्यं वक्तुं सहशब्दः। फलोपासनयोः प्रकारैक्यं यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति (छा. ३।१४।१) इति श्रुत्यैव सिद्धम्। यस्यामतं तस्य मतम् ....अविज्ञातं विजानताम् (के. ११) इति ब्रह्मणो ज्ञानाविषयत्वमुक्तमिति चेत्। ब्रह्मविदाप्नोति परम् (तै. २।१।१)। ब्रह्म वेद ब्रह्मैव भवति (मु. ३।२।९) इति ज्ञानान्मोक्षोपदेशो न स्यात्।

असन्नेव स भवति असद्ब्रह्मेति वेद चेत्।
अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः॥ (तै.२।६।१)

इति ब्रह्मविषयज्ञानासद्भावसद्भावाभ्यामात्मनाशमात्मसत्तां च वदति। अतो ब्रह्मविषयवेदनमेवापवर्गाय सर्वाः श्रुतयो विदधति। ज्ञानं चोपासनात्मकम्। उपास्यं च ब्रह्म सगुणमित्युक्तम्। यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह (तै. २।४।१) इति ब्रह्मणोनन्तस्यापरिमितगुणस्य वाङ्मनसयोरेतावदिति परिच्छेदायोग्यत्वश्रवणेन ब्रह्मैतावदिति ब्रह्मपरिच्छेदज्ञानवतां ब्रह्माविज्ञातममतमित्युक्तम्। अपरिच्छिन्नत्वाद्ब्रह्मणः। अन्यथा यस्यामतं तस्य मतम्....विज्ञातमविजानताम्(के. ११) इति ब्रह्मणो मतत्वविज्ञातत्ववचनं तत्रैव विरुध्यते।

यत्तु न दृष्टेर्द्रष्टारम्....न मतेर्मन्तारम् (बृ. ३।४।२) इति श्रुतिर्दृष्टेर्मतेर्व्यतिरिक्तं द्रष्टारं मन्तारं च प्रतिषेधतीति। तदाग-

---

22. B. om. ब्रह्मण..

न्तुकचैतन्यगुणयोगितया ज्ञातुरज्ञानस्वरूपतां कुतर्कसिद्धां मत्वा न तथात्मानं पश्येर्न मन्वीथा अपि तु द्रष्टारं मन्तारमप्यात्मानं दृष्टिमतिरूपमेव पश्येरित्यभिदधातीति परिहृतम् । अथ वा दृष्टेर्द्रष्टारं मतेर्मन्तारं जीवात्मानं प्रतिषिध्य सर्वभूतान्तरात्मानं परमात्मानमेवोपास्स्वेति वाक्यार्थः । अन्यथा विज्ञातारमरे केन विजानीयात् (बृ. २।४।१४) इति ज्ञातृत्वश्रुतिविरोधश्च ।

आनन्दो ब्रह्मेत्यानन्दमात्रमेव ब्रह्मस्वरूपं प्रतीयत इति यदुक्तं तज्ज्ञानाश्रयस्य ब्रह्मणो ज्ञानं स्वरूपमिति परिहृतम् (पृ. ४२ पं. ७) । ज्ञानमेव ह्यनुकूलमानन्द इत्युच्यते । विज्ञानमानन्दं ब्रह्मेत्यानन्दस्वरूपमेव विज्ञानं ब्रह्मेत्यर्थः । अत एव भवतामेकरसता । अस्य ज्ञानस्वरूपस्यैव ज्ञातृत्वमपि श्रुतिशतसमधिगतमित्युक्तम् । तद्वदेव स एको ब्रह्मण आनन्दः (तै. २।८।१) । आनन्दं ब्रह्मणो विद्वान् (तै. २।४।१) इत्यादिव्यतिरेकनिर्देशाच्च नानन्दमात्रं ब्रह्म । अपि त्वानन्दि । ज्ञातृत्वमेव ह्यानन्दित्वम् ।

यदिदमुक्तं यत्र हि द्वैतमिव भवति (बृ. २।४।१४) । नेह नानास्ति किंचन । मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति (बृ. ४।४।१९) । यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् (बृ. ४।५।१५) इति भेदनिषेधो बहुधा दृश्यत इति । तत्कृत्स्नस्य जगतो ब्रह्मकार्यतया तदन्तर्यामिकतया च तदात्मकत्वेनैक्यात्तत्प्रत्यनीकनानात्वं प्रतिषिध्यते ।

---

4 C. om. भूत.

9 C. reads वदतीति after स्वरूपमिति.

11. B. reads रूपमेव for स्वरूपमेव.

20. C. reads इत्यादिभेद for इति भेद.

http://acharya.org

न पुनर्बहु स्यां प्रजायेय (छा. ६।२।३) इति बहुभवनसंकल्पपूर्वकं ब्रह्मणो नानात्वं श्रुतिसिद्धं प्रतिषिध्यत इति परिहृतम् । नानात्वनिषेधादियमपरमार्थविषयेति चेन्न । प्रत्यक्षादिसकलप्रमाणानवगतनानात्वं दुरारोहं ब्रह्मणः प्रतिपाद्य तदेव बाध्यत इत्युपहास्यमिदम् ।

यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते । अथ तस्य भयं भवति (तै. २।७।१) इति ब्रह्मणि नानात्वं पश्यतो भयप्राप्तिरिति यदुक्तं तदसत् । सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत (छा. ३।१४।१) इति तन्नानात्वानुसंधानस्य शान्तिहेतुत्वोपदेशात् । तथा हि । सर्वस्य जगतस्तदुत्पत्तिस्थितिलयकर्मतया तदात्मकत्वानुसंधानेनात्र शान्तिर्विधीयते । अतो यथावस्थितदेवतिर्यङ्मनुष्यस्थावरादिभेदभिन्नं जगद्ब्रह्मात्मकमित्यनुसंधानस्य शान्तिहेतुतयाभयप्राप्तिहेतुत्वेन न भयहेतुत्वप्रसङ्गः । एवं तर्ह्यथ तस्य भयं भवति (तै.२।७।१) इति किमुच्यते । यदा ह्येवैष एतस्मिन्नदृश्येनात्म्येनिरुक्तेनिलयनेभयं प्रतिष्ठां विन्दते । अथ सोभयं गतो भवति (तै. २।७।१) इत्यभयप्राप्तिहेतुत्वेन ब्रह्मणि या प्रतिष्ठाभिहिता तस्या विच्छेदे भयं भवतीति । यथोक्तं महर्षिभिः

यन्मुहूर्तं क्षणं वापि वासुदेवो न चिन्त्यते ।
सा हानिस्तन्महच्छिद्रं सा भ्रान्तिः सा च विक्रिया ॥

इत्यादि । ब्रह्मणि प्रतिष्ठाया अन्तरमवकाशो विच्छेद एव ।

---

4. B C read अनवगतम् for अनवगत

11. B reads °लयस्थिति for स्थितिलय.

15. C. reads इदमुच्यते । after उच्यते.

18. B. reads यदुक्तम् for यथोक्तम्

21. B. reads प्रतिष्ठायाम् for प्रतिष्ठायाः.

http://acharya.org

यदुक्तम् (पृ. १४ पं. १२) न स्थानतोपीति सर्वविशेषरहितं ब्रह्मेति वक्ष्यतीति । तन्न । सविशेषं ब्रह्मेत्येव हि तत्र वक्ष्यति । मायामात्रं त्विति च स्वाप्नानामप्यर्थानां जागरितावस्थानुभूतपदार्थवैधर्म्येण मायामात्रत्वमुच्यत इति पारमार्थिकत्वमेव वक्ष्यति । स्मृतिपुराणयोरपि निर्विशेषज्ञानमात्रमेव परमार्थोन्यदपारमार्थिकमिति प्रतीयत इति यदभिहितं तदसत् ।

यो मामजमनादिं च वेत्ति लोकमहेश्वरम्। (गी. १०।३)
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ।
न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ।
भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ।। (गी. ९।४-५)
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ।
मत्तः परतरं नान्यत्किंचिदस्ति धनंजय ।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ।। (गी.७।६-७)
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ।
(गी. १०।४२)
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ।।
यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमः ।
अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ।।
(गी. १५।१७-१८)
स सर्वभूतप्रकृतिं विकारान्गुणादिदोषांश्च मुने व्यतीतः ।
अतीतसर्वावरणोखिलात्मा तेनास्तृतं यद्भुवनान्तराले ।।
समस्तकल्याणगुणात्मकोसौ स्वशक्तिलेशोद्धृतभूतसर्गः ।

---

6. B. reads प्रतिज्ञायते for प्रतीयते
21. C. reads भूत. for भूत
23. B. reads लेशाद्धृत for लेशोद्धृत.

http://acharya.org

इच्छागृहीताभिमतोरुदेहः संसाधिताशेषजगद्धितोसौ ॥
तेजोबलैश्वर्यमहावबोधसुवीर्यशक्त्यादिगुणैकराशिः ।
परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे ॥
स ईश्वरो व्यष्टिसमष्टिरूपोव्यक्तस्वरूपोप्रकटस्वरूपः ।
सर्वेश्वरः सर्वदृक्सर्ववेत्ता समस्तशक्तिः परमेश्वराख्यः ॥
संज्ञायते येन तदस्तदोषं शुद्धं परं निर्मलमेकरूपम् ।
संदृश्यते वाप्यथ गम्यते वा तज्ज्ञानमज्ञानमतोन्यदुक्तम् ॥

(वि. पु. ६।५।८३-८७)

शुद्धे महाविभूत्याख्ये परे ब्रह्मणि शब्द्यते ।
मैत्रेय भगवच्छब्दः सर्वकारणकारणे ॥
संभर्तेति तथा भर्ता भकारोर्थद्वयान्वितः ।
नेता गमयिता स्रष्टा गकारार्थस्तथा मुने ॥
ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥
वसन्ति तत्र भूतानि भूतात्मन्यखिलात्मनि ।
स च भूतेष्वशेषेषु वकारार्थस्ततोव्ययः ॥

(वि. पु. ६।५।७२-७५)

ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः ।
भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥

(वि. पु. ६।५।७९)

एवमेष महाशब्दो मैत्रेय भगवानिति ।
परमब्रह्मभूतस्य वासुदेवस्य नान्यगः ॥

---

4. B. C. E. F. read प्रकट for अप्रकट.

9. B. reads शद्विते for शब्द्यते; Vishnupuranum reads वर्तते for शब्द्यते.

21. Vishnupuranum reads भगवानिति सत्तम for मैत्रेय भगवानिति.

तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः ।
शब्दोयं नोपचारेण अन्यत्र ह्युपचारतः ॥
(वि. पु. ६।५।७६-७७)
समस्ताः शक्तयश्चैता नृप यत्र प्रतिष्ठिताः ।
तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत् ॥
समस्तशक्तिरूपाणि तत्करोति जनेश्वर ।
देवतिर्यङ्मनुष्यादिचेष्टावन्ति स्वलीलया ॥
जगतामुपकाराय न सा कर्मनिमित्तजा ।
चेष्टा तस्याप्रमेयस्य व्यापिन्यव्याहतात्मिका ॥
(वि. पु. ६।७।६९-७१)
एवंप्रकारममलं नित्यं व्यापकमक्षयम् ।
समस्तहेयरहितं विष्ण्वाख्यं परमं पदम् ॥
(वि. पु. १।२२।५१)
परः पराणां परमः परमात्मात्मसंस्थितः ।
रूपवर्णादिनिर्देशविशेषणविवर्जितः ॥
अपक्षयविनाशाभ्यां परिणामर्द्धिजन्मभिः ।
वर्जितः शक्यते वक्तुं यः सदास्तीति केवलम् ॥
सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः ।
ततः स वासुदेवेति विद्वद्भिः परिपठ्यते ॥
तद्ब्रह्म परमं नित्यमजमक्षयमव्ययम् ।
एकस्वरूपं च सदा हेयाभावाच्च निर्मलम् ॥
तदेव सर्वमेवैतद्व्यक्ताव्यक्तस्वरूपवत् ।
तथा पुरुषरूपेण कालरूपेण च स्थितम् ॥
(वि. पु. १।२।१०-१४)
प्रकृतिर्या मयाख्याता व्यक्ताव्यक्तस्वरूपिणी ।

---

20. B, C. E. F. read अक्षरम् for अक्षयम्.

http://acharya.org

पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि ॥
परमात्मा च सर्वेषामाधारः परमेश्वरः ।
विष्णुनामा स वेदेषु वेदान्तेषु च गीयते ॥
(वि. पु. ६।४।३८-३९)
द्वे रूपे ब्रह्मणस्तस्य मूर्तं चामूर्तमेव च ।
क्षराक्षरस्वरूपे ते सर्वभूतेष्ववस्थिते ।
अक्षरं तत्परं ब्रह्म क्षरं सर्वमिदं जगत् ॥
एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा ।
परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत् ॥
(वि. पु. १।२२।५३-५५)
विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथापरा ।
अविद्याकर्मसंज्ञान्या तृतीया शक्तिरिष्यते ॥
यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप सर्वगा ।
संसारतापानखिलानवाप्नोत्यतिसंततान् ॥
तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता ।
सर्वभूतेषु भूपाल तारतम्येन वर्तते ॥
(वि. पु. ६।७।६१-६३)
प्रधानं च पुमांश्चैव सर्वभूतात्मभूतया ।
विष्णुशक्त्या महाबुद्धे वृतौ संश्रयधर्मिणौ ॥
तयोः सैव पृथग्भावकारणं संश्रयस्य च ।
(वि. पु. २।७।२९-३०)
यथा सक्तो जले वातो बिभर्ति कणिकाशतम् ।

---

3 B. reads देवेषु for वेदेषु.

6. B. C. read च for अव.

19. C reads बुद्धौ कृता सश्रयधर्मिणा for बुद्धे वृतौ संश्रयधर्मिणौ; B. reads साश्रय for सश्रय.

22. C, ıeads सक्तम् for सक्त..

शक्तिः सापि तथा विष्णोः प्रधानपुरुषात्मनः ॥

(वि. पु. २।७।३२)

तदेतदक्षयं नित्यं जगन्मुनिवराखिलम् ।
आविर्भावतिरोभावजन्मनाशविकल्पवत् ॥

(वि. पु. १।२२।५९) इत्यादिना परं ब्रह्म स्वभावत एव निरस्तनिखिलदोषगन्धं समस्तकल्याणगुणात्मकं जगदुत्पत्तिस्थितिसंहारान्तःप्रवेशनियमनादिलीलं प्रतिपाद्य कृत्स्नस्य चिदचिद्वस्तुनः सर्वावस्थावस्थितस्य पारमार्थिकस्यैव परस्य ब्रह्मणः शरीरतया रूपत्वं शरीररूपशक्तिविभूत्यादिशब्दैस्तत्तच्छब्दसामानाधिकरण्येन चाभिधाय तद्विभूतिभूतस्य चिद्वस्तुनः स्वरूपेणावस्थितिमचिन्मिश्रतया क्षेत्रज्ञरूपेणावस्थितिं चोक्त्वा क्षेत्रज्ञावस्थायां पुण्यपापात्मककर्मरूपाविद्यावेष्टितत्वेन स्वाभाविकज्ञानरूपत्वाननुसंधानमचिद्रूपार्थाकारतयानुसंधानं च प्रतिपादितमिति परं ब्रह्म सविशेषं तद्विभूतिभूतं जगदपि पारमार्थिकमेवेति ज्ञायते ।

प्रत्यस्तमितभेदमित्यत्र देवमनुष्यादिप्रकृतिपरिणामविशेषसंसृष्टस्याप्यात्मनः स्वरूपं तद्गतभेदरहितत्वेन तद्भेदवाचिदेवादिशब्दागोचरं ज्ञानसत्तैकलक्षणं स्वसंवेद्यं योगयुङ्मनसो न गोचरमित्युच्यत इति । अनेन न प्रपञ्चापलापः । कथमिदमवगम्यत इति चेत्तदुच्यते । अस्मिन्प्रकरणे संसारैकभेषजतया योगमभिधाय योगावयवान्प्रत्याहारपर्यन्तांश्चोक्त्वा धारणासिद्ध्यर्थं शुभाश्रयं वक्तुं परस्य ब्रह्मणो विष्णोः शक्तिशब्दा-

---

9. C. D. E F. read तन्वश before शक्ति.

11. B. reads स्वरूपेण for रूपेण; C om. अव after क्षेत्रज्ञरूपेण.

13. C reads रूपत्वेन for रूपत्व.

18. B. C. read अगोचरम् for न गोचरम्.

19. C. om. न after अनेन.

http://acharya.org

भिधेयं रूपद्वयं मूर्तामूर्तविभागेन प्रतिपाद्य तृतीयशक्तिरूपकर्माख्याविद्यावेष्टितमचिद्विशिष्टं क्षेत्रज्ञं मूर्ताख्यविभागं भावनात्रयान्वयादशुभमित्युक्त्वा द्वितीयस्य कर्माख्याविद्याविरहिणोचिद्वियुक्तस्य ज्ञानैकाकारस्यामूर्ताख्यविभागस्य निष्पन्नयोगिध्येयतया योगयुङ्मनसोनालम्बनतया स्वतःशुद्धिविरहाच्च शुभाश्रयत्वं प्रतिषिध्य परशक्तिरूपमिदममूर्तम् (१) अपरशक्तिरूपं क्षेत्रज्ञाख्यं मूर्तं च (२) परशक्तिरूपस्यात्मनः क्षेत्रज्ञतापत्तिहेतुभूततृतीयशक्त्याख्यकर्मरूपाविद्या च (३) इत्येतच्छक्तित्रयाश्रयं भगवदसाधारणमादित्यवर्णमित्यादिवेदान्तसिद्धं मूर्तं रूपं शुभाश्रय इत्युक्तम् । अत्र परिशुद्धात्मस्वरूपस्य शुभाश्रयतानर्हतां वक्तुं प्रत्यस्तमितभेदं यदित्याद्युच्यते । तथाहि ।

न तद्योगयुजा शक्यं नृप चिन्तयितुं यतः ।
द्वितीयं विष्णुसंज्ञस्य योगिध्येयं परं पदम् ॥

(वि. पु. ६।७।५५)

समस्ताः शक्तयश्चैता नृप यत्र प्रतिष्ठिताः ।
तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत् ॥

(वि. पु. ६।७।६९) इति । तथा चतुर्मुखसनकादीनां जगदन्तर्वर्तिनामविद्यावेष्टितत्वेन शुभाश्रयानर्हतामुक्त्वा बद्धानामेव पश्चाद्योगेनोद्भूतबोधानां स्वस्वरूपमापन्नानां च स्वतःशुद्धिविरहाद्भगवता शौनकेन शुभाश्रयता निषिद्धा ।

---

3. B, reads एव after अन्वयात्

9. C reads आश्रयः for आश्रयम्; C reads अमूर्तरूपम् for मूर्तं रूपम्; B, reads स्वरूप शुभाश्रयम् for रूपं शुभाश्रय .

17. B C read च वदति after इति; C reads सनन्दन for सनक.

18. B. C. read आश्रयत्व for आश्रय.

19. C. reads स्वस्वरूप for स्वस्वरूपम्.

http://acharya.org

आब्रह्मस्तम्बपर्यन्ता जगदन्तर्व्यवस्थिताः ।
प्राणिनः कर्मजनितसंसारवशवर्तिनः ॥
यतस्ततो न ते ध्याने ध्यानिनामुपकारकाः ।
अविद्यान्तर्गताः सर्वे ते हि संसारगोचराः ॥
पश्चादुद्भूतबोधाश्च ध्याने नैवोपकारकाः ।
नैसर्गिको न वै बोधस्तेषामप्यन्यतो यतः ॥
तस्मात्तदमलं ब्रह्म निसर्गादेव बोधवत् ।

इत्यादिना परस्य ब्रह्मणो विष्णोः स्वरूपं स्वासाधारणमेव शुभाश्रय इत्युक्तम् । अतोत्र न भेदापलापः प्रतीयते ।

ज्ञानस्वरूपमित्यत्रापि ज्ञानव्यतिरिक्तार्थजातस्य कृत्स्नस्य न मिथ्यात्वं प्रतिपाद्यते । ज्ञानस्वरूपस्यात्मनो देवमनुष्याद्यर्थाकारेणावभासो भ्रान्तिरित्येतावन्मात्रवचनात् । न हि शुक्तिकाया रजततयावभासो भ्रान्तिरित्युक्ते जगति कृत्स्नं रजतजातं मिथ्या भवति । जगद्ब्रह्मणोः सामानाधिकरण्येनैक्यप्रतीतेर्ब्रह्मणो ज्ञानस्वरूपस्यार्थाकारता भ्रान्तिरित्युक्ते सत्यर्थजातस्य कृत्स्नस्य मिथ्यात्वमुक्तं स्यादिति चेत् । तदसत् । अस्मिञ्छास्त्रे परस्य ब्रह्मणो विष्णोर्निरस्ताज्ञानादिनिखिलदोषगन्धस्य समस्तकल्याणगुणात्मकस्य महाविभूतेः प्रतिपन्नतया तस्य भ्रान्तिदर्शनासंभवात् । सामानाधिकरण्येनैक्यप्रतिपादनं च बाधासहमविरुद्धं चेत्येतदनन्तरमेवोपपादयिष्यते । अतोयमपि श्लोको नार्थस्वरूपस्य बाधकः । तथाहि । यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व ।

---

2. C. reads जनिताः for जनित

12. B. reads शुक्तिकायाम् for शुक्तिकायाः.

13. D. reads मिथ्या before रजततया.

20. B. C. om. एतत्.

तद्ब्रह्म। (तै. ३।१।१) इति जगज्जन्मादिकारणं ब्रह्मेत्यवसिते सति

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति ॥

इति शास्त्रेणास्यार्थस्येतिहासपुराणाभ्यामुपबृंहणं कार्यमिति ज्ञायते। उपबृंहणं नाम विदितसकलवेदतदर्थानां स्वयोगमहिमसाक्षात्कृतवेदतत्त्वार्थानां वाक्यैः स्वावगतवेदवाक्यार्थव्यक्तीकरणम्। सकलशाखानुगतस्य वाक्यार्थस्याल्पभागश्रवणाद्दुरवगमत्वेन तेन विना निश्चयायोगादुपबृंहणं हि कार्यमेव। तत्र पुलस्त्यवसिष्ठवरप्रदानलब्धपरदेवतापारमार्थिकज्ञानवतो भगवतः पराशरात्स्वावगतवेदार्थोपबृंहणमिच्छन्मैत्रेयः परिपप्रच्छ

सोऽहमिच्छामि धर्मज्ञ श्रोतुं त्वत्तो यथा जगत्।
बभूव भूयश्च यथा महाभाग भविष्यति ॥
यन्मयं च जगद्ब्रह्मन्यतश्चैतच्चराचरम्।
लीनमासीद्यथा यत्र लयमेष्यति यत्र च ॥

(वि. पु. १।१।८—९) इत्यादिना। तत्र ब्रह्मस्वरूपविशेषतद्विभूतिभेदप्रकारतदाराधनस्वरूपफलविशेषाश्च पृष्टाः। ब्रह्मस्वरूपविशेषप्रश्नेषु यतश्चैतच्चराचरमिति निमित्तोपादानयोः पृष्टत्वाद्यन्मयमित्यनेन सृष्टिस्थितिलयकर्मभूतं जगत्किमात्मकमिति पृष्टम्। तस्य चोत्तरं जगच्च स इति। इदं च तादात्म्यमन्तर्यामिरूपेणात्मतया व्याप्तिकृतं न तु व्याप्यव्यापकयोर्वस्त्वैक्यकृतम्। यन्मयमिति प्रश्नस्योत्तरत्वाज्जगच्च स इति सामानाधिकरण्यस्य। यन्मयमिति मयण्न विकारार्थः। पृथक्प्रश्नवैयर्थ्यात्।

---

5 C reads तत्त्व for तत् after सकलवेद.

9. B. C. read पारमार्थ्य for पारमार्थिक.

15. B. C. read अत्र for तत्र.

16. C. om. तत् before विभूति.

22. B. C. read अत्र after मयट्.

http://acharya.org

नापि प्राणमयादिवत्स्वार्थिकः । जगच्च स इत्युत्तरानुपपत्तेः । तदा हि विष्णुरेवेत्युत्तरमभविष्यत् । अतः प्राचुर्यार्थ एव तत्प्रकृतवचने मयट् (पा. सू. ५।४।२१) इति मयट् । कृत्स्नं च जगत्तच्छरीरतया तत्प्रचुरमेव । तस्माद्यन्मयमित्यस्य प्रतिवचनं जगच्च स इति सामानाधिकरण्यं जगद्ब्रह्मणोः शरीरात्मभावनिबन्धनमिति निश्चीयते । अन्यथा निर्विशेषवस्तुप्रतिपादनपरे शास्त्रेभ्युपगम्यमाने सर्वाण्येतानि प्रश्नप्रतिवचनानि न संगच्छन्ते । तद्विवरणरूपं कृत्स्नं च शास्त्रं न संगच्छते । तथा हि सति प्रपञ्चभ्रमस्य किमधिष्ठानमित्येवंरूपस्यैकस्य प्रश्नस्य निर्विशेषज्ञानमात्रमित्येवंरूपमेवोत्तरं स्यात् । जगद्ब्रह्मणोरेकद्रव्यत्वपरे च सामानाधिकरण्ये सत्यसंकल्पत्वादिकल्याणगुणैकतानता निखिलहेयप्रत्यनीकता च बाध्येत । सर्वाशुभास्पदं च ब्रह्म भवेत् । आत्मशरीरभाव एवेदं सामानाधिकरण्यं मुख्यवृत्तमिति स्थाप्यते

http://acharya.org

परमार्थस्त्वमेवैकः (पृ. १४ पं. १९)इत्याद्यपि न कृत्स्नस्यापारमार्थ्यं वदति। अपि तु कृत्स्नस्य तदात्मकतया तद्व्यतिरेकेणावस्थितस्यापारमार्थ्यम्। तदेवोपपादयति

तवैष महिमा येन व्याप्तमेतच्चराचरम्।

(वि. पु. १।४।३८) इति। येन त्वयेदं चराचरं व्याप्तमतस्त्वदात्मकमेवेदं सर्वमिति त्वदन्यः कोपि नास्ति। अतः सर्वात्मतया त्वमेवैकः परमार्थः। अत इदमुच्यते तवैष महिमा या सर्वव्याप्तिरिति। अन्यथा तवैषा भ्रान्तिरिति वक्तव्यम्। जगतः पते त्वमित्यादीनां पदानां च लक्षणा स्यात्। लीलया महीमुद्धरतो भगवतो महावराहस्य स्तुतिप्रकरणविरोधश्च। यतः कृत्स्नं जगज्ज्ञानात्मना त्वयात्मतया व्याप्तत्वेन तव मूर्तं तस्मात्त्वदात्मकत्वानुभवसाधनयोगविरहिण एतत्केवलं देवमनुष्यादिरूपमिति भ्रान्तिज्ञानेन पश्यन्तीत्याह यदेतद्दृश्यत इति। न केवलं वस्तुतस्त्वदात्मकं जगद्देवमनुष्याद्यात्मकमिति दर्शनमेव भ्रमः। ज्ञानाकाराणामात्मनां देवमनुष्याद्यर्थाकारत्वदर्शनमपि भ्रम इत्याह ज्ञानस्वरूपमखिलमिति। ये पुनर्बुद्धिमन्तो ज्ञानस्वरूपात्मविदः सर्वस्य भगवदात्मकत्वानुभवसाधनयोगयोग्यपरिशुद्धमनसश्च ते देवमनुष्यादिप्रकृतिपरिणामविशेषशरीररूपमखिलं जगच्छरीरातिरिक्तज्ञानस्वरूपात्मकं त्वच्छरीरं च पश्यन्तीत्याह ये तु ज्ञानविद इति। अन्यथा श्लोकानां पौनरुक्त्यं पदानां लक्षणार्थविरोधः प्रकरणविरोधः शास्त्रतात्पर्यविरोधश्च।

तस्मात्परदेहेषु सतोप्येकमयमित्यत्र सर्वेष्वात्मसु ज्ञानैका-

---

9. B. C. read लक्षणा च for च लक्षणा.

12. B. C. D. E. F. read केवल for केवलम्.

14. B. reads तत् for त्वत्.

19. B. reads रूपात्मक for रूपात्मकम्; B. om. च.

कारतया समानेषु सत्सु देवमनुष्यादिप्रकृतिपरिणामविशेषरूपपिण्डसंसर्गकृतमात्मसु देवाद्याकारेण द्वैतदर्शनमतथ्यमित्युच्यते । पिण्डगतमात्मगतमपि द्वैतं न प्रतिषिध्यते । देवमनुष्यादिविविधविचित्रपिण्डेषु वर्तमानं सर्वमात्मवस्तु सममित्यर्थः । यथोक्तं भगवता

शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ।

(गी. ५।१८) निर्दोषं हि समं ब्रह्म (गी. ५।१९) इत्यादिषु । तस्यात्मपरदेहेषु सतोपीति देहातिरिक्ते वस्तुनि स्वपरविभागस्योक्तत्वात् ।

यद्यन्योस्ति परः कोपीत्यत्रापि नात्मैक्यं प्रतीयते । यदि मत्तः परः कोप्यन्य इत्येकस्मिन्नर्थे परशब्दान्यशब्दयोः प्रयोगायोगात् । तत्र परशब्दः स्वव्यतिरिक्तात्मवचनः । अन्यशब्दस्तस्यापि ज्ञानैकाकारत्वादन्याकारत्वप्रतिषेधार्थः । एतदुक्तं भवति । यदि मद्व्यतिरिक्तः कोप्यात्मा मदाकारभूतज्ञानैकाकारादन्याकारोस्ति तदाहमेवमाकारोयं चान्यादृशाकार इति शक्यते व्यपदेष्टुम् । न चैवमस्ति । सर्वेषां ज्ञानैकाकारत्वेन समानत्वादेवेति ।

वेणुरन्ध्रविभेदेनेत्यत्राप्याकारवैषम्यमात्मनां न स्वरूपकृतमपि तु देवादिपिण्डप्रवेशकृतमित्युपदिश्यते नात्मैक्यम् । दृष्टान्ते चानेकरन्ध्रवर्तिनां वाय्वंशानां न स्वरूपैक्यम् । अपि त्वाकारसाम्यमेव तेषाम् । वायुत्वेनैकाकाराणां रन्ध्रभेदनिष्क्रमणकृतो हि षड्जादिसंज्ञाभेदः । एवमात्मनां देवादिसंज्ञाभेदः । तैजसाप्यपार्थिवद्रव्यांशभूतानां पदार्थानां तत्तद्द्रव्य-

4. C. om. सर्वम्.

11. B reads अस्मिन् for एकस्मिन्.

23. B. reads द्रव्यतया for द्रव्यत्वेन.

http://acharya.org

त्वेनैक्यमेव न स्वरूपैक्यम् । तथा वायवीयानामंशानामपि स्वरूपभेदोवर्जनीयः ।

सोहं स च त्वमिति सर्वात्मनां पूर्वोक्तं ज्ञानाकारं तच्छब्देन परामृश्य तत्सामानाधिकरण्येनाहं त्वमित्यादीनामर्थानां ज्ञानमेवाकार इत्युपसंहरन्देवाद्याकारभेदेनात्मसु भेदमोहं परित्यजेत्याह । अन्यथा देहाद्यतिरिक्तोपदेश्यस्वरूपेहं त्वं सर्वमेतदात्मस्वरूपमिति भेदनिर्देशो न घटते । अहंत्वमादिशब्दानामुपलक्ष्येण सर्वमेतदात्मस्वरूपमित्यनेन सामानाधिकरण्यादुपलक्षणत्वमपि न संगच्छते । सोपि यथोपदेशमकरोदित्याह तत्याज भेदं परमार्थदृष्टिरिति । कुतश्चैष निर्णय इति चेत् । देहात्मविवेकविषयत्वादुपदेशस्य । तच्च

पिण्डः पृथग्यतः पुंसः शिरःपाण्यादिलक्षणः ।
(वि. पु. २।१३।८४) इति प्रक्रमात् ।

विभेदजनकेज्ञान इति च नात्मस्वरूपैक्यपरम् । नापि जीवपरयोः । आत्मस्वरूपैक्यमुक्तरीत्या निषिद्धम् । जीवपरयोरपि स्वरूपैक्यं देहात्मनोरिव न संभवति । तथा च श्रुतिः ।

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योभिचाकशीति ॥

(मु. ३।१।१)

ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे ।
छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः ॥

---

1. B. reads तथा before स्वरूपभेदः.

6. B. C. om. आदि after देह.

15. B. reads अतः before आत्मस्वरूप.

(का. ३।१) अन्तः प्रविष्टः शास्ता जनानाम् (तै. आ. ३।११) सर्वात्मा (कै.१६) इत्याद्या । अस्मिन्नपि शास्त्रे

स सर्वभूतप्रकृतिं विकारं गुणादिदोषांश्च मुने व्यतीतः ।
अतीतसर्वावरणोखिलात्मा तेनास्तृतं यद्भुवनान्तराले ॥
समस्तकल्याणगुणात्मकोसौ (वि. पु. ६।५।८३-८४) ।
परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे ।

(वि. पु. ६।५।८५)

अविद्याकर्मसंज्ञान्या तृतीया शक्तिरिष्यते ।
यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप सर्वगा ॥

(वि. पु. ६।७।६१) इति भेदव्यपदेशात् । उभयेपि हि भेदेनैनमधीयते (ब्र. सू. १।२।२१) । भेदव्यपदेशाच्चान्यः (ब्र. सू. १।१।२२) । अधिकं तु भेदनिर्देशात् (ब्र. सू. २।१।२२) इत्यादिसूत्रेषु च । य आत्मनि तिष्ठन्नात्मनोन्तरः । यमात्मा न वेद । यस्यात्मा शरीरम् । य आत्मानमन्तरो यमयति (बृ. ३।७।२२) । प्राज्ञेनात्मना संपरिष्वक्तः (बृ. ४।३।२१) । प्राज्ञेनात्मनान्वारूढः (बृ. ४।३।३५) इत्यादिभिरुभयोरन्योन्यप्रत्यनीकाकारेण स्वरूपनिर्णयात् । नापि साधनानुष्ठानेन निर्मुक्ताविद्यस्य परेण स्वरूपैक्यसंभवः । अविद्याश्रयत्वयोग्यस्य तदनर्हत्वासंभवात् । यथोक्तम्

परमात्मात्मनोर्योगः परमार्थ इतीष्यते ।
मिथ्यैतदन्यद्रव्यं हि नैति तद्द्रव्यतां यतः ॥

---

2. C. reads शास्त्रे च for अपि शास्त्रे.

3. B. C. read विकारान् for विकारम्.

13. C. reads इत्यादिषु for इत्यादि.

18. B. reads संभवात् for असंभवात्.

http://acharya.org

(वि. पु. २।१४।२७) इति । मुक्तस्य तु तद्धर्मतापत्तिरेवेति भगवद्गीतासूक्तम्

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेपि नोपजायन्ते प्रलये न व्यथन्ति च ॥

(गी. १४।२) इति । इहापि

आत्मभावं नयत्येनं तद्ब्रह्म ध्यायिनं मुने ।
विकार्यमात्मनः शक्त्या लोहमाकर्षको यथा ॥

(वि. पु. ६।७।३०) इति । आत्मभावमात्मनः स्वभावम् । नह्माकर्षकस्वरूपापत्तिराकृष्यमाणस्य । वक्ष्यति च जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च (ब्र. सू. ४।४।१७) । भोगमात्रसाम्यलिंगाच्च (ब्र. सू. ४।४।२१) । मुक्तोपसृप्यव्यपदेशाच्च (ब्र. सू. १।३।२) इति । वृत्तिरपि जगद्व्यापारवर्जं समानो ज्योतिषेति । द्रमिडभाष्यकारश्च देवतासायुज्यादशरीरस्यापि देवतावत्सर्वार्थसिद्धिः स्यादित्याह । श्रुतयश्च य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति (छा. ८।१।६) । ब्रह्मविदाप्नोति परम् (तै. २।१।१) । सोश्नुते सर्वान्कामान्त्सह ब्रह्मणा विपश्चिता (तै. २।१।१) । एतमानन्दमयमात्मानमुपसंक्रम्य । इमाँल्लोकान्कामान्नी कामरूप्यनुसंचरन् (तै. ३।१०।५) । स तत्र पर्येति (छा. ८।१२।३)। रसो वै सः । रसꣳ ह्येवायं लब्ध्वानन्दी भवति । (तै.२।७।१)

यथा नद्यः स्यन्दमानाः समुद्रेस्तं गच्छन्ति नामरूपे विहाय ।
तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ॥

(मु. ३।२।८)

---

1. C reads धर्मापत्तिः for धर्मतापत्तिः.

13. B. reads द्रविड for द्रमिड.

15. C. reads सर्वान् for सत्यान्.

http://acharya.org

तद्दा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति । (मु. ३।१।३) इत्याद्याः ।

परविद्यासु सर्वासु सगुणमेव ब्रह्मोपास्यं फलं चैकरूपमेवातो विद्याविकल्प इति सूत्रकारेणैव आनंदादयः प्रधानस्य (ब्र.सू.३।३।११)। विकल्पोविशिष्टफलत्वात् (ब्र. सू. ३।३।५७) इत्यादिषूक्तम् । वाक्यकारेण च सगुणस्योपास्यत्वं विद्याविकल्पश्चोक्तो युक्तं तद्गुणकोपासनादिति। भाष्यकृता व्याख्यातं च यद्यपि सच्चित्त इत्यादिना। ब्रह्म वेद ब्रह्मैव भवति (मु.३।२।९) इत्यत्रापि नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् (मु.३।२।८)। निरञ्जनः परमं साम्यमुपैति (मु.३।१।३)। परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते (छा. ८।३।४) इत्यादिभिरैकार्थ्यात्प्राकृतनामरूपाभ्यां विनिर्मुक्तस्य निरस्ततत्कृतभेदस्य ज्ञानैकाकारतया ब्रह्मप्रकारतोच्यते। प्रकारैक्ये च तत्त्वव्यवहारो मुख्य एव। यथा सोयं गौरिति। अत्रापि

विज्ञानं प्रापकं प्राप्ये परे ब्रह्मणि पार्थिव ।
प्रापणीयस्तथैवात्मा प्रक्षीणाशेषभावनः ॥

(वि. पु. ६।७।९१) इति परब्रह्मध्यानादात्मा परब्रह्मवत्प्रक्षीणाशेषभावनः कर्मभावना ब्रह्मभावनोभयभावनेति भावनात्रयरहितः प्रापणीय इत्यभिधाय

क्षेत्रज्ञः करणी ज्ञानं करणं तस्य वै द्विज ।
निष्पाद्य मुक्तिकार्यं वै कृतकृत्यं निवर्तयेत् ॥

(वि. पु. ६।७।९२) इति करणस्य परब्रह्मध्यानरूपस्य प्रक्षीणाशेषभावनात्मस्वरूपप्राप्त्या कृतकृत्यत्वेन निवृत्तिवचनाद्यावत्सिद्ध्यनुष्ठेयमित्युक्त्वा

---

8. B. reads मच्चित्त for सच्चित्त.

17. C. om. पर before ब्रह्मवत्.

18. C. reads च after उभयभावना.

http://acharya.org

तद्भावभावमापन्नस्तदासौ परमात्मना ।
भवत्यभेदी भेदश्च तस्याज्ञानकृतो भवेत् ॥

(वि. पु. ६।७।९३) इति मुक्तस्य स्वरूपमाह । तद्भावो ब्रह्मणो भावः स्वभावः । न स्वरूपैक्यम् । तद्भावभावमापन्न इति द्वितीयभावशब्दानन्वयात्। पूर्वोक्तार्थविरोधाच्च । यद्ब्रह्मणः प्रक्षीणाशेषभावनत्वं तदापत्तिस्तद्भावभावापत्तिः । यदैवमापन्नस्तदायं परमात्मनाभेदी भवति भेदरहितो भवति । ज्ञानैकाकारतया परमात्मनैकप्रकारस्यास्य तस्माद्भेदो देवादिरूपः । तदन्वयोस्य कर्मरूपाज्ञानमूलो न स्वरूपकृतः । स तु देवादिभेदः परब्रह्मध्यानेन मूलभूताज्ञानरूपे कर्मणि विनष्टे हेत्वभावान्निवर्तत इत्यभेदी भवति । यथोक्तम्

एकस्वरूपभेदस्तु बाह्यकर्मप्रवृत्तिजः ।
देवादिभेदे विध्वस्ते नास्त्यनावरणो हि सः ॥

इति । एतदेव विवृणोति

विभेदजनकेज्ञाने नाशमात्यन्तिकं गते ।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥

(वि. पु. ६।७।९४) इति । विविधो भेदो विभेदो देवतिर्यङ्मनुष्यस्थावरात्मकः । यथोक्तं शौनकेनापि

चतुर्विधो विभेदोयं मिथ्याज्ञाननिबन्धनः ।

इति । आत्मनि ज्ञानस्वरूपे देवादिरूपविविधभेदहेतुभूतकर्माख्याज्ञाने परब्रह्मध्यानेनात्यन्तिकं नाशं गते सति हेत्वभावाद-

---

4. B. C. read तु after न.

6. C reads यथैवमापन्नस्तथासौ for यदेवमापन्नस्तदायम्.

8 B reads प्रकरणस्य for प्रकारस्य

12 B. reads च for तु

13. B D E. F. read एवावरण. for अनावरण.

20. C. om. स्व, B. reads विभेद for विविधभेद.

http://acharya.org

सन्तं परस्माद्ब्रह्मण आत्मनो देवादिरूपं भेदं कः करिष्यतीत्यर्थः । अविद्याकर्मसंज्ञान्या (वि. पु. ६।७।६१) इत्यत्रैवोक्तम् । क्षेत्रज्ञं चापि मां विद्धि (गी. १३।२) इत्यादिनान्तर्यामिरूपेण सर्वस्यात्मतयैक्यविधानम् । अन्यथा

क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ।
उत्तमः पुरुषस्त्वन्यः (गी. १५।१६) इत्यादिभिर्विरोधः ।

अन्तर्यामिरूपेण सर्वेषामात्मत्वं तत्रैव भगवताभिहितम् ।

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।

(गी. १८।६१) सर्वस्य चाहं हृदि सन्निविष्टः (गी. १५। १५) इति च ।

अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।

(गी. १०।२०) इति च तदेवोच्यते । भूतशब्दो ह्यात्मपर्यन्तदेहवचनः । यतः सर्वेषामयमात्मा तत एव सर्वेषां तच्छरीरतया पृथगवस्थानं प्रतिषिध्यते न तदस्ति विना यत्स्यात् (गी. १०।३९) इति । भगवद्विभूत्युपसंहारश्चायमिति तथैवाभ्युपगन्तव्यम् । तत इदमुच्यते

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोंशसंभवम् ॥

(गी. १०।४१)

विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ।

(गी. १०।४२) इति । अतः शास्त्रेषु न निर्विशेषवस्तुप्रतिपादनमस्ति । नाप्यर्थजातस्य भ्रान्तत्वप्रतिपादनम् । नापि चिदचिदीश्वराणां स्वरूपभेदनिषेधः ।

---

2. C reads हि after इति; B reads हि after अत्रैव.

4 C. reads अभिधानम् for विधानम्.

7. B. reads भगवता तत्रैवोक्तम् for तत्रैव भगवताभिहितम्.

http://acharya.org

यदप्युच्यते निर्विशेषे स्वयंप्रकाशे वस्तुनि दोषपरिकल्पितमीश्वरेशितव्याद्यनन्तविकल्पं सर्वं जगत्। दोषश्च स्वरूपतिरोधानविविधविचित्रविक्षेपकरी सदसदनिर्वचनीयानाद्यविद्या। सा चावश्याभ्युपगमनीया। अनृतेन हि प्रत्यूढाः (छा. ८।३।२) इत्यादिभिः श्रुतिभिर्ब्रह्मणस्तत्त्वमस्यादिवाक्यसामानाधिकरण्यावगतजीवैक्यानुपपत्त्या च। सा तु न सती। भ्रान्तिबाधयोरयोगात्। नाप्यसती। ख्यातिबाधयोश्चायोगात्। अतः कोटिद्वयविनिर्मुक्तेयमविद्येति तत्त्वविद इति। तदयुक्तम्। सा हि किमाश्रित्य भ्रमं जनयतीति वक्तव्यम्। न तावज्जीवमाश्रित्य। अविद्यापरिकल्पितत्वाज्जीवभावस्य। नापि ब्रह्माश्रित्य। तस्य स्वयंप्रकाशज्ञानरूपत्वेनाविद्याविरोधित्वात्। सा हि ज्ञानबाध्याभिमता।

ज्ञानरूपं परं ब्रह्म तन्निवर्त्यं मृषात्मकम्।
अज्ञानं चेत्तिरस्कुर्यात्कः प्रभुस्तन्निवर्तने॥
ज्ञानं ब्रह्मेति चेज्ज्ञानमज्ञानस्य निवर्तकम्।
ब्रह्मवत्तत्प्रकाशत्वात्तदपि ह्यनिवर्तकम्॥
ज्ञानं ब्रह्मेति विज्ञानमस्ति चेत्स्यात्प्रमेयता।
ब्रह्मणोननुभूतित्वं त्वदुक्त्यैव प्रसज्यते॥

ज्ञानस्वरूपं ब्रह्मेति ज्ञानं तस्या अविद्याया बाधकं न स्वरूपभूतं ज्ञानमिति चेन्न। उभयोरपि ब्रह्मस्वरूपप्रकाशत्वे सत्यन्यतरस्य विरोधित्वमन्यतरस्य नेति विशेषानवगमात्। एतदुक्तं भवति। ज्ञानस्वरूपं ब्रह्मेत्यनेन ज्ञानेन ब्रह्मणि यः स्वभा-

---

4. C. reads अवश्यम् for अवश्य.
11. C. om ज्ञान after प्रकाश.
16. C. reads चेज्ज्ञानम् for विज्ञानम्.
19 B. reads प्रकाशत्वाविशेषात् for प्रकाशत्वे सति.
20. C. reads अविरोधित्वम् for विरोधित्वम्.
21. C. om. स्व before रूपम्.

http://acharya.org

वोवगम्यते स ब्रह्मणः स्वयंप्रकाशत्वेन स्वयमेव प्रकाशत इत्यविद्याविरोधित्वे न कश्चिद्विशेषः स्वरूपतद्विषयज्ञानयोरिति ।

किं चानुभवस्वरूपस्य ब्रह्मणोनुभवान्तराननुभाव्यत्वेन भवतो न तद्विषयं ज्ञानमस्ति । अतो ज्ञानमज्ञानविरोधि चेत्स्वयमेव विरोधि भवतीति नास्या ब्रह्माश्रयत्वसंभवः । शुक्त्यादयस्तु स्वयाथात्म्यप्रकाशे स्वयमसमर्थाः स्वाज्ञानाविरोधिनस्तन्निवर्तने ज्ञानान्तरमपेक्षन्ते । ब्रह्म तु स्वानुभवसिद्धस्वयाथात्म्यमिति स्वाज्ञानविरोध्येव । तत एव निवर्तकान्तरं च नापेक्षते ।

अथोच्येत ब्रह्मव्यतिरिक्तस्य मिथ्यात्वज्ञानमज्ञानविरोधीति । न । इदं ब्रह्मव्यतिरिक्तमिथ्यात्वज्ञानं किं ब्रह्मयाथात्म्याज्ञानविरोध्युत प्रपञ्चसत्यत्वरूपाज्ञानविरोधीति विवेचनीयम् । न तावद्ब्रह्मयाथात्म्याज्ञानविरोधि । अतद्विषयत्वात् । ज्ञानाज्ञानयोरेकविषयत्वेन हि विरोधः । प्रपञ्चमिथ्यात्वज्ञानं च तत्सत्यत्वरूपाज्ञानेन विरुध्यते । तेन प्रपञ्चसत्यत्वरूपाज्ञानमेव बाधितमिति ब्रह्मस्वरूपाज्ञानं तिष्ठत्येव । ब्रह्मस्वरूपाज्ञानं नाम तस्य सद्वितीयत्वज्ञानमेव । तत्तु तद्व्यतिरिक्तस्य मिथ्यात्वज्ञानेन निवृत्तम् । स्वरूपं तु स्वानुभवसिद्धमिति चेन्न । ब्रह्मणोद्वितीयत्वं स्वरूपं स्वानुभवसिद्धमिति तद्विरोधि सद्वितीयत्वरूपा-

---

3. B. C. om. स्व.

4 B. reads अज्ञानमेव न सिध्यति for स्वयमेव विरोधि भवति.

6. C. reads असमर्थान् for असमर्थाः.

7. B. C read च after निवर्तने

8. B. om. स्व before अज्ञान.

13. B. C. om. च.

14. B. reads सत्यस्वरूप for सत्यत्वरूप after तत्.

16. B. C. read सद्वितीयत्वम् for सद्वितीयत्वज्ञानम्; C. reads व्यतिरिक्त for व्यतिरिक्तस्य.

http://acharya.org

ज्ञानं तद्बाधश्च न स्याताम्। अद्वितीयत्वं धर्म इति चेन्न। अनुभवस्वरूपस्य ब्रह्मणोनुभाव्यधर्मविरहस्य भवतैवोपपादितत्वात्। अतो ज्ञानस्वरूपस्य ब्रह्मणो विरोधादेव नाज्ञानाश्रयत्वम्।

किं चाविद्यया प्रकाशैकस्वरूपं ब्रह्म तिरोहितमिति वदता स्वरूपनाश एवोक्तः स्यात्। प्रकाशतिरोधानं नाम प्रकाशोत्पत्तिप्रतिबन्धो विद्यमानस्य विनाशो वा। प्रकाशस्यानुत्पाद्यत्वाभ्युपगमेन प्रकाशतिरोधानं प्रकाशनाश एव।

अपि च निर्विषया निराश्रया स्वप्रकाशेयमनुभूतिः, स्वाश्रयदोषवशादनन्ताश्रयमनन्तविषयमात्मानमनुभवतीत्यत्र किमयं स्वाश्रयदोषः परमार्थभूत उतापरमार्थभूत इति विवेचनीयम्। न तावत्परमार्थः। अनभ्युपगमात्। नाप्यपरमार्थः। तथा हि सति द्रष्टृत्वेन वा दृश्यत्वेन वा दृशित्वेन वाभ्युपगमनीयः। न तावद्दृशिः। दृशिस्वरूपभेदानभ्युपगमात्। भ्रमाधिष्ठानभूतायास्तु साक्षाद्दृशेर्माध्यमिकपक्षप्रसङ्गेनापारमार्थ्यानभ्युपगमाच्च। द्रष्टृदृश्ययोस्तदवच्छिन्नाया दृशेश्च काल्पनिकत्वेन मूलदोषान्तरापेक्षयानवस्था स्यात्। अथैतद्दोषपरिजिहीर्षया परमार्थसत्यनुभूतिरेव ब्रह्मस्वरूपा दोष इति चेत्। ब्रह्मैव चेद्दोषः प्रपञ्चदर्शनस्यैव तन्मूलं स्यात्। किं प्रपञ्चतुल्याविद्यान्तरकल्पनेन।

---

2. B C om. स्व after अनुभव, B C. read प्रति for उप
3 C. om अतो ज्ञानस्वरूपस्य ब्रह्मणो विरोधादेव नाज्ञानाश्रयत्वम्.
8. B reads च after निराश्रया.
10 B C. read स्वाश्रय. for स्वाश्रय.
11. B. C. om. हि.
13. B. reads ज्ञानस्वरूप for दृशिस्वरूप.
16. B. C. om. दोष after एतत्.
17. C. reads सत्यानुभूति· for सत्यनुभूतिः; B. reads स्वरूपम् for स्वरूपा.
18. B. reads परि before कल्पनेन.

http://acharya.org

ब्रह्मणो दोषत्वे सति तस्य नित्यत्वेनानिर्मोक्षश्च स्यात् । अतो यावद्ब्रह्मव्यतिरिक्तपारमार्थिकदोषानभ्युपगमो न तावद्भ्रान्तिरुपपादिता भवति ।

अनिर्वचनीयत्वं च किमभिप्रेतम् । सदसद्विलक्षणत्वमिति चेत् । तथाविधस्य वस्तुनः प्रमाणशून्यत्वेनानिर्वचनीयतैव स्यात् । एतदुक्तं भवति । सर्वं हि वस्तुजातं प्रतीतिव्यवस्थाप्यम् । सर्वा च प्रतीतिः सदसदाकारा । सदसदाकारायाः प्रतीतेः सदसद्विलक्षणं विषय इत्यभ्युपगम्यमाने सर्वं सर्वप्रतीतेर्विषयः स्यादिति ।

अथ स्याद्वस्तुस्वरूपतिरोधानकरमान्तरबाह्यरूपविविधाध्यासोपादानं सदसदनिर्वचनीयमविद्याज्ञानादिपदवाच्यं वस्तुयाथात्म्यज्ञाननिवर्त्यं ज्ञानप्रागभावातिरेकेण भावरूपमेव किंचिद्वस्तु प्रत्यक्षानुमानाभ्यां प्रतीयते । तदुपहितब्रह्मोपादानश्चाविकारे स्वप्रकाशचिन्मात्रवपुषि तेनैव तिरोहितस्वरूपे प्रत्यगात्मन्यहंकारज्ञानज्ञेयविभागरूपोध्यासः । तस्यैवावस्थाविशेषेणाध्यासरूपे जगति ज्ञानबाध्यसर्परजतादिवस्तुतज्ज्ञानरूपोध्यासोपि जायते । कृत्स्नस्य मिथ्यारूपस्य तदुपादानत्वं च मिथ्याभूतस्यार्थस्य मिथ्याभूतमेव कारणं भवितुमर्हतीति हेतुबलादवगम्यते । कारणाज्ञानविषयं प्रत्यक्षं तावदहमज्ञो मामन्यं च न जानामीत्यपरोक्षावभासः । अयं तु न ज्ञानप्रागभावविषयः । स हि षष्ठप्रमाणगोचरः । अयं त्वहं सुखीतिवदपरोक्षः । अभावस्य प्रत्यक्षत्वाभ्युपगमेप्ययमनुभवो नात्मनि ज्ञानाभावविषयः । अनुभववेलायामपि ज्ञानस्य विद्यमानत्वात् । अविद्यमानत्वे ज्ञानाभा-

6. D. reads न before स्यात्.

8. B. reads विलक्षणत्वम् for विलक्षणम्.

17. C. om. च.

http://acharya.org

वप्रतीत्यनुपपत्तेश्च । एतदुक्तं भवति । अहमज्ञ इत्यस्मिन्ननुभवेह्मित्यात्मनोभावधर्मितया ज्ञानस्य च प्रतियोगितयावगतिरस्ति वा न वा । अस्ति चेद्विरोधादेव न ज्ञानाभावानुभवसंभवः । नो चेद्धर्मिप्रतियोगिज्ञानापेक्षो ज्ञानाभावानुभवः सुतरां न संभवति । ज्ञानाभावस्यानुमेयत्वेभावाख्यप्रमाणविषयत्वे चेयमनुपपत्तिः समाना । अस्याज्ञानस्य भावरूपत्वे धर्मिप्रतियोगिज्ञानसद्भावेपि विरोधाभावादयमनुभवो भावरूपाज्ञानविषय एवाभ्युपगन्तव्य इति ।

ननु च भावरूपमज्ञानं वस्तुयाथात्म्यावभासरूपेण साक्षिचैतन्येन विरुध्यते । नैवम् । साक्षिचैतन्यं न वस्तुयाथात्म्यविषयम् । अपि त्वज्ञानविषयम् । अन्यथा मिथ्यार्थावभासानुपपत्तेः । न ह्यज्ञानविपर्येण ज्ञानेनाज्ञानं निवर्त्यत इति न विरोधः । ननु चेदं भावरूपमप्यज्ञानं विषयविशेषव्यावृत्तमेव साक्षिचैतन्यस्य विषयो भवति । स विषयः प्रमाणाधीनसिद्धिरिति कथमिव साक्षिचैतन्येनास्मदर्थव्यावृत्तमज्ञानं विषयीक्रियते । नैष दोषः । सर्वमेव वस्तुजातं ज्ञाततयाज्ञाततया वा साक्षिचैतन्यस्य विषयभूतम् । तत्र जडत्वेन ज्ञाततया सिध्यत एव प्रमाणव्यवधानापेक्षा । अजडस्य तु प्रत्यग्वस्तुनः स्वयं सिध्यतो न प्रमाणव्यवधानापेक्षेति सदैवाज्ञानव्यावर्तकत्वेनावभासो युज्यते । तस्मान्न्यायोपबृंहितेन

---

2. B. reads धर्मतया for धर्मितया.

4 B. C. read सव्यपेक्ष· for अपेक्ष

6. B. reads भावस्वरूपत्वे for भावरूपत्वे

7. B. reads असद्भावे for सद्भावे.

9. C reads अपि after भावरूपम्.

12. C. reads अज्ञानेन for ज्ञानेन; B. reads न after अज्ञानम्

13 C. reads विशेषात् for विशेष.

17. B. reads ज्ञेयतया after ज्ञाततया.

http://acharya.org

प्रत्यक्षेण भावरूपमेवाज्ञानं प्रतीयते । तदिदं भावरूपमज्ञानमनुमानेनापि सिध्यति । विवादाध्यासितं प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकम् । अप्रकाशितार्थप्रकाशकत्वात् । अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावदिति । आलोकाभावमात्रं रूपदर्शनाभावमात्रं वा तमो न द्रव्यम् । तत्कथं भावरूपाज्ञानसाधने निदर्शनतयोपन्यस्यत इति चेत् । उच्यते । बहुलत्वविरलत्वाद्यवस्थायोगेन रूपवत्तया चोपलब्धेर्द्रव्यान्तरमेव तम इति निरवद्यमिति ।

अत्रोच्यते । अहमज्ञो मामन्यं च न जानामीत्यत्रोपपत्तिसहितेन केवलेन च प्रत्यक्षेण न भावरूपमज्ञानं प्रतीयते । यस्तु ज्ञानप्रागभावविषयत्वे विरोध उक्तः स हि भावरूपाज्ञानेपि तुल्यः । विषयत्वेनाश्रयत्वेन चाज्ञानस्य व्यावर्तकतया प्रत्यगर्थः प्रतिपन्नोप्रतिपन्नो वा । प्रतिपन्नश्चेत्तत्स्वरूपज्ञाननिवर्त्यं तदज्ञानं तस्मिन्प्रतिपन्ने कथमिव तिष्ठति । अप्रतिपन्नश्चेद्व्यावर्तकाश्रयविषयज्ञानशून्यमज्ञानं कथमनुभूयेत । अथ विशदस्वरूपावभासोज्ञानविरोध्यविशदस्वरूपं तु प्रतीयत इत्याश्रयविषयज्ञाने सत्यपि नाज्ञानानुभवविरोध इति । हन्त तर्हि ज्ञानप्रागभावोपि विशदस्वरूपविषय आश्रयप्रतियोगिज्ञानं त्वविशदस्वरूपविषयमिति न कश्चिद्विशेषोन्यत्राभिनिवेशात् । भावरूपस्याज्ञानस्यापि ह्यज्ञानमिति सिध्यतः प्रागभावसिद्धाविव सापेक्षत्वमस्त्येव । तथाहि । अज्ञानमिति ज्ञानाभावस्तदन्यस्तद्विरोधि वा । त्रयाणामपि तत्स्वरूपज्ञानापेक्षावश्याश्रयणीया । यद्यपि तमःस्वरूपप्रतिपत्तौ प्रकाशापेक्षा न विद्यते तथापि प्र-

---

5. B C read वा after आलोकाभावमात्रम्

13. C. reads न for अप्रतिपन्नः, C. om. तत् after चेत्.

18. C. om. अपि after ज्ञानप्रागभावः.

http://acharya.org

काशविरोधीत्यनेनाकारेण प्रतिपत्तौ प्रकाशप्रतिपत्त्यपेक्षास्त्येव । भवदभिमताज्ञानं न कदाचित्स्वरूपेण सिध्यति । अपि त्वज्ञानमित्येव । तथा सति ज्ञानाभाववत्तदपेक्षत्वं समानम् । ज्ञानप्रागभावस्तु भवताप्यभ्युपगम्यते प्रतीयते चेत्युभयाभ्युपेतो ज्ञानप्रागभाव एवाहमज्ञो मामन्यं च न जानामीत्यनुभूयत इत्यभ्युपगन्तव्यम् ।

नित्यमुक्तस्वप्रकाशचैतन्यैकस्वरूपस्य ब्रह्मणोऽज्ञानानुभवश्च न संभवति । स्वानुभवस्वरूपत्वात् । स्वानुभवस्वरूपमपि तिरोहितस्वस्वरूपमज्ञानमनुभवतीति चेत् । किमिदं तिरोहितस्वस्वरूपत्वम् । अप्रकाशितस्वरूपत्वमिति चेत् । स्वानुभवस्वरूपस्य कथमप्रकाशितस्वरूपत्वम् । स्वानुभवस्वरूपस्याप्यन्यतोऽप्रकाशितस्वरूपत्वमापद्यत इति चेत् । एवं तर्हि प्रकाशाख्यधर्मानभ्युपगमेन प्रकाशस्यैव स्वरूपत्वादन्यतः स्वरूपनाश एव स्यादिति पूर्वमेवोक्तम् (पृ. ८५ पं. ४) । किं च ब्रह्मस्वरूपतिरोधानहेतुभूतमेतदज्ञानं स्वयमनुभूतं सद्ब्रह्म तिरस्करोति ब्रह्म तिरस्कृत्य स्वयं तदनुभवविषयो भवतीत्यन्योन्याश्रयणम् । अनुभूतमेव तिरस्करोतीति चेत् । यद्यतिरोहितस्वरूपमेव ब्रह्माज्ञानमनुभवतीति तिरोधानकल्पना निष्प्रयोजना स्यात् । अज्ञानस्वरूपकल्पना च । ब्रह्मणोऽज्ञानदर्शनवदज्ञानकार्यतयाभिमतप्रपञ्चदर्शनस्यैव संभवात् । किं च ब्रह्मणोऽज्ञानानुभवः किं स्वतोऽन्यतो वा । स्वतश्चेदज्ञानानुभवस्य स्वरूपप्रयुक्तत्वेनानि-

2. B. reads अभिमतम् for अभिमत.

9. C. om. स्व before स्वरूपम् and स्वरूपत्वम्.

13. C. om एव after स्वरूपनाशः.

18. C. reads ज्ञानम् for अज्ञानम्. B. C. om. इति after अनुभवति; C. reads निष्फला for निष्प्रयोजना.

http://acharya.org

मोक्षः स्यात् । अनुभूतिस्वरूपस्य ब्रह्मणोऽज्ञानानुभवस्वरूपत्वेन मिथ्यारजतबाधकज्ञानेन रजतानुभवस्यापि निवृत्तिवन्निवर्तकज्ञानेनाज्ञानानुभूतिरूपब्रह्मस्वरूपनिवृत्तिर्वा । अन्यतश्चेत्किं च तदन्यत् । अज्ञानान्तरमिति चेदनवस्था स्यात् । ब्रह्म तिरस्कृत्यैव स्वयमनुभवविषयो भवतीति चेत् । तथा सतीदमज्ञानं काचादिवत्स्वसत्तया ब्रह्म तिरस्करोतीति ज्ञानबाध्यत्वमज्ञानस्य न स्यात् ।

अथेदमज्ञानं स्वयमनादि ब्रह्मणः स्वसाक्षित्वं ब्रह्मस्वरूपतिरस्कृतिं च युगपदेव करोति । अतो नानवस्थादयो दोषा इति । नैतत् । स्वानुभवस्वरूपस्य ब्रह्मणः स्वरूपतिरस्कृतिमन्तरेण साक्षित्वापादनायोगात् । हेत्वन्तरेण तिरस्कृतमिति चेत् । तर्ह्यस्यानादित्वमपास्तम् । अनवस्था च पूर्वोक्ता । अतिरस्कृतस्वरूपस्यैव साक्षित्वापादने ब्रह्मणः स्वानुभवैकतानता च न स्यात् । अपि चाविद्यया ब्रह्मणि तिरोहिते तद्ब्रह्म न किंचिदपि प्रकाशत उत किंचित्प्रकाशते । पूर्वस्मिन्कल्पे प्रकाशमात्रस्वरूपस्य ब्रह्मणोऽप्रकाशे तुच्छतापत्तिरसकृदुक्ता । उत्तरस्मिन्कल्पे सच्चिदानन्दैकरसे ब्रह्मणि कोयमंशस्तिरस्क्रियते को वा प्रकाशते । निरंशे निर्विशेषे प्रकाशमात्रे वस्तुन्याकारद्वयासंभवेन तिरस्कारः प्रकाशश्च युगपन्न संगच्छेते ।

अथ सच्चिदानन्दैकरसं ब्रह्माविद्यया तिरोहितस्वरूपमविशदमिवालक्ष्यत इति । प्रकाशमात्रस्वरूपस्य विशदताविश-

---

3. B. C om. च.

12. B. reads तस्य for अस्य; C. om. अस्य.

18 B reads असभवे सति for असभवेन.

19. B. C read सगच्छते for संगच्छेते.

21. B. reads अविशदता विशदता for विशदताविशदता.

http://acharya.org

दता वा किंरूपा । एतदुक्तं भवति । यः सांशः सविशेषः प्रकाशविषयस्तस्य सकलावभासो विशदावभासः कतिपयविशेषरहितश्चाविशदावभासः । तत्र य आकारोऽप्रतिपन्नस्तस्मिन्नंशे प्रकाशाभावादेव प्रकाशवैशद्यं न विद्यते । यश्चांशः प्रतिपन्नस्तस्मिन्नंशे तद्विषयप्रकाशो विशद एव । अतः सर्वत्र प्रकाशांशेवैशद्यं न संभवति । विषयेऽपि स्वरूपे प्रतीयमाने तद्गतकतिपयविशेषाप्रतीतिरेवावैशद्यम् । तस्मादविषये निर्विशेषे प्रकाशमात्रे ब्रह्मणि स्वरूपे प्रकाशमाने कतिपयविशेषाप्रतिपत्तिरूपावैशद्यं नामाज्ञानकार्यं न संभवतीति । अपि चेदमविद्याकार्यमवैशद्यं तत्त्वज्ञानोदयान्निवर्तते न वा । अनिवृत्तावपवर्गाभावः । निवृत्तौ च वस्तु किंरूपमिति विवेचनीयम् । विशदस्वरूपमिति चेत्तद्विशदस्वरूपं प्रागस्ति वा न वा । अस्ति चेदविद्याकार्यमवैशद्यं तन्निवृत्तिश्च न स्याताम् । नो चेन्मोक्षस्य कार्यतयानित्यता स्यात् । अस्याज्ञानस्याश्रयानिरूपणादेवासंभवः पूर्वमेवोक्तः (पृ. ८३ पं. ९) । अपि चापरमार्थदोषमूलभ्रमवादिना निरधिष्ठानभ्रमासंभवो दुरुपपादः । भ्रमहेतुभूतदोषदोषाश्रयवदधिष्ठानापारमार्थ्येऽपि भ्रमोपपत्तेः । ततश्च सर्वशून्यत्वमेव स्यात् ।

यदुक्तम् (पृ. ८८ पं. २) अनुमानेनापि भावरूपमज्ञानं

---

1 C reads यस्याशस्स विशेष for य साश सविशेप.

3 B. E. F. read रहितावभासः for रहित, C reads रहिताभास for रहित..

4. B. reads अवैशद्यम् for वैशद्यम्.

9. B. reads अपि after इदम्.

14. B. C. om. स्यात्.

16 B. reads त्वया after वादिना, C reads अपि after असभव..

17. C. reads दोषाश्रयत्वतत् for दोषाश्रयवत्.

http://acharya.org

सिध्यतीति । तदयुक्तम् । अनुमानासंभवात् । ननूक्तमनुमानम् । सत्यमुक्तम् । दुरुक्तं तु तत् । अज्ञानेप्यनभिमताज्ञानान्तरसाधनेन विरुद्धत्वाद्धेतोः । तत्राज्ञानान्तरासाधने हेतोरनैकान्त्यम् । साधने च तदज्ञानमज्ञानसाक्षित्वं निवारयति । ततश्चाज्ञानकल्पना निष्फला स्यात् । दृष्टान्तश्च साधनविकलः । प्रदीपप्रभाया अप्रकाशितार्थप्रकाशकत्वाभावात् । सर्वत्र हि ज्ञानस्यैव प्रकाशकत्वम् । सत्यपि दीपे विज्ञानेन विना विषयप्रकाशाभावात् । इन्द्रियाणामपि ज्ञानोत्पत्तिहेतुत्वमेव । न प्रकाशकत्वम् । प्रदीपप्रभायास्तु चक्षुरिन्द्रियस्य ज्ञानमुत्पादयतो विरोधितमोनिरसनद्वारेणोपकारकत्वमात्रमेव । प्रकाशकज्ञानोत्पत्तौ व्याप्रियमाणचक्षुरिन्द्रियोपकारकत्वमपेक्ष्य दीपस्य प्रकाशकत्वव्यवहारः । नास्माभिर्ज्ञानतुल्यप्रकाशकत्वाभ्युपगमेन प्रदीपप्रभा निदर्शिता । अपितु ज्ञानस्यैव स्वविषयावरणनिरसनपूर्वप्रकाशकत्वमङ्गीकृत्येति चेन्न । नहि विरोधिनिरसनमात्रं प्रकाशकत्वम् । अपि त्वर्थपरिच्छेदः । व्यवहारयोग्यतापादनमिति यावत् । तत्तु ज्ञानस्यैव । यद्युपकारकाणामप्यप्रकाशितार्थप्रकाशकत्वमङ्गीकृतं तर्हीन्द्रियाणामुपकारकतमत्वेनाप्रकाशितार्थप्रकाशकत्वमङ्गीकरणीयम् । तथा सति तेषां स्वनिवर्त्यवस्त्वन्तरपूर्वकत्वाभावाद्धेतोरनैकान्त्यमित्यलमनेन ।

---

3. B reads अपि after तत्र.
5. B. C. om. प्र before दीप
6. B. reads अयोगात् for अभावात्.
7 C om. वि before ज्ञानेन.
10. C. reads एव प्रकाशकत्वम्। ज्ञानोत्पत्तौ for एव। प्रकाशकज्ञानोत्पत्तौ.
11. C. reads उपकारहेतुत्वम् for उपकारकत्वम्
13. C. reads इव for एव, B. C. read पूर्वक for पूर्व.
14 C. om. न after चेत्.
17. B. reads उपकारकत्ववत्त्वेन for उपकारकतमत्वेन.

http://acharya.org

प्रतिप्रयोगाश्च १ विवादाध्यासितमज्ञानं न ज्ञानमात्रब्रह्माश्रयम्। अज्ञानत्वात्। शुक्तिकाद्यज्ञानवत्। ज्ञात्राश्रयं हि तत्। २ विवादाध्यासितमज्ञानं न ज्ञानावरणम्। अज्ञानत्वात्। शुक्तिकाद्यज्ञानवत्। विषयावरणं हि तत्। ३ विवादाध्यासितमज्ञानं न ज्ञाननिवर्त्यम्। ज्ञानविषयानावरणत्वात्। यज्ज्ञाननिवर्त्यमज्ञानं तज्ज्ञानविषयावरणं यथा शुक्तिकाद्यज्ञानम्। ४ ब्रह्म नाज्ञानास्पदम्। ज्ञातृत्वविरहात्। घटादिवत्। ५ ब्रह्म नाज्ञानावरणम्। ज्ञानाविषयत्वात्। यदज्ञानावरणं तज्ज्ञानविषयभूतं यथा शुक्तिकादि। ६ ब्रह्म न ज्ञाननिवर्त्याज्ञानम्। ज्ञानाविषयत्वात्। यज्ज्ञाननिवर्त्याज्ञानं तज्ज्ञानविषयभूतं यथा शुक्तिकादि। ७ विवादाध्यासितं प्रमाणज्ञानं स्वप्रागभावातिरिक्ताज्ञानपूर्वकं न भवति। प्रमाणज्ञानत्वात्। भवदभिमताज्ञानसाधनप्रमाणज्ञानवत्। ८ ज्ञानं न वस्तुनो विनाशकम्। शक्तिविशेषोपबृंहणविरहे सति ज्ञानत्वात्। यद्वस्तुनो विनाशकं तच्छक्तिविशेषोपबृंहितं ज्ञानमज्ञानं च दृष्टं यथेश्वरयोगिप्रभृतिज्ञानम्। यथा च मुद्गरादि। ९ भावरूपमज्ञानं न ज्ञानविनाश्यम्। भावरूपत्वात्। घटादिवदिति।

अथोच्येत। बाधकज्ञानेन पूर्वज्ञानोत्पन्नानां भयादीनां विनाशो दृश्यत इति। नैवम्। न हि ज्ञानेन तेषां विनाशः। क्षणिकत्वेन तेषां स्वयमेव विनाशात्। कारणनिवृत्त्या च पश्चादनुत्पत्तेः। क्षणिकत्वं च तेषां ज्ञानवदुत्पत्तिकारणसंनिधान एवोपलब्धेरन्यथानुपलब्धेश्चावगम्यते। अक्षणिकत्वे च तेषां

3. C. reads अज्ञानावरणम् for न ज्ञानावरणम्.

11. C. om. स्व.

17. B. reads पूर्वं after पूर्व.

19. C. reads नाशात् for विनाशात्; B. reads कारणानुवृत्त्या च पश्चादनुवृत्तिः for कारणनिवृत्त्या च पश्चादनुत्पत्तेः.

21. C. om. च after अक्षणिकत्वे.

http://acharya.org

भयादीनां भयादिहेतुभूतज्ञानसंततावविशेषेण सर्वेषां ज्ञानानां भयाद्युत्पत्तिहेतुत्वेनानेकभयोपलब्धिप्रसङ्गाच्च । स्वप्रागभावव्यतिरिक्तवस्त्वन्तरपूर्वकमिति व्यर्थविशेषणोपादानेन प्रयोगकुशलता चाविष्कृता । अतो नानुमानेनापि भावरूपाज्ञानसिद्धिः । श्रुतितदर्थापत्तिभ्यामज्ञानासिद्धिरनन्तरमेव (पृ. १०१ पं. ८) वक्ष्यते । मिथ्यार्थस्य मिथ्यैवोपादानं भवितुमर्हतीत्येतदपि (पृ. ८६ पं. १७) न विलक्षणत्वात् (ब्र. सू. २।१।४) इत्येतदधिकरणन्यायेन परिह्रियते । अतोनिर्वचनीयाज्ञानविषया न काचिदपि प्रतीतिरस्ति। प्रतीतिभ्रान्तिबाधैरपि न तथाभ्युपगमनीयम् । प्रतीयमानमेव हि प्रतीतिभ्रान्तिबाधविषयः । आभिः प्रतीतिभिः प्रतीत्यन्तरेण चानुपलब्धमासां विषय इति न युज्यते कल्पयितुम् ।

शुक्त्यादिषु रजतादिप्रतीतेः प्रतीतिकालेपि तन्नास्तीति बाधेन चान्यस्यान्यथावभासायोगाच्च सदसदनिर्वचनीयमपूर्वमेवेदं रजतं दोषवशात्प्रतीयत इति कल्पनीयमिति चेन्न । तत्कल्पनायामप्यन्यस्यान्यथावभासस्यावर्जनीयत्वात् । अन्यथावभासाभ्युपगमादेव ख्यातिप्रवृत्तिबाधभ्रमत्वानामुपपत्तेः । अत्यन्तापरिदृष्टाकारणकवस्तुकल्पनायोगात् । कल्प्यमानं हीदमनिर्वचनीयम् । न च तदानीमनिर्वचनीयमिति प्रतीयते । अपि तु परमार्थरजतमित्येव । अनिर्वचनीयमित्येव प्रतीतं चेद्भ्रान्ति-

---

9. C. reads प्रतिपत्ति for प्रतीतिः; E. F. read अन्यथा for तथा.

14. B. C. read भान for अवभास.

16. B. C read भानस्य for अवभासस्य.

17. B. reads अन्यथापरिदृष्टकारणवस्तु for अत्यन्तापरिदृष्टाकारणकवस्तु.

19. B. om. च; C. reads तावत् for च तदानीम्.

http://acharya.org

बाधयोः प्रवृत्तेरप्यसंभवः । अतोन्यस्यान्यथावभासविरहे प्रतीतिप्रवृत्तिबाधभ्रमत्वानामनुपपत्तेस्तस्यापरिहार्यत्वाच्च शुक्त्यादिरेव रजताद्याकारेणावभासत इति भवताभ्युपगन्तव्यम् ।

ख्यात्यन्तरवादिनां च सुदूरमपि गत्वान्यथावभासोवश्याश्रयणीयः । असत्ख्यातिपक्षे सदात्मनात्मख्यातिपक्षे चार्थात्मनाख्यातिपक्षेप्यन्यविशेषणमन्यविशेषणत्वेन ज्ञानद्वयमेकत्वेन च । विषयासद्भावपक्षेपि विद्यमानत्वेन । किं चानिर्वचनीयमपूर्वरजतमत्र जातमिति वदता तस्य जन्मकारणं वक्तव्यम् । न तावत्प्रतीतिः । तस्यास्तद्विषयत्वेन तदुत्पत्तेः प्रागात्मलाभायोगात् । निर्विषया जाता तदुत्पाद्य तदेव विषयीकरोतीति महतामिदमुपपादनम् । अथेन्द्रियादिगतो दोषः । तन्न । तस्य पुरुषाश्रयत्वेनार्थगतकार्यस्योत्पादकत्वायोगात् । नापीन्द्रियाणि । तेषां ज्ञानकारणत्वात् । नापि दुष्टानीन्द्रियाणि । तेषामपि स्वकार्यभूते ज्ञान एव हि विशेषकरत्वम् । अनादिमिथ्याज्ञानोपादानत्वं तु पूर्वमेव निरस्तम् ।

किं चापूर्वमनिर्वचनीयमिदं वस्तुजातं रजतादिबुद्धिशब्दाभ्यां कथमिव विषयीक्रियते न घटादिबुद्धिशब्दाभ्याम् । रजतादिसादृश्यादिति चेत् । तर्हि तत्सदृशमित्येव प्रतीतिशब्दौ स्याताम् । रजतत्वादिजातियोगादिति चेत् । सा किं परमार्थभूतोतापरमार्थभूता वा । न तावत्परमार्थभूता । तस्या अपरमार्थान्वयायोगात् । नाप्यपरमार्थभूता । परमार्थान्वयायोगात् ।

---

1 B. om. अपि after प्रवृत्ते..

14. B. C. om. हि.

15. C. om. तु.

19. B. reads रजत for रजतत्व.

20. B. om. उत.

http://acharya.org

अपरमार्थे परमार्थबुद्धिशब्दयोर्निर्वाहकत्वायोगाच्चेत्यलमपरिणतकुतर्कनिरसनेन ।

अथवा

यथार्थं सर्वविज्ञानमिति वेदविदां मतम् ।
श्रुतिस्मृतिभ्यः सर्वस्य सर्वात्मत्वप्रतीतितः ॥
बहु स्यामिति संकल्पपूर्वसृष्ट्याद्युपक्रमे ।
तासां त्रिवृतमेकैकामिति श्रुत्यैव चोदितम् ॥
त्रिवृत्करणमेवं हि प्रत्यक्षेणोपलभ्यते ॥
यदग्ने रोहितं रूपं तेजसस्तदपामपि ।
शुक्लं कृष्णं पृथिव्याश्चेत्यग्नावेव त्रिरूपता ॥
श्रुत्यैव दर्शिता तस्मात्सर्वे सर्वत्र संगताः ।
पुराणे चैवमेवोक्तं वैष्णवे सृष्ट्युपक्रमे ॥
नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना ।
नाशक्नुवन्प्रजाः स्रष्टुमसमागम्य कृत्स्नशः ॥
समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः ।
महदाद्या विशेषान्ता ह्यण्डमित्यादिना ततः ॥
सूत्रकारोपि भूतानां त्रिरूपत्वं तथावदत् ।
त्र्यात्मकत्वात्तु भूयस्त्वादिति तेनाभिधाभिदा ॥
सोमाभावे च पूतीकग्रहणं श्रुतिचोदितम् ।
सोमावयवसद्भावादिति न्यायविदो विदुः ॥
व्रीह्यभावे च नीवारग्रहणं व्रीहिभावतः ।
तदेव सदृशं तस्य यत्तद्द्रव्यैकदेशभाक् ॥
शुक्त्यादौ रजतादेश्च भावः श्रुत्यैव चोदितः ।

1. C. reads शब्दयोग for शब्दयोः.

19. B. C. read दर्शितम् for चोदितम्.

23. B. C. read बोधितः for चोदितः.

http://acharya.org

रूप्यशुक्त्यादिनिर्देशभेदो भूयस्त्वहेतुकः ॥
रूप्यादिसदृशश्चायं शुक्त्यादिरुपलभ्यते ।
अतस्तस्यात्र सद्भावः प्रतीतेरपि निश्चितः ॥
कदाचिच्चक्षुरादेस्तु दोषाच्छुक्त्यंशवर्जितः ।
रजतांशो गृहीतोतो रजतार्थी प्रवर्तते ॥
दोषहानौ तु शुक्त्यंशे गृहीते तन्निवर्तते ।
अतो यथार्थं रूप्यादिविज्ञानं शुक्तिकादिषु ॥
बाध्यबाधकभावोपि भूयस्त्वेनोपपद्यते ।
शुक्तिभूयस्त्ववैकल्यसाकल्यग्रहरूपतः ॥
नातो मिथ्यार्थसत्यार्थविषयत्वनिबन्धनः ।
एवं सर्वस्य सर्वत्वे व्यवहारव्यवस्थितिः ॥

स्वप्ने च प्राणिनां पुण्यपापानुगुणा भगवतैव तत्तत्पुरुषमात्रानुभाव्यास्तत्तत्कालावसानास्तथाभूताश्चार्थाः सृज्यन्ते । तथा हि श्रुतिः स्वप्नविषया । न तत्र रथा न रथयोगा न पन्थानो भवन्ति । अथ रथान्रथयोगान्पथः सृजते । न तत्रानन्दा मुदः प्रमुदो भवन्ति । अथानन्दान्मुदः प्रमुदः सृजते । न तत्र वेशान्ताः पुष्करिण्यः स्रवन्त्यो भवन्ति । अथ वेशान्तान्पुष्करिण्यः स्रवन्त्यः सृजते । स हि कर्ता (बृ. ४।३।१०) इति । यद्यपि सकलेतरपुरुषानुभाव्यतया तदानीं न भवन्त्यथापि तत्तत्पुरुषमात्रानुभाव्यतया तथाविधार्थानीश्वरः सृजति । स हि कर्ता । तस्य सत्यसंकल्पस्याश्चर्यशक्तेस्तथाविधं कर्तृत्वं संभवतीत्यर्थः ।

---

2. B reads रूप्यादे for रूप्यादि.

7 C. reads यथार्थ for यथार्थम्.

12. B. C. read अनुगुणम् for अनुगुणा.

21. C. om. सत्य.

http://acharya.org

य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः ।
तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते ।
तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन ॥

(का.५।८) इति । सूत्रकारोपि संध्ये सृष्टिराह हि (ब्र.सू.३।२।१) । निर्मातारं चैके पुत्रादयश्च (ब्र.सू.३।२।२) इति सूत्रद्वयेन स्वाप्नेष्वर्थेषु जीवस्य स्रष्टृत्वमाशङ्क्य मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात् (ब्र. सू. ३।२।३) इत्यादिना न जीवस्य संकल्पमात्रेण स्रष्टृत्वमुपपद्यते । जीवस्य स्वाभाविकसत्यसंकल्पादेः कृत्स्नस्य संसारदशायामनभिव्यक्तस्वरूपत्वात् । ईश्वरस्यैव तत्तत्पुरुषानुभाव्यतयाश्चर्यभूता सृष्टिरियम् ।

तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन ।

(का. ५।८) इति परमात्मैव स्रष्टेत्यवगम्यत इति परिहरति । अपवरकादिषु शयानस्य स्वप्नदृशः स्वदेहेनैव देशान्तरगमनराज्याभिषेकशिरश्छेदादयः पुण्यपापफलभूताः शयानदेहसरूपसंस्थानदेहान्तरसृष्ट्योपपद्यन्ते ।

पीतशङ्खादौ तु नयनवर्तिपित्तद्रव्यसंभिन्ना नायनरश्मयः शङ्खादिभिः संयुज्यन्ते । तत्र पित्तद्रव्यगतपीतिमाभिभूतः शङ्खगतशुक्लिमा न गृह्यते । अतः सुवर्णानुलिप्तशङ्खवत्पीतः शङ्ख इति प्रतीयते । पित्तद्रव्यं तद्गतपीतिमा चातिसूक्ष्मतया पार्श्व-

---

1. C. reads सुषुप्तेषु for सुप्तेषु.
4. B. C. read च after इति.
8. C reads सत्य before संकल्प; B. reads संकल्पत्वादे: for संकल्पादेः
10. B. C read मात्र after पुरुष.
12. B. C read तत्र after परमात्मैव.
14. B C read च after छेदादय.
17. B C. om. द्रव्य before गत; B. C. read अभिभूत for अभिभूतः.
19. B reads सौक्ष्म्यात् for सूक्ष्मतया, C. reads सूक्ष्मत्वात् for सूक्ष्मतया.

स्थैर्येन गृह्यते । पित्तोपहतेन तु स्वनयननिष्क्रान्ततयातिसामीप्यात्सूक्ष्ममपि गृह्यते । तद्ग्रहणजनितसंस्कारसचिवनायनरश्मिभिर्दूरस्थमपि गृह्यते । जपाकुसुमसमीपवर्तिस्फटिकमणिरपि तत्प्रभाभिभूततया रक्त इति गृह्यते । जपाकुसुमप्रभा विततापि स्वच्छद्रव्यसंयुक्ता स्फुटतरमुपलभ्यत इत्युपलब्धिव्यवस्थाप्यमिदम् ।

मरीचिकाजलज्ञानेपि तेजःपृथिव्योरप्यम्बुनो विद्यमानत्वादिन्द्रियदोषेण तेजःपृथिव्योरग्रहणाच्चादृष्टवशाच्चाम्बुनो ग्रहणाद्यथार्थत्वम् । अलातचक्रेप्यलातस्य द्रुततरगमनेन सर्वदेशसंयोगादन्तरालाग्रहणात्तथा प्रतीतिरुपपद्यते । चक्रप्रतीतावप्यन्तरालाग्रहणपूर्वकं तत्तद्देशसंयुक्ततत्तद्वस्तुग्रहणमेव । क्वचिदन्तरालाभावादन्तरालाग्रहणं क्वचिच्छैघ्र्यादग्रहणमिति विशेषः । अतस्तदपि यथार्थम् । दर्पणादिषु निजमुखादिप्रतीतिरपि यथार्था । दर्पणादिप्रतिहतगतयो हि नायनरश्मयो दर्पणादिदेशग्रहणपूर्वकं निजमुखादि गृह्णन्ति । तत्राप्यतिशैघ्र्यादन्तरालाग्रहणात्तथा प्रतीतिः । दिङ्मोहेपि दिगन्तरस्यास्यां दिशि विद्यमानत्वाददृष्टवशेनैतद्दिगंशवियुक्तो दिगन्तरांशो गृह्यते । अतो दिगन्तरप्रतीतिर्यथार्थैव ।

द्विचन्द्रज्ञानादावप्यङ्गुल्यवष्टम्भतिमिरादिभिर्नायनतेजोगतिभेदेन सामग्रीभेदात्सामग्रीद्वयमन्योन्यनिरपेक्षं चन्द्रग्रहणद्वय-

1. C. reads दृश्यते for गृह्यते.

2. B. reads नयन for नायन.

8. B. om च after अग्रहणात्

11. B C. read पूर्वक for पूर्वकम्; B. reads द्रुततरत्वाभावादन्तरालग्रहणम् for अन्तरालाभावादन्तरालाग्रहणम्.

http://acharya.org

हेतुर्भवति । तत्रैका सामग्री स्वदेशविशिष्टं चन्द्रं गृह्णाति । द्वितीया तु किंचिद्वक्रगतिश्चन्द्रसमीपदेशग्रहणपूर्वकं चन्द्रं स्वदेशवियुक्तं गृह्णाति । अतः सामग्रीद्वयेन युगपद्देशद्वयविशिष्टचन्द्रग्रहणेपि ग्रहणभेदेन ग्राह्याकारभेदादेकत्वग्रहणाभावाच्च द्वौ चन्द्राविति भवति प्रतीतिविशेषः । देशान्तरस्य तद्विशेषणत्वं देशान्तरस्य चागृहीतस्वदेशचन्द्रस्य च निरन्तरग्रहणेन भवति । तत्र सामग्रीद्वित्वं पारमार्थिकम् । तेन देशद्वयविशिष्टचन्द्रग्रहणद्वयं च पारमार्थिकम् । ग्रहणद्वित्वेन चन्द्रस्यैव ग्राह्याकारद्वित्वं च पारमार्थिकम् । तत्र विशेषणद्वयविशिष्टचन्द्रग्रहणद्वयस्यैक एव चन्द्रो ग्राह्य इति ग्रहणे प्रत्यभिज्ञावत्केवलचक्षुषः सामर्थ्याभावाच्चाक्षुषं ज्ञानं तथैवावतिष्ठते । द्वयोश्चक्षुषोरेकसामग्र्यन्तर्भावेपि तिमिरादिदोषभिन्नं चाक्षुषं तेजः सामग्रीद्वयं भवतीति कार्यकल्प्यम् । अपगते तु दोषे स्वदेशविशिष्टस्य चन्द्रस्यैकग्रहणवेद्यत्वादेकश्चन्द्र इति भवति प्रत्ययः । दोषकृतं तु सामग्रीद्वित्वं तत्कृतं ग्रहणद्वित्वं तत्कृतं ग्राह्याकारद्वित्वं चेति निरवद्यम् । अतः सर्वं विज्ञानजातं यथार्थमिति सिद्धम् ।

ख्यात्यन्तराणां दूषणानि तैस्तैर्वादिभिरेव प्रपञ्चितानीति न तत्र यत्नः क्रियते । अथवा किमनेन बहुनोपपादनप्रकारेण । प्रत्यक्षानुमानागमाख्यं प्रमाणजातम् । आगमगम्यं च निरस्तनिखिलदोषगन्धमनवधिकातिशयासंख्येयकल्याणगुणगणं सर्वज्ञं

4. C. om. ग्रहणेपि; C. reads चन्द्रमसौ for चन्द्रौ

9 B. reads विशेष for विशेषण.

10. B. reads ग्रहण for ग्रहणे, C. reads प्रत्यभिज्ञान for प्रत्यभिज्ञा.

12. B reads अन्तर्भाव for अन्तर्भावे, B. reads चाक्षुष for चाक्षुषम्.

16. C reads सर्वं for सर्वम्.

http://acharya.org

सत्यसंकल्पं परं ब्रह्माभ्युपगच्छतां किं न सेत्स्यति किं नोपपद्यते । भगवता हि परेण ब्रह्मणा क्षेत्रज्ञपुण्यपापानुगुणं तद्भोग्यत्वायाखिलं जगत्सृजता सुखदुःखोपेक्षाफलानुभवानुभाव्याः पदार्थाः सर्वसाधारणानुभवविषयाः केचन तत्तत्पुरुषमात्रानुभवविषयास्तत्तत्कालावसानास्तथातथानुभाव्याः सृज्यन्ते । तत्र बाध्यबाधकभावः सर्वानुभवविषयतया तद्रहिततया चोपपद्यत इति सर्वं समञ्जसम् ।

यत्पुनः सदसदनिर्वचनीयमज्ञानं श्रुतिसिद्धमिति (पृ. १६ पं. ३)। तदसत् । अनृतेन हि प्रत्यूढाः (छा. ८।३।२) इत्यादिष्वनृतशब्दस्यानिर्वचनीयानभिधायित्वात् । ऋतेतरविषयो ह्यनृतशब्दः । ऋतमिति कर्मवाचि । ऋतं पिबन्तौ (का. ३।१) इति वचनात् । ऋतं कर्म फलाभिसंधिरहितं परमपुरुषाराधनवेषं तत्प्राप्तिफलम् । अत्र तद्व्यतिरिक्तं सांसारिकफलं कर्मानृतं ब्रह्मप्राप्तिविरोधि । एतं ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढाः (छा. ८।३।२) इति वचनात् । नासदासीन्नो सदासीत्तदानीम् (तै. ब्रा. २।८।९।३) इत्यत्रापि सदसच्छब्दौ चिदचिद्व्यष्टिविषयौ । उत्पत्तिवेलायां सत्त्यच्छब्दाभिहितयोश्चिदचिद्व्यष्टिभूतयोर्वस्तुनोरप्ययकालेचित्समष्टिभूते तमःशब्दाभिधेये वस्तुनि प्रलयप्रतिपादनपरत्वादस्य वाक्यस्य नात्र कस्यचित्सदसदनिर्वचनीयतोच्यते । सदसतोः कालविशेषेसद्भावमात्रवचनात् । अत्र तमःशब्दाभिहितस्याचित्समष्टित्वं श्रुत्यन्तरादवगम्यते । अव्यक्तमक्षरे लीयते । अक्षरं तमसि लीयते । तमः परे देव एकीभवतीति । सत्यं तमःशब्देनाचित्समष्टिरूपायाः प्रकृतेः सूक्ष्मावस्थोच्यते । तस्यास्तु मायां तु प्रकृतिं

5. C om. तथा after तथा.

20 B. reads विशेष for विशेषे.

http://acharya.org

विद्यात् (श्वे. ४।१०) इति मायाशब्देनाभिधानादनिर्वचनीयत्वमिति चेत् । नैतदेवम् । मायाशब्दस्यानिर्वचनीयवाचित्वं न दृष्टमिति । मायाशब्दस्य मिथ्यापर्यायत्वेनानिर्वचनीयत्वमिति चेत् । तदपि नास्ति । नहि सर्वत्र मायाशब्दो मिथ्याविषयः । असुरराक्षसशस्त्रादिषु सत्येष्वेव मायाशब्दप्रयोगात् । यथोक्तम्

तेन मायासहस्रं तच्छम्बरस्याशुगामिना ।
बालस्य रक्षता देहमेकैकांशेन सूदितम् ॥

(वि. पु. १।१९।२०) इति । अतो मायाशब्दो विचित्रार्थसर्गकराभिधायी । प्रकृतेश्च मायाशब्दाभिधानं विचित्रार्थसर्गकरत्वादेव ।

अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया संनिरुद्धः ।

(श्वे. ४।९) इति मायाशब्दवाच्यायाः प्रकृतेर्विचित्रार्थसर्गकरत्वं दर्शयति । परमपुरुषस्य च तद्वत्तामात्रेण मायित्वमुच्यते नाज्ञत्वेन । जीवस्यैव हि मायया निरोधः श्रूयते तस्मिंश्चान्यो मायया संनिरुद्धः (श्वे. ४।९) इति ।

अनादिमायया सुप्तो यदा जीवः प्रबुध्यते ।

(गौ. १।१६) इति च । इन्द्रो मायाभिः पुरुरूप ईयते (बृ. २।५।१९) इत्यत्रापि विचित्राः शक्तयोभिधीयन्ते । अत एव हि भूरि त्वष्टेह राजतीत्युच्यते । न हि मिथ्याभूतः कश्चिद्विराजते । मम माया दुरत्यया (गी. ७।१४) इत्यत्रापि गुणमयीति वचनात्सैव त्रिगुणात्मिका प्रकृतिरुच्यत इति न श्रुतिभिः सदसदनिर्वचनीयाज्ञानप्रतिपादनम् ।

---

5. B C. 1ead आसुर for असुर, B. reads अस्त्र for शस्त्र.

18 B. reads निखिलजीवस्वरूप. after शक्तय

19. C. om. हि aftei न.

http://acharya.org

नाप्यैक्योपदेशानुपपत्त्या। नहि तत्त्वमसि (छा ६।८।७) इति जीवपरयोरैक्योपदेशे सति सर्वज्ञसत्यसंकल्पे सकलजगत्सर्गस्थितिविनाशहेतुभूते तच्छब्दावगते प्रकृते ब्रह्मणि विरुद्धाज्ञानपरिकल्पनाहेतुभूता काचिदप्यनुपपत्तिर्दृश्यते। ऐक्योपदेशस्तु त्वंशब्देनापि जीवशरीरकस्य ब्रह्मण एवाभिधानादुपपन्नतरः। अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि (छा. ६।३।२) इति सर्वस्य वस्तुनः परमात्मपर्यन्तस्यैव हि नामरूपभाक्त्वमुक्तम्। अतो न ब्रह्माज्ञानपरिकल्पनम्।

इतिहासपुराणयोरपि न ब्रह्माज्ञानवादः कचिदपि दृश्यते। ननु ज्योतींषि विष्णुः (वि. पु. २।१२।३८) इति ब्रह्मैकमेव तत्त्वमिति प्रतिज्ञाय ज्ञानस्वरूपो भगवान्यतोसौ (वि. पु. २।१२।३९) इति शैलाब्धिधरादिभेदभिन्नस्य जगतो ज्ञानैकस्वरूपब्रह्माज्ञानविजृम्भितत्वमेवाभिधाय यदा तु शुद्धं निजरूपि (वि. पु. २।१२।४०) इति ज्ञानभूतस्यैव ब्रह्मणः स्वस्वरूपावस्थितिवेलायां वस्तुभेदाभावदर्शनेनाज्ञानविजृम्भितत्वमेव स्थिरीकृत्य वस्त्वस्ति किम् (वि. पु. २।१२।४१) मही घटत्वम् (वि. पु. २।१२।४२) इति श्लोकद्वयेन जगदुपलब्धिप्रकारेणापि वस्तुभेदानामसत्यत्वमुपपाद्य तस्मान्न विज्ञानमृते (वि. पु. २।१२।४३) इति प्रतिज्ञातं ब्रह्मव्यतिरिक्तस्यासत्यत्वमुपसंहृत्य विज्ञानमेकम् (वि. पु. २।१२।४३) इति ज्ञानस्वरूपे ब्रह्मणि भेददर्शननिमित्ताज्ञानमूलं निजकर्मैवेति स्फुटीकृत्य ज्ञानं विशुद्धम् (वि. पु. २।१२।४४) इति ज्ञानस्वरूपस्य ब्रह्मणः स्वरूपं वि-

---

7. C. om. रूप.

13. B. C om. एव after विजृम्भितत्वम्.

15. C. reads प्र before दर्शनेन.

20. B. reads स्वरूपस्य for स्वरूपे.

22. C. reads स्वरूप for स्वरूपस्य.

http://acharya.org

शोध्य सद्भाव एवं भवतो मयोक्तः (वि. पु. २।१२।४५) इति ज्ञानस्वरूपस्य ब्रह्मण एव सत्यत्वं नान्यस्यान्यस्य चासत्यत्वमेव तस्य भुवनादेः सत्यत्वं व्यावहारिकमिति तत्त्वं तवोपदिष्टमेवेत्युपदेशो हि दृश्यते ।

नैतदेवम् । अत्र भुवनकोशस्य विस्तीर्णं स्वरूपमुक्त्वा पूर्वमनुक्तं रूपान्तरं संक्षेपतः श्रूयतामित्यारभ्याभिधीयते । चिदचिन्मिश्रे जगति चिदंशो वाङ्मनसागोचरस्वसंवेद्यस्वरूपभेदो ज्ञानैकाकारतयास्पष्टप्राकृतभेदोविनाशित्वेनास्तिशब्दवाच्यः। अचिदंशस्तु चिदंशकर्मनिमित्तपरिणामभेदो विनाशीति नास्तिशब्दाभिधेयः । उभयं तु परब्रह्मभूतवासुदेवशरीरतया तदात्मकमित्येतद्रूपं संक्षेपेणात्राभिहितम् । तथा हि

यदम्बु वैष्णवः कायस्ततो विप्र वसुंधरा ।
पद्माकारा समुद्भूता पर्वताब्ध्यादिसंयुता ॥

(वि. पु. २।१२।३७) इत्यम्बुनो विष्णुशरीरत्वेनाम्बुपरिणामभूतं ब्रह्माण्डमपि विष्णोः कायस्तस्य च विष्णुरात्मेति सकलश्रुतिगततादात्म्योपदेशोपबृंहणरूपस्य सामानाधिकरण्यस्य ज्योतींषि विष्णुः (वि. पु. २।१२।३८) इत्यारभ्य वक्ष्यमाणस्य शरीरात्मभाव एव निबन्धनमित्याह । अस्मिञ्छास्त्रे पूर्वमप्येतदसकृदुक्तम्

तानि सर्वाणि तद्वपुः (वि. पु. १।२२।८४) ।
तत्सर्वं वै हरेस्तनुः । (वि. पु. १।२२।३७) ।
स एव सर्वभूतात्मा प्रधानपुरुषात्मनः ।
विश्वरूपो यतोऽव्ययः (वि. पु. १।२।६८) इति ।

14. C. reads विष्णो. for विष्णु
15 C. om. च.
16. C om. उपदेश.

http://acharya.org

तदिदं शरीरात्मभावापन्नं तादात्म्यं सामानाधिकरण्येन व्यपदिशति ज्योतींषि विष्णुः (वि. पु. २। १२।३८) इति । अत्रास्त्यात्मकं नास्त्यात्मकं च जगदन्तर्गतं वस्तु विष्णोः कायतया विष्ण्वात्मकमित्युक्तम् ।

इदमस्त्यात्मकमिदं नास्त्यात्मकमस्य च नास्त्यात्मकत्वे हेतुरयमित्याह ज्ञानस्वरूपो भगवान्यतोसौ (वि. पु. २।१२।३९) इति । अशेषक्षेत्रज्ञात्मनावस्थितस्य भगवतो ज्ञानमेव स्वाभाविकं रूपम् । न देवमनुष्यादिवस्तुरूपम् । यत एवं तत एवाचिद्रूपदेवमनुष्यशैलाब्धिधरादयश्च तद्विज्ञानविजृम्भिताः । तस्य ज्ञानैकाकारस्य सतो देवाद्याकारेण स्वात्मवैविध्यानुसंधानमूला देवाद्याकारानुसंधानमूलकर्ममूला इत्यर्थः । यतश्चाचिद्वस्तु क्षेत्रज्ञकर्मानुगुणं परिणामास्पदं ततस्तन्नास्तिशब्दाभिधेयमितरदस्तिशब्दाभिधेयमित्यर्थादुक्तं भवति ।

तदेव विवृणोति यदा तु शुद्धं निजरूपि (वि.पु.२।१२।४०) इति । यदैतज्ज्ञानैकाकारमात्मवस्तु देवाद्याकारेण स्वात्मनि वैविध्यानुसंधानमूलसर्वकर्मक्षयान्निर्दोषं परिशुद्धं निजरूपि भवति तदा देवाद्याकारेणैकीकृत्यात्मकल्पनमूलकर्मफलभूतास्तद्भोगार्थवस्तुषु वस्तुभेदा न भवन्ति । ये देवादिवस्तुष्वात्मतयाभिमतेषु

---

1. B. C. read आयत्तम् for आपन्नम्
7. C. reads स्वाभाविक for स्वाभाविकम्.
9. B. reads मनुष्या. for मनुष्य.
10. D. reads स्वात्मनि for स्वात्म.
11. B. reads अकर्ममूला. for कर्ममूलाः.
16. B. reads इति after निजरूपि.
17. C. reads कल्पना for कल्पन; C. reads भोगार्था वस्तुषु for भोगार्थवस्तुषु.

http://acharya.org

भोग्यभूता देवमनुष्यशैलाब्धिधरादिवस्तुभेदास्ते तन्मूलभूतकर्मसु विनष्टेषु न भवन्तीत्यचिद्वस्तुनः कादाचित्कावस्थायोगितया नास्तिशब्दाभिधेयत्वमितरस्य सर्वदा निजसिद्धज्ञानैकाकारत्वे- नास्तिशब्दाभिधेयत्वमित्यर्थः ।

प्रतिक्षणमन्यथाभूततया कादाचित्कावस्थायोगिनोचिद्वस्तुनो नास्तिशब्दाभिधेयत्वमेवेत्याह वस्त्वस्ति किम् (वि. पु. २।१२।४१) इति । अस्तिशब्दाभिधेयो ह्यादिमध्यपर्यन्तहीनः सततैकरूपः पदार्थः । तस्य कदाचिदपि नास्तिबुद्ध्यनर्हत्वात् । अचिद्वस्तु किंचित्कचिदपि तथाभूतं न दृष्टचरम् । ततः किमित्यत्राह यच्चान्यथात्वम् (वि. पु. २।१२।४१) इति । यद्वस्तु प्रतिक्षणमन्यथात्वं याति तदुत्तरोत्तरावस्थाप्राप्त्या पूर्वपूर्वावस्थां जहातीति तस्य पूर्वावस्थस्योत्तरावस्थायां न प्रतिसंधानमस्ति । अतः सर्वदा तस्य नास्तिशब्दाभिधेयत्वमेव ।

तथा ह्युपलभ्यत इत्याह मही घटत्वम् (वि. पु. २।१२।४२) इति । स्वकर्मणा देवमनुष्यादिभावेन स्तिमितात्मनिश्चयैः स्वभोग्यभूतमचिद्वस्तु प्रतिक्षणमन्यथाभूतमालक्ष्यतेनुभूयत इत्यर्थः । एवं सति किमप्यचिद्वस्त्वस्तिशब्दार्हमादिमध्यपर्यन्तहीनं सततैकरूपमालक्षितमस्ति किं न ह्यस्तीत्यभिप्रायः ।

यस्मादेवं तस्माज्ज्ञानस्वरूपात्मव्यतिरिक्तमचिद्वस्तु कदाचित्कचित्केवलास्तिशब्दवाच्यं न भवतीत्याह तस्मान्न विज्ञानमृते (वि. पु. २।१२।४३) इति । आत्मा तु सर्वत्र ज्ञानैकाकारतया

2. B. C. read विशेष after अवस्था.

5 B. om. अचिद्वस्तुनः.

15 B. reads अस्तमित for स्तिमित.

17. B. reads अभिधेयम् for अर्हम्.

http://acharya.org

देवादिभेदप्रत्यनीकस्वरूपोपि देवादिशरीरप्रवेशहेतुभूतस्वकृतविविधकर्ममूलदेवादिभेदभिन्नात्मबुद्धिभिस्तेन तेन रूपेण बहुधानुसंहित इति तद्भेदानुसंधानं नात्मस्वरूपप्रयुक्तमित्याह विज्ञानमेकम् (वि. पु. २।१२।४३) इति ।

आत्मस्वरूपं तु कर्मरहितम् । तत एव मलरूपप्रकृतिस्पर्शरहितम् । ततश्च तत्प्रयुक्तशोकमोहलोभाद्यशेषहेयगुणासङ्गि । उपचयापचयानर्हतयैकम् । तत एव सदैकरूपम् । तच्च वासुदेवशरीरमिति तदात्मकम् । अतदात्मकस्य कस्यचिदप्यभावादित्याह ज्ञानं विशुद्धम् (वि. पु. २।१२।४४) इति ।

चिदंशः सदैकरूपतया सर्वदास्तिशब्दवाच्यः । अचिदंशस्तु प्रतिक्षणपरिणामित्वेन सर्वदा नाशगर्भ इति सर्वदा नास्तिशब्दाभिधेयः । एवंरूपं चिदचिदात्मकं जगद्वासुदेवशरीरं तदात्मकमिति जगद्याथात्म्यं सम्यगुक्तमित्याह सद्भाव एवम् (वि. पु. २।१२।४५) इति । अत्र सत्यमसत्यमिति यदस्ति यन्नास्तीति प्रक्रान्तस्योपसंहारः । एवं ज्ञानैकाकारतया समभशब्दगोचरस्वरूपभेदमेवाचिन्मिश्रं भुवनाश्रितं देवमनुष्यादिरूपेण सम्यग्व्यवहारार्हभेदं यद्वर्तते तत्र हेतुः कर्मैवेत्युक्तमित्याह एतत्तु यत् (वि. पु. २।१२।४५) इति ।

तदेव विवृणोति यज्ञः पशुः (वि. पु. २।१२।४६) इति ।

जगद्याथार्थ्यज्ञानप्रयोजनं मोक्षोपाययतनमित्याह यच्चैतत् (वि. पु. २।१२।४७) इति ।

---

2. C. reads केन for तेन तेन.

7. B. reads वासुदेवस्य for वासुदेव.

11. B. om प्रति

15. C. reads प्रकारान्तरस्य for प्रक्रान्तस्य; C. reads एतावत् for एवम्.

20. C. reads अज्ञान for ज्ञान.

http://acharya.org

अत्र निर्विशेषे परे ब्रह्मणि तदाश्रये सदसदनिर्वचनीये चाज्ञाने जगतस्तत्कल्पितत्वे वानुगुणं किंचिदपि पदं न दृश्यते । अस्तिनास्तिशब्दाभिधेयं चिदचिदात्मकं कृत्स्नं जगत्परमस्य परेशस्य ब्रह्मणो विष्णोः कायत्वेन तदात्मकम् । ज्ञानैकाकारस्यात्मनो देवादिविविधाकारानुभवेचित्परिणामे च हेतुर्वस्तुयाथात्म्यज्ञानविरोधि क्षेत्रज्ञानां कर्मैवेति प्रतिपादनात् । अस्तिनास्तिसत्यासत्यशब्दानां च सदसदनिर्वचनीयवस्त्वभिधानासामर्थ्याच्च । नास्त्यसत्यशब्दावस्तिसत्यशब्दविरोधिनौ । अतश्चैताभ्यामसत्यत्वं हि प्रतीयते नानिर्वचनीयत्वम् । अत्र चाचिद्वस्तुनि नास्त्यसत्यशब्दौ न तुच्छत्वमिथ्यात्वपरौ प्रयुक्तौ । अपि तु विनाशित्वपरौ । वस्त्वस्ति किम् (वि. पु. २।१२।४१) मही घटत्वम् (वि. पु. २।१२।४२) इत्यत्र विनाशित्वमेव ह्युपपादितं न निष्प्रमाणकत्वं ज्ञानबाध्यत्वं वा । एकेनाकारेणैकस्मिन्कालेनुभूतस्य कालान्तरे परिणामविशेषेणान्यथोपलब्ध्या नास्तित्वोपपादनात् । तुच्छत्वं हि प्रमाणसंबन्धानर्हत्वम् । बाधोपि यद्देशकालादिसंबन्धितया यदस्तीत्युपलब्धं तस्य तद्देशकालादिसंबन्धितया नास्तीत्युपलब्धिः । न तु कालान्तरेनुभूतस्य कालान्तरे परिणामादिना नास्तीत्युपलब्धिः । कालभेदेन विरोधाभावात् । अतो न मिथ्यात्वम् । एतदुक्तं भवति । ज्ञानस्वरूपमात्मवस्त्वादिमध्यपर्यन्तरहितं सततैकरूपमिति स्वत एव सदास्तिशब्दवाच्यम् । अचेतनं तु क्षेत्रज्ञभोग्यभूतं तत्क-

---

2. B. reads च for वा.

4. B. C read परस्य after परेशस्य.

9. B. reads ताभ्या सत्यत्वम् for एताभ्यामसत्यत्वम्, C. reads ताभ्यामसत्वम् for एताभ्यामसत्यत्वम्.

20. B. C. read हीनम् for रहितम्.

http://acharya.org

र्मानुगुणपरिणामि विनाशीति सर्वदा नास्त्यर्थगर्भमिति नास्त्यसत्यशब्दाभिधेयमिति । यथोक्तम्

यत्तु कालान्तरेणापि नान्यसंज्ञामुपैति वै ।
परिणामादिसंभूतां तद्वस्तु नृप तच्च किम् ॥
(वि. पु. २।१३।९५)

अनाशी परमार्थश्च प्राज्ञैरभ्युपगम्यते ।
तत्तु नाशि न संदेहो नाशिद्रव्योपपादितम् ॥
(वि. पु. २।१४।२४)

इति देशकालकर्मविशेषापेक्षयास्तित्वनास्तित्वयोगिनि वस्तुनि केवलास्तिबुद्धिबोध्यत्वमपरमार्थ इति ह्यपरमार्थ इत्युक्तम् । आत्मन एव केवलास्तिबुद्धिबोध्यत्वमिति स परमार्थ इत्युक्तम् । श्रोतुश्च मैत्रेयस्य

विष्ण्वाधारं यथा चैतत्त्रैलोक्यं समवस्थितम् ।
परमार्थश्च मे प्रोक्तो यथा ज्ञानं प्रधानतः ॥
(वि. पु. २।१३।२)

इत्यनुभाषणाच्च । ज्योतींषि विष्णुः (वि. पु. २।१२।३८) इत्यादिसामानाधिकरण्यस्यात्मशरीरभाव एव निबन्धनं चिदचिद्वस्तुनोश्चास्तिनास्तिशब्दयोगनिबन्धनं ज्ञानस्याकर्मनिमित्तस्वाभाविकस्वरूपत्वेन स्वरूपप्राधान्यमचिद्वस्तुनश्च तत्तत्कर्मनिमित्तपरिणामित्वेनाप्राधान्यमिति प्रतीयते ।

---

1. C. reads परिणामविनाशि for परिणामि विनाशि.
7. E. reads नास्ति for नाशि after तत्तु.
9. B. om. नास्तित्व.
14. E. reads तु for च.
18 B. C. read प्रयोग for योग.
19. C. om. स्व before रूपत्वेन, B. C. om. स्वरूप before प्राधान्यम्.

http://acharya.org

यदुक्तं (पृ. १७ पं. ४) निर्विशेषब्रह्मज्ञानादेवाविद्यानिवृत्तिं वदन्ति श्रुतय इति। तदसत्। वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् (श्वे. ३।८)। तमेवं विद्वानमृत इह भवति। नान्यः पन्था विद्यतेयनाय (तै. आ. ३।१३।१)। सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि। न तस्येशे कश्चन। तस्य नाम महद्यशः। य एनं विदुरमृतास्ते भवन्ति (म. ना. १।८-१०-११) इत्याद्यनेकवाक्यविरोधात्। ब्रह्मणः सविशेषत्वादेव सर्वाण्यपि वाक्यानि सविशेषज्ञानादेव मोक्षं वदन्ति। शोधकवाक्यान्यपि सविशेषमेव ब्रह्म प्रतिपादयन्तीत्युक्तम्। तत्त्वमस्यादिवाक्येषु सामानाधिकरण्यं न निर्विशेषवस्त्वैक्यपरम्। तत्त्वंपदयोः सविशेषब्रह्माभिधायित्वात्। तत्पदं हि सर्वज्ञं सत्यसंकल्पं जगत्कारणं ब्रह्म परामृशति। तदैक्षत बहु स्याम् (छा. ६।२।३) इत्यादिषु तस्यैव प्रकृतत्वात्। तत्समानाधिकरणं त्वंपदं चाचिद्विशिष्टजीवशरीरकं ब्रह्म प्रतिपादयति। प्रकारद्वयावस्थितैकवस्तुपरत्वात्सामानाधिकरण्यस्य। प्रकारद्वयपरित्यागे प्रवृत्तिनिमित्तभेदासंभवेन सामानाधिकरण्यमेव परित्यक्तं स्यात्। द्वयोः पदयोर्लक्षणा च। सोयं देवदत्त इत्यत्रापि न लक्षणा। भूतवर्तमानकालसंबन्धितयैक्यप्रतीत्यविरोधात्। देशभेदविरोधश्च कालभेदेन परिहृतः। तदैक्षत बहु स्याम् (छा. ६।२।३) इत्युपक्रमविरोधश्च। एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा च न घटते। ज्ञानस्वरूपस्य निरस्तनिखिलदोषस्य सर्वज्ञस्य समस्तकल्याणगुणात्मकस्याज्ञानतत्कार्यानन्तापुरुषार्थाश्रयत्वं च न संभवति।

1. C reads विज्ञानात् for ज्ञानात्
9. C reads शोधकानि for शोधकवाक्यानि.
14. C. reads विशिष्टम् for विशिष्ट
19. C. reads परिहीयते for परिहृतः.
22. C. om. न सम्.

http://acharya.org

बाधार्थत्वे च, सामानाधिकरण्यस्य तत्त्वंपदयोरधिष्ठानलक्षणा निवृत्तिलक्षणा चेति लक्षणादयस्त एव दोषाः । इयांस्तु विशेषः । नेदं रजतमितिवदप्रतिपन्नस्यैव बाधस्यागत्या परिकल्पनम् । तत्पदेनाधिष्ठानातिरेकिधर्मानुपस्थापनेन बाधानुपपत्तिश्च । अधिष्ठानं तु प्राक्तिरोहितमतिरोहितस्वरूपं तत्पदेनोपस्थाप्यत इति चेन्न । अधिष्ठानाप्रकाशे तदाश्रयभ्रमबाधयोरसंभवात् । भ्रमाश्रयमधिष्ठानमतिरोहितमिति चेत् । तदेवाधिष्ठानस्वरूपं भ्रमविरोधीति तत्प्रकाशे सुतरां न तदाश्रयभ्रमबाधौ । अतोधिष्ठानातिरेकिपारमार्थिकधर्मतत्तिरोधानानभ्युपगमे भ्रान्तिबाधौ दुरुपपादौ । अधिष्ठाने हि पुरुषमात्राकारे प्रतीयमाने तदतिरेकिणि पारमार्थिके राजत्वे तिरोहिते सत्येव व्याधत्वभ्रमः । राजत्वोपदेशेन च तन्निवृत्तिर्भवति नाधिष्ठानमात्रोपदेशेन । तस्य प्रकाशमानत्वेनानुपदेश्यत्वात् । भ्रमानुपमर्दित्वाच्च ।

जीवशरीरकजगत्कारणब्रह्मपरत्वे मुख्यवृत्तं पदद्वयम् । प्रकारद्वयविशिष्टैकवस्तुप्रतिपादनेन सामानाधिकरण्यं च सिद्धम् । निरस्तनिखिलदोषस्य समस्तकल्याणगुणात्मकस्य ब्रह्मणो जीवान्तर्यामित्वमप्यैश्वर्यमपरं प्रतिपादितं भवति । उपक्रमानुकूलता च । एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपत्तिश्च । सूक्ष्मचिदचिद्वस्तुशरीरस्यैव ब्रह्मणः स्थूलचिदचिद्वस्तुशरीरत्वेन कार्यत्वात् । तमीश्वराणां परमं महेश्वरम् (श्वे. ६।७) । परास्य शक्तिर्विविधैव श्रूयते (श्वे. ६।८) । अपहतपाप्मा (छा. ८।१।५-८।७।१) । सत्यकामः सत्यसंकल्पः (छा. ८।१।५,८।७।१) इत्यादिश्रुत्यन्तराविरोधश्च ।

---

3. C. reads इतिपदप्रतिपन्नस्य for इतिवदप्रतिपन्नस्य.

15. C. reads शरीर for शरीरक; C. reads पर before पद.

http://acharya.org

तत्त्वमसि (छा. ६।८।७) इत्यत्रोद्देश्योपादेयविभागः कथमिति चेत् । नात्र किंचिदुद्दिश्य किमपि विधीयते । ऐतदात्म्यमिदं सर्वम् (छा. ६।८।७) इत्यनेनैव प्राप्तत्वात् । अप्राप्ते हि शास्त्रमर्थवत् । इदं सर्वमिति सजीवं जगन्निर्दिश्यैतदात्म्यमिति तस्यैष आत्मेति तत्र प्रतिपादितम् । हेतुरप्युक्तः । सन्मूलाः सौम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः (छा. ६।८।४) इति । सर्वं खल्विदं ब्रह्म तज्जलानिति शान्तः (छा. ३।१४।१) इतिवत् । तथा श्रुत्यन्तराणि च ब्रह्मणस्तद्व्यतिरिक्तस्य चिदचिद्वस्तुनश्च शरीरात्मभावमेव तादात्म्यं वदन्ति । अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा (तै.आ. ३।११।२) । यः पृथिव्यां तिष्ठन्पृथिव्या अन्तरः । यं पृथिवी न वेद । यस्य पृथिवी शरीरम् । यः पृथिवीमन्तरो यमयति । स त आत्मान्तर्याम्यमृतः (बृ. ३।७।३) । य आत्मनि तिष्ठन्नात्मनोन्तरः । यमात्मा न वेद । यस्यात्मा शरीरम् । य आत्मानमन्तरो यमयति । स त आत्मान्तर्याम्यमृतः (बृ. ३।७।२२) । यः पृथिवीमन्तरे संचरन्नित्यारभ्य यस्य मृत्युः शरीरम् । यं मृत्युर्न वेद । एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायणः (ना. २) । तत्सृष्ट्वा । तदेवानुप्राविशत् । तदनुप्रविश्य । सच्च त्यच्चाभवत् (तै.२।६।१) इत्यादीनि । अत्राप्यनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि (छा.६।३।२) इति ब्रह्मात्मकजीवानुप्रवेशेनैव सर्वेषां वस्तुत्वं शब्दवाच्यत्वं च प्रतिपादितम् । तदनुप्रविश्य । सच्च त्यच्चाभवत् (तै. २।६।१) इत्यनेनैकार्थ्यात् । जीवस्यापि ब्रह्मात्मकत्वं ब्रह्मानुप्रवेशादेवेत्यवगम्यते । अतश्चिदचिदात्मकस्य सर्वस्य वस्तुजातस्य ब्रह्मतादात्म्यमात्मशरीरभावादेवेति निश्चीयते । तस्माद्ब्रह्मव्यतिरि-

---

3 B. reads अप्राप्ते. for अप्राप्ते हि.

5. B. om तत्र; B. C read तत्र च before हेतुः; C. om. अपि.

24. C. reads अवगम्यते for निश्चीयते.

http://acharya.org

त्कस्य कृत्स्नस्य तच्छरीरत्वेनैव वस्तुत्वात्तस्य प्रतिपादकोपि शब्दस्तत्पर्यन्तमेव स्वार्थमभिदधाति । अतः सर्वशब्दानां लोकव्युत्पत्त्यावगततत्तत्पदार्थविशिष्टब्रह्माभिधायित्वं सिद्धमित्यैतदात्म्यमिदं सर्वम् (छा. ६।८।७) इति प्रतिज्ञातार्थस्य तत्त्वमसि (छा. ६।८।७) इति सामानाधिकरण्येन विशेषेणोपसंहारः ।

अतो निर्विशेषवस्त्वैक्यवादिनो भेदाभेदवादिनः केवलभेदवादिनश्च वैयधिकरण्येन सामानाधिकरण्येन च सर्वे ब्रह्मात्मभावोपदेशाः परित्यक्ताः स्युः ।

एकस्मिन्वस्तुनि कस्य तादात्म्यमुपदिश्यते । तस्यैवेति चेत् । तत्स्ववाक्येनैवावगतमिति न तादात्म्योपदेशावसेयमस्ति किंचित् । कल्पितभेदनिरसनमिति चेत् । तत्तु न सामानाधिकरण्यतादात्म्योपदेशावसेयमित्युक्तम् । सामानाधिकरण्यं तु ब्रह्मणि प्रकारद्वयप्रतिपादनेन विरोधमेवावहेत् । भेदाभेदवादे तु ब्रह्मण्येवोपाधिसंसर्गात्तत्प्रयुक्तजीवगतदोषा ब्रह्मण्येव प्रादुःष्युरिति निरस्तनिखिलदोषकल्याणगुणात्मकब्रह्मात्मभावोपदेशा हि विरोधादेव परित्यक्ताः स्युः । स्वाभाविकभेदाभेदवादेपि ब्रह्मणः स्वत एव जीवभावाभ्युपगमाद्गुणवद्दोषाश्च स्वाभाविका भवेयुरिति निर्दोषब्रह्मतादात्म्योपदेशा विरुद्धा एव । केवलभेदवादिनां चात्यन्तभिन्नयोः केनापि प्रकारेणैक्यासंभवादेव ब्रह्मात्मभावोपदेशो न संभवतीति सर्ववेदान्तपरित्यागः स्यात् ।

निखिलोपनिषत्प्रसिद्धं कृत्स्नस्य ब्रह्मशरीरभावमातिष्ठमानैः

5. B. C. read विशेषे for विशेषेण.

7. C reads ब्रह्मात्मभावोपदेशा' सर्वे for सर्वे ब्रह्मात्मभावोपदेशाः.

14. B. C. read तत्प्रयुक्ता जीवगता दोषाः for तत्प्रयुक्तजीवगतदोषाः.

18. C. reads उपदेशो विरुद्धः for उपदेशा विरुद्धाः.

20. C. reads उपदेशा न सभवन्ति for उपदेशो न संभवति.

21. B. reads कृत्स्नस्य प्रसिद्धम् for प्रसिद्ध कृत्स्नस्य.

http://acharya.org

कृत्स्नस्य ब्रह्मात्मभावोपदेशाः सर्वे सम्यगुपपादिता भवन्ति । जातिगुणयोरिव द्रव्याणामपि शरीरभावेन विशेषणत्वेन गौरश्वो मनुष्यो देवो जातः कर्मभिरिति सामानाधिकरण्यं लोकवेदयोर्मुख्यमेव दृष्टचरम् । जातिगुणयोरपि द्रव्यप्रकारत्वमेव षण्डो गौः शुक्लः पट इति तथासामानाधिकरण्यनिबन्धनम् । मनुष्यत्वादिविशिष्टपिण्डानामप्यात्मनः प्रकारतयैव पदार्थत्वान्मनुष्यः पुरुषः षण्डो योषिद्वात्मा जात इति सामानाधिकरण्यं सर्वत्रानुगतमिति प्रकारत्वमेव सामानाधिकरण्यनिबन्धनम् । न परस्परव्यावृत्ता जात्यादयः । स्वनिष्ठानामेव हि द्रव्याणां कदाचित्कचिद्द्रव्यविशेषणत्वे मत्वर्थीयः प्रत्ययो दण्डी कुण्डलीति न पृथक्प्रतिपत्तिस्थित्यनर्हाणां द्रव्याणाम् । तेषां विशेषणत्वं सामानाधिकरण्यावसेयमेव ।

यदि गौरश्वो मनुष्यो देवः पुरुषो योषित्षण्ड आत्मा कर्मभिर्जात इत्यत्र षण्डो मुण्डो गौः शुक्लः कृष्णः पट इति जातिगुणवदात्मप्रकारत्वं मनुष्यादिशरीराणामिष्यते तर्हि जातिव्यक्त्योरिव प्रकारप्रकारिणोः शरीरात्मनोरपि नियमेन सह प्रतिपत्तिः स्यात् । न चैवं दृश्यते । न हि नियमेन गोत्वादिवदात्माश्रयतयैवात्मना सह मनुष्यादिशरीरं पश्यन्ति । अतो मनुष्य आत्मेति सामानाधिकरण्यं लाक्षणिकमेव ।

नैतदेवम् । मनुष्यादिशरीराणामप्यात्मैकाश्रयत्वं तदेकप्रयोजनत्वं तत्प्रकारत्वं च जात्यादितुल्यम् । आत्मैकाश्रयत्वमात्मविश्लेषे शरीरविनाशादवगम्यते । आत्मैकप्रयोजनत्वं च तत्त-

---

3. B reads पुरुष before कर्मभिः, C. पुरुष..
5. C. om. तथा.
6. C. reads आत्म for आत्मनः.
7. B. C. om. वा.
17. B. reads इदम् for एवम्.
22. B. C. om. तत् after तत्.

http://acharya.org

त्कर्मफलभोगार्थतयैव सद्भावात् । तत्प्रकारत्वमपि देवो मनुष्य इत्यात्मविशेषणतयैव प्रतीतेः । एतदेव हि गवादिशब्दानां व्यक्तिपर्यन्तत्वे हेतुः । एतत्स्वभावविरहादेव दण्डादीनां विशेषणत्वे दण्डी कुण्डलीति मत्वर्थीयः प्रत्ययः । देवमनुष्यादिपिण्डानामात्मैकाश्रयत्वतदेकप्रयोजनत्वतत्प्रकारत्वस्वभावाद्देवो मनुष्य आत्मेति लोकवेदयोः सामानाधिकरण्येन व्यवहारः । जातिव्यक्त्योर्नियमेन सहप्रतीतिरुभयोश्चाक्षुषत्वात् । आत्मनस्त्वचाक्षुषत्वाच्चक्षुषा शरीरग्रहणवेलायामात्मा न गृह्यते । पृथग्ग्रहणयोग्यस्य प्रकारतैकस्वरूपत्वं दुर्घटमिति मा वोचः । जात्यादिवत्तदेकाश्रयत्वतदेकप्रयोजनत्वतद्विशेषणत्वैः शरीरस्यापि तत्प्रकारतैकस्वभावत्वावगमात् । सहोपलम्भनियमस्त्वेकसामग्रीवेद्यत्वनिबन्धन इत्युक्तम् । यथा चक्षुषा पृथिव्यादेर्गन्धरसादिसंबन्धित्वं स्वाभाविकमपि न गृह्यत एवं चक्षुषा गृह्यमाणं शरीरमात्मप्रकारतैकस्वभावमपि न तथा गृह्यते । आत्मग्रहणे चक्षुषः सामर्थ्याभावात् । नैतावता शरीरस्य तत्प्रकारत्वस्वभावविरहः । तत्प्रकारतैकस्वभावत्वमेव सामानाधिकरण्यनिबन्धनम् ।

आत्मप्रकारतया प्रतिपादनसमर्थस्तु शब्दः सहैव प्रकारतया प्रतिपादयति । ननु च शाब्देपि व्यवहारे शरीरशब्देन शरीरमात्रं गृह्यत इति नात्मपर्यन्तता शरीरशब्दस्य । नैवम् । आत्मप्रकारभूतस्यैव शरीरस्य पदार्थविवेकप्रदर्शनाय निरूपकाणां निष्कर्षक-

3. C. reads कुण्डल after दण्ड.
8. B. reads च for तु.
9 D. E. read प्रकारतया for प्रकारता.
15. C. om. त्व after प्रकार.
18. C. reads प्रकारता for प्रकारतया after आत्म.
21. B. reads त्व after पदार्थ.

http://acharya.org

शब्दोयम् । यथा गोत्वं शुक्लत्वमाकृतिर्गुण इत्यादिशब्दाः । अतो गवादिशब्दवद्देवमनुष्यादिशब्दा आत्मपर्यन्ताः । एवं देवमनुष्यादिपिण्डविशिष्टानां जीवानां परमात्मशरीरतया तत्प्रकारत्वाज्जीवात्मवाचिनः शब्दाः परमात्मपर्यन्ताः । अतः परस्य ब्रह्मणः प्रकारतयैव चिदचिद्वस्तुनः पदार्थत्वमिति तत्सामानाधिकरण्येन प्रयोगः । अयमर्थो वेदार्थसंग्रहे समर्थितः । इदमेव शरीरात्मभावलक्षणं तादात्म्यमात्मेति तूपगच्छन्ति ग्राहयन्ति च (ब्र. सू. ४।१।३) इति वक्ष्यति । आत्मेत्येव तु गृह्णीयादिति च वाक्यकारः ।

अत्रेदं तत्त्वम् । अचिद्वस्तुनश्चिद्वस्तुनः परस्य च ब्रह्मणो भोग्यत्वेन भोक्तृत्वेन चेशितृत्वेन स्वरूपविवेकमाहुः काश्चन श्रुतयः ।

अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया संनिरुद्धः ।
मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।(श्वे. ४।९-१०)
क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः ।
(श्वे. १।१०)

अमृताक्षरं हर इति भोक्ता निर्दिश्यते । प्रधानमात्मनो भोग्यत्वेन हरतीति हरः ।

स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः ।
(श्वे. ६।९)

प्रधानक्षेत्रज्ञपतिर्गुणेशः (श्वे. ६।१६) ।

पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम् । (ना. १३।१)

ज्ञाज्ञौ द्वावजावीशानीशौ (श्वे. १।९) ।

नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् । (श्वे. ६।१३)

---

10. C. om. च after परस्य.

11. B. C. read च after ईशितृत्वेन.

http://acharya.org

भोक्ता भोग्यं प्रेरितारं च मत्वा । (श्वे. १।१२)
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योभिचाकशीति ।
(श्वे. ४।६)
पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति ।
(श्वे. १।६)
अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम् ।
अजो ह्येको जुषमाणोनुशेते जहात्येनां भुक्तभोगामजोन्यः ॥
(तै. आ. ६।१० ना. १२।१)
समाने वृक्षे पुरुषो निमग्नोनीशया शोचति मुह्यमानः ।
जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमितरो वीतशोकः ॥
(श्वे. ४।७)

इत्याद्याः । स्मृतावपि

अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥
(गी. ७।४-५)
सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् ।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥
प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥ (गी. ९।७-८)
मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
हेतुनानेन कौन्तेय जगद्विपरिवर्तते ॥ (गी. ९।१०)
प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि । (गी. १३।१९)

http://acharya.org

मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम्।
संभवः सर्वभूतानां ततो भवति भारत॥ (गी. १४।३)

इति। जगद्योनिभूतं महद्ब्रह्म मदीयं प्रकृत्याख्यं भूतसूक्ष्ममचिद्वस्तु यस्मिंश्चेतनाख्यं गर्भं संयोजयामि। ततो मत्कृताच्चिदचित्संसर्गाद्देवादिस्थावरान्तानामचिन्मिश्राणां सर्वभूतानां संभवो भवतीत्यर्थः।

एवं भोक्तृभोग्यरूपेणावस्थितयोः सर्वावस्थावस्थितयोश्चिदचितोः परमपुरुषशरीरतया तन्नियाम्यत्वेन तदपृथक्स्थिति परमपुरुषस्य चात्मत्वमाहुः काश्चन श्रुतयः। यः पृथिव्यां तिष्ठन्पृथिव्या अन्तरः। यं पृथिवी न वेद। यस्य पृथिवी शरीरम्। यः पृथिवीमन्तरो यमयति (बृ. ३।७।३) इत्यारभ्य य आत्मनि तिष्ठन्नात्मनोन्तरः। यमात्मा न वेद। यस्यात्मा शरीरम्। य आत्मानमन्तरो यमयति। स त आत्मान्तर्याम्यमृतः (बृ. ३।७।२२) इति। तथा यः पृथिवीमन्तरे संचरन्यस्य पृथिवी शरीरं यं पृथिवी न वेदेत्यारभ्य यो मृत्युमन्तरे संचरन्यस्य मृत्युः शरीरम्। यं मृत्युर्न वेद। एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायणः (ना. २)। अत्र मृत्युशब्देन तमःशब्दवाच्यं सूक्ष्मावस्थमचिद्वस्त्वभिधीयते। अस्यामेवोपनिषद्यव्यक्तमक्षरे लीयते। अक्षरं तमसि लीयत इति वचनात्। अन्तःप्रविष्टः शास्ता जनानां सर्वात्मा (तै. आ. ३।११।२) इति च।

---

4. B. C. read यत्तस्मिन् for यस्मिन्; C. reads अतः for ततः.

5. C. reads संकल्प after मत्.

7. B. reads भोग्यभोक्तृत्वरूपेण स्थितयोः for भोक्तृभोग्यरूपेणावस्थितयोः.

15. B. C. read योऽक्षरमन्तरे संचरन्यस्याक्षरं शरीरं यमक्षरं न वेद after आरभ्य.

http://acharya.org

एवं सर्वावस्थावस्थितचिदचिद्वस्तुशरीरतया तत्प्रकारः परमपुरुष एव कार्यावस्थकारणावस्थजगद्रूपेणावस्थित इतीममर्थं ज्ञापयितुं काश्चन श्रुतयः कार्यावस्थं कारणावस्थं च जगत्स एवेत्याहुः सदेव सोम्येदमग्र आसीत्। एकमेवाद्वितीयम् (छा. ६।२।१)। तदैक्षत बहु स्यां प्रजायेयेति। तत्तेजोसृजत (छा. ६।२।३) इत्यारभ्य सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः (छा. ६।८।४)। ऐतदात्म्यमिदं सर्वम्। तत्सत्यम्। स आत्मा। तत्त्वमसि श्वेतकेतो (छा. ६।८।७)। सोकामयत। बहु स्यां प्रजायेयेति। स तपोतप्यत। स तपस्तप्त्वा। इदं सर्वमसृजत (तै. २।६।१) इत्यारभ्य सत्यं चानृतं च सत्यमभवत् (तै. २।६।१) इत्याद्याः। अत्रापि श्रुत्यन्तरसिद्धश्चिदचितोः परमपुरुषस्य च स्वरूपविवेकः स्मारितः। हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि (छा. ६।३।२) इति। तत्सृष्ट्वा। तदेवानुप्राविशत्। तदनुप्रविश्य। सच्च त्यच्चाभवत्।....विज्ञानं चाविज्ञानं च। सत्यं चानृतं च सत्यमभवत् (तै. २।६।१) इति च। अनेन जीवेनात्मनानुप्रविश्येति जीवस्य ब्रह्मात्मकत्वं तदनुप्रविश्य। सच्च त्यच्चाभवत्। विज्ञानं चाविज्ञानं चेत्यनेनैकार्थ्यादात्मशरीरभावनिबन्धनमिति विज्ञायते। एवंभूतमेव नामरूपव्याकरणं तद्धेदं तर्ह्यव्याकृतमासीत्। तन्नामरूपाभ्यां व्याक्रियत (बृ. १।४।७) इत्यत्राप्युक्तम्।

अतः कार्यावस्थः कारणावस्थश्च स्थूलसूक्ष्मचिदचिद्वस्तुशरीरः परमपुरुष एवेति कारणात्कार्यस्यानन्यत्वेन कारणवि-

---

3. B. om. च.

8. B. C. read इति। तथा after श्वेतकेतो.

19. B. om. वि before ज्ञायते.

ज्ञानेन कार्यस्य विज्ञाततयैकविज्ञानेन सर्वविज्ञानं च समीहितमुपपन्नतरम् । हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि (छा. ६।३।२) इति तिस्रो देवता इति सर्वमचिद्वस्तु निर्दिश्य तत्र स्वात्मकजीवानुप्रवेशेन नामरूपव्याकरणवचनात्सर्वे वाचकाः शब्दा अचिज्जीवविशिष्टपरमात्मन एव वाचका इति कारणावस्थपरमात्मवाचिना शब्देन कार्यवाचिनः शब्दस्य सामानाधिकरण्यं मुख्यवृत्तम् । अतः स्थूलसूक्ष्मचिदचित्प्रकारकं ब्रह्मैव कार्यं कारणं चेति ब्रह्मोपादानं जगत् । सूक्ष्मचिदचिद्वस्तुशरीरं ब्रह्मैव कारणमिति ब्रह्मोपादानत्वेपि संघातस्योपादानत्वेन चिदचितोर्ब्रह्मणश्च स्वभावासंकरोप्युपपन्नतरः । यथा शुक्लरक्तकृष्णतन्तुसंघातोपादानत्वेपि चित्रपटस्य तत्तत्तन्तुप्रदेश एव शौक्ल्यादिसंबन्ध इति कार्यावस्थायामपि न सर्वत्र वर्णसंकरस्तथा चिदचिदीश्वरसंघातोपादानत्वेपि जगतः कार्यावस्थायामपि भोक्तृत्वभोग्यत्वनियन्तृत्वाद्यसंकरः । तन्तूनां पृथक्स्थितियोग्यानामेव पुरुषेच्छया कदाचित्संहतानां कारणत्वं कार्यत्वं च । इह तु सर्वावस्थावस्थयोः परमपुरुषशरीरत्वेन चिदचितोस्तत्प्रकारतयैव पदार्थत्वात्तत्प्रकारः परमपुरुषः सर्वदा सर्वशब्दवाच्य इति विशेषः । स्वभावभेदस्तदसंकरश्च तत्र चात्र च तुल्यः । एवं च सति परस्य ब्रह्मणः कार्यानुप्रवेशेपि स्वरूपान्यथाभावाभावादविकृतत्वमुपपन्नतरम् । स्थूलाव-

---

1. C. om. वि before ज्ञाततया
8. B. reads प्रकारम् for प्रकारकम्.
9. B. C read शरीरकम् for शरीरम्.
11. C. reads अति for अपि before उपपन्नतरः.
16. B. C. read चिदचितोः सर्वावस्थयोः परमपुरुषशरीरत्वेन for सर्वावस्थावस्थयोः परमपुरुषशरीरत्वेन चिदचितो..
18. B. om. सर्वदा.

http://acharya.org

स्थस्य नामरूपविभागविभक्तस्य चिदचिद्वस्तुन आत्मतयावस्थानात्कार्यत्वमप्युपपन्नतरम् । अवस्थान्तरापत्तिरेव हि कार्यता ।

निर्गुणवादाश्च परस्य ब्रह्मणो हेयगुणासंभवादुपपद्यन्ते । अपहतपाप्मा विजरो विमृत्युर्विशोकोविजिघत्सोपिपासः (छा. ८।१।५) इति हेयगुणान्प्रतिषिध्य सत्यकामः सत्यसंकल्पः (छा. ८।१।५) इति कल्याणगुणान्विदधतीयं श्रुतिरेवान्यत्र सामान्येनावगतं गुणनिषेधं हेयगुणविषयं व्यवस्थापयति ।

ज्ञानस्वरूपं ब्रह्मेति वादश्च सर्वज्ञस्य सर्वशक्तेरखिलहेयप्रत्यनीककल्याणगुणाकरस्य ब्रह्मणः स्वरूपं ज्ञानैकनिरूपणीयं स्वप्रकाशतया ज्ञानस्वरूपं चेत्यभ्युपगमादुपपन्नतरः । यः सर्वज्ञः सर्ववित् (मु. १।१।९) ।

परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ।
(श्वे. ६।८)

विज्ञातारमरे केन विजानीयात् (बृ. २।४।१४) इत्यादिका ज्ञातृत्वमावेदयन्ति । सत्यं ज्ञानम् (तै. २।१।१) इत्यादिकाश्च ज्ञानैकनिरूपणीयतया स्वप्रकाशतया च ज्ञानस्वरूपताम् ।

सोकामयत बहु स्याम् (तै. २।६।१) । तदैक्षत बहु स्याम् (छा. ६।२।३) । तन्नामरूपाभ्यां व्याक्रियत (बृ. १।४।७) इति ब्रह्मैव स्वसंकल्पाद्विचित्रस्थिरचरस्वरूपतया नानाप्रकारमवस्थितमिति तत्प्रत्यनीकाब्रह्मात्मकं वस्तुनानात्वमतत्त्वमिति तत्प्रतिषिध्यते मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति । (बृ. ४।४।१९)

3. C. reads अभावात् for असंभवात्.

8. C. reads निखिल for अखिल.

9. B. reads विज्ञानैक for ज्ञानैक.

20. B. reads स्थिररूपतया for स्थिरचरस्वरूपतया, C. स्थिरत्रसरूपतया.

नेह नानास्ति किंचन (बृ. ४।४।१९) । यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति....यत्र त्वस्य सर्वमात्मैवाभूत् . .तत्केन कं पश्येत्....तत्केन कं विजानीयात् (बृ. २।४।१४) इत्यादिना । न पुनर्बहु स्यां प्रजायेय (तै. २।६।१ छा. ६।२।३) इत्यादिश्रुतिसिद्धं स्वसंकल्पकृतं ब्रह्मणो नानानामरूपभाक्त्वेन नानाप्रकारत्वमपि निषिध्यते । यत्र त्वस्य सर्वमात्मैवाभूत् (बृ. २।४।१४) इति निषेधवाक्यादौ च तत्स्थापितं सर्वं तं परादाद्योन्यत्रात्मनः सर्वं वेद (बृ. २।४।६) । तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमेतदृग्वेदः (बृ. २।४।१०) इत्यादिना ।

एवं चिदचिदीश्वराणां स्वभावभेदं स्वरूपभेदं च वदन्तीनां कार्यकारणभावं कार्यकारणयोरनन्यत्वं वदन्तीनां च सर्वासां श्रुतीनामविरोधश्चिदचितोः परमात्मनश्च सर्वदा शरीरात्मभावं शरीरभूतयोः कारणदशायां नामरूपविभागानर्हसूक्ष्मदशापत्तिं कार्यदशायां च तदर्हस्थूलदशापत्तिं वदन्तीभिः श्रुतिभिरेव ज्ञायत इति ब्रह्माज्ञानवादस्यौपाधिकब्रह्मभेदवादस्यान्यस्याप्यन्यायमूलस्य सकलश्रुतिविरुद्धस्य न कथंचिदप्यवकाशो दृश्यते । चिदचिदीश्वराणां पृथक्स्वभावतया तत्तच्छ्रुतिसिद्धानां शरीरात्मभावेन प्रकारप्रकारितया श्रुतिभिरेव प्रतिपन्नानां श्रुत्यन्तरेण कार्यकारणभावप्रतिपादनं कार्यकारणयोरैक्यप्रतिपादनं च ह्यविरुद्धमिति सिद्धम् । यथाग्नेयादीन्षड्यागानुत्पत्तिवाक्यैः पृथगुत्पन्नान्समुदायानुवादिवाक्यद्वयेन समुदायद्वयत्वमापन्नान्द-

---

11. B. C. read स्वरूपभेदं स्वभावभेदम् for स्वभावभेद स्वरूपभेदम्.

15. C. om च.

20. B. om. च हि.

21. C. om. इति सिद्धम्.

http://acharya.org

र्शपूर्णमासाभ्यामित्यधिकारवाक्यं कामिनः कर्तव्यतया विदधाति तथा चिदचिदीश्वरान्विविक्तस्वरूपस्वभावान्

क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः ।

(श्वे. १।१०)

प्रधानक्षेत्रज्ञपतिर्गुणेशः (श्वे. ६।१६) । पतिं विश्वस्यात्मेश्वरम् (ना. १३।१) । आत्मा नारायणः परः (ना. १३।१) इत्यादिवाक्यैः पृथक्प्रतिपाद्य यस्य पृथिवी शरीरं यस्यात्मा शरीरं यस्याव्यक्तं शरीरं यस्याक्षरं शरीरम् । एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायणः (ना. २) इत्यादिभिर्वाक्यैश्चिदचितोः सर्वावस्थावस्थितयोः परमात्मशरीरतां परमात्मनस्तदात्मतां च प्रतिपाद्य शरीरिभूतपरमात्माभिधायिभिः सद्ब्रह्मात्मादिशब्दैः कारणावस्थः कार्यावस्थश्च परमात्मैक एवेति पृथक्प्रतिपन्नं वस्तुत्रितयं सदेव सोम्येदमग्र आसीत् (छा. ६।२।१) । ऐतदात्म्यमिदं सर्वम् (छा. ६।८।७) । सर्वं खल्विदं ब्रह्म (छा. ३।१४।१) इत्यादिवाक्यं प्रतिपादयति । चिदचिद्वस्तुशरीरिणः परमात्मनः परमात्मशब्देनाभिधाने हि नास्ति विरोधः । यथा मनुष्यपिण्डशरीरकस्यात्मविशेषस्यायमात्मा सुखीत्यात्मशब्देनाभिधान इत्यलमतिविस्तरेण ।

यत्पुनरिदमुक्तं ब्रह्मात्मैकत्वविज्ञानेनैवाविद्यानिवृत्तिर्युक्तेति । तदयुक्तम् । बन्धस्य पारमार्थिकत्वेन ज्ञाननिवर्त्यत्वाभावात् । पुण्यापुण्यरूपकर्मनिमित्तदेवादिशरीरप्रवेशतत्प्रयुक्तसुखदुःखानुभवरूपस्य बन्धस्य मिथ्यात्वं कथमिव शक्यते वक्तुम् । एवं-

---

1. B. reads अधिकारवाक्येन for अधिकारवाक्यम्.

7. B. reads पृथक् after पृथक्.

14. B. reads एकमेवाद्वितीयम् after आसीत्.

18. B. reads अभिधानम् for अभिधाने.

http://acharya.org

रूपबन्धनिवृत्तिर्भक्तिरूपापन्नोपासनप्रीतपरमपुरुषप्रसादलभ्येति पूर्वमेवोक्तम्। भवदभिमतस्यैक्यज्ञानस्य यथावस्थितवस्तुविपरीतविषयस्य मिथ्यारूपत्वेन बन्धविवृद्धिरेव फलं भवति।

मिथ्यैतदन्यद्द्रव्यं हि नैति तद्द्रव्यतां यतः। (वि. पु. २।१४।२७)

इति शास्त्रात्। उत्तमः पुरुषस्त्वन्यः (गी. १५।१७)। पृथगात्मानं प्रेरितारं च मत्वा (श्वे. १।६) इति जीवात्मविसजातीयस्य तदन्तर्यामिणो ब्रह्मणो ज्ञानं परमपुरुषार्थलक्षणमोक्षसाधनमित्युपदेशाच्च।

अपि च भवदभिमतस्यापि निवर्तकज्ञानस्य मिथ्यारूपत्वात्तस्य निवर्तकान्तरं मृग्यम्। निवर्तकज्ञानमिदं स्वविरोधि सर्वं भेदजातं निवर्त्य क्षणिकत्वात्स्वयमेव विनश्यतीति चेन्न। तत्स्वरूपतदुत्पत्तिविनाशानां काल्पनिकत्वेन विनाशतत्कल्पनाकल्पकरूपाविद्याया निवर्तकान्तरमन्वेषणीयम्। तद्विनाशो ब्रह्मस्वरूपमेवेति चेत्। तथा सति निवर्तकज्ञानोत्पत्तिरेव न स्यात्। तद्विनाशे तिष्ठति तदुत्पत्त्यसंभवात्।

अपि च चिन्मात्रब्रह्मव्यतिरिक्तकृत्स्ननिषेधविषयज्ञानस्य कोऽयं ज्ञाता। अध्यासरूप इति चेन्न। तस्य निषेध्यतया निवर्तकज्ञानकर्मत्वात्तत्कर्तृत्वानुपपत्तेः। ब्रह्मस्वरूपमेवेति चेत्। ब्रह्मणो निवर्तकज्ञानं प्रति ज्ञातृत्वं किं स्वरूपमुताध्यस्तम्। अध्यस्तं चेदयमध्यासस्तन्मूलाविद्यान्तरं च निवर्तकज्ञानाविषयतया तिष्ठत्येव। निवर्तकज्ञानान्तराभ्युपगमे तु तस्यापि त्रिरूपत्वाज्ज्ञात्रपेक्षयानवस्था स्यात्। ब्रह्मस्वरूपस्यैव ज्ञातृत्वेऽस्मदीय एव पक्षः परिगृहीतः स्यात्। निवर्तकज्ञानस्वरूपं स्वस्य

---

9. B. reads स्वरूपत्वात् for रूपत्वात्.

21. B. C om. तु.

23. C. reads त्वस्य for स्वस्य.

http://acharya.org

ज्ञाता च ब्रह्मव्यतिरिक्तत्वेन स्वनिवर्त्यान्तर्गतमिति वचनं भूतलव्यतिरिक्तं कृत्स्नं देवदत्तेनच्छिन्नमित्येकस्यामेवच्छेदनक्रियायामस्यच्छेत्तुरस्याश्छेदनक्रियायाश्चच्छेद्यानुप्रवेशवचनवदुपहास्यम् । अध्यस्तो ज्ञाता स्वनाशहेतुभूतनिवर्तकज्ञाने स्वयं कर्ता च न भवति । स्वनाशस्यापुरुषार्थत्वात् । तन्नाशस्य ब्रह्मस्वरूपत्वाभ्युपगमे भेदतद्दर्शनतन्मूलाविद्यादीनां कल्पनमेव न स्यादित्यलमनेन दिष्टहतमुद्गराभिघातेन ।

तस्मादनादिकर्मप्रवाहरूपाज्ञानमूलत्वाद्बन्धस्य तन्निवर्हणमुक्तलक्षणज्ञानादेव । तदुत्पत्तिश्चाहरहरनुष्ठीयमानपरमपुरुषाराधनवेषात्मयाथात्म्यबुद्धिविशेषसंस्कृतवर्णाश्रमोचितकर्मलभ्या । तत्र केवलकर्मणामल्पास्थिरफलत्वमनभिसंहितफलपरमपुरुषाराधनवेषाणां कर्मणामुपासनात्मकज्ञानोत्पत्तिद्वारेण ब्रह्मयाथात्म्यानुभवरूपानन्तस्थिरफलत्वं च कर्मस्वरूपज्ञानादृते न ज्ञायते । केवलाकारपरित्यागपूर्वकयथोक्तस्वरूपकर्मोपादानं च न संभवतीति कर्मविचारानन्तरं तत एव हेतोर्ब्रह्मविचारः कर्तव्य इत्यथात इत्युक्तम् ।

अत्र पूर्वपक्षवादी मन्यते । वृद्धव्यवहारादन्यत्र शब्दस्य बोधकत्वशक्त्यवधारणासंभवाद्व्यवहारस्य च कार्यबुद्धिपूर्वकत्वेन कार्यार्थ एव शब्दस्य प्रामाण्यमिति कार्यरूप एव वेदार्थः । अतो वेदान्ताः परिनिष्पन्ने परस्मिन्ब्रह्मणि न प्रमाणभावमनुभवितुमर्हन्ति । न च पुत्रजन्मादिसिद्धवस्तुविषयवाक्येषु हर्ष-

---

2. C. reads अस्याम् for एकस्याम्.

5. B. reads अपरमार्थत्वात् for अपुरुषार्थत्वात्.

10. B. reads याथार्थ्य for याथात्म्य.

17. C. reads तत्र for अत्र.

20. C. reads परे for परस्मिन्.

http://acharya.org

हेतूनां कालत्रयवर्तिनामर्थानामानन्त्यात्सुलभ्रजन्मसुखप्रसवादिहर्षहेत्वर्थान्तरोपनिपातसंभावनया च प्रियार्थप्रतिपत्तिनिमित्तमुखविकासादिलिङ्गेनार्थविशेषबुद्धिहेतुत्वनिश्चयः । नापि व्युत्पन्नेतरपदविभक्त्यर्थस्य पदान्तरार्थनिश्चयेन वा प्रकृत्यर्थनिश्चयेन वा शब्दस्य सिद्धवस्त्वभिधानशक्तिनिश्चयः । ज्ञातकार्याभिधायिपदसमुदायस्य तदंशविशेषनिश्चयरूपत्वात्तस्य । न च सर्पोद्भीतस्य नायं सर्पो रज्जुरेषेति शब्दश्रवणसमनन्तरं भयनिवृत्तिदर्शनेन सर्पाभावबुद्धिहेतुत्वनिश्चयः । अत्रापि निश्चेष्टं निर्विषमचेतनमिदं वस्त्वित्याद्यर्थबोधेषु बहुषु भयनिवृत्तिहेतुषु सत्सु विशेषनिश्चयायोगात् । कार्यबुद्धिप्रवृत्तिव्याप्तिबलेन शब्दस्य प्रवर्तकार्थावबोधित्वमवगतमिति सर्वपदानां कार्यपरत्वेन सर्वैः पदैः कार्यस्यैव विशिष्टस्य प्रतिपादनात्कार्यान्वितस्वार्थमात्रे पदशक्तिनिश्चयः । इष्टसाधनताबुद्धिस्तु कार्यबुद्धिद्वारेण प्रवृत्तिहेतुर्न स्वरूपेण । अतीतानागतवर्तमानेष्टोपायबुद्धिषु प्रवृत्त्यनुपलब्धेः । इष्टोपायो हि मत्प्रयत्नादृते न सिध्यति । अतो मत्कृतिसाध्य इति बुद्धिर्यावन्न जायते तावन्न प्रवर्तते । अतः कार्यबुद्धिरेव प्रवृत्तिहेतुरिति प्रवर्तकस्यैव शब्दवाचितया कार्यस्यैव वेदवेद्यत्वात्परिनिष्पन्नरूपब्रह्मप्राप्तिलक्षणानन्तस्थिरफलापाताप्रतिपत्तेरक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवतीत्यादिभिः

---

1. B om जन्म.
3 D. reads विकाश for विकास.
4. B. om. वा after पदान्तरार्थनिश्चयेन.
12. B. reads नान्यान्वित for कार्यान्वित; B. reads पदानाम् after स्वार्थमात्रे.
16. C reads प्रवृत्तिरेव for प्रवर्तते.
17. C reads वाच्यत्वात् for वाचितया
18. C. om. आपात; B. reads कृतिसाध्यताबुद्धिविषयस्यैव प्रवर्तकत्व प्रवृत्तस्यैव शक्तिग्रहः गृहीतशक्तिकस्यैव वेदार्थप्रतिपत्ति. for आपात...त्तेः.

http://acharya.org

कर्मणामेव स्थिरफलत्वप्रतिपादनाच्च कर्मफलाल्पास्थिरत्वब्रह्मज्ञानफलानन्तस्थिरत्वज्ञानहेतुको ब्रह्मविचारारम्भो न युक्त इति ।

अत्राभिधीयते । निखिललोकविदितशब्दार्थसंबन्धावधारणप्रकारमपनुद्य सर्वशब्दानामलौकिकैकार्थावबोधित्वावधारणं प्रामाणिका न बहु मन्यन्ते । एवं किल बालाः शब्दार्थसंबन्धमवधारयन्ति । मातापितृप्रभृतिभिरम्बातातमातुलादीञ्छशिपशुमृगनरपक्षिसर्पादींश्चैनमवेहीमं चावधारयेत्यभिप्रायेणाङ्गुल्या निर्दिश्य तैस्तैः शब्दैस्तेषु तेष्वर्थेषु बहुशः शिक्षिताः शनैः शनैस्तैस्तैः शब्दैरेव तेषु तेष्वर्थेषु स्वात्मना बुद्ध्युत्पत्तिं दृष्ट्वा शब्दार्थयोः संबन्धान्तरादर्शनात्संकेतयितृपुरुषाज्ञानाच्च तेष्वर्थेषु तेषां शब्दानां प्रयोगो बोधकत्वनिबन्धन इति निश्चिन्वन्ति । पुनश्च व्युत्पन्नेतरशब्देष्वस्य शब्दस्यायमर्थ इति पूर्ववृद्धैः शिक्षिताः सर्वशब्दानामर्थमवगम्य परप्रत्यायनाय तत्तदर्थावबोधिवाक्यजातं प्रयुञ्जते ।

प्रकारान्तरेणापि शब्दार्थसंबन्धावधारणं सुशकम् । केनचित्पुरुषेण हस्तचेष्टादिना पिता ते सुखमास्त इति देवदत्ताय ज्ञापयेति प्रेषितः कश्चित्तज्ज्ञापने प्रवृत्तः पिता ते सुखमास्त इति शब्दं प्रयुङ्क्ते । पार्श्वस्थोन्यो व्युत्पित्सुर्मूकवच्चेष्टाविशेषज्ञस्तज्ज्ञापने प्रवृत्तमिमं ज्ञात्वानुगतस्तज्ज्ञापनाय प्रयुक्तमिमं शब्दं श्रुत्वायं शब्दस्तदर्थबुद्धिहेतुरिति निश्चिनोतीति कार्यार्थे

---

2 C. reads स्थिरफलत्व for स्थिरत्व; B. reads फलाना तत्स्थिरत्व for फलानन्तस्थिरत्व.

6. D. reads मातृपितृ for मातापितृ.

9. B. C. read एव शब्दैः for शब्दैरेव. B. C. read स्वात्मनाम् for स्वात्मना.

12. B. om. शब्दस्य.

15. C. reads सुशकम् for सुशकम्.

http://acharya.org

एव व्युत्पत्तिरिति निर्बन्धो निर्निबन्धनः । अतो वेदान्ताः परिनिष्पन्नं परं ब्रह्म तदुपासनं चापरिमितफलं बोधयन्तीति तन्निर्णयफलो ब्रह्मविचारः कर्तव्यः ।

कार्यार्थत्वेपि वेदस्य ब्रह्मविचारः कर्तव्य एव । कथम् । आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः (बृ. २।४।५)। सोन्वेष्टव्यः स विजिज्ञासितव्यः (छा. ८।७।१) । विज्ञाय प्रज्ञां कुर्वीत (बृ. ४।४।२१)। दहरोस्मिन्नन्तर आकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यम् । तद्वाव विजिज्ञासितव्यम् (छा. ८।१।१) । तत्रापि दहरं गगनं विशोकस्तस्मिन्यदन्तस्तदुपासितव्यम् (ना. १२।३) इत्यादिभिः प्रतिपन्नोपासनविषयकार्याधिकृतफलत्वेन ब्रह्मविदाप्नोति परम् (तै. २।१।१) इत्यादिभिर्ब्रह्मप्राप्तिः श्रूयत इति ब्रह्मस्वरूपतद्विशेषणानां दुःखासंभिन्नसुखविशेषरूपस्वर्गादिवद्राक्षिसबलप्रतिष्ठादिवदपगोरणशतयातनासाध्यसाधनभाववच्च कार्योपयोगितयैव सिद्धेः ।

गामानयेत्यादिष्वपि वाक्येषु न कार्यार्थे व्युत्पत्तिः । भवदभिमतकार्यस्य दुर्निरूपत्वात् । कृतिभावभावि कृत्युद्देश्यं हि भवतः कार्यम् । कृत्युद्देश्यत्वं कृतिकर्मत्वम् । कृतिकर्मत्वं च कृत्या प्राप्तुमिष्टतमत्वम् । इष्टतमं च सुखं वर्तमानदुःखनिवृत्तिर्वा । तत्रेष्टसुखार्थिना पुरुषेण स्वप्रयत्नादृते यदि तदसिद्धिः प्रतीता ततः प्रयत्नेच्छुः प्रवर्तते पुरुष इति न काचिदपीच्छाविषयस्य कृत्यधीनसिद्धित्वमन्तरेण कृत्युद्देश्यत्वं नाम किंचिदप्युपलभ्यते । इच्छाविषयस्य प्रेरकत्वं च प्रयत्नाधीनसिद्धित्वमेव । तत एव प्रवृत्तेः ।

13. C. reads देश for सुख.

14. C. reads सिद्धिः for सिद्धेः.

16. C. reads कार्यत्वस्य for कार्यस्य.

17. B. reads च after कृत्युद्देश्यत्वम्.

http://acharya.org

न च पुरुषानुकूलत्वं कृत्युद्देश्यत्वम्। यतः सुखमेव पुरुषानुकूलम्। न च दुःखनिवृत्तेः पुरुषानुकूलत्वम्। पुरुषानुकूलं सुखं तत्प्रतिकूलं दुःखमिति सुखदुःखयोः स्वरूपविवेकः। दुःखस्य प्रतिकूलतया तन्निवृत्तिरिष्टा भवति नानुकूलतया। अनुकूलप्रतिकूलान्वयविरहे स्वरूपेणावस्थितिर्हि दुःखनिवृत्तिः। अतः सुखव्यतिरिक्तस्य क्रियादेरनुकूलत्वं न संभवति। न च सुखार्थतया तस्याप्यनुकूलत्वम्। दुःखात्मकत्वात्तस्य। सुखार्थतयापि तदुपादानेच्छामात्रमेव भवति।

नच कृतिं प्रति शेषित्वं कृत्युद्देश्यत्वम्। भवत्पक्षे शेषित्वस्यानिरूपणात्। नच परोद्देशप्रवृत्तकृतिव्याप्त्यर्हत्वं शेषत्वमिति तत्प्रतिसंबन्धी शेषीत्यवगम्यते। तथा सति कृतेरशेषत्वेन तां प्रति तत्साध्यत्वस्य शेषित्वाभावात्। नच परोद्देशप्रवृत्त्यर्हतायाः शेषत्वेन परः शेषी। उद्देश्यत्वस्यैव निरूप्यमाणत्वात्। प्रधानस्यापि भृत्योद्देशप्रवृत्त्यर्हत्वदर्शनाच्च। प्रधानस्तु भृत्यपोषेपि स्वोद्देशेन प्रवर्तत इति चेन्न। भृत्योपि हि प्रधानपोषे स्वोद्देशेनैव प्रवर्तते। कार्यस्वरूपस्यैवानिरूपणात्कार्यप्रतिसंबन्धी शेषस्तत्प्रतिसंबन्धी शेषीत्यप्यसंगतम्।

नापि कृतिप्रयोजनत्वं कृत्युद्देश्यत्वम्। पुरुषस्य कृत्यारम्भ-

---

3. E. reads हि after इति.

5. B. reads विरहेण for विरहे.

7. B. reads सुखात्मतया for सुखार्थतया.

8. C reads तदुपादाने foı तदुपादान.

10. C. reads शेषित्वम् for शेषत्वम्.

12. B. C. read तत्साध्यस्य for तत्साध्यत्वस्य.

13. C. reads शेषित्वेन foı शेषत्वेन; B. reads अनिरूप्यमाणत्वात् for निरूप्यमाणत्वात्.

15. C. E. read प्रधानपोषणे for प्रधानपोषे.

http://acharya.org

प्रयोजनमेव हि कृतिप्रयोजनम्। स चेच्छाविषयः। तस्मादिष्टतातिरेकिकृत्युद्देश्यत्वानिरूपणात्कृतिसाध्यताकृतिप्रधानत्वरूपं कार्यं दुर्निरूपमेव।

नियोगस्यापि साक्षादिच्छाविषयभूतसुखदुःखनिवृत्तिभ्यामनन्यत्वात्तत्साधनतयैवेष्टत्वं कृतिसाध्यत्वं च। अत एव हि तस्य क्रियातिरिक्तता। अन्यथा क्रियैव कार्यं स्यात्। स्वर्गकामपदसमभिव्याहारानुगुण्येन लिङादिवाच्यं कार्यं स्वर्गसाधनमेवेति क्षणभङ्गिकर्मातिरेकि स्थिरं स्वर्गसाधनमपूर्वमेव कार्यमिति स्वर्गसाधनतोल्लेखेनैव ह्यपूर्वव्युत्पत्तिः। अतः प्रथममनन्यार्थतया प्रतिपन्नस्य कार्यस्यानन्यार्थत्वनिर्वहणायापूर्वमेव पश्चात्स्वर्गसाधनं भवतीत्युपहास्यम्। स्वर्गकामपदान्वितकार्याभिधायिपदेन प्रथममप्यनन्यार्थतानभिधानात्। सुखदुःखनिवृत्तितत्साधनेभ्योन्यस्यानन्यार्थस्य कृतिसाध्यताप्रतिपत्त्यनुपपत्तेश्च।

अपि च किमिदं नियोगस्य प्रयोजनत्वम्। सुखवन्नियोगस्याप्यनुकूलत्वमेवेति चेत्। कि नियोगः सुखम्। सुखमेव ह्यनुकूलम्। सुखविशेषवन्नियोगापरपर्यायं विलक्षणं सुखान्तरमिति चेत्। किं तत्र प्रमाणमिति वक्तव्यम्। स्वानुभवश्चेन्न। वि-

---

1. B E read इष्टत्व for इष्टता.

2 B. reads स्वरूपम् for रूपम्; E reads स्वरूप.

3. C. reads नियोगस्यापि साक्षादिषिविषयत्व दुर्निरूपमेव। after दुर्निरूपमेव.

4. E. reads इषि for इच्छा.

7 C. reads लिङादेः for लिङादि.

12. B. reads अनन्यार्थताभिधानात् for अप्यनन्यार्थतानभिधानात्.

13. C. reads कार्यस्य after अनन्यार्थस्य; B. C. E. read प्रतीति for प्रतिपत्ति.

14. C. reads प्रयोगस्य after नियोगस्य.

http://acharya.org

षयविशेषानुभवसुखवन्नियोगानुभवसुखमिदमिति भवतापि नानुभूयते । शास्त्रेण नियोगस्य पुरुषार्थतया प्रतिपादनात्पश्चात्तु भोक्ष्यत इति चेत् । किं तन्नियोगस्य पुरुषार्थत्ववाचि शास्त्रम् । न तावल्लौकिकं वाक्यम् । तस्य दुःखात्मकक्रियाविषयत्वात् । तेन सुखसाधनतयैव कृतिसाध्यतामात्रप्रतिपादनात् । नापि वैदिकम् । तेनापि स्वर्गसाधनतयैव कार्यस्य प्रतिपादनात् । नापि नित्यनैमित्तिकशास्त्रम् । तस्यापि तदभिधायित्वं स्वर्गकामवाक्यस्यापूर्वव्युत्पत्तिपूर्वकमित्युक्तनीत्या तेनापि सुखादिसाधनभूतकार्याभिधानमवर्जनीयम् । नियतैहिकफलस्य कर्मणोतष्ठितस्य फलत्वेन तदानीमनुभूयमानान्नाद्यरोगतादिव्यतिरेकेण नियोगरूपसुखानुभवानुपलब्धेश्च नियोगः सुखमित्यत्र न किंचन प्रमाणमुपलभामहे । अर्थवादादिष्वपि स्वर्गादिसुखप्रकारकीर्तनवन्नियोगरूपसुखप्रकारकीर्तनं भवतापि न दृष्टचरम् ।

अतो विधिवाक्येष्वपि धात्वर्थस्य कर्तृव्यापारसाध्यतामात्रं शब्दानुशासनसिद्धमेव लिङादेर्वाच्यमित्यध्यवसीयते । धात्वर्थस्य यागादेरग्न्यादिदेवतान्तर्यामिपरमपुरुषसमाराधनरूपता समाराधितात्परमपुरुषात्फलसिद्धिश्चेति फलमत उपपत्तेः (ब्र. सू. ३।२।३७) इत्यत्र प्रतिपादयिष्यते । अतो वेदान्ताः परिनिष्पन्नं ब्रह्म बोधयन्तीति ब्रह्मोपासनफलानन्त्यं स्थिरत्वं च सि-

---

1. B. om. इति.
2. C om तु.
3 E. reads पुरुषार्थवादि for पुरुषार्थत्ववाचि.
5. C. E. read आदि after सुख.
6. E. reads आदि after स्वर्ग.
8 E reads रीत्या for नीत्या.
9 C om. भूत.
15. E. om. अधि before अवसीयते.
16. B. C. read च after धात्वर्थस्य; C reads अप् after अग्नि.
19. B. C. read परम् after परिनिष्पन्नम्; E. reads पर.

http://acharya.org

द्धम् । चातुर्मास्यादिकर्मस्वपि केवलस्य कर्मणः क्षयिफलत्वोपदेशादक्षयफलश्रवणं वायुश्चान्तरिक्षं चैतदमृतम् (बृ. २।३।३) इत्यादिवदापेक्षिकं मन्तव्यम् । अतः केवलानां कर्मणामल्पास्थिरफलत्वाद्ब्रह्मज्ञानस्यानन्तस्थिरफलत्वाच्च तन्निर्णयफलो ब्रह्मविचारारम्भो युक्त इति स्थितम् ॥ १ ॥

किं पुनस्तद्ब्रह्म यज्जिज्ञास्यमुच्यत इत्यत्राह ।

जन्माद्यस्य यतः ॥ २ ॥

जन्मादीति सृष्टिस्थितिप्रलयम् । तद्गुणसंविज्ञानो बहुव्रीहिः । अस्याचिन्त्यविविधविचित्ररचनस्य नियतदेशकालफलभोगब्रह्मादिस्तम्बपर्यन्तक्षेत्रज्ञमिश्रस्य जगतो यतो यस्मात्सर्वेश्वरान्निखिलहेयप्रत्यनीकस्वरूपात्सत्यसंकल्पाज्ज्ञानानन्दाद्यनन्तकल्याणगुणात्सर्वज्ञात्सर्वशक्तेः परमकारुणिकात्परस्मात्पुंसः सृष्टिस्थितिप्रलयाः प्रवर्तन्ते तद्ब्रह्मेति सूत्रार्थः ।

भृगुर्वै वारुणिः । वरुणं पितरमुपससार । अधीहि भगवो ब्रह्म (तै. ३।१।१) इत्यारभ्य यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्म (तै. ३।१।१) इति श्रूयते । तत्र संशयः । किमस्माद्वाक्याद्ब्रह्म लक्षणतः प्रतिपत्तुं शक्यते न वेति । किं प्राप्तं न शक्यमिति । न तावज्जन्मादयो विशेषणत्वेन ब्रह्म लक्षयन्ति । अनेकविशेषणव्यावृत्तत्वेन ब्रह्मणोनेकत्वप्रसक्तेः । विशेषणत्वं हि व्यावर्तकत्वम् । ननु देवदत्तः श्यामो युवा लोहिताक्षः समपरिमाण इत्यत्र विशेषणबहुत्वेप्येक एव देवदत्तः प्रतीयते । एव-

---

1. B. C. read केवल for केवलस्य.

3. C. reads केवल for केवलानाम्.

4. E. reads चानन्तस्थिरफलत्वात् for अनन्तस्थिरफलत्वाच्च.

20. C. reads विशेषणं हि व्यावर्तकम् for विशेषणत्वं हि व्यावर्तकत्वम्.

http://acharya.org

मत्राप्येकमेव ब्रह्म भवति । नैवम् । तत्र प्रमाणान्तरेणैक्यप्रतीतेरेकस्मिन्नेव विशेषणानामुपसंहारः । अन्यथा तत्रापि व्यावर्तकत्वेनानेकत्वमपरिहार्यम् । अत्र त्वनेकेनैव विशेषणेन लिलक्षयिषितत्वाद्ब्रह्मणः प्रमाणान्तरेणैक्यमनवगतमिति व्यावर्तकभेदेन ब्रह्मबहुत्वमवर्जनीयम् । ब्रह्मशब्दैक्यादत्राप्यैक्यं प्रतीयत इति चेन्न । अज्ञातगोव्यक्तिजिज्ञासोः पुरुषस्य षण्डो मुण्डः पूर्णशृङ्गो गौरित्युक्ते गोपदैक्येपि षण्डत्वादिव्यावर्तकभेदेन गोव्यक्तिबहुत्वप्रतीतेर्ब्रह्मव्यक्तयोपि बह्व्यः स्युः । अत एव लिलक्षयिषिते वस्तुन्येषां विशेषणानां संभूय लक्षणत्वमनुपपन्नम् । नाप्युपलक्षणत्वेन लक्षयन्ति । आकारान्तराप्रतिपत्तेः । उपलक्षणानामेकेनाकारेण प्रतिपन्नस्य केनचिदाकारान्तरेण प्रतिपत्तिहेतुत्वं हि दृष्टं यत्रायं सारसः स देवदत्तकेदार इत्यादिषु । ननु च सत्यं ज्ञानमनन्तं ब्रह्म (तै. २।१।१) इति प्रतिपन्नाकारस्य जगज्जन्मादीन्युपलक्षणानि भवन्ति । न । इतरेतरप्रतिपन्नाकारापेक्षत्वेनोभयोर्लक्षणवाक्ययोरन्योन्याश्रयणात् । अतो न लक्षणतो ब्रह्म प्रतिपत्तुं शक्यत इति ।

एवं प्राप्तेभिधीयते । जगत्सृष्टिस्थितिप्रलयैरुपलक्षणीभूतैर्ब्रह्म प्रतिपत्तुं शक्यते । न चोपलक्षणोपलक्ष्याकारव्यतिरिक्ताकारान्तराप्रतिपत्तेर्ब्रह्मणोप्रतिपत्तिः । उपलक्ष्यं ह्यनवधिकातिश-

---

1. C. reads मैवम् for नैवम्.
2. E. reads व्यावर्तकत्वात् for व्यावर्तकत्वेन.
3. B C. read अनेन for अनेकेन.
6. B. C. E read गोव्यक्ते. for गोव्यक्ति.
9. C. reads लक्षकत्वमपि for लक्षणत्वम्; E. reads अपि after लक्षणत्वम्.
12. E reads यथायम् for यत्रायम्.
17. B. C. E. read उपलक्षणभूतैः for उपलक्षणीभूतैः.
19. B. reads ब्रह्म for ब्रह्मण; C. reads प्रतिपत्तिः for अप्रतिपत्तिः.

http://acharya.org

यद्बृहत्। बृंहणं च ब्रह्म । बृहतेर्धातोस्तदर्थत्वात् । तदुपलक्षणभूताश्च जगज्जन्मस्थितिलयाः । यतो येन यदिति प्रसिद्धवज्जन्मादिकारणनिर्देशेन यथाप्रसिद्धि जन्मादिकारणमनूद्यते । प्रसिद्धिश्च सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् । तदैक्षत बहु स्यां प्रजायेयेति । तत्तेजोसृजत (छा. ६।२।२-३) इत्येकस्यैव सच्छब्दवाच्यस्य निमित्तोपादानरूपकारणत्वेन । तदपि सदेवेदमग्र एकमेवासीदित्युपादानतां प्रतिपाद्याद्वितीयमित्यधिष्ठात्रन्तरं प्रतिषिध्य तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोसृजतेत्येकस्यैव प्रतिपादनात् । तस्माद्यन्मूला जगज्जन्मस्थितिलयास्तद्ब्रह्मेति जगज्जन्मस्थितिलयाः स्वनिमित्तोपादानभूतं वस्तु ब्रह्मेति लक्षयन्ति । जगन्निमित्तोपादानताक्षिप्तसर्वज्ञत्वसत्यसंकल्पत्वविचित्रशक्तित्वाद्याकारबृहत्त्वेन प्रतिपन्नं ब्रह्मेति च जन्मादीनां तथाप्रतिपन्नस्य लक्षकत्वेन नाकारान्तराप्रतिपत्तिरूपानुपपत्तिः ।

जगज्जन्मादीनां विशेषणतया लक्षणत्वेपि न कश्चिद्दोषः । लक्षणभूतान्यपि विशेषणानि स्वविरोधिव्यावृत्तं वस्तु लक्षयन्ति । अज्ञातस्वरूपे वस्तुन्येकस्मिँल्लक्षयिषितेपि परस्पराविरोध्यनेकविशेषणलक्षणत्वं न भेदमापादयति । विशेषणानामेकाश्रयतया

---

1. C. E om. ब्रह्म after च.
3. C. reads सिद्ध after कारण
6 B. reads इदमग्रे सत् for सदेवेदमग्रे.
7. B reads च after उपादानताम्.
10. E om जगत् after इति.
12. B. om. च after इति.
13. E. लक्षणत्वेन for लक्षकत्वेन.
14. C. reads लक्षकत्वे for लक्षणत्वे.
15. E reads ब्रह्म for वस्तु.
17. B. om. लक्षण; B, C. read एकाश्रयता for एकाश्रयतया.

प्रतीतेरेकस्मिन्नेवोपसंहारात्। षण्डत्वादयस्तु विरोधादेव गोव्यक्तिभेदमापादयन्ति। अत्र तु कालभेदेन जन्मादीनां न विरोधः।

यतो वा इमानि भूतानि (तै. ३।१।१) इत्यादिवाक्येन प्रतिपन्नस्य जगज्जन्मादिकारणस्य ब्रह्मणः सकलेतरव्यावृत्तं स्वरूपमभिधीयते सत्यं ज्ञानमनन्तं ब्रह्म (तै. २।१।१) इति। तत्र सत्यपदं निरुपाधिकसत्तायोगि ब्रह्माह। तेन विकारास्पदमचेतनं तत्संसृष्टचेतनश्च व्यावृत्तः। नामान्तरभजनार्हावस्थान्तरयोगेन तयोर्निरुपाधिकसत्तायोगरहितत्वात्। ज्ञानपदं नित्यासंकुचितज्ञानैकाकारमाह। तेन कदाचित्संकुचितज्ञानत्वेन मुक्ता व्यावृत्ताः। अनन्तपदं देशकालवस्तुपरिच्छेदरहितस्वरूपमाह। सगुणत्वात्स्वरूपस्य स्वरूपेण गुणैश्चानन्त्यम्। तेन पूर्वपदद्वयव्यावृत्तकोटिद्वयविलक्षणाः सातिशयस्वरूपस्वगुणा नित्या व्यावृत्ताः। विशेषणानां व्यावर्तकत्वात्। ततः सत्यं ज्ञानमनन्तं ब्रह्म (तै. २।१।१) इत्यनेन वाक्येन जगज्जन्मादिनावगतस्वरूपं ब्रह्म सकलेतरवस्तुविसजातीयमिति लक्ष्यत इति नान्योन्याश्रयणम्। अतः सकलजगज्जन्मादिकारणं निरवद्यं सर्वज्ञं सत्यसंकल्पं सर्वशक्ति ब्रह्म लक्षणतः प्रतिपत्तुं शक्यत इति सिद्धम्।

ये तु निर्विशेषं वस्तु जिज्ञास्यमिति वदन्ति तन्मते ब्रह्मजिज्ञासा जन्माद्यस्य यत इत्यसंगतं स्यात्। निरतिशयबृहद्बृंहणं च ब्रह्मेति निर्वचनात्। तच्च ब्रह्म जगज्जन्मादिकारणमिति

---

3. E reads कारण before वाक्येन

7. B. E read संसृष्ट. for संसृष्ट; E. om. च.

13. C. reads स्युः after व्यावृत्ताः; B. reads अतः for ततः.

15 C. reads वस्तु after विसजातीयमिति.

21. C. reads वचनात् for निर्वचनात्.

http://acharya.org

वचनाच्च । एवमुत्तरेष्वपि सूत्रगणेषु सूत्रोदाहृतश्रुतिगणेषु चेक्षणाद्यन्वयदर्शनात्सूत्राणि सूत्रोदाहृताः श्रुतयश्च न तत्र प्रमाणम् । तर्कश्च साध्यधर्माव्यभिचारिसाधनधर्मान्वितवस्तुविषयत्वान्न निर्विशेषवस्तुनि प्रमाणम् । जगज्जन्मादिभ्रमा यतस्तद्ब्रह्मेति स्वोत्प्रेक्षापक्षेपि न निर्विशेषवस्तुसिद्धिः । भ्रममूलमज्ञानमज्ञानसाक्षि ब्रह्मेत्यभ्युपगमात् । साक्षित्वं हि प्रकाशैकरसतयोच्यते । प्रकाशत्वं तु जडाद्व्यावर्तकं स्वस्य परस्य च व्यवहारयोग्यतापादनस्वभावेन भवति । तथा सति सविशेषत्वम् । तदभावे प्रकाशतैव न स्यात् । तुच्छतैव स्यात् ॥ २ ॥

जगज्जन्मादिकारणं ब्रह्म वेदान्तवेद्यमित्युक्तम् । तदयुक्तम् । तद्धि न वाक्यप्रतिपाद्यम् । अनुमानेन सिद्धेरित्याशङ्क्याह ।

शास्त्रयोनित्वात् ॥ ३ ॥

शास्त्रं यस्य योनिः कारणं प्रमाणं तच्छास्त्रयोनि । तस्य भावः शास्त्रयोनित्वम् । तस्मात् । ब्रह्मज्ञानकारणत्वाच्छास्त्रस्य तद्योनित्वम् । ब्रह्मणोत्यन्तातीन्द्रियत्वेन प्रत्यक्षादिप्रमाणाविषयतया ब्रह्मणः शास्त्रैकप्रमाणत्वादुक्तस्वरूपं ब्रह्म यतो वा इमानि भूतानि जायन्ते (तै. ३।१।१) इत्यादि वाक्यं बोधयत्येवेत्यर्थः ।

ननु शास्त्रयोनित्वं ब्रह्मणो न संभवति । प्रमाणान्तरवेद्यत्वाद्ब्रह्मणः । अप्राप्ते तु शास्त्रमर्थवत् ।

2. C. reads उदाहृत for उदाहृताः.

4. B. E. read भ्रम. for भ्रमाः.

5. C. reads च for अपि.

7. E. reads एव after रसतया; E. reads च after स्वस्य.

16. E. reads प्रमाणकत्वात् for प्रमाणत्वात्.

17. B. reads बोधयेत् for बोधयति.

http://acharya.org

किं तर्हि तत्र प्रमाणम् । न तावत्प्रत्यक्षम् । तद्धि द्विविधम् । इन्द्रियसंभवं योगसंभवं चेति । इन्द्रियसंभवं च बाह्यसंभवमान्तरसंभवं चेति द्विधा । बाह्येन्द्रियाणि विद्यमानसंनिकर्षयोग्यस्वविषयबोधजनकानीति न सर्वार्थसाक्षात्कारतन्निर्माणसमर्थपरमपुरुषविशेषविषयबोधजनकानि । नाप्यान्तरम् । सुखादिव्यतिरिक्तबहिर्विषयेषु तस्य बाह्येन्द्रियानपेक्षप्रवृत्त्यनुपपत्तेः । नापि योगजन्यम् । भावनाप्रकर्षपर्यन्तजन्मनस्तस्य विशदावभासत्वेपि पूर्वानुभूतविषयस्मृतिमात्रत्वान्न प्रामाण्यमिति कुतः प्रत्यक्षता । तदतिरिक्तविषयत्वे कारणाभावात् । तथा सति तस्य भ्रमरूपता । नाप्यनुमानं विशेषतो दृष्टं सामान्यतो दृष्टं वा । अतीन्द्रिये वस्तुनि संबन्धावधारणविरहान्न विशेषतो दृष्टम् । समस्तवस्तुसाक्षात्कारतन्निर्माणसमर्थपुरुषविशेषनियतं सामान्यतो दृष्टमपि न लिङ्गमुपलभ्यते । ननु च जगतः कार्यत्वं तदुपादानोपकरणसंप्रदानप्रयोजनाभिज्ञकर्तृकत्वव्याप्तम् । अचेतनारब्धत्वं जगतश्चैकचेतनाधीनत्वेन व्याप्तम् । सर्वं हि घटादिकार्यं तदुपादानोपकरणसंप्रदानप्रयोजनाभिज्ञकर्तृकं दृष्टम् । अचेतनारब्धमरोगं स्वशरीरमेकचेतनाधीनं च । सावयवत्वेन जगतः कार्यत्वम् ।

उच्यते । किमिदमेकचेतनाधीनत्वम् । न तावत्तदायत्तोत्प-

---

1. B. om. हि.

3 E reads द्विविधम् for द्विधा.

4 B. om. स्व; C reads जननानि for जनकानि.

5. B. C. om. परम; C. reads जननानि for जनकानि.

6. C. reads आन्तर before सुखादि, E. reads आन्तरसुखदुःखादि for सुखादि.

11. B. reads अतीन्द्रिय for अतीन्द्रिये, C. reads अतीन्द्रियवस्तु for अतीन्द्रिये वस्तुनि.

http://acharya.org

त्तिस्थितित्वम् । दृष्टान्तो हि साध्यविकलः स्यात् । न ह्यरोगं स्वशरीरमेकचेतनायत्तोत्पत्तिस्थिति । तच्छरीरस्य भोक्तॄणां भार्यादिसर्वचेतनानामदृष्टजन्यत्वात्तदुत्पत्तिस्थित्योः । किं च शरीरावयविनः स्वावयवसमवेततारूपा स्थितिरवयवसंश्लेषविशेषव्यतिरेकेण न चेतनमपेक्षते । प्राणनलक्षणा तु स्थितिः पक्षत्वाभिमते क्षितिजलधिमहीधरादौ न संभवतीति पक्षसपक्षानुगतामेकरूपां स्थितिं नोपलभामहे । तदायत्तप्रवृत्तित्वं तदधीनत्वमिति चेत् । अनेकचेतनसाध्येषु गुरुतररथशिलामहीधरादिषु व्यभिचारः । चेतनमात्राधीनत्वे सिद्धसाध्यता ।

किं चोभयवादिसिद्धानां जीवानामेव लाघवन्यायेन कर्तृत्वाभ्युपगमो युक्तः । न च जीवानामुपादानाद्यनभिज्ञतया कर्तृत्वासंभवः । सर्वेषामेव चेतनानां पृथिव्याद्युपादानयागाद्युपकरणसाक्षात्कारसामर्थ्यात् । यथेदानीं पृथिव्यादयो यागादयश्च प्रत्यक्षमीक्ष्यन्ते । उपकरणभूतयागादिशक्तिरूपापूर्वादिशब्दवाच्यादृष्टसाक्षात्काराभावेपि चेतनानां न कर्तृत्वानुपपत्तिः । तत्साक्षात्कारानपेक्षणात्कार्यारम्भस्य । शक्तिमत्साक्षात्कार एव हि कार्यारम्भोपयोगी । शक्तेस्तु ज्ञानमात्रमेवोपयुज्यते न साक्षात्कारः । न हि कुलालादय. कार्योपकरणभूतदण्डचक्रादिवत्तच्छक्तिमपि साक्षात्कृत्य घटमणिकादि कार्यमारभन्ते । इह तु चेतनानामागमावगतयागादिशक्तिविशेषाणां कार्यारम्भो नानुपपन्न. ।

किं च यच्छक्यक्रियं शक्योपादानादिविज्ञानं च तदेव त-

---

2 C om स्व.

8 B reads महीरुह for महीधर

10. C. reads लाघवेन for लाघवन्यायेन.

22. B. E. read हि after तदेव.

दभिज्ञकर्तृकं दृष्टम् । महीधरमहार्णवादि त्वशक्यक्रियमशक्योपादानादिविज्ञानं चेति न चेतनकर्तृकम् । अतो घटमणिकादिसजातीयशक्यक्रियशक्योपादानादिविज्ञानवस्तुगतमेव कार्यत्वं बुद्धिमत्कर्तृपूर्वकत्वसाधने प्रभवति ।

किं च घटादिकार्यमनीश्वरेणाल्पज्ञानशक्तिना सशरीरेण परिग्रहवतानाप्तकामेन निर्मितं दृष्टमिति तथाविधमेव चेतनं कर्तारं साधयन्नयं कार्यत्वहेतुः सिषाधयिषितपुरुषसार्वज्ञ्यसर्वैश्वर्यादिविपरीतसाधनाद्विरुद्धः स्यात् । न चैतावता सर्वानुमानोच्छेदप्रसङ्गः । लिङ्गिनि प्रमाणान्तरगोचरे लिङ्गबलोपस्थापिता विपरीतविशेषास्तत्प्रमाणप्रतिहतगतयो हि निवर्तन्ते । इह तु सकलेतरप्रमाणाविषये लिङ्गिनि निखिलजगन्निर्माणचतुरेन्वयव्यतिरेकावगताविनाभावनियमा धर्माः सर्व एवाविशेषेण प्रसज्यन्ते । निवर्तकप्रमाणाभावात्तथैवावतिष्ठन्ते । अत आगमादृते कथमीश्वरः सेत्स्यति ।

अत्राहुः । सावयवत्वादेव जगतः कार्यत्वं न प्रत्याख्यातुं शक्यते । भवन्ति च प्रयोगाः । विवादाध्यासितं भूभूधरादि कार्यम् । सावयवत्वात् । घटादिवत् । तथा विवादाध्यासितमवनिजलधिमहीधरादि कार्यम् । महत्त्वे सति क्रियावत्त्वात् । घटादिवत् । तनुभुवनादि कार्यम् । महत्त्वे सति मूर्तत्वात् । घटादिवदिति । सावयवेषु द्रव्येष्विदमेव क्रियते नेतरदिति कार्यत्वस्य नियामकं

1. B C E read मही for महीधर.

3. C. reads आदि after विज्ञान.

10. B. C read विपरीता· for विपरीत, B C om· हि

16 B. reads भूभूधरादिकम् for भूभूधरादि.

18. C. reads घटवत् for घटादिवत्.

19 B. reads विवादाध्यासितम् before तनुभुवनादि, E om. इति after घटादिवत्

सावयवत्वातिरेकि रूपान्तरं नोपलभामहे । कार्यत्वप्रतिनियतं शक्यक्रियत्वं शक्योपादानादिविज्ञानत्वं चोपलभ्यत इति चेन्न । कार्यत्वेनानुमितेपि विषये ज्ञानशक्ती कार्यानुमेये इत्यन्यत्रापि सावयवत्वादिना कार्यत्वं ज्ञातमिति ते च प्रतिपन्ने एवेति न कश्चिद्विशेषः । तथा हि । घटमणिकादिषु कृतेषु कार्यत्वदर्शनानुमितकर्तृगततन्निर्माणशक्तिज्ञानः पुरुषोदृष्टपूर्वं विचित्रसंनिवेशं नरेन्द्रभवनमालोक्यावयवसंनिवेशविशेषेण तस्य कार्यत्वं निश्चित्य तदानीमेव कर्तुस्तज्ज्ञानशक्तिवैचित्र्यमनुमिनोति । अतस्तनुभुवनादेः कार्यत्वे सिद्धे सर्वसाक्षात्कारतन्निर्माणादिनिपुणः कश्चित्पुरुषविशेषः सिध्यत्येव ।

किं च सर्वचेतनानां धर्माधर्मनिमित्तेपि सुखदुःखोपभोगे चेतनानधिष्ठितयोस्तयोरचेतनयोः फलहेतुत्वानुपपत्तेः सर्वकर्मानुगुणसर्वफलप्रदानचतुरः कश्चिदास्थेयः । वर्धकिनानधिष्ठितस्य वास्यादेरचेतनस्य देशकालाद्यनेकपरिकरसंनिधानेपि यूपादिनिर्माणसाधनत्वादर्शनात् । बीजाङ्कुरादेः पक्षान्तर्भावेण तैर्व्यभिचारापादनं श्रोत्रियवेतालानामनभिज्ञताविजृम्भितम् । तत एव सुखादिभिर्व्यभिचारदर्शनवचनमपि तथैव । न च लाघवेनोभयवादिसंप्रतिपन्नक्षेत्रज्ञानामेवेदृशमधिष्ठातृत्वकल्पनं युक्तम् । तेषां सूक्ष्मव्यवहितविप्रकृष्टदर्शनाशक्तिनिश्चयात् । दर्शनानुगुणैव हि

2, C reads ज्ञानत्वम् for विज्ञानत्वम्

3. B. om. अपि after अनुमिते.

5 B. C. read कार्य for कार्यत्व.

7. B. reads भुवन for भवन.

12 E. reads अचेतनयोस्तयोः for तयोरचेतनयोः.

16. C. reads अनभिज्ञान for अनभिज्ञता

17. C om. दर्शन.

http://acharya.org

सर्वत्र शक्तिकल्पना। न च क्षेत्रज्ञवदीश्वरस्याशक्तिनिश्चयोस्ति। अतः प्रमाणान्तरतो न तत्सिद्ध्यनुपपत्तिः। समर्थकर्तृपूर्वकत्वनियतकार्यत्वहेतुना सिध्यन्स्वाभाविकसर्वार्थसाक्षात्कारतन्नियमनशक्तिसंपन्न एव सिध्यति।

यस्त्वनैश्वर्यापादनेन धर्मविशेषविपरीतसाधनत्वमुन्नीतं तदनुमानवृत्तानभिज्ञत्वनिबन्धनम्। सपक्षे सहदृष्टानां सर्वेषां कार्यस्याहेतुभूतानां च धर्माणां लिङ्गिन्यप्राप्तेः। एतदुक्तं भवति। केनचित्किंचित्क्रियमाणं स्वोत्पत्तये कर्तुः स्वनिर्माणसामर्थ्यं स्वोपादानोपकरणज्ञानं चापेक्षते। नत्वन्यासामर्थ्यमन्याज्ञानं च। हेतुत्वाभावात्। स्वनिर्माणसामर्थ्यस्वोपादानोपकरणज्ञानाभ्यामेव स्वोत्पत्तावुपपन्नायां संबन्धितया दर्शनमात्रेणाकिंचित्करस्यार्थान्तराज्ञानादेर्हेतुत्वकल्पनायोगादिति। किं च क्रियमाणवस्तुव्यतिरिक्तार्थाज्ञानादिकं कि सर्वविषयं क्रियोपयोग्युत कतिपयविषयम्। न तावत्सर्वविषयम्। न हि कुलालादिः क्रियमाणव्यतिरिक्तं किमपि न विजानाति। नापि कतिपयविषयम्। सर्वेषु कर्तृषु तत्तदज्ञानाशक्त्यनियमेन सर्वेषामज्ञानादीनां व्यभिचारात्। अतः कार्यत्वस्यासाधकानामनीश्वरत्वादीनां लिङ्गिन्यप्राप्तेरिति न विपरीतसाधनत्वम्।

कुलालादीनां दण्डचक्राद्यधिष्ठानत्वं शरीरद्वारेण दृष्टमिति

---

1 C om शक्ति before कल्पना.

5 E. reads आदि after अनैश्वर्य.

7. B. reads एवम् for एतत्.

10 E reads सर्वनिर्माण for स्वनिर्माण.

14. B. om हि.

17. B. reads असाधनानाम् for असाधकानाम्.

18. E. reads अप्राप्ति for अप्राप्ते.

19. B. C. E read अधिष्ठानम् for अधिष्ठानत्वम्; B. E. read एव after शरीरद्वारेण.

जगदुपादानोपकरणाधिष्ठानमीश्वरस्याशरीरस्यानुपपन्नमिति चेन्न। संकल्पमात्रेणैव परशरीरगतभूतवेतालगरलाद्यपगमविनाशदर्शनात्। कथमशरीरस्येश्वरस्य परप्रवर्तनरूपः संकल्प इति चेत्। न शरीरापेक्षः संकल्पः। शरीरस्य संकल्पहेतुत्वाभावात्। मन एव हि संकल्पहेतुः। तदभ्युपगतमीश्वरेपि। कार्यत्वेनैव ज्ञानशक्तिवन्मनसोपि प्राप्तत्वात्। मानसः संकल्पः सशरीरस्यैव। शरीरस्यैव समनस्कत्वादिति चेत्। मनसो नित्यत्वेन देहापगमेपि मनसः सद्भावेनानैकान्तिकत्वात्। अतो विचित्रावयवसंनिवेशविशेषतनुभुवनादिकार्यनिर्माणे पुण्यपापपरवशः परिमितशक्तिज्ञानः क्षेत्रज्ञो न प्रभवतीति निखिलभुवननिर्माणचतुरोचिन्त्यापरिमितज्ञानशक्त्यैश्वर्योशरीरः संकल्पमात्रसाधनपरिनिष्पन्नानन्तविस्तारविचित्ररचनप्रपञ्चः पुरुषविशेष ईश्वरोनुमानेन सिध्यति। अतः प्रमाणान्तरावसेयत्वाद्ब्रह्मणो नैतद्वाक्यं ब्रह्म प्रतिपादयति।

किं चात्यन्तभिन्नयोरेव मृद्द्रव्यकुलालयोर्निमित्तोपादानत्वदर्शनेनाकाशादेर्निरवयवद्रव्यस्य कार्यत्वानुपपत्त्या च नैकमेव ब्रह्म कृत्स्नस्य जगतो निमित्तमुपादानं च प्रतिपादयितुं शक्नोतीति।

एवं प्राप्ते ब्रूमः। यथोक्तलक्षणं ब्रह्म जगज्जन्मादिवाक्यं बोधयत्येव। कुतः। शास्त्रैकप्रमाणकत्वाद्ब्रह्मण.। यदुक्तं सावयव-

---

2 B om. गरल

3. B. reads अशरीर for अशरीरस्य.

7 B. C E read न after चेत्

8. C. E read मन for मनस.

9. C reads परवश for परवशः.

10. C. reads निपुण for चतुर.

13. B. C. E read एव after अनुमानेन.

18. E. om. जगत्.

http://acharya.org

त्वादिना कार्यं सर्वं जगत् । कार्यं च तदुचितकर्तृविशेषपूर्वकं दृष्टमिति निखिलजगन्निर्माणतदुपादानोपकरणवेदनचतुरः कश्चिदनुमेय इति । तदयुक्तम् । महीमहार्णवादीनां कार्यत्वेऽप्येकदैवैकेन निर्मिता इत्यत्र प्रमाणाभावात् । न चैकस्य घटस्येव सर्वेषामेकं कार्यत्वं येनैकदैवैकः कर्ता स्यात् । पृथग्भूतेषु कार्येषु कालभेदकर्तृभेददर्शनेन कर्तृकालैक्यनियमाभावात् । न च क्षेत्रज्ञानां विचित्रजगन्निर्माणाशक्त्या कार्यत्वबलेन तदतिरिक्तकल्पनायामनेककल्पनानुपपत्तेश्चैक एव कर्ता भवितुमर्हति । क्षेत्रज्ञानामेवोपचितपुण्यविशेषाणां शक्तिवैचित्र्यदर्शनेन तेषामेवातिशयितादृष्टसंभावनया च तत्तद्विलक्षणकार्यहेतुत्वसंभवात् । तदतिरिक्तात्यन्तादृष्टपुरुषकल्पनानुपपत्तेश्च । न च युगपत्सर्वोच्छित्तिः सर्वोत्पत्तिश्च प्रमाणपदवीमधिरोहतः । अदर्शनात् । क्रमेणैवोत्पत्तिविनाशदर्शनाच्च । कार्यत्वेन सर्वोत्पत्तिविनाशयोः कल्प्यमानयोर्दर्शनानुगुण्येन कल्पनायामपि विरोधाभावाच्च ।

अतो बुद्धिमदेककर्तृकत्वे साध्ये कार्यत्वस्यानैकान्त्य पक्षस्याप्रसिद्धविशेषणत्वं साध्यविकलता च दृष्टान्तस्य । सर्वनिर्माणचतुरस्यैकस्याप्रसिद्धेः । बुद्धिमत्कर्तृकत्वमात्रे सिद्धसाध्यता । सार्वज्ञ्यसर्वशक्तियुक्तस्य कस्यचिदेकस्य साधकमिदं कार्यत्वं किं युगपदुत्पद्यमानसर्ववस्तुगतमुत क्रमेणोत्पद्यमानसर्ववस्तुगतम् । युगपदुत्पद्यमानसर्ववस्तुगतत्वे कार्यत्वस्या-

---

8 B. reads एककर्ता for एक एव कर्ता, C reads एक. कर्ता.

11. C om. च after अनुपपत्ते..

18. B. E. read साध्ये after कर्तृकत्वमात्रे.

19 E. reads साधनता for साध्यता.

http://acharya.org

सिद्धिः । क्रमेणोत्पद्यमानसर्ववस्तुगतत्वेनैककर्तृकत्वसाधनाद्विरुद्धता । अत्राप्येककर्तृकत्वसाधने प्रत्यक्षानुमानविरोधश्च । शास्त्रविरोधश्च । कुम्भकारो जायते रथकारो जायत इत्यादिश्रवणात् ।

अपि च सर्वेषां कार्याणां शरीरादीनां सत्त्वादिगुणकार्यरूपसुखाद्यन्वयदर्शनेन सत्त्वादिमूलत्वमवश्यमाश्रयणीयम् । कार्यवैचित्र्यहेतुभूताः कारणगता विशेषाः सत्त्वादयः । तेषां कार्याणां तन्मूलत्वापादनं तद्युक्तपुरुषान्तःकरणविकारद्वारेण । पुरुषस्य च तद्योगः कर्ममूल इति कार्यविशेषारम्भायैव ज्ञानशक्तिवत्कर्तुः कर्मसंबन्धः कार्यहेतुत्वेनैवावश्याश्रयणीयः । ज्ञानशक्तिवैचित्र्यस्य कर्ममूलत्वात् । इच्छायाः कार्यारम्भहेतुत्वेपि विषयविशेषविशेषितायास्तस्याः सत्त्वादिमूलत्वेन कर्मसंबन्धोवर्जनीयः । अतः क्षेत्रज्ञा एव कर्तारो न तद्विलक्षणः कश्चिदनुमानात्सिध्यति । भवन्ति च प्रयोगाः । तनुभुवनादि क्षेत्रज्ञकर्तृकम् । कार्यत्वात् । घटादिवत् । ईश्वरः कर्ता न भवति । प्रयोजनशून्यत्वात् । मुक्तवत् । ईश्वरः कर्ता न भवति । अशरीरत्वात् । तद्वदेव । न च क्षेत्रज्ञानां स्वशरीराधिष्ठाने व्यभिचारः । तत्राप्यनादेः सू-

1. C. E read असिद्धता for असिद्धि, D reads असिद्धिता.
2. B. C. E om. च after अनुमानविरोधः
3. E reads च for जायते after रथकारः.
6. B. C. E read अवश्य for अवश्यम्.
7. B. reads कारणगत for कारणगताः.
9. B. reads इव for एव after आरम्भाय.
11. C. E. read च after वैचित्र्यस्य.
14. B. reads भवन for भुवन.
15. C. E. om. आदि after घट.

क्ष्मशरीरस्य सद्भावात् । विमतिविषयः कालो न लोकशून्यः । कालत्वात् । वर्तमानकालवत् ।

अपि च किमीश्वरः सशरीरोशरीरो वा कार्यं करोति । न तावदशरीरः । तस्य कर्तृत्वानुपलब्धेः । मानसान्यपि कार्याणि सशरीरस्यैव भवन्ति । मनसो नित्यत्वेप्यशरीरेषु मुक्तेषु तत्कार्यादर्शनात् । नापि सशरीरः । विकल्पासहत्वात् । तच्च शरीरं किं नित्यमनित्यं वा । न तावन्नित्यम् । सावयवस्य तस्य नित्यत्वेन जगतोपि नित्यत्वाविरोधादीश्वरासिद्धेः । नाप्यनित्यम् । तद्व्यतिरिक्तस्य तच्छरीरहेतोस्तदानीमभावात् । स्वयमेव हेतुरिति चेन्न । अशरीरस्य तदयोगात् । अन्येन शरीरेण सशरीर इति चेन्न । अनवस्थानात् ।

स किं सव्यापारो निर्व्यापारो वा । अशरीरत्वादेव न सव्यापारः । नापि निर्व्यापारः कार्यं करोति । मुक्तात्मवत् । कार्यं जगदिच्छामात्रव्यापारकर्तृकमित्युच्यमाने पक्षस्याप्रसिद्धविशेषणत्वं दृष्टान्तस्य च साध्यहीनता । अतो दर्शनानुगुण्येनेश्वरानुमानं दर्शनानुगुण्यपराहतमिति शास्त्रैकप्रमाणकः परब्रह्मभूतः सर्वेश्वरेश्वरः पुरुषोत्तमः । शास्त्रं तु सकलेतरप्रमाणपरिदृष्टसमस्तवस्तुविसजातीयं सार्वज्ञ्यसत्यसंकल्पत्वादिमिश्रानवधिकातिश-

---

1 B. C. om. सत् before भावात्.

2. B. C. E. read इति after कालवत्.

4. B. C. E. read अशरीरस्य for तस्य.

7. E. reads उत before अनित्यम्, B. om. तस्य; E. reads नित्यत्वे for नित्यत्वेन.

15. C. om. च; C. reads अनुमानसाधनम् for अनुमानम्.

17. C. E. om. ईश्वर.

http://acharya.org

यापरिमितोदारगुणसागरं निखिलहेयप्रत्यनीकस्वरूपं प्रतिपादयतीति न प्रमाणान्तरावसितवस्तुसाधर्म्यप्रयुक्तदोषगन्धप्रसङ्गः । यत्तु निमित्तोपादानयोरैक्यमाकाशादेर्निरवयवस्य द्रव्यस्य कार्यत्वं चानुपलब्धमशक्यप्रतिपादनमित्युक्तं तदप्यविरुद्धमिति प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् (ब्र. सू. १।४।२३)। न वियदश्रुतेः (ब्र. सू. २।३।१) इत्यत्र प्रतिपादयिष्यते । अतः प्रमाणान्तरागोचरत्वेन शास्त्रैकविषयत्वाद्यतो वा इमानि (तै. ३।१।१) इत्यादिवाक्यमुक्तलक्षणं ब्रह्म प्रतिपादयतीति सिद्धम्॥३॥

यद्यपि प्रमाणान्तरागोचरं ब्रह्म तथापि प्रवृत्तिनिवृत्तिपरत्वाभावेन सिद्धरूपं ब्रह्म न शास्त्रं बोधयतीत्याशङ्क्याह ।

तत्तु समन्वयात् ॥ ४ ॥

प्रसक्ताशङ्कानिवृत्त्यर्थस्तुशब्दः । तच्छास्त्रप्रमाणकत्वं ब्रह्मणः संभवत्येव । कुतः । समन्वयात् । पुरुषार्थतयान्वयः समन्वयः । परमपुरुषार्थभूतस्य ब्रह्मणोभिधेयतयान्वयात् । एवमेव समन्वितो ह्यौपनिषदः पदसमुदायो यतो वा इमानि भूतानि जायन्ते (तै. ३।१।१) । सदेव सोम्येदमग्र आसीत् । एकमेवाद्वितीयम् । तदैक्षत बहु स्यां प्रजायेयेति । तत्तेजोसृजत (छा. ६।२।२-३) । ब्रह्म वा इदमेकमेवाग्र आसीत् (बृ.

---

1. B. reads अखिल for निखिल.
2. C. reads सामर्थ्य for साधर्म्य.
3. C. reads च after द्रव्यस्य.
4. C. om. अपि.
8. B. C. om. आदि after इति.
9. B. om. ब्रह्म after अगोचरम्.
10. B. C. E. read प्रतिपादयति for बोधयति.
13. E. reads परम before पुरुषार्थतया.
14. B. E. read एव after पुरुषार्थभूतस्य.

http://acharya.org

१।४।१०)। आत्मा वा इदमेक एवाग्र आसीत् (ऐ. १।१)। तस्माद्वा एतस्मादात्मन आकाशः संभूतः (तै. २।१।१)। एको ह वै नारायण आसीत् (म. १)। सत्यं ज्ञानमनन्तं ब्रह्म (तै. २।१।१)। आनन्दो ब्रह्म (तै. ३।६।१) इत्येवमादिः। न च व्युत्पत्तिसिद्धपरिनिष्पन्नवस्तुप्रतिपादनसमर्थानां पदसमुदायानामखिलजगदुत्पत्तिविनाशहेतुभूताशेषदोषप्रत्यनीकापरिमितोदारगुणसागरानवधिकातिशयानन्दस्वरूपे ब्रह्मणि समन्वितानां प्रवृत्तिनिवृत्तिरूपप्रयोजनविरहादन्यपरत्वम्। स्वविषयावबोधपर्यवसायित्वात्सर्वप्रमाणानाम्। न च प्रयोजनानुगुणा प्रमाणप्रवृत्तिः। प्रयोजनं हि प्रमाणानुगुणम्। न च प्रवृत्तिनिवृत्त्यन्वयविरहिणः प्रयोजनशून्यत्वम्। पुरुषार्थान्वयप्रतीतेः। तथा स्वरूपपरेष्वपि पुत्रस्ते जातो नायं सर्प इत्यादिषु हर्षभयनिवृत्तिरूपप्रयोजनवत्त्वं दृष्टम्।

अत्राह। न वेदान्तवाक्यानि ब्रह्म प्रतिपादयन्ति। प्रवृत्तिनिवृत्त्यन्वयविरहिणः शास्त्रस्यानर्थक्यात्। यद्यपि प्रत्यक्षादीनि वस्तुयाथात्म्यावबोधे पर्यवस्यन्ति तथापि शास्त्रं प्रयोजनपर्यवसाय्येव। न हि लोकवेदयोः प्रयोजनरहितस्य कस्यचिदपि वाक्यस्य प्रयोग उपलब्धचरः। न च किंचित्प्रयोजनमनुद्दिश्य वाक्यप्रयोगः श्रवणं वा संभवति। तच्च प्रयोजनं प्रवृत्तिनिवृत्तिसाध्येष्टानिष्टप्राप्तिपरिहारात्मकमुपलब्धम्। अर्थार्थी राजकुलं गच्छेत्। मन्दाग्निर्नाम्बु पिबेत्। स्वर्गकामो यजेत। न कलञ्जं भक्षयेदित्यादिषु।

यत्पुनः सिद्धवस्तुपरेष्वपि पुत्रस्ते जातो नायं सर्पो रज्जुरे-

6. B. C E. read स्थिति after उत्पत्ति.

19. C. reads प्रयोग for प्रयोगः.

http://acharya.org

षेत्यादिषु हर्षभयादिनिवृत्तिरूपपुरुषार्थान्वयो दृष्ट इत्युक्तं तत्र किं पुत्रजन्माद्यर्थात्पुरुषार्थावाप्तिरुत तज्ज्ञानादिति विवेचनीयम् । सतोप्यर्थस्याज्ञातस्यापुरुषार्थत्वेन तज्ज्ञानादिति चेत् । तर्ह्यसत्यप्यर्थे ज्ञानादेव पुरुषार्थः सिध्यतीत्यर्थपरत्वाभावेन प्रयोजनपर्यवसायिनोपि शास्त्रस्य नार्थसद्भावे प्रामाण्यम् । तस्मात्सर्वत्र प्रवृत्तिनिवृत्तिपरत्वेन ज्ञानपरत्वेन वा प्रयोजनपर्यवसानमिति कस्यापि वाक्यस्य परिनिष्पन्ने वस्तुनि तात्पर्यासंभवान्न वेदान्ताः परिनिष्पन्नं ब्रह्म प्रतिपादयन्ति ।

अत्र कश्चिदाह । वेदान्तवाक्यान्यपि कार्यपरतयैव ब्रह्मणि प्रमाणभावमनुभवन्ति । कथम् । निष्प्रपञ्चमद्वितीयं ज्ञानैकरसं ब्रह्मानाद्यविद्यया सप्रपञ्चतया प्रतीयमानं निष्प्रपञ्चं कुर्यादिति ब्रह्मणः प्रपञ्चविलयद्वारेण विधिविषयत्वमिति । कोसौ द्रष्टृदृश्यरूपप्रपञ्चविलयद्वारेण साध्यज्ञानैकरसब्रह्मविषयो विधिः। न दृष्टेर्द्रष्टारं पश्येः...न मतेर्मन्तारं मन्वीथाः (बृ. ३।४।२) इत्येवमादिः । द्रष्टृदृश्यभेदशून्यं दृशिमात्रं ब्रह्म कुर्यादित्यर्थः । स्वतःसिद्धस्यापि ब्रह्मणो निष्प्रपञ्चतारूपेण साध्यत्वमविरुद्धमिति ।

तदयुक्तम् । नियोगवाक्यार्थवादिना हि नियोगो नियोज्यविशेषणं विषयः करणमितिकर्तव्यता प्रयोक्ता च वक्तव्याः । तत्र हि नियोज्यविशेषणमनुपादेयम् । तच्च निमित्तं फलमिति द्विधा । अत्र किं नियोज्यविशेषणं तच्च किं निमित्तं फलं वेति

1. B. C. om आदि after भय.
10. E. reads प्रमाणत्वम् for प्रमाणभावम्, C. om. अद्वितीयम्.
16. E. reads कार्यत्वम् for साध्यत्वम्.
19. C reads वक्तव्यः for वक्तव्याः.
20. C. om हि after तत्र.
21. B. om. वा after फलम्.

http://acharya.org

विवेचनीयम् । ब्रह्मस्वरूपयाथात्म्यानुभव इति चेत् । तर्हि न तन्निमित्तम् । जीवनादिवदस्यासिद्धत्वात् । निमित्तत्वे च तस्य नित्यत्वेनापवर्गोत्तरकालमपि जीवननिमित्ताग्निहोत्रादिवन्नित्यं तद्विषयानुष्ठानप्रसङ्गः । नापि फलम् । नैयोगिकफलत्वेन स्वर्गादिवदनित्यत्वप्रसङ्गात् । कश्चात्र नियोगविषयः । ब्रह्मैवेति चेन्न । तस्य नित्यत्वेनाभव्यरूपत्वात् । अभावार्थत्वाच्च । निष्प्रपञ्चं ब्रह्म साध्यमिति चेत् । साध्यत्वेपि फलत्वमेव । अभावार्थत्वान्न विधिविषयत्वम् । साध्यत्वं च कस्य । किं ब्रह्मण उत प्रपञ्चनिवृत्तेः । न तावद्ब्रह्मणः । सिद्धत्वादनित्यत्वप्रसक्तेश्च । अथ प्रपञ्चनिवृत्तेः । न तर्हि ब्रह्मणः साध्यत्वम् । प्रपञ्चनिवृत्तिरेव विधिविषय इति चेन्न । तस्याः फलत्वेन विधिविषयत्वायोगात् । प्रपञ्चनिवृत्तिरेव हि मोक्षः । स च फलम् । अस्य च नियोगविषयत्वे नियोगात्प्रपञ्चनिवृत्तिः प्रपञ्चनिवृत्त्या नियोग इतीतरेतराश्रयत्वम् ।

अपि च किं निवर्तनीयः प्रपञ्चो मिथ्यारूपः सत्यो वा । मिथ्यारूपत्वे ज्ञाननिवर्त्यत्वादेव नियोगेन न किंचित्प्रयोजनम् । नियोगस्तु निवर्तकज्ञानमुत्पाद्य तद्द्वारेण प्रपञ्चस्य निवर्तक इति चेत् । तत्त्ववाक्यादेव जातमिति न नियोगेन प्रयोजनम् । वाक्यार्थज्ञानादेव ब्रह्मव्यतिरिक्तस्य कृत्स्नस्य मिथ्याभूतस्य प्रपञ्चस्य बाधितत्वात्सपरिकरस्य नियोगस्यासिद्धिश्च ।

---

1. B. C. E read चेन्नियोज्यविशेषणम् for इति चेत्.
2 B. C. E. read तस्य for अस्य.
6. B. reads अभाव्य for अभव्य.
7. B. om. अपि.
8. B reads, नियोग before साध्यत्वम्.
20. C. reads सपरिकर for सपरिकरस्य. B. reads असिद्धेः for असिद्धिः.

http://acharya.org

प्रपञ्चस्य निवर्तको नियोगः किं ब्रह्मस्वरूपमेवोत तद्व्यतिरिक्तः । यदि ब्रह्मस्वरूपमेव निवर्तकं नित्यतया निवर्त्यप्रपञ्चसद्भाव एव न संभवति । नित्यत्वेन च नियोगस्य विषयानुष्ठानसाध्यत्वं च न घटते । अथ ब्रह्मस्वरूपव्यतिरिक्तस्तस्य कृत्स्नप्रपञ्चनिवृत्तिरूपविषयानुष्ठानसाध्यत्वेन प्रयोक्ता च न दृष्ट इत्याश्रयाभावादसिद्धिः । प्रपञ्चनिवृत्तिरूपविषयानुष्ठानेनैव ब्रह्मस्वरूपव्यतिरिक्तस्य कृत्स्नस्य निवृत्तत्वान्न नियोगनिष्पाद्यं मोक्षाख्यं फलम् ।

किं च प्रपञ्चनिवृत्तेर्नियोगकरणस्येतिकर्तव्यताभावादनुपकृतस्य च करणत्वायोगान्न करणत्वम् । कथमितिकर्तव्यताभाव इति चेत् । इत्थम् । अस्येतिकर्तव्यता भावरूपाभावरूपा वा । भावरूपा च करणशरीरनिष्पत्तितदनुग्रहकार्यभेदभिन्ना । उभयविधा च न संभवति । न हि मुद्गराभिघातादिवत्कृत्स्नप्रपञ्चनिवर्तकः कोपि दृश्यत इति दृष्टार्थो न संभवति । नापि निष्पन्नस्य करणस्य कार्योत्पत्तावनुग्रहः संभवति । अनुग्राहकांशसद्भावेन कृत्स्नप्रपञ्चनिवृत्तिरूपकरणस्वरूपासिद्धेः । ब्रह्मणोद्वितीयत्वज्ञानं प्रपञ्चनिवृत्तिरूपकरणशरीरं निष्पादयतीति चेत् । तेनैव प्रपञ्चनिवृत्तिरूपो मोक्षः सिद्ध इति न करणादिनिष्पाद्यमवशिष्यत इति पूर्वमेवोक्तम् । अभावरूपत्वे चाभाव-

---

1. B. C. E read प्रपञ्चस्य निवर्त्यत्वे before प्रपञ्चस्य.

2. B. C. read निवर्तक for निवर्तकम्.

5. C. om. निवृत्ति, B. C. D. E read नष्टः for न दृष्टः.

7. C reads नियोगेन for नियोग.

13. B. reads आघात for अभिघात.

14. B. C. read कृत्स्नस्य प्रपञ्चस्य for कृत्स्नप्रपञ्च..

18. B. reads निवृत्तिरूप for निवृत्तिरूपः.

19. C. reads अभावात् for अभावत्वात्.

http://acharya.org

त्वादेव न करणशरीरं निष्पादयति । नाप्यनुग्रहम् । अतो निष्प्रपञ्चब्रह्मविषयो विधिर्न संभवति ।

अन्योप्याह । यद्यपि वेदान्तवाक्यानां न परिनिष्पन्नब्रह्मस्वरूपपरतया प्रामाण्यं तथापि ब्रह्मस्वरूपं सिध्यत्येव । कुतः । ध्यानविधिसामर्थ्यात् । एवमेव हि समामनन्ति । आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः (बृ.२।४।५) । य आत्मापहतपाप्मा....सोन्वेष्टव्यः स विजिज्ञासितव्यः (छा. ८।७।१)। आत्मेत्येवोपासीत (बृ. १।४।७) ।आत्मानमेव लोकमुपासीत (बृ. १।४।१५) इति । अत्र ध्यानविषयो हि नियोगः स्वविषयभूतं ध्यानं ध्येयैकनिरूपणीयमिति ध्येयमाक्षिपति । स च ध्येयः स्ववाक्यनिर्दिष्ट आत्मा । स किंरूप इत्यपेक्षायां तत्स्वरूपविशेषसमर्पणद्वारेण सत्यं ज्ञानमनन्तं ब्रह्म (तै. २।१।१) । सदेव सोम्येदमग्र आसीत् । एकमेवाद्वितीयम् (छा. ६।२।१) इत्येवमादीनां वाक्यानां ध्यानविधिशेषतया प्रामाण्यमिति विधिविषयभूतध्यानशरीरानुप्रविष्टब्रह्मस्वरूपेपि तात्पर्यमस्त्येव। अत एकमेवाद्वितीयम् (छा. ६।२।१)। तत्सत्यं स आत्मा (छा. ६। ८।७) । नेह नानास्ति किंचन (बृ. ४।४।१९) इत्येवमादिभिर्ब्रह्मस्वरूपमेकमेव सत्यं तद्व्यतिरिक्तं सर्वं मिथ्येत्यवगम्यते । प्रत्यक्षादिभिर्भेदावलम्बिना च कर्मशास्त्रेण भेदः प्रतीयते । भेदाभेदयोः परस्परविरोधे सत्यनाद्यविद्यामूलत्वेनापि भेदप्रतीत्युपपत्तेरभेद एव परमार्थ इति निश्चीयते । तत्र ब्रह्मध्याननियोगेन तत्साक्षात्कारफलेन निरस्तसमस्ताविद्याकृतविविधभे-

1. B C. read अनुग्राहकम् for अनुग्रहम्.

10. E. reads स्वविषयभूत for स्वविषयभूत.

16. C. reads तत्त्वमसि श्वेतकेतो after आत्मा.

17. B. C. E. om. एवम्.

18. B. reads अतिरिक्तम् for व्यतिरिक्तम्.

http://acharya.org

दाद्वितीयज्ञानैकरसब्रह्मभावरूपो मोक्षः प्राप्यते । न च वाक्यार्थज्ञानमात्रेण ब्रह्मभावसिद्धिः । अनुपलब्धेः । विविधभेददर्शनानुवृत्तेश्च । तथा सति श्रवणादिविधानमनर्थकं स्यात् ।

अथोच्येत । रज्जुरेषा न सर्प इत्युपदेशेन सर्पभयनिवृत्तिदर्शनाद्रज्जुसर्पवद्बन्धस्य च मिथ्यारूपत्वेन ज्ञानबाध्यतया तस्य वाक्यजन्यज्ञानेनैव निवृत्तिर्युक्ता न नियोगेन । नियोगसाध्यत्वे मोक्षस्यानित्यत्वं स्यात्स्वर्गादिवत् । मोक्षस्य नित्यत्वं हि सर्ववादिसंप्रतिपन्नम् । किं च धर्माधर्मयोः फलहेतुत्वं स्वफलानुभवानुगुणशरीरोत्पादनद्वारेणेति ब्रह्मादिस्थावरान्तचतुर्विधशरीरसंबन्धरूपसंसारफलत्वमवर्जनीयम् । तस्मान्न धर्मसाध्यो मोक्षः । तथा च श्रुतिः न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति । अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः (छा. ८।१२।१) इति ।अशरीरत्वरूपे मोक्षे धर्माधर्मसाध्यप्रियाप्रियविरहश्रवणान्न धर्मसाध्यमशरीरत्वमिति विज्ञायते । न च नियोगविशेषसाध्यफलविशेषवद्ज्ञाननियोगसाध्यमशरीरत्वम् । अशरीरत्वस्य स्वरूपत्वेनासाध्यत्वात् । यथाहुः श्रुतयः

अशरीरं शरीरेष्वनवस्थेष्ववस्थितम् ।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥

(का. १।२।२२)

अप्राणो ह्यमनाः शुभ्रः (मु. २।१।२) । असङ्गो ह्ययं पुरुषः (बृ. ४।३।१५) इत्याद्याः । अतोऽशरीरत्वरूपो मोक्षो नित्य इति न धर्माधर्मसाध्यः । तथा च श्रुतिः

---

1. C. reads ब्रह्मात्मभावरूपः for ब्रह्मभावरूप, B. C. E. read वाक्याद् before वाक्यार्थ.
3. E. reads च after तथा.
5 B. om. च; E. reads अपि for च.
14. B. C. read ज्ञायते for विज्ञायते.
21. C. reads अपि after मोक्षः.
22. C. E. om. अधर्म.

http://acharya.org

अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्।
अन्यत्र भूताद्भव्याच्च यत्तत्पश्यसि तद्वद ॥

(का. १।२।१४) इति।

अपि चोत्पत्तिप्राप्तिविकृतिसंस्कृतिरूपेण चतुर्विधं हि साध्यत्वं मोक्षस्य न संभवति। न तावदुत्पाद्यः। मोक्षस्य ब्रह्मस्वरूपत्वेन नित्यत्वात्। नापि प्राप्यः। आत्मस्वरूपत्वेन ब्रह्मणो नित्यप्राप्तत्वात्। नापि विकार्यः। दध्यादिवदनित्यत्वप्रसङ्गात्। नापि संस्कार्यः। संस्कारो हि दोषापनयनेन वा गुणाधानेन वा साध्यते। न तावद्दोषापनयनेन। नित्यशुद्धत्वाद्ब्रह्मणः। नाप्यतिशयाधानेन। अनाधेयातिशयस्वरूपत्वात्। नित्यनिर्विकारत्वेन स्वाश्रयायाः पराश्रयायाश्च क्रियाया अविषयतया न निघर्षणेनादर्शादिवदपि संस्कार्यत्वम्। न च देहस्थया स्नानादिक्रिययात्मा संस्क्रियते। किं त्वविद्यागृहीतस्तत्संगतोहंकर्ता। तत्फलानुभवोपि तस्यैव। न चाहंकर्तैवात्मा। तत्साक्षित्वात्। तथा च मन्त्रवर्णः।

तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्न्योभिचाकशीति।

(मु. ३।१।१)

आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः। (का. १।३।४)

एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च॥

(श्वे. ६।११)

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम्। कविर्मनीषी (ई. ८) इति चाविद्यागृहीतादहंकर्तुरात्मनः

---

7 B. reads एव after प्रसङ्गात्.

9. D. E read साधयति for साध्यते.

23. B. C. E. om. कविर्मनीषी; E. reads आत्म for आत्मनः.

स्वरूपमनाधेयातिशयं नित्यशुद्धं निर्विकारं निष्कृष्यते । तस्मादात्मस्वरूपत्वेन न साध्यो मोक्ष. । यद्येवं किं वाक्यार्थज्ञानेन क्रियत इति चेत् । मोक्षप्रतिबन्धनिवृत्तिमात्रमिति ब्रूमः । तथा च श्रुतयस्त्वं हि नः पिता योस्माकमविद्यायाः परं पारं तारयसि (प्र. ६।८) । श्रुतं ह्येवमेव भगवद्दृशेभ्यस्तरति शोकमात्मविदिति । सोहं भगवः शोचामि । तं मां भगवाञ्छोकस्य पारं तारयतु (छा. ७।१।३) । तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान्त्सनत्कुमारः (छा. ७।२६।२) इत्याद्याः । तस्मान्नित्यस्यैव मोक्षस्य प्रतिबन्धनिवृत्तिर्वाक्यार्थज्ञानेन क्रियते । तन्निवृत्तिस्तु साध्यापि प्रध्वंसाभावरूपा न विनश्यति । ब्रह्म वेद ब्रह्मैव भवति (मु. ३।२।९) । तमेव विदित्वाति मृत्युमेति (श्वे. ३।८) इत्यादिवचनं मोक्षस्य वेदनानन्तरभावितां प्रतिपादयन्नियोगव्यवधानतां प्रतिरुणद्धि । न च विदिक्रियाकर्मत्वेन ध्यानक्रियाकर्मत्वेन वा कार्यानुप्रवेशः । उभयकर्मत्वप्रतिषेधात् ।

अन्यदेव तद्विदितादथो अविदितादधि । (के. १।१।३)
येनेदं सर्वं विजानाति तत्केन विजानीयात् (बृ. २।४।१४) इति ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते । (के. १।१।४)

इति च । न चैतावता शास्त्रस्य निर्विषयत्वम् । अविद्यापरिकल्पितभेदनिवृत्तिपरत्वाच्छास्त्रस्य । न हीदंतया ब्रह्म विषयीकरोति शास्त्रम् । अपि त्वविषयं प्रत्यगात्मस्वरूपं प्रतिपादयदविद्याकल्पितज्ञातृज्ञेयज्ञानविभागं निवर्तयति । तथा च शास्त्रं न दृष्टेर्द्रष्टारं पश्येः....न मतेः (बृ. ३।४।२) इत्येवमादि ।

---

10 C om तत् before निवृत्ति.

13 B C. E read व्यवधानम् for व्यवधानताम्.

18 B C om परि.

21. B E. read ज्ञानज्ञेय for ज्ञेयज्ञान, C. reads इति after निवर्तयति.

http://acharya.org

न च ज्ञानादेव बन्धनिवृत्तिरिति श्रवणादिविध्यानर्थक्यम् । स्वभावप्रवृत्तसकलेतरविकल्पविमुखीकरणद्वारेण वाक्यार्थावगतिहेतुत्वात्तेषाम् । न च ज्ञानमात्राद्बन्धनिवृत्तिर्न दृष्टेति वाच्यम् । बन्धस्य मिथ्यारूपत्वेन ज्ञानोत्तरकालं स्थित्यनुपपत्तेः । अत एव न शरीरपातादूर्ध्वमेव बन्धनिवृत्तिरिति वक्तुं युक्तम् । न हि मिथ्यारूपसर्पभयनिवृत्ती रज्जुयाथात्म्यज्ञानातिरेकेण सर्पविनाशमपेक्षते । यदि शरीरसंबन्धः पारमार्थिकस्तर्हि तद्विनाशापेक्षा । स तु ब्रह्मव्यतिरिक्ततया न पारमार्थिकः । यस्य तु बन्धो न निवृत्तस्तस्य ज्ञानमेव न जातमित्यवगम्यते । ज्ञानकार्यादर्शनात् । तस्माच्छरीरस्थितिर्भवतु वा मा वा वाक्यार्थज्ञानसमनन्तरं मुक्त एवासौ । अतो न नियोगसाध्यो मोक्ष इति न ध्यानविधिशेषतया ब्रह्मणः सिद्धिः । अपि तु सत्यं ज्ञानमनन्तं ब्रह्म (तै. २।१।१)। तत्त्वमसि (छा. ६।८।७)। अयमात्मा ब्रह्म (बृ. २।५।१९) इति तत्परेणैव पदसमुदायेन सिध्यतीति ।

तदयुक्तम् । वाक्यार्थज्ञानमात्राद्बन्धनिवृत्त्यनुपपत्तेः । यद्यपि मिथ्यारूपो बन्धो ज्ञानबाध्यस्तथापि बन्धस्यापरोक्षत्वान्न परोक्षरूपेण वाक्यार्थज्ञानेन स बाध्यते । रज्ज्वादावपरोक्षसर्पप्रतीतौ विद्यमानायां नायं सर्पो रज्जुरेषेत्याप्तोपदेशजनितपरोक्षसर्पविपरीतज्ञानमात्रेण भयानिवृत्तिदर्शनात् । आप्तोपदेशस्य तु भयनिवृत्तिहेतुत्वं वस्तुयाथात्म्यापरोक्षनिमित्तप्रवृत्तिहेतुत्वेन । तथा हि । रज्जुसर्पदर्शनभयात्परावृत्तः पुरुषो नायं सर्पो र-

7. B. reads तदा हि for तर्हि.

10. E om. वा after भवतु.

11. B C. E read ध्यान before नियोग.

19 B C read वर्तमानायाम् for विद्यमानायाम्.

http://acharya.org

ज्जुरेषेत्याप्तोपदेशाद्वस्तुयाथात्म्यदर्शने प्रवृत्तस्तदेव प्रत्यक्षेण दृष्ट्वा भयान्निवर्तते । न च शब्द एव प्रत्यक्षज्ञानं जनयतीति वक्तुं युक्तम् । तस्यानिन्द्रियत्वात् । ज्ञानसामग्रीष्विन्द्रियाण्येवापरोक्षज्ञानसाधनानि । न चास्यानभिसंहितफलकर्मानुष्ठानमृदितकषायस्य श्रवणमनननिदिध्यासनविमुखीकृतबाह्यविषयस्य पुरुषस्य वाक्यमेवापरोक्षज्ञानं जनयति । निवृत्तप्रतिबन्धे तत्परेपि पुरुषे ज्ञानसामग्रीविशेषाणामिन्द्रियादीनां स्वविषयनियमातिक्रमादर्शनेन तदयोगात् ।

न च ध्यानस्य वाक्यार्थज्ञानोपायता । इतरेतराश्रयत्वात् । वाक्यार्थज्ञाने जाते तद्विषयध्यानं ध्याने निर्वृत्ते वाक्यार्थज्ञानमिति । न च ध्यानवाक्यार्थज्ञानयोर्भिन्नविषयत्वम् । तथा सति ध्यानस्य वाक्यार्थज्ञानोपायता न स्यात् । न ह्यन्यध्यानमन्यज्ञानौन्मुख्यमुत्पादयति । ज्ञातार्थस्मृतिसंततिरूपस्य ध्यानस्य वाक्यार्थज्ञानपूर्वकत्वमवर्जनीयम् । ध्येयब्रह्मविषयज्ञानस्य हेत्वन्तरासंभवात् । न च ध्यानमूलं ज्ञानं वाक्यान्तरजन्यं निवर्तकज्ञानं तत्त्वमस्यादिवाक्यजन्यमिति युक्तम् । ध्यानमूलमिदं वाक्यान्तरजन्यं ज्ञानं तत्त्वमस्यादिवाक्यजन्यज्ञानेनैकविषयं भिन्नविषयं वा । एकविषयत्वे तदेवेतरेतराश्रयत्वम् । भिन्नविष-

---

1. B. C read उपदेशेन तत् for उपदेशात्, E. reads तत् before वस्तु.
3. B. reads युक्त वक्तुम् for वक्तु युक्तम्, C. reads साधनेषु for सामग्रीषु; C reads हि after इन्द्रियाण्येव.
4. E om ज्ञान before साधनानि
6 B. reads निवृत्ते for निवृत्त.
7. B. om. आदि
12 B. C. read अन्यस्य for अन्यज्ञान; E om. ज्ञान after अन्य.
15. C. reads निवर्तकम् for निवर्तक.

http://acharya.org

यत्वे ध्यानेन तदौन्मुख्यापादनासंभवः । किं च ध्यानस्य ध्येयध्यात्राद्यनेकप्रपञ्चापेक्षत्वान्निष्प्रपञ्चब्रह्मात्मैकत्वविषयवाक्यार्थज्ञानोत्पत्तौ दृष्टद्वारेण नोपयोग इति वाक्यार्थज्ञानमात्रादविद्यानिवृत्तिं वदतः श्रवणमनननिदिध्यासनविधीनामानर्थक्यमेव ।

यतो वाक्यादपरोक्षज्ञानासंभवाद्वाक्यार्थज्ञानेनाविद्या न निवर्तते तत एव जीवन्मुक्तिरपि दूरोत्सारिता । का चेयं जीवन्मुक्तिः । सशरीरस्यैव मोक्ष इति चेन्माता मे वन्ध्येतिवदसंगतार्थवचनम् । यतः सशरीरत्वं बन्धोऽशरीरत्वमेव मोक्ष इति त्वयैव श्रुतिभिरुपपादितम् । अथ सशरीरत्वप्रतिभासे वर्तमाने यस्यायं प्रतिभासो मिथ्येति प्रत्ययस्तस्य सशरीरत्वनिवृत्तिरिति । न । मिथ्येति प्रत्ययेन सशरीरत्वं निवृत्तं चेत्कथं सशरीरस्य मुक्तिः । अजीवतोपि मुक्तिः सशरीरत्वमिथ्याप्रतिभासनिवृत्तिरेवेति कोयं जीवन्मुक्त इति विशेषः । अथ सशरीरत्वप्रतिभासो बाधितोपि यस्य द्विचन्द्रज्ञानवदनुवर्तते स जीवन्मुक्त इति चेन्न । ब्रह्मव्यतिरिक्तसकलवस्तुविषयकत्वाद्बाधकज्ञानस्य । कारणभूताविद्याकर्मादिदोषः सशरीरत्वप्रतिभासेन सह तेनैव बाधित इति बाधितानुवृत्तिर्न शक्यते वक्तुम् । द्विचन्द्रादौ तु तत्प्रतिभासहेतुभूतदोषस्य बाधकज्ञानविषयीभूतचन्द्रैकत्वज्ञानाविषयत्वेनाबाधितत्वाद्द्विचन्द्रप्र-

---

5 C om. न.

8 C. reads असगतार्थ वच for असगतार्थवचनम्, E. reads असगतार्थम् for असगतार्थं, E. om एव after अशरीरत्वम्.

11 B reads चेत् after निवृत्तिरिति

12. C. reads अतोजीवतः for अजीवतः.

13. B. C. read मुक्ति. for मुक्त..

15 C. E om. वस्तु; B. C. read विषय for विषयक.

18 C. E. read ज्ञान after द्विचन्द्र.

19. B. C. E om. विषयी, B. reads एकत्वम् for एकत्व.

http://acharya.org

तिभासानुवृत्तिर्युक्ता । किं च तस्य तावदेव चिरं यावन्न विमोक्ष्येथ संपत्स्ये (छा. ६।१४।२) इति सद्विद्यानिष्ठस्य शरीरपातमात्रमपेक्षते मोक्ष इति वदन्तीयं श्रुतिर्जीवन्मुक्तिं वारयति । सैषा जीवन्मुक्तिरापस्तम्बेनापि निरस्ता वेदानिमं लोकममुं च परित्यज्यात्मानमन्विच्छेत् । बुद्धे क्षेमप्रापणम् । तच्छास्त्रैर्विप्रतिषिद्धम् । बुद्धे चेत्क्षेमप्रापणमिहैव न दुःखमुपलभेत । एतेन परं व्याख्यातम् (आ. ध. सू. २।९।२१।१३-१७) इति । अनेन ज्ञानमात्रान्मोक्षश्च निरस्तः । अतः सकलभेदनिवृत्तिरूपा मुक्तिर्जीवतो न संभवति ।

तस्माद्ध्याननियोगेन ब्रह्मापरोक्षज्ञानफलेनैव बन्धनिवृत्तिः । न चैवं नियोगसाध्यत्वेन मोक्षस्यानित्यत्वप्रसक्तिः । प्रतिबन्धनिवृत्तिमात्रस्यैव साध्यत्वात् । किं च न नियोगेन साक्षाद्बन्धनिवृत्तिः क्रियते । किं तु निष्प्रपञ्चज्ञानैकरसब्रह्मापरोक्षज्ञानेन । नियोगस्तु तदपरोक्षं ज्ञानं जनयति । कथं नियोगस्य ज्ञानोत्पत्तिहेतुत्वमिति चेत् । कथं वा भवतोनभिसंहितफलानां कर्मणां वेदनोत्पत्तिहेतुत्वम् । मनोनैर्मल्यद्वारेणेति चेत् । ममापि तथैव । मम तु निर्मले मनसि शास्त्रेण ज्ञानमुत्पाद्यते । तव तु नियोगेन मनसि निर्मले ज्ञानसामग्री वक्तव्येति चेत् । ध्याननियोगनिर्मलं मन एव साधनमिति ब्रूमः । केनावगम्यत इति चेत् । भवतो वा कर्मभिर्मनो निर्मलं भवति निर्मले मनसि श्रवणमनननिदिध्यासनैः सकलेतरविषयविमुखस्यैव शास्त्रं नि-

---

4. B. reads विद्वान् for वेदान्.

11. E reads साध्यत्वे for साध्यत्वेन.

14. B C. read अपरोक्ष for अपरोक्षम्.

17. B. reads उत्पद्यते for उत्पाद्यते, C. om. तु after तव.

http://acharya.org

वर्तकज्ञानमुत्पादयतीति केनावगम्यते। विविदिषन्ति यज्ञेन दानेन तपसानाशकेन (बृ. ४।४।२२)। श्रोतव्यो मन्तव्यो निदिध्यासितव्यः (बृ. २।४।५)। ब्रह्म वेद ब्रह्मैव भवति (मु. ३।२।९) इत्यादिभिः शास्त्रैरिति चेत्। ममापि श्रोतव्यो मन्तव्यो निदिध्यासितव्यः (बृ. २।४।५)। ब्रह्मविदाप्नोति परम् (तै. २।१।१)। न चक्षुषा गृह्यते नापि वाचा (मु. ३।१।८)। मनसा तु विशुद्धेन। हृदा मनीषा मनसाभिक्लृप्तः (का. ६।९) इत्यादिभिः शास्त्रैर्ध्याननियोगेन मनो निर्मलं भवति। निर्मलं च मनो ब्रह्मापरोक्षज्ञानं जनयतीत्यवगम्यत इति निरवद्यम्। नेदं यदिदमुपासते (के. ४) इत्युपास्यत्वं प्रतिषिद्धमिति चेत्। मैवम्। नात्र ब्रह्मण उपास्यत्वं प्रतिषिध्यते। अपि तु ब्रह्मणि जगद्वैरूप्यं प्रतिपाद्यते। यदिदं जगदुपासते प्राणिनो नेदं ब्रह्म तदेव ब्रह्म त्वं विद्धि यद्वाचानभ्युदितं येन वागभ्युद्यत इति वाक्यार्थः। अन्यथा तदेव ब्रह्म त्वं विद्धि (के. ४) इति विरुध्यते। ध्यानविधिवैयर्थ्यं चात्मनः स्यात्। अतो ब्रह्मसाक्षात्कारफलेन ध्याननियोगेनैवापरमार्थभूतस्य कृत्स्नस्य द्रष्टृदृश्यादिप्रपञ्चरूपबन्धस्य निवृत्तिः।

यदपि कैश्चिदुक्तं भेदाभेदयोर्विरोधो न विद्यत इति। तदयुक्तम्। न हि शीतोष्णतमःप्रकाशादिवद्भेदाभेदावेकस्मिन्वस्तुनि संगच्छेते।

अथोच्येत। सर्वमेव हि वस्तुजातं प्रतीतिव्यवस्थाप्यम्। सर्वं च भिन्नाभिन्नं प्रतीयते। कारणात्मना जात्यात्मना चाभिन्नं कार्यात्मना व्यक्त्यात्मना च भिन्नम्। छायातपादिषु विरोधः

11. B C. E. read नैवम् for मैवम्; B. C read ब्रह्मण for ब्रह्मणि.

15. E reads विरुध्येत for विरुध्यते.

18. C. reads न विरोधः for विरोधो न.

सहानवस्थानानियमलक्षणो भिन्नाधारत्वरूपश्च । कार्यकारणयोर्जातिव्यक्तयोश्च तदुभयमपि नोपलभ्यते । प्रत्युतैकमेव वस्तु द्विरूपं प्रतीयते । यथा मृदयं घटः षण्डो गौरिति । न चैकरूपं किंचिदपि वस्तु लौकिकैर्दृष्टचरम् । न च तृणादेर्ज्वलनादिवद्भेदो भेदोपमर्दी दृश्यत इति न वस्तुविरोधः । मृत्सुवर्णगवाश्वाद्यात्मनावस्थितस्यैव घटमुकुटषण्डमुण्डगवाद्यात्मना चावस्थानात् । न चाभिन्नस्य भिन्नस्य च वस्तुनोभेदो भेदश्चैक एवाकार इतीश्वराज्ञा । प्रतीतत्वादैकरूप्यं चेत् । प्रतीतत्वादेव भिन्नाभिन्नत्वमिति द्वैरूप्यमभ्युपगम्यताम् । न हि विस्फारिताक्षः पुरुषो घटशरावषण्डमुण्डादिषु वस्तुषूपलभ्यमानेष्वियं मृदयं च घट इदं गोत्वमियं च व्यक्तिरिति विवेक्तुं शक्नोति । अपि तु मृदयं घटः षण्डो गौरित्येव प्रत्येति । अनुवृत्तिबुद्धिबोध्यं कारणमाकृतिश्च व्यावृत्तिबुद्धिबोध्यं कार्यं व्यक्तिश्चेति विविनक्तीति चेत् । नैवम् । विविक्ताकारानुपलब्धेः । न हि सूक्ष्ममपि निरीक्षमाणैरिदमनुवर्तमानमिदं च व्यावर्तमानमिति पुरोवस्थिते वस्तुन्याकारभेद उपलभ्यते । यथा संप्रतिपन्नैक्ये कार्यविशेषे चैकत्वबुद्धिरुपजायते । तथैव सकारणे ससामान्ये

---

1. C om. नियम.

3 B. C E. read मुण्डो गौ after गौ .

4 B. om. अपि.

6. E om. गव after मुण्ड.

9 E. reads अपि after द्वैरूप्यम्, C om वि before स्फारिताक्ष .

11 B. om. च after अयम्, E reads च after इदम्.

12. E reads च after इत्येव.

14. E. reads सु before सूक्ष्मम्.

17. E. reads कार्ये for कार्य; B. reads कारणे सामान्ये for सकारणे

http://acharya.org

चैकत्वबुद्धिरविशिष्टोपजायते । एवमेव देशतः कालतश्चाकारतश्चात्यन्तविलक्षणेष्वपि वस्तुषु तदेवेदमिति प्रत्यभिज्ञा जायते । अतो द्व्यात्मकमेव वस्तु प्रतीयत इति कार्यकारणयोर्जातिव्यक्त्योश्चात्यन्तभेदोपपादनं प्रतीतिपराहतम् ।

अथोच्येत मृदयं घटः षण्डो गौरितिवद्देवोहं मनुष्योहमिति सामानाधिकरण्येनैक्यप्रतीतेरात्मशरीरयोरपि भिन्नाभिन्नत्वं स्यात् । अत इदं भेदाभेदोपपादनं निजसदननिहितहुतवहज्वालायत इति ।

तदिदमनाकलितभेदाभेदसाधनसामानाधिकरण्यतदर्थयाथात्म्यावबोधविलसितम् । तथा हि । अबाधित एव प्रत्ययः सर्वत्रार्थं व्यवस्थापयति । देवाद्यात्माभिमानस्त्वात्मयाथात्म्यगोचरैः सर्वैः प्रमाणैर्बाध्यमानो रज्जुसर्पादिबुद्धिवन्नात्मशरीरयोरभेदं साधयति । षण्डो गौर्मुण्डो गौरिति सामानाधिकरण्यस्य न केनचित्कचिद्बाधो दृश्यते । तस्मान्नातिप्रसङ्गः । अत एव जीवोपि ब्रह्मणो नात्यन्तभिन्नः । अपि तु ब्रह्मांशत्वेन भिन्नाभिन्नः । तत्राभेद एव स्वाभाविको भेदस्त्वौपाधिकः । कथमिदमवगम्यत इति चेत्तत्त्वमसि (छा. ६।८।७) । नान्योतोस्ति द्रष्टा (बृ. ३।७।२३) । अयमात्मा ब्रह्म (बृ. २।५।१९) इत्यादिभिः श्रुतिभिः । ब्रह्मेमे द्यावापृथिवी इति प्रकृत्य

ब्रह्म दाशा ब्रह्म दासा ब्रह्मेमे कितवा उत ।
स्त्रीपुंसौ ब्रह्मणो जातौ स्त्रियो ब्रह्मोत वा पुमान् ॥

इत्याथर्वणिकानां संहितोपनिषदि ब्रह्मसूक्तेभेदश्रवणाच्च ।

नित्यो नित्यानां चेतनश्चेतनाना-
मेको बहूनां यो विदधाति कामान् । (श्वे. ६।१३)

1. D. reads अविशेषा for अविशिष्टा.
2. B. reads प्रत्यभिज्ञायते for प्रत्यभिज्ञा जायते.
12. C. om. बुद्धि.
16. C. om. इदम्.

http://acharya.org

ज्ञाज्ञौ द्वावजावीशानीशौ (श्वे. १।९)।

क्रियागुणैरात्मगुणैश्च तेषां संयोगहेतुरपरोपि दृष्टः ।

(श्वे. ५।१२)

प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः ।

(श्वे. ६।१६)

स कारणं करणाधिपाधिपः (श्वे. ६।९)।

तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्न्योभिचाकशीति ।

(श्वे. ४।६)

य आत्मनि तिष्ठन् (बृ. ३।७।२२)। प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरम् (बृ. ४।३।२१)। प्राज्ञेनात्मनान्वारूढ उत्सृजन्याति (बृ. ४।३।३५)। तमेव विदित्वाति मृत्युमेति (श्वे.३।८) इत्यादिभिर्भेदश्रवणाच्च जीवपरयोर्भेदाभेदाववश्याश्रयणीयौ। तत्र ब्रह्म वेद ब्रह्मैव भवति (मु. ३।२।९) इत्यादिभिर्मोक्षदशायां जीवस्य ब्रह्मस्वरूपापत्तिव्यपदेशाद्यत्र त्वस्य सर्वमात्मैवाभूत्...तत्केन कं पश्येत् (बृ. २।४।१४) इति तदानीं भेदेनेश्वरदर्शननिषेधाच्चाभेदः स्वाभाविक इत्यवगम्यते ।

ननु च सोश्नुते सर्वान्कामान्त्सह ब्रह्मणा विपश्चिता (तै. २।१।१) इति सहश्रुत्या तदानीमपि भेदः प्रतीयते । वक्ष्यति च जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च (ब्र. सू. ४।४।१७)। भोगमात्रसाम्यलिङ्गाच्च (ब्र. सू. ४।४।२१) इति।

नैतदेवम्। नान्योतोस्ति द्रष्टा (बृ. ३।७।२३) इत्येवमादिश्रुतिशतैरात्मभेदप्रतिषेधात्। सोश्नुते सर्वान्कामान्त्सह ब्रह्मणा विपश्चिता (तै. २।१।१) इति सर्वैः कामैः सह ब्रह्माश्नुते सर्वगुणान्वितं ब्रह्माश्नुत इत्युक्तं भवति। अन्यथा ब्रह्मणा सहेत्यप्राधान्यं ब्र-

---

13. B om. तत्र; C. reads एवम् after इति.

23 C. reads सः after अश्नुते.

24. B. C. read च after अप्राधान्यम्.

http://acharya.org

ह्मणः प्रसज्येत । जगद्व्यापारवर्जम् (ब्र. सू. ४।४।१७) इत्यत्र मुक्तस्य भेदेनावस्थाने सत्यैश्वर्यस्य न्यूनताप्रसङ्गो वक्ष्यते । अन्यथा संपद्याविर्भावः स्वेन शब्दात् (ब्र. सू. ४।४।१) इत्यादिभिर्विरोधात् । तस्मादभेद एव स्वाभाविकः । भेदस्तु जीवानां परस्माद्ब्रह्मणः परस्परं च बुद्धीन्द्रियदेहोपाधिकृतः । यद्यपि ब्रह्म निरवयवं सर्वगतं च तथाप्याकाश इव घटादिना बुद्ध्याद्युपाधिना ब्रह्मण्यपि भेदः संभवत्येव । न च भिन्ने ब्रह्मणि बुद्ध्याद्युपाधिसंयोगो बुद्ध्याद्युपाधिसंयोगाद्ब्रह्मणि भेद इतीतरेतराश्रयत्वम् । उपाधेस्तत्संयोगस्य च कर्मकृतत्वात्तत्प्रवाहस्य चानादित्वात् । एतदुक्तं भवति । पूर्वकर्मसंबद्धाज्जीवात्स्वसंबद्ध एवोपाधिरुत्पद्यते । तद्युक्तात्कर्म । एवं बीजाङ्कुरन्यायेन कर्मोपाधिसंबन्धस्यानादित्वाददोष इति । अतो जीवानां परस्परं ब्रह्मणा चाभेद एव स्वाभाविकः । भेदस्त्वौपाधिकः । उपाधीनां पुनः परस्परं ब्रह्मणा चाभेदवद्भेदोपि स्वाभाविकः । उपाधीनामुपाध्यन्तराभावात् । तदभ्युपगमेनवस्थानाच्च । अतो जीवकर्मानुरूपं ब्रह्मणो भिन्नाभिन्नस्वभावा एवोपाधय उत्पद्यन्त इति ।

अत्रोच्यते । अद्वितीयसच्चिदानन्दब्रह्मध्यानविषयविधिपरं वेदान्तवाक्यजातमिति वेदान्तवाक्यैरभेदः प्रतीयते । भेदावलम्बिभिः कर्मशास्त्रैः प्रत्यक्षादिभिश्च भेदः प्रतीयते । भेदाभेदयोः परस्परविरोधादनाद्यविद्यामूलतयापि भेदप्रतीत्युपपत्तेरभेद एव परमार्थ इत्युक्तम् । तत्र यदुक्तं भेदाभेदयोरुभयोरपि प्रतीति-

---

2. B. reads वक्ष्यति for वक्ष्यते.

3. B. reads विरोधः for विरोधात्.

11. D. om. उपाधि.

13. C. om. पुनः.

14. C. reads अभेदः for अभेदवद्भेदः.

15. C. reads अनुगुणम् for अनुरूपम्.

http://acharya.org

सिद्धत्वान्न विरोध इति । तदयुक्तम् । कस्माच्चित्कस्यचिद्विलक्षणत्वं हि तस्मात्तस्य भेदः । तद्विपरीतत्वं चाभेदः । तयोस्तथाभावातथाभावरूपयोरेकत्र संभवमनुन्मत्तः को ब्रवीति । कारणात्मना जात्यात्मना चाभेदः कार्यात्मना व्यक्त्यात्मना च भेद इत्याकारभेदादविरोध इति चेन्न । विकल्पासहत्वात् । आकारभेदादविरोध इति वदतः किमेकस्मिन्नाकारे भेद आकारान्तरे चाभेद इत्यभिप्राय उताकारद्वययोगिवस्तुगतावुभावपीति । पूर्वस्मिन्कल्पे व्यक्तिगतो भेदो जातिगतश्चाभेद इति नैकस्य द्व्यात्मकता । जातिर्व्यक्तिरिति चैकमेव वस्त्विति चेत्तर्ह्याकारभेदादविरोधः परित्यक्तः स्यात् । एकस्मिंश्च विलक्षणत्वतद्विपर्ययौ विरुद्धावित्युक्तम् । द्वितीये तु कल्पेन्योन्यविलक्षणमाकारद्वयमप्रतिपन्नं च तदाश्रयभूतं वस्त्विति त्रितयाभ्युपगमेपि त्रयाणामन्योन्यवैलक्षण्यमेवोपपादितं स्यान्न पुनरभेदः । आकारद्वयनिरूप्यमाणाविरोधं तदाश्रयभूते वस्तुनि भिन्नाभिन्नत्वमिति चेत् । स्वस्माद्विलक्षणं स्वाश्रयमाकारद्वयं स्वस्मिन्विरुद्धधर्मद्वयसमावेशनिर्वाहकं कथं भवेत् । अविलक्षणं तु कथंतराम् । आकारद्वयतद्वतोश्च द्व्यात्मकत्वाभ्युपगमे निर्वाहकान्तरापेक्षयानवस्थानात् । न च संप्रतिपन्नैक्यव्यक्तिप्रतीतिवत्ससामान्येपि वस्तुन्येकरूपा प्रतीतिरुपजायते । यत इदमित्थमिति सर्वत्र प्रकारप्रकारितयैव सर्वा प्रतीतिः । तत्र प्रकारांशो जातिः प्रकार्यंशो व्यक्तिरिति नैकाकारताप्र-

---

6 B. C. read अविरोधम् for अविरोध इति.

12. B. reads विलक्षण for विलक्षणम्; C. reads प्रतिपन्नम् for अप्रतिपन्नम्.

13. B. D. read तृतीय for त्रितय; C. om. एव.

18. B. C read अनवस्था स्यात् for अनवस्थानात्.

19. B. reads सामान्ये for ससामान्ये; B. reads एकरूप for एकरूपा.

21. C. reads एकाकारा for एकाकारता.

http://acharya.org

तीतिः। अत एव जीवस्यापि ब्रह्मणो भिन्नाभिन्नत्वं न संभवति । तस्मादभेदस्यानन्यथासिद्धशास्त्रमूलत्वादनाद्यविद्यामूल एव भेदप्रत्ययः ।

नन्वेवं ब्रह्मण एवाज्ञत्वात्तन्मूलाश्च जन्मजरामरणादयो दोषाः प्रादुःष्युः। ततश्च यः सर्वज्ञः सर्ववित् (मु. १।१।९)। एष आत्मापहतपाप्मा (छा. ८।१।५) इत्यादीनि शास्त्राणि बाध्येरन् ।

नैवम्। अज्ञत्वादिदोषाणामपरमार्थत्वात् । भवतस्तूपाधिब्रह्मव्यतिरिक्तं वस्त्वन्तरमनभ्युपगच्छतो ब्रह्मण्येवोपाधिसंसर्गस्तत्कृताश्च जीवत्वाज्ञत्वादयो दोषाः परमार्थत एव भवेयुः। न हि ब्रह्मणि निरवयवेऽच्छेद्ये संबध्यमाना उपाधयस्तच्छित्त्वा भित्त्वा वा संबध्यन्ते। अपि तु ब्रह्मस्वरूपे संयुज्य तस्मिन्नेव स्वकार्याणि कुर्वन्ति ।

यदि मन्वीतोपाध्युपहितं ब्रह्म जीवः। स चाणुपरिमाणः। अणुत्वं चावच्छेदकस्य मनसोणुत्वात्। स चावच्छेदकोनादिः। एवमुपाध्युपहिते देशे संबध्यमाना दोषा अनुपहिते परे ब्रह्मणि न संबध्यन्त इति ।

इहायं प्रष्टव्यः। १ किमुपाधिना छिन्नो ब्रह्मखण्डोणुरूपो

---

2. E. reads अस्य for अभेदस्य.

4. B. reads अज्ञत्वम् for अज्ञत्वात्; B. om. च; C. om. च जन्म; E. om. जरा.

8. C. reads अज्ञान for अज्ञत्व.

10. B. reads परमार्थतया for परमार्थतः.

15. C. E. read अवच्छेदः for अवच्छेदकः.

16. B. reads अंशे for देशे.

18. E. om. इह; C. reads भिन्नः for छिन्नः; E. reads अवच्छिन्नः

जीवः २ उताच्छिन्न एवाणुरूपोपाधिसंयुक्तो ब्रह्मप्रदेशविशेषः ३ उतोपाधिसंयुक्तं ब्रह्मस्वरूपम् ४ अथोपाधिसंयुक्तं चेतनान्तरम् ५ अथोपाधिरेवेति । अच्छेद्यत्वाद्ब्रह्मणः प्रथमः कल्पो न कल्प्यते । आदिमत्त्वं च जीवस्य स्यात् । एकस्य सतो द्वैधीकरणं हि च्छेदनम् । द्वितीये कल्पे ब्रह्मण एव प्रदेशविशेष उपाधिसंबन्धादौपाधिकाः सर्वे दोषास्तस्यैव स्युः । उपाधौ गच्छत्युपाधिना स्वसंयुक्तब्रह्मप्रदेशाकर्षणायोगादनुक्षणमुपाधिसंयुक्तब्रह्मप्रदेशविशेषभेदात्क्षणे क्षणे बन्धमोक्षौ स्याताम् । आकर्षणे चाच्छिन्नत्वात्कृत्स्नस्य ब्रह्मण आकर्षणं स्यात् । निरंशस्य व्यापिन आकर्षणं न संभवतीति चेत्तर्ह्युपाधिरेव गच्छतीति पूर्वोक्त एव दोषः स्यात् । अच्छिन्नब्रह्मप्रदेशेषु सर्वोपाधिसंसर्गे सर्वेषां च जीवानां ब्रह्मण एव प्रदेशत्वेनैकत्वप्रतिसंधानं स्यात् । प्रदेशभेदादप्रतिसंधाने चैकस्यापि स्वोपाधौ गच्छति सति प्रतिसंधानं न स्यात् । तृतीये तु कल्पे ब्रह्मस्वरूपस्यैवोपाधिसंबन्धेन जीवत्वापातात्तदतिरिक्तानुपहितब्रह्मासिद्धिः स्यात् । सर्वेषु च देहेष्वेक एव जीवः स्यात् । तुरीये तु कल्पे ब्रह्मणोन्य एव जीव इति जीवभेदस्यौपाधिकत्वं परित्यक्तं स्यात् । चरमे चार्वाकपक्ष एव परिगृहीतः स्यात् । तस्मादभेदशास्त्रबलेन कृत्स्नस्य भेदस्याविद्यामूलत्वमेवाभ्युपगन्तव्यम् । अतः प्र-

---

1. C. reads अभिन्नः for अच्छिन्नः.
2. E. reads उत for अथ.
4. E. reads कल्पते for कल्प्यते.
5. C. reads भेदनम् for छेदनम्; C. reads तु after द्वितीये.
8. B. C. om. विशेष; B. C. read च after बन्धमोक्षौ.
9 C. reads अभिन्नत्वात् for अच्छिन्नत्वात्.
11. B. reads सर्वेषु पूर्वोपाधि° for सर्वोपाधि°
12. B. reads अभेद° for एकत्व°.
16. B. E. read तुर्ये for तुरीये.

http://acharya.org

वृत्तिनिवृत्तिरूपप्रयोजनपरतयैव शास्त्रस्य प्रामाण्येपि ध्यानविधिशेषतया वेदान्तवाक्यानां ब्रह्मस्वरूपे प्रामाण्यमुपपन्नमिति ।

तदप्ययुक्तम् । ध्यानविधिशेषत्वेपि वेदान्तवाक्यानामर्थसत्यत्वे प्रामाण्यायोगात् । एतदुक्तं भवति । ब्रह्मस्वरूपगोचराणि वाक्यानि किं ध्यानविधिनैकवाक्यतामापन्नानि ब्रह्मस्वरूपे प्रामाण्यं प्रतिपद्यन्त उत स्वतन्त्राण्येव । एकवाक्यत्वे ध्यानविधिपरत्वेन ब्रह्मस्वरूपे तात्पर्यं न संभवति । भिन्नवाक्यत्वे प्रवृत्तिनिवृत्तिरूपप्रयोजनविरहादनवबोधकत्वमेव । न च वाच्यं ध्यानं नाम स्मृतिसंततिरूपम् । तच्च स्मर्तव्यैकनिरूपणीयमिति ध्यानविधेः स्मर्तव्यविशेषाकाङ्क्षायामिदं सर्वं यदयमात्मा (बृ. २।४।६)। अयमात्मा ब्रह्म सर्वानुभूः (बृ. २।५।१९)। सत्यं ज्ञानमनन्तं ब्रह्म (तै. २।१।१) इत्यादीनि स्वरूपतद्विशेषादीनि समर्पयन्ति तेनैकवाक्यतामापन्नान्यर्थसद्भावे प्रमाणमिति । ध्यानविधेः स्मर्तव्यविशेषापेक्षत्वेपि मनो ब्रह्मेत्युपासीत (छा. ३।१८।१) इत्यादिदृष्टिविधिवदसत्येनाप्यर्थविशेषेण ध्याननिर्वृत्त्युपपत्तेर्ध्येयसत्यत्वानपेक्षणात् । अतो वेदान्तवाक्यानां प्रवृत्तिनिवृत्तिप्रयोजनविधुरत्वाद्ध्यानविधिशेषत्वेपि ध्येयविषयस्वरूपसमर्पणमात्रपर्यवसानात्स्वातन्त्र्येणापि बालातुराद्युपच्छन्दन-

---

1. B. C. om. रूप.
2. B. reads विशेषतया for शेषतया.
3. B. reads विशेषत्वे for शेषत्वे.
6. E om. विधि.
8. C. om. रूप.
11. B. reads सर्वानुभूतिः for सर्वानुभूः.
14. C. reads नाम ब्रह्म for मनो ब्रह्मेत्युपासीत.
17. B. reads विशेषत्वे for शेषत्वे; B. reads विशेष for विषयस्वरूप; E. reads विशेष for विषय.

http://acharya.org

वाक्यवज्ज्ञानमात्रेणैव पुरुषार्थपर्यन्ततासिद्धेश्च परिनिष्पन्नवस्तुसत्यतागोचरत्वाभावाद्ब्रह्मणः शास्त्रप्रमाणकत्वं न संभवतीति प्राप्तम् ।

तत्र प्रतिपाद्यते तत्तु समन्वयादिति । समन्वयः सम्यगन्वयः पुरुषार्थतयान्वय इत्यर्थः । परमपुरुषार्थभूतस्यानवधिकातिशयानन्दस्वरूपस्य ब्रह्मणोभिधेयतयान्वयात्तच्छास्त्रप्रमाणकत्वं सिध्यत्येवेत्यर्थः । निरस्तनिखिलदोषगन्धनिरतिशयानन्दस्वरूपतया परमप्राप्यं ब्रह्म बोधयन्वेदान्तवाक्यगणः प्रवृत्तिनिवृत्तिपरताविरहान्न प्रयोजनपर्यवसायीति ब्रुवाणो राजकुलवासिनः पुरुषस्य कौलेयककुलाननुप्रवेशेन प्रयोजनशून्यतां ब्रूते । एतदुक्तं भवति । अनादिकर्मरूपाविद्यावेष्टनतिरोहितपरावरतत्त्वयाथात्म्यस्वरूपावबोधानां देवासुरगन्धर्वसिद्धविद्याधरकिंनरकिंपुरुषयक्षरक्षःपिशाचमनुजपशुशकुनिसरीसृपवृक्षगुल्मलतादूर्वादीनां स्त्रीपुंनपुंसकभेदभिन्नानां क्षेत्रज्ञानां व्यवस्थितधारकपोषकभोग्यविशेषाणां मुक्तानां स्वस्य चाविशेषेणानुभवसंभवे स्वरूपगुणविभवचेष्टितैरनवधिकातिशयानन्दजनकं परं ब्रह्मास्तीति बोधयदेव वाक्यं प्रयोजनपर्यवसायि । प्रवृत्तिनिवृत्तिनिष्ठं तु यावत्पुरुषार्थान्वयबोधं न प्रयोजनपर्यवसायि । एवंभूतं ब्रह्म कथं प्राप्यत इत्यपेक्षायां ब्रह्मविदाप्नोति परम् (तै. २।१।१)। आत्मानमेव लोकमुपासीत (बृ. १।४।१५) इति वेदनादिशब्दैरुपासनं ब्रह्मप्राप्त्युपायतया विधीयते । यथा स्व-

---

1. C. om. एव; C reads अपरिनिष्पन्न for परिनिष्पन्न.

7. C. reads अनवधिकातिशय for गन्धनिरतिशय; E. om. गन्ध.

11. C. reads स्वरूप for रूप.

14. B. reads व्यवसितधारक for व्यवस्थितधारकपोषक.

16. C. reads जननम् for जनकम्, E. reads पर for परम्.

18. C. reads बोधनात् for बोधम्.

http://acharya.org

वेश्मनि निधिरस्तीति वाक्येन निधिसद्भावं ज्ञात्वा तृप्तः सन्पश्चात्तदुपादाने च प्रयतते । यथा च कश्चिद्राजकुमारो बालक्रीडासक्तो नरेन्द्रभवनान्निष्क्रान्तो मार्गाद्भ्रष्टो नष्ट इति राज्ञा विज्ञातः स्वयं चाज्ञातपितृकः केनचिद्द्विजवर्येण वर्धितोधिगतवेदशास्त्रार्थः षोडशवर्षः सर्वकल्याणगुणाकरस्तिष्ठन्पिता ते सर्वलोकाधिपतिर्गाम्भीर्यौदार्यवात्सल्यसौशील्यशौर्यवीर्यधैर्यपराक्रमादिगुणगणसंपन्नस्त्वामेव नष्टं पुत्रं दिदृक्षुः पुरवरे तिष्ठतीति केनचिदभियुक्ततमेन प्रयुक्तं वाक्यं शृणोति चेत्तदानीमेवाहं तावज्जीवतः पुत्रोस्मत्पिता च सर्वसंपत्समृद्ध इति निरतिशयहर्षसमन्वितो भवति । राजा च स्वपुत्रं जीवन्तमरोगमतिमनोहरदर्शनं विदितसकलवेद्यं श्रुत्वावाप्तसमस्तपुरुषार्थो भवति । पश्चात्तावुभौ संगच्छेते चेति ।

यत्पुनः परिनिष्पन्नवस्तुगोचरस्य वाक्यस्य तज्ज्ञानमात्रेणापि पुरुषार्थपर्यवसानाद्बालातुराद्युपच्छन्दनवाक्यवन्नार्थसद्भावे प्रामाण्यमिति तदसत् । अर्थसद्भावाभावे निश्चिते ज्ञातोप्यर्थः पुरुषार्थाय न भवति । बालातुरादीनामप्यर्थसद्भावभ्रान्त्यैव हर्षाद्युत्पत्तिः । तेषामेव तस्मिन्नपि ज्ञाने विद्यमाने यद्यर्थाभावनिश्चयो जायेत ततस्तदानीमेव हर्षादयो निवर्तेरन् । औपनिषदेष्वपि वाक्येषु

---

4. D. reads ज्ञातः for विज्ञात.

6. C. E. om. धैर्य.

7. C. om. गण.

12. E. reads पश्चात्तदुपादाने च प्रयतते । after भवति.

14. B. reads सद्भाव for सद्भावे.

16. B. C. om. एव after भ्रान्त्या.

17. B. reads एव for अपि after तस्मिन्.

ब्रह्मास्तित्वतात्पर्याभावनिश्चये ब्रह्मज्ञाने सत्यपि पुरुषार्थपर्यवसानं न स्यात् । अतो यतो वा इमानि (तै. ३।१।१) इत्यादिवाक्यं निखिलजगदेककारणं निरस्तनिखिलदोषगन्धं सर्वज्ञसत्यसंकल्पत्वाद्यनन्तकल्याणगुणाकरमनवधिकातिशयानन्दं ब्रह्मास्तीति बोधयतीति सिद्धम् ॥ ४ ॥ (४)

ईक्षतेर्नाशब्दम् ॥ ५ ॥

यतो वा इमानि (तै. ३।१।१) इत्यादिजगत्कारणवादिवाक्यप्रतिपाद्यं सर्वज्ञं सर्वशक्ति समस्तहेयप्रत्यनीककल्याणगुणैकतानं ब्रह्म जिज्ञास्यमित्युक्तम् । इदानीं जगत्कारणवादिवाक्यानामानुमानिकप्रधानादिप्रतिपादनानर्हतोच्यत ईक्षतेर्नाशब्दमित्यादिना ।

इदमाम्नायते छान्दोग्ये । सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् (छा. ६।२।१) । तदैक्षत बहु स्यां प्रजायेयेति । तत्तेजोसृजत (छा. ६।२।३) इत्यादि । तत्र संदिह्यते । किं सच्छब्दवाच्यं जगत्कारणं परोक्तमानुमानिकं प्रधानमुतोक्तलक्षणं ब्रह्मेति ।

किं प्राप्तम् । प्रधानमिति । कुतः । सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् (छा. ६।२।१) इतीदंशब्दवाच्यस्य चेतनभोग्यभूतस्य सत्त्वरजस्तमोमयस्य वियदादिनामरूपविकारावस्थस्य वस्तुनः कारणावस्थां वदति । कारणभूतद्रव्यस्यावस्थान्त-

---

3. D. reads अखिल for निखिल after वाक्यम्, E. reads सार्वज्ञ्य for सर्वज्ञ.

4. B. reads अनेक for अनन्त.

8. B. D. read सत्यसकल्पम् after सर्वज्ञम्, B. om. गुण.

16. C reads एव after उक्तलक्षणम्.

19 B E. read नाना for नाम.

20. B. reads द्रव्य for द्रव्यस्य.

http://acharya.org

रापत्तिरेव हि कार्यता। अतो यद्द्रव्यं यत्स्वभावं च कार्यावस्थं तत्स्वभावं तदेव द्रव्यं कारणावस्थं सत्त्वरजस्तमोमयं च कार्यमिति गुणसाम्यावस्थं प्रधानमेव कारणम्। तदेवोपसंहृतसकलविशेषं सन्मात्रमिति सदेव सोम्येदमग्र आसीदेकमेव (छा. ६।२।१) इत्यभिधीयते। तत एव च कार्यकारणयोरनन्यत्वम्। तथा सत्येवैकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपत्तिः। अन्यथा यथा सोम्यैकेन मृत्पिण्डेन (छा. ६।१।१) इत्यादिमृत्पिण्डतत्कार्यदृष्टान्तदार्ष्टान्तिकयोर्वैरूप्यं चेति जगत्कारणवादिवाक्येन महर्षिणा कपिलेनोक्तं प्रधानमेव प्रतिपाद्यते। प्रतिज्ञादृष्टान्तरूपेणानुमानवेषमेव चेदं वाक्यमिति सच्छब्दवाच्यमानुमानिकमेवेति।

एवं प्राप्तेभिधीयते। ईक्षतेर्नाशब्दमिति। यस्मिञ्छब्द एव प्रमाणं न भवति तदशब्दमानुमानिकं प्रधानमित्यर्थः। न तज्जगत्कारणवादिवाक्यप्रतिपाद्यम्। कुतः। ईक्षतेः। सच्छब्दवाच्यसंबन्धिव्यापारविशेषाभिधायिन ईक्षतेर्धातोः श्रवणात्। तदैक्षत बहु स्यां प्रजायेय (छा. ६।२।३) इतीक्षणक्रियायोगश्चाचेतने प्रधाने न संभवति। अत ईदृशेक्षणक्षमश्चेतनविशेष एव सर्वज्ञः सर्वशक्तिः पुरुषोत्तमः सच्छब्दाभिधेयः। तथा च सर्वेष्वपि सृष्टिप्रकरणेष्वीक्षापूर्विकैव सृष्टिः प्रतीयते। स ऐक्षत लोकान्नु सृजा इति। स इमाँल्लोकानसृजत (ऐ. १।१-२)। स ईक्षांचक्रे। स प्राणमसृजत (प्र. ६।३-४) इत्यादिषु।

---

1. C. om. च.

3. D. reads हि after प्रधानमेव.

6. B reads तदा for तथा, D om. एव after तथा सति.

10. D. om. च after वेषमेव, D. om एव after आनुमानिकम्.

12. B. om आनुमानिकम्

16. B. reads ईदृशेक्षणवान् for ईदृशेक्षणक्षम.

17. C. om. एव

18. B. reads ईक्षण for ईक्षा.

http://acharya.org

ननु च कार्यानुगुणेनैव कारणेन भवितव्यम् । सत्यम् । सर्वकार्यानुगुण एव सर्वज्ञः सर्वशक्तिः सत्यसंकल्पः पुरुषोत्तमः सूक्ष्मचिदचिद्वस्तुशरीरकः । यथाह

पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च । (श्वे. ६।८)

यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः । (मु. १।१।९) यस्याव्यक्तं शरीरं यस्याक्षरं शरीरं यस्य मृत्युः शरीरमेष सर्वभूतान्तरात्मापहतपाप्मा (सुबा. श्रु.) इत्यादि । तदेतन्न विलक्षणत्वात् (ब्र. सू. २।१।४) इत्यादिषु प्रतिपादयिष्यते । अत्र सृष्टिवाक्यानि न प्रधानप्रतिपादनयोग्यानीत्युच्यते । वस्तुविरोधस्तु तत्रैव परिहरिष्यते ।

यत्तूक्तं प्रतिज्ञादृष्टान्तयोगादनुमानरूपमेवेदं वाक्यमिति । तदसत् । हेत्वनुपादानात् । येनाश्रुतं श्रुतम् (छा. ६।१।१) इत्येकविज्ञानेन सर्वविज्ञाने प्रतिपिपादयिषिते सर्वात्मना तदसंभवं मन्वानस्य तत्संभवमात्रप्रदर्शनाय हि दृष्टान्तोपादानम् । ईक्षत्यादिश्रवणादेव ह्यनुमानगन्धाभावोवगतः ॥ ५ ॥

अथ स्यान्न चेतनगतं मुख्यमीक्षणमिहोच्यते । अपि तु प्रधानगतं गौणमीक्षणम् । तत्तेज ऐक्षत (छा. ६।२।३) । ता आप ऐक्षन्त (छा. ६।२।४) इति गौणेक्षणसाहचर्यात् । भवति चाचेतनेष्वपि चेतनधर्मोपचारः । यथा वृष्टिप्रतीक्षाः शा-

7. D. om. यस्याक्षर शरीरम्.

8. B. reads इति for अपहतपाप्मेत्यादि.

11. D E. om. तु after वस्तुविरोधः.

12. B. reads अनुमानम् for अनुमानरूपम्.

15. D. reads श्वेतकेतोः after मन्वानस्य.

17. D. reads चेतनगतं for चेतनगतम्.

http://acharya.org

ल्यः । वर्षेण बीजं प्रतिसंजहर्षेति । अतो गौणमीक्षणमिति । इमामाशङ्कामनुभाष्य परिहरति ।

गौणश्चेन्नात्मशब्दात् ॥ ६ ॥

यदुक्तं गौणेक्षणसाहचर्यात्सतोपीक्षणव्यपदेशः सर्गनियतपूर्वावस्थाभिप्रायो गौण इति । तन्न । ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा (छा. ६।८।७) इति सच्छब्दप्रतिपादितस्यात्मशब्देन व्यपदेशात् । एतदुक्तं भवति । ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा (छा. ६।८।७) इति चेतनाचेतनात्मकप्रपञ्चोद्देशेन स त आत्मेत्यात्मत्वोपदेशोयं नाचेतने प्रधाने संगच्छत इति । अतस्तेजोबन्नानामपि परमात्मैवात्मेति तेजःप्रभृतयोपि शब्दाः परमात्मन एव वाचकाः । तथा हि । हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि (छा. ६।३।२) इति परमात्मानुप्रवेशादेव तेजःप्रभृतीनां वस्तुत्वं तत्तन्नामभाक्त्वं चेति तत्तेज ऐक्षत (छा. ६।२।३)। ता आप ऐक्षन्त (छा. ६।२।४) इत्यपि मुख्य एवेक्षणव्यपदेशः । अतः साहचर्यादपि तदैक्षत (छा. ६।२।३) इत्यत्र गौणत्वाशङ्का दूरोत्सारितेति सूत्राभिप्रायः ॥ ६ ॥

इतश्च न प्रधानं सच्छब्दप्रतिपाद्यम् ।

तन्निष्ठस्य मोक्षोपदेशात् ॥ ७ ॥

मुमुक्षोः श्वेतकेतोस्तत्त्वमसि (छा. ६।८।७) इति सदात्मत्वानुसंधानमुपदिश्य तन्निष्ठस्य तस्य तावदेव चिरं यावन्न विमोक्ष्येथ संपत्स्ये (छा. ६।१४।२) इति शरीरपातमा-

1. C. om. वर्षेण.

7. C. E. om. तत्सत्यम्.

9. D. om. ते after स..

17. C. reads गौणत्वाभिशङ्का for गौणत्वाशङ्का.

http://acharya.org

त्रान्तरायो ब्रह्मसंपत्तिलक्षणो मोक्ष इत्युपदिशति । यदि च प्रधानमचेतनं कारणमुपदिश्येत तदा तदात्मकत्वानुसंधानस्य मोक्षसाधनत्वोपदेशो नोपपद्येत। यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति (छा. ३।१४।१) इति तन्निष्ठस्याचेतनसंपत्तिरेव स्यात्। न च मातापितृसहस्रेभ्योपि वत्सलतरं शास्त्रमेवंविधतापत्रयाभिहतिहेतुभूतामचित्संपत्तिमुपदिशति । प्रधानकारणवादिनोपि हि प्रधाननिष्ठस्य मोक्षं नाभ्युपगच्छन्ति॥७॥

इतश्च न प्रधानम्।

हेयत्वावचनाच्च॥ ८॥

यदि प्रधानमेव कारणं सच्छब्दाभिहितं भवेत्तदा मुमुक्षोः श्वेतकेतोस्तदात्मकत्वं मोक्षविरोधित्वाद्धेयत्वेनैवोपदेश्यं स्यात्। न च तत्क्रियते। प्रत्युतोपादेयत्वेनैव तत्त्वमसि (छा.६।८।७)। तस्य तावदेव चिरम् (छा. ६।१४।२) इत्युपदिश्यते॥ ८॥

इतश्च न प्रधानम्।

प्रतिज्ञाविरोधात्॥ ९॥

प्रधानकारणत्वे प्रतिज्ञाविरोधश्च भवति। वाक्योपक्रमे ह्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञातम्। तच्च कार्यकारणयोरनन्यत्वेन कारणभूतसद्विज्ञानात्तत्कार्यभूतचेतनाचेतनप्रपञ्चस्य ज्ञाततयैवोपपादनीयम्। तत्तु प्रधानकारणत्वे चेतनवर्गस्य प्र-

---

3. B D read उपपद्यते for उपपद्येत.

5 C. reads हि after वत्सलतरम्.

7 E. om. हि after अपि, D. reads तथा after हि.

11 B. D. om. एव after हेयत्वेन.

12. B. om एव after उपादेयत्वेन.

http://acharya.org

धानकार्यत्वाभावात्प्रधानविज्ञानेन चेतनवर्गविज्ञानासिद्धेर्विरुध्यते ॥ ९ ॥

इतश्च न प्रधानम् ।

स्वाप्ययात् ॥ १० ॥

तदेव सच्छब्दवाच्यं प्रकृत्याह । स्वप्नान्तं मे सोम्य विजानीहीति । यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा संपन्नो भवति । स्वमपीतो भवति । तस्मादेनं स्वपितीत्याचक्षते । स्वं ह्यपीतो भवति (छा. ६।८।१) इति सुषुप्तं जीवं सता संपन्नं स्वमपीतः स्वस्मिन्प्रलीन इति व्यपदिशति । प्रलयश्च स्वकारणे लयः । न चाचेतनं प्रधानं चेतनस्य जीवस्य कारणं भवति । स्वमपीतो भवत्यात्मानमेव जीवोपीतो भवतीत्यर्थः । चिद्वस्तुशरीरकं तदात्मभूतं ब्रह्मैव जीवशब्देनाप्यभिधीयत इति नामरूपव्याकरणश्रुत्योक्तं तज्जीवशब्दाभिधेयं ब्रह्म सुषुप्तिकालेपि प्रलयकाल इव नामरूपपरिष्वङ्गाभावात्केवलसच्छब्दाभिधेयमिति सता सोम्य तदा संपन्नो भवति स्वमपीतो भवति (छा. ६।८।१) इत्युच्यते ।

तथा समानप्रकरणे नामरूपविभागपरिष्वङ्गाभावेन प्राज्ञेनैव परिष्वङ्गात्प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरम् (बृ. ४।३।२१) इत्युच्यते । आ मोक्षाज्जीवस्य नामरूपपरिष्वङ्गादेव हि स्वव्यतिरिक्तविषयज्ञानोदयः । सुषु-

---

5 B reads तथैव for तदेव.

9. B reads स्वमपीतम् for स्वमपीत..

11. B. om. स्वमपीतो भवति.

12 D. om. अपि after जीवशब्देन.

14. C. om. अपि after सुषुप्तिकाले.

17. C. reads परिष्वङ्गाभावात् for विभागपरिष्वङ्गाभावेन.

http://acharya.org

त्रिकालेपि हि नामरूपे विहाय सता संपरिष्वक्तः पुनरपि जाग्रद्दशायां नामरूपे परिष्वज्य तत्तन्नामरूपा भवन्तीति श्रुत्यन्तरे स्पष्टमभिधीयते । यदा सुषुप्तः स्वप्नं न कथंचन पश्यत्यथास्मिन्प्राण एवैकधा भवति । तस्माद्वा एतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते (कौ. ३।३) । तथा त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा दंशो वा मशको वा यद्यद्भवन्ति तदाभवन्ति (छा. ६।९।३) इति । तथा सुषुप्तं जीवं प्राज्ञेनात्मना संपरिष्वक्तः (बृ. ४।३।२१) इति च वदति । तस्मात्सच्छब्दवाच्यं परं ब्रह्म सर्वज्ञः परमेश्वरः पुरुषोत्तम एव । तदाह वृत्तिकारः सता सोम्य तदा संपन्नो भवतीति संपत्त्यसंपत्तिभ्यामेतदध्यवसीयते । प्राज्ञेनात्मना संपरिष्वक्त इति चाहेति ॥ १० ॥

इतश्च न प्रधानम् ।

गतिसामान्यात् ॥ ११ ॥

आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत्स ऐक्षत लोकान्नु सृजा इति । स इमाँल्लोकानसृजत (ऐ. १।१—२) । तस्माद्वा एतस्मादात्मन आकाशः संभूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी (तै. २।१) । तस्य ह वा एतस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदः (बृ. २।४।१०) इत्यादिसृष्टिवाक्यानां या गतिः प्रवृत्तिस्तत्सामान्यात्तत्समा-

---

1. C. om. अपि after सुषुप्तिकाले; D. om हि after अपि.

2. B. reads जागर for जाग्रद्.

4. D reads हि after प्राण एव.

6. B. reads तथा for तदा.

7. B. reads च after तथा; C. om. जीवम्.

9. B. om. परमेश्वरः.

http://acharya.org

नार्थत्वादस्य । तेषु सर्वेषु सर्वेश्वरः कारणमवगम्यते । तस्मादत्रापि सर्वेश्वर एव कारणमिति निश्चीयते ॥ ११ ॥

इतश्च न प्रधानम् ।

श्रुतत्वाच्च ॥ १२ ॥

श्रुतमेव ह्यस्यामुपनिषद्यस्य सच्छब्दवाच्यस्यात्मत्वेन नामरूपयोर्व्याकर्तृत्वं सर्वज्ञत्वं सर्वशक्तित्वं सर्वाधारत्वमपहतपाप्मत्वादिकं सत्यकामत्वं सत्यसंकल्पत्वं चानेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि (छा. ६।३।२)। सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः (छा. ६।८।४)। ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा (छा. ६।८।७)। यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन्त्समाहितम् (छा. ८।१।३)। तस्मिन्कामाः समाहिताः। एष आत्मापहतपाप्मा विजरो विमृत्युर्विशोकोविजिघत्सोपिपासः सत्यकामः सत्यसंकल्पः (छा. ८।१।५) इति। तथा च श्रुत्यन्तराणि

न तस्य कश्चित्पतिरस्ति लोके न चेशिता नैव च तस्य लिङ्गम्।
स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः॥
(श्वे. ६।९)

सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन्यदास्ते।
(तै. आ. ३।११)

अन्तःप्रविष्टः शास्ता जनानां सर्वात्मा (तै. आ. ३।११)। विश्वात्मानं परायणम् (ना. १३।१)।

---

1 B. C. read च after तेषु.

2. D. om. एव.

5 D. reads एवम् for एव हि; B. om. अस्य.

11. B. reads तस्मिन् for तदस्मिन्.

http://acharya.org

पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम्। (ना. १३।१)
यच्च किंचिज्जगत्यस्मिन्दृश्यते श्रूयतेपि वा।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः॥ (ना. १३।१)

एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायणः (सुबालोप.) इत्यादीनि। तस्माज्जगत्कारणवादिवाक्यानि न प्रधानप्रतिपादनयोग्यानि। अतः सर्वज्ञः सर्वशक्तिः सर्वेश्वरो निरस्तसमस्तदोषगन्धोनवधिकातिशयासंख्येयकल्याणगुणगणौघमहार्णवः पुरुषोत्तमो नारायण एव निखिलजगदेककारणं जिज्ञास्यं ब्रह्मेति च स्थितम्।

अत एव निर्विशेषचिन्मात्रब्रह्मवादोपि सूत्रकारेणाभिः श्रुतिभिर्निरस्तो वेदितव्यः। पारमार्थिकमुख्येक्षणादिगुणयोगि जिज्ञास्यं ब्रह्मेति स्थापनात्। निर्विशेषवादे हि साक्षित्वमप्यपारमार्थिकम्। वेदान्तवेद्यं ब्रह्म च जिज्ञास्यतया प्रतिज्ञातम्। तच्च चेतनमितीक्षतेर्नाशब्दम् (ब्र. सू. १।१।५) इत्यादिभिः सूत्रैः प्रतिपाद्यते। चेतनत्वं नाम चैतन्यगुणयोगः। अत ईक्षणगुणविरहिणः प्रधानतुल्यत्वमेव। किं च निर्विशेषप्रकाशमात्रब्रह्मवादे तस्य प्रकाशत्वमपि दुरुपपादम्। प्रकाशो

---

1. E. om. शाश्वत शिवमच्युतम्.
4. D. reads एव निखिलजगदेककारणम् after नारायण.
5. B. D read वाक्य न प्रधानप्रतिपादनयोग्यम् for वाक्यानि न प्रधानप्रतिपादनयोग्यानि.
6. C reads आदि after प्रधान.
7. B om. गणौघ; D. om ओघ.
9. B. D om. च after इति.
11 C. reads गण after गुण.
13 E. om. च after ब्रह्म.

http://acharya.org

हि नाम स्वस्य परस्य च व्यवहारयोग्यतामापादयन्वस्तुविशेषः । निर्विशेषस्य वस्तुनस्तदुभयरूपत्वाभावाद्घटादिवदचित्त्वमेव । तदुभयरूपत्वाभावेपि तत्क्षमत्वमस्तीति चेत्तन्न । तत्क्षमत्वं हि तत्सामर्थ्यमेव । सामर्थ्यगुणयोगे हि निर्विशेषवादः परित्यक्तः स्यात् । अथ श्रुतिप्रामाण्यादयमेको विशेषोभ्युपगम्यत इति चेत् । हन्त तर्हि तत एव सर्वज्ञता सर्वशक्तित्वं सर्वेश्वरेश्वरत्वं सर्वकल्याणगुणाकरत्वं सकलहेयप्रत्यनीकतेत्यादयः सर्वेभ्युपगन्तव्याः । शक्तिमत्त्वं च कार्यविशेषानुगुणत्वम् । तच्च कार्यविशेषैकनिरूपणीयम् । कार्यविशेषस्य निष्प्रमाणकत्वे तदेकनिरूपणीयं शक्तिमत्त्वमपि निष्प्रमाणकं स्यात् । किं च निर्विशेषवस्तुवादिनो वस्तुत्वमपि निष्प्रमाणकम् । प्रत्यक्षानुमानागमस्वानुभवाः सविशेषगोचरा इति पूर्वमेवोक्तम् (पृ. २८ प. ३) । तस्माद्विचित्रचेतनाचेतनात्मकजगद्रूपेण बहु स्यामितीक्षणक्षमः पुरुषोत्तम एव जिज्ञास्य इति सिद्धम् ॥ १२ ॥ (५)

एवं जिज्ञासितस्य ब्रह्मणश्चेतनभोग्यभूतजडरूपसत्त्वरजस्तमोमयप्रधानाद्व्यावृत्तिरुक्ता । इदानीं कर्मवश्यात्रिगुणात्मकप्रकृतिसंसर्गनिमित्तनानाविधानन्तदुःखसागरनिमज्जनेनाशुद्धाच्छुद्धाच्च प्रत्यगात्मनोन्यन्निखिलहेयप्रत्यनीकं निरतिशयानन्दं ब्रह्मेति प्रतिपाद्यते ।

आनन्दमयोभ्यासात् ॥ १३ ॥

तैत्तिरीया अधीयते । स वा एष पुरुषोन्नरसमयः (तै.

---

3. D. om तत् after चेत्.
7. B. D. om ईश्वर; C. om. सर्वकल्याणगुणाकरत्वम्.
10 C. reads निरूपणीय for निरूपणीयम्.
12. D. reads जन्य for स्व, D. reads विषया for गोचराः.
14 D. E read जिज्ञास्य ब्रह्म for जिज्ञास्य.
15. B. D. read जिज्ञास्यस्य तस्य for जिज्ञासितस्य.

http://acharya.org

२।१।१) इति प्रकृत्य तस्माद्वा एतस्माद्विज्ञानमयात् । अन्योन्तर आत्मानन्दमयः (तै. २।५) इति । तत्र संदेहः । किमयमानन्दमयो बन्धमोक्षभागिनः प्रत्यगात्मनो जीवशब्दाभिलपनीयादन्यः परमात्मोत स एवेति ।

किं युक्तम् । प्रत्यगात्मेति । कुतः । तस्यैष एव शारीर आत्मा (तै. २।६) इत्यानन्दमयस्य शारीरत्वश्रवणात् । शारीरो हि शरीरसंबन्धी जीवात्मा ।

ननु च जगत्कारणतया प्रतिपादितस्य परस्य ब्रह्मणः सुखप्रतिपत्त्यर्थमन्नमयादीननुक्रम्य तदेव जगत्कारणमानन्दमय इत्युपदिशति । जगत्कारणं च तदैक्षत (छा. ६।२।३) इतीक्षणश्रवणात्सर्वज्ञः सर्वेश्वर इत्युक्तम् । सत्यमुक्तम् । तत्तु जीवान्नातिरिच्यते । अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि (छा. ६।३।२) । तत्त्वमसि श्वेतकेतो (छा. ६।८।७) इति कारणतया निर्दिष्टस्य जीवसामानाधिकरण्यनिर्देशात् । सामानाधिकरण्यं ह्येकत्वप्रतिपादनपरम् । यथा सोयं देवदत्त इत्यादौ । ईक्षापूर्विका च सृष्टिश्चेतनस्य जीवस्योपपद्यत एव । अतो ब्रह्मविदाप्नोति परम् (तै. २।१।१) इति जीवस्याचित्संसर्गवियुक्तं स्वरूपं प्राप्यतयोपदिश्यते । अचिद्वियुक्तस्य स्वरूपस्य लक्षणमिदमुच्यते सत्यं ज्ञानमनन्तं ब्रह्म (तै.२।१।१)

---

5. C. om. तस्य.

7. B. reads सबन्धि for संबन्धी.

8. D. om. परस्य.

10. D. om. ईक्षण.

11. D. reads स तु for तत्तु.

16. B. reads ईक्षण, E. इच्छा, for ईक्षा.

18. D. reads उपक्रान्तमानन्दमय इति after प्राप्यतया; B. reads वस्तु-

http://acharya.org

इति । तद्रूपप्राप्तिरेव हि मोक्षः । न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति । अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः (छा. ८।१२।१) इति । अतो जीवस्याविद्यावियुक्तं स्वरूपं प्राप्यतया प्रक्रान्तमानन्दमय इत्युपदिश्यते । तथा हि शाखाचन्द्रन्यायेनात्मस्वरूपं दर्शयितुमन्नमयः पुरुष इति प्रथमं शरीरं निर्दिश्य तदन्तर्भूतं तस्य धारकं पञ्चवृत्तिप्राणं तस्याप्यन्तर्भूतं मनस्तदन्तर्भूतां च बुद्धिं प्राणमयो मनोमयो विज्ञानमय इति तत्र तत्र बुद्ध्यवतरणक्रमेण निर्दिश्य सर्वान्तर्भूतं जीवात्मानमन्योन्तर आत्मानन्दमयः (तै. २।५) इत्युपदिश्यान्तरात्मपरम्परां समापयति । अतो जीवात्मस्वरूपमेव ब्रह्मविदाप्नोति (तै. २।१।१) इति प्रक्रान्तं ब्रह्म तदेवानन्दमय इत्युपदिष्टमिति निश्चीयते ।

ननु च ब्रह्म पुच्छं प्रतिष्ठा (तै. २।५) इत्यानन्दमयादन्यद्ब्रह्मेति प्रतीयते । नैवम् । ब्रह्मैव स्वस्वभावविशेषेण पुरुषविधत्वरूपितं शिरःपक्षपुच्छरूपेण व्यपदिश्यते । यथान्नमयो देहावयवी स्वस्मादनतिरिक्तैः स्वावयवैरेव तस्येदमेव शिरः (तै. २।१) इत्यादिना शिरःपक्षपुच्छवत्तया निदर्शितस्तथानन्दमयं ब्रह्मापि स्वस्मादनतिरिक्तैः प्रियादिभिर्निदर्शितम् । तत्राव-

5. B. reads शरीर प्रथमम् for प्रथम शरीरम्.

6. B. D. read अन्तरभूतम् for अन्तर्भूतम्.

7. B. D read अन्तरभूतम् for अन्तर्भूतम् and अन्तरभूताम् for अन्तर्भूताम्.

8. B. om. तत्र; B. D. read अन्तरभूतम् for अन्तर्भूतम्.

13. D. om. च.

15. C. reads ह्युपदिश्यते for व्यपदिश्यते.

16. D. reads देह एव for देहावयवी and अनतिरिक्तस्वावयवैरिव for अनतिरिक्तै स्वावयवैरेव.

17. D. reads पुच्छा अवयवतया निदर्शिताः for पुच्छवत्तया निदर्शितः.

http://acharya.org

यवत्वेन रूपितानां प्रियमोदप्रमोदानन्दानामाश्रयतयाखण्डरूपमानन्दमयं ब्रह्म पुच्छं प्रतिष्ठा (तै. २।५) इत्युच्यते । यदि चानन्दमयादन्यद्ब्रह्माभविष्यत्तस्माद्वा एतस्मादानन्दमयादन्योन्तर आत्मा ब्रह्मेत्यपि निरदेक्ष्यत । न चैवं निर्दिश्यते । एतदुक्तं भवति । ब्रह्मविदाप्नोति परम् (तै. २।१।१) इति प्रक्रान्तं ब्रह्म सत्यं ज्ञानमनन्तं ब्रह्म (तै. २।१।१) इति लक्षणतः सकलेतरव्यावृत्ताकारं प्रतिपाद्य तदेव तस्माद्वा एतस्मादात्मनः (तै. २।१।१) इत्यात्मशब्देन निर्दिश्य तस्य सर्वान्तरात्मत्वेनात्मत्वं व्यञ्जयद्वाक्यमन्नमयादिषु तत्तदन्तरात्मतयात्मत्वेन निर्दिष्टान्प्राणमयादीनतिक्रम्यान्योन्तर आत्मानन्दमयः (तै. २।५) इत्यात्मशब्देन निर्देशमानन्दमये समापयति । अत आत्मशब्देन प्रक्रान्तं ब्रह्मानन्दमयमिति निश्चीयत इति ।

ननु च ब्रह्म पुच्छं प्रतिष्ठा (तै. २।५) इत्युक्त्वा
असन्नेव स भवति असद्ब्रह्मेति वेद चेत् ।
अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः ॥ (तै. २।६)

इति ब्रह्मज्ञानाज्ञानाभ्यामात्मनः सद्भावासद्भावौ दर्शयति नानन्दमयज्ञानाज्ञानाभ्याम् । न चानन्दमयस्य प्रियमोदादिरूपेण सर्वलोकविदितस्य सद्भावासद्भावज्ञानाशङ्का युक्ता । अतो नानन्दमयमधिकृत्यायं श्लोक उदाहृतः । तस्मादानन्दमयादन्यद्ब्रह्म । नैवम् । इदं पुच्छं प्रतिष्ठा (तै. २।१) । पृथिवी पुच्छं प्रतिष्ठा (तै. २।२) । अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा (तै. २।३) ।

---

1. D. reads अखण्डम् for अखण्डरूपम्.
8. C reads सर्वान्तरत्वेन, D सर्वान्तरात्मकत्वेन, for सर्वान्तरात्मत्वेन.
9. D. reads तत्तदन्तरात्मकत्वेन for तत्तदन्तरात्मतयात्मत्वेन; E. om. तत्
18. D. reads अज्ञान after ज्ञान.

http://acharya.org

महः पुच्छं प्रतिष्ठा (तै. ३।३) इत्येवमुक्त्वा तत्रतत्रोदाहृता अन्नाद्वै प्रजाः प्रजायन्ते (तै. २।२) इत्यादयः श्लोका यथा न पुच्छमात्रप्रतिपादनपरा अपि त्वन्नमयादिपुरुषमात्रप्रतिपादनपरा एवमत्राप्यानन्दमयस्यायमसन्नेव (तै. २।६) इति श्लोको नानन्दमयव्यतिरिक्तस्य पुच्छस्य। आनन्दमयस्यैव ब्रह्मत्वेपि प्रियमोदादिरूपेण रूपितस्यापरिच्छिन्नानन्दमयस्य सद्भावासद्भावज्ञानाज्ञानशङ्का युक्तैव। पुच्छब्रह्मणोप्यपरिच्छिन्नानन्दतयैव ह्यसिद्धता। शिरःप्रभृत्यवयवित्वाभावाद्ब्रह्मणो नानन्दमयं ब्रह्मेति चेद्ब्रह्मणः पुच्छत्वप्रतिष्ठात्वाभावात्पुच्छमपि ब्रह्म न भवेत्। अथाविद्यापरिकल्पितस्य वस्तुनस्तस्याश्चाश्रयभूतत्वाद्ब्रह्मणः पुच्छं प्रतिष्ठेति रूपणमात्रमित्युच्येत हन्त तर्ह्यसुखाद्व्यावृत्तस्यानन्दमयस्य ब्रह्मणः प्रियशिरस्त्वादिरूपणं भविष्यति। एवं च सत्यं ज्ञानमनन्तं ब्रह्म (तै. २।१) इति विकारास्पदजडपरिच्छिन्नवस्त्वन्तराद्व्यावृत्तस्यासुखाद्व्यावृत्तिरानन्दमय इत्युपदिश्यते। अतश्चाखण्डैकरसानन्दरूपे ब्रह्मण्यानन्दमय इति मयट् प्राणमय इव स्वार्थिको द्रष्टव्यः। तस्मादविद्यापरिकल्पितविविधविचित्रदेवादिभेदभिन्नस्य जीवात्मनः स्वा-

---

1. D. om मह पुच्छ प्रतिष्ठा.
3 C om मात्र after पुरुष.
5 B. reads आनन्दस्य foı आनन्दमयस्य
6. C om अपि, C reads तस्य after रूपितस्य; B. D. read आनन्दस्य for आनन्दमयस्य.
7. E om. असद्भाव; B. ıeads आशङ्का for शङ्का.
8. B. D read अप्रसिद्धता for असिद्धता; D. reads अवयवत्व for अवयवित्व.
9. D om. ब्रह्मणः.
11. B. reads निरूपणम् for रूपणम्; B. reads उच्यते for उच्येत.
14. C. reads वस्त्वन्तर for वस्त्वन्तरात्.
15. B. reads आनन्दरूप for आनन्दरूपे.

http://acharya.org

भाविकं स्वरूपमखण्डैकरसं सुखैकतानमानन्दमय इत्युच्यत इत्यानन्दमयः प्रत्यगात्मेति । एवं प्राप्ते प्रचक्ष्महे ।

आनन्दमयोभ्यासात् । आनन्दमयः परमात्मा । कुतः । अभ्यासात् । सैषानन्दस्य मीमांसा भवति (तै. २।८) इत्यारभ्य यतो वाचो निवर्तन्ते (तै. २।९) इत्येवमन्तेन वाक्येन शतगुणितोत्तरक्रमेण निरतिशयदशाशिरस्कोभ्यस्यमान आनन्दोनन्तदुःखमिश्रपरिमितसुखलवभागिनि जीवात्मन्यसंभवन्निखिलहेयप्रत्यनीकं कल्याणैकतानं सकलेतरविलक्षणं परमात्मानमेव स्वाश्रयमावेदयति । यथाह । तस्माद्वा एतस्माद्विज्ञानमयात् । अन्योन्तर आत्मानन्दमयः (तै. २।५) इति । विज्ञानमयो हि जीवः । न बुद्धिमात्रम् । मयट्प्रत्ययेन व्यतिरेकप्रतीतेः । प्राणमये त्वगत्या स्वार्थिक आश्रीयते । इह तु तद्वतो जीवस्य संभवान्नानर्थकत्वं न्याय्यम् । बद्धो मुक्तश्च प्रत्यगात्मा ज्ञातैवेत्यभ्यधिष्महि (पृ. ४१) । प्राणमयादौ तु मयडर्थासंभवोनन्तरमेव वक्ष्यते ।

कथं तर्हि विज्ञानमयविषये श्लोके विज्ञानं यज्ञं तनुते (तै. २।५) इति केवलविज्ञानशब्दोपादानमुपपद्यते । ज्ञातुरेवात्मनः स्वरूपमपि स्वप्रकाशतया विज्ञानमित्युच्यत इति न दोषः ।

---

1. B. reads रूपम् for स्वरूपम्.
2. B om. इति after प्रत्यगात्मा.
8. D. reads प्रत्यनीककल्याणैकतान for प्रत्यनीक कल्याणैकतानम्.
9. B. reads तथा हि, D यदाह, for यथाह
12. B. D. read स्वार्थिकता for स्वार्थिक
13. B reads आनर्थक्यम्, C. स्वार्थिकत्वम्, for अनर्थकत्वम्.
14. D. reads ज्ञेतः for ज्ञाता; B. reads च for तु; C. reads सभव. for असभवः.
16. D. E. read विषय for विषये.

http://acharya.org

चेत् । कस्य भोः । किं हेयसंबन्धस्य किं वा हेयप्रत्यनीककल्याणैकतानस्वभावस्य । हेयप्रत्यनीककल्याणैकतानस्य ब्रह्मणोनाद्यविद्याश्रयत्वेन हेयसंबन्धप्रतिभासो मिथ्यारूप इति चेत् । विप्रतिषिद्धमिदमभिधीयते । ब्रह्मणो हेयप्रत्यनीककल्याणैकतानत्वमनाद्यविद्याश्रयत्वेनानन्तदुःखविषयमिथ्याप्रतिभासाश्रयत्वं चेति । अविद्याश्रयत्वं तत्कार्यदुःखप्रतिभासाश्रयत्वं चैव हि हेयसंबन्धः । तत्संबन्धित्वं तत्प्रत्यनीकत्वं च विरुद्धमेव । तथापि तस्य मिथ्यात्वान्न विरोध इति मा वोचः । मिथ्याभूतमप्यपुरुषार्थ एव यन्निरसनाय सर्वे वेदान्ता आरभ्यन्त इति ब्रूषे । निरसनीयापुरुषार्थयोगश्च हेयप्रत्यनीककल्याणैकतानतया विरुध्यते ।

किं कुर्मो येनाश्रुतं श्रुतं भवति (छा. ६।१।१) इत्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय सदेव सोम्येदमग्र आसीत् (छा. ६।२।१) इत्यादिना निखिलजगदेककारणतां तदैक्षत बहु स्याम् (छा. ६।२।३) इति सत्यसंकल्पतां च सर्वज्ञस्य सर्वशक्तेरनवधिकातिशयासंख्येयकल्याणगुणस्य सकलकारणभूतस्य ब्रह्मणः प्रतिपाद्य तस्यैव ब्रह्मणस्तत्त्वमसि (छा. ६।८।७) इति सामानाधिकरण्येनानन्तदुःखाश्रयजीवैक्यं प्रतिपादितम् । तदन्यथानुपपत्त्या ब्रह्मण एवाविद्याश्रयत्वादि परिकल्पनीयमिति चेत् । श्रुतोपपत्तयेप्यनुपपन्नं विरुद्धं च न कल्पनीयम् । अथ हेयसंबन्ध एव पारमार्थिकः । कल्याणैकतानता तु मिथ्याभूता । हन्तैवं तापत्रयाभिहतचेतनोज्जिजीविषया प्रवृत्तं शास्त्रं

---

7. B. reads हेयप्रत्यनीकत्वम् for तत्प्रत्यनीकत्वम्.

14. C. E. om. सर्वज्ञस्य सर्वशक्तेरनवधिकातिशयासंख्येयकल्याणगुणस्य सकलकारणभूतस्य.

18. B. reads परिकल्पितम् for परिकल्पनीयम्.

20. C. reads अपारमार्थिकः for पारमार्थिकः; B. D. read एकस्वभावता for एकतानता.

http://acharya.org

तापत्रयाभिहतिरेव तस्य पारमार्थिकी कल्याणैकतानस्वभावस्तु भ्रान्तिकल्पित इति बोधयत्सम्यगुज्जीवयति ।

अथैतद्दोषपरिजिहीर्षया ब्रह्मणो निर्विशेषचिन्मात्रस्वरूपातिरिक्तजीवत्वदुःखित्वादिकं सत्यसंकल्पत्वकल्याणगुणाकरत्वजगत्कारणत्वाद्यपि मिथ्याभूतमिति कल्पनीयमिति चेत् । अहो भवतां वाक्यार्थपर्यालोचनकुशलता । एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानं सर्वस्य मिथ्यात्वे सर्वस्य ज्ञातव्यस्याभावान्न संपत्स्यते । यथैकविज्ञानं परमार्थविषयं तथैव सर्वविज्ञानमपि यदि परमार्थविषयं तदन्तर्गतं च तदा तज्ज्ञानेन सर्वविज्ञानमिति शक्यते वक्तुम् । न हि परमार्थशुक्तिज्ञानेन तदाश्रयमपरमार्थरजतं ज्ञातं भवति ।

अथोच्येतैकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया अयमर्थः । निर्विशेषवस्तुमात्रमेव सत्यमन्यदसत्यमिति । न तर्हि येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम् (छा. ६।१।१) इति श्रूयेत । येन श्रुतेनाश्रुतमपि श्रुतं भवतीति ह्यस्य वाक्यस्यार्थः । कारण तयोपलक्षितस्य निर्विशेषवस्तुमात्रस्यैव सद्भावश्चेत्प्रतिज्ञातो यश्सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातम् (छा. ६।१।१ इति दृष्टान्तोपि न घटते । तत्र मृत्पिण्डविज्ञानेन हि तद्विका-

---

1. D. reads अस्य for तस्य.
6. D. reads सर्वविज्ञानं प्रतिज्ञातम् for सर्वविज्ञानप्रतिज्ञानम्.
10. B. D. read शुक्तिका for शुक्ति.
11. D. reads रजतज्ञानम् for रजत ज्ञातम्.
13. D. E. read सन्मात्रम् for वस्तुमात्रम्; D. om. न before तर्हि.
14. D. reads न before श्रूयेत.
15. D. reads तस्य for ह्यस्य.
16. D. E. read उपलक्षित for उपलक्षितस्य.
18. B. D. om. तत्र; E. om. हि.

http://acharya.org

रस्य ज्ञातता निदर्शिता । तत्रापि तद्विकारस्यासत्यताभिहितेति चेत् । मृद्विकारस्य रज्जुसर्पादिवदसत्यत्वं शुश्रूषोरसिद्धमिति प्रतिज्ञातार्थसंभावनाप्रदर्शनाय यथा सोम्य (छा. ६।१।१) इति प्रसिद्धवदुपन्यासो न युज्यते । न च तत्त्वमस्यादिवाक्यजन्यज्ञानोत्पत्तेः प्राग्विकारजातस्यासत्यतामापादयत्तर्कानुगृहीतमननुगृहीतं वा प्रमाणमुपलभामहे इत्ययमर्थस्तदनन्यत्वमारम्भणशब्दादिभ्यः (ब्र. सू. २।१।१५) इत्यत्र वक्ष्यते ।

तथा सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् (छा. ६।२।१)। तदैक्षत। बहुस्यां प्रजायेयेति। तत्तेजोसृजत(छा.६।२।३)। न्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे याकरवाणि (छा. ६।३।२) । सन्मूलाः सोम्येमाः सर्वाः जाः सदायतनाः सत्प्रतिष्ठाः (छा. ६।८।४) । ऐतदात्म्यमिसर्वम् (छा. ६।८।७) इत्यादिनास्य जगतः सदात्मकता सृष्टेः र्वकाले नामरूपविभागप्रहाणं जगदुत्पत्तौ सच्छब्दवाच्यस्य रणः स्वव्यतिरिक्तनिमित्तान्तरानपेक्षत्वं सृष्टिकालेहमेवानन्तत्रसरूपेण बहु स्यामित्यनन्यसाधारणः संकल्पविशेषो संकल्पमनन्तविचित्रतत्त्वानां विलक्षणक्रमविशेषविशिष्टा ष्टः समस्तेष्वचेतनेषु वस्तुषु स्वात्मकजीवानुप्रवेशेनानन्तनामपव्याकरणं स्वव्यतिरिक्तस्य समस्तस्य स्वमूलत्वं स्वायतनत्वं वर्त्यत्वं स्वेनैव जीवनं स्वप्रतिष्ठितत्वमित्याद्यनन्तविशेषाः

1. B. D. om. तत् before विकारस्य; B. D. read अभिप्रेता for अभिहिता.

2. D. reads अप्रसिद्धम् for असिद्धम्.

14. B. D. read अग्रहणम् for प्रहाणम्.

17. C. reads विशेषा for विशेषविशिष्टा.

18. C. E. read तत् before नामरूप.

19. C. E. read स्वव्यतिरिक्त for स्वव्यतिरिक्तस्य.

20. C. reads प्रतिष्ठाम्, D. प्रतिष्ठित्वम्, for प्रतिष्ठितत्वम्.

http://acharya.org

शास्त्रैकसमधिगम्याः प्रतिपादिताः । तत्संबन्धितया प्रकरणान्तरेष्वप्यपहतपाप्मत्वादिनिरस्तनिखिलदोषतासर्वज्ञतासर्वेश्वरत्वसत्यकामत्वसत्यसंकल्पत्वसर्वानन्दकरणनिरतिशयानन्दादयः सकलेतरप्रमाणाविषयाः सहस्रशः प्रतिपादिताः । एवमनन्यगोचरानन्तविशेषणविशिष्टप्रकृतब्रह्मपरामर्शितच्छब्दस्य निर्विशेषवस्तुमात्रोपदेशपरत्वमसंगतत्वेनोन्मत्तप्रलपितायते । त्वंपदं च संसारित्वविशिष्टजीववाचि । तस्यापि निर्विशेषस्वरूपोपस्थापनपरत्वे स्वार्थः परित्यक्तः स्यात् । निर्विशेषप्रकाशस्वरूपस्य च वस्तुनो ह्यविद्यया तिरोधानं स्वरूपनाशप्रसङ्गादिभि संभवतीति पूर्वमेवोक्तम् । एवं च सति समानाधिकरणप्रवृ योस्तत्त्वमिति द्वयोरपि पदयोर्मुख्यार्थपरित्यागेन लक्षणा समाश्रयणीया ।

अथोच्येत समानाधिकरणप्रवृत्तानामेकार्थप्रतिपादनपरत विशेषणांशे तात्पर्यासंभवादेव विशेषणनिवृत्तेर्वस्तुमात्रैकत्व तिपादनान्न लक्षणाप्रसङ्गः । यथा नीलमुत्पलमिति पदद्वय विशेष्यैक्यप्रतिपादनपरत्वेन नीलत्वोत्पलत्वस्वरूपविशेषणद्वय विवक्ष्यते । तद्विवक्षायां हि नीलत्वविशिष्टाकारेणोत्पल विशिष्टाकारस्यैकत्वप्रतिपादनं प्रसज्यते । तत्तु न संभवति न हि नैल्यविशिष्टाकारेण तद्वस्तूत्पलपदेन विशिष्यते जातिगुणयोरन्योन्यसमवायप्रसङ्गात् । अतो नीलत्वोत्पलत्वो

---

3. C. E. read आनन्दयोगादयः for आनन्दादय.

6. D. reads प्रलपित येन, B. प्रलपित चेत्, for प्रलपितायते.

11. B. D. read पदयोर्द्वयोरपि for द्वयोरपि पदयोः; E. om. च.

16. B. D. read एकत्व for ऐक्य; B. D. read परत्वे for परत्वे B. reads नीलोत्पलत्वरूप, D. नीलत्वोत्पलत्वरूप, for नीलत्वोत्पलत्वस्वरूप.

18. D. reads प्रसज्येत for प्रसज्यते.

http://acharya.org

लक्षितवस्त्वैक्यमात्रं सामानाधिकरण्येन प्रतिपाद्यते । तथा ोयं देवदत्त इत्यतीतकालविप्रकृष्टदेशविशिष्टस्य तेनैव रूपेण ंनिहितदेशवर्तमानकालविशिष्टतया प्रतिपादनानुपपत्तेरुभय- शकालोपलक्षितस्वरूपमात्रैक्यं सामानाधिकरण्येन प्रतिपा- ते । यद्यपि नीलमित्याद्येकपदश्रवणे प्रतीयमानं विशेषणं सा- ानाधिकरण्यवेलायां विरोधान्न प्रतिपाद्यते तथापि वाच्येर्थे धानांशस्य प्रतिपादनान्न लक्षणा । अपि तु विशेषणांशस्यावि- क्षामात्रम् । सर्वत्र सामानाधिकरण्यस्यैष एव स्वभाव इति कश्चिद्दोष इति ।

तदिदमसारम् । सर्वेष्वेव वाक्येषु पदानां व्युत्पत्तिसिद्धार्थ- थर्गविशेषमात्रं प्रत्याय्यम् । तत्र समानाधिकरणप्रवृत्ताना- ञ्च नीलादिपदानां नैल्यादिविशिष्ट एवार्थो व्युत्पत्तिसिद्धः प- तरार्थसंसृष्टोभिधीयते । यथा नीलमुत्पलमानयेत्युक्ते नी- ल्यादिविशिष्टमेवानीयते यथा च विन्ध्याटव्यां मदमुदितो ङ्गगणस्तिष्ठतीति पदद्वयावगतविशेषणविशिष्ट एवार्थः प्रती- यते एवं वेदान्तवाक्येष्वपि सामानाधिकरण्यनिर्देशेषु तत्तद्वि- शेषणविशिष्टमेव ब्रह्म प्रतिपत्तव्यम् । न च विशेषणविवक्षाया- तरविशिष्टाकारं वस्त्वन्येन विशेषितव्यम् । अपि तु सर्वैरपि शेषणैः स्वरूपमेव विशेष्यम् । तथा हि । भिन्नप्रवृत्तिनिमि- त्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यम् । अन्व- निवृत्त्या वा पदान्तरप्रतिपाद्याकारादाकारान्तरयुक्ततया

---

2. C. reads तत् for अतीत.

8. D. om. एव.

11. C. E. read वृत्तानाम् for प्रवृत्तानाम्.

15. C. reads पदद्वयस्य for पदद्वय.

16. D. reads समानाधिकरण for सामानाधिकरण्य.

18. B. D. om. अपि after सर्वैः.

http://acharya.org

तस्यैव वस्तुनः पदान्तरप्रतिपाद्यत्वं हि सामानाधिकरण्यकार्यम् । यथा देवदत्तः श्यामो युवा लोहिताक्षोदीनोकृपणोनवद्य इति । यत्र त्वेकस्मिन्वस्तुनि समन्वयायोग्यं विशेषणद्वयं समानाधिकरणपदनिर्दिष्टं तत्राप्यन्यतरत्पदममुख्यवृत्तमाश्रीयते न द्वयम् । यथा गौर्बाह्लीक इति । नीलोत्पलादिषु तु विशेषणद्वयान्वयाविरोधादेकमेवोभयविशिष्टं प्रतिपाद्यते ।

अथ मनुष एकविशेषणप्रतिसंबन्धित्वेन निरूप्यमाणं वस्तु विशेषणान्तरप्रतिसंबन्धित्वाद्विलक्षणमिति घटपटयोरिवैकविभक्तिनिर्देशेप्यैक्यप्रतिपादनासंभवात्समानाधिकरणशब्दस्य न विशिष्टप्रतिपादनपरत्वम् । अपि तु विशेषणमुखेन स्वरूपमुपस्थाप्य तदैक्यप्रतिपादनपरत्वमेवेति । स्यादेतदेवं यदि विशेषणद्वयप्रतिसंबन्धित्वमात्रमेवैक्यं निरुन्ध्यात् । न चैतदस्ति । एकस्मिन्धर्मिण्युपसंहर्तुमयोग्यधर्मद्वयविशिष्टत्वमेव ह्येकत्वं निरुणद्धि । अयोग्यता च प्रमाणान्तरसिद्धा घटत्वपटत्वयोः । नीलमुत्पलमित्यादिषु तु दण्डित्वकुण्डलित्ववद्रूपवत्त्वरसवत्त्वगन्धवत्त्वादिवच्च विरोधो नोपलभ्यते । न केवलमविरोध एव । प्रवृत्तिनिमित्तभेदेनैकार्थनिष्ठत्वरूपं सामानाधिकरण्यमुपपादयत्येव धर्मद्वयविशिष्टताम् । अन्यथा स्वरूपमात्रैक्येनेकपदप्रवृत्तौ निमित्ताभावात्सामानाधिकरण्यमेव न स्यात् । विशे-

1. D. om. हि.
5. D. reads वाहकः for वाह्लीकः.
7. B. C. om. वस्तु after निरूप्यमाणम्.
8. D reads एव for इव.
14 B. reads पटत्वघटत्वयोः for घटत्वपटत्वयोः.
15. B. reads रूपरसगन्ध for रूपवत्त्वरसवत्त्वगन्धवत्त्व.
17. D. E. read बोधकत्व for निष्ठत्व.
18. B. reads विशिष्टता for विशिष्टताम्.

http://acharya.org

षणानां स्वसंबन्धानादरेण वस्तुस्वरूपोपलक्षणपरत्वे सत्येकेनैव वस्तूपलक्षितमित्युपलक्षणान्तरमनर्थकमेव । उपलक्षणान्तरोपलक्ष्याकारभेदाभ्युपगमे तेनाकारेण सविशेषत्वप्रसङ्गः । सोयं देवदत्त इत्यत्रापि न लक्षणागन्धो विद्यते । विरोधाभावात् । देशान्तरसंबन्धितयातीतस्य संनिहितदेशसंबन्धितया वर्तमानत्वाविरोधात् । अत एव हि सोयमिति प्रत्यभिज्ञया कालद्वयसंबन्धिनो वस्तुन ऐक्यमुपपाद्यते वस्तुनः स्थिरत्ववादिभिः। अन्यथा प्रतीतिविरोधे सति सर्वेषां क्षणिकत्वमेव स्यात्। देशद्वयसंबन्धविरोधस्तु कालभेदेन परिह्रियते ।

यतः समानाधिकरणपदानामनेकविशेषणविशिष्टैकार्थवाचित्वमत एवारुणयैकहायन्या पिङ्गाक्ष्या गवा सोमं क्रीणाति (तै. सं. ६।१।६)इत्यादावारुण्यादिविशिष्टैकहायन्याः क्रयः साध्यतया विधीयते । तदुक्तम् । अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यात् (जै. सू. ३।१।१२) इति ।

तत्रैवं पूर्वपक्षी मन्यते । यद्यप्यरुणयेति पदमाकृतेरिव गुणस्यापि द्रव्यप्रकारतैकस्वभावत्वाद्द्रव्यपर्यन्तमेवारुणिमानमभिदधाति तथाप्येकहायन्यन्वयनियमोरुणिम्नो न संभवति ।

---

3. C. reads एव after तेन

4. B D. read लक्षणागन्धो न for न लक्षणागन्ध.

6. C. om. हि, B. reads प्रत्यभिज्ञाया for प्रत्यभिज्ञया.

7. C reads प्रतिपाद्यते for उपपाद्यते.

11 D. E. om. गवा

12 D. reads इत्यादि for इत्यादौ, B. reads क्रयसाध्यता for क्रय. साध्यतया, D. reads एकहायन्या क्रयसाध्यत्वमभिधीयते for एकहायन्या क्रय. साध्यतया विधीयते.

15 B. D. read आकृति. for आकृतेः.

16. D. reads प्रकारतया for प्रकारता.

एकहायन्या क्रीणाति तत्रारुणयेत्यर्थद्वयविधानासंभवात् । ततश्चारुणयेति वाक्यं भित्त्वा प्रकरणविहितसर्वद्रव्यपर्यन्तमेवारुणिमानमविशेषेणाभिदधाति । अरुणयेति स्त्रीलिङ्गनिर्देशः प्रकरणविहितसर्वलिङ्गकद्रव्याणां प्रदर्शनार्थः । तस्मादेकहायन्यन्वयनियमोरुणिम्नो न स्यादिति ।

अत्राभिधीयते । अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यात् । अरुणयैकहायन्येत्यारुण्यविशिष्टद्रव्यैकहायनीद्रव्यवाचिपदयोः सामानाधिकरण्येनार्थैकत्वे सिद्धे सत्येकहायनीद्रव्यारुण्यगुणयोररुणयेति पदेनैव विशेषणविशेष्यभावेन संबन्धितयाभिहितयोः क्रयाख्यैककर्मान्वयाविरोधादरुणिम्नः क्रयसाधनभूतैकहायन्यान्वयनियमः स्यात् । यद्येकहायन्याः क्रयसंबन्धवदरुणिमसंबन्धोपि वाक्यावसेयः स्यात्तदा वाक्यार्थद्वयविधानं स्यात् । न चैतदस्ति । अरुणयेति पदेनैवारुणिमविशिष्टद्रव्यमभिहितम् । एकहायनीपदसामानाधिकरण्येन तस्यैकहायनीत्वमात्रमवगम्यते न गुणसंबन्धः । विशिष्टद्रव्यैक्यमेव हि सामानाधिकरण्यस्यार्थः । भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यमिति हि सामानाधिकरण्यलक्षणम् । अत एव हि रक्तः पटो भवतीत्यादिष्वैकार्थ्यादेकवाक्यत्वम् ।

---

4. B. D read लिङ्ग for लिङ्गक.
10. D. reads विरोधात् for अविरोधात्
11. D E read एकहायन्य° for एकहायन्या°, B. D. read एकहायन्या for एकहायन्या°
12. D. reads वाक्यस्य for वाक्य after अपि.
13 C reads अरुणा for अरुणयेति.
16 D E read एक for एकस्मिन्
17 B. reads प्रवृत्ति for वृत्ति, C. om. हि after इति; D. E. read तत् for सामानाधिकरण्य after हि
18 C. om. हि after एव.

पटस्य भवनक्रियासंबन्धे हि वाक्यव्यापारः । रागसंबन्धस्तु रक्तपदेनैवाभिहितः । रागसंबन्धिद्रव्यं पट इत्येतावन्मात्रं सामानाधिकरण्यावसेयम् । एवमेकेन गुणेन द्वाभ्यां बहुभिर्वा तेन तेन पदेन समस्तेन व्यस्तेन वा विशिष्टमुपस्थाप्य सामानाधिकरण्येन सर्वविशेषणविशिष्टोर्थ एक इति ज्ञापयित्वा तस्य क्रियासंबन्धाभिधानमविरुद्धम् । देवदत्तः श्यामो युवा लोहिताक्षो दण्डी कुण्डली तिष्ठति । शुक्लेन वाससा यवनिकां संपादयेत् । नीलमुत्पलमानय । गामानय शुक्लां शोभनाक्षीम् । अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेत् (तै. सं. २।२।२) इति । एवमरुणयैकहायन्या पिङ्गाक्ष्या सोमं क्रीणातीति । एतदुक्तं भवति । यथा काष्ठैः स्थाल्यामोदनं पचेदित्यनेककारकविशिष्टैका क्रिया युगपत्प्रतीयते तथा समानाधिकरणपदसंघाताभिहितमेकैकं कारकं तत्तत्कारकप्रतिपत्तिवेलायामेवानेकविशेषणविशिष्टं युगपत्प्रतिपन्नं क्रियायामन्वेतीति न कश्चिद्विरोधः खादिरैः शुष्कैः काष्ठैः समपरिमाणे भाण्डे पायसं शाल्योदनं समर्थः पाचकः पचेदित्यादिष्विति ।

यत्तूपात्तद्रव्यकवाक्यस्थगुणशब्दः केवलगुणाभिधायीत्यरुणयेति पदेन केवलगुणस्यैवाभिधानमिति तन्नोपपद्यते । लोकवेदयोर्द्रव्यवाचिपदसमानाधिकरणस्य गुणवाचिनः क्वचिदपि

---

3. D. E read सामानाधिकरण्येन for सामानाधिकरण्य.

4. B. D. read विशिष्टत्वम् for विशिष्टम्

5 B. D. read विशिष्ट for विशिष्ट, B. reads एव after एक.

8. C E. read नीलोत्पलमानय after उत्पलमानय.

9 B. om इति after निर्वपेत्.

15. B. reads समपरिमाणैः for समपरिमाणे.

16 C. reads पचति for पचेत्

17. C. D. read उक्तम् after यत्तु.

केवलगुणाभिधानादर्शनात् । उपात्तद्रव्यकवाक्यस्थं गुणपदं केवलगुणाभिधायीत्यप्यसंगतम् । पटः शुक्ल इत्यादिषूपात्तद्रव्यकेपि गुणविशिष्टस्यैवाभिधानात् । पटस्य शुक्ल इत्यत्र शौक्ल्यविशिष्टपटाप्रतिपत्तिरसमानविभक्तिनिर्देशकृता न पुनरुपात्तद्रव्यकत्वकृता । तत्रैव पटस्य शुक्लो भाग इत्यादिषु समानविभक्तिनिर्देशे शौक्ल्यविशिष्टद्रव्यं प्रतीयते ।

यत्पुनः क्रयस्यैकहायन्यवरुद्धतयारुणिम्नः क्रियान्वयो न संभवतीति तदपि विरोधिगुणरहितद्रव्यवाचिपदसमानाधिकरणगुणपदस्य तदाश्रयगुणाभिधानेन क्रियापदान्वयाविरोधादसंगतम् । राद्धान्ते चोक्तन्यायेनारुणिम्नः शाब्दद्रव्यान्वये सिद्धे द्रव्यगुणयोः क्रयसाधनत्वानुपपत्त्यार्थात्परस्परान्वयः सिध्यतीत्यप्यसंगतम् । अतो यथोक्त एवार्थः । तस्मात्तत्त्वमस्यादिसामानाधिकरण्ये पदद्वयाभिहितविशेषणापरित्यागेनैवैक्यप्रतिपादनं वर्णनीयम् । तत्त्वनाद्यविद्योपहितानवधिकदुःखभागिनः शुद्ध्यशुद्ध्युभयावस्थाच्चेतनादर्थान्तरभूतमशेषहेयप्रत्यनीकानवधिककल्याणगुणगणैकतानं परमात्मानमनभ्युपगच्छतो न संभवति ।

अभ्युपगच्छतोपि समानाधिकरणपदानां यथावस्थितविशेष-

---

2. B. D. om अपि after इति, B reads शुक्ल पट for पट शुक्ल.

4. B. reads अप्रतीति for अप्रतिपत्ति, C reads प्रतिपत्ति समान for अप्रतिपत्तिरसमान.

6. D E. read आदि after शौक्ल्य

7. B D read एकहायन्या विरुद्धतया for एकहायन्यवरुद्धतया, C. reads क्रय for क्रिया

9. E. om. गुण before पदस्य, C. reads अभिधाने for अभिधानेन.

10 B reads उक्तेन for उक्त, B. D. read शाब्दे for शाब्द.

13. C. om. एव.

16. B. om. गुणगण; D. om. गण.

http://acharya.org

णविशिष्टैक्यप्रतिपादनपरत्वाश्रयणे त्वंपदप्रतिपन्नसकलदोषभागित्वं परस्य प्रसज्येतेति चेत्। नैतदेवम्। त्वंपदेनापि जीवान्तर्यामिणः परस्यैवाभिधानात्। एतदुक्तं भवति। सच्छब्दाभिहितं निरस्तनिखिलदोषगन्धं सत्यसंकल्पत्वमिश्रानवधिकातिशयासंख्येयानन्तकल्याणगुणगणं समस्तकारणभूतं परं ब्रह्म बहु स्याम् (छा. ६।२।३) इति संकल्प्य तेजोबन्नप्रमुखं कृत्स्नं जगत्सृष्ट्वा तस्मिन्देवादिविचित्रसंस्थानसंस्थिते जगति चेतनं जीववर्गं स्वकर्मानुगुणेषु शरीरेष्वात्मतया प्रवेश्य स्वयं च स्वेच्छयैव जीवान्तरात्मतयानुप्रविश्यैवंभूतेषु स्वपर्यन्तेषु देवाद्याकारेषु संघातेषु नामरूपे व्याकरोत्। एवंरूपसंघातस्यैव वस्तुत्वं शब्दवाच्यत्वं चाकरोदित्यर्थः। अनेन जीवेनात्मना (छा. ६।३।२) जीवेन मयेति निर्देशो जीवस्य ब्रह्मात्मकत्वं दर्शयति। ब्रह्मात्मकत्वं च जीवस्य जीवान्तरात्मतया ब्रह्मणोनुप्रवेशादित्यवगम्यते। इदं सर्वमसृजत। यदिदं किं च। तत्सृष्ट्वा। तदेवानुप्राविशत्। तदनुप्रविश्य। सच्च त्यच्चाभवत् (तै. २।६।१) इत्यत्रेदं सर्वमिति निर्दिष्टं चेतनाचेतनं वस्तुद्वयं सत्त्यच्छब्दाभ्यां विज्ञाना-

---

1. B reads आश्रयणात् for आश्रयणे
2. B reads प्रसज्यते for प्रसज्येत
3. C. reads अभिहित for अभिहितम्.
4. D reads गन्ध for गन्धम्, B. D read सकल्प for सकल्पत्व; B om अनवधिकातिशयासख्येय; D. om असख्येयानन्त.
5. B. D. read गुणम् for गुणगणम्, D. om. परम्.
7. B reads सस्थापन for सस्थान.
9. C. om. एव, B. reads प्रविश्य for अनुप्रविश्य.
10. B om. सघातेषु
12. B om जीवेन मया, D reads प्रदर्शयति for दर्शयति.
13. C. om इति.
16. C. reads अचेतन for अचेतनम्.

http://acharya.org

विज्ञानशब्दाभ्यां च विभज्य निर्दिश्य चिद्वस्तुन्यपि ब्रह्मणोनुप्रवेशाभिधानात् । अत एवं नामरूपव्याकरणात्सर्वे वाचकाः शब्दा अचिज्जीवविशिष्टपरमात्मवाचिन इत्यवगतमिति ।

किं चैतदात्म्यमिदं सर्वम् (छा. ६।८।७) इति चेतनमिश्रं प्रपञ्चमिदं सर्वमिति निर्दिश्य तस्यैष आत्मेति प्रतिपादितम् । एवं च सर्वं चेतनाचेतनं प्रति ब्रह्मण आत्मत्वेन सर्वं चेतनं जगत्तस्य शरीरं च भवति ।

तथा च श्रुत्यन्तराणि । अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा (तै. आ. ३।११।२) । यः पृथिव्यां तिष्ठन्पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति स त आत्मान्तर्याम्यमृतः (बृ. ३।७।३) इति प्रारभ्य य आत्मनि तिष्ठन्नात्मनोन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्मान्तर्याम्यमृतः (बृ. ३।७।२२) इत्यादि । यः पृथिवीमन्तरे संचरन्यस्य पृथिवी शरीरं योपामन्तरे संचरन्यस्याप. शरीरमित्यारभ्य योक्षरमन्तरे संचरन्यस्याक्षरं शरीरं यमक्षरं न वेदैष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायणः (सुबा.) इत्यादीनि सचेतनं जगत्तस्य शरीरत्वेन निर्दिश्य तस्यात्मत्वेन परमात्मानमुपदिशन्ति । अतश्चेतनवाचिनोपि शब्दाश्चेतनस्या-

1. C om. निर्दिश्य
2. B reads एव for एवम्
3. B. reads वाचका for वाचिन'
6. B. om च सर्वम्, D reads सर्वं for सर्वम् after च, B D read आत्मत्वे सर्वं सचेतन जगदस्य for आत्मत्वेन सर्वं चेतन जगत्तस्य.
12. B. reads आरभ्य for प्रारभ्य
18 B. reads अस्य for तस्य after जगत्.
19. B. D. read अचेतन after चेतन, B. om अपि after चेतनस्य.

http://acharya.org

ण्यात्मभूतं चेतनशरीरकं परमात्मानमेवाभिदधति। यथाचेतनदेवादिसंस्थानपिण्डवाचिनः शब्दास्तत्तच्छरीरकजीवात्मन एव वाचकाः। चत्वारः पञ्चदशरात्रा देवत्वं गच्छन्तीत्यादिषु देवा भवन्तीत्यर्थः। शरीरस्य शरीरिणं प्रति प्रकारत्वात्। प्रकारवाचिनां च शब्दानां प्रकारिण्येव पर्यवसानाच्छरीराभिधायिनां शब्दानां शरीरिपर्यवसानं न्याय्यम्। प्रकारो हि नामेदमित्थमिति प्रतीयमाने वस्तुनीत्थमिति प्रतीयमानोंऽशः। तस्य तद्वस्त्वपेक्षत्वेन तत्प्रतीतेस्तदपेक्षत्वात्तस्मिन्नेव पर्यवसानं युक्तमिति तस्य प्रतिपादकोपि शब्दस्तस्मिन्नेव पर्यवस्यति। अत एव गौरश्वो मनुष्य इत्यादिप्रकारभूताकृतिवाचिनः शब्दाः प्रकारिणि पिण्डे पर्यवस्यन्तः पिण्डस्यापि चेतनशरीरत्वेन तत्प्रकारत्वात्पिण्डशरीरकचेतनस्यापि परमात्मप्रकारत्वाच्च परमात्मन्येव पर्यवस्यन्तीति सर्वशब्दानां परमात्मैव वाच्य इति परमात्मवाचिशब्देन सामानाधिकरण्यं मुख्यमेव।

ननु खण्डो गौः खण्डः शुक्ल इति जातिगुणवाचिनामेव पदानां द्रव्यवाचिपदैः सह सामानाधिकरण्यं दृष्टम्। द्रव्याणां तु द्रव्यान्तरप्रकारत्वे मत्वर्थीयप्रत्ययो दृष्टो यथा दण्डी कुण्डलीति। नैवम्। जातिर्वा गुणो वा द्रव्यं वा नैतेष्वेकमेव सामानाधिकरण्ये प्रयोजकम्। अन्योन्यस्मिन्व्यभिचारात्। यस्य पदार्थस्य

---

2 B om तत् after तत्

5. D. om. च.

6 B reads च for शब्दानाम्.

11. B. reads अपृथक्सिद्धविशेषणत्वात् after चेतनशरीरत्वेन.

13. D E read वाचक for वाचि.

14. B D. read मुख्यवृत्तम् for मुख्यम्.

18. D reads सामानाधिकरण्य for सामानाधिकरण्ये.

19 B D om पदार्थस्य.

http://acharya.org

कस्यचित्प्रकारतयैव सद्भावस्तस्य तदपृथक्सिद्धिस्थितिप्रतीतिभिस्तद्वाचकानां शब्दानां स्वाभिधेयविशिष्टद्रव्यवाचित्वाद्धर्मान्तरविशिष्टतद्द्रव्यवाचिना शब्देन सामानाधिकरण्यं युक्तमेव । यत्र पुनः पृथक्सिद्धस्य स्वनिष्ठस्यैव द्रव्यस्य कदाचित्कचिद्द्रव्यान्तरप्रकारत्वमिष्यते तत्र मत्वर्थीयप्रत्यय इति निरवद्यम् ।

तदेवं परमात्मनः शरीरतया तत्प्रकारत्वादचिद्विशिष्टस्य जीवस्य जीवनिर्देशविशेषरूपा अहंत्वमित्यादिशब्दाः परमात्मानमेवाचक्षत इति तत्त्वमसि (छा. ६।८।७) इति सामानाधिकरण्येनोपसंहृतम् । एवं च सति परमात्मानं प्रति जीवस्य शरीरतयान्वयाज्जीवगता धर्माः परमात्मानं न स्पृशन्ति । यथा शरीरगता बालत्वयुवत्वादयो धर्मा जीवं न स्पृशन्ति । अतस्तत्त्वमसि (छा. ६।८।७) इति सामानाधिकरण्ये तत्पदं जगत्कारणभूतं सत्यसंकल्पं सर्वकल्याणगुणाकरं निरस्तसमस्तहेयगन्धं परमात्मानमाचष्टे । त्वमिति च तमेव सशरीरजीवशरीरकमाचष्ट इति सामानाधिकरण्यं मुख्यवृत्तं प्रकरणाविरोधः सर्वश्रुत्य-

---

1 D. reads प्रतिपत्तिभि for प्रतीतिभि.

2. C reads वाचिनाम् for वाचकानाम्

3 C om. तत्

4 C. reads सिद्धर्हस्य for सिद्धस्य, D. reads कस्यचित् after द्रव्यस्य B D. om क्वचित्.

5 B. D. read अवगम्यते for इष्यते; D. om. प्रत्यय.

7 E. reads अपि, D अचिद्विशिष्ट, after जीवस्य, C om. निर्देशविशेष, D. reads विशेषनिर्देश for निर्देशविशेष.

8 D. om. एव

10. D reads हेया. for अन्वयात्, D. reads स्व before शरीरगताः.

14. B. D. read सशरीरक for सशरीर.

http://acharya.org

विरोधो ब्रह्मणि निरवद्ये कल्याणैकतानेविद्यादिदोषगन्धाभावश्च। अतो जीवसामानाधिकरण्यमपि विशेषणभूताज्जीवादन्यत्वमेवोपपादयतीति विज्ञानमयाज्जीवादन्य एवानन्दमयः परमात्मा ।

यदुक्तं तस्यैष एव शारीर आत्मा (तै. २।६) इत्यानन्दमयस्य शारीरत्वश्रवणाज्जीवादन्यत्वं न संभवतीति । तदयुक्तम् । अस्मिन्प्रकरणे सर्वत्र तस्यैष एव शारीर आत्मा । यः पूर्वस्य (तै. २।३-४-५) इति परमात्मन एव शारीरात्मत्वाभिधानात् । कथम् । तस्माद्वा एतस्मादात्मन आकाशः संभूतः (तै. २।१) इत्याकाशादिसृज्यवर्गस्य परमकारणत्वेन प्रतिज्ञातजीवव्यतिरेकस्यैकस्य ब्रह्मण आत्मत्वेन व्यपदेशात्तद्व्यतिरिक्ताकाशादीनामन्नमयपर्यन्तानां तच्छरीरत्वमवगम्यते । यस्य पृथिवी शरीरं यस्यापः शरीरं यस्य तेजः शरीरं यस्य वायुः शरीरं यस्याकाशः शरीरं यस्याक्षरं शरीरं यस्य मृत्युः शरीरमेष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायणः (सुबा.)इति सुबालश्रुत्या सर्वतत्त्वानां परमात्मशरीरत्वं स्पष्टमभिधीयते । अतस्तस्माद्वा एतस्मादात्मनः (तै. २।१) इत्यत्रैवान्नमयस्य परमात्मैव शारीर आत्मेत्यवगतः । प्राणमयं प्रस्तुत्याह । तस्यैष एव शारीर आत्मा। यः पूर्वस्य (तै. २।३) इति । पूर्वस्यान्नमयस्य यः शारीर आत्मा श्रुत्यन्तरसिद्धः परमकारणभूतः परमात्मा स एव तस्य

---

1. B. reads निरवद्य for निरवद्ये.
2. C. reads विशेषणभूतजीवादि for विशेषणभूताज्जीवात्.
6. D. reads तस्मिन् for अस्मिन्.
9. C. reads प्रज्ञात for प्रतिज्ञात, B. reads व्यतिरिक्तस्य for व्यतिरेकस्य.
10. E. reads परस्य for एकस्य; C. reads परस्य after एकस्य.
17. D. reads अवगतम् for अवगतः.
19. B. reads कारणभूते for कारणभूत', C. reads एषः for एव.

http://acharya.org

प्राणमयस्यापि शारीर आत्मेत्यर्थः । एवं मनोमयविज्ञानमययोर्द्रष्टव्यम् । आनन्दमये त्वेष एव (तै. २।६) इति निर्देशस्तस्यानन्यात्मकत्वं दर्शयितुम् । तत्कथम् । विज्ञानमयस्यापि पूर्वोक्तया रीत्या परमात्मैव शारीर आत्मेत्यवगतः । एवं सति विज्ञानमयस्य यः शारीर आत्मा स एवानन्दमयस्यापि शारीर आत्मेत्युक्त आनन्दमयस्याभ्यासावगतपरमात्मभावस्य परमात्मनः स्वयमेवात्मेत्यवगम्यते । एवं च स्वव्यतिरिक्तचेतनाचेतनवस्तुजातं स्वशरीरमिति स एव निरुपाधिकः शारीर आत्मा । अत एवेदं परं ब्रह्माधिकृत्य प्रवृत्तं शास्त्रं शारीरकमित्यभियुक्तैरभिधीयते । अतो विज्ञानमयाज्जीवादन्य एव परमात्मानन्दमयः ॥ १३ ॥

आह । नायमानन्दमयो जीवादन्यः । विकारशब्दस्य मयट्प्रत्ययस्य श्रवणात् । मयड्वैतयोः (पा. सू. ४।३।१४३) इति प्रकृत्य नित्यं वृद्धशरादिभ्यः (पा. सू. ४।३।१४४) इति विकारार्थे मयट् स्मर्यते । वृद्धश्चायमानन्दशब्दः । ननु प्राचुर्येपि मयडस्ति । तत्प्रकृतवचने मयट् (पा. सू. ५।४।२१) इति स्मृतेः । यथान्नमयो यज्ञ इति । स एवायं भविष्यति । नैवम् । अन्नमय इत्युपक्रमे विकारार्थत्वं दृष्टम् । अत औचित्यादस्यापि विकारार्थत्वमेव युक्तम् । किं च प्राचुर्यार्थत्वेपि जीवादन्यत्वं न

---

2. B. reads द्रष्टव्यः for द्रष्टव्यम्.

3. C. reads अनन्यात्मत्वम् for अनन्यात्मकत्वम्.

4. B. reads नीत्या for रीत्या; B. reads अवगतम्, D. अवगमः, for अवगतः.

7. B. reads व्यतिरिक्तम् for व्यतिरिक्त; C. reads अचेतनम् for अचेतन.

11. D. reads ननु for आह; C. om. अयम्.

16. D. reads मैवम् for नैवम्.

18. C. om. किं च; D. reads तत् for जीवात्.

http://acharya.org

सिध्यति । तथा हि । आनन्दप्रचुर इत्युक्ते दुःखमिश्रत्वमवर्जनीयम् । आनन्दस्य हि प्राचुर्यं दुःखस्याल्पत्वमवगमयति । दुःखमिश्रत्वमेव हि जीवत्वम् । अत औचित्यप्राप्तविकारार्थत्वमेव युक्तम् । किं च लोके मृन्मयं दारुमयमित्यादिषु वेदे च पर्णमयी जुहूः (तै. सं. ३।५।६)। शमीमय्यः स्रुचः । दर्भमयी रशना (तै. ब्रा. ३।८।२) इत्यादिषु मयटो विकारार्थे प्रयोगबाहुल्यात्स एव प्रथमतरं धियमारोहति । जीवस्य चानन्दविकारत्वमस्त्येव । तस्य स्वत आनन्दरूपस्य सतः संसारित्वावस्था तद्विकार एवेति। अतो विकारवाचिनो मयट्प्रत्ययस्य श्रवणादानन्दमयो जीवादनतिरिक्त इति । तदेतदनुभाष्य परिहरति ।

विकारशब्दान्नेति चेन्न प्राचुर्यात् ॥ १४ ॥

नैतद्युक्तम् । कुतः । प्राचुर्यात् । परस्मिन्ब्रह्मण्यानन्दप्राचुर्यात् । प्राचुर्यार्थे च मयटः संभवात् । एतदुक्तं भवति। शतगुणितोत्तरक्रमेणाभ्यस्यमानस्यानन्दस्य जीवाश्रयत्वासंभवाद्ब्रह्माश्रयोयमानन्द इति निश्चिते सति तस्मिन्ब्रह्मणि विकारासंभवात्प्राचुर्येपि मयड्विधिसद्भावाच्चानन्दमयः परं ब्रह्मेत्यौचित्यात्प्रयोगप्रौढ्या च मयटो विकारार्थत्वमर्थविरोधान्न संभवति। किं चौ-

---

1. D reads तदा हि for तथा हि.
4. B reads हिरण्मयम् after मृण्मयम्; B. D.E. read मृण्मयम् for मृन्मयम्; C. om. दारुमयम्.
7. D. reads प्रथमतराम् for प्रथमतरम्; B. reads अधिरोहति for आरोहति.
13. D. reads प्राचुर्यार्थेपि for प्राचुर्यात्। प्राचुर्यार्थे च; B. reads अपि for च; C. reads मयट्सद्भावात्, D. मयट्समवात्, for मयटः संभवात्.
15. B. om. तस्मिन् ; C. reads विकारस्य for विकार.
16. B. D. om. विधि; C. reads समवात् for सद्भावात्.

http://acharya.org

चित्यं प्राणमय एव परित्यक्तम् । तत्र विकारार्थत्वासंभवात् । अतस्तत्र पञ्चवृत्तेर्वायोः प्राणवृत्तिमत्तामात्रेण प्राणमयत्वम् । प्राणापानादिषु पञ्चसु वृत्तिषु प्राणवृत्तेः प्रचुरत्वाद्वा । न च प्राचुर्ये मयट्प्रत्ययस्य प्रौढिर्नास्ति । अन्नमयो यज्ञः शकटमयी यात्रेत्यादिदर्शनात् ।

यदुक्तमानन्दप्राचुर्यमल्पदुःखसद्भावमवगमयतीति । तदसत् । तत्प्रचुरत्वं हि तत्प्रभूतत्वमेव । तच्चेतरस्य सत्तां नावगमयति । अपि तु तस्याल्पत्वं निवर्तयति । इतरसद्भावासद्भावौ तु प्रमाणान्तरावसेयौ । इह च प्रमाणान्तरेण तदभावोवगम्यते- पहतपाप्मा (छा. ८।१।५) इत्यादिना । तत्रैतावदेव वक्तव्यम् । ब्रह्मानन्दस्य प्रभूतत्वमन्यानन्दस्य स्वल्पत्वमपेक्षत इति । उच्यते च तस्य एको मानुष आनन्दः (तै. २।८) इत्यादिना जीवानन्दापेक्षया ब्रह्मानन्दो निरतिशयदशापन्नः प्रभूत इति ।

यच्चोक्तं जीवस्यानन्दविकारत्वं संभवतीति । तदपि नोपपद्यते । जीवस्य ज्ञानानन्दैकस्वरूपस्य केनचिदाकारेण मृद इव घटाद्याकारेण परिणामः सकलश्रुतिस्मृतिन्यायविरुद्धः । संसा-

---

2. B D. read प्राणवत्ता for प्राणवृत्तिमत्ता.

3. D. reads पञ्च for पञ्चसु.

4. C om. प्रत्ययस्य, D. reads शरमयी सेना after यज्ञः.

5. C. reads इत्यादिषु for इत्यादि.

7. C. om. एव.

11. C. reads ब्रह्मानन्द for ब्रह्मानन्दस्य; B. reads अल्पत्वम् for स्वल्पत्वम्; C. reads स्वल्पत्वापेक्षम् for स्वल्पत्वमपेक्षते.

12. C. om. आनन्दः.

15. D. reads गुण after एक.

16. B. om. आदि after घट.

http://acharya.org

रदशायां तु कर्मणा ज्ञानानन्दौ संकुचितावित्युपपादयिष्यते। अतो विज्ञानमयाज्जीवादन्य एव परमात्मा ॥ १४ ॥

इतश्च जीवादन्य आनन्दमयः।

तद्धेतुव्यपदेशाच्च ॥ १५ ॥

को ह्येवान्यात्कः प्राण्यात्। यदेष आकाश आनन्दो न स्यात्। एष ह्येवानन्दयाति (तै. २।७) इत्येष एव जीवानानन्दयतीति जीवानामानन्दहेतुरयं व्यपदिश्यते। अतश्चानन्दयितव्याज्जीवादानन्दयितायमन्य आनन्दमयः परमात्मेति विज्ञायते। आनन्दमय एवात्रानन्दशब्देनोच्यत इति चानन्तरमेव वक्ष्यते ॥ १५ ॥

इतश्च जीवादन्य आनन्दमयः।

मान्त्रवर्णिकमेव च गीयते ॥ १६ ॥

सत्यं ज्ञानमनन्तं ब्रह्म (तै. २।१) इति मन्त्रवर्णोदितं ब्रह्मैवानन्दमय इति गीयते। तत्तु जीवस्वरूपादन्यत्परं ब्रह्म। तथा हि। ब्रह्मविदाप्नोति परम् (तै. २।१) इति जीवस्य प्राप्यतया ब्रह्म निर्दिष्टम्। तदेषाभ्युक्ता (तै. २।१) इति तद्ब्रह्माभिमुखीकृत्य प्रतिपाद्यतया परिगृह्य ऋगेषाध्येतृभिरुक्ता।

---

1 D. reads तत् before कर्मणा, C. D. read जीवानाम् after ज्ञानानन्दौ.

2. D. E. read अतश्चानन्दमयो जीवादन्यः परं ब्रह्म for अतो विज्ञानमयाज्जीवादन्य एव परमात्मा.

3. B. om. इतश्च जीवादन्य आनन्दमयः, C. reads इतश्चानन्दमयो जीवादन्यः परं ब्रह्म for इतश्च जीवादन्य आनन्दमयः.

8. B. om. आनन्दमयः.

14. B. om. तु after तत्.

17. B. D. read च after प्रतिपाद्यतया.

http://acharya.org

ब्राह्मणोक्तस्यार्थस्य वैशद्यमनेन मन्त्रवर्णेन क्रियत इत्यर्थः । जीवस्योपासकस्य प्राप्यं ब्रह्म तस्माद्विलक्षणमेव । अनन्तरं च तस्माद्वा एतस्मादात्मन आकाशः संभूतः (तै. २।१) इत्यारभ्योत्तरोत्तरैर्ब्राह्मणैर्मन्त्रैश्च तदेव विशदीक्रियते । अतो जीवादन्य आनन्दमयः ॥ १६ ॥

अत्राह । यद्यप्युपासकात्प्राप्यस्य भेदेन भवितव्यं तथापि न वस्त्वन्तरं जीवान्मान्त्रवर्णिकं ब्रह्म । किं तु तस्यैवोपासकस्य निरस्तसमस्ताविद्यागन्धं निर्विशेषचिन्मात्रैकरसं शुद्धस्वरूपं तदेव सत्यं ज्ञानमनन्तं ब्रह्म (तै. २।१) इति मन्त्रेण विशोध्यते । तदेव च यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह (तै.२।४,२।९) इति वाङ्मनसागोचरतया निर्विशेषमिति गम्यते । अतस्तदेव मान्त्रवर्णिकमिति तस्मादनतिरिक्त आनन्दमय इति । अत उत्तरं पठति ।

नेतरोनुपपत्तेः ॥ १७ ॥

परमात्मन इतरो जीवशब्दाभिलप्यो मुक्तावस्थोपि न भवति मान्त्रवर्णिकः । कुतः । अनुपपत्तेः । तथाविधस्यात्मनो निरुपाधिकं विपश्चित्त्वं नोपपद्यते । इदमेव हि निरुपाधिकं विपश्चित्त्वं सोकामयत बहु स्यां प्रजायेयेति (तै. २।६) इति सत्यसंकल्पत्वप्रदर्शनेन व्यपदिश्यते । विविधं पश्यच्चित्त्वं हि विपश्चित्त्वम् । पृषोदरादित्वात्पश्यच्छब्दावयवस्य यच्छब्दस्य लोपं कृत्वा

---

1. B. D. read मन्त्रेण for मन्त्रवर्णेन.

4. C. om. ब्राह्मणै..

8. D. om. समस्त.

11. B. reads अव before गम्यते.

18. D. E. om. first इति.

19. E. reads विवरिष्यते for व्यपदिश्यते.

http://acharya.org

व्युत्पादितो विपश्चिच्छब्दः । यद्यपि मुक्तस्य विपश्चित्त्वं संभवति तथापि तस्यैवात्मनः संसारदशायामविपश्चित्त्वमप्यस्तीति निरुपाधिकं विपश्चित्त्वं नोपपद्यते । निर्विशेषचिन्मात्रतापन्नस्य मुक्तस्य विविधदर्शनाभावात्सुतरां विपश्चित्त्वं न संभवतीति न केनापि प्रमाणेन निर्विशेषं वस्तु प्रतिपाद्यत इति च पूर्वमेवोक्तम् ।

यतो वाचो निवर्तन्ते (तै.२।४) इति च वाक्यं यदि वाङ्मनसयोर्ब्रह्मणो निवृत्तिमभिदधीत न ततो निर्विशेषतां वस्तुनोवगमयितुं शक्नुयात् । अपि तु वाङ्मनसयोस्तत्राप्रमाणतां वदेत्। तथा च सति तस्य तुच्छत्वमेवापद्यते । ब्रह्मविदाप्नोति (तै. २।१) इत्यारभ्य ब्रह्मणो विपश्चित्त्वं जगत्कारणत्वमानन्दैकतानत्वमितरान्प्रत्यानन्दयितृत्वं कामादेव चिदचिदात्मकस्य कृत्स्नस्य स्रष्टृत्वं सृज्यवर्गानुप्रवेशकृततदात्मत्वं भयाभयहेतुत्वं वाय्वादित्यादीनां प्रशासितृत्वं शतगुणितोत्तरक्रमेण निरतिशयानन्दत्वमन्यच्चानेकं प्रतिपाद्य वाङ्मनसयोर्ब्रह्मणि प्रवृत्त्यभावेन निष्प्रमाणकं ब्रह्मेत्युच्यत इति भ्रान्तजल्पितम् । यतो वाचो निवर्तन्ते (तै. २।४) इति यच्छब्दनिर्दिष्टमर्थमानन्दं ब्रह्मणो विद्वान् (तै. २।४) इत्यानन्दशब्देन प्रतिनिर्दिश्य तस्य ब्रह्मसंबन्धित्वं ब्रह्मण इति व्यतिरेकनिर्देशेन पतिपाद्य तदेव वाङ्मनसागोचरं

---

1 C. reads अपि after मुक्तस्य.
2. C. reads निरुपाधिक for निरुपाधिकम्.
4. B. D. read असंभवात् for अभावात्.
6. C E. read च after यदि.
7. C. D. om. न before ततः.
8. C. om. च after तथा.
9. B. D. read परम् after आप्नोति.
10. B. reads च after जगत्कारणत्वम्.
12. B. D. read तदात्मकत्वम् for तदात्मत्वम्.
16. E. om. अर्थम्.

http://acharya.org

विद्वानिति तद्वेदनमभिदधद्वाक्यं जरद्गवादिवाक्यवदनर्थकं वाच्यानन्तर्गतं च स्यात्। अतः शतगुणितोत्तरक्रमेण ब्रह्मानन्दस्यातिशयिततां वक्तुमुपक्रम्य तस्येयत्ताया अभावादेव वाङ्मनसयोस्ततो निवृत्तिर्यतो वाचो निवर्तन्ते (तै. २।९) इत्युच्यते। एवमियत्तारहितं ब्रह्मण आनन्दं विद्वान्कुतश्चन न बिभेतीत्युच्यते। किं चास्य मान्त्रवर्णिकस्य विपश्चितः सोकामयत (तै. २।६) इत्यारभ्य वक्ष्यमाणस्वसंकल्पावक्लृप्तजगज्जन्मस्थितिजगदन्तरात्मत्वादेर्मुक्तात्मस्वरूपादन्यत्वं सुस्पष्टमेव ॥ १७॥

इतश्चोभयावस्थात्प्रत्यगात्मनोन्य आनन्दमयः।

भेदव्यपदेशाच्च ॥ १८ ॥

तस्माद्वा एतस्मादात्मन आकाशः (तै. २।१) इत्यारभ्य मान्त्रवर्णिकं ब्रह्म व्यञ्जयद्वाक्यमन्नप्राणमनोभ्य इव जीवादपि तस्य भेदं व्यपदिशति। तस्माद्वा एतस्माद्विज्ञानमयात्। अन्योन्तर आत्मानन्दमयः (तै. २।५) इति। अतो जीवाद्भेदव्यपदेशाच्चायं मान्त्रवर्णिक आनन्दमयोन्य एवेति विज्ञायते ॥ १८ ॥

इतश्च जीवादन्यः।

कामाच्च नानुमानापेक्षा ॥ १९ ॥

जीवस्याविद्यापरवशस्य जगत्कारणत्वे ह्यवर्जनीयानुमानिकप्रधानादिशब्दाभिधेयाचिद्वस्तुसंसर्गापेक्षा। तथैव हि चतुर्मुखादीनां कारणत्वम्। इह च सोकामयत। बहु स्यां प्रजायेय

---

3. C. reads अतिशयेयत्ताम्, D. अतिशयिताम्, for अतिशयितताम्; B. D. read उद्यम्य for उपक्रम्य; D. reads इयत्ता for इयत्ताया.

11. B. D. om. आकाशः.

15. C. reads अन्य आनन्दमयः for आनन्दमयोन्यः.

18. E. om. हि.

19. D. reads च after ससर्गापेक्षा.

http://acharya.org

(तै. २।६) इत्यचित्संसर्गरहितस्य स्वकामादेव विचित्रचिदचिद्वस्तुनः सृष्टिरिदं सर्वमसृजत। यदिदं किं च (तै. २।६) इत्याम्नायते। अतोस्यानन्दमयस्य जगत्सृजतो नानुमानिकाचिद्वस्तुसंसर्गापेक्षा प्रतीयते। ततश्च जीवादन्य आनन्दमयः॥१९॥

इतश्च जीवादन्यः।

अस्मिन्नस्य च तद्योगं शास्ति ॥ २० ॥

अस्मिन्नानन्दमयेस्य जीवस्य तद्योगं शास्त्यानन्दयोगं शास्ति शास्त्रं रसो वै सः। रसं ह्येवायं लब्ध्वानन्दी भवति (तै. २।७) इति। रसशब्दाभिधेयानन्दमयलाभादयं जीवशब्दाभिलपनीय आनन्दी भवतीत्युच्यमाने यल्लाभाद्य आनन्दी भवति स स एवेत्यनुन्मत्तः को ब्रवीतीत्यर्थः।

एवमानन्दमयः परं ब्रह्मेति निश्चिते सति यदेष आकाश आनन्दो न स्यात् (तै. २।७)। विज्ञानमानन्दं ब्रह्म (बृ. ३।९।२८) इत्यादिष्वानन्दशब्देनानन्दमय एव परामृश्यते। यथा विज्ञानशब्देन विज्ञानमयः। अत एवानन्दं ब्रह्मणो विद्वान् (तै.२।४,२।९) इति व्यतिरेकनिर्देशः। अत एवैतमानन्दमयमात्मानमुपसंक्रामति (तै. २।८) इति फलनिर्देशश्च। उत्तरे चानुवाके पूर्वानुवाकोक्तानामन्नमयादीनामन्नं ब्रह्मेति व्यजानात् (तै. ३।२)। प्राणो

---

1. B. reads कामात् for स्वकामात्.
2. B. reads वस्तु for वस्तुनः.
4 D. E. read अत for तत..
5 B. D. om. जीवादन्यः.
7. D. E. read च after अस्य; B. D. om. शास्ति after तद्योगम्.
13. B. D. om. न स्यात्.
14. C. reads यदा for यथा.
16. C. reads च for एतम्.
18. C. reads उक्त for उक्तानाम्.

http://acharya.org

ब्रह्मेति व्यजानात् (तै. ३।३) । मनो ब्रह्मेति व्यजानात् (तै. ३।४)। विज्ञानं ब्रह्मेति व्यजानात् (तै. ३।५) इति प्रतिपादनादानन्दो ब्रह्म (तै. ३।६) इत्यप्यानन्दमयस्यैव प्रतिपादनमिति विज्ञायते। तत एव च तत्राप्यानन्दमयमात्मानमुपसंक्रम्य (तै. ३।१०।५) इत्युपसंहृतम् । अतः प्रधानशब्दाभिलप्यादर्थान्तरभूतस्य परस्य ब्रह्मणो जीवशब्दाभिलपनीयादपि वस्तुनोर्थान्तरत्वं सिद्धम् । आनन्दमयाधिकरणं समाप्तम् ॥ २० ॥ (६)

यद्यपि मन्दपुण्यानां जीवानां कामाज्जगत्सृष्टिरतिशयितानन्दयोगो भयाभयहेतुत्वमित्यादि न संभवति तथापि विलक्षणपुण्यानामादित्येन्द्रप्रजापतिप्रभृतीनां संभवत्येवेतीमामाशङ्कां निराकरोति ।

अन्तस्तद्धर्मोपदेशात् ॥ २१ ॥

इदमाम्नायते छान्दोग्ये । य एषोन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आ प्रणखात्सर्व एव सुवर्णः। तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी । तस्योदिति नाम । स एष सर्वेभ्यः पाप्मभ्य उदितः । उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद । तस्यर्क्च साम च गेष्णौ । ....इत्यधिदैवतम् (छा. १।६।६-७-८) । अथाध्यात्ममपि । अथ य एषोन्तरक्षिणि पुरुषो दृश्यते सैवर्क्तत्साम च तदुक्थं तद्यजुस्तद्ब्रह्म । तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम

1. C. om. मनो ब्रह्मेति व्यजानात्.
2. D. om विज्ञान ब्रह्मेति व्यजानात्.
4. D. E. om. च.
10. D. reads चन्द्र after इन्द्र.
17. D. om. च after ऋक्.
18. D. om. अपि.
19. D. om. च.
19–20. B. om. एतस्य after तस्य; D. reads एतत् for तत्.

http://acharya.org

तन्नाम (छा. १।७।५) इति । तत्र संदिह्यते । किमयमक्ष्यादित्यमण्डलान्तर्वर्ती पुरुषः पुण्योपचयनिमित्तैश्वर्य आदित्यादिशब्दाभिलप्यो जीव एवाहोस्वित्तदतिरिक्तः परमात्मेति । किं युक्तम् । उपचितपुण्यो जीव एवेति । कुतः। सशरीरत्वश्रवणात् । शरीरसंबन्धो हि जीवानामेव संभवति । कर्मानुगुणप्रियाप्रिययोगाय हि शरीरसंबन्धः । अत एव हि कर्मसंबन्धरहितस्य मोक्षस्य प्राप्यत्वमशरीरत्वेनोच्यते । न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति । अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः(छा. ८।१२।१) इति । संभवति च पुण्यातिशयाज्ज्ञानाधिक्यं शक्त्याधिक्यं च । अत एव लोककामेशत्वादि तस्यैवोपपद्यते । तत एव चोपास्यत्वं फलदायित्वं पापक्षपणकरत्वेन मोक्षोपयोगित्वं च । मनुष्येष्वप्युपचितपुण्याः केचिज्ज्ञानशक्त्यादिभिरधिकतरा दृश्यन्ते । ततश्च सिद्धगन्धर्वादयस्ततश्च देवास्ततश्चेन्द्रादयः । अतो ब्रह्मादिष्वन्यतम एवैकैकस्मिन्कल्पे पुण्यविशेषेणैव प्रभूतमैश्वर्यं प्राप्तो जगत्सृष्ट्याद्यपि करोतीति जगत्कारणत्वजगदन्तरात्मत्वादिवाक्यमस्मिन्नेवोपचितपुण्यविशेषे सर्वज्ञे सर्वशक्तौ वर्तते । अतो न जीवातिरिक्तः परमात्मा नाम

---

2. B. reads अन्तर्वर्ति, D. अन्तरवर्ती, for अन्तर्वर्ती

3. E reads एष॰ after एव

4 B. reads पुण्यविशेष. for पुण्य॰; C. reads सशरीर for सशरीरत्व.

6. D. reads योगायत्तः for योगाय.

11. D. reads अतः for तत॰; B. om. च after एव; D. E. read च after फलदायित्वम्, D. reads क्षय for क्षपण.

14. B. reads उपचित before पुण्य.

15. C. reads एवभूतम्, D. एव प्रभूतम्, for एव प्रभूतम्.

17. B. reads जीवान्नातिरिक्तः, C. जीवादनतिरिक्तः, for न जीवातिरिक्तः.

http://acharya.org

कश्चिदस्ति । एवं च सत्यस्थूलमनण्वह्रस्वम् (बृ. ३।८।८) इत्यादयो जीवात्मनः स्वरूपाभिप्राया भवन्ति । मोक्षशास्त्राण्यपि तत्स्वरूपतत्प्राप्त्युपायोपदेशपराणीति । एवं प्राप्तेभिधीयते ।

अन्तस्तद्धर्मोपदेशात् । अन्तरादित्येन्तरक्षिणि च यः पुरुषः प्रतीयते स जीवादन्यः परमात्मैव । कुतः । तद्धर्मोपदेशात् । जीवेष्वसंभवँस्तदतिरिक्तस्यैव परमात्मनो धर्मोयमपहतपाप्मत्वादिः स एष सर्वेभ्यः पाप्मभ्य उदितः (छा. १।६।७) इत्यादिनोपदिश्यते । अपहतपाप्मत्वं ह्यपहतकर्मत्वं कर्मवश्यतागन्धरहितत्वमित्यर्थः । कर्माधीनसुखदुःखभागित्वेन कर्मवश्या हि जीवाः । अतोपहतपाप्मत्वं जीवादन्यस्य परमात्मन एव धर्मः । तत्पूर्वकं स्वरूपोपाधिकं लोककामेशत्वं सत्यसंकल्पत्वादिकं सर्वभूतान्तरात्मत्वं च तस्यैव धर्मः । यथाह । एष आत्मापहतपाप्मा विजरो विमृत्युर्विशोकोविजिघत्सोपिपासः सत्यकामः सत्यसंकल्पः (छा. ८।१।५) इति । तथैव सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायणः (सुबालोप.) इति । सोकामयत । बहु स्यां प्रजायेय (तै. २।६) इत्यादिसत्यसंकल्पत्वपूर्वकसमस्तचिदचिद्वस्तुसृष्टियोगो निरुपाधिकभयाभयहेतुत्वं वाङ्मनसपरिमितिकृतपरिच्छेदरहितानवधिकातिशयानन्दयोग इत्यादयोकर्मसंपाद्याः स्वाभाविका धर्मा जीवस्य न संभवन्ति ।

---

2 D E. read एव after जीवात्मन; C. om अपि.

11. C. reads मोहरहितत्वम् for लोककामेशत्वम्.

12. D. reads अस्यैव for तस्यैव.

16. C. reads इत्यादिना for इत्यादि.

18. C. reads श्रुत, B. कृति, for कृत; D. reads रहितता for रहित.

http://acharya.org

यत्तु शरीरसंबन्धान्न जीवातिरिक्त इत्युक्तं तदयुक्तम्। न हि सशरीरत्वं कर्मवश्यतां साधयति। सत्यसंकल्पस्येच्छयापि शरीरसंबन्धसंभवात्। अथोच्येत शरीरं नाम त्रिगुणात्मकप्रकृतिपरिणामरूपभूतसंघातः। तत्संबन्धश्चापहतपाप्मनः सत्यसंकल्पस्य पुरुषस्येच्छया न संभवति। अपुरुषार्थत्वात्। कर्मवश्यस्य तु स्वस्वरूपानभिज्ञस्य कर्मानुगुणफलोपभोगायानिच्छतोपि तत्संबन्धोवर्जनीय इति। स्यादेतदेवं यदि त्रिगुणमयः प्राकृतोस्य देहः स्यात्। स तु स्वाभिमतः स्वानुरूपोप्राकृत एवेति सर्वमुपपन्नम्।

एतदुक्तं भवति। परस्यैव ब्रह्मणो निखिलहेयप्रत्यनीकानन्तज्ञानानन्दैकस्वरूपतया सकलेतरविलक्षणस्य स्वाभाविकानवधिकातिशयासंख्येयकल्याणगुणगणाश्च सन्ति। तद्वदेव स्वाभिमतानुरूपैकरूपाचिन्त्यदिव्याद्भुतनित्यनिरवद्यनिरतिशयौज्ज्वल्यसौन्दर्यसौगन्ध्यसौकुमार्यलावण्ययौवनाद्यनन्तकल्याणगुणगणनिधिदिव्यरूपमपि स्वाभाविकमस्ति। तदेवोपासकानुग्रहेण तत्तत्प्रतिपत्त्यनुरूपसंस्थानं करोति। अपारकारुण्यसौशील्यवात्सल्यौदार्यैश्वर्यजलनिधिर्निरस्तनिखिलहेयगन्धोपहतपाप्मा प-

1. B. D. read तदसत् for तदयुक्तम्.

2. D. reads शरीरवत्त्वम् for सशरीरत्वम्.

5. B. reads अपि after इच्छया

6. D. om. स्व.

7. D. reads गुणत्रय for त्रिगुण.

8. D. reads स्वाभिमत for स्वाभिमतः.

12. B. reads गुणाः for गुणगणाः.

13. C. reads स्वाभाविकस्वत्वरूप for स्वाभिमतानुरूप.

14. C. E. om कल्याण.

17. C. om. औदार्यैश्वर्य; B. om. ऐश्वर्य; D. reads जलधिः for जलनिधिः.

http://acharya.org

रमात्मा परं ब्रह्म पुरुषोत्तमो नारायण इति यतो वा इमानि भूतानि जायन्ते (तै. ३।१।१)। सदेव सोम्येदमग्र आसीत् (छा. ६।२।१)। आत्मा वा इदमेक एवाग्र आसीत् (ऐ. १।१)। एको ह वै नारायण आसीत्। न ब्रह्मा नेशानः (म. १) इत्यादिषु निखिलजगदेककारणतयावगतस्य परस्य ब्रह्मणः सत्यं ज्ञानमनन्तं ब्रह्म (तै. २।१)। विज्ञानमानन्दं ब्रह्म (बृ.३।९।२८) इत्यादिष्वेवंभूतं स्वरूपमित्यवगम्यते। निर्गुणम् (चू. ७।२)। निरञ्जनम् (श्वे. ६।१९)। अपहतपाप्मा विजरो विमृत्युर्विशोकोविजिघत्सोपिपासः सत्यकामः सत्यसंकल्पः (छा.८।१।५)।

न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते।
परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च।
(श्वे. ६।८)

तमीश्वराणां परमं महेश्वरं तं दैवतानां परमं च दैवतम्।
(श्वे. ६।७)

स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः।
(श्वे. ६।९)

सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन्यदास्ते।
(तै. आ. ३।११)

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्।
(श्वे. ३।८)

सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि (म. ना. १।८) इत्यादिषु परस्य ब्रह्मणः प्राकृतहेयगुणान्प्राकृतहेयदेहसंबन्धं तन्मूलकर्मवश्यतासंबन्धं च प्रतिषिध्य कल्याणगुणान्कल्याण-

---

7. C. reads एवरूपम् for एवभूतम्.

8. B. om. विजरो विमृत्युर्विशोकोविजिघत्सोपिपासः.

23. C. reads गन्धम् for सबन्धम्.

http://acharya.org

रूपं च वदति। तदिदं स्वाभाविकमेव रूपमुपासकानुग्रहेण तत्प्रतिपत्त्यनुगुणाकारं देवमनुष्यादिसंस्थानं करोति स्वेच्छयैव परमकारुणिको भगवान्। तदिदमाह श्रुतिरजायमानो बहुधा विजायते (तै. आ. ३।१२) इति। स्मृतिश्च।

अजोपि सन्नव्ययात्मा भूतानामीश्वरोपि सन्।
प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया॥ (गी. ४।६)
परित्राणाय साधूनां विनाशाय च दुष्कृताम्। (गी. ४।८)
इति।

साधवो ह्युपासकास्तत्परित्राणमेवोद्देश्यम्। आनुषङ्गिको दुष्कृतां विनाशः। संकल्पमात्रेणापि तदुपपत्तेः। प्रकृतिं स्वामिति। प्रकृतिः स्वभावः। स्वमेव स्वभावमास्थाय। न संसारिणां स्वभावमित्यर्थः। आत्ममाययेति। स्वसंकल्पमात्ररूपेण ज्ञानेनेत्यर्थः। माया वयुनं ज्ञानमिति ज्ञानपर्यायमपि मायाशब्दं नैघण्टुका अधीयते। आह च भगवान्पराशरः।

समस्ताः शक्तयश्चैता नृप यत्र प्रतिष्ठिताः।
तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत्॥
समस्तशक्तिरूपाणि तत्करोति जनेश्वर।
देवतिर्यङ्मनुष्याख्यचेष्टावन्ति स्वलीलया॥
जगतामुपकाराय न सा कर्मनिमित्तजा।
(वि. पु. ६।७।६९-७१) इति।

---

2. B. reads प्रतिपन्न for प्रतिपत्ति.
6. E. reads इति after आत्ममायया.
9. D. reads तु after आनुषङ्गिकः.
11 B. reads स्वयमेव भावम् for स्वमेव स्वभावम्.
12. C. om. स्व before सकल्प; D. E. om. मात्र.
16. D. reads तद्धि स्वरूप for तद्विश्वरूप.
20. D. reads अवताररूपस्याप्राकृतत्वमुच्यते after इति.

http://acharya.org

महाभारते चार्चावताररूपस्याप्यप्राकृतत्वमुच्यते ।

न भूतसंघसंस्थानो देहोस्य परमात्मनः ।

इति । अतः परस्यैव ब्रह्मण एवंरूपवत्त्वादयमपि तस्यैव धर्मः । अत आदित्यमण्डलाक्ष्यधिकरण आदित्यादिजीवातिरिक्तः परमात्मैव ॥ २१ ॥

भेदव्यपदेशाच्चान्यः ॥ २२ ॥

आदित्यादिजीवेभ्यो भेदो व्यपदिश्यतेस्य परमात्मनः । य आदित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यमयति (बृ. ३।७।९) । य आत्मनि तिष्ठन्नात्मनोन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति (बृ. ३।७।२२) । यस्याक्षरं शरीरं यमक्षरं न वेद । यो मृत्युमन्तरे संचरन्यस्य मृत्युः शरीरं यं मृत्युर्न वेद । एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायणः (सुबालोप.) इति चास्यापहतपाप्मनः परमात्मनः सर्वाञ्जीवाञ्छरीरत्वेन व्यपदिश्य तेषामन्तरात्मत्वेनैनं व्यपदिशति । अतः सर्वेभ्य एवादित्यादिजीवेभ्योन्य एव परमात्मेति सिद्धम् अन्तरधिकरणं समाप्तम् ॥ २२ ॥ (७)

यतो वा इमानि भूतानि जायन्ते (तै. ३।१।१) इति जगत्कारणं ब्रह्मेत्यवगम्यते । किं तज्जगत्कारणमित्यपेक्षायां सदेव सोम्येदमग्र आसीत् । ···तत्तेजोसृजत (छा. ६।२।२-३)। आत्मा

1. E. reads अप्यवतार for चार्चावतार.
14. D. reads अस्मादपि for अस्य.
15. C. om. जीवान्, E. reads एवम् for एनम्
16. D. reads हिरण्यगर्भादि for एवादित्यादि; C. reads देवेभ्यः for जीवेभ्यः.
18. B. om. भूतानि जायन्ते.

http://acharya.org

वा इदमेक एवाग्र आसीत्।···सइमाँल्लोकानसृजत (ऐ. १।१-२)। तस्माद्वा एतस्मादात्मन आकाशः संभूतः (तै. २।१) इति साधारणैः शब्दैर्जगत्कारणे निर्दिष्ट ईक्षणविशेषानन्दविशेषरूपविशेषार्थस्वभावात्प्रधानक्षेत्रज्ञादिव्यतिरिक्तं ब्रह्मेत्युक्तम्। इदानीमाकाशादिविशेषशब्दैर्निर्दिश्य जगत्कारणत्वजगदैश्वर्यादिवादेष्वाकाशादिशब्दाभिधेयतया प्रसिद्धचिदचिद्वस्तुनोऽर्थान्तरमुक्तलक्षणमेव ब्रह्मेति प्रतिपाद्यत आकाशस्तल्लिङ्गादित्यादिना पादशेषेण।

आकाशस्तल्लिङ्गात्॥ २३॥

इदमाम्नायते छान्दोग्येस्य लोकस्य का गतिरित्याकाश इति होवाच। सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते। आकाशं प्रत्यस्तं यन्ति। आकाशो ह्येवैभ्यो ज्यायान्। आकाशः परायणम् (छा. १।९।१) इति। तत्र संदेहः। किं प्रसिद्धाकाशमेवात्राकाशशब्देनाभिधीयत उतोक्तलक्षणमेव ब्रह्मेति। किं प्राप्तम्। प्रसिद्धाकाश इति। कुतः। शब्दैकसमधिगम्ये वस्तुनि य एवार्थो व्युत्पत्तिसिद्धः शब्देन प्रतीयते स एव ग्रहीतव्यः। अतः प्रसिद्धाकाश एव चराचरात्मकभूतजातस्य कृत्स्नस्य कारणम्। अतस्तस्मादनतिरिक्तं ब्रह्म।

नन्वीक्षापूर्वकसृष्ट्यादिभिरचेतनाज्जीवाच्च व्यतिरिक्तं ब्रह्मेत्युक्तम्। सत्यमुक्तम्। दुरुक्तं तु तत्। तथा हि। यतो वा इमानि भूतानि जायन्ते।···तद्ब्रह्म (तै. ३।१) इत्युक्ते कुत इ-

12. D. reads भूतेभ्यः after एभ्यः; E. reads एतेभ्यो भूतेभ्यः for एभ्यः.

14. D. reads आकाश for आकाशम्.

17. B. reads अत्र after प्रसिद्धाकाश एव.

20. C. reads अयुक्तम् for दुरुक्तम्.

http://acharya.org

मानि भूतानि जायन्त इत्यादिविशेषापेक्षायां सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते (छा. १।९।१) इत्यादिना विशेषप्रतीतेर्जगज्जन्मादिकारणमाकाश एवेति निश्चीयते । सदेव सोम्येदमग्र आसीत् (छा. ६।२।१) इत्यादिष्वपि सदादिशब्दाः साधारणाकारास्तमेव विशेषमाकाशमभिदधति । आत्मा वा इदमेक एवाग्र आसीत् (ऐ. १।१) इत्यादिष्वप्यात्मशब्दस्तत्रैव वर्तते । तस्यापि हि चेतनैकान्तत्वं न संभवति । यथा मृदात्मको घट इति । आप्नोतीत्यात्मेति व्युत्पत्त्या सुतरामाकाशेप्यात्मशब्दो वर्तते । अत एवमाकाश एव कारणं ब्रह्मेति निश्चिते सतीक्षणादयस्तदनुगुणा गौणा वर्णनीयाः । यदि हि साधारणशब्दैरेव सदादिभिः कारणमभ्यधायिष्यतेक्षणाद्यर्थानुरोधेन चेतनविशेष एव कारणमिति निरचेष्यत। आकाशशब्देन तु विशेष एव निश्चित इति नार्थस्वाभाव्यान्निर्णेतव्यमस्ति।

नन्वात्मन आकाशः संभूतः (तै. २।१) इत्याकाशस्यापि कार्यत्वं प्रतीयते । सत्यम् । सर्वेषामेवाकाशवाय्वादीनां सूक्ष्मावस्था स्थूलावस्था चेत्यवस्थाद्वयमस्ति । तत्राकाशस्य सूक्ष्मावस्था कारणं स्थूलावस्था तु कार्यम् । आत्मन आकाशः संभूतः (तै. २।१) इति स्वस्मादेव सूक्ष्मरूपात्स्वयं स्थूलरूपः संभूत इ-

---

1. D. E read आकाङ्क्षायाम् for अपेक्षायाम्
3. D. E read निश्चिते for निश्चीयते.
4 B. om. सोम्येदमग्र आसीत्
6. B. om. इदमेक एवाग्र आसीत्, B. D. read आत्मशब्दोपि for अप्यात्मशब्द
8. D. om. व्युत्पत्त्या.
11. D. reads इव for एव, C. om. सदादिभि॰.
12. B. D. read निरदेक्ष्यत for निरचेष्यत.
17. C. om. तु.
18. B reads तस्मात् for स्वस्मात्,

http://acharya.org

त्यर्थः । सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते (छा. १।९।१) इति सर्वस्य जगत आकाशादेव प्रभवाप्ययादिश्रवणात्तदेव हि जगत्कारणं ब्रह्मेति निश्चितम् । यत एवं प्रसिद्धाकाशादनतिरिक्तं ब्रह्मात एव यदेष आकाश आनन्दो न स्यात् (तै. २।७) । आकाशो ह वै नामरूपयोर्निर्वहिता (छा. ८।१४।१) इत्येवमादिनिर्देशोप्युपपन्नतरः । अतः प्रसिद्धाकाशादनतिरिक्तं ब्रह्मेत्येवं प्राप्ते ब्रूमः ।

आकाशस्तल्लिङ्गात् । आकाशशब्दाभिधेयः प्रसिद्धाकाशादचेतनादर्थान्तरभूतो यथोक्तलक्षणः परमात्मैव । कुतः । तल्लिङ्गात् । निखिलजगदेककारणत्वं सर्वस्माज्ज्यायस्त्वं परायणत्वमित्यादीनि परमात्मलिङ्गान्युपलभ्यन्ते । निखिलजगदेककारणत्वं ह्यचिद्वस्तुनः प्रसिद्धाकाशशब्दाभिधेयस्य नोपपद्यते । चेतनवस्तुनस्तत्कार्यत्वासंभवात् । परायणत्वं च चेतनानां परमप्राप्यत्वम् । तच्चाचेतनस्य हेयस्य सकलपुरुषार्थविरोधिनो न संभवति । सर्वस्माज्ज्यायस्त्वं च निरुपाधिकं सर्वैः कल्याणगुणैः सर्वेभ्यो निरतिशयोत्कर्षः । तदप्यचितो नोपपद्यते ।

यदुक्तं जगत्कारणविशेषाकाङ्क्षायामाकाशशब्देन विशेषसमर्पणादन्यत्सर्वं तदनुरूपमेव वर्णनीयमिति तदयुक्तम् । सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते (छा. १।९।१) इति प्रसिद्धवन्निर्देशात् । प्रसिद्धवन्निर्देशो हि प्रमाणान्तरप्राप्ति-

---

3. B D. om. हि, C. om. जगत्.

6. C. reads उपपन्न for उपपन्नतरः.

9. B. om. अचेतनात्.

11. C. E. om. जगदेक.

15. C. reads निरुपाधिकैः for निरुपाधिकम्.

18. C. reads अनुरूपत्वेन for अनुरूपमेव.

http://acharya.org

मपेक्षते । प्रमाणान्तराणि च सदेव सोम्येदमग्र आसीत् (छा॰ ६।२।१) इत्येवमादीन्येव वाक्यानि । तानि च यथोदितप्रकारेणैव ब्रह्म प्रतिपादयन्तीति तत्प्रतिपादितं ब्रह्माकाशशब्देन प्रसिद्धवन्निर्दिश्यते । संभवति च परस्य ब्रह्मणः प्रकाशकत्वादाकाशशब्दाभिधेयत्वम् । आकाशत आकाशयति चेति । विचानेनाकाशशब्देन विशेषसमर्पणक्षमेणापि चेतनांशं प्रत्यसंभावितकारणभावमचेतनविशेषमभिदधानेन तदैक्षत । बहु स्यां प्रजायेयेति (छा॰ ६।२।३)। सोकामयत। बहु स्यां प्रजायेय (तै. २।६) इत्यादिवाक्यशेषावधारितसार्वज्ञ्यसत्यसंकल्पत्वादिविशिष्टापूर्वार्थप्रतिपादनसमर्थवाक्यार्थान्यथाकरणं न प्रमाणपदवीमधिरोहति । एवमपूर्वानन्तविशेषणविशिष्टापूर्वार्थप्रतिपादनसमर्थानेकवाक्यगतिसामान्यं चैकेनानुवादरूपेणान्यथाकर्तुं न शक्यते ।

यत्त्वात्मशब्दश्चेतनैकान्तो न भवति । मृदात्मको घट इत्यादिषु दर्शनादित्युक्तं तत्रोच्यते । यद्यपि चेतनादन्यत्रापि क्वचिदात्मशब्दः प्रयुज्यते तथापि शरीरप्रतिसंबन्धिन्यात्मशब्दस्य प्रयोगप्राचुर्यादात्मा वा इदमेक एवाग्र आसीत् (ऐ॰ १।१)। आत्मन आकाशः संभूतः (तै. २।१) इत्यादिषु शरीरप्रतिसंबन्धिचेतन एव प्रतीयते । यथा गोशब्दस्यानेकार्थवाचित्वेपि प्रयोगप्राचुर्यात्सास्नादिमानेव स्वतः प्रतीयते । अर्थान्तरप्रतीतिस्तु तत्तदसाधारणनिर्देशापेक्षा । तथा स्वतः प्राप्तं शरीरप्रति-

---

1. C. reads अवेक्षते foi अपेक्षते.

5. C. reads प्रकाशयति for आकाशयति.

6. C. reads विशेषण for विशेष

12. C reads स्वरूपेण, E. सरूपेण, for रूपेण.

14 D. E. read सभवति for भवति.

http://acharya.org

संबन्धिचेतनाभिधानमेव स ऐक्षत लोकान्नु सृजै (ऐ. १।१) इति सोकामयत। बहु स्यां प्रजायेय (तै. २।६) इत्यादितत्तद्वाक्यशेषा एव स्थिरीकुर्वन्ति । एवं वाक्यशेषावधारितानन्यसाधारणानेकापूर्वार्थविशिष्टं निखिलजगदेककारणं सदेव सोम्येदमग्र आसीत् (छा. ६।२।१) इतिवाक्यसिद्धं ब्रह्मैवाकाशशब्देन प्रसिद्धवत्सर्वाणि ह वा इमानि भूतानि (छा. १।९।१) इत्यादिवाक्येन निर्दिश्यत इति सिद्धम्। समाप्तमाकाशाधिकरणम् ॥ २३ ॥ (८)

अत एव प्राणः ॥ २४ ॥

इदमाम्नायते छान्दोग्ये। प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता (छा. १।१०।९) इति प्रस्तुत्य कतमा सा देवता इति। प्राण इति होवाच। सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते। सैषा देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रास्तोष्यो मूर्द्धा ते व्यपतिष्यत् (छा. १।११।४-५) इति। अत्र प्राणशब्दोप्याकाशशब्दवत्प्रसिद्धप्राणव्यतिरिक्ते परस्मिन्नेव ब्रह्मणि वर्तते। तदसाधारणनिखिलजगत्प्रवेशनिष्क्रमणादिलिङ्गात्प्रसिद्धवन्निर्दिष्टात्। अधिकाशङ्का तु कृत्स्नभूतजातस्य प्राणाधीनस्थितिप्रवृत्त्यादिदर्शनात्प्रसिद्ध एव प्राणो जगत्कारणतया निर्देशमर्हतीति। परिहारस्तु शिलाकाष्ठादिषु चेतनस्वरूपे च तदभावात्सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते (छा. १।११।५) इति नोपप-

---

4. C. reads इत्यादि for इदमग्र आसीदिति.

11. D. reads सा कतमा for कतमा सा.

17. D. reads अत्र after तु; B. reads कृत्स्नस्य for कृत्स्न.

20. C. reads एतदभावात् for तदभावात्.

http://acharya.org

थत इति । अत. प्राणयति सर्वाणि भूतानीति कृत्वा परं ब्रह्म प्राणशब्देनाभिधीयते । अतः प्रसिद्धाकाशप्राणादेरन्यदेव निखिलजगदेककारणमपहतपाप्मत्वसार्वज्ञ्यसत्यसंकल्पत्वाद्यनन्तकल्याणगुणगणं परं ब्रह्मैवाकाशप्राणादिशब्दाभिधेयमिति सिद्धम् । समाप्तं प्राणाधिकरणम् ॥ २४ ॥ (९)

अतः परं जगत्कारणत्वव्याप्तेन येन केनापि निरतिशयगुणेन जुष्टं ज्योतिरिन्द्रादिशब्दैरर्थान्तरप्रसिद्धैरप्यभिधीयमानं परं ब्रह्मैवेति प्रतिपाद्यते ज्योतिश्चरणाभिधानादित्यादिना ।

ज्योतिश्चरणाभिधानात् ॥ २५ ॥

इदमाम्नायते छान्दोग्येथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदं वाव तद्यदिदमस्मिन्नन्तःपुरुषे ज्योतिः (छा. ३।१३।७)-इति । तत्र संशयः । किमयं ज्योतिःशब्दनिर्दिष्टो निरतिशयदीप्तियुक्तोर्थः प्रसिद्धमादित्यादिज्योतिरेव कारणभूतब्रह्मोत समस्तचिदचिद्वस्तुजातविसजातीयः परमकारणभूतोमितभाः सर्वज्ञः सत्यसंकल्पः पुरुषोत्तम इति । किं युक्तम् । प्रसिद्धमेव ज्योतिरिति । कुतः प्रसिद्धवन्निर्देशेप्याकाशप्राणादिशब्दवत्स्ववाक्योपात्तपरमात्मव्याप्तलिङ्गविशेषादर्शनात्परमपुरुषप्रत्यभिज्ञानासंभवात्कौक्षेयकज्यो-

---

1. D. om. कृत्वा

6 B. reads आदि after जगत्कारणत्व; D. reads एकेन for येन केन.

7. C. reads अर्थान्तरे for अर्थान्तर.

8. B reads पर for परम्; C. reads अभिधीयते for प्रतिप

11. B. reads उत्तमेष्वनुत्तमेषु for अनुत्तमेषूत्तमेषु.

12. D E. read संदेह for संशय

13 C. reads शब्देन for शब्द.

14. D. reads कारणभूतम् for कारणभूत, C. om. चिदचित्.

17. E. om. शब्द.

18. D. reads कौक्षेय for कौक्षेयक.

http://acharya.org

तिषैक्योपदेशाच्च प्रसिद्धमेव ज्योतिःकारणत्वव्याप्तनिरतिशयदीप्तियोगाज्जगत्कारणं ब्रह्मेति प्राप्ते प्रचक्ष्महे ।

ज्योतिश्चरणाभिधानात् । द्युसंबन्धितया निर्दिष्टं निरतिशयदीप्तियुक्तं ज्योतिः परमपुरुष एव । कुतः ।

पादोस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि । (छा. ३।१२।६) इत्यस्यैव द्युसंबन्धिनश्चरणत्वेन सर्वभूतानामभिधानात् । एतदुक्तं भवति । यद्यप्यथ यदतः परो दिवो ज्योतिर्दीप्यते (छा. ३।१३।७) इत्यस्मिन्वाक्ये परमपुरुषासाधारणं लिङ्गं नोपल- तथापि पूर्ववाक्ये द्युसंबन्धितया परमपुरुषस्य निर्देशादि- द्युसंबन्धिज्योतिः स एवेति प्रत्यभिज्ञायत इति । कौक्षेयज्योतिषैक्योपदेशश्च फलाय तदात्मकत्वानुसंधानविधिरिति न श्चिद्दोषः। कौक्षेयज्योतिषश्च तदात्मकत्वं भ ता स्वयमेवोक्तम्।

वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः। (गी. १५।१४)

इति ॥ २५ ॥

छन्दोभिधानान्नेति चेन्न तथा चेतोर्पणनिगमात्तथा हि दर्शनम् ॥ २६ ॥

पूर्वस्मिन्वाक्ये गायत्री वा इदं सर्वम् (छा. ३।११।१) इति गायत्र्याख्यं छन्दोभिधाय तदेतदृचाभ्युक्तम् (छा. ३।१२।५)

2. B. reads च after दीप्तियोगात्: C om. जगत्, D. E. read एवम् after इति.

5. C. reads विश्वा for सर्वा.

6 C. reads सर्वभूत for सर्वभूतानाम्.

7. C. om. दीप्यते

8. D. reads असाधारण for असाधारणम्.

9. D E read पुरुष for पुरुषस्य.

11. C. om. च.

18. C. reads अभ्यनूक्तम् for अभ्युक्तम्.

http://acharya.org

पूर्वमन्वभवन्। तस्यैव नामरूपविनिर्मुक्ता सांप्रतिक्यवस्था तद्ब्रह्म तदमृतम् (छा. ८।१४।१) इत्युच्यते। आकाशशब्दश्च तस्मिन्नप्यसंकुचितप्रकाशयोगादुपपद्यते। ननु दहरवाक्यशेषत्वादस्य स एव दहराकाशोयमिति प्रतीयते। तस्य च परमात्मत्वं निर्णीतम्। नैवम्। प्रजापतिवाक्यव्यवधानात्। प्रजापतिवाक्ये च प्रत्यगात्मनो मुक्त्यवस्थान्तं रूपमभिहितम्। अनन्तरं च विधूय पापम् (छा. ८।१३।१) इति स एव मुक्तावस्थः प्रस्तुतः। अतोत्राकाशो मुक्तात्मेति प्राप्त उच्यते।

आकाशोर्थान्तरत्वादिव्यपदेशात्। आकाशः परं ब्रह्म। कुतः। अर्थान्तरत्वादिव्यपदेशात्। अर्थान्तरत्वव्यपदेशस्तावत्। आकाशो ह वै नामरूपयोर्निर्वहिता (छा. ८।१४।१) इति नामरूपयोर्निर्वोढृत्वं बद्धमुक्तोभयावस्थात्प्रत्यगात्मनोर्थान्तरत्वमाकाशस्योपपादयति। बद्धावस्थः स्वयं कर्मवशान्नामरूपे भजमानो न नामरूपे निर्वोढुं शक्नुयात्। मुक्तावस्थस्य जगद्व्यापारासंभवान्न नितरां नामरूपनिर्वोढृत्वम्। ईश्वरस्य तु निखिलजगन्निर्माणधुरंधरस्य नामरूपयोर्निर्वोढृत्वं श्रुत्यैव प्रतिपन्नम्। अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि (छा. ६।३।२)

यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः।
तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते॥ (मु. १।१।९)

---

3. C. reads च after ननु.
4. C. om. च.
5. B. reads मैवम् for नैवम्.
9. B. reads इति after व्यपदेशात्; E. reads पर for परम्.
10. C. om. अर्थान्तरत्वव्यपदेशस्तावत्; E. reads अर्थान्तर for न्तरत्व.

सर्वाणि रूपाणि विचित्य धीरः ।
नामानि कृत्वाभिवदन्यदास्ते । (तै. आ. ३।१२।७)

इत्यादिषु । अतो निर्वाह्यनामरूपात्प्रत्यगात्मनो नामरूपयोर्निर्वोढायमाकाशोर्थान्तरभूतः परमेव ब्रह्म । तदेवोपपादयति ते यदन्तरा (छा. ८।१४।१) इति। यस्मादेवायमाकाशो नामरूपे अन्तरा ताभ्यामस्पृष्टोर्थान्तरभूतस्तस्मात्तयोर्निर्वोढा । अपहतपाप्मत्वात्सत्यसंकल्पत्वाच्च निर्वहितेत्यर्थः । आदिशब्देन ब्रह्मत्वात्मत्वामृतत्वादीनि गृह्यन्ते । निरुपाधिकबृहत्त्वादयो हि परमात्मन एव संभवन्ति । तेनात्राकाशः परमेव ब्रह्म ।

यत्पुनरुक्तं धूत्वा शरीरम् (छा. ८।१३।१) इति मुक्तोनन्तरः प्रकृत इति तन्न । ब्रह्मलोकमभिसंभवानि (छा. ८।१३।१) इति परस्यैव ब्रह्मणोनन्तरप्रकृतत्वात् । यद्यप्यभिसंभवितुर्मुक्तस्याभिसंभाव्यतया परब्रह्म निर्दिष्टं तथाप्यभिसंभवितुर्मुक्तस्य नामरूपनिर्वोढृत्वाद्यसंभवादभिसंभाव्यं परमेव ब्रह्मात्र प्रत्येतव्यम् । किं चाकाशशब्देन प्रकृतस्य दहराकाशस्यात्र प्रत्यभिज्ञानात्प्रजापतिवाक्यस्याप्युपासकस्वरूपकथनार्थत्वादुपास्य एव दहराकाशः प्राप्यतयोपसंह्रियत इति युक्तम् । आ-

---

1. B. reads विचिन्त्य for विचित्य.
3. B. reads नामरूपत्वात् for नामरूपात्.
5 B. om. एव after यस्मात्.
8. E reads अमृतत्वानि for अमृतत्वादीनि.
11. C. reads अनन्तर for अनन्तरः.
12. C. reads हि for अभि after यद्यपि.
13. B reads परम् for पर.
14. C. reads अभिसंभाव्यः for अभिसंभाव्यम्.
15. C. reads अस्य for अत्र after दहराकाशस्य.
17. E. reads इह after प्राप्यतया.

http://acharya.org

काशशब्दश्च प्रत्यगात्मनि न क्वचिद्दृष्टचरः। अतोत्राकाशः परं ब्रह्म ॥ ४२ ॥

अथ स्यात्प्रत्यगात्मनोर्थान्तरभूतमात्मान्तरमेव नास्ति। ऐक्योपदेशाद्वैतप्रतिषेधाच्च। शुद्धावस्थ एव हि प्रत्यगात्मा परमात्मा परं ब्रह्म परमेश्वर इति व्यपदिश्यते। अतः प्रकृतान्मुक्तात्मनोभिसंभवितुर्नार्थान्तरमभिसंभाव्यो ब्रह्मलोकः। अतो नामरूपयोर्निर्वहिताकाशोपि स एव भवितुमर्हतीति।

अत उत्तरं पठति।

सुषुप्त्युत्क्रान्त्योर्भेदेन ॥ ४३ ॥

व्यपदेशादिति वर्तते। सुषुप्त्युत्क्रान्त्योः प्रत्यगात्मनोर्थान्तरत्वेन परमात्मनो व्यपदेशात्प्रत्यगात्मनोर्थान्तरभूतः परमात्मास्त्येव। तथा हि वाजसनेयके कतम आत्मा योयं विज्ञानमयः प्राणेषु (बृ. ४।३।७) इति प्रकृत्य तस्य प्रत्यगात्मनः सुषुप्त्यवस्थायामकिंचिज्ज्ञस्य सर्वज्ञेन परमात्मना परिष्वङ्ग आम्नायते। प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरम् (बृ. ४।३।२१) इति। तथोत्क्रान्तावपि प्राज्ञेनात्मनान्वारूढ उत्सृजन्याति (बृ. ४।३।३५) इति। न च स्वपत उत्क्रामतो वाप्यकिंचिज्ज्ञस्य तदानीमेव स्वेनैव सर्वज्ञेन सता परिष्वङ्गान्वा-

---

3 E. reads अर्थान्तरम् for अर्थान्तरभूतमात्मान्तरम्.
4. C. om. हि.
5. E. reads च after इति.
10. E. reads अनु before वर्तते.
12 B. om. अस्त्येव.
13. C. E. read प्रकृतस्य for प्रकृत्य तस्य.
14. C. reads किंचित् for अकिंचित्.
16. C. reads संपरिष्वक्तः for अन्वारूढः.
18. C. om. वा; E. reads अस्य किंचिज्ज्ञस्य for अप्यकिंचिज्ज्ञस्य; B. reads सर्वज्ञेन स्वेनैव for स्वेनैव सर्वज्ञेन.

http://acharya.org

रोहौ संभवतः । न च क्षेत्रज्ञान्तरेण । तस्यापि सर्वज्ञत्वासंभवात् ॥ ४३ ॥

इतश्च प्रत्यगात्मनोर्थान्तरभूतः परमात्मेत्याह ।

पत्यादिशब्देभ्यः ॥ ४४ ॥

अयं परिष्वञ्जकः परमात्मोत्तरत्र पत्यादिशब्दैर्व्यपदिश्यते । सर्वस्याधिपतिः सर्वस्य वशी सर्वस्येशानः स न साधुना कर्मणा भूयान्नो एवासाधुना कर्मणा कनीयानेष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय । तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति ।...... एतमेव विदित्वा मुनिर्भवति । एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति (बृ. ४।४।२२) । स वा एष महानज आत्मान्नादो वसुदानः (बृ. ४।४।२४) । अजरोमृतोभय आनन्दो ब्रह्म (बृ. ४।४।२५) इति । एते च जगत्पतित्वजगद्विधरणसर्वेश्वरत्वादयः प्रत्यगात्मनि मुक्तावस्थेपि न कथंचित्संभवन्ति । अतो मुक्तात्मनोर्थान्तरभूतो नामरूपयोर्निर्वहिताकाशः । ऐक्योपदेशस्तु सर्वस्य चिदचिदात्मकस्य ब्रह्मकार्यत्वेन तदात्मकत्वायत्त इति सर्वं खल्विदं ब्रह्म तज्जलान् (छा. ३।१४।१) इत्यादिभिर्वाक्यैः प्रतिपाद्यत इति पूर्वमेव समर्थितम् । द्वैतप्रतिषेधश्च तत एवेत्यनवद्यम् ॥ ४४ ॥ अर्थान्तरत्वादिव्यपदेशाधिकरणं समाप्तम् ॥ (१०)

इति श्रीमद्भगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये प्रथमाध्यायस्य तृतीयः पादः समाप्तः ॥

7. B. E read असाधु for असाधुना.

12. C. reads वसुधान for वसुदान.; C. om. आनन्दः.

13. B. C. om. जगत्.

18. E. reads उक्तम् for समर्थितम्.

http://acharya.org

अथ श्रीभाष्ये

प्रथमाध्याये चतुर्थः पाद आरभ्यते ।

आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॥ १ ॥

उक्तं परमपुरुषार्थलक्षणमोक्षसाधनतया जिज्ञास्यं जगज्जन्मादिकारणं ब्रह्माचिद्वस्तुनः प्रधानादेश्चेतनाच्च बद्धमुक्तोभयावस्थाद्विलक्षणं निरस्तसमस्तहेयगन्धं सर्वज्ञं सर्वशक्ति सत्यसंकल्पं समस्तकल्याणगुणात्मकं सर्वान्तरात्मभूतं निरङ्कुशैश्वर्यमिति । इदानीं कापिलतन्त्रसिद्धाब्रह्मात्मकप्रधानपुरुषादिप्रतिपादनमुखेन प्रधानकारणत्वप्रतिपादनच्छायानुसारीण्यपि कानिचिद्वाक्यानि कासुचिच्छाखासु सन्तीत्याशङ्क्य ब्रह्मैककारणत्वस्थेम्ने तन्निराक्रियते ।

कठवल्लीष्वाम्नायते ।

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः ॥
महतः परमव्यक्तमव्यक्तात्पुरुषः परः ।
पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः ॥

(का. ३।१०-११)

---

7. B. om. सर्वज्ञम्.

9. B, reads अब्रह्मात्मकम् for अब्रह्मात्मक.

http://acharya.org

इति । तत्र संदेहः । किं कापिलतन्त्रसिद्धमब्रह्मात्मकं प्रधानमिहाव्यक्तशब्देनोच्यत उत नेति । किं युक्तम् । प्रधानमिति । कुतः ।

महतः परमव्यक्तमव्यक्तात्पुरुषः परः । (का. ३।११)

इति तत्प्रक्रियाप्रत्यभिज्ञानेन तस्यैव प्रतीतेः ।

पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः । (का. ३।११)

इति पञ्चविंशकपुरुषातिरिक्ततत्त्वनिषेधाच्च । अतोऽव्यक्तं कारणमिति प्राप्तम् । तदिदमुक्तमानुमानिकमप्येकेषामिति चेदिति । एकेषां शाखिनां शाखास्वानुमानिकं प्रधानमपि कारणमाम्नायत इति चेदत्रोत्तरं नेति । नाव्यक्तशब्देनाब्रह्मात्मकं प्रधानमिहाभिधीयते । कुतः । शरीररूपकविन्यस्तगृहीतेः । शरीराख्यरूपकविन्यस्तस्याव्यक्तशब्देन गृहीतेः । आत्मशरीरबुद्धिमनइन्द्रियविषयेषु रथिरथादिभावेन रूपितेषु रथरूपणेन विन्यस्तशरीरस्यात्राव्यक्तशब्देन ग्रहणादित्यर्थः ।

एतदुक्तं भवति । पूर्वत्र हि

आत्मानं रथिनं विद्धि शरीरं रथमेव च ।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥
इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् । (का.३।३-४)

इत्यादिना

सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् । (का. ३।९)

इत्यन्तेन संसाराध्वनः पारं वैष्णवं पदं प्रेप्सन्तमुपासकं रथित्वेन तच्छरीरादीनि च रथरथाङ्गत्वेन रूपयित्वा यस्यैते रथा-

---

5. E reads तन्त्रसिद्धतत्वप्रक्रिया for तत्प्रक्रिया.

10. C. reads तत्र for अत्र.

13. E. reads नि before रूपितेषु; E. reads विन्यस्तस्य for विन्यस्त.

22. B. reads तच्छरीरादि for तच्छरीरादीनि.

दयो वशे तिष्ठन्ति स एवाध्वनः पारभूतं वैष्णवं पदमाप्नोतीत्युक्त्वा तेषु रथादिरूपितशरीरादिषु यानि येभ्यो वशीकार्यतया प्रधानानि तान्युच्यन्त इन्द्रियेभ्यः परा ह्यर्थाः (का. ३।१०) इत्यादिना । तत्र हयत्वेन रूपितेभ्य इन्द्रियेभ्यो गोचरत्वेन रूपिता विषया वशीकार्यत्वेन पराः । वश्येन्द्रियस्यापि विषयसंनिधानादिन्द्रियाणां दुर्निग्रहत्वात् । तेभ्योपि परं प्रग्रहरूपितं मनः । मनसि विषयप्रवणे विषयासंनिधानस्याप्यकिंचित्करत्वात् । तस्मादपि सारथित्वरूपिता बुद्धिः परा । अध्यवसायाभावे मनसोप्यकिंचित्करत्वात् । तस्या अपि रथित्वरूपित आत्मा कर्तृत्वेन प्राधान्यात्परः । सर्वस्य चास्यात्मेच्छायत्तत्वादात्मैव महानिति च विशेष्यते । तस्मादपि रथरूपितं शरीरं परम् । तदायत्तत्वाज्जीवात्मनः सकलपुरुषार्थसाधनप्रवृत्तीनाम् । तस्मादपि परः सर्वान्तरात्मभूतोन्तर्याम्यध्वनः पारभूतः परमपुरुषः । यथोक्तस्यात्मपर्यन्तस्य समस्तस्य तत्संकल्पायत्तप्रवृत्तित्वात् । स खल्वन्तर्यामितयोपासनस्यापि निर्वर्तकः । परात्तु तच्छ्रुतेः (ब्र. सू. २।३।४०) इति हि जीवात्मनः कर्तृत्वं परमपुरुषायत्तमिति वक्ष्यते । वशीकार्योपासननिर्वृत्त्युपायकाष्ठाभूतः परमप्राप्यश्च स एव । तदिदमुच्यते

---

1. B. reads पारम् for पारभूतम्.
2. E. reads वशीकार्यतायाम् for वशीकार्यतया.
3. B. om. ह्यर्थाः.
5. C. reads वशीकार्यत्वे for वशीकार्यत्वेन.
6. C. reads सनिधौ for सनिधानात्; E. om. अपि after तेभ्यः; E. reads प्रग्रहत्व for प्रग्रह.
10. B. reads एव for च after सर्वस्य.
11. B. reads विशिष्यते for विशेष्यते.
14. C. reads पर्यन्त for पर्यन्तस्य; C. reads न for सः.
17. E. reads उपासना for उपासन.

http://acharya.org

पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः। (का. ३।११)

इति। तथा चान्तर्यामिब्राह्मणे य आत्मनि तिष्ठन् (बृ. ३।७।२२) इत्यादिभिः सर्वं साक्षात्कुर्वन्सर्वं नियमयतीत्युक्त्वा नान्योतोस्ति द्रष्टा (बृ. ३।७।२३) इत्यादिना नियन्त्रन्तरं निषिध्यते। भगवद्गीतासु च

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्।
विविधा च पृथक् चेष्टा दैवं चैवात्र पञ्चमम्॥ (भ. गी. १८।१४)

इति। दैवमत्र पुरुषोत्तम एव।

सर्वस्य चाहं हृदि संनिविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च।
(भ. गी. १५।१५)

इति वचनात्। तस्य च वशीकरणं तच्छरणागतिरेव। यथाह

ईश्वरः सर्वभूतानां हृद्देशेर्जुन तिष्ठति।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया॥
तमेव शरणं गच्छ सर्वभावेन भारत। (भ. गी. १८।६१-६२)

इति। तदेवमात्मानं रथिनं विद्धि (का. ३।३) इत्यादिना रथ्यादिरूपकविन्यस्ता इन्द्रियादय इन्द्रियेभ्यः परा ह्यर्थाः (का. ३।१०) इत्यत्र स्वशब्दैरेव प्रत्यभिज्ञायन्ते न रथरूपितं शरीरमिति परिशेषात्तदव्यक्तशब्देनोच्यत इति निश्चीयते। अतः कापिलतन्त्रप्रसिद्धस्य प्रधानस्य प्रसङ्ग एवेह नास्ति।

---

4. C. om. आदिना.

7. E. reads विविधाः for विविधा.

14. C. E. om. सर्वभावेन भारत.

17. B. reads प्रत्यभिज्ञायते तेन for प्रत्यभिज्ञायन्ते न.

19. C. om. प्र before सिद्धस्य; B. om. इह.

http://acharya.org

न चात्र तन्त्रसिद्धप्रक्रियाप्रत्यभिज्ञा । इन्द्रियेभ्यः परा ह्यर्थाः (का. ३।१०) इतीन्द्रियेभ्यो ह्यर्थानां शब्दादीनां परत्वकीर्तनात् । न हि शब्दादय इन्द्रियाणां कारणभूतास्तद्दर्शने । अर्थेभ्यश्च परं मनः (का. ३।१०) इत्यपि न तत्तन्त्रे संगतम् । अकारणत्वादेव । तथा बुद्धेरात्मा महान्परः (का. ३।१०) इत्यप्यसंगतम् । बुद्धिशब्देन महत्तत्त्वाभ्युपगमात् । न हि महतो महान्पर इति संभवति । महत आत्मशब्देन विशेषणं च न संगच्छते । अतो रूपकविन्यस्तानामेवेह ग्रहणम् ।

दर्शयति च तदेव

एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते ।
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥
यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि ।
ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि ॥
(का. ३।१२-१३)

इति । अजितबाह्याभ्यन्तरकरणैरस्य परमपुरुषस्य दुर्दर्शत्वमभिधाय हयादिरूपितानामिन्द्रियाणां वशीकरणप्रकारोयमुच्यते यच्छेद्वाङ्मनसी इति । वाचं मनसि नियच्छेत् । वाक्पूर्वकाणि कर्मेन्द्रियाणि ज्ञानेन्द्रियाणि च मनसि नियच्छेदित्यर्थः । वाक्शब्दे द्वितीयायाः सुपां सुलुक् (पा. सू. ७।१।३९) इति

---

1. E. reads तत् before तन्त्रसिद्ध; B. reads तन्त्रसिद्धस्य for तन्त्रसिद्ध.

4. C. reads तत्र for तत्तन्त्रे

6. C. om. बुद्धिशब्देन महत्तत्त्वाभ्युपगमात्

8. E. om. इह.

15. C. reads बाह्येन्द्रियान्तःकरणैः for बाह्याभ्यन्तरकरणैः.

16. E. reads इन्द्रियाणाम् for इन्द्रियादीनाम्.

http://acharya.org

लुक्। मनसी इति सप्तम्याश्छान्दसो दीर्घः। तद्यच्छेज्ज्ञान आत्मनि। तन्मनो बुद्धौ नियच्छेत्। ज्ञानशब्देनात्र पूर्वोक्ता बुद्धिरभिधीयते। ज्ञान आत्मनीति व्यधिकरणसप्तम्यौ। आत्मनि वर्तमाने ज्ञाने नियच्छेदित्यर्थः। ज्ञानमात्मनि महति नियच्छेत्। बुद्धि कर्तरि महत्यात्मनि नियच्छेत्। तद्यच्छेच्छान्त आत्मनि। तं कर्तारं परस्मिन्ब्रह्मणि सर्वान्तर्यामिणि नियच्छेत्। व्यत्ययेन तदिति नपुंसकलिङ्गता। एवंभूतेन रथिना वैष्णवं पदं गन्तव्यमित्यर्थः॥ १॥

अव्यक्तशब्देन कथं व्यक्तस्य शरीरस्याभिधानं तत्राह।

सूक्ष्मं तु तदर्हत्वात्॥ २॥

भूतसूक्ष्ममव्याकृतं ह्यवस्थाविशेषमापन्नं शरीरं भवति। तदव्याकृतमिह शरीरावस्थमव्यक्तशब्देनोच्यते। तदर्हत्वात्। तस्याव्याकृतस्याचिद्वस्तुन एव विकारमापन्नस्य रथवत्पुरुषार्थसाधनप्रवृत्त्यर्हत्वात्॥ २॥

यदि भूतसूक्ष्ममव्याकृतमभ्युपगम्यते कापिलतन्त्रसिद्धोपादाने कः प्रद्वेषः। तत्रापि हि भूतकारणमेवाव्यक्तमित्युच्यते। तत्राह।

तदधीनत्वादर्थवत्॥ ३॥

परमकारणभूतपरमपुरुषाधीनत्वात्प्रयोजनवद्भूतसूक्ष्मम्। एतदुक्तं भवति। न हि वयमव्यक्तं तत्परिणामविशेषांश्च स्वरूपेण

3. B. reads व्यधिकरणे for व्यधिकरण.

13. B. reads विकारान्तर, E. reads विकार for विकारम्.

16. C. om. हि.

20. B. om. हि.

http://acharya.org

नाभ्युपगच्छामः । अपि तु परमपुरुषशरीरतया तदात्मकत्वविरहेण । तदात्मकत्वेनैव हि प्रकृत्यादयः स्वप्रयोजनं साधयन्ति । अन्यथा स्वरूपस्थितिप्रवृत्तिभेदास्तेषां न स्युः । तथानभ्युपगमादेव हि तन्त्रसिद्धप्रक्रियानिरसनमिति ।

श्रुतिस्मृत्योर्हि जगदुत्पत्तिप्रलयवादेषु परमपुरुषमहिमवादेषु च प्रकृतिविकृतिपुरुषास्तदात्मकाः संकीर्त्यन्ते । यथा पृथिव्यप्सु प्रलीयत इत्यारभ्य तन्मात्राणि भूतादौ लीयन्ते । भूतादिर्महति लीयते । महानव्यक्ते लीयते । अव्यक्तमक्षरे लीयते । अक्षरं तमसि लीयते । तमः परे देव एकीभवति । तथा यस्य पृथिवी शरीरम् । यस्यापः शरीरम् । यस्य तेजः शरीरम् । यस्य वायुः शरीरम् । यस्याकाशः शरीरम् । यस्याहंकारः शरीरम् । यस्य बुद्धिः शरीरम् । यस्याव्यक्तं शरीरम् । यस्याक्षरं शरीरम् । यस्य मृत्युः शरीरम् । एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायणः (सुबा.) । तथा

भूमिरापोनलो वायुः खं मनो बुद्धिरेव च ।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥
एतद्योनीनि भूतानि सर्वाणीत्युपधारय ।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥
मत्तः परतरं नान्यत्किंचिदस्ति धनंजय ।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥

(भ. गी. ७।४-७) इति ।

---

1. B. om. तदात्मकत्वविरहेण ।
2. B. reads स्व स्वं प्रयोजनम् for स्वप्रयोजनम्.
12. C. om. यस्याव्यक्तं शरीरम्.
14. B. om. तथा.

http://acharya.org

व्यक्तं विष्णुस्तथाव्यक्तं पुरुषः काल एव च ।
(वि. पु. १।२।१८) इति ।

प्रकृतिर्या मयाख्याता व्यक्ताव्यक्तस्वरूपिणी ।
पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि ॥
परमात्मा च सर्वेषामाधारः पुरुषोत्तमः ।
विष्णुनामा स वेदेषु वेदान्तेषु च गीयते ॥
(वि. पु. ६।४।३८-३९)

इति च ॥ ३ ॥

ज्ञेयत्वावचनाच्च ॥ ४ ॥

यदि तन्त्रसिद्धमिहाव्यक्तमविवक्षिष्यत्तदास्य ज्ञेयत्वमवक्ष्यत्। व्यक्ताव्यक्तविज्ञानान्मोक्षं वदद्भिस्तान्त्रिकैस्तेषां सर्वेषां ज्ञेयत्वाभ्युपगमात् । न चास्य ज्ञेयत्वमुच्यत इति । अतो न तन्त्रसिद्धस्येह ग्रहणम् ॥ ४ ॥

वदतीति चेन्न प्राज्ञो हि प्रकरणात् ॥ ५ ॥

अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमगन्धवच्च यत् ।
अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात्प्रमुच्यते ॥
(का. ३।१५)

इत्यव्यक्तस्य ज्ञेयत्वमनन्तरमेव वदतीयं श्रुतिरिति चेत्तन्न । प्राज्ञः परमपुरुष एव ह्यत्र श्लोके निचाय्यत्वेन प्रतिपाद्यते ।

विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः ।
सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ॥ (का. ३।९)

---

5. B. reads परमेश्वरः for पुरुषोत्तमः.
6. C. reads देवेषु for वेदेषु.
10. E. reads अविवक्षिष्यत् for अवक्ष्यत्.

एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते ।
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः॥(का. ३।१२)

इति प्राज्ञस्यैव प्रकृतत्वात् । अत एव पुरुषान्न परं किंचित् (का. ३।११) इति न पञ्चविंशकपुरुषातिरिक्ततत्त्वनिषेधः । तस्य च परमपुरुषस्याशब्दत्वादयो धर्मा यत्तदद्रेश्यमग्राह्यमित्यादिश्रुतिप्रसिद्धाः । महतः परं ध्रुवम् (का. ३।१५) इत्यपि बुद्धेरात्मा महान्परः (का. ३।१०) इति पूर्वप्रकृताज्जीवात्मनः परत्वमेवोच्यते ॥ ५ ॥

त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॥ ६ ॥

अस्मिन्प्रकरणे ह्युपायोपेयोपेतॄणां त्रयाणामेव चैवमुपन्यासो ज्ञेयत्वेनोपन्यासस्तद्विषयश्च प्रश्नो दृश्यते नान्यस्याव्यक्तादेः । तथा हि नचिकेता नाम मुमुक्षुः सन्मृत्युप्रदत्ते वरत्रये प्रथमेन वरेणात्मनः पुरुषार्थयोग्यतापादनीमात्मनि पितुः सुमनस्कतां प्रतिलभ्य द्वितीयेन वरेण मोक्षसाधनभूतां नचिकेता अग्निविद्यां वव्रे

स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि तं श्रद्दधानाय मह्यम् ।
स्वर्गलोका अमृतत्वं भजन्त एतद्द्वितीयेन वृणे वरेण ॥
(का. १।१३)

इति । स्वर्गशब्देनात्र परमपुरुषार्थलक्षणमोक्षोभिधीयते । अमृतत्वं भजन्त इति तत्रस्थस्य जननमरणाभावश्रवणात् । उत्तरत्र क्षयिफलकर्मनिन्दादर्शनाच्च ।

---

10. C. reads एव for त्रयाणामेव च.
12. C om नाम; C. reads प्रत्ते for प्रदत्ते
14. C. reads उपाय for साधन
20. E reads जन्म for जनन.

http://acharya.org

त्रिणाचिकेतस्त्रिभिरेत्य संधिं त्रिकर्मकृत्तरति जन्ममृत्यू ।
(का. १।१७)

इति च प्रतिवचनात् । तृतीयेन वरेण मोक्षस्वरूपप्रश्नद्वारेणोपेयस्वरूपमुपेतृस्वरूपमुपायभूतानुष्ठितकर्मानुगृहीतोपासनस्वरूपं च पृष्टम् ।

येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके ।
एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीयः ॥
(का. १।२०)

इत्येवं मोक्षे पृष्टे तदुपदेशयोग्यतां परीक्ष्योपदिदेश ।

तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम् ।
अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति ॥
(का. २।१२)

इति। तदेवं सामान्येनोपदिष्टे नचिकेताः प्रीतः सन्देवं मत्वेत्युपास्यतया निर्दिष्टस्य प्राप्यभूतस्य देवस्याध्यात्मयोगाधिगमेनेति वेदितव्यतया निर्दिष्टस्य प्राप्तुः प्रत्यगात्मनश्च मत्वा धीरो हर्षशोकौ जहातीति निर्दिष्टस्य ब्रह्मोपासनस्य च स्वरूपविशोधनाय पुनः पप्रच्छ

अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् ।
अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वद ॥ (का. २।१४)

इति । एवं सकलेतरातीतानागतवर्तमानसाध्यसाधनसाधकवि-

---

1. C. E. read त्रिनाचिकेत' for त्रिणाचिकेतः.

4. B C. om. अनुष्ठित.

16. B. C. read न शोचति for हर्षशोकौ जहाति; E. reads प्राप्य before ब्रह्मोपासनस्य; B. om. वि before शोधनाय.

http://acharya.org

लक्षणे त्रये क्रमेण पृष्टे प्रथमं प्रणवं प्रशस्य तद्वाच्यं प्राप्यस्वरूपं तदन्तर्गतं च प्राप्तृस्वरूपं वाचकस्वरूपं चोपायं पुनरपि सामान्येन ख्यापयन्प्रणवं तावदुपदिदेश ।

सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् ॥
(का. २।१५)

इति । एवमुपदिश्य पुनरपि प्रणवं प्रशस्य प्रथमं तावत्प्राप्तुः प्रत्यगात्मनः स्वरूपमाह न जायते म्रियते वा विपश्चित् (का. २।१८) इत्यादिना । प्राप्यस्य परस्य ब्रह्मणो विष्णोः स्वरूपमणोरणीयान् (का. २।२०) इत्यादिना क इत्था वेद यत्र सः (का. २।२४) इत्यन्तेनोपदिशन्मध्ये

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ।
(का. २।२२)

इत्यादिनोपायभूतस्योपासनस्य भक्तिरूपतामप्याह । ऋतं पिबन्तौ (का. ३।१) इति चोपास्यस्योपासकेन सहावस्थानात्सूपास्यतामुक्त्वात्मानं रथिनं विद्धि (का. ३।३) इत्यादिना दुर्गं पथस्तत्कवयो वदन्ति (का. ३।१४) इत्यन्तेनोपासनप्रकारमुपासीनस्य च वैष्णवपरमपदप्राप्तिमभिधायाशब्दमस्पर्शम्

---

1. B. om. त्रये; C. om. क्रमेण.
2. E. om. स्व after वाचक.
7. B. om. इति before एवम्.
9. C. om. परस्य.
12. C. om. न मेधया न बहुना श्रुतेन.
15. B. om. उपास्यस्य.
17. B. reads उपासनस्य for उपासन.

http://acharya.org

(का. ३।१५) इत्यादिनोपसंहृतम् । अतस्त्रयाणामेवात्र ज्ञेयत्वेनोपन्यासः प्रश्नश्च । तस्मान्नेह तान्त्रिकस्याव्यक्तस्य ग्रहणम् ॥ ६ ॥

महद्वच्च ॥ ७ ॥

यथा बुद्धेरात्मा महान्परः (का. ३।१०) इत्यत्रात्मशब्देन सामानाधिकरण्यान्न तन्त्रसिद्धं महत्तत्त्वं गृह्यत एवमव्यक्तमप्यात्मनः परत्वेनाभिधानान्न कापिलतन्त्रसिद्धं गृह्यत इति स्थितम् ॥ ७ ॥ आनुमानिकाधिकरणं समाप्तम् ॥ (१)

चमसवदविशेषात् ॥ ८ ॥

अत्रापि कापिलतन्त्रसिद्धप्रक्रिया निरस्यते । नाब्रह्मात्मकानां प्रकृतिमहदहंकारादीनां स्वरूपम् । श्रुतिस्मृतिभ्यां ब्रह्मात्मकानां तेषां प्रतिपादनात् । यथाथर्वणिका अधीयते ।

विकारजननीमज्ञामष्टरूपामजां ध्रुवाम् ॥
ध्यायतेऽध्यासिता तेन तन्यते प्रेर्यते पुनः ।
सूयते पुरुषार्थं च तेनैवाधिष्ठिता जगत् ॥
गौरनाद्यन्तवती सा जनित्री भूतभाविनी ।
सितासिता च रक्ता च सर्वकामदुघा विभोः ॥
पिबन्त्येनामविषमामविज्ञाताः कुमारकाः ।
एकस्तु पिबते देवः स्वच्छन्दोऽत्र वशानुगाम् ॥
ध्यानक्रियाभ्यां भगवान्भुङ्क्तेऽसौ प्रसभं विभुः ।
सर्वसाधारणीं दोग्ध्रीं पीड्यमानां तु यज्वभिः ॥ (चूलि. ३—७)
चतुर्विंशतिसंख्याकमव्यक्तं व्यक्तमुच्यते ॥ (चूलि. १४)

---

4. B. reads आत्मशब्द for आत्मशब्देन.

5. C. reads अपि after एवम्.

9. C. E. om. कापिल; E. reads अब्रह्मात्मक for अब्रह्मात्मकानाम्.

http://acharya.org

इत्यत्र प्रकृत्यादीनां स्वरूपमभिहितम् । यदात्मकाश्चैते प्रकृत्यादयः स परमपुरुषोपि

तं षड्विंशकमित्याहुः सप्तविंशमथापरे ।
पुरुषं निर्गुणं सांख्यमथर्वशिरसो विदुः ॥ (चूलि. १३–१४)

इति प्रतिपाद्यते । अपरे चाथर्वणिका अष्टौ प्रकृतयः षोडश विकारा इत्यधीयते । श्वेताश्वतराश्चैवं प्रकृतिपुरुषेश्वरस्वरूपमामनन्ति ।

संयुक्तमेतत्क्षरमक्षरं च व्यक्ताव्यक्तं भरते विश्वमीशः ।
अनीशश्चात्मा बध्यते भोक्तृभावाज्ज्ञात्वा देवं मुच्यते सर्वपाशैः॥
ज्ञाज्ञौ द्वावजावीशानीशावजा ह्येका भोक्तृभोगार्थयुक्ता ।
अनन्तश्चात्मा विश्वरूपो ह्यकर्ता त्रयं यदा विन्दते ब्रह्म चैतत् ॥
क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः ।
तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिः॥
(श्वे. १।८-१०)

इति । तथा

छन्दांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदा वदन्ति ।
अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया संनिरुद्धः ॥
मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।
तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ॥ (श्वे. ४।९-१०)

इति । तथोत्तरत्रापि

---

9. E. reads अन्य for आत्मा.

10. B. reads अजो ह्येको भोक्तृभोगार्थयुक्तः for अजा ह्येका भोक्तृभोगार्थयुक्ता

11. C. reads ब्रह्ममेतत् for ब्रह्म चैतत्.

13. B. reads याजनात् for योजनात्.

16. E. reads देवाः for वेदाः.

http://acharya.org

प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः ।
(श्वे. ६।१६)

इति । स्मृतिरपि

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् ॥
कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥
पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान्गुणान् ।
कारणं गुणसङ्गोस्य सदसद्योनिजन्मसु ॥
(भ. गी. १३।१९-२१)

सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥ (भ. गी. १४।५)

तथा

सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् ।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥
प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥ (भ.गी.९।७-८)
मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
हेतुनानेन कौन्तेय जगद्विपरिवर्तते ॥ (भ. गी. ९।१०)

इति । तस्माद्ब्रह्मात्मकत्वेन कापिलतन्त्रसिद्धाः प्रकृत्यादयो निरस्यन्ते ।

श्वेताश्वतरोपनिषदि श्रूयते ।

---

1. B. reads बन्धस्थितिमोक्ष for मोक्षस्थितिबन्ध.

8. B. reads अपि for हि.

http://acharya.org

अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः ।
अजो ह्येको जुषमाणोनुशेते जहात्येनां भुक्तभोगामजोन्यः ॥
(श्वे. ४।५)

इति । तत्र संदेहः । किमस्मिन्मन्त्रे केवला तन्त्रसिद्धा प्रकृतिरभिधीयत उत ब्रह्मात्मिकेति । किं युक्तम् । केवलेति । कुतः । अजामेकामित्यस्याः प्रकृतेरकार्यत्वश्रवणात् । बह्वीः प्रजाः सृजमानां सरूपा इति स्वातन्त्र्येण सरूपाणां बह्वीनां प्रजानां स्रष्टृत्वश्रवणाच्च । इत्येवं प्राप्तेभिधीयते

चमसवदविशेषादिति । नात्र तन्त्रसिद्धा प्रकृतिरभिधीयते । कुतः । न जायत इत्यजेत्यजात्वमात्रप्रतिपादनात् । तन्त्रसिद्धाब्रह्मात्मकाजाग्रहणे विशेषाप्रतीतेः । चमसवत् । यथार्वाग्बिलश्चमस ऊर्ध्वबुध्नः (बृ. २।२।३) इत्यस्मिन्मन्त्रे चमसस्य भक्षणसाधनत्वमात्रं चमसशब्देन प्रतीयत इति न तावन्मात्रेण चमसविशेषप्रतीतिः । यौगिकशब्दानामर्थप्रकरणादिभिर्विनार्थविशेषनिश्चयायोगात् । तत्र च यथेदं तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्नः (बृ. २।२।३) इत्यादिना वाक्यशेषेण शिरसश्चमसत्वनिश्चयस्तथात्राप्यर्थप्रकरणादिभिरेवाजा

---

1. C. reads बह्वीं प्रजां जनयन्तीं सरूपाम् for बह्वीः प्रजाः सृजमानां सरूपाः.
4. B. reads केवल for केवला.
7. C. reads स्वरूपाणाम् for सरूपाणाम्.
8. C. reads प्रचक्ष्महे for अभिधीयते.
9. C. om. इति after अविशेषात्.
10. B. om. कुतः; C. om. अजेति.
11. C. reads अब्रह्मात्मिकाजाग्रहणविशेषप्रतीतेः for अब्रह्मात्मकाजाग्रहणे विशेषाप्रतीतेः.
13. E. om. चमसशब्देन.
15. B. om. विशेष after अर्थ.

http://acharya.org

निर्णेतव्या । न चात्र तत्प्रसिद्धाजाग्रहणहेतवोर्थप्रकरणादयो दृश्यन्ते । न चास्या विशेषग्रहे स्वातन्त्र्येण स्रष्टृत्वं प्रतीयते । बह्वीः प्रजाः सृजमाना इति स्रष्टृत्वमात्रप्रतीतेः । अतोनेन मन्त्रेण नाब्रह्मात्मिकाजाभिधीयते ॥ ८ ॥

ब्रह्मात्मकाजाग्रहण एव विशेषहेतुरस्तीत्याह ।

ज्योतिरुपक्रमा तु तथा ह्यधीयत एके ॥ ९ ॥

तुशब्दोवधारणार्थः । ज्योतिरुपक्रमैवैषाजा । ज्योतिर्ब्रह्म । तं देवा ज्योतिषां ज्योतिः (बृ. ४।४।१६) । अथ यदतः परो दिवो ज्योतिर्दीप्यते (छा. ३।१३।७) इत्यादिश्रुतिप्रसिद्धेः । ज्योतिरुपक्रमा ब्रह्मकारणिकेत्यर्थः । तथा ह्यधीयत एके । हिर्हेतौ । यस्मादस्या अजाया ब्रह्मकारणकत्वमेके शाखिनस्तैत्तिरीया अधीयते ।

अणोरणीयान्महतो महीयानात्मा गुहायां निहितोस्य जन्तोः ।
(ना. १२)

इति निहितं गुहायामिति हृदयगुहायामुपास्यत्वेन संनिहितं ब्रह्माभिधाय सप्त प्राणाः प्रभवन्ति तस्मात्सप्तार्चिषः (ना. १२) इत्यादिना सर्वेषां लोकानां ब्रह्मादीनां च तत उत्पत्तिमभिधाय सर्वकारणीभूताजा तत उत्पन्नाभिधीयते

---

1. B. reads ग्रहणे for ग्रहण
2. B C. om. विशेषग्रहे.
5 B. reads ब्रह्मात्मिक for ब्रह्मात्मक, E. reads विशेषतः for विशेष.
9. B. om. दीप्यते
15. E. om. इति before निहितम्.
16. C. om. सप्तार्चिष.
17. C. reads लोकादीना च for लोकानाम्.
18. C. reads कारणभूत for कारणीभूत.

http://acharya.org

अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम् ।
अजो ह्येको जुषमाणोनुशेते जहात्येनां भुक्तभोगामजोन्य: ॥
(ना. १२।१)

इति । सर्वस्य तद्व्यतिरिक्तस्य वस्तुजातस्य तत उत्पत्त्या तदात्मकत्वोपदेशे क्रियमाणेभिधीयमानत्वात्प्राणसमुद्रपर्वतादिवदेषाप्यजा बह्वीनां सरूपाणां प्रजानां स्रष्ट्री कर्मवश्येनात्मना भुज्यमानान्येन विदुषात्मना त्यज्यमाना ब्रह्मण उत्पन्ना ब्रह्मात्मिकावगन्तव्येत्यर्थ: । अतो वाक्यशेषाच्चमसविशेषवच्छाखान्तरीयादेतत्सरूपात्प्रत्यभिज्ञायमानार्थाद्वाक्यान्नियमिताजा ब्रह्मात्मिकेति निश्चीयते । इहापि प्रकरणोपक्रमे किं कारणं ब्रह्म (श्वे. १।१) इत्यारभ्य

ते ध्यानयोगानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्निगूढाम् ।
(श्वे. १।३)

इति परब्रह्मशक्तिरूपाया अजाया अवगते: । उपरिष्टाच्च

अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया संनिरुद्ध: ।
मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।
(श्वे. ४।९।१०)

यो योनिं योनिमधितिष्ठत्येक: (श्वे. ४।११) इति च तस्या एव प्रतीतेर्नास्मिन्मन्त्रे तन्त्रसिद्धस्वतन्त्रप्रकृतिप्रतिपत्तिगन्ध: ॥ ९ ॥

---

5. E. reads प्र before क्रियमाणे.

6 C. om. आत्मना after कर्मवश्येन.

7. E. reads च after त्यज्यमाना.

9. E. reads प्रत्यभिज्ञायमानात् for प्रत्यभिज्ञायमानार्थात्.

http://acharya.org

कथं तर्हि ज्योतिरुपक्रमाया लोहितशुक्लकृष्णरूपाया अस्याः प्रकृतेरजात्वमजाया वा कथं ज्योतिरुपक्रमात्वमित्यत आह ।

कल्पनोपदेशाच्च मध्वादिवदविरोधः ॥ १० ॥

प्रसक्ताशङ्कानिवृत्त्यर्थश्चशब्दः । अस्याः प्रकृतेरजात्वं ज्योतिरुपक्रमात्वं च न विरुध्यते । कुतः । कल्पनोपदेशात् । कल्पनं क्लृप्तिः सृष्टिः । जगत्सृष्ट्युपदेशादित्यर्थः । यथा सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् (म. ना. ५।७) इति कल्पनं सृष्टिः । अत्राप्यस्मान्मायी सृजते विश्वमेतत् (श्वे. ४।९) इति जगत्सृष्टिरुपदिश्यते । स्वेनाविभक्तादस्मात्सूक्ष्मावस्थात्कारणान्मायी सर्वेश्वरः सर्वं जगत्सृजतीत्यर्थः । अनेन कल्पनोपदेशेनास्याः प्रकृतेः कार्यकारणरूपेणावस्थाद्वयान्वयोवगम्यते । सा हि प्रलयवेलायां ब्रह्मतापन्नाविभक्तनामरूपाव्यक्तादिशब्दवाच्या सूक्ष्मरूपेणावतिष्ठते । सृष्टिवेलायां तूद्भूतसत्त्वादिगुणा विभक्तनामरूपा व्यक्तादिशब्दवाच्या तेजोबन्नरूपेण च परिणता लोहितशुक्लकृष्णाकारा चावतिष्ठते । अतः कारणावस्थाजा कार्यावस्था च ज्योतिरुपक्रमेति न विरोधः । मध्वादिवत् । यथेश्वरेणादित्यस्य कारणावस्थायामेकस्यैवावस्थितस्य कार्यावस्थायामृग्यजुःसामाथर्वप्रतिपाद्यकर्मनिष्पाद्यरसाश्रयतया वस्वादिदेवताभोग्यत्वाय मधुत्वकल्पनमुदयास्तमयकल्पनं

---

2. B. reads ज्योतिरुपक्रमत्वम् for ज्योतिरुपक्रमात्वम्; E. reads अत्र for अतः.

13. C. om. अव्यक्तादिशब्दवाच्या; E. reads च for तु.

14. E. reads आदि after अन्न.

16. B. reads कारणावस्थायां कार्यावस्थायाम् for कारणावस्थाजा कार्यावस्था; C. om. च after कार्यावस्था.

19. C. om. देवता.

http://acharya.org

च न विरुध्यते । तदुक्तं मधुविद्यायामसौ वा आदित्यो देवमधु (छा. ३।१।१) इत्यारभ्याथ तत ऊर्ध्वमुदेत्य नैवोदेता नास्तमेतैकल एव मध्ये स्थाता (छा. ३।११।१) इत्यन्तेन । एकल एकस्वभावः । अतोनेन मन्त्रेण ब्रह्मात्मिकैवाजाभिधीयते न कापिलतन्त्रसिद्धेति सिद्धम् ।

अन्ये त्वस्मिन्मन्त्रे तेजोबन्नलक्षणाजैकाभिधीयत इति ब्रुवते । ते प्रष्टव्याः । किं तेजोबन्नान्येव तेजोबन्नात्मिकाजैकोत तेजोबन्नरूपं ब्रह्मैव किं वा तेजोबन्नकारणभूता काचिदिति । प्रथमे कल्पे तेजोबन्नानामनेकत्वादजामेकामिति विरुध्यते । न च वाच्यं तेजोबन्नानामनेकत्वेपि त्रिवृत्करणेनैकतापत्तिरिति । त्रिवृत्करणेपि बहुत्वानपगमात् । इमास्तिस्रो देवताः (छा. ६।३।२) । तासां त्रिवृतं त्रिवृतमेकैकां करवाणि (छा. ६।३।३) इति प्रत्येकं त्रिवृत्करणोपदेशात् । द्वितीयः कल्पो विकल्प्यः । किं तेजोबन्नरूपेण विकृतं ब्रह्मैवाजैका किं वा स्वरूपेणावस्थितमविकृतमिति । प्रथमः कल्पो बहुत्वानपायादेव निरस्तः । द्वितीयेपि लोहितशुक्लकृष्णामिति विरुध्यते । स्वरूपेणावस्थितं ब्रह्म तेजोबन्नलक्षणमिति वक्तुमपि न शक्यते । तृतीये कल्पेप्यजाशब्देन तेजोबन्नानि निर्दिश्य तैस्तत्कारणा-

---

2. E. reads एवास्तमेति for अस्तमेता.

6. B. reads एवाजा for अजैका.

11. E. reads च after त्रिवृत्करणेपि, E. reads हन्त before इमा.; C. om. इमास्तिस्रो देवता.। तासां त्रिवृत त्रिवृतमेकैका करवाणीति प्रत्येक त्रिवृत्करणोपदेशात्.

13. B. reads अपि after कल्पः

14. B. reads इह for एव.

15. B. reads प्रथम for प्रथमः; E. reads अनपगमात् for अनपायात्.

17. E. om. ब्रह्म.

http://acharya.org

वस्थोपस्थापनीयेत्यास्थेयम् । ततो वरमजाशब्देन तेजोबन्नकारणावस्थायाः श्रुतिप्रसिद्धाया एवाभिधानम् ।

यत्पुनरस्याः प्रकृतेरजाशब्देन च्छागलपरिकल्पनमुपदिश्यत इति तदप्यसंगतम् । निष्प्रयोजनत्वात् । यथात्मानं रथिनं विद्धि (का. ३।३) इत्यादिषु ब्रह्मप्राप्त्युपायताख्यापनाय शरीरादिषु रथादिरूपणं क्रियते यथादित्ये वस्वादीनां भोग्यत्वख्यापनाय मधुत्वकल्पनं क्रियते तद्वदस्यां प्रकृतौ छागत्वपरिकल्पनं कोपयुज्यते । न केवलमुपयोगाभाव एव विरोधश्च । कृत्स्नजगत्कारणभूतायाः स्वस्मिन्ननादिकालसंबद्धानां सर्वेषामेव चेतनानां निखिलसुखदुःखोपभोगापवर्गसाधनभूताया अचेतनाया अत्यल्पप्रजासर्गकरागन्तुकसंगमचेतनविशेषैकरूपात्यल्पप्रयोजनसाधनस्वपरित्यागहेतुभूतस्वसंबन्धपरित्यागसमर्थचेतनविशेषरूपच्छागस्वभावख्यापनाय तद्रूपत्वकल्पनं विरुद्धमेव । अजामेकाम्....अजो ह्येकः....अजोन्यः (श्वे. ४।५) इत्यत्राजशब्दस्य विरूपार्थपरिकल्पनं च न शोभनम् । सर्वत्र च्छागत्वं परिकल्प्यत इति चेत् । जहात्येनां भुक्तभोगामजोन्यः (श्वे. ४।५) इति विदुष आत्यन्तिकप्रकृतिपरित्यागं कुर्वतोनेन वान्येन वा पुनरपि संबन्धयोग्यच्छागत्वपरिकल्पनमत्यन्तविरुद्धम् ॥ १० ॥

चमसाधिकरणं समाप्तम् ॥ (२)

---

1. B. reads अवसीयते for उपस्थापनीया.
6. E. reads च after यथा; C. reads आदित्य for आदित्ये.
8. B. om. परि before कल्पनम्
12. E reads सबन्धि for सबन्ध.
13. C. reads छागभाव for छागस्वभाव; B. reads स्वभावता for स्वभाव.
15. C reads अजाशब्दस्य foı अजशब्दस्य.
17. B. reads वान्येन for वान्येन.

http://acharya.org

न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॥११॥

वाजसनेयिनः समामनन्ति

यस्मिन्पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः ।
तमेव मन्य आत्मानं विद्वान्ब्रह्मामृतोऽमृतम् ॥ (बृ. ४।४।१७)

इति । किमयं मन्त्रः कापिलतन्त्रसिद्धतत्त्वप्रतिपादनपर उत नेति संदिह्यते । किं युक्तम् । तन्त्रसिद्धतत्त्वप्रतिपादनपर इति । कुतः । पञ्चशब्दविशेषितात्पञ्चजनशब्दात्पञ्चविंशतितत्त्वप्रतीतेः । एतदुक्तं भवति । पञ्चजना इति समासः समाहारविषयः । पञ्चजनाः । पञ्चानां जनानां समूहाः पञ्चजनाः । पञ्चपूल्य इतिवत् । पञ्चजना इति लिङ्गव्यत्ययश्छान्दसः । ते च समूहाः कतीत्यपेक्षायां पञ्चजनशब्दविशेषणेन प्रथमेन पञ्चशब्देन समूहाः पञ्चेति प्रतीयन्ते । यथा पञ्च पञ्चपूल्य इति । अतः पञ्च पञ्चजना इति पञ्चविंशतिपदार्थावगतौ ते कतम इत्यपेक्षायां मोक्षाधिकारान्मुमुक्षुभिर्ज्ञातव्यतया स्मृतिप्रसिद्धाः प्रकृत्यादय एव ज्ञायन्ते ।

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥ (सां. का. ३)

इति हि कापिलानां प्रसिद्धिः । अतस्तन्त्रसिद्धतत्त्वप्रतिपादनपर इति प्राप्ते प्रचक्ष्महे ।

न संख्योपसंग्रहादपीति । पञ्च पञ्चजना इति पञ्चविंशतिसंख्योपसंग्रहादपि न तन्त्रसिद्धतत्त्वप्रतीतिः । कुतः । नानाभावात् । एषां पञ्चसंख्याविशेषितानां पञ्चजनानां तन्त्रसिद्धेभ्यस्तत्त्वेभ्यः पृथग्भावात् ।

---

9. C. om. पञ्चजनाः । before पञ्चानाम्.
12. C. reads प्रतीयते for प्रतीयन्ते.

http://acharya.org

यस्मिन्पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः (बृ. ४।४।१७)
इत्येषां यच्छब्दनिर्दिष्टब्रह्माश्रयतया ब्रह्मात्मकत्वं हि प्रतीयते ।

तमेव मन्य आत्मानं विद्वान्ब्रह्मामृतोमृतम् । (बृ. ४।४।१७)
इत्यत्र तमिति परामर्शेन यच्छब्दनिर्दिष्टं ब्रह्मेत्यवगम्यते । अतस्तेभ्यः पृथग्भूताः पञ्च पञ्चजना इति न तन्त्रसिद्धा एते । अतिरेकाच्च । तन्त्रसिद्धेभ्यस्तत्त्वेभ्योत्र तत्त्वातिरेकोपि भवति । यच्छब्दनिर्दिष्ट आत्माकाशश्चात्रातिरिच्येते । अतः

तं षड्विंशकमित्याहुः सप्तविंशमथापरे । (चू. १४)
इति श्रुतिप्रसिद्धसर्वतत्त्वाश्रयभूतः सर्वेश्वरेश्वरः परमपुरुषोत्राभिधीयते ।

न संख्योपसंग्रहादपीत्यपिशब्दस्य पञ्च पञ्चजना इत्यत्र पञ्चविंशतितत्त्वप्रतीतिरेव न संभवतीत्यभिप्रायः । कथम् । पञ्चभिरारब्धसमूहपञ्चकाभावात् । न हि तन्त्रसिद्धतत्त्वेषु पञ्चसु पञ्चस्वनुगतं तत्तत्संख्यानिवेशनिमित्तं जात्याद्यस्ति । न च वाच्यं पञ्च कर्मेन्द्रियाणि पञ्च ज्ञानेन्द्रियाणि पञ्च महाभूतानि पञ्च तन्मात्राण्यवशिष्टानि पञ्चेत्यवान्तरसंख्यानिवेशनिमित्तमस्त्येवेति । आकाशस्य पृथङ्निर्देशेन पञ्चभिरारब्धमहाभूतसमूहासिद्धेः । अतः पञ्चजना इत्ययं समासो न समाहारविषयः । अयं तु दिक्संख्ये संज्ञायाम् (पा. सू. २।१।५०) इति संज्ञाविशेषविषयः । अन्यथा पञ्चजना इति लिङ्गव्यत्ययश्च । पञ्च-

2. E. reads एतेषाम् for एषाम्; E. reads ब्रह्मात्मकतया for ब्रह्माश्रयतया.

5. C. om. पञ्च before पञ्च.

7. C. reads अतिरिच्यते for अतिरिच्येते.

9. C. reads पुरुषोत्तमः for परमपुरुषः.

12. C. reads प्रतिपत्तिः for प्रतीतिः.

20. C. om. विशेष.

http://acharya.org

जना नाम केचित्सन्ति। ते च पञ्चसंख्यया विशेष्यन्ते पञ्च पञ्चजना इति। सप्त सप्तर्षय इतिवत् ॥ ११ ॥

के पुनस्ते पञ्च पञ्चजना इत्यत्राह।

प्राणादयो वाक्यशेषात् ॥ १२ ॥

प्राणस्य प्राणमुत चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदुः (बृ. ४।४।१८) इति वाक्यशेषाद्ब्रह्माश्रयाः प्राणादय एव पञ्च पञ्चजना इति विज्ञायन्ते ॥ १२ ॥

अथ स्यात्काण्वानां माध्यंदिनानां च यस्मिन्पञ्च पञ्चजना इत्ययं मन्त्रः समानः। प्राणस्य प्राणमित्यादिवाक्यशेषे काण्वानामन्नस्य पाठो न विद्यते। तेषां पञ्च पञ्चजनाः प्राणादय इति न शक्यते वक्तुमिति। अत्रोत्तरम्।

ज्योतिषैकेषामसत्यन्ने ॥ १३ ॥

एकेषां काण्वानां पाठेसत्यन्ने ज्योतिषा पञ्चजना इन्द्रियाणीति विज्ञायन्ते। तेषां वाक्यशेषः प्रदर्शनार्थः। एतदुक्तं भवति। यस्मिन्पञ्च पञ्चजना इत्यस्मात्पूर्वस्मिन्मन्त्रे

तं देवा ज्योतिषां ज्योतिरायुर्होपासतेमृतम्।

(बृ. ४।४।१६)

इति ज्योतिषां ज्योतिष्ट्वेन ब्रह्मण्यभिधीयमाने ब्रह्माधीनस्वकार्याणि कानिचिज्ज्योतींषि प्रतिपन्नानि। तानि च विषयाणां प्रकाशकानीन्द्रियाणीति यस्मिन्पञ्च पञ्चजना इत्यनिर्धारित-

---

3. C. om. पञ्च before पञ्च, C. reads अत: for अत्र.

6. B. reads यत् for ये; E. reads मनो ये for ये मन..

11. C. reads शक्यम् for शक्यते.

16. C. om. आयुर्होपासतेमृतम्.

http://acharya.org

विशेषनिर्देशेनावगम्यन्त इति । प्राणस्येति प्राणशब्देन स्पर्शेन्द्रियं गृह्यते । वायुसंबन्धित्वात्स्पर्शेन्द्रियस्य । मुख्यप्राणस्य ज्योतिःशब्देन प्रदर्शनायोगात् । चक्षुष इति चक्षुरिन्द्रियम् । श्रोत्रस्येति श्रोत्रेन्द्रियम् । अन्नस्येति घ्राणरसनयोस्तन्त्रेणोपादानम् । अन्नशब्दोदितपृथिवीसंबन्धित्वाद् घ्राणेन्द्रियमनेन गृह्यते । अद्यतेनेनेत्यन्नमिति रसनेन्द्रियमपि गृह्यते । मनस इति मनः । घ्राणरसनयोस्तन्त्रेणोपादानमिति पञ्चत्वमप्यविरुद्धम् । प्रकाशकानि मनःपर्यन्तानीन्द्रियाणि पञ्चजनशब्दनिर्दिष्टानि । तदविरोधाय घ्राणरसनयोस्तन्त्रेणोपादानम् । तदेवम्

यस्मिन्पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः ।
(बृ. ४।४।१७)

इति पञ्चजनशब्दनिर्दिष्टानीन्द्रियाण्याकाशशब्दप्रदर्शितानि महाभूतानि च ब्रह्मणि प्रतिष्ठितानीति सर्वतत्त्वानां ब्रह्माश्रयत्वप्रतिपादनान्न तन्त्रसिद्धपञ्चविंशतितत्त्वप्रसङ्गः । अतः सर्वत्र वेदान्ते संख्योपसंग्रहे तदभावे वा न कापिलतन्त्रसिद्धतत्त्वप्रतीतिरस्तीति स्थितम् ॥ १३ ॥ संख्योपसंग्रहाधिकरणं समाप्तम् ॥ (३)

कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ॥१४॥

पुनः प्रधानकारणवादी प्रत्यवतिष्ठते । न वेदान्तेष्वेकस्मात्सृष्टिराम्नायत इति जगतो ब्रह्मैककारणत्वं न युज्यते वक्तुम् । तथा हि । सदेव सोम्येदमग्र आसीत् (छा. ६।२।१) इति सत्पूर्विका सृष्टिराम्नायते । असद्वा इदमग्र आसीत् (तै. २।७।१)

2. C. reads स्पर्शनेन्द्रियस्य for स्पर्शेन्द्रियस्य.

5. B. reads अन्नेन for अनेन before गृह्यते.

7. E. reads तन्त्र for तन्त्रेण.

16. C. om. अस्ति.

http://acharya.org

इत्यसत्पूर्विका च । अन्यत्रासदेवेदमग्र आसीत्तत्सदासीत्तत्समभवत् (छा. ३।१९।१) इति च । अतो वेदान्तेषु स्रष्टुरव्यवस्थितेर्जगतो ब्रह्मैककारणत्वं न निश्चेतुं शक्यम् । प्रत्युत प्रधानकारणत्वमेव निश्चेतुं शक्यते । तद्धेदं तर्ह्यव्याकृतमासीत् (बृ. १।४।७) इत्यव्याकृते प्रधाने जगतः प्रलयमभिधाय तन्नामरूपाभ्यां व्याक्रियत (बृ. १।४।७) इत्यव्याकृतादेव जगतः सृष्टिश्चाभिधीयते । अव्याकृतं ह्यव्यक्तम् । नामरूपाभ्यां न व्याक्रियते न व्यज्यत इत्यर्थः । अव्यक्तं प्रधानमेव । अस्य च स्वरूपनित्यत्वेन परिणामाश्रयत्वेन च जगत्कारणवादिवाक्यगतौ सदसच्छब्दौ ब्रह्मणीवास्मिन्न विरोत्स्येते । एवमव्याकृतकारणत्वे निश्चिते सतीक्षणादयः कारणगताः सृष्ट्यौन्मुख्याभिप्रायेण योजयितव्याः । ब्रह्मात्मशब्दावपि बृहत्त्वव्यापित्वाभ्यां प्रधान एव वर्तेते । अतः स्मृतिन्यायप्रसिद्धं प्रधानमेव जगत्कारणं वेदान्तवाक्यैः प्रतिपाद्यत इति प्राप्ते प्रचक्ष्महे ।

कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः । चशब्दस्तुशब्दार्थे । सर्वज्ञात्सर्वेश्वरात्सत्यसंकल्पान्निरस्तनिखिलदोषगन्धात्परस्माद्ब्रह्मण एव जगदुत्पद्यत इति निश्चेतुं शक्यते । कुतः । आकाशादिषु कारणत्वेन यथाव्यपदिष्टस्योक्तेः । सर्वज्ञत्वादिविशिष्टत्वेन जन्माद्यस्य यतः (ब्र. सू. १।१।२) इत्येवमादिषु प्रतिपादितं ब्रह्म यथाव्यपदिष्टमित्युच्यते । तस्यैकस्यैवाकाशा-

---

9. E. om वादि.
11. B. reads उन्मुख for औन्मुख्य.
13. B. reads सिद्धम् for प्रसिद्धम्.
16. B. om. सर्वज्ञात्.
17. B. om. परस्मात्.
18. B. reads व्यपदिष्ट for व्यपदिष्टस्य.

http://acharya.org

दिषु कारणत्वेनोक्तेः । तस्माद्वा एतस्मादात्मन आकाशः संभूतः (तै. २।१) । तत्तेजोसृजत (छा. ६।२।३) इत्यादिषु सर्वज्ञं ब्रह्मैव कारणत्वेनोच्यते । तथा हि सत्यं ज्ञानमनन्तं ब्रह्म । सोश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता (तै. २।१) इति प्रकृतं विपश्चिदेव ब्रह्म तस्माद्वा एतस्मादिति परामृश्यते । तथा तदैक्षत बहु स्याम् (छा. ६।२।३) इति निर्दिष्टं सर्वज्ञं ब्रह्मैव तत्तेजोसृजत (छा. ६।२।३) इति परामृश्यते । एवं सर्वत्र सृष्टिवाक्येषु द्रष्टव्यम् । अतो ब्रह्मैककारणं जगदिति निश्चीयते ॥ १४ ॥

नन्वसद्वा इदमग्र आसीत् (तै. २।७।१) इत्यसदेव कारणत्वेन व्यपदिश्यते । तत्कथमिव सर्वज्ञस्य सत्यसंकल्पस्य ब्रह्मण एव कारणत्वं निश्चीयत इत्यत्राह ।

समाकर्षात् ॥ १५ ॥

असद्वा इदमग्र आसीत् (तै. २।७।१) इत्यत्रापि विपश्चिदानन्दमयं सत्यसंकल्पं ब्रह्मैव समाकृष्यते । कथम् । तस्माद्वा एतस्माद्विज्ञानमयात् । अन्योन्तर आत्मानन्दमयः (तै. २।५) । सोकामयत बहु स्यां प्रजायेयेति (तै. २।६) । इदं सर्वमसृजत । यदिदं किं च । तत्सृष्ट्वा । तदेवानुप्राविशत् । तदनुप्रविश्य । सच्च त्यच्चाभवत् (तै. २।६) इत्यादिना ब्राह्मणेनानन्दमयं ब्रह्म सत्यसंकल्पं सर्वस्य स्रष्टृ सर्वानुप्रवेशेन सर्वात्मभूतमभिधाय तदप्येष श्लोको भवति (तै. २।६) इत्युक्तस्यार्थस्य सर्वस्य साक्षित्वेन ह्युदाहृतोयं श्लोकोसद्वा इदमग्र आसीत् (तै. २।७) इति । तथोत्तरत्र भीषास्माद्वातः पवते (तै. २।८) इत्यादिना

---

1. C. reads यथाव्यपदिष्टस्य after कारणत्वेन.

6. B. reads प्रजायेय after बहु स्याम्.

http://acharya.org

तदेव ब्रह्म समाकृष्य सर्वस्य प्रशासितृत्वनिरतिशयानन्दत्वादयोऽभिधीयन्ते। अतोयं मन्त्रस्तद्विषय एव। तदानीं नामरूपविभागाभावेन तत्संबन्धितयास्तित्वाभावाद्ब्रह्मैवासच्छब्देनोच्यते। असदेवेदमग्र आसीत् (छा.३।१९।१) इत्यत्राप्ययमेव निर्वाहः।

यदुक्तं तद्धेदं तर्ह्यव्याकृतमासीत् (बृ.१।४।७) इत्यत्र प्रधानमेव जगत्कारणत्वेनाभिधीयत इति। नेत्युच्यते। अत्राप्यव्याकृतशब्देनाव्याकृतशरीरं ब्रह्मैवाभिधीयते। स एष इह प्रविष्ट आनखाग्रेभ्यः। पश्यंश्चक्षुः शृण्वञ्छ्रोत्रं मन्वानो मनः। आत्मेत्येवोपासीत (बृ.१।४।७) इत्यत्र स एष इति तच्छब्देनाव्याकृतशब्दनिर्दिष्टस्यान्तः प्रविश्य प्रशासितृत्वेनानुकर्षात्। तत्सृष्ट्वा। तदेवानुप्राविशत् (तै. २।६)। अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि (छा.६।३।२) इति स्रष्टुः सर्वज्ञस्य परस्य ब्रह्मणः कार्यानुप्रवेशेन नामरूपव्याकरणप्रसिद्धेश्च। अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा (तै. आ. ३।११।२) इति नियमनार्थत्वादनुप्रवेशस्य प्रधानस्याचेतनस्यैवंरूपोनुप्रवेशो न संभवति। अतोव्याकृतमव्याकृतशरीरं ब्रह्म तन्नामरूपाभ्यां व्याक्रियत (बृ. १।४।७) इति तदेवाविभक्तनामरूपं ब्रह्म सर्वज्ञं सत्यसंकल्पं स्वेनैव विभक्तनामरूपं स्वयमेव व्याक्रियत इत्युच्यते। एवं च सतीक्षणादयो मुख्या एव भवन्ति। ब्रह्मात्मशब्दावपि निरतिशयबृहत्त्वनियमनार्थव्यापित्वाभावेन प्रधाने न कथंचिदुपपद्येते। अतो ब्र-

---

5. C. om. अत्र after इति.

6. B. reads तत् before नेत्युच्यते; C. reads तत्रापि for अत्रापि.

13. C. reads अनुप्रवेश for अनुप्रवेशेन.

18. B. reads सर्वज्ञं ब्रह्म for ब्रह्म सर्वज्ञम्.

19. C. om. च after एवम्.

http://acharya.org

ह्मैककारणं जगदिति स्थितम् ॥ १५ ॥ कारणत्वाधिकरणं समाप्तम् ॥ (४)

जगद्वाचित्वात् ॥ १६ ॥

पुनरपि सांख्यः प्रत्यवतिष्ठते । यद्यपि वेदान्तवाक्यानि चेतनं जगत्कारणत्वेन प्रतिपादयन्ति तथापि तत्रसिद्धप्रधानपुरुषातिरिक्तं वस्तु जगत्कारणं वेद्यतया न तेभ्यः प्रतीयते। तथा हि। भोक्तारमेव पुरुषं कारणं वेद्यतयाधीयते कौषीतकिनो बालाक्यजातशत्रुसंवादे । ब्रह्म ते ब्रवाणि (कौ. ब्रा. ४।१) इत्युपक्रम्य यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य चैतत्कर्म स वै वेदितव्यः (कौ. ब्रा. ४।१८) इत्युपक्रमे वक्तव्यतया बालाकिनोपक्षिप्तं ब्रह्माजानते तस्मा एवाजातशत्रुणा स वै वेदितव्य इति ब्रह्मोपदिश्यते । यस्य चैतत्कर्मेति कर्मसंबन्धात्प्रकृत्यध्यक्षो भोक्ता पुरुषो वेदितव्यतयोपदिष्टं ब्रह्मेति निश्चीयते नार्थान्तरम्। तस्य कर्मसंबन्धानभ्युपगमात् । कर्म च पुण्यापुण्यलक्षणं क्षेत्रज्ञस्यैव संभवति । न च वाच्यं क्रियत इति कर्मेति व्युत्पत्त्या प्रत्यक्षादिप्रमाणोपस्थापितं जगदेतत्कर्मेति निर्दिश्यते । यस्यैतत्कृत्स्नं जगत्कर्म स वै वेदितव्य इति क्षेत्रज्ञादर्थान्तरमेव प्रतीयत इति । यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य चैतत्कर्म (कौ. ४।१८) इति पृथङ्निर्देशवैयर्थ्यात् । कर्मशब्दस्य च लोकवेदयोः पुण्यापुण्यरूप एव कर्मणि प्रसिद्धेः । तत्तद्भोक्तृकर्मनिमित्तत्वाज्जगदुत्पत्तेः । एतेषां पुरुषाणां कर्तेति

---

11. C. reads जानते for अजानते

13. B. reads तत्त्वान्तरम् for अर्थान्तरम्.

14. E. reads पाप for अपुण्य.

17. B. C. om. वै after सः.

http://acharya.org

च भोक्तुरेवोपपद्यते । तदयमर्थः । एतेषामादित्यमण्डलाद्यधिकरणानां क्षेत्रज्ञभोग्यभोगोपकरणभूतानां पुरुषाणां यः कारणभूत एतत्कारणभावहेतुभूतं पुण्यापुण्यलक्षणं च कर्म यस्य स वै वेदितव्यः । तत्स्वरूपं प्रकृतेर्विविक्तं वेदितव्यमिति ।

तथोत्तरत्र तौ ह सुप्तं पुरुषमाजग्मतुः । तं यष्टिना चिक्षेप (कौ.ब्रा. ४।१८) इति सुषुप्तपुरुषागमनयष्टिघातोत्थापनादीनि च भोक्तृत्वप्रतिपादन एव लिङ्गानीति । तथोपरिष्टादपि भोक्तैव प्रतिपाद्यते । तद्यथा श्रेष्ठी स्वैर्भुङ्क्ते यथा वा स्वाः श्रेष्ठिनं भुञ्जन्त्येवमेवैष प्रज्ञात्मैतैरात्मभिर्भुङ्क्ते एवमेवैत आत्मान एतमात्मानं भुञ्जन्ति (कौ. ब्रा. ४।२०) इति । तथा क्वैष एतद्बालाके पुरुषोशयिष्ट क्व वा एतदभूत्कुत एतदागात् (कौ.ब्रा.४।१८) इति पृष्टमर्थमजानते तस्मै स्वयमेवाजातशत्रुरुवाच हिता नाम नाड्यः···तासु तदा भवति यदा सुप्तः स्वप्नं न कथंचन पश्यत्यथास्मिन्प्राण एवैकधा भवति तदैनं वाक्सर्वैर्नामभिः सहाप्येति मनः सर्वैर्ध्यानैः सहाप्येति स यदा प्रतिबुध्यते यथाग्नेर्ज्वलतः सर्वा दिशो विस्फुलिङ्गा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकाः (कौ. ब्रा. ४।१९) इति सुषुप्त्याधारतया स्वप्नसुषुप्तिजागरि-

---

3. E reads हेतुभूत for हेतुभूतम्.
4. C. reads विभक्तम् for विविक्तम्.
7. E. om. च; C. om. त्व after भोक्तृ; B. om. इति after लिङ्गानि.
8. B. om. वा after यथा.
9. C. reads एव for एतम्; E. reads एनम् for एतमात्मानम्.
10. E. reads यथा for तथा.
15. C. om. मनः सर्वैर्ध्यानैः सहाप्येति.
17. B. om. वि before प्रतिष्ठन्ते.

http://acharya.org

तावस्थासु वर्तमानं वागादिकरणाप्ययोद्गमनस्थानमेनमेव जीवात्मानमथास्मिन्प्राण एवैकधा भवतीत्युक्तवान् । अस्मिञ्जीवात्मनि प्राणभृत्त्वनिबन्धनोयं प्राणशब्दः । स यदा प्रतिबुध्यत इति प्राणशब्दनिर्दिष्टस्य प्रबोधश्रवणान्मुख्यप्राणस्येश्वरस्य च सुषुप्तिप्रबोधयोरसंभवात् । अथ वास्मिन्प्राण इति व्यधिकरणसप्तम्यौ । अस्मिन्नात्मनि वर्तमाने प्राण एकधा भवति वागादिकरणग्राम इति । प्राणशब्दस्य मुख्यप्राणपरत्वेपि जीव एवास्मिन्प्रकरणे प्रतिपाद्यते । स्वतः प्राणस्य जीवोपकरणत्वात् । अतो वक्तव्यतयोपक्रान्तं ब्रह्म पुरुष एवेति तद्व्यतिरिक्तेश्वरासिद्धिः । कारणगताश्चेक्षणादयश्चेतनधर्मा अस्मिन्नेवोपपद्यन्त इत्येतदधिष्ठितं प्रधानमेव जगत्कारणमिति प्राप्ते प्रचक्ष्महे ।

जगद्वाचित्वात् । अत्र पुण्यापुण्यपरवशः क्षुद्रः क्षेत्रज्ञः स्वस्मिन्प्रकृतिधर्माध्यासेन तत्परिणामहेतुभूतः पुरुषो नाभिधीयते । अपि तु निरस्तसमस्ताविद्यादिदोषगन्धोनवधिकातिशयासंख्येयकल्याणगुणगणनिधिर्निखिलजगदेककारणभूतः पुरुषोत्तमोभिधीयते । कुतः । यस्य चैतत्कर्मेत्यत्रैतच्छब्दान्वितस्य कर्मशब्दस्य परमपुरुषकार्यभूतजगद्वाचित्वात् । एतच्छब्दो ह्यर्थप्रकरणादिभिरसंकुचितवृत्तिरविशेषेण प्रत्यक्षादिप्रमाणोपस्थापितनिखिलचिदचिन्मिश्रजगद्विषयः । न च पुण्यापुण्यलक्षणं कर्मात्र कर्मशब्दाभिधेयम् । ब्रह्म ते ब्रवाणि (कौ. ४।१) इत्युपक्रम्य

---

1. E. reads उद्गमस्थायनम् for उद्गमनस्थानम्; C. om. एनम्.

5. C. reads व्यधिकरणे for व्यधिकरण.

6. E. reads एव before एकधा.

9. B. C. read असिद्धेः for असिद्धिः.

11. B. reads एवम् before प्राप्ते.

19. B. reads कर्ममात्रम् for कर्मात्र.

http://acharya.org

ब्रह्मत्वेन बालाकिना निर्दिष्टानामादित्यमण्डलाद्यधिकरणानां पुरुषाणामब्रह्मत्वेन मृषा वै खलु मा संवदिष्ठाः (कौ. ४।१८) इति तमब्रह्मवादिनमपोद्य तेनाविदितब्रह्मज्ञापनायाजातशत्रुणेदं वाक्यमवतारितं यो वै बालाके (कौ. ४।१८) इत्यादि । पुण्यापुण्यलक्षणकर्मसंबन्धिन आदित्याद्यधिकरणास्तत्सजातीयाश्च पुरुषास्तेनैव विदिता इति तदविदितपुरुषविशेषज्ञापनपरोयं कर्मशब्दो न पुण्यापुण्यमात्रवाची क्रियामात्रवाची वा । अपि तु कृत्स्नस्य जगतः कार्यत्ववाची । एवमेव खल्वविदितोर्थ उपदिष्टो भवति । पुरुषस्य कर्मसंबन्धोपलक्षितस्वाभाविकस्वरूपस्याज्ञातस्य वेदितव्यत्वोपदेशे च लक्षणा । कर्मसंबन्धमात्रस्यैव वेदितव्यस्वरूपलक्षणत्वाद्यस्य कर्म स वेदितव्य इत्येतावतैव तत्सिद्धेर्यस्य चैतत्कर्मेत्येतच्छब्दवैयर्थ्यं च । य एतेषां कर्ता यस्य चैतत्कर्मेति पृथङ्निर्देशस्य चायमभिप्रायः । ये त्वया ब्रह्मत्वेन निर्दिष्टाः पुरुषास्तेषां यः कर्ता ते यत्कार्यभूताः किं विशिष्याभिधीयते कृत्स्नं जगद्यस्य कार्यमुत्कृष्टा अपकृष्टाश्चेतना अचेतनाश्च सर्वे पदार्था यत्कार्यत्वेन तुल्याः स परमकारणभूतः पुरुषोत्तमो वेदितव्य इति । जगदुत्पत्तेर्जीवकर्म-

---

3. C. reads ब्रह्मवादिनम् for अब्रह्मवादिनम्.
5. C. om. लक्षण; B. reads सबन्धिनि, C. सबन्धित्वम्, for सबन्धिन; B. om. आदि after आदित्य.
6. B. om. एव after तेन.
7. B. om मात्र after क्रिया.
8. B. reads अविदित for अविदितः.
10. B. reads वेदितव्यतया for वेदितव्यत्व; B. reads संबन्धित्वमात्रस्य for संबन्धमात्रस्यैव.
12. B. E. read वा for च after यस्य.
15 B. reads चेतनाः for अपकृष्टाश्चेतना अचेतनाः.
16. E. reads कार्यत्वे for कार्यत्वेन.

http://acharya.org

निबन्धनत्वेपि न जीवः स्वभोग्यभोगोपकरणादेः स्वयमुत्पादकः । अपि तु स्वकर्मानुगुण्येनेश्वरसृष्टं सर्वं भुङ्क्ते । अतो न तस्य पुरुषान्प्रति कर्तृत्वमुपपद्यते । अतः सर्ववेदान्तेषु परमकारणतया प्रसिद्धं परं ब्रह्मैवात्र वेदितव्यतयोपदिश्यते ॥ १६ ॥

जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्यातम् ॥ १७ ॥

अथ यदुक्तं जीवलिङ्गान्मुख्यप्राणसंकीर्तनाच्च लिङ्गाद्भोक्तैवास्मिन्प्रकरणे प्रतिपाद्यते न परमात्मेति तद्व्याख्यातम् । तस्य निर्वाहः प्रतर्दनविद्यायामभिहितः (ब्र. सू. १।१।३१) । एतदुक्तं भवति । यत्रोपक्रमोपसंहारपर्यालोचनया ब्रह्मपरं वाक्यमिति निश्चितं तत्रान्यलिङ्गानि तदनुरोधेन वर्णनीयानीति तत्र प्रतिपादितम् । अत्राप्युपक्रमे ब्रह्म ते ब्रवाणि (कौ. ४।१) इति ब्रह्मोपक्षिप्तम् । मध्ये च यस्य चैतत्कर्म (कौ. ४।१८) इति निर्दिष्टं न पुरुषमात्रमपि तु निखिलजगदेककारणं ब्रह्मैवेत्युक्तम् । उपसंहारे च सर्वान्पाप्मनोपहत्य सर्वेषां च भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति य एवं वेद (कौ. ४।२०) इति ब्रह्मोपासनैकान्तं सर्वपापापहतिपूर्वकं स्वाराज्यं च फलं श्रुतम् । अतोस्य वाक्यस्य ब्रह्मपरत्वनिश्चयेन जीवमुख्यप्राणलिङ्गान्यपि तत्परतया वर्णनीयानीति । प्रातर्दने ह्युपासात्रैविध्येन जीवमुख्यप्राणलिङ्गानां ब्रह्मपरत्वमुक्तम् । अत्राप्यथास्मिन्प्राण एवैकधा भवति (कौ. ब्रा. ४।१९) इति सामानाधिकरण्यसंभवे वैयधिकरण्यसंश्रयणायोगाद्ब्रह्मण्येव प्राणशब्दप्रयोगनिश्चयेन च प्राणशरीरब्रह्मोपासनार्थं प्राणसंकीर्तनं लिङ्गं युज्यते ॥ १७ ॥

---

13. B. om. एव after ब्रह्म.

17. E. reads वि before निश्चयेन.

21. C. reads समाश्रयण for संश्रयण.

22. E. reads शरीरक for शरीर.

http://acharya.org

जीवलिङ्गानां ब्रह्मपरत्वं पुनः कथमित्यत्राह ।

अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॥ १८ ॥

तुशब्दो जीवसंकीर्तनेन वाक्यस्य तत्परत्वसंभावनाव्यावृत्त्यर्थः । अन्यार्थं जीवसंकीर्तनं जीवातिरिक्तब्रह्मस्वरूपप्रतिबोधनार्थमिति जैमिनिराचार्यो मन्यते स्म । कुतः । प्रश्नव्याख्यानाभ्याम् । प्रश्नस्तावत्तौ ह सुप्तं पुरुषमाजग्मतुः (कौ. ४।१८) इत्यादिना सुप्तस्य प्रबुद्धप्राणस्यैव प्राणनामभिरामन्त्रणाश्रवणयष्टिघातोत्थापनाभ्यां प्राणादिव्यतिरिक्तं जीवं प्रतिबोध्य पुनर्जीवव्यतिरिक्तब्रह्मप्रतिबोधनपरो दृश्यते । क्वैष एतद्बालाके पुरुषोशयिष्ट क्व वा एतदभूत्कुत एतदागात् (कौ.४।१८) इति । व्याख्यानमपि यदा सुप्तः स्वप्नं न कथंचन पश्यत्यथास्मिन्प्राण एवैकधा भवति ।...एतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकाः (कौ. ४।१९) इति जीवादर्थान्तरभूतपरमात्मपरमेव । सुप्तस्य हि जीवस्य यत्रोषितस्य जागरितस्वप्नदशासंबन्धिविचित्रसुखदुःखानुभवकालुष्यविरहेण संप्रसन्नस्य स्वस्थतापत्तिः पुनरप्यस्य यस्माद्भोगाय निष्क्रमणं सोयं परमात्मा। तथा हि सता सोम्य तदा संपन्नो भवति (छा.६।८।१)। प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरम्

---

1. C. reads पुनः कथं ब्रह्मपरत्वम् for ब्रह्मपरत्व पुनः कथम्.
5. B. reads प्रबोधनार्थम् for प्रतिबोधनार्थमिति.
8. E. reads प्रतिबुद्ध for प्रबुद्ध.
10. C. reads प्रबोधन for प्रतिबोधन.
15. B. reads अर्थान्तरभूत· परमात्मा for अर्थान्तरभूतपरमात्म.
17. B. reads सुप्रसन्नस्य for सम्प्रसन्नस्य; E. reads सुषुप्तस्य after संप्रसन्नस्य.

http://acharya.org

(बृ. ४।३।२१) इति सुषुप्त्याधारतया प्रसिद्धो जीवादर्थान्तरभूतः प्राज्ञः परमात्मा । अतः प्रश्नप्रतिवचनाभ्यां जीवसंकीर्तनं जीवादर्थान्तरभूतपरमात्मप्रतिपादनार्थमिति निश्चीयते ।

यदुक्तं प्रश्नव्याख्याने जीवपरे । सुषुप्तिस्थानं च नाड्य एव । करणग्रामश्च प्राणशब्दनिर्दिष्टे जीव एवैकधा भवतीति । तदयुक्तम् । नाडीनां स्वप्नस्थानत्वादुक्तरीत्या ब्रह्मण एव सुषुप्तिस्थानत्वाच्च । प्राणशब्दनिर्दिष्टे ब्रह्मण्येव जीवस्य तदुपकरणभूतवागादिकरणग्रामस्य चैकतापत्तिविभागवचनाच्च ।

अपि चैवमेके वाजसनेयिनोस्मिन्नेव बालाक्यजातशत्रुसंवादे सुषुप्ताद्विज्ञानमयाद्भेदेन तदाश्रयभूतं परमात्मानमामनन्ति य एष विज्ञानमयः पुरुषः क्वैष तदाभूत्कुत एतदागात् ।.... यत्रैष सुप्तोभूत् । य एष विज्ञानमयः पुरुषस्तदैतेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोन्तर्हृदय आकाशस्तस्मिञ्छेते (बृ. २।१।१६-१७) इति । आकाशशब्दश्च परमात्मनि प्रसिद्धो दहरोस्मिन्नन्तर आकाशः (छा. ८।१।१) इति । अतोत्र जीवसंकीर्तनं तस्मादर्थान्तरभूतस्य प्राज्ञस्य परस्य ब्रह्मणः प्रतिबोधनार्थमित्यवगम्यते । तस्मादस्मिन्वाक्ये पुरुषादर्थान्तरभूतस्य निखिलजगत्कारणस्य परस्यैव ब्रह्मणो वेदितव्यतयाभिधानान्न तन्त्रसिद्धस्य पुरुषस्य तदधिष्ठितस्य वा प्रधानस्य कारणत्वं क्वचिदपि वेदान्ते प्रतीयत इति स्थितम् ॥ १८ ॥ जगद्वाचित्वाधिकरणं समाप्तम् ॥ (५)

वाक्यान्वयात् ॥ १९ ॥

अत्रापि कापिलतन्त्रसिद्धपुरुषतत्त्वावेदनपरं वाक्यं क-

6. B. reads नीत्या for रीत्या.

19. B. om. पुरुषस्य.

23. B. om. अत्रापि; B. reads वेदन for आवेदन.

http://acharya.org

चिद्दृश्यत इति तदतिरिक्त ईश्वरो नाम न कश्चित्संभवतीत्याशङ्क्य निराकरोति । बृहदारण्यके मैत्रेयीब्राह्मणे श्रूयते न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति (बृ. ४।५।६) इत्यारभ्य न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति। आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः। मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम् (बृ. ४।५।६) इति।

तत्र संशयः । किमस्मिन्वाक्ये द्रष्टव्यतयोपदिश्यमानस्तन्त्रसिद्धपुरुष एवाथवा सर्वज्ञः सत्यसंकल्पः सर्वेश्वर इति। किं युक्तम्। पुरुष इति। कुतः। आदिमध्यावसानेषु पुरुषस्यैव प्रतीतेः । उपक्रमे तावत्पतिजायापुत्रवित्तपश्वादिप्रियत्वयोगाज्जीवात्मैव प्रतीयते । मध्येपि विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्ति (बृ. ४।५।१३) इत्युत्पत्तिविनाशयोगात्स एवावगम्यते। तथान्ते च विज्ञातारमरे केन विजानीयात् (बृ. ४।५।१५) इति स एव ज्ञाता क्षेत्रज्ञ एव प्रतीयते नेश्वरः। अतस्तन्त्रसिद्धपुरुषप्रतिपादनपरमिदं वाक्यमिति निश्चीयते । नन्वमृतत्वस्य तु नाशास्ति वित्तेन (बृ. ४।५।३) इत्युपक्रमादमृतत्वप्राप्त्युपायोपदेशपरमिदं वाक्यमित्यवगम्यते । तत्कथं पुरुषप्रतिपादनपरत्वमस्य वाक्यस्य । तदुच्यते । अत एव ह्यत्र पुरुषप्रतिपादनतन्त्रे ह्यचिद्धर्माध्यासवियुक्तपुरुषस्वरूप-

---

10. C. reads तन्त्रसिद्धः for तन्त्रसिद्ध.
15. E. reads सम् before योगात्.
18. B. reads अमृतस्य for अमृतत्वस्य.
21. B. om. अत एव ह्यत्र° हेतुत्वेनोच्यते.

http://acharya.org

याथात्म्यविज्ञानमेवामृतत्वहेतुत्वेनोच्यते । अतो जीवात्मनः प्रकृतिवियुक्तं स्वरूपमिहामृतत्वायात्मा वा अरे द्रष्टव्यः (बृ. ४।५।६) इत्यादिनोपदिश्यते । सर्वेषामात्मनां प्रकृतिवियुक्तं स्वरूपमेकरूपमिति प्रकृतिवियुक्तस्वात्मयाथात्म्यविज्ञानेन सर्वे एवात्मानो विदिता भवन्तीत्यात्मविज्ञानेन सर्वविज्ञानमुपपन्नम् । देवादिस्थावरान्तेषु सर्वेषु भूतेष्वात्मस्वरूपस्य ज्ञानैकप्रकारत्वादिदं सर्वं यदयमात्मा (बृ. ४।५।७) इत्यैकात्म्योपदेशः । देवाद्याकाराणामनात्माकारत्वाच्च सर्वं तं परादात् (बृ. ४।५।७) इत्यादिनान्यत्वनिषेधश्च । यत्र हि द्वैतमिव भवति (बृ. ४।५।१५) इति च नानात्वनिषेधेनैकस्वरूपे ह्यात्मनि देवादिप्रकृतिपरिणामभेदेन नानात्वं मिथ्येत्युच्यते । तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः (बृ. ४।५।११) इत्याद्यपि प्रकृतेरधिष्ठातृत्वेन पुरुषनिमित्तत्वाज्जगदुत्पत्तेरुपपद्यते । एवमस्मिन्वाक्ये पुरुषपरे निश्चिते सति तदैकार्थ्यात्सर्वे वेदान्तास्तत्प्रसिद्धं पुरुषमेवाभिदधतीति तदधिष्ठिता प्रकृतिरेव जगदुपादानं नेश्वर इत्येवं प्राप्ते प्रचक्ष्महे ।

वाक्यान्वयादिति । सर्वेश्वर एवास्मिन्वाक्ये प्रतीयते । कुतः । वाक्यान्वयात् । एवमेव हि वाक्यावयवानामन्योन्यान्वयः समञ्जसो भवति । अमृतत्वस्य तु नाशास्ति वित्तेन

---

4. B. reads एव after विज्ञानेन.
6. E. reads वि before ज्ञानैक.
7. B. reads आकारत्वात् for प्रकारत्वात्; B. reads आत्मैक्य for ऐकात्म्य.
8. E. om. च before सर्वम्.
10. C. om. च after इति; B. reads अपि for हि.
13. B. reads उत्पत्तिः for उत्पत्तेः.
18. C. E. om. वाक्यान्वयात्.
19. B. reads अमृतस्य for अमृतत्वस्य.

http://acharya.org

(बृ. २।४।२, ४।५।३) इति याज्ञवल्क्येनाभिहिते येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान्वेद तदेव मे ब्रूहि (बृ. २।४।३,४।५।४) इत्यमृतत्वानुपायतया वित्ताद्यनादरेणामृतत्वप्राप्त्युपायमेव प्रार्थयमानायै मैत्रेय्यै तदुपायतया द्रष्टव्यतयोपदिष्टोयमात्मा परमात्मैव । तमेव विदित्वातिमृत्युमेति (श्वे. ३।८,६।१५)। तमेवं विद्वानमृत इह भवति नान्यः पन्थाः (तै. आ. ३।१२।७) इत्यादिभिरमृतत्वस्य परमपुरुषवेदनैकोपायतया प्रतिपादनात्परमपुरुषविभूतिभूतस्य प्राप्तुरात्मनः स्वरूपयाथात्म्यविज्ञानमपवर्गसाधनभूतपरमपुरुषवेदनोपयोगितयावगन्तव्यं न स्वत एवोपायत्वेन । अतोत्र परमात्मैवामृतत्वोपायतया द्रष्टव्य इत्यादिनोपदिश्यते । तथा तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः (बृ. ४।५।११) इत्यादिना कृत्स्नस्य जगतः कारणत्वमुच्यमानं परमपुरुषादन्यस्य कर्मपरवशस्य मुक्तस्य निर्व्यापारस्य च पुरुषमात्रस्य न संभवति । तथात्मनो वा अरे दर्शनेन (बृ. २।४।५) इत्यादिनैकविज्ञानेन सर्वविज्ञानमभिधीयमानं सर्वात्मभूते परमात्मन्येवावकल्पते ।

यस्त्वेतदेकरूपत्वादात्मनामेकात्मविज्ञानेन सर्वात्मविज्ञानमुच्यत इति तदयुक्तम् । अचेतनप्रपञ्चज्ञानाभावेन सर्वविज्ञानाभावात् । प्रतिज्ञोपपादनाय चेदं ब्रह्मेदं क्षत्रम् (बृ. ४।५।७) इत्युपक्रम्येदं सर्वं यदयमात्मा (बृ. ४।५।७) इति प्रत्यक्षादि-

---

5. C. reads द्रष्टव्यत्वेन for द्रष्टव्यतया; E. reads तमेवम् for तमेव.

8. C. reads प्रतिपाद्यतया for प्रतिपादनात्.

9. E. om. भूत after साधन.

16. B. reads सर्वात्मभूत for सर्वात्मभूते.

http://acharya.org

सिद्धं चिदचिन्मिश्रं प्रपञ्चमिदमिति निर्दिश्यैतदयमात्मेत्यैकात्म्योपदेशश्च परमात्मन एवोपपद्यते । न हीदंशब्दवाच्यं चिदचिन्मिश्रं जगत्पुरुषेणाचित्संसृष्टेन तद्वियुक्तेन वा स्वरूपेणावस्थितेन चैक्यमुपगच्छति । अत एव सर्वं तं परादाद्योन्यत्रात्मनः सर्वं वेद (बृ. ४।५।७) इति व्यतिरिक्तत्वेन सर्ववेदननिन्दा च । तथा प्रथमे च मैत्रेयीब्राह्मणे महद्भूतमनन्तमपारम् (बृ. २।४।१२) इति श्रुता महत्त्वादयो गुणाः परमात्मन एव संभवन्ति । अतः स एवात्र प्रतिपाद्यते ।

यच्चोक्तं पतिजायापुत्रवित्तपश्वादिप्रियान्वयिनो जीवात्मन उपक्रमे त्वन्वेष्टव्यतया प्रतिपादनात्तद्विषयमेवेदं वाक्यमिति तदयुक्तम् । आत्मनस्तु कामाय (बृ. २।४।५,४।५।६) इत्यात्मशब्देन जीवात्मसंशब्दने तस्यात्मा वा अरे द्रष्टव्यः (बृ. २।४।५,४।५।६) इत्यनेनानन्वयप्रसङ्गात् । आत्मा वा अरे द्रष्टव्य इत्यात्मनो द्रष्टव्यतोपयोगितयात्मनस्तु कामायेत्युपदिष्टमिति प्रतीयते । आत्मनस्तु कामायात्मनः कामसंपत्तये । काम्यन्त इति कामाः । आत्मन इष्टसंपत्तय इति यावत् । न च जीवात्मन इष्टसंपत्तये पत्यादयः प्रिया भवन्तीत्युक्ते सति तस्य जीवस्य स्वरूपमन्वेष्टव्यं भवति । प्रियमेव ह्यन्वेष्टव्यं न तु प्रियं प्रति शेषिणः प्रियवियुक्तं स्वरूपम् । यस्मादात्मन इष्टसंपत्तये पत्यादयः प्रिया भवन्ति तस्मात्पत्यादि प्रियं परित्यज्य तद्वियुक्तमात्मस्वरूपमन्वेष्टव्यमित्यसंगतं भवति । प्रत्युत

3. C. om. वा after तद्वियुक्तेन.

6. C. om. च after निन्दा.

12. B. reads जीवात्मनः for जीवात्म.

13. B. reads अन्वय for अनन्वय.

14. E. reads द्रष्टव्यत्व for द्रष्टव्यता.

18. E. om. जीवस्य; C. reads स्व before स्वरूपम्.

http://acharya.org

न पत्यादिशेषतया पत्यादीनां प्रियत्वमपि त्वात्मनः शेषतया पत्यादीनां प्रियत्वमित्युक्ते स्वशेषतया त एवोपादेयाः स्युः। आत्मनस्तु कामाय सर्वं प्रियं भवति (बृ. २।४।५,४।५।६) इत्यस्य परेणानन्वये वाक्यभेदः प्रसज्यते। अभ्युपगम्यमानेपि वाक्यभेदे पूर्वस्य वाक्यस्य न किंचित्प्रयोजनं दृश्यते। अतः पत्यादि सर्वं प्रियं परित्यज्यात्मन एवान्वेष्टव्यत्वं यथा प्रतीयते तथा वाक्यार्थो वर्णनीयः। सोयमुच्यते। अमृतत्वस्य तु नाशास्ति वित्तेन (बृ. २।४।२,४।५।३) इति वित्तादीनां नित्यनिर्दोषनिरतिशयानन्दरूपामृतत्वप्राप्त्यनुपायत्वमुक्त्वा वित्तपुत्रपतिजायादीनां सातिशयदुःखमिश्रकादाचित्कप्रियत्वमनुभूयमानं न पत्यादिस्वरूपप्रयुक्तमपि तु निरतिशयानन्दस्वभावपरमात्मप्रयुक्तम्। अतो य एवं स्वयं निरतिशयानन्दः सन्नन्येषामपि प्रियत्वलेशास्पदत्वमापादयति स परमात्मैव द्रष्टव्य इत्युपदिश्यते।

तदयमर्थः। न वा अरे पत्युः कामाय पतिः प्रियो भवति। न हि पतिजायापुत्रवित्तादयो मत्प्रयोजनायाहमस्य प्रियः स्यामिति स्वसंकल्पात्प्रिया भवन्त्यपि त्वात्मनः कामाय। परमात्मनः स्वाराधकप्रियप्रतिलम्भनरूपेष्टनिर्वृत्तय इत्यर्थः। परमात्मा हि कर्मभिराराधितस्तत्तत्कर्मानुगुणं प्रतिनियतदेश-

1. C. reads शेषितया for शेषतया after पत्यादि and आत्मनः.
5. C. reads पूर्वं for पूर्वस्य.
10. B. om. पति.
12. B. reads एव for एवम्; C. reads निरतिशयानन्दस्वरूपः for निरतिशयानन्दः.
13. C. reads अल्पत्व for आस्पदत्व.
16. B. om. पति.
18. B. reads परमात्मा न for परमात्मनः.

http://acharya.org

कालस्वरूपपरिमाणमाराधकानां तत्तद्वस्तुगतं प्रियत्वमापादयति । एष ह्येवानन्दयाति (तै. २।७।१) इति श्रुतेः । न हि तत्तद्वस्तु स्वरूपेण प्रियमप्रियं वा । यथोक्तम् ।

तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते ।
तदेव कोपाय यतः प्रसादाय च जायते ॥
तस्माद्दुःखात्मकं नास्ति न च किंचित्सुखात्मकम् ।
(वि. पु. २।६।४६—४७)

इति । आत्मनस्तु कामाय (२।४।५,४।५।६) इत्यस्य जीवात्मपरत्वेप्यात्मा वा अरे द्रष्टव्यः (बृ. २।४।५,४।५।६) इति तु परमात्मविषयमेव । तत्राप्ययमर्थः । यस्मात्पत्यादीनामिष्टसंपत्तये तत्परवशेन पत्यादयः प्रियत्वेन नोपादीयन्तेपि त्वात्मेष्टसंपत्तये स्वातन्त्र्येण स्वप्रियत्वेनोपादीयन्ते । तस्माद्य एवात्मनो निरुपाधिकनिर्दोषनिरवधिकप्रियः परमात्मा स एव हि द्रष्टव्यो न दुःखमिश्राल्पसुखदुःखोदर्काः परायत्ततत्स्वभावाः पतिजायापुत्रवित्तादयो विषया इति । अस्मिंस्तु प्रकरणे जीवात्मशब्देनापि परमात्मन एवाभिधानादात्मनस्तु कामाय ।....आत्मा वा अरे द्रष्टव्यः (बृ. २।४।५,४।५।६) इति पूर्वोक्तप्रक्रिययोभयत्रात्मशब्दावेकविषयौ ॥ १९ ॥

मतान्तरेणापि जीवशब्देन परमात्माभिधानोपपादनायाह ।

---

1. C. reads परिणामम् for परिमाणम्; B. om. तत् after तत्; C. reads वस्तुगत for वस्तुगतम्.
3. C. reads तु for हि
4. C reads अप्रीतये for प्रीतये.
10. C. om. अपि after तत्र.
12. B. C. read स्वतन्त्रेण for स्वातन्त्र्येण.
14. C. om. दुःख after सुख, E reads तत् after तत्.
15. E reads वाचि after जीवात्म.

http://acharya.org

प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॥ २० ॥

एकविज्ञानेन सर्वविज्ञानप्रतिज्ञासिद्धेरिदं लिङ्गं यज्जीवात्मवाचिशब्दैः परमात्मनोभिधानमित्याश्मरथ्य आचार्यो मन्यते स्म । यद्ययं जीवः परमात्मकार्यतया परमात्मैव न भवेत्तदा तद्व्यतिरिक्ततया परमात्मविज्ञानादेतद्विज्ञानं न सेत्स्यति । आत्मा वा इदमेक एवाग्र आसीत् (ऐ. १) इति प्राक्सृष्टेरेकत्वावधारणात् ।

यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः ।
तथाक्षराद्विविधाः सौम्य भावाः प्रजायन्ते तत्र चैवापियन्ति ॥
(मु. २।१)

इत्यादिभिर्ब्रह्मणो जीवानामुत्पत्तिश्रवणात्तस्मिन्नेवाप्ययश्रवणाच्च जीवानां ब्रह्मकार्यत्वेन ब्रह्मणैक्यमवगम्यते । अतो जीवशब्देन परमात्मन एवाभिधानमिति ॥ २० ॥

उत्क्रमिष्यत एवंभावादित्यौडुलोमिः ॥ २१ ॥

यदुक्तं जीवस्य ब्रह्मकार्यतया ब्रह्मणैक्येनैकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपादनार्थं ब्रह्मणो जीवशब्देन प्रतिपादनमिति तदयुक्तम् । न जायते म्रियते वा विपश्चित् (का. २।१८) इत्यादिनाजत्वश्रुतेः । जीवानां प्राचीनकर्मफलभोगाय जगत्सृष्ट्यभ्युपगमाच्च । अन्यथा विषमसृष्ट्यनुपपत्तेश्च । ब्रह्म-

---

3. B. om. वाचि; B. reads आश्मरथ्य for आश्मरथ्यः.

8. E. reads प्रभवन्ति for प्रभवन्ते

11. C. reads जीवात्मनाम् for जीवानाम् after ब्रह्मण, C. reads लय for अप्यय.

12. C. reads जीवादीनाम् for जीवानाम्; C. reads वाचि before शब्देन.

13. C. om. एव.

http://acharya.org

कार्यस्य जीवस्य ब्रह्मतापत्तिलक्षणो मोक्ष आकाशादिवदवर्जनीय इति तदुपायविधानानुष्ठानानर्थक्याच्च । घटादिवत्कारणप्राप्तेर्विनाशरूपत्वेन मोक्षस्यापुरुषार्थत्वाच्च । जीवात्मन उत्पत्तिप्रलयवादोपपत्तिरुत्तरत्र (ब्र. सू. २।३।१८) प्रपञ्चयिष्यते । अत एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते (छा. ८।३।४) ।

यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय ।
तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ॥
(मु. ३।२।८)

इत्युत्क्रमिष्यतः परमात्मभावाज्जीवशब्देन परमात्मनोऽभिधानमित्यौडुलोमिराचार्यो मन्यते स्म ॥ २१ ॥

अवस्थितेरिति काशकृत्स्नः ॥ २२ ॥

यदुक्तमुत्क्रमिष्यतो जीवस्य ब्रह्मभावाद्ब्रह्मणस्तच्छब्देनाभिधानमिति तदप्ययुक्तम् । विकल्पासहत्वात् । अस्य जीवात्मन उत्क्रान्तेः पूर्वमनेवंभावः किं स्वाभाविक उतौपाधिकस्तत्रापि पारमार्थिकोऽपारमार्थिको वेति । स्वाभाविकत्वे ब्रह्मभावो नोपपद्यते । भेदस्य स्वरूपप्रयुक्तत्वेन स्वरूपे विद्यमाने तदनपायात् । अथ भेदेन सह स्वरूपमप्यपैतीति । तथा सति विनष्टत्वादेव तस्य न ब्रह्मभावः । अपुरुषार्थत्वादिदोषप्रसङ्गश्च । पारमार्थिकौपाधिकत्वेऽपि प्रागपि ब्रह्मैवेत्युत्क्रमिष्यत एवंभावादिति विशेषो न युज्यते वक्तुम् । अस्मिन्पक्षे ह्युपाधिब्रह्मव्य-

---

3. C reads अपुरुषार्थता for अपुरुषार्थत्वात्.
14 B. om अपि after तत्
16 C E. read परमार्थिकोपरमार्थिक' for पारमार्थिकोपारमार्थिक'.
20. C. om. अपि after औपाधिकत्वे.

http://acharya.org

तिरेकेण वस्त्वन्तराभावान्निरवयवस्य ब्रह्मण उपाधिना छेदाद्यसंभवाच्चोपाधिगत एव भेद इत्युत्क्रान्तेः प्रागपि ब्रह्मैव । औपाधिकस्य भेदस्यापारमार्थिकत्वे कस्यायमुत्क्रान्तौ ब्रह्मभाव इति वक्तव्यम् । ब्रह्मण एवाविद्योपाधितिरोहितस्वरूपस्येति चेन्न । नित्यमुक्तस्वप्रकाशज्ञानस्वरूपस्याविद्योपाधितिरोधानासंभवात् । तिरोधानं नाम वस्तुस्वरूपे विद्यमाने तत्प्रकाशनिवृत्तिः । प्रकाश एव वस्तुस्वरूपमित्यङ्गीकारे तिरोधानाभावः स्वरूपनाशो वा स्यात् । अतो नित्याविर्भूतस्वस्वरूपत्वात्तस्योत्क्रान्तौ ब्रह्मभावे न कश्चिद्विशेष इत्युत्क्रमिष्यत इति विशेषणं व्यर्थमेव । अस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य (छा. ८।३।४) इति पूर्वमनेवंरूपस्य न तदानीं ब्रह्मतापत्तिमाह । अपि तु पूर्वसिद्धस्वरूपस्याविर्भावम् । तथा हि वक्ष्यते संपद्याविर्भावः स्वेन शब्दात् (ब्र. सू. ४।४।१) इत्यादिभिः । अतोनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति (छा. ६।३।२) । य आत्मनि तिष्ठन्नात्मनोन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्मान्तर्याम्यमृतः (बृ. ३ ।७।२२) । योक्षरमन्तरे संचरन्यस्याक्षरं शरीरं यमक्षरं न वेदैष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायणः (सुबा.) । अन्तः प्रविष्टः शास्ता जनानां

---

2. E. reads भेद for छेद.

4. E. reads स्व before स्वरूपस्य

5. C. om. स्व after ज्ञान, C. om. उपाधि before तिरोधान.

8. C. om. स्व before स्वरूपत्वात्.

10. C. E om. पर ज्योतिरुपसपद्य.

11. C. om. न before तदानीम्.

12. B reads पूर्वसिद्धस्य for पूर्वसिद्ध.

14. C. om. नामरूपे व्याकरवाणीति

http://acharya.org

सर्वात्मा (तै. आ. ३।११।२) इति स्वशरीरभूते जीवात्मन्यात्मतयावस्थित जीवशब्देन ब्रह्मप्रतिपादनमिति काशकृत्स्न आचार्यो मन्यते स्म । जीवशब्दश्च जीवस्य परमात्मपर्यन्तस्यैव वाचको न जीवमात्रस्येति पूर्वमेवोक्तं (पृ. ११३ प. १) नामरूपे व्याकरवाणि (छा. ६।३।२) इत्यत्र । एवमात्मशरीरभावेन तादात्म्योपपादने परस्य ब्रह्मणोपहतपाप्मत्वसर्वज्ञत्वादिगोचरा जीवस्याविदुषः शोचतो ब्रह्मोपासनान्मोक्षवादिन्यो जगत्सृष्टिप्रलयाभिधायिन्यो जगतो ब्रह्मतादात्म्योपदेशपराश्च सर्वाः श्रुतयः सम्यगुपपादिता भवन्तीति काशकृत्स्नीयमेव मतं सूत्रकारः स्वीकृतवान् ।

अयमत्र वाक्यार्थः । अमृतत्वोपाये मैत्रेय्या पृष्टे याज्ञवल्क्य आत्मा वा अरे द्रष्टव्यः (बृ. ४।५।६) इत्यादिना परमात्मोपासनममृतत्वोपायमुक्त्वात्मनि खल्वरे दृष्टे (बृ. ४।५।६) इत्यादिनोपास्यलक्षणं दुन्दुभ्यादिदृष्टान्तैश्चोपासनोपकरणभूतमनःप्रभृतिकरणग्रामनियमनं च सामान्येनाभिधाय स यथार्द्रैधाग्नेः (बृ. ४।५।११) इत्यादिना स यथा सर्वासामपां समुद्र एकायनम् (बृ. ४।५।१२) इत्यादिना चोपास्यभूतस्य परस्य ब्रह्मणो निखिलजगदेककारणत्वं सकलविषयप्रवृत्तिमूलकरणग्रामनियमनं च विस्तीर्णमुपदिश्य स यथा सैन्धवघनः (बृ. ४।५।१३) इत्यादिनामृतत्वोपायप्रवृत्तिप्रोत्साहनाय जीवात्मस्वरूपेणावस्थितस्य परमात्मनोपरिच्छिन्नज्ञानैकाकारतामुपपाद्य तस्यैवापरिच्छिन्नज्ञानैकाकारस्य संसारदशायां भूतपरि-

---

1. B. reads स्वशरीरभूत for स्वशरीरभूते.

7 B. reads विदुषः for अविदुषः.

15. B, E om. ग्राम.

18. C. om. प्र befoɪe वृत्ति.

http://acharya.org

णामानुवृत्तिं विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति (बृ. ४।५।१३) इत्यभिधाय न प्रेत्य संज्ञास्ति (बृ. ४।५।१३) इति मोक्षदशायां स्वाभाविकापरिच्छिन्नज्ञानसंकोचाभावेन भूतसंघातेनैकीकृत्यात्मनि देवादिरूपज्ञानाभावमुक्त्वा पुनरपि यत्र हि द्वैतमिव भवति (बृ. ४।५।१५) इत्यादिना ब्रह्मात्मकत्वेन नानाभूतवस्तुदर्शनमज्ञानकृतमिति निरस्तनिखिलाज्ञानस्य ब्रह्मात्मकं कृत्स्नं जगदनुभवतो ब्रह्मव्यतिरिक्तवस्त्वन्तराभावेन भेददर्शनं निरस्य येनेदं सर्वं विजानाति तं केन विजानीयात् (बृ. ४।५।१५) इति च जीवात्मा स्वात्मतयावस्थितेन येन परमात्मनाहितज्ञानः सन्निदं सर्वं येन विजानात्ययं तं केन विजानीयान्न केनापीति परमात्मनो दुरवगमत्वमुपपाद्य स एष नेति नेति (बृ. ४।५।१५) इत्यादिनायं सर्वेश्वरः स्वेतरसमस्तचिदचिद्वस्तुविलक्षणरूप एव सर्वशरीरः सन्सर्वस्यात्मतयावस्थित इति स्वशरीरभूतचिदचिद्वस्तुगतैर्दोषैर्न संस्पृश्यत इत्यभिधाय विज्ञातारमरे केन विजानीयादित्युक्तानुशासनासि मैत्रेय्येतावदरे खल्वमृतत्वम् (बृ. ४।५।१५) इति समस्तवस्तुविसजातीयं निरस्तनिखिलदोषं निखिलजगदेककारणभूतं सर्वस्य विज्ञातारं पुरुषोत्तममुक्तप्रकारादुपासनादृते केन विजानीयादितीदमेवोपासनममृतत्वोपायो ब्रह्मप्राप्तिरेव चामृतत्वमभिधीयत इत्युक्तवान्। अतः परं

---

6 C. reads गत after वस्तु.

9. B. om. च after इति

10. C. E. om. येन after सर्वम्.

13. C reads स्वरूप. for रूप

14. C. reads सर्वशरीरतया for सर्वशरीर सन्; B. om. सन्, स्व and अचित्.

17. C. om निरस्तनिखिलदोषम्; E om. निखिलदोषम्.

http://acharya.org

ब्रह्मैवास्मिन्वाक्ये प्रतिपाद्यत इति परमेव ब्रह्म जगत्कारणं पुरुषस्तदधिष्ठाता च प्रकृतिरिति स्थितम् ॥ २२ ॥ वाक्यान्वयाधिकरणं समाप्तम् (६) ।

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥ २३ ॥

एवं निरीश्वरसांख्ये निरस्ते सति सेश्वरसांख्यः प्रत्यवतिष्ठते । यद्यपीक्षणादिगुणयोगात्सर्वज्ञमीश्वरं जगत्कारणत्वेन वेदान्ताः प्रतिपादयन्ति तथापि वेदान्तैरेव जगदुपादानतया प्रधानमेव प्रतिपाद्यत इति प्रतीयते । न हि वेदान्ताः सर्वज्ञस्यापरिणामिनोधिष्ठातुरीश्वरस्याधिष्ठेयेनाचेतनेन परिणामिना प्रधानेन विना जगतः कारणत्वमवगमयन्ति । तथा ह्यपरिणामिनमेनं प्रकृतिं चैतदधिष्ठितां परिणामिनीमधीयते ।

निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् । (श्वे. ६।१९)
स वा एष महानज आत्माजरोमरः (बृ. ४।४।२५) ।

विकारजननीमज्ञामष्टरूपामजां ध्रुवाम् ।
ध्यायतेध्यासिता तेन तन्यते प्रेर्यते पुनः ॥
सूयते पुरुषार्थांश्च तेनैवाधिष्ठिता जगत् ।
गौरनाद्यन्तवती सा जनित्री भूतभाविनी ॥ (चू. ३–४)

इति । तथा प्रकृतिमुपादानभूतामधिष्ठायैवेश्वरो विश्वं जगत्सृजतीति श्रूयते । अस्मान्मायी सृजते विश्वमेतत् (श्वे. ४।९) ।

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् । (श्वे. ४।१०)

इति । स्मृतिरपि

---

1. C. reads न after जगत्कारणम्.
10. B. reads जगत् for जगत
11. E. reads एव before एनम्
16. C. reads पुरुषार्थम् foı पुरुषार्थान्.

http://acharya.org

मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् । (भ. गी. ९।१०) इति । एवमश्रुतेपि प्रधानोपादानत्वे ब्रह्मणो जगत्कारणत्वश्रुत्यन्यथानुपपत्त्यैव प्रधानस्वरूपं तस्येश्वराधिष्ठितस्य जगदुपादानकारणत्वं च सिध्यति । एवमेव हि लोके निमित्तोपादानयोरत्यन्तभेदो दृश्यते । मृत्सुवर्णादेरचेतनस्य घटकटकाद्युपादानत्वं चेतनस्य कुलालस्वर्णकारादेश्च निमित्तत्वं च नियतमुपलभ्यते । कार्यनिष्पत्तिश्च नियमेनानेककारकसव्यपेक्षा दृष्टा । एवं निमित्तोपादानयोर्भेदनियमं कार्यनिष्पत्तेरनेककारणसव्यपेक्षत्वनियमं चातिक्रम्यैकमेव ब्रह्मोपादानं निमित्तं च प्रतिपादयितुं न प्रभवन्ति वेदान्तवाक्यानि । अतो ब्रह्म निमित्तकारणमेव नोपादानम् । उपादानं तु तदधिष्ठितं प्रधानमेवेति । एवं प्राप्तेभिधीयते ।

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधादिति । प्रकृतिश्चोपादानं च । न निमित्तकारणमात्रं ब्रह्म । उपादानकारणं च ब्रह्मैवेत्यर्थः । कुतः । प्रतिज्ञादृष्टान्तानुपरोधात् । एवमेव हि प्रतिज्ञादृष्टान्तौ नोपरुध्येते । प्रतिज्ञा तावत्स्तब्धोस्युत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम् (छा. ६।१।१) इत्येकविज्ञानेन सर्वविज्ञानविषया । दृष्टान्तश्च यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात्···यथा सोम्यैकेन लोहमणिना···यथा सोम्यैकेन नखनिकृन्तनेन (छा. ६।१।१-२-३) इति कारणविज्ञानात्कार्यविज्ञानविषयः । यदि निमित्तकारणमेव जगतो ब्रह्म तदा तद्विज्ञानान्न समस्तं जगद्विज्ञातं स्यात् । न हि

---

3. C. reads उपादानत्वम् for उपादानकारणत्वम्.

6. C. om. च before निमित्तत्वम्

8. C. reads निमित्त before भेदनियमम्, B. reads कारक for कारण.

10. B. reads इति before प्रतिपादयितुम्.

कुलालादिविज्ञानेन घटादि विज्ञायते । अतः प्रतिज्ञादृष्टान्तयोर्बाध एव । ब्रह्मण एवोपादानत्व उपादानभूतमृत्पिण्डलोहमणिनखनिकृन्तनविज्ञानेन घटमणिककटकमुकुटवासीपरश्वधादितत्कार्यविज्ञानवन्निखिलजगदेककारणभूते ब्रह्मणि विज्ञाते तत्कार्यं निखिलं जगद्विज्ञातमेव स्यात् । कारणमेवावस्थान्तरमापन्नं कार्यं न द्रव्यान्तरमिति कार्यकारणरूपेणावस्थितमृत्तद्विकारादिनिदर्शनेन प्रतिज्ञासमर्थनाद्ब्रह्मैव जगदुपादानं चेति निश्चीयते ।

यत्तु निमित्तोपादानयोर्भेदः श्रुत्यैव प्रतीयत इति तदसत् । निमित्तोपादानयोरैक्यप्रतीतेः । उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवति (छा. ६।१।१) इति । आदिश्यते प्रशिष्यतेनेनेत्यादेशः । एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः (बृ. ३।८।९) इत्यादिश्रुतेः । साधकतमत्वेन कर्ता विवक्षितः। तमादेष्टारमप्राक्ष्यो येनाश्रुतं श्रुतं भवतीति । येनादेष्ट्राधिष्ठात्रा श्रुतेनाश्रुतमपि श्रुतं भवतीति निमित्तोपादानयोरैक्यं प्रतीयते । सदेव सोम्येदमग्र आसीदेकमेव (छा.६।२।१) इति प्राक्सृष्टेरेकत्वावधारणात् । अद्वितीयपदेनाधिष्ठात्रन्तर-

---

1. C. reads ज्ञानेन घटादिः for विज्ञानेन घटादि; E. reads विज्ञाने for विज्ञानेन.
3. C. om. वि before ज्ञानेन.
4. C. reads उपादान for एककारण.
5. E om. निखिलम्, B om. जगद्विज्ञा...द्रव्यान्तरमिति; C. reads अवस्थान्तर for अवस्थान्तरम्.
7. C. om. एव after ब्रह्म.
8. C. om. इति after प्रतीयते.
9. C. om निमित्तोपादानयोरैक्यप्रतीतेः.
10. B. reads प्रशास्यते for प्रशिष्यते.
11. C. om. सूर्याचन्द्रमसौ विधृतौ तिष्ठतः.

http://acharya.org

निषेधाच्च। नन्वेवं सति विकारजननीम् (चू. ३)। गौरनाद्यन्तवती (चू. ५) इत्यादिभिः प्रकृतेराद्यन्तवद्विरहेण नित्यत्वं जगदुपादानत्वं च श्रूयमाणं कथमुपपद्यते। तदुच्यते। तत्राप्यविभक्तनामरूपं कारणावस्थं ब्रह्मैव प्रकृतिशब्देनाभिधीयते। ब्रह्मव्यतिरिक्तवस्त्वन्तराभावात्। तथा हि श्रुतयः सर्वं तं परादाद्योन्यत्रात्मनः सर्वं वेद (बृ. २।४।६)। यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्...केन कं विजानीयात् (बृ. ४।५।१५) इत्याद्याः। सर्वं खल्विदं ब्रह्म (छा. ३।१४।१)। ऐतदात्म्यमिदं सर्वम् (छा. ६।८।७) इति कार्यावस्थं कारणावस्थं च सर्वं जगद्ब्रह्मात्मकमिति श्रवणाच्च। एतदुक्तं भवति। यः पृथिवीमन्तरे संचरन्यस्य पृथिवी शरीरं यं पृथिवी न वेद (सुबा.) इत्यारभ्य योऽव्यक्तमन्तरे संचरन्यस्याव्यक्तं शरीरं यमव्यक्तं न वेद योऽक्षरमन्तरे संचरन्यस्याक्षरं शरीरं यमक्षरं न वेद (सुबा.)। यः पृथिव्यां तिष्ठन्यः पृथिव्यन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति (बृ. ३।७।३) इत्यारभ्य य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्मान्तर्याम्यमृतः (बृ. ३।७।२२) इति च सर्वचिदचिद्वस्तुशरीरतया सर्वदा सर्वात्मभूतं परं ब्रह्म कदाचिद्विभक्तनामरूपं कदाचिच्चाविभक्तनामरूपम्। यदा विभक्तनामरूपं तदा तदेव बहुत्वेन कार्यत्वेन चोच्यते। यदाविभक्तनामरूपं तदैकमद्वितीयं कारणमिति च। एवं सर्वदा चिदचिद्वस्तुशरीरस्य परस्य ब्रह्मणो

1. C. reads निवारणात् for निषेधात्.
2. C. reads आद्यन्त for आद्यन्तवत्.
20. E. om. तदा.
21. C. reads च after यदा.
22. B. om. परस्य.

http://acharya.org

विभक्तनामरूपा या कारणावस्था सा गौरनाद्यन्तवती (चू.५)। विकारजननीमज्ञाम् (चू. ३)। अजामेकाम् (श्वे. ४।५) इत्यादिभिरभिधीयत इति।

ननु च महानव्यक्ते लीयते। अव्यक्तमक्षरे लीयते (सुबा.) इति प्रलयश्रुतेरव्यक्तस्योत्पत्तिप्रलयौ प्रतीयेते। तथा च महाभारते।

तस्माद्व्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम। (भा.शा.३३४।३१)
अव्यक्तं पुरुषे ब्रह्मन्निष्कले संप्रलीयते। (भा.शा. ३३९-३१)

इति। नैष दोषः। अचिद्वस्तुशरीरस्य ब्रह्मणोऽव्यक्तशब्दवाच्यायास्त्रिगुणावस्थायाः कार्यत्वात्। यदा तमस्तन्न दिवा न रात्रिरिति कृत्स्नप्रलयदशायामपि ब्रह्मात्मकस्यातिसूक्ष्मस्याचिद्वस्तुनः स्थित्यभिधानाज्जगत्कारणस्य परस्य ब्रह्मणः प्रकारभूतमतिसूक्ष्मं चिदचिद्वस्तु नित्यमेवेति तत्प्रकारं ब्रह्मैव गौरनाद्यन्तवती (चू.५) इत्यादिष्वभिधीयते। अत एव चाक्षरं तमसि लीयते तमः परे देव एकीभवति (सुबा.) इति तमस एकीभावमात्रमेव श्रूयते न तु लयः। एकीभाव इति तमोभिधानातिसूक्ष्माचिद्वस्तुप्रकारस्य ब्रह्मणोविभक्तनामरूपतयावस्थानमभिधीयते। तम आसीत्तमसा गूढमग्रे प्रकेतम् (तै. ब्रा. २।८।२)। तमसस्तन्महिनाजायतैकम् (तै. ब्रा. २।८।९) इत्याद्यप्येतदेव वदति। तथा च मानवं वचनम्

आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः॥ (मनु. १।५)

---

3. E. om इति after अभिधीयते.
11. E. reads चाचिद्वस्तु after अतिसूक्ष्मम्.
13. E. reads इत्यादिभिः for इत्यादिषु.
15. B. reads चिदचित् for अचिद्वस्तु; C. om. वस्तु.
19. C. reads वचः for वचनम्.

http://acharya.org

इति। अस्मान्मायी सृजते विश्वमेतत् (श्वे. ४।९) इत्याद्यनन्तरमेवोपपादयिष्यते ब्रह्मणोपरिणामित्वश्रुतयश्च।

यत्त्वेकस्य निमित्तत्वमुपादानत्वं च न संभवति। एककारकनिष्पाद्यत्वं च कार्यस्य। लोके तथा नियमदर्शनात्। अतोग्निना सिञ्चेदितिवद्वेदान्तवाक्यान्येकस्मादेवोत्पत्तिं प्रतिपादयितुं न प्रभवन्तीति। अत्रोच्यते। सकलेतरविलक्षणस्य परस्य ब्रह्मणः सर्वशक्तेः सर्वज्ञस्यैकस्यैव सर्वमुपपद्यते। मृदादेरचेतनस्य ज्ञानाभावेनाधिष्ठातृत्वायोगादधिष्ठातुः कुलालादेर्विचित्रपरिणामशक्तिविरहादसत्यसंकल्पतया च तथा दर्शननियमः। अतो ब्रह्मैव जगतो निमित्तमुपादानं च॥ २३॥

अभिध्योपदेशाच्च॥ २४॥

इतश्चोभयं ब्रह्मैव। सोकामयत बहु स्यां प्रजायेय (तै. २।६) इति तदैक्षत बहु स्यां प्रजायेय (छा. ६।२।३) इति स्रष्टुर्ब्रह्मणः स्वस्यैव बहुभवनसंकल्पोपदेशात्। विचित्रचिदचिद्रूपेणाहमेव बहु स्या प्रजायेयेति संकल्पपूर्विका हि सृष्टिरुपदिश्यते॥२४॥

साक्षाच्चोभयाम्नानात्॥ २५॥

न केवलं प्रतिज्ञादृष्टान्ताभिध्योपदेशादिभिरयमर्थो निश्चीयते। ब्रह्मण एव निमित्तत्वमुपादानत्वं च साक्षादाम्नायते।

किं स्विद्वनं क उ स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुः।
मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन्॥

---

3. C. om. एक before कारक.

4. E. reads च after दर्शनात्.

8. C. reads शक्तिपरिणाम for परिणामशक्ति; B. reads शक्तेः for शक्ति.

15. C. E. read तथा after स्याम्; C. om. हि before सृष्टिः.

http://acharya.org

स वा एष महानज आत्माजरोमरः (बृ. ४।४।२५) इति स्वभावतो निरस्तसमस्तचेतनाचेतनवर्तिदोषगन्धस्य निरतिशयज्ञानानन्दैकतानस्य परस्य ब्रह्मणो विचित्रानन्तापुरुषार्थास्पदविचित्रचिदचिन्मिश्रप्रपञ्चरूपेणात्मनो बहुभवनसंकल्पपूर्वकं बहुभवनं कथमुपपद्यत इत्याशङ्क्याह।

परिणामात्॥ २७॥

परिणामस्वाभाव्यान्नात्रोपदिश्यमानस्य परिणामस्य परस्मिन्ब्रह्मणि दोषावहत्वस्वभावः प्रत्युत निरङ्कुशैश्वर्यावहत्वमेवेत्यभिप्रायः। एवमेव हि परिणाम उपदिश्यते। अशेषहेयप्रत्यनीककल्याणैकतानं स्वेतरसमस्तवस्तुविलक्षणं सर्वज्ञं सत्यसंकल्पमवाप्तसमस्तकाममनवधिकातिशयानन्दं स्वलीलोपकरणभूतसमस्तचिदचिद्वस्तुजातशरीरतया तदात्मभूतं परं ब्रह्म स्वशरीरभूते प्रपञ्चे तन्मात्राहंकारादिकारणपरंपरया तमःशब्दवाच्यातिसूक्ष्माचिद्वस्त्वेकशेषे सति तमसि च स्वशरीरतया पृथग्विनिर्देशानर्हातिसूक्ष्मदशापत्त्या स्वस्मिन्नेकतामापन्ने तथाभूततमःशरीरं ब्रह्म पूर्ववद्विभक्तनामरूपचिदचिन्मिश्रप्रपञ्चशरीरं स्यामिति संकल्प्याप्ययक्रमेण जगच्छरीरतयात्मानं परिणमयतीति सर्वेषु वेदान्तेषु परिणामोपदेशः।

तथैव बृहदारण्यके कृत्स्नस्य जगतो ब्रह्मशरीरत्वं ब्रह्मणस्त-

---

4. C. om. विचित्र.

5. C. reads बहुत्वकरणम् for बहुभवनम्.

8. C. reads दोषावहत्वम् for दोषावहत्व.

14. B. reads अपि after शरीरतया, C. om. पृथग्वि.

15. E. reads सति after आपन्ने.

http://acharya.org

दात्मकत्वं चाम्नायते । यः पृथिव्यां तिष्ठन्पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः (बृ. ३।७।३) इत्यारभ्य यस्यापः शरीरं यस्याग्निः शरीरं यस्यान्तरिक्षं शरीरं यस्य वायुः शरीरं यस्य द्यौः शरीरं यस्यादित्यः शरीरं यस्य दिशः शरीरं यस्य चन्द्रतारकं शरीरं यस्याकाशः शरीरं यस्य तमः शरीरं यस्य तेजः शरीरं यस्य सर्वाणि भूतानि शरीरं यस्य प्राणः शरीरं यस्य वाक्शरीरं यस्य चक्षुः शरीरं यस्य श्रोत्रं शरीरं यस्य मनः शरीरं यस्य त्वक्शरीरं यस्य विज्ञानं शरीरं यस्य रेतः शरीरम् (बृ. ३।७।४—२३) इत्येवमन्तेन काण्वपाठे । माध्यंदिने तु पाठे विज्ञानस्य स्थाने यस्यात्मा शरीरमिति विशेषः । लोकयज्ञवेदानां परमात्मशरीरत्वमधिकम् । सुबालोपनिषदि च पृथिव्यादीनां तत्त्वानां परमात्मशरीरत्वमभिधाय वाजसनेयकेनुक्तानामपि तत्त्वानां शरीरत्वं ब्रह्मण आत्मत्वं च श्रूयते । यस्य बुद्धिः शरीरं यस्याहंकारः शरीरं यस्य चित्तं शरीरं यस्याव्यक्तं शरीरं यस्याक्षरं शरीरं यो मृत्युमन्तरे संचरन्यस्य मृत्युः शरीरं यं मृत्युर्न वेदैष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायणः (सुबा.) इति ।

अत्र मृत्युशब्देन परमसूक्ष्ममचिद्वस्तु तमःशब्दवाच्यमभिधीयते । अव्यक्तमक्षरे लीयतेक्षरं तमसि लीयते (सुबा.) इति

1. C. reads आत्मत्वम् for आत्मकत्वम्, E. reads श्रूयते for आम्नायते.

6. B. om. चन्द्र.

10. C. reads आदि after काण्व.

12. C. reads देवानाम् for वेदानाम्.

14. E. reads च after शरीरत्वम्.

http://acharya.org

णप्रतिपादनपराः सर्वे वाक्यविशेषाश्चेतनाचेतनविलक्षणसर्वज्ञसर्वशक्तिब्रह्मप्रतिपादनपरा व्याख्याताः । व्याख्याता इति पदाभ्यासोध्यायपरिसमाप्तिद्योतनार्थः ॥ २९ ॥ सर्वव्याख्यानाधिकरणं समाप्तम् ॥ (८)

इति श्रीमद्भगवद्रामानुजाचार्यविरचिते शारीरकमीमांसाभाष्ये प्रथमस्याध्यायस्य चतुर्थपादः प्रथमाध्यायश्च समाप्तः ॥

1. C. reads प्रतिपादकाः for प्रतिपादनपराः.

http://acharya.org

अथ श्रीभाष्ये

द्वितीयाध्यायस्य प्रथमः पाद आरभ्यते ।

स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ॥ १ ॥

प्रथमेध्याये प्रत्यक्षादिप्रमाणगोचरादचेतनात्तत्संसृष्टाद्वियुक्ताच्च चेतनादर्थान्तरभूतं निरस्तनिखिलाविद्याद्यपुरुषार्थगन्धमनन्तज्ञानानन्दैकतानमपरिमितोदारगुणसागरं निखिलजगदेककारणं सर्वान्तरात्मभूतं परं ब्रह्म वेदान्तवेद्यमित्युक्तम् । अनन्तरमस्यार्थस्य संभावनीयसमस्तप्रकारदुर्धर्षणत्वप्रतिपादनाय द्वितीयोध्याय आरभ्यते । प्रथमं तावत्कपिलस्मृतिविरोधाद्वेदान्तानामतत्परत्वमाशङ्क्य निराक्रियते ।

कथं स्मृतिविरोधाच्छ्रुतेरन्यपरत्वम् । उक्तं हि विरोधे त्वनपेक्षं स्यात् (जै. सू. १।३।३) इति श्रुतिविरुद्धायाः स्मृतेरनादरणीयत्वम् । सत्यम् । औदुम्बरीं स्पृष्ट्वोद्गायतीत्यादिषु स्वत एवार्थनिश्चयसंभवात्तद्विरुद्धा स्मृतिरनादरणीयैव । इह तु वेदान्तवेद्यतत्त्वस्य दुरवबोधत्वेन परमर्षिप्रणीतस्मृतिविरोधे स-

---

5. E. reads तत् before वियुक्तात्.

8. C. om. परम्.

10. C. reads द्वितीये for द्वितीय; E. reads कापिल for कपिल.

11. E. reads तत् before निराक्रियते.

16. A. E. read वेदान्तवेद्यस्य for वेदान्तवेद्य; C. reads पुरुष for ऋषि.

http://acharya.org

त्ययमर्थ इति निश्चयायोगात्स्मृत्या श्रुतेरतत्परत्वोपपादनमविरुद्धम् । एतदुक्तं भवति । प्राचीनभागोदितनिखिलाभ्युदयसाधनभूताग्निहोत्रदर्शपूर्णमासज्योतिष्टोमादिकर्माणि यथावदभ्युपगच्छता श्रुतिस्मृतीतिहासपुराणेष्वृषिं प्रसूतं कपिलम् (श्वे. ५।२) इत्यादिवाक्यैराप्तत्वेन संकीर्तितेन परमर्षिणा कपिलेन परमनिःश्रेयसतत्साधनावबोधित्वेनोपनिबद्धस्मृत्युपबृंहणेन विनाल्पश्रुतैर्मन्दमतिभिर्वेदान्तार्थनिश्चयायोगाद्यथाश्रुतार्थग्रहणे चाप्रप्रणीतायाः सांख्यस्मृतेः सकलाया एवानवकाशत्वप्रसङ्गाच्च स्मृतिप्रसिद्ध एवार्थो वेदान्तवेद्य इति बलादभ्युपगमनीयमिति। न च वाच्यं मन्वादिस्मृतीनां ब्रह्मैककारणत्ववादिनीनामेवं सत्यनवकाशत्वदोषप्रसङ्ग इति । धर्मप्रतिपादनद्वारेण प्राचीनभागोपबृंहण एव सावकाशत्वात् । अस्यास्तु कृत्स्नायास्तत्त्वप्रतिपादनपरत्वात्तथानभ्युपगमे निरवकाशत्वमेव स्यात् । तदिदमाशङ्कते स्मृत्यनवकाशदोषप्रसङ्ग इति चेदिति ।

अत्रोत्तरं नान्यस्मृत्यनवकाशदोषप्रसङ्गादिति । अन्या हि मन्वादिस्मृतयो ब्रह्मैककारणतां वदन्ति । यथाह मनुरासीदिदं तमोभूतम् (मनु. १।५) इत्यारभ्य

ततः स्वयंभूर्भगवानव्यक्तो व्यञ्जयन्निदम् ।
महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः ॥ (मनु. १।६)
सोभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः ।
अप एव ससर्जादौ तासु वीर्यमपासृजत् ॥ (म. स्मृ. १।८)

---

2. B. reads साधनीभूत for साधनभूत.
11. B C. om. दोष.
13. E. reads अनवकाशत्वम् for निरवकाशत्वम्.
15. B. C. read तत्र for अत्र.
19. E. reads वृत्ताजाः for वृत्तौजाः.
21. A. B. read अथ for अप before असृजत्.

http://acharya.org

इति । भगवद्गीतासु च

अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा । (गी. ७।६)
अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते । (गी. १०।८)

इति च । तथाच महाभारते

कुतः सृष्टमिदं सर्वं जगत्स्थावरजङ्गमम् ।
प्रलये च कमभ्येति तन्मे ब्रूहि पितामह ॥ (भा.शा. १८२।१)

इति पृष्ट आह

नारायणो जगन्मूर्तिरनन्तात्मा सनातनः ।

इति । तथा

तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम ।
(भा. शा. ३३४।३१)

इति ।

अव्यक्तं पुरुषे ब्रह्मन्निष्क्रिये संप्रलीयते ।
(भा. शा. ३३९।३१)

इति च । आह च भगवान्पराशरः

विष्णोः सकाशादुद्भूतं जगत्तत्रैव च स्थितम् ।
स्थितिसंयमकर्तासौ जगतोस्य जगच्च सः ॥ (वि.पु. १।१।३५)

इति । आह चापस्तम्बः ।

पूः प्राणिनः सर्वगुहाशयस्य न हन्यमानस्य विकल्मषस्य ।
(आ. ध. सू. १।२२।४)

इत्यारभ्य

---

12. C. om. इति.

15. A. B. om. च after इति.

19. A. B. C. read सर्व एव गुहाशयस्य for सर्वगुहाशयस्य, C. reads अहन्यमानस्य for न हन्यमानस्य.

http://acharya.org

तस्मात्काया: प्रभवन्ति सर्वे स मूलं शाश्वतिकः स नित्यः ।
(आ. ध. सू. १।२३।२)

इति । यदि कपिलस्मृत्या वेदान्तवाक्यार्थव्यवस्था स्यात्तदैतासां सर्वासां स्मृतीनामनवकाशत्वरूपो महान्दोषः प्रसज्येत ।

अयमर्थः । यद्यपि वेदान्तवाक्यानामतिक्रान्तप्रत्यक्षादिसकलेतरप्रमाणसंभवनाभूमिभूतार्थप्रतिपादनपरत्वात्तदर्थवैशद्यायाल्पश्रुतानां प्रतिपत्तॄणां तदुपबृंहणमपेक्षितं तथापि तदर्थानुसारिणीनामाप्ततमप्रणीतानां बह्वीनां स्मृतीनां तदुपबृंहणाय प्रवृत्तानामनवकाशता मा प्रसाङ्क्षीदिति श्रुतिविरुद्धार्था कपिलस्मृतिरुपेक्षणीया । उपबृंहणं च श्रुतिप्रतिपन्नार्थविशदीकरणम् । तच्च विरुद्धार्थया स्मृत्या न शक्यते कर्तुम् । न चैतासां स्मृतीनां प्राचीनभागोदितधर्मांशविशदीकरणेन सावकाशत्वम् । परब्रह्मभूतपरमपुरुषाराधनत्वेन धर्मान्विदधतीनामेतासामाराध्यभूतपरमपुरुषप्रतिपादनाभावे सति तदाराधनभूतधर्मप्रतिपादनासंभवात् । तथा हि परमपुरुषाराधनरूपता सर्वेषां कर्मणां स्मर्यते

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥ (गी. १८।४६)

---

3. C om. वेदान्तवाक्य.

4. B. om. सर्वासाम्, C. reads अयम् before दोषः; E. reads स्यात् for प्रसज्येत

9. C. reads श्रुतिरविरुद्धार्था for श्रुतिविरुद्धार्था; A. B. read कापिल for कपिल.

13. B. om. परम before पुरुष, C. reads पुरुषार्थत्वेन for पुरुषाराधनत्वेन.

15. B. reads तदा, C. तथा, for तथा.

http://acharya.org

ध्यायेन्नारायणं देवं स्नानादिषु च कर्मसु ।
ब्रह्मलोकमवाप्नोति न चेहावर्तते पुनः ॥ (वृ. स्मृ.)
यैः स्वधर्मपरैर्नाथ नरैराराधितो भवान् ।
ते तरन्त्यखिलामेतां मायामात्मविमुक्तये ॥ (वि.पु. ५।३०।१६)

इति । न चैहिकामुष्मिकसांसारिकफलसाधनकर्मप्रतिपादनेनैतासां सावकाशत्वम् । यतस्तेषामपि कर्मणां परमपुरुषाराधनत्वमेव स्वरूपम् । यथोक्तम्

येप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः ।
तेपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥
अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ।
न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥
(गी. ९।२३-२४)

इति । तथा

यज्ञैस्त्वमिज्यसे नित्यं सर्वदेवमयाच्युत ।
हव्यकव्यभुगेकस्त्वं पितृदेवस्वरूपधृक् ॥ (वि. पु. ५।२०।९७)

इति च । यदुक्तमृषिं प्रसूतं कपिलम् (श्वे. ५।२) इति कपिलस्याप्ततया संकीर्तनात्तत्स्मृत्यनुसारेण वेदार्थव्यवस्थापनं न्याय्यमिति तदसत् । बृहस्पतेः श्रुतिस्मृतिषु सर्वेषामतिशयितज्ञानानां निदर्शनत्वेन संकीर्तनात्तत्प्रणीतेन लोकायतेन श्रुत्यर्थव्यवस्थापनप्रसक्तेरिति ॥ १ ॥

अथ स्यात्कपिलस्य स्वयोगमहिम्ना वस्तुयाथात्म्योपलब्धेस्त-

---

1. B. reads ध्यायन् for ध्यायेत्.
2. C. reads आजायते for आवर्तते.
16. B. om. च after इति.
17. E. reads वेदान्तार्थ for वेदार्थ.

http://acharya.org

त्स्मृत्यनुसारेण वेदार्थो व्यवस्थापयितव्य इति। अत उत्तरं पठति।

इतरेषां चानुपलब्धेः ॥ २ ॥

चशब्दस्तुशब्दार्थश्चोदिताशङ्कानिवृत्त्यर्थः। इतरेषां मन्वादीनां बहूनां स्वयोगमहिमसाक्षात्कृतपरावरतत्त्वयाथात्म्यानां निखिलजगद्भेषजभूतस्ववाक्यार्थतया यद्वै किं च मनुरवदत्तद्भेषजम् (तै. सं. २।२।१०।२) इत्यादिश्रुतिप्रसिद्धानां कपिलदृष्टप्रकारेण तत्त्वानुपलब्धेः श्रुतिविरुद्धा कपिलोपलब्धिर्भ्रान्तिमूलेति न तया यथोक्तो वेदान्तार्थश्चालयितुं शक्यत इति सिद्धम् ॥ २ ॥ स्मृत्यधिकरणं समाप्तम् ॥ (१)

एतेन योगः प्रत्युक्तः ॥ ३ ॥

एतेन कापिलस्मृतिनिराकरणेन योगस्मृतिरपि प्रत्युक्ता। का पुनरत्राधिका शङ्का यन्निराकरणाय न्यायातिदेशः। योगस्मृतावीश्वराभ्युपगमान्मोक्षसाधनतया वेदान्तविहितयोगस्य चाभिधानाद्वक्तुर्हिरण्यगर्भस्य सर्ववेदान्तप्रवर्तनाधिकृतत्वाच्च तत्स्मृत्या वेदान्तोपबृंहणं न्याय्यमिति। परिहारस्त्वब्रह्मात्मकप्रधानकारणवादान्निमित्तकारणमात्रेश्वराभ्युपगमाद्ध्यानात्मक-

---

1. E. reads वेदान्तार्थ- for वेदार्थ-.
6. B. reads भेषजभूतस्य for भेषजभूतस्व; E. reads किंचन for किं च.
9. B. reads वेदार्थः for वेदान्तार्थः; B. reads शक्यः for शक्यते.
12. A. B. read कपिल for कापिल.
14. E. reads अपि after योगस्मृतौ; C. reads तत्त्व after ईश्वर; A. B. C. read वेद before वेदान्त.
16 C. reads परीहारः for परिहारः.
17. B. C. om. कारण after निमित्त.

http://acharya.org

स्य योगस्य ध्येयैकनिरूपणीयस्य ध्येयभूतयोरात्मेश्वरयोर्ब्रह्मात्मकत्वजगदुपादानतादिसर्वकल्याणगुणात्मकत्वविरहेणावैदिकत्वाद्वक्तुर्हिरण्यगर्भस्यापि क्षेत्रज्ञभूतस्य कदाचिद्रजस्तमोभिभवसंभवाच्च योगस्मृतिरपि तत्प्रणीतरजस्तमोमूलपुराणवद्भ्रान्तिमूलेति न तया वेदान्तोपबृंहणं न्याय्यमिति ॥ ३ ॥ योगप्रत्युक्त्यधिकरणं समाप्तम् ॥ (२)

न विलक्षणत्वादस्य तथात्वं च शब्दात् ॥ ४ ॥

पुनरपि स्मृतिविरोधवादी तर्कमवलम्बमानः प्रत्यवतिष्ठते । यत्सांख्यस्मृतिनिराकरणेन जगतो ब्रह्मकार्यत्वमुक्तं तन्नोपपद्यते । अस्य प्रत्यक्षादिभिरचेतनत्वेनाशुद्धत्वेनानीश्वरत्वेन दुःखात्मकत्वेन चोपलभ्यमानस्य चिदचिदात्मकस्य जगतो भवदभ्युपेतात्सर्वज्ञात्सर्वेश्वराद्धेयप्रत्यनीकादानन्दैकतानाद्ब्रह्मणो विलक्षणत्वात् । न केवलं प्रत्यक्षादिभिरेव जगतो वैलक्षण्यमुपलभ्यते । शब्दाच्च तथात्वं विलक्षणत्वमुपलभ्यते । विज्ञानं चाविज्ञानं च (तै. २।६।१)। एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः (कौ. ३।८)।

समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः ।

(श्वे. ४।७)

अनीशश्चात्मा बध्यते भोक्तृभावात् (श्वे. १।८) इत्यादिभिः

---

2. E. reads विरहात् for विरहेण.
3. B. om. कदाचित्.
5. B. C. om. अन्त after वेद.
11. B. C. om. च before उपलभ्यमानस्य; E. reads च before जगतः.
14. B. C. om. तथात्वम्; C. om. उपलभ्यते.
15. B. om. प्रज्ञामात्राः प्राणेऽर्पिताः.

कार्यस्य हि जगतोचेतनत्वदु:खित्वादयो निर्दिश्यन्ते । यद्धि यत्कार्यं तत्तस्मादविलक्षणं यथा मृत्सुवर्णादिकार्यं घटरुचकादि । अतो ब्रह्मविलक्षणस्यास्य जगतस्तत्कार्यत्वं न संभवतीति सांख्यस्मृत्यनुरोधेन कार्यसलक्षणं प्रधानमेव कारणं भवितुमर्हति ।

अवश्यं च शास्त्रस्यानन्यापेक्षस्यातीन्द्रियार्थगोचरस्यापि तर्कोनुसरणीयः । यतः सर्वेषां प्रमाणानां क्वचित्क्वचिद्विषये तर्कानुगृहीतानामेवार्थनिश्चयहेतुत्वम् । तर्को हि नामार्थस्वभावविषयेण सामग्रीविषयेण वा निरूपणेनार्थविशेषे प्रामाण्यं व्यवस्थापयत्तदितिकर्तव्यतारूपमूहापरपर्यायं ज्ञानम् । तदपेक्षा च सर्वेषां प्रमाणानां समाना । शास्त्रस्य तु विशेषेणाकाङ्क्षासंनिधियोग्यताज्ञानाधीनप्रमाणभावस्य सर्वत्रैव तर्कानुग्रहापेक्षा । उक्तं च मनुना

यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः । (म.स्मृ.१२।१०६)

इति । तदेव हि तर्कानुगृहीतशास्त्रार्थप्रतिष्ठापनं श्रुत्या च मन्तव्य इत्युच्यते ।

अथोच्येत श्रुत्या जगतो ब्रह्मैककारणत्वे निश्चिते सति तत्कार्यस्यापि जगतश्चैतन्यानुवृत्तिरभ्युपगम्यते । यथा चेतनस्य सुषुप्तिमूर्छादिषु चैतन्यानुपलम्भस्तथा घटादिष्वपि सदेव चैतन्यमनुद्भूतम् । अत एव चेतनाचेतनविभाग इति ।

नैतदुपपद्यते । यतो नित्यानुपलब्धिरसद्भावमेव साधयति ।

---

9. E. reads वा, B. समानविषयेण, after स्वभावविषयेण; C. reads सामान्य for सामग्री.

15. E. reads तदेवम् for तदेव.

17. B. C. E. read च after श्रुत्या.

http://acharya.org

अत एव चैतन्यशक्तियोगोपि तेषु निरस्तः । यस्य हि क्वचित्कदाचिदपि यत्कार्यानुपलब्धिस्तस्य हि तत्कार्यशक्तिं ब्रुवाणो वन्ध्यासुतसमितिषु तज्जननीनां प्रजननशक्तिं ब्रूताम् । किं च वेदान्तैर्जगतो ब्रह्मोपादानताप्रतिपादननिश्चये सति घटादीनां चैतन्यशक्तेश्चैतन्यस्य चानुद्भूतस्य सद्भावनिश्चयस्तन्निश्चये सति वेदान्तैर्जगतो ब्रह्मोपादानताप्रतिपादननिश्चय इतीतरेतराश्रयत्वम् । विलक्षणयोर्हि कार्यकारणभावः प्रतिपादयितुमेव न शक्यते ।

किं पुनः प्रकृतिविकारयोः सालक्षण्यमभिप्रेतं यदभावाज्जगतो ब्रह्मोपादानत्वप्रतिपादनासंभवं ब्रूषे। न तावत्सर्वधर्मसारूप्यम् । कार्यकारणभावानुपपत्तेः । न च मृत्पिण्डकार्येषु घटशरावादिषु पिण्डत्वाद्यनुवृत्तिर्दृश्यते । अथ येन केनचिद्धर्मेण सारूप्यम्। तज्जगद्ब्रह्मणोरपि सत्तादिलक्षणं संभवति । तदुच्यते । येन स्वभावेन कारणभूतं वस्तु वस्त्वन्तराद्व्यावृत्तं तस्य स्वभावस्य तत्कार्येप्यनुवृत्तिः कार्यस्य कारणसालक्षण्यम् । येन ह्याकारेण मृदादिभ्यो हिरण्यं व्यावर्तते तदाकारानुवृत्तिस्तत्कार्येषु कुण्डलादिषु दृश्यते । ब्रह्म च हेयप्रत्यनीकज्ञानानन्दैश्वर्यस्वभावम् । जगच्च तत्प्रत्यनीकस्वभावमिति न तदुपादानम् । ननु च वैलक्षण्येपि कार्यकारणभावो दृश्यते । यथा चेतना-

---

1. C. reads न क्वचित्कदाचिदपि यत्कार्योपलब्धिः for क्वचित्कदाचिदपि यत्कार्यानुपलब्धि°.

5. A. reads चैतन्यशक्ति- for चैतन्यशक्ते°.

10. A. reads उपादानता for उपादानत्व, B. reads उपादानतासंभवम् for उपादानत्वप्रतिपादनासंभवम्.

11. E. reads हि for च after न.

16. B. C. read व्यावर्त्यते for व्यावर्तते.

http://acharya.org

[1]पुरुषादचेतनानि केशनखदन्तलोमानि जायन्ते । यथा चाचेतनाद्गोमयाच्चेतनो वृश्चिको जायते । चेतनाच्चोर्णनाभेरचेतनस्तन्तुः । नैतदेवम् । यतस्तत्राप्यचेतनांश एव कार्यकारणभावः ॥४॥

अथ स्यादचेतनत्वेनाभिमतानामपि चैतन्ययोगः श्रुतिषु श्राव्यते । तं पृथिव्यब्रवीत् (तै. सं. ५।६।२) । आपो वा अकामयन्त (तै. ब्रा. ३।१।५) । ते हेमे प्राणा अहंश्रेयसे विवदमाना ब्रह्म जग्मुः (बृ. ६।१।७) इति । नदीसमुद्रपर्वतादीनामपि चैतन्यं पौराणिका आतिष्ठन्ते । अतो न वैलक्षण्यमिति । अत उत्तरं पठति ।

अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ॥५॥

तुशब्दश्चोदिताशङ्कानिवृत्त्यर्थः । पृथिव्याद्यभिमानिन्यो देवतास्तं पृथिव्यब्रवीत् (तै. सं. ५।६।२) इत्यादिषु पृथिव्यादिशब्दैर्व्यपदिश्यन्ते । कुतः । विशेषानुगतिभ्याम् । विशेषो विशेषणम् । देवताशब्देन विशेष्य पृथिव्यादयोभिधीयन्ते । हन्ताहमिमास्तिस्रो देवताः (छा. ६।३।२) इति तेजोबन्नानि देवताशब्देन विशेष्यन्ते । सर्वा ह वै देवता अहंश्रेयसे विवदमानाः (कौ. २।१४) । ते देवाः प्राणे निःश्रेयसं विदित्वा (कौ. २।१४) इति च । अनुगतिरनुप्रवेशः । अग्निर्वाग्भूत्वा मुखं प्राविशत् । आदित्यश्चक्षुर्भूत्वाक्षिणी प्राविशत् । वायुः प्राणो भूत्वा नासिके प्राविशत् (ऐ. आ. २।४।२।४) इत्यादिना वागाद्यभिमानित्वेनाग्न्यादीनामनुप्रवेशः श्रूयते । अतो जगतो-

---

1. A. B. read दन्तनख for नखदन्त; A. B. read वा for च after यथा.

5 E. reads श्रूयते for श्राव्यते.

7. A. B. read ब्रह्माणमाजग्मुः for ब्रह्म जग्मुः.

19. B. reads च after चक्षुर्भूत्वा.

http://acharya.org

चेतनत्वेन विलक्षणत्वाद्ब्रह्मकार्यत्वानुपपत्तेस्तर्कानुगृहीतस्मृत्यनुरोधेन जगतः प्रधानोपादानत्वं वेदान्तैः प्रतिपाद्यत इति ॥ ५ ॥

एवं प्राप्तेऽभिधीयते ।

दृश्यते तु ॥ ६ ॥

तुशब्दात्पक्षो विपरिवर्तते । यदुक्तं जगतो ब्रह्मविलक्षणत्वेन ब्रह्मोपादानत्वं न संभवतीति तदयुक्तम् । विलक्षणयोरपि कार्यकारणभावदर्शनात् । दृश्यते हि माक्षिकादेर्विलक्षणस्य कृम्यादेस्तस्मादुत्पत्तिः । ननूक्तमचेतनांश एव कार्यकारणभावात्तत्र सालक्षण्यम् । सत्यमुक्तम् । न तावता कार्यकारणयोर्भवदभिमतसालक्षण्यसिद्धिः । यथाकथंचित्सालक्षण्ये सर्वस्य सर्वसालक्षण्येन सर्वस्मात्सर्वोत्पत्तिप्रसङ्गभयाद्वस्तुनो वस्त्वन्तराद्व्यावृत्तिहेतुभूतस्याकारस्यानुवृत्तिः सालक्षण्यं भवताभ्युपेतम्। स तु नियमो माक्षिकादिभ्यः कृम्याद्युत्पत्तौ न दृश्यत इति ब्रह्मविलक्षणस्यापि जगतो ब्रह्मकार्यत्वं नानुपपन्नम् । न हि मृद्धिरण्यघटमुकुटादिष्विव वस्त्वन्तरव्यावृत्तिहेतुभूतासाधारणाकारानुवृत्तिर्माक्षिकगोमयकृमिवृश्चिकादिषु दृश्यते ॥ ६ ॥

असदिति चेन्न प्रतिषेधमात्रत्वात् ॥ ७ ॥

यदि कार्यभूताज्जगतः कारणभूतं ब्रह्म विलक्षणं तर्हि कार्यकारणयोर्द्रव्यान्तरत्वेन कारणे परस्मिन्ब्रह्मणि कार्यं जगन्न विद्यत इत्यसत एव जगत उत्पत्तिः प्रसज्यत इति चेत् । नैतदेवम् । कार्यकारणयोः सालक्षण्यनियमप्रतिषेधमात्रमेव हि पूर्वसूत्रेऽभिहितम् । न तु कारणात्कार्यस्य द्रव्यान्तरत्वम् । का-

---

11. C. reads प्रसङ्गात् for प्रसङ्गभयात्.

21. D. reads प्रतिषिद्ध for प्रतिषेध, B om. हि after एव.

22. C. reads अभिप्रेतम् for अभिहितम्.

http://acharya.org

रणभूतं ब्रह्मैव स्वस्माद्विलक्षणजगदाकारेण परिणमत इत्येतत्तु न त्यक्तम् । कृमिमाक्षिकयोरपि हि सति च वैलक्षण्ये कुण्डलहिरण्ययोरिव द्रव्यैक्यमस्त्येव ॥ ७ ॥

अत्र चोदयति ।

अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् ॥ ८ ॥

अपीतावित्यपीतिपूर्वकसृष्ट्यादिप्रदर्शनार्थम् । सदेव सोम्येदमग्र आसीत् (छा. ६।२।१) । आत्मा वा इदमेक एवाग्र आसीत् (ऐ. १।१।) इत्यादिष्वप्ययावस्थोपदेशपूर्वकत्वदर्शनात्सृष्ट्यादेः । यदि कार्यकारणयोर्द्रव्यैक्यमभ्युपेतं तदा कार्यस्य जगतो ब्रह्मण्यप्ययसृष्ट्यादिषु सत्सु ब्रह्मण एव तत्तदवस्थान्वय इति कार्यगताः सर्वे एवापुरुषार्था ब्रह्मणि प्रसज्येरन्सुवर्णे इव कुण्डलगता विशेषाः । ततश्च वेदान्तवाक्यं सर्वमसमञ्जसं स्यात् । यः सर्वज्ञः सर्ववित् (मु. १।१।९) । अपहतपाप्मा विजरो विमृत्युः (छा. ८।१।५) ।

न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते । (श्वे. ६।८)

तयोरन्यः पिप्पलं स्वाद्वत्ति (श्वे. ४।६, मु. ३।१।१) । अनीशश्चात्मा बध्यते भोक्तृभावात् (श्वे. १।८) । अनीशया शो-

2. E. reads परि before त्यक्तम्, A. B. om. च after सति.

4 E. reads तत्र for अत्र.

6. C. reads सृष्ट्यादे॰ for सृष्ट्यादि.

8. B. reads पूर्वत्व for पूर्वकत्व, C. om. त्व after पूर्वक.

11. C. reads कार्यगतापुरुषार्थाः सर्वे एव for कार्यगताः सर्वे एवापुरुषार्थाः; B. reads पुरुषार्थाः for अपुरुषार्थाः.

http://acharya.org

चति मुह्यमानः (श्वे. ४।७, मु. ३।१।२) इत्येकस्मिन्नेव वस्तुन्येषां परस्परविरुद्धानां प्रसक्तेः ।

अथोच्येत चिदचिद्वस्तुशरीरकस्य परस्यैव ब्रह्मणः कार्यकारणभावाच्छरीरभूतचिदचिद्वस्तुगतत्वाच्च दोषाणां न शरीरिणि ब्रह्मणि कार्यावस्थे कारणावस्थे च प्रसङ्ग इति तदयुक्तम् । जगद्ब्रह्मणोः शरीरशरीरिभावस्यैवासंभवात् । संभवे च ब्रह्मणि शरीरसंबन्धनिबन्धनदोषाणामनिवार्यत्वात् । न हि चिदचिद्वस्तुनोर्ब्रह्मणः शरीरत्वं संभवति। शरीरं हि नाम कर्मफलरूपसुखदुःखोपभोगसाधनभूतेन्द्रियाश्रयः पञ्चवृत्तिप्राणाधीनधारणः पृथिव्यादिभूतसंघातविशेषः। तथाविधस्यैव लोकवेदयोः शरीरत्वप्रसिद्धेः। परमात्मनश्चापहतपाप्मा विजरः (छा. ८।१।५)। अनश्नन्नन्योभिचाकशीति (श्वे. ४।६,मु.३।१।१)।

अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः ।
(श्वे. ३।१९)

अप्राणो ह्यमनाः (मु. २।१।२) इत्यादिभिः कर्मतत्फलभोगयोरभावादिन्द्रियाधीनभोगत्वाभावात्प्राणवत्त्वाभावाच्च न तं प्रति चेतनाचेतनयोः शरीरत्वम् । न चाचेतनव्यष्टिरूपतृणकाष्ठादीनां समष्टिरूपस्य भूतसूक्ष्मस्य चेन्द्रियाश्रयत्वादि संभवति। भूतसूक्ष्मस्य पृथिव्यादिसंघातत्वं च न विद्यते। चेतनस्य तु ज्ञानैकाकारस्य सर्वमेतन्न संभवतीति नतरां शरीरत्वसंभवः ।

---

2. E. reads परस्परम् for परस्पर.
3. A. B om. क after शरीर and om. परस्य.
4. C reads च after कार्यकारणभावात्.
5. C. om. ब्रह्मणि.
6. A. B. read च for एव.
16. B. reads भोक्तृत्व for भोगत्व.
17. A. B. read वा for च after न.
20. B. om. सम् before भवति; A. B. read नितरां शरीरत्वासंभवः for नतरां शरीरत्वसंभवः.

http://acharya.org

न च भोगायतनत्वं शरीरत्वमिति शरीरत्वसंभवः। भोगायतनेषु वेश्मादिषु शरीरत्वाप्रसिद्धेः। यत्र वर्तमानस्यैव सुखदुःखोपभोगस्तदेव भोगायतनमिति चेन्न। परकायप्रवेशजन्मसुखदुःखोपभोगायतनस्य परकायस्य प्रविष्टशरीरत्वाप्रसिद्धेः। ईश्वरस्य तु स्वतःसिद्धनित्यनिरतिशयानन्दस्य भोगं प्रति चिदचितोरायतनत्वनियमो न संभवति। एतेन भोगसाधनमात्रस्य शरीरत्वं प्रत्युक्तम्।

अथ मतं यदिच्छाधीनस्वरूपस्थितिप्रवृत्ति यत्तत्तस्य शरीरमिति सर्वस्येश्वरेच्छाधीनस्वरूपस्थितिप्रवृत्तित्वेनेश्वरशरीरत्वं संभवतीति तदपि न साधीयः। शरीरतया प्रसिद्धेषु तत्तच्चेतनेच्छायत्तस्वरूपत्वाभावात्। रुग्णशरीरस्य तदिच्छाधीनप्रवृत्तित्वाभावात्। मृतशरीरस्य तदायत्तप्रवृत्तित्वाभावाच्च। सालभञ्जिकादिषु चेतनेच्छाधीनस्वरूपस्थितिप्रवृत्तिषु तच्छरीरत्वाप्रसिद्धेश्च। चेतनस्य नित्यस्येश्वरेच्छायत्तस्वरूपत्वाभावाच्च न तच्छरीरत्वसंभवः। न च यद्यदेकनियाम्यं यदेकधार्यं यदेकशेषभूतं तत्तस्य शरीरमिति वाच्यम्। क्रियादिषु व्यभिचारात्। अशरीरं शरीरेषु (का. २।२२)। अपाणिपादो जवनो ग्रहीता (श्वे. ३।१९) इत्यादिभिश्चेश्वरस्य शरीराभावः प्रतिपाद्यते। अतो जगद्ब्रह्मणोः शरीरशरीरिभावस्यासंभवात्तत्संभवे च ब्र-

3. B. reads हि after तदेव; C. reads जन्य for जन्म.
9. A. om. ईश्वर before इच्छाधीन.
12 A. B. read स्थिति for प्रवृत्ति.
13. B. om. इच्छा after चेतन, A. B. om. स्थिति after स्वरूप.
15. B. om. यत् before यदेक, C. reads यस्यैव शेषभूतम् for यदेकशेषभूतम्.
17–18. C. om. अशरीर......प्रतिपाद्यते।
18. A. B. read शरीरभावः प्रतिषिध्यते for शरीराभावः प्रतिपाद्यते.
19. B. reads जगतो ब्रह्मणः for जगद्ब्रह्मणोः, B. C. om तत् before संभवे च.

http://acharya.org

ह्मणि दोषप्रसङ्गाद्ब्रह्मकारणवादे वेदान्तवाक्यानामसामञ्जस्यमिति ॥ ८ ॥

अत्रोत्तरम्।

न तु दृष्टान्तभावात् ॥ ९ ॥

नैवमसामञ्जस्यम्। एकस्यैवावस्थाद्वयान्वयेपि गुणदोषव्यवस्थितेर्दृष्टान्तस्य विद्यमानत्वात्। तुशब्दोत्र हेयसंबन्धगन्धस्यासंभावनीयतां द्योतयति। एतदुक्तं भवति। चिदचिद्वस्तुशरीरतया तदात्मभूतस्य परस्य ब्रह्मणः संकोचविकासात्मककार्यकारणभावावस्थाद्वयान्वयेपि न कश्चिद्विरोधः। यतः संकोचविकासौ परब्रह्मशरीरभूतचिदचिद्वस्तुगतौ। शरीरगतास्तु दोषा नात्मनि प्रसज्यन्ते। आत्मगताश्च गुणा न शरीरे। यथा देवमनुष्यादीनां सशरीराणां क्षेत्रज्ञानां शरीरगता बालत्वयुवत्वस्थविरत्वादयो नात्मनि संबध्यन्ते। आत्मगताश्च ज्ञानसुखादयो न शरीरे। अथ च देवो जातो मनुष्यो जातस्तथा स एव बालो युवा स्थविरश्चेति व्यपदेशश्च मुख्यः। भूतसूक्ष्मशरीरस्यैव क्षेत्रज्ञस्य देवमनुष्यादिभाव इति तदन्तरप्रतिपत्तौ (ब्र. सू. ३।१।१) इति वक्ष्यत इति।

यत्पुनरुक्तं चिदचिदात्मकस्य जगतः स्थूलस्य सूक्ष्मस्य च परमात्मानं प्रति शरीरभावो नोपपद्यत इति तदनाकलितसम्यङ्न्यायानुगृहीतवेदान्तवाक्यगणस्य स्वमतिपरिकल्पितकुत-

---

6. A. om अत्र after तुशब्द॰.

11. C. reads तु for च after आत्मगता॰.

12. C. reads शरीरगत for शरीरगताः.

14. B. reads यथा च for अथ च.

17. A. B. read वक्ष्यति for वक्ष्यते.

केविजृम्भितम् । सर्वे एव हि वेदान्ताः स्थूलस्य सूक्ष्मस्य चेतनस्याचेतनस्य समस्तस्य च परमात्मानं प्रति शरीरत्वं श्रावयन्ति । वाजसनेयके तावत्काण्वशाखायां माध्यंदिनशाखायां चान्तर्यामिब्राह्मणे यः पृथिव्यां तिष्ठन्···यस्य पृथिवी शरीरम् (बृ. ३।७।३) इत्यारभ्य पृथिव्यादि समस्तमचिद्वस्तु यो विज्ञाने तिष्ठन्यस्य विज्ञानं शरीरम् (बृ. का. ३।७।२२)। य आत्मनि तिष्ठन्यस्यात्मा शरीरम् (बृ. मा. ३।७।२२) इति चेतनं च पृथक्पृथङ्निर्दिश्य तस्य तस्य परमात्मशरीरत्वमभिधीयते । सुबालोपनिषदि च यः पृथिवीमन्तरे संचरन्यस्य पृथिवी शरीरम् (सुबा. ७) इत्यारभ्य य आत्मानमन्तरे संचरन्यस्यात्मा शरीरम् इति तद्वदेव चिदचितोः सर्वावस्थयोः परमात्मशरीरत्वमभिधायैष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायणः (सुबा. ७) इति तस्य सर्वभूतानि प्रत्यात्मत्वमभिधीयते । स्मरन्ति च जगत्सर्वं शरीरं ते (रा. यु. १२०।२९)। यदम्बु वैष्णवः कायः (वि. पु. २।१२।३७)। तत्सर्वं वै हरेस्तनुः (वि. पु. १।२२।३७)। तानि सर्वाणि तद्वपुः (वि. पु. १।२२।८४)। सोभिध्याय शरीरात्स्वात् (मनु. १।८) इत्यादि । भूतसूक्ष्मात्स्वाच्छरीरादित्यर्थः । लोके च शरीरशब्दो घटादिशब्दवदेकाकारद्रव्यनियतवृत्तिमनासादितः कृमिकीटपतङ्गसर्पनरपशुप्रभृतिष्वत्यन्त-

---

1. B. reads स्थूल for स्थूलस्य, C. E. read च after सूक्ष्मस्य.
5. A. B. read समस्त for समस्तम्.
9. B. om. च after सुबालोपनिषदि.
10–1. C. om य आत्मान०...शरीरमिति.
17. A. B. read अभिधाय for अभिध्याय.
18. B. om. स्वात्.
20. E. reads अनासादित for अनासादितः.

http://acharya.org

विलक्षणाकारेषु द्रव्येष्वगौणः प्रयुज्यमानो दृश्यते । तेन तस्य प्रवृत्तिनिमित्तव्यवस्थापनं सर्वप्रयोगानुगुण्येनैव कार्यम् ।

त्वदुक्तं च कर्मफलभोगहेतुरित्यादिकं प्रवृत्तिनिमित्तलक्षणं न सर्वप्रयोगानुगुणम् । यथोक्तेष्वीश्वरशरीरतयाभिहितेषु पृथिव्यादिष्वव्याप्तेः । किं चेश्वरस्येच्छाविग्रहेषु मुक्तानां च स एकधा भवति (छा. ७।२६।२) इत्यादिवाक्यावगतेषु विग्रहेषु तल्लक्षणमव्याप्तम् । कर्मफलभोगनिमित्तत्वाभावात्तेषाम् । परमपुरुषेच्छाविग्रहाश्च न पृथिव्यादिभूतसंघातविशेषाः ।

न भूतसंघसंस्थानो देहोस्य परमात्मनः । (महाभा.)

इति स्मृतेः । अतो भूतसंघातरूपत्वं च शरीरस्याव्याप्तम् । पञ्चवृत्तिप्राणाधीनधारणत्वं च स्थावरशरीरेष्वव्याप्तम् । स्थावरेषु हि प्राणसद्भावेपि तस्य पञ्चधावस्थाय शरीरस्याधारकतयावस्थानं नास्ति । अहल्यादीनां कर्मनिमित्तशिलाकाष्ठादिशरीरेष्विन्द्रियाश्रयत्वं सुखदुःखहेतुत्वं चाव्याप्तम् । अतो यस्य चेतनस्य यद्द्रव्यं सर्वात्मना स्वार्थे नियन्तुं धारयितुं च शक्यं तच्छेषतैकस्वरूपं च तत्तस्य शरीरमिति शरीरलक्षणमास्थेयम् । रुग्णशरीरादिषु नियमनाद्यदर्शनं विद्यमानाया एव नियमनशक्तेः प्रतिबन्धकृतम् । अग्न्यादेः शक्तिप्रतिबन्धादौष्ण्याद्यदर्शनवत् । मृतशरीरं च चेतनवियोगसमय एव विशरितुमारब्धम् । क्षणान्तरे च विशीर्यते । पूर्वं शरीरतया परिक्लृप्तसंघा-

---

1. B. reads विलक्षणकार्येषु for विलक्षणाकारेषु.

3. C. reads तदुक्तं च for त्वदुक्तं च; A. B. read उप before भोगहेतु..

12. B. om. हि; A. B. read धारकत्वेन for आधारकतया.

14. B. E. read च after आश्रयत्वम्.

19. A. B. om. च after मृतशरीरम्.

20. A. B. read पूर्वे for पूर्वम्; A. B. read अवक्लृप्त for परिक्लृप्त.

http://acharya.org

तैकदेशत्वेन च तत्र शरीरत्वव्यवहारः । अतः सर्वं परमपुरुषेण सर्वात्मना स्वार्थे नियाम्यं धार्यं तच्छेषतैकस्वरूपमिति सर्वं चेतनाचेतनं तस्य शरीरम्। अशरीरं शरीरेषु (का. २।२२) इत्यादि च कर्मनिमित्तशरीरप्रतिषेधपरम्। यथोक्तसर्वशरीरत्वश्रवणात्। उपरितनाधिकरणेषु चैतदुपपादयिष्यते । अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् न तु दृष्टान्तभावादिति सूत्रद्वयेनेतरव्यपदेशात् (ब्र. सू. २।१।२१) इत्यधिकरणसिद्धोर्थः स्मारितः ॥ ९ ॥

स्वपक्षदोषाच्च ॥ १० ॥

न केवलं ब्रह्मकारणवादस्य निर्दोषतयैतत्समाश्रयणम् । प्रधानकारणवादस्य दुष्टत्वाच्च तत्परित्यज्यैतदेव समाश्रयणीयम्। प्रधानकारणवादे हि जगत्प्रवृत्तिर्नोपपद्यते । तत्र हि निर्विकारस्य चिन्मात्रैकरसस्य पुरुषस्य प्रकृतिसंनिधानेन प्रकृतिधर्माध्यासनिबन्धना जगत्प्रवृत्तिः। निर्विकारस्य चिन्मात्ररूपस्य प्रकृतिधर्माध्यासहेतुभूतं प्रकृतिसंनिधानं किंरूपमिति विवेचनीयम्। किं प्रकृतेः सद्भाव एवोत तद्गतः कश्चिद्विकारोथ पुरुषगत एव कश्चिद्विकारः। न तावत्पुरुषगतः । अनभ्युपगमात्। नापि प्रकृतेर्विकारः। तस्याध्यासकार्यतयाभ्युपगतस्याध्यासहेतुत्वासंभवात् । सद्भावमात्रस्य संनिधानत्वे मुक्तस्याप्य-

---

7. B reads हिताकरणादि after इतरव्यपदेशात्.
12. B. reads उत्पद्यते for उपपद्यते.
14. B. reads निराकारस्य for निर्विकारस्य.
15. B. om. हेतु before भूतम्; B. reads किंस्वरूपम् for किंरूपम्.
16. A. B. read प्रकृति for प्रकृतेः.
18. A. B. read अभ्युपेतस्य for अभ्युपगतस्य.
19. B. om. अपि after मुक्तस्य.

http://acharya.org

ध्यासप्रसङ्ग इति तत्पक्षे जगत्प्रवृत्तिर्नोपपद्यते । अयमर्थः सांख्यपक्षप्रतिक्षेपसमयेभ्युपगमेप्यर्थाभावात् (ब्र.सू.२।२।८) इत्यादिना प्रपञ्चयिष्यते ॥ १० ॥

तर्काप्रतिष्ठानादपि ॥ ११ ॥

तर्कस्याप्रतिष्ठितत्वादपि श्रुतिमूलो ब्रह्मकारणवाद एव समाश्रयणीयो न प्रधानकारणवादः । शाक्योलूक्याक्षपादक्षपणककपिलपतञ्जलितर्काणामन्योन्यव्याघातात्तर्कस्याप्रतिष्ठितत्वं गम्यते ॥ ११ ॥

अन्यथानुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः ॥१२॥

इदानीं विद्यमानानां शाक्यादीनां तर्कानुदूष्यान्यथा प्रधानकारणवादमतिक्रान्ततदुपदर्शितदूषणत्वेनानुमन्यामह इति चेदेवमपि पुरुषबुद्धिमूलतर्कैकावलम्बनस्य तथैव देशान्तरकालान्तरेषु त्वदधिकतमतर्ककुशलपुरुषोत्प्रेक्षिततर्कदूष्यत्वसंभावनया तर्काप्रतिष्ठानदोषादनिर्मोक्षो दुर्वारः । अतोतीन्द्रियेर्थे शास्त्रमेव प्रमाणम् । तदुपबृंहणायैव तर्क उपादेयः । तथा चाह

आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः ॥ (मनु.१२।१०६)

इति । वेदाख्यशास्त्राविरोधिनेत्यर्थः । अतो वेदविरोधित्वेन

---

1. E. reads त्वत्पक्षे for तत्पक्षे.
6. B. reads औलूक्य for उलूक्य.
10. E. reads अत्र after अन्यथा.
12. B. reads तवैतत् for तथैव.
13. C. reads कुतर्क for तर्क before कुशल; A. B. om. पुरुष.
14. B. reads दर्शनात् for दोषात्.

http://acharya.org

वेदार्थविशदीकरणरूपवेदोपबृंहणतर्कोपादानाय सांख्यस्मृतिर्नादरणीया॥ १२ ॥ विलक्षणत्वाधिकरणं समाप्तम् ॥ (३)

एतेन शिष्टापरिग्रहा अपि व्याख्याताः ॥ १३ ॥

शिष्टाः परिशिष्टाः । न विद्यते वेदपरिग्रहो येषामित्यपरिग्रहाः । शिष्टाश्चापरिग्रहाश्च शिष्टापरिग्रहाः । एतेन वेदापरिगृहीतसांख्यपक्षक्षपणेन परिशिष्टाश्च वेदापरिगृहीताः कणभक्षाक्षपादक्षपणकभिक्षुपक्षाः क्षपिता वेदितव्याः । परमाणुकारणवादेमीषां सर्वेषां संवादात्कारणवस्तुविषयस्य तर्कस्याप्रतिष्ठितत्वं न शक्यते वक्तुमित्यधिकाशङ्का । तावन्मात्रसंवादेपि तर्कमूलत्वाविशेषात्परमाणुस्वरूपेपि शून्यात्मकत्वाशून्यात्मकत्वज्ञानात्मकत्वार्थात्मकत्वक्षणिकत्वनित्यत्वैकान्तत्वानेकान्तत्वसत्यासत्यात्मकत्वादिविसंवाददर्शनाच्चाप्रतिष्ठितत्वमेवेति परिहारः ॥ १३ ॥
शिष्टापरिग्रहाधिकरणं समाप्तम् ॥ (४)

भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ॥ १४ ॥

पुनरपि सांख्यः प्रत्यवतिष्ठते । यदुक्तं स्थूलसूक्ष्मचिदचिद्वस्तुशरीरस्य परस्य ब्रह्मणः कार्यकारणरूपत्वाज्जीवब्रह्मणोः स्वभावविभाग उपपद्यत इति स तु विभागो न संभवति । ब्रह्मणः सशरीरत्वे तस्य भोक्तृत्वापत्तेः । सशरीरत्वे जीवस्येवेश्वरस्यापि सशरीरत्वप्रयुक्तसुखदुःखयोर्भोक्तृत्वस्यावर्जनीयत्वात् । ननु च संभोगप्राप्तिरिति चेन्न वैशेष्यात् (ब्र. सू. १।२।८) इत्यत्रेश्वरस्य भोगप्रसङ्गपरिहार उक्तः । नैवम् । तत्र ह्युपास्यतया हृदयायतने संनिहितस्य शरीरान्तर्वर्तित्वमात्रेण भोगप्र-

1. E. reads अनादरणीया for नादरणीया.
10. A. B. om. अशून्यात्मकत्व.
16. B. reads शरीरकस्य for शरीरस्य.

http://acharya.org

सङ्गो न विद्यत इत्युक्तम् । इह तु जीववद्ब्रह्मणोपि सशरीरत्वे तद्वदेव सुखदु:खयोर्भोक्तृत्वप्रसङ्गो दुर्वार इत्युच्यते । दृश्यते हि सशरीराणां जीवानां शरीरगतबालत्वयुवत्वस्थविरत्वादिविकारासंभवेपि शरीरधातुसाम्यवैषम्यनिमित्तसुखदु:खयोग: । श्रुतिश्च न ह वै सशरीरस्य सत: प्रियाप्रिययोरपहतिरस्ति । अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत: (छा. ८।१२।१) इति। अत: सशरीरब्रह्मकारणवादे जीवेश्वरस्वभावविभागाभावात्केवलब्रह्मकारणवादेपि मृत्सुवर्णादिवज्जगद्गतापुरुषार्थादिसर्वविशेषाश्रयत्वप्रसङ्गाच्च प्रधानकारणवाद एव ज्यायानिति चेत् ।

अत्रोत्तरं स्याल्लोकवदिति । स्यादेव विभागो जीवेश्वरस्वभावयो: । न हि जीवस्य शरीरधातुसाम्यवैषम्यनिमित्तं सुखदु:खयोर्भोक्तृत्वं सशरीरत्वकृतम् । अपि तु पुण्यपापरूपकर्मकृतम् । न ह वै सशरीरस्य (छा. ८।१२।१) इत्यपि कर्मारब्धदेहविषयम् । स एकधा भवति त्रिधा भवति (छा. ७।२६।२)। स यदि पितृलोककामो भवति (छा. ८।२।१)। स तत्र पर्येति जक्षन्क्रीडन्रममाण: (छा. ८।१२।३) इति कर्मसंबन्धविनिर्मुक्तस्याविर्भूतस्वरूपस्य सशरीरस्यैवापुरुषार्थगन्धाभावात् । अपहतपाप्मनस्तु परमात्मन: स्थूलसूक्ष्मरूपकृत्स्नजगच्छरीरत्वेपि कर्मसंबन्धगन्धो नास्तीति नतरामपुरुषार्थगन्धप्रसङ्ग: । लोकवत् । यथा लोके राजशासनानुवर्तिना तदतिवर्तिनां च राजा-

---

1. B. reads अपि after सशरीरत्वे.
3. A. C. E. om. युवत्व.
7. B. om. स्वभाव; A. B. read असभवात् for अभावात्.
8. A. B. om. अपि after कारणवादे.
16. B. om. सम् before बन्ध.
18. B. reads सशरीरत्वेपि for शरीरत्वेपि.
19. A. B. read न नितराम् for नतराम्.

http://acharya.org

नुग्रहनिग्रहकृतसुखदुःखयोगेपि न सशरीरत्वमात्रेण शासके राजन्यपि शासनानुवृत्त्यतिवृत्तिनिमित्तसुखदुःखयोर्भोक्तृत्वप्रसङ्गः । यथाह द्रमिडभाष्यकारः । यथा लोके राजा प्रचुरदन्दशूके घोरेनर्थसंकटेपि प्रदेशे वर्तमानोपि व्यजनाद्यवधूतदेहो दोषैर्न स्पृश्यतेभिप्रेतांश्च लोकान्पुनरपि पालयिष्यति भोगांश्च गन्धादीन्विश्वजनोपभोग्यान्धारयति तथासौ लोकेश्वरो भ्रमत्स्वसामर्थ्यचामरो दोषैर्न स्पृश्यते रक्षति च लोकान्ब्रह्मलोकादीन्भोगांश्च विश्वजनोपभोग्यान्धारयतीति । मृत्सुवर्णादिवद्ब्रह्मस्वरूपपरिणामस्तु नैवाभ्युपगम्यते । अविकारत्वनिर्दोषतादिश्रुतेः ।

यत्तु परैर्ब्रह्मकारणवादे भोक्तृभोग्यविभागाभावमाशङ्क्य समुद्रफेनतरङ्गदृष्टान्तेन विभागप्रतिपादनपरं सूत्रं व्याख्यातं तदयुक्तम् । अन्तर्भावितशक्त्यविद्योपाधिकाद्ब्रह्मणः सृष्टिमभ्युपगच्छतामेवमाक्षेपपरिहारयोरसंगतत्वात् । कारणान्तर्गतशक्त्यविद्योपाध्युपहितस्य भोक्तृत्वादुपाधेश्च भोग्यत्वाद्विलक्षणयोस्तयोः परस्परभावापत्तिर्हि न संभवति । स्वरूपपरिणामस्तु तैरपि नाभ्युपेयते । न कर्माविभागादिति चेन्नानादित्वात् (ब्र. सू. २।१।३५) इति क्षेत्रज्ञानां तद्गतकर्मणां चानादित्वप्रतिपादनात् । स्वरूपपरिणामाभ्युपगमेपि भोक्तृभोग्याविभागशङ्का

---

1. E. reads सशरीरित्व for सशरीरत्व.
3. B C. read द्रविड for द्रमिड.
4. B om. अपि after संकटे; C. reads अपि after प्रदेशे; A. B. om. अपि after वर्तमानः.
5. A. B. C. read परिपिपालयिष्यति for पुनरपि पालयिष्यति.
6. A. B. read धारयते for धारयति.
7. E. reads लोकादीन् for लोकान्.
11. C. om. समुद्र.
19. C. reads अविभागाशङ्का for अविभागशङ्का.

http://acharya.org

कस्यचिदपि न जायते । मृत्सुवर्णादिपरिणामरूपघटशरावकटकमुकुटादिविभागवद्भोक्तृभोग्यविभागोपपत्तेः । स्वरूपपरिणामेपि ब्रह्मण एव भोक्तृभोग्यत्वापत्तिरिति पुनरप्यसामञ्जस्यमेव ॥ १४ ॥ भोक्त्रापत्त्यधिकरणं समाप्तम् ॥ (५)

तदनन्यत्वमारम्भणशब्दादिभ्यः ॥ १५ ॥

असदिति चेन्न प्रतिषेधमात्रत्वात् (ब्र. सू. २।१।७) इत्यादिषु कारणभूताद्ब्रह्मणः कार्यभूतस्य जगतोनन्यत्वमभ्युपगम्य ब्रह्मणो जगत्कारणत्वमुपपादितम् । इदानीं तदेवानन्यत्वमाक्षिप्य समाधीयते ।

तत्र काणादाः प्राहुः । न कारणात्कार्यस्यानन्यत्वं संभवति। विलक्षणबुद्धिबोध्यत्वात् । न खलु तन्तुपटमृत्पिण्डघटादिषु कार्यकारणविषया बुद्धिरेकरूपा । शब्दभेदाच्च । न हि तन्तवः पट इत्युच्यन्ते पटो वा तन्तव इति । कार्यभेदाच्च । न हि मृत्पिण्डेनोदकमाह्रियते घटेन वा कुड्यं निर्मीयते । कालभेदाच्च । पूर्वकालं च कारणमपरकालं च कार्यम् । आकारभेदाच्च । पिण्डाकारं कारणं कार्यं च पृथुबुध्नोदराकारम् । तथा सत्यामेव मृदि घटो नष्ट इति व्यवह्रियते । संख्याभेदश्च दृश्यते । बहवस्तन्तव एकश्च पटः । कारकव्यापारवैयर्थ्यं च । कारणमेव चेत्कार्यं किं कारकव्यापारसाध्यं स्यात् । सत्यपि कार्ये कार्योपयोगितया कारकव्यापारेण भवितव्यं चेत्सर्वदा

---

3. A. B. read च for अपि before ब्रह्मणः; C. reads भोगत्व for भोग्यत्व.

7. B. reads पर before ब्रह्मणः कार्यभूतस्य.

12. C. om. च after शब्दभेदात्.

17. B. reads अपि for एव after सत्याम्.

20. E. reads इति after भवितव्यम्.

http://acharya.org

कारकव्यापारेण नोपरन्तव्यम्। सर्वस्य सर्वदा सत्त्वेन नित्यानित्यविभागश्च न स्यात्। अथ कार्यं सदेव पूर्वमनभिव्यक्तं कारकव्यापारेणाभिव्यज्यते। अतः कारकव्यापारार्थवत्त्वं नित्यानित्यविभागश्चोच्यते। तदसत्। अभिव्यक्तेरभिव्यक्त्यन्तरापेक्षत्वेनवस्थानात्। अनपेक्षत्वे कार्यस्य नित्योपलब्धिप्रसङ्गात्। तदुत्पत्त्यभ्युपगमे चासत्कार्यवादप्रसङ्गात्। किं च कारकव्यापारस्याभिव्यञ्जकत्वे घटार्थेन कारकव्यापारेण करकादेरप्यभिव्यक्तिः प्रसज्यते। संप्रतिपन्नाभिव्यञ्जकभावेषु दीपादिष्वभिव्यङ्ग्यविशेषनियमादर्शनात्। न हि घटार्थमारोपितः प्रदीपः करकादीन्नाभिव्यनक्ति। अतोसतः कार्यस्योत्पत्तिहेतुत्वेनैव कारकव्यापारार्थवत्त्वम्। अतश्च सत्कार्यवादासिद्धिः। न च नियतकारणोपादानं सत एव कार्यत्वं साधयति। कारणशक्तिनियमादेव तदुपपत्तेः। नन्वसत्कार्यवादिनोपि कारकव्यापारो नोपपद्यते। प्रागुत्पत्तेः कार्यस्यासत्त्वात्कार्यादन्यत्र कारकव्यापारेण भवितव्यम्। तत्रान्यत्वाविशेषात्तन्तुगतकारकव्यापारेण घटोत्पत्तिरपि प्रसज्येत। नैवम्। यत्कार्योपादानशक्तं यत्कारणं तद्गतकारकव्यापारेण तत्कार्योत्पत्तिसिद्धेः।

अत्राहुः। कारणादनन्यत्कार्यम्। न हि परमार्थतः कारणव्यतिरिक्तं कार्यं नाम वस्त्वस्ति। अविद्यानिबन्धनत्वात्सकलकार्यतद्व्यवहारयोः। अतो यथा कारणभूतान्मृद्द्रव्याद्घटादिषु विकारेषूपलभ्यमानाद्व्यतिरिक्तं घटशरावादिकार्यं व्यवहारमात्रालम्बनं मिथ्या कारणभूतं मृद्द्रव्यमेव सत्यं तथा निर्विशेषसन्मात्रात्कारणभूताद्ब्रह्मणोन्योऽहंकारादिव्यवहारालम्बनः कृत्स्नः

---

4. A. B. read उच्येत for उच्यते.
5. B. reads नित्यत्वोपलब्धि for नित्योपलब्धि.
8. B. C read प्रसज्येत for प्रसज्यते.
17. E. reads कारण for कारक before व्यापारेण.

http://acharya.org

प्रपञ्चो मिथ्या कारणभूतं सन्मात्रं ब्रह्मैव सत्यम् । तस्मात्कारणव्यतिरिक्तं कार्यं नास्तीति कारणादनन्यत्कार्यम् । न च वाच्यं शुक्तिकारजतादीनामिव घटादिकार्याणामसत्यत्वाप्रसिद्धेर्दृष्टान्तानुपपत्तिरिति । यतस्तत्रापि युक्त्या मृद्द्रव्यमात्रमेव सत्यतया व्यवस्थाप्यते तदतिरिक्तं तु युक्त्या बाध्यते । का पुनरत्र युक्तिः । मृद्द्रव्यमात्रस्यानुवर्तमानत्वं तदतिरिक्तस्य च व्यावर्तमानत्वम् । रज्जुसर्पादिषु ह्यनुवर्तमानस्याधिष्ठानभूतस्य रज्ज्वादेः सत्यता व्यावर्तमानस्य च सर्पभूदलनाम्बुधारादेरसत्यता दृष्टा । तथानुवर्तमानमधिष्ठानभूतं मृद्द्रव्यमेव सत्यं व्यावर्तमानास्तु घटशरावादयोसत्यभूताः । किं च सत आत्मनो विनाशाभावादसतश्च शशविषाणादेरुपलब्ध्यभावादुपलब्धिविनाशयोगि कार्यं सदसद्भ्यामनिर्वचनीयमिति गम्यते । अनिर्वचनीयं च शुक्तिकारजतादिवन्मृषैव । तस्य चानिर्वचनीयत्वं प्रतीतिबाधाभ्यां सिद्धम् ।

किं च कार्यमुत्पादयन्मृदादि कारणद्रव्यं किमविकृतमेव कार्यमुत्पादयत्युत कंचन विशेषमापन्नम् । न तावदविकृतमुत्पादयति । सर्वदोत्पादकत्वप्रसङ्गात् । नापि विशेषान्तरमापन्नम् । विशेषान्तरापत्तेरपि विशेषान्तरापत्तिपूर्वकत्वेन भवितव्यं तस्या अपि तथेत्यनवस्थानात् । अविकृतमेव देशकालनिमित्तविशेष-

---

4. B. reads दृष्टान्तत्व for दृष्टान्त.
6 C. om च after तदतिरिक्तस्य.
8. C. reads सत्यतया for सत्यता and सत्यता for असत्यता.
12. B. reads सदसद्भ्यावर्तनीयम् for सदसद्भ्याम्; C. reads अनिर्वचनीयत्वम् for अनिर्वचनीयम्.
16. A. B. om. उत्पादयति.
18. E. reads पूर्वत्वेन for पूर्वकत्वेन.
19. C. om. निमित्त.

http://acharya.org

संबद्धं कार्यमुत्पादयतीति चेन्न । देशादिविशेषसंबन्धोपि ह्यविकृतस्य विशेषान्तरमापन्नस्य च पूर्ववन्न संभवति । न च वाच्यं मृत्सुवर्णदुग्धादिभ्यो घटरुचकदध्यादीनामुत्पत्तिर्दृश्यते । शुक्तिकारजतादिवद्देशकालादिप्रतिपन्नोपाधौ बाधश्च न दृश्यते । अतः प्रतीतिशरणानां कारणात्कार्योत्पत्तिरवश्याश्रयणीयेति । विकल्पासहत्वात् । किं हेमादिमात्रमेव स्वस्तिकादेरारम्भकमुत रुचकादिरथ रुचकाद्याश्रयो हेमादिः । न तावद्धेमादिमात्रमारम्भकम् । हेमव्यतिरिक्तस्य कार्यस्याभावात् । स्वात्मानं प्रत्यात्मन आरम्भकत्वासंभवाच्च । हेमव्यतिरिक्तं स्वस्तिकं दृश्यत इति चेत् । न हेमव्यतिरिक्तं तत् । हेमप्रत्यभिज्ञानात् । तदतिरिक्तवस्त्वन्तरानुपलब्धेश्च । बुद्धिशब्दान्तरादिभिर्वस्त्वन्तरत्वं साधितमिति चेन्न । अनिरूपितवस्त्ववलम्बनानां बुद्धिशब्दान्तरादीनां शुक्तिकारजतबुद्धिशब्दादिवद्भ्रान्तिमूलत्वेन वस्त्वन्तरसद्भावासाधकत्वात् । नापि रुचकादि स्वस्तिकादेरारम्भकम् । स्वस्तिके हि रुचकं पट इव तन्तवो भवतापि नोपलभ्यन्ते । नापि रुचकाश्रयभूतं हेम । रुचकाश्रयाकारेण हेम्नः स्वस्तिकेनुपलब्धेः । अतो मृदादिकारणातिरिक्तस्य कार्यस्यासत्यत्वदर्शनाद्ब्रह्मव्यतिरिक्तं कृत्स्नं जगत्तत्कार्यत्वेन मिथ्याभूतम् ।

तदिदं ब्रह्मव्यतिरिक्तमिथ्यात्वसुखप्रतिपत्तये काल्पनिकमृदादिसत्यत्वमाश्रित्य कार्यस्यासत्यत्वं प्रतिपादितम् । परमार्थतस्तु मृत्सुवर्णादिकारणमपि घटरुचकादिकार्यवन्मिथ्याभू-

---

1. A. B. C. read संबन्धम् for सबद्धम्.
7. C. reads रुचकादि for रुचकादिः.
12. C. om. न after चेत्; A. B. read शब्दबुद्धि for बुद्धिशब्द.
14. A. B. C. read सद्भावस्य for सद्भाव.
16. B. reads लभ्यते for लभ्यन्ते.
18. E. om. तत् before कार्यत्वेन.

http://acharya.org

तम् । ब्रह्मकार्यत्वाविशेषात् । ऐतदात्म्यमिदं सर्वं तत्सत्यम् (छा. ६।८।७) । नेह नानास्ति किंचन (बृ. ४।४।१९) ।

मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ।
(का. ४।१०,बृ. ४।४।१९)

यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् (बृ. २।४।१४,४।५।१५)। इन्द्रो मायाभिः पुरुरूप ईयते (बृ. २।५।१९) इत्येवमादिभिः श्रुतिभिश्च ब्रह्मव्यतिरिक्तस्य मिथ्यात्वमवगम्यते । न चागमावगतार्थस्य प्रत्यक्षविरोधः शङ्कनीयः । यथोक्तप्रकारेण कार्यस्य सर्वस्य मिथ्यात्वावगमात् । प्रत्यक्षस्य सन्मात्रविषयत्वाच्च । विरोधे सत्यप्यसंभावितदोषस्य चरमभाविनः स्वरूपसद्भावादौ प्रत्यक्षाद्यपेक्षत्वेपि प्रमितौ निराकाङ्क्षस्य निरवकाशस्य शास्त्रस्य बलीयस्त्वात् । अतः कारणभूताद्ब्रह्मणोन्यत्सर्वं मिथ्या । न च प्रपञ्चस्य मिथ्यात्वेन जीवमिथ्यात्वमाशङ्कनीयम् । ब्रह्मण एव जीवभावात् । ब्रह्मैव हि सर्वशरीरेषु जीवभावमनुभवति । अनेन जीवेनात्मनानुप्रविश्य (छा. ६।३।२) । एको देवः सर्वभूतेषु गूढः (श्वे. ६।११) । एको देवो बहुधा निविष्टः (तै. आ. ३।१३) ।

एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते । (का. ३।१२)
नान्योतोस्ति द्रष्टा (बृ. ३।७।२३) इत्येवमादिभ्यः ।

नन्वेकमेव ब्रह्म सर्वशरीरेषु जीवभावमनुभवतीति चेत् ।

---

7. C. om. ईयते.

14. A. B. read प्रपञ्च for प्रपञ्चस्य.

17. E. reads सम् before निविष्टः.

21. B. C. om. इति after अनुभवति.

http://acharya.org

पादे मे वेदना शिरसि सुखमितिवत्सर्वशरीरेषु सुखदुःखप्रतिसंधानं स्यात् । जीवेश्वरबद्धमुक्तशिष्याचार्यज्ञत्वाज्ञत्वादिव्यवस्था च न स्यात् ।

अत्र केचिदद्वितीयत्वं ब्रह्मणोभ्युपयन्त एवैवं समादधते । एकस्यैव ब्रह्मणः प्रतिबिम्बभूतानां जीवानां सुखित्वदुःखित्वाद्य एकस्यैव मुखस्य प्रतिबिम्बानां मणिकृपाणदर्पणादिषूपलभ्यमानानामल्पत्वमहत्त्वमलिनत्वविमलत्वादिवत्तत्तदुपाधिवशाद्व्यवस्थाप्यन्ते । नन्वनेन जीवेनात्मनानुप्रविश्य (छा. ६।३।२) इत्यादिश्रुतेर्न जीवा ब्रह्मणो भिद्यन्त इत्युक्तम् । सत्यं परमार्थतः । काल्पनिकं तु भेदमाश्रित्येयं व्यवस्थोच्यते । कस्य पुनः कल्पना । न तावद्ब्रह्मणः । तस्य परिशुद्धज्ञानात्मनः कल्पनाशून्यत्वात् । नापि जीवानाम् । इतरेतराश्रयत्वप्रसङ्गात् । कल्पनाधीनो हि जीवभावो जीवाश्रया च कल्पनेति । नैतदेवम् । अविद्याजीवभावयोर्बीजाङ्कुरन्यायेनानादित्वात् । किं च प्रासादनिगरणादिवदनुपपन्नतैकवेषायामवस्तुभूतायामविद्यायां नेतरेतराश्रयादयो वस्तुदोषा अनवक्लृप्तिमावहन्ति । वस्तुतो ब्रह्माव्यतिरिक्तानां जीवानां स्वतो विशुद्धत्वेपि कृपाणादिगतमुखप्रतिबिम्बश्यामतादिवदौपाधिकाशुद्धिसंभवादविद्याश्रयत्वोपपत्तेः काल्पनिकत्वोपपत्तिः । प्रतिबिम्बगतश्यामतादिवज्जीवगताशुद्धिरपि

---

1. A. B. read मे after शिरसि; C. reads वेदना for सुखम्.
4. B. reads एव before अभ्युपयन्तः; C. E. om. एव after अभ्युपयन्तः.
9. A. B. C. read न before परमार्थतः.
15. B. reads अनुपपन्नतया for अनुपपन्नता.
16. A. B. C. read त्व after आश्रय, B. om. वस्तु before दोषाः; B. reads व्यतिरिक्तानाम् for अव्यतिरिक्तानाम्.
17. A. B. om. अपि after विशुद्धत्वे.

http://acharya.org

भ्रान्तिरेव । अन्यथानिर्मोक्षत्वप्रसङ्गात् । जीवानां भ्रमस्य प्रवाहानादित्वान्न तद्धेतुरन्वेषणीय इति ।

तदेतदविदिताद्वैतयाथात्म्यानां भेदवादश्रद्धालुजनसबहुमानावलोकनलिप्साविजृम्भितम् । तथा हि । जीवस्याकल्पितस्वाभाविकरूपेणाविद्याश्रयत्वे ब्रह्मण एवाविद्याश्रयत्वमुक्तं स्यात् । तदतिरिक्तेन तस्मिन्कल्पितेनाकारेणाविद्याश्रयत्वे जडस्याविद्याश्रयत्वमुक्तं स्यात् । न खल्वद्वैतवादिनस्तदुभयव्यतिरिक्तमाकारमभ्युपगच्छन्ति । कल्पिताकारविशिष्टेन स्वरूपेणैवाविद्याश्रयत्वमिति चेत्तन्न । स्वरूपस्याखण्डैकरसस्याविद्यामन्तरेण विशिष्टरूपत्वासिद्धेः । अविद्याश्रयाकार एव हि निरूप्यते । किं च बन्धमोक्षादिव्यवस्थासिद्ध्यर्थं जीवाज्ञानस्य समाश्रयणम् । सा तु व्यवस्था जीवाज्ञानपक्षेपि न सिध्यति । अविद्याविनाश एव हि मोक्षः । तत्रैकस्मिन्मुक्तेविद्याविनाशादितरेपि विमुच्येरन् । अन्यस्यामुक्तत्वादविद्या तिष्ठतीति चेत्तर्ह्येकस्याप्यमुक्तिः स्यात् । अविद्याया अविनष्टत्वात् । प्रतिजीवमविद्याभेदः कल्प्यते । तत्र यस्याविद्या विनष्टा स मोक्ष्यते यस्य त्वनष्टा स भन्त्स्यत इति चेत्तन्न । प्रतिजीवमिति जीवभेदमाश्रित्य ब्रूषे स

---

1. C. om. त्व after अनिर्मोक्ष.
3. C. om. स before बहुमान.
4. C. reads ईप्सा for लिप्सा.
8. C. om. एव after स्वरूपेण.
9. A. B. om. तत् after चेत्.
11. E. reads हि after सिद्ध्यर्थम्; A. reads जीवाज्ञान for जीवाज्ञानस्य
13. E. om. वि before मुच्येरन्.
16. A. E. om. वि before नष्टा.
17. E. om. तत् after चेत्.

http://acharya.org

जीवभेदः किं स्वाभाविक उताविद्याकल्पितः । न तावत्स्वाभाविकः । अनभ्युपगमात् । भेदसिद्ध्यर्थस्यास्य चाविद्याकल्पनस्य व्यर्थत्वात् । अथाविद्याकल्पितस्तत्रेयं जीवभेदकल्पिकाविद्या किं ब्रह्मण उत जीवानाम् । ब्रह्मण इति चेदागतोसि मदीयं मार्गम् । अथ जीवानाम् । किमस्या जीवभेदक्लृप्तिसिद्ध्यर्थतां विस्मरसि । अथ प्रतिजीवं बद्धमुक्तव्यवस्थासिद्ध्यर्थं या अविद्याः कल्प्यन्ते ताभिरेव जीवभेदोपीति मनुषे जीवभेदसिद्धौ ताः सिध्यन्ति तासु सिद्धासु जीवभेदसिद्धिरितीतरेतराश्रयत्वम् । न चात्र बीजाङ्कुरन्यायः सिध्यति । बीजाङ्कुरेषु ह्यन्यदन्यद्बीजमन्यस्यान्यस्याङ्कुरस्योत्पादकम् । इह तु याभिरविद्याभिर्ये जीवाः कल्प्यन्ते तानेवाश्रित्य तासां सिद्धिरित्यशङ्कनीयता । अथ बीजाङ्कुरन्यायेन पूर्वपूर्वजीवाश्रयाभिरविद्याभिरुत्तरोत्तरजीवकल्पनां मन्यसे तथा सति जीवानां भङ्गुरत्वमकृताभ्यागमकृतप्रहाणादिप्रसङ्गश्च । अत एव ब्रह्मणः पूर्वपूर्वजीवाश्रयाभिरविद्याभिरुत्तरोत्तरजीवकल्पनमित्यपि निरस्तम् । अविद्याप्रवाहेभ्युपगम्यमाने तत्तत्कल्पितजीवभावस्यापि तद्वत्प्रवाहानादिता स्यान्न ध्रुवरूपता । आ मोक्षाच्च जीवभावस्य ध्रुवत्वमिष्टं न सिध्येत् ।

यच्चोक्तमविद्याया अवस्तुरूपत्वेनानुपपन्नतैकवेपाया ने-

---

2. C. om. अस्य before च.

8. B. reads सिद्धेः for सिद्धि·

14. C. reads विप्रणाश for प्रहाण; B reads भाव after पूर्वपूर्वजीव.

15. E. reads भाव after उत्तरजीव

16. B. reads त्वत् for तत्तत्, A. C. om. तत् after तत्; C. om. भाव after जीव.

17. E. reads आमोक्षम् for आ मोक्षात्

19. A. C. E. read एकवेषायाम् for एकवेषायाः.

http://acharya.org

तरेतराश्रयत्वादयो वस्तुदोषा अनवक्लृप्तिमावहन्तीति । तथा सति मुक्तान्परं च ब्रह्माश्रयेदविद्या । शुद्धविद्यास्वरूपत्वादशुद्धिरूपा न तत्र प्रसजतीति चेत् । किमुपपत्त्यनुपपत्त्यनुवर्तिन्यविद्या । एवं तर्ह्युक्ताभिरनुपपत्तिभिर्जीवानपि नाश्रयेत् । किं च जीवाश्रयाया अविद्यायास्तत्त्वज्ञानोदयान्नाशे सति जीवो नश्येद्वा न वा । यदि नश्येत्स्वरूपोच्छित्तिलक्षणो मोक्षः स्यात् । नो चेदविद्यानाशेऽप्यनिर्मोक्षः । ब्रह्मस्वरूपव्यतिरिक्तजीवत्वावस्थानात् ।

यच्चोक्तं मणिकृपाणदर्पणादिषूपलभ्यमानमुखमलिनत्वविमलत्वादिवच्छुद्ध्यशुद्ध्यादिव्यवस्थोपपत्तिरिति तत्रेदं विमर्शनीयमल्पत्वमलिनत्वादय औपाधिका दोषाः कदा नश्येयुरिति । कृपाणाद्युपाध्यपगम इति चेत्किं तदाल्पत्वाद्याश्रयः प्रतिबिम्बस्तिष्ठति न वा । तिष्ठतीति चेत्तत्स्थानीयस्य जीवस्यापि स्थितत्वादनिर्मोक्षप्रसङ्गः । नश्यति चेत्तद्वदेव जीवनाशात्स्वरूपोच्छित्तिलक्षणो मोक्षः स्यात् । किं च यस्य ह्यपुरुषार्थरूपदोषप्रतिभासस्तस्य तदुच्छेदः पुरुषार्थः । तत्र किमौपाधिकदोषप्रतिभासो बिम्बस्थानीयस्य ब्रह्मण उत प्रतिबिम्बस्थानीयस्य जीवस्योतान्यस्य कस्यचित् । आद्ययोः कल्पयोर्दृष्टान्तोयं न संगच्छते । मुखस्य मुखप्रतिबिम्बस्य चाल्पत्वादिदोषप्रतिभासशून्यत्वात् । न हि मुखं तत्प्रतिबिम्बं वा चेतयते ।

---

2. C. reads ब्रह्म च for पर च ब्रह्म.

3. B. reads प्रसज्जति for प्रसजति, C. E. om. अनुपपत्ति after उपपत्ति

4 A. B. E. read उपपत्तिभिः for अनुपपत्तिभि॰.

10. C. reads औपाधिक for औपाधिकाः.

11. E. reads तत् for तदा.

12. C. om. इति after तिष्ठति.

17. C. reads ब्रह्मणः before जीवस्य.

http://acharya.org

ब्रह्मणो दोषप्रतिभासे ब्रह्मणोविद्याश्रयत्वप्रसङ्गश्च । तृतीयोपि कल्पो न कल्पते। जीवब्रह्मव्यतिरिक्तस्य द्रष्टुरभावात्।

किं चाविद्याकल्प्यस्य जीवस्य कल्पकः क इति निरूपणीयम्। न तावदविद्या। अचेतनत्वात्। नापि जीवः । आत्माश्रयदोषप्रसङ्गात्। शुक्तिकारजतादिवदविद्याकल्प्यत्वाच्च जीवभावस्य। ब्रह्मैव कल्पकमिति चेद्ब्रह्माज्ञानमेवायातम् । किं च ब्रह्माज्ञानानभ्युपगमे किं ब्रह्म जीवान्पश्यति न वा । न पश्यति चेदीक्षापूर्विका विचित्रसृष्टिर्नामरूपव्याकरणमित्यादि ब्रह्मणो न स्यात् । अथ पश्यति। अखण्डैकरसं ब्रह्मानाद्यविद्यामन्तरेण जीवान्पश्यतीति ब्रह्माज्ञानप्रसङ्गः । अत एव मायाविद्याविभागवादोपि निरस्तः। अज्ञानमन्तरेण हि मायिनोपि ब्रह्मणो जीवदर्शित्वं न स्यात्। न च मायावी परानदृष्ट्वा मोहयितुमलम्। न च माया मायाविनो दर्शनसाधनम् । दृष्टेषु परेषु तन्मोहनसाधनमात्रत्वात्तस्याः । अथ ब्रह्मणो माया तस्य जीवदर्शित्वं कुर्वती जीवमोहनहेतुरिति मन्यसे तर्हि परिशुद्धस्याखण्डैकरसस्वप्रकाशस्य ब्रह्मणः परदर्शनं कुर्वती माया मायापरपर्यायाविद्यैव स्यात्।

अथ मतं विपरीतदर्शनहेतुरविद्या। माया तु मिथ्याभूतं ब्रह्म-

---

1. C. reads ब्रह्मविद्या for ब्रह्मणोविद्याश्रयत्व.
2. C. reads व्यतिरिक्त for व्यतिरिक्तस्य.
6. B. om. चेत्; C. reads ब्रह्मज्ञानम् for ब्रह्माज्ञानम्.
7. C. reads ब्रह्मज्ञान for ब्रह्माज्ञान.
8. B. reads इति after पश्यति.
9. E. reads न for अनादि.
11. E. reads प्र before विभागवाद.
15. C. reads दर्शनत्वम् for दर्शित्वम्; C. reads मोहस्य for मोहन.
16. A. B. om. स्व before प्रकाशस्य.

http://acharya.org

व्यतिरिक्तं मिथ्यात्वेनैवं दर्शयन्ती न ब्रह्मणो विपरीतदर्शनहेतुः । अतस्तस्या नाविद्यात्वमिति । नैवम् । चन्द्रैकत्वे ज्ञायमाने द्विचन्द्रज्ञानहेतोरप्यविद्यात्वात् । यदि च ब्रह्म मिथ्यात्वेनैव स्वव्यतिरिक्तं जानाति न तर्हि तन्मोहयति । न ह्यनुन्मत्तो मिथ्यात्वेन ज्ञातान्मोहयितुमीहते ।

अथापुरुषार्थापरमार्थदर्शनहेतुरविद्या । माया तु ब्रह्मणो नापुरुषार्थदर्शनहेतुः । अतोस्या नाविद्यात्वमिति मतम् । तन्न । द्विचन्द्रज्ञानस्य दुःखहेतुत्वाभावेनापुरुषार्थत्वाभावेपि तद्धेतुरविद्यैव । तन्निरसने च प्रयस्यन्ति । यदि च नापुरुषार्थदर्शनकरी माया तर्ह्यनुच्छेद्यतया नित्या ब्रह्मस्वरूपानुबन्धिनी स्यात् । अस्तु को दोष इति चेत् । द्वैतदर्शनमेव दोषः । यत्र हि द्वैतमिव भवति (बृ. २।४।१४,४।५।१५) । यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् (बृ. २।४।१४,४।५।१५) इत्याद्यद्वैतश्रुतयः प्रकुप्येयुः । परमार्थविषया अद्वैतश्रुतयो मायायास्त्वपरमार्थत्वादविरोध इति चेत् । अपरिच्छिन्नानन्दैकस्वरूपस्य ब्रह्मणोपरमार्थभूतमायादर्शनं तद्वत्ता चाविद्यामन्तरेण नोपपद्यते । किं चापरमार्थभूतयानित्यया मायया किं प्रयोजनं ब्रह्मणः । जीवमोहनमिति चेत् । अपुरुषार्थेन मोहनेन किं प्रयोजनम् । क्री-

---

1. C. om. एव after मिथ्यात्वेन.
5. A. B. read मोहयते for मोहयितुमीहते.
6. C. reads अविद्या for अपरमार्थ.
7. A. B. om. दर्शन after अपुरुषार्थ.
8. A. B. om. अपि before तद्धेतु..
9. B. reads प्रयत्स्यन्ति, C. प्रयास्यन्ति, for प्रयस्यन्ति.
10. B. reads ब्रह्मरूप for ब्रह्मस्वरूप.
13. C. reads एवम् before आद्यद्वैत.
16. E. reads वा for च after तद्वत्ता.

http://acharya.org

डेति चेत्। अपरिच्छिन्नानन्दस्य किं क्रीडया। परिपूर्णभोगानामेव क्रीडा पुरुषार्थत्वेन लोके दृष्टेति चेत्। नैवमिहोपपद्यते। न ह्यपरमार्थभूतैः क्रीडोपकरणैरपरमार्थतया प्रतिभासमानैर्निष्पन्नयापरमार्थभूतया क्रीडयापरमार्थभूतेन च तत्प्रतिभासेनानुन्मत्तानां क्रीडारसो निष्पद्यते। मायाश्रयतयाभिमतब्रह्मव्यतिरेकेणाविद्याश्रयस्य जीवस्य कल्पनासंभवश्च पूर्ववदेव द्रष्टव्यः। अतो ब्रह्मैवानाद्यविद्याशबलं स्वगतनानात्वं पश्यतीत्यद्वितीयत्वं ब्रह्मणोभ्युपयद्भिरभ्युपेत्यम्।

यत्तु बन्धमोक्षव्यवस्था नोपपद्यत इति न तद्ब्रह्माज्ञानवादिनश्चोद्यम्। एकस्यैव ब्रह्मणोज्ञस्य स्वाज्ञाननिवृत्त्या मोक्ष्यमाणत्वाद्बद्धमुक्तादिव्यवस्थाया एवाभावात्। व्यवह्रियमाणायाश्च बद्धमुक्तशिष्याचार्यादिव्यवस्थायाः काल्पनिकत्वात्। स्वप्रदर्शिन इव चैकस्यैवाविद्यया सर्वकल्पनोपपत्तेः। स्वप्नदशा ह्येकेन दृष्टाः शिष्याचार्यादयस्तदविद्याकल्पिता एव। अत एव बह्वविद्याकल्पनमपि न युक्तिमत्। पारमार्थिकी बन्धमोक्षव्यवस्था स्वपरव्यवस्था च जीवाज्ञानवादिनापि नाभ्युपेयते। अपारमार्थिकी त्वेकस्यैवाविद्ययोपपद्यते। प्रयोगाश्च बन्धमोक्षव्यवस्थाः स्वपरव्यवस्थाश्च स्वाविद्याकल्पिता अपारमार्थिकत्वात्स्वप्रदृष्टव्यवस्थावदिति। शरीरान्तराण्यपि मयैवात्मवन्ति शरीरत्वादेतच्छरीरवत्। शरीरान्तराण्यपि मदविद्याकल्पितानि शरीरत्वात्कार्यत्वाज्जडत्वात्कल्पितत्वाद्वैतच्छरीरवत्। विवादाध्यासितं चेतनजातमहमेव चेतनत्वात्। यदनहं तदचेतनं दृष्टं

8 E reads अभ्युपेतव्यम् for अभ्युपेत्यम्

9. C. reads ज्ञान for अज्ञान before वादिन॰.

12. A. B. om. आदि after आचार्य.

17. B. C. E. read प्रयोगः for प्रयोगाः.

http://acharya.org

यथा घटः । अतः स्वपरविभागो बद्धमुक्तशिष्याचार्यादिव्यवस्थाश्चैकस्याविद्याकल्पिताः ।

द्वैतवादिनापि बद्धमुक्तव्यवस्था दुरुपपादा । अतीतानां कल्पानामानन्त्यात् । एकैकस्मिन्कल्प एकैकमुक्तावपि सर्वेषां मोक्षसंभवादमुक्तानुपपत्तेः । अनन्तत्वादात्मनाममुक्ताश्च सन्तीति चेत् । किमिदमनन्तत्वम् । असंख्येयत्वमिति चेन्न । भूयस्त्वादल्पज्ञैरसंख्येयत्वेपीश्वरस्य सर्वज्ञस्य संख्येया एव । तस्याप्यशक्यत्वे सर्वज्ञत्वं न स्यात् । आत्मनां निःसंख्येयत्वादीश्वरस्याविद्यमानसंख्यावेदनाभावो नासार्वज्ञ्यमावहतीति चेन्न । भिन्नत्वे संख्याविधुरत्वं नोपपद्यते । आत्मानः संख्यावन्तो भिन्नत्वान्माषसर्षपघटपटादिवत् । भिन्नत्वे चात्मनां घटादिवज्जडत्वमनात्मत्वं क्षयित्वं च प्रसज्यते । ब्रह्मणश्चानन्तत्वं न स्यात् । अनन्तत्वं नाम परिच्छेदरहितत्वम् । भेदवादे च वस्त्वन्तराद्विलक्षणत्वेन ब्रह्मणो वस्तुतः परिच्छेदरहितत्वं न शक्यते वक्तुम् । वस्त्वन्तरभाव एव हि वस्तुतः परिच्छेदः । वस्तुतः परिच्छिन्नस्य देशतः कालतश्चापरिच्छिन्नत्वं न युज्यते । वस्त्वन्तराद्विलक्षणत्वेन वस्तुतः परिच्छिन्ना एव हि घटादयो देशतः कालतश्च परिच्छिन्ना दृष्टाः । तथा सर्वे चेतना ब्रह्म च वस्तुतः परिच्छिन्ना देशकालाभ्यामपि परिच्छिद्यन्ते । एवं च सत्यं ज्ञानमनन्तम् (तै. २।१) इत्यादिभिः सर्वप्रकारपरिच्छेदरहि-

---

7. C. om. अपि after तस्य.

9. C. om. न after चेत्.

11. C. om. पट.

15. B. C. read अभाव for भाव°.

16. A. B. read च before न युज्यते.

17. C. reads विलक्षणत्वे for विलक्षणत्वेन; A. B om. हि after एव.

18. B. reads अचेतनाः for चेतनाः.

http://acharya.org

तत्त्वं वदद्भिर्विरोधः। उत्पत्तिविनाशादयश्च जीवानां ब्रह्मणश्च प्रसज्येरन्। कालपरिच्छेद एव ह्युत्पत्तिविनाशभागित्वम्। अत एकस्यैवापरिच्छिन्नस्य ब्रह्मणोविद्याविजृम्भितं ब्रह्मादि स्तम्बपर्यन्तं कृत्स्नं जगत्। सुखदुःखप्रतिसंधानव्यवस्थादयोपि स्वाप्नव्यवस्थावदविद्यास्वाभाव्यादुपपद्यन्ते। तस्मादेकमेव नित्यमुक्तस्वप्रकाशस्वभावमनाद्यविद्यावशाज्जगदाकारेण विवर्तत इति परमार्थतो ब्रह्मव्यतिरिक्ताभावात्तदनन्यत्वं जगत इति।

अत्रोच्यते। निर्विशेषस्वप्रकाशमात्रं ब्रह्मानाद्यविद्यातिरोहितस्वस्वरूपं स्वगतनानात्वं पश्यतीत्येतत्प्रकाशस्वरूपस्य निरंशस्य प्रकाशनिवृत्तिरूपतिरोधाने स्वरूपनाशप्रसङ्गेन तिरोधानासंभवादिभ्यः सकलप्रमाणविरुद्धं स्ववचनविरुद्धं चेति पूर्वमेवोक्तम्।

यत्पुनरुक्तं कारणव्यतिरिक्तं कार्यं युक्तिबाधितत्वेन शुक्तिकारजतादिवद्भ्रम इति तदयुक्तम्। युक्तेरभावात्। यत्त्वनुवर्तमानस्य कारणमात्रस्य सत्यत्वं व्यावर्तमानानां घटशरावादिकार्याणामसत्यत्वमिति तदप्यन्यत्र दृष्टस्यान्यत्र व्यावर्तमानता न बाधिकेत्यादिभिः पूर्वमेव परिहृतम्। यच्चोपलभ्यमानत्वविनाशित्वाभ्यां सदसदनिर्वचनीयत्वेन कार्यस्य मृषात्वमिति तदसत्। उपलब्धिविनाशयोगो हि न मिथ्यात्वं साधयति किंत्वनित्यत्वम्। यद्देशकालसंबन्धितया यदुपलब्धं तद्देशकालसंबन्धितया बाधितत्वमेव हि तस्य मिथ्यात्वे हेतुः। देशान्तरकालान्तरसंबन्धितयोपलब्धस्यान्यदेशकालसंबन्धित्वेन बाधितत्वं देशान्तरकालान्तराव्याप्तिमात्रं साधयति न तु मिथ्या-

---

3. C. reads अपि for एव after एकस्य.

7. A. B. read जगति for जगतः.

10. A. B. read असमवादित्यादिभ्यः for असंभवादिभ्यः.

11 B. om. स्ववचनविरुद्धम्.

त्वम्। प्रतिप्रयोगश्च घटादिकार्यं सत्यं देशकालादिप्रतिपन्नोपाधावबाधितत्वात्। आत्मवत्।

यच्चोक्तं कारणस्वरूपादविकृताद्विकृताच्च कार्योत्पत्तिर्न संभवतीति तदसत्। देशकालादिसहकारिसमवहितात्कारणात्कार्योत्पत्तिसंभवात्। तत्समवधानं च विकृतस्याविकृतस्य च न संभवतीति यदुक्तं तदयुक्तम्। पूर्वमविकृतस्यैव कालादिसमवधानसंभवात्। अविकृतत्वाविशेषात्पूर्वमपि देशकालादिसमवधानं प्रसज्यत इति चेन्न। देशकालादिसमवधानस्य कारणान्तरायत्तस्यैतदायत्तत्वाभावात्। अतो देशकालादिसमवधानरूपविशेषमापन्नं कारणं कार्यमुत्पादयतीति न किंचिदवहीनम्। कारणस्य च कार्यं प्रत्यारम्भकत्वमबाधितं दृश्यमानं न केनापि प्रकारेणापह्नोतुं शक्यते।

यत्तु हेमादिमात्रस्य रुचकादिकार्यस्य तदाश्रयस्य वा हेमादेरारम्भकत्वं न संभवतीति तदयुक्तम्। हेमादिमात्रस्यैव यथोक्तपरिकरयुक्तस्यारम्भकत्वसंभवात्। न चारम्भकहेमव्यतिरिक्तं कार्यं न दृश्यत इति वक्तुं शक्यम्। हेमातिरिक्तस्य स्वस्तिकस्य दर्शनात्। बुद्धिशब्दान्तरादिभिर्वस्त्वन्तरस्य साधितत्वाच्च। न चायं शुक्तिकारजतादिवद्भ्रमः। उत्पत्तिविनाशयोरन्तराल उपलभ्यमानस्य तद्देशकालसंबन्धितया बाधादर्शनात्।

---

5. B. reads कार्योत्पत्तिर्न for कार्योत्पत्ति; B. C. om. च after अविकृतस्य.

6. E. reads अपि before अयुक्तम्.

9. A. B. read तत् for एतत्.

10. A. B. read अपहीनम् for अवहीनम्.

15. C. reads असंभवात् for संभवात्; B. reads हेतु for हेम.

http://acharya.org

न चास्या उपलब्धेर्बाधिका काचिदपि युक्तिर्दृश्यते। प्रागनुपलब्धस्वस्तिकोपलब्धिवेलायामपि हेमप्रत्यभिज्ञा स्वस्तिकाश्रयतया हेम्नोऽप्यनुवृत्तेरविरुद्धा। श्रुतिभिस्तु प्रपञ्चमिथ्यात्वसाधनं पूर्वमेव निरस्तम्। यच्चान्यदत्र प्रत्यक्षविरोधादि प्रतिवक्तव्यं तदपि सर्वं पूर्वमेव सूक्तम्।

यच्चोक्तमेकेनात्मना सर्वाणि शरीराण्यात्मवन्तीति तदसत्। एकस्यैव सर्वशरीरप्रयुक्तसुखदुःखप्रतिसंधानप्रसङ्गात्। सौभरिप्रभृतिषु ह्यात्मैकत्वेनानेकशरीरप्रयुक्तसुखादिप्रतिसंधानमेकस्य दृश्यते। न चाहमर्थस्य ज्ञातृत्वात्तद्भेदात्प्रतिसंधानाभावो नात्मभेदादिति वक्तुं शक्यम्। आत्मा ज्ञातैव। स चाहमर्थ एव। अन्तःकरणभूतस्त्वहंकारो जडत्वात्करणत्वाच्च शरीरेन्द्रियादिवन्न ज्ञातेत्युपपादितत्वात्। यच्च शरीरत्वजडत्वकार्यत्वकल्पितत्वैः सर्वशरीराणामेकस्याविद्याकल्पितत्वमुक्तं तदपि सर्वशरीराणामविद्याकल्पितत्वस्यैवाभावादयुक्तम्। तदभावश्चाबाधितस्य सत्यत्वोपपादनात्। यच्च चेतनादन्यस्य जडत्वदर्शनात्सर्वचेतनानामनन्यत्वमुक्तं तदपि सुखदुःखव्यवस्थया भेदोपपादनादेव निरस्तम्। यत्तु मयैवात्मवन्ति मदविद्याकल्पितान्यहमेव सर्वं चेतनजातमित्यहमर्थस्यैक्यमुपपादितं तदज्ञातस्वसिद्धान्तस्य भ्रान्तिजल्पितम्। अहंत्वमाद्यर्थविलक्षणं चिन्मात्रं ह्यात्मा त्वन्मते।

किं च निर्विशेषचिन्मात्रातिरेकि सर्वं मिथ्येति वदतो मोक्षार्थश्रवणादिप्रयत्नो निष्फलः। अविद्याकार्यत्वात्। शुक्तिकार-

1. C. reads प्रागनुपलब्धे॰ for प्रागनुपलब्ध.

8. B. C. read आत्मैकत्वे for आत्मैकत्वेन.

14. C. reads अबाधित for अबाधितस्य.

15. E. reads सत्यता for सत्यत्व.

http://acharya.org

जतादिषु रजताद्युपादानादिप्रयत्नवत्। मोक्षार्थप्रयत्नो व्यर्थः। कल्पिताचार्यायत्तज्ञानकार्यत्वात्। शुकप्रह्लादवामदेवादिप्रयत्नवत्। तत्त्वमस्यादिवाक्यजन्यं ज्ञानं न बन्धनिवर्तकम्। अविद्याकल्पितवाक्यजन्यत्वात्स्वयमविद्यात्मकत्वादविद्याकल्पितज्ञात्राश्रयत्वात्कल्पिताचार्यायत्तश्रवणजन्यत्वाद्वा। स्वाप्नबन्धनिवर्तकवाक्यजन्यज्ञानवत्। किं च निर्विशेषचिन्मात्रं ब्रह्म मिथ्या। अविद्याकार्यज्ञानगम्यत्वादविद्याकल्पितज्ञात्राश्रितज्ञानगम्यत्वादविद्यात्मकज्ञानगम्यत्वाद्वा। यदेवं तत्तथा यथा स्वाप्नगन्धर्वनगरादि। न च निर्विशेषचिन्मात्रं ब्रह्म स्वयं प्रकाशते येन न प्रमाणान्तरमपेक्षते। यत्त्वात्मसाक्षिकं स्वयंप्रकाशज्ञानं दृश्यते तत्तु ज्ञेयविशेषसिद्धिरूपं ज्ञातृगतमेव दृश्यत इति पूर्वमेवोक्तम्। यानि च तस्य निर्विशेषत्वसाधनानि यौक्तिकानि ज्ञानान्युपन्यस्तानि तानि चानन्तरोक्तैरविद्याकार्यत्वादित्यादिभिरनुमानैर्निरस्तानि। न च निर्विशेषस्य चिन्मात्रस्याज्ञानसाक्षित्वमहंकारादिजगद्भ्रमश्चोपपद्यते। साक्षित्वभ्रमादयोऽपि हि ज्ञातृविशेषगता दृष्टा न ज्ञप्तिमात्रगताः। न च तस्य प्रकाशकत्वं स्वायत्तप्रकाशता वा सिध्यति। प्रकाशो हि नाम कस्यचित्पुरुषस्य कंचनार्थविशेषं प्रति सिद्धिरूपो दृश्यते। तत एव हि तस्य स्वयंप्रकाशतोपपाद्यते भवद्भिरपि। न चातादृशस्य

---

1. E. reads अपि after मोक्षार्थप्रयत्न..
3. A. B. read वाक्यजन्य for वाक्यजन्यम्.
5. A. B. om. वा after श्रवणजन्यत्वात्.
6. A. B. read निवर्तन for निवर्तक
7. C. reads आश्रय for आश्रित.
8. E. reads अविद्याकल्पित for अविद्यात्मक.
18. C. reads प्रकाश for सिद्धि, A. B. read अत एव for तत एव.
19. A. B. read तादृशस्य for अतादृशस्य.

http://acharya.org

निर्विशेषस्य स्वप्रकाशता संभवति । यः पुनः स्वगोष्ठीष्वपरमार्थादपि परमार्थकार्यं दृश्यत इत्युद्घोषः सोपि तानि कार्याणि सर्वाण्यबाधितकल्पानि व्यावहारिकसत्यानि वस्तुतस्त्वविद्यात्मकान्येवेति स्वाभ्युपगमादेव निरस्तः । अस्माभिरपि सर्वत्र परमार्थादेव कारणात्सर्वकार्योत्पत्तिमुपपादयद्भिः पूर्वमेव निरस्तः । न च त्वयैषामनुमानानां श्रुतिविरोधो वक्तुं शक्यते। श्रुतेरप्यविद्याकार्यत्वेनाविद्यात्मकत्वेन चोक्तदृष्टान्तेभ्यो विशेषाभावात् ।

यत्तु ब्रह्मणोपारमार्थिकज्ञानगम्यत्वेपि पश्चात्तनबाधादर्शनाद्ब्रह्म सत्यमेवेति तदसत् । दुष्टकारणजन्यज्ञानगम्यत्वे निश्चिते सति पश्चात्तनबाधादर्शनस्याकिंचित्करत्वात् । यथा शून्यमेव तत्त्वमिति वाक्यजन्यज्ञानस्य पश्चात्तनबाधादर्शनेपि दोषमूलत्वनिश्चयादेव तदर्थस्यासत्यत्वम् । किं च नेह नानास्ति किंचन (बृ. ४।४।१९) । विज्ञानमानन्दं ब्रह्म (बृ.३।९।२८) इति विज्ञानमात्रातिरिक्तस्य कृत्स्नस्य वस्तुजातस्य निषेधकत्वेन सर्वस्मात्परत्वात्पश्चात्तनबाधादर्शनमुच्यते । शून्यमेव तत्त्वमिति तस्याप्यभावं वदतस्तस्मात्परत्वेन पश्चात्तनबाधो दृश्यते। सर्वशून्यतातिरेकिनिषेधासंभवात्तस्यैव पश्चात्तनबाधादर्शनम् । दोषमूलत्वं तु प्रत्यक्षादीनां वेदान्तजन्मनः सर्वशून्यज्ञानस्याप्यविशिष्टम् । अतः सर्वं विज्ञानजातं पारमार्थिकज्ञातृगतं स्वयं च परमार्थभूतमर्थविशेषसिद्धिरूपम् । तत्र किंचिज्ज्ञानं दोषमूलं दोषश्च परमार्थः किंचिच्च निर्दोषं पारमार्थिकसामग्रीजन्यमिति

1. B. C. om. स्व before प्रकाशता.

6. E. reads अनुभूयमानानाम् for अनुमानानाम्.

16. C. om. परत्वात्.

22. C. reads पारमार्थिकम् for पारमार्थिक.

http://acharya.org

यावन्नाभ्युपेयते न तावत्सत्यमिथ्यार्थव्यवस्था लोकव्यवहारश्च सेत्स्यति । लोकव्यवहारो हि पारमार्थिको भ्रान्तिरूपश्च पारमार्थिकज्ञातृगतार्थविशेषसिद्धिरूपप्रकाशपूर्वकः । निर्विशेषसन्मात्रस्य तु पारमार्थिकस्यापारमार्थिकस्य च प्रतिभासादेर्हेतुत्वासंभवाल्लोकव्यवहारो न संभवति ।

यच्च तैर्निरधिष्ठानभ्रमासंभवात्सर्वाध्यासाधिष्ठानस्य सन्मात्रस्य पारमार्थिकत्वमुक्तं तदपि दोषदोषाश्रयत्वज्ञातृत्वज्ञानानामपारमार्थ्येपि भ्रमोपपत्तिवदधिष्ठानापारमार्थ्येपि भ्रमोपपत्तेर्निरस्तम् । अथाधिष्ठानापारमार्थ्ये न क्वचिद्भ्रमो दृष्ट इति सन्मात्रस्य पारमार्थिकत्वमवश्याश्रयणीयमिति मन्यसे हन्त तर्हि दोषदोषाश्रयत्वज्ञातृत्वज्ञानानामपारमार्थ्येपि न क्वचिद्भ्रमो दृष्ट इति दर्शनानुगुण्येन तेषामपि पारमार्थ्यमवश्याश्रयणीयमिति न कश्चिद्विशेषोन्यत्र संरम्भात् ।

यत्तु भेदपक्षेप्यतीतकल्पानामानन्त्यात्सर्वेषामात्मनां मुक्तत्वेन बद्धासंभवाद्बद्धमुक्तव्यवस्था न संभवतीति तदात्मानन्त्येन परिहृतम् । यत्त्वात्मनां भिन्नत्वे माषसर्षपघटादिवत्संख्यावत्त्वमवर्जनीयमिति । तत्र घटादीनामप्यनन्तत्वाद्दृष्टान्तः साध्यविकलः स्यात् । दश घटाः सहस्रं माषा इति संख्यावत्त्वं दृश्यत इति चेत्सत्यम् । तत्तु न घटादिस्वरूपगतमपि तु देशकालाद्युपा-

2 A B read अपि for हि.

4. C reads च after पारमार्थिकस्य.

7. E. reads तु after सन्मात्रस्य.

10. C. reads मन्यते for मन्यसे.

13 A. B. read क्वचित् for कश्चित्.

15 B om. बद्धासभवात्

16. E. reads पट after घट.

http://acharya.org

धिमद्घटादिगतम् । तादृशं तु संख्यावत्त्वमात्मनामप्यभ्युपगच्छामः । न च तावता सर्वमुक्तिप्रसङ्गः । आत्मस्वरूपानन्त्यात् । यत्त्वात्मनां भिन्नत्वे घटादिवज्जडत्वानात्मत्वक्षयित्वप्रसङ्ग इति तदयुक्तम् । एकजातीयानां भेदस्य तज्जातीयानां जात्यन्तरीयत्वानापादकत्वात् । न हि घटानां भेदस्तेषां पटत्वमापादयति । यत्तु भिन्नत्वे वस्तुतः परिच्छेदाद्देशकालाभ्यामपि परिच्छेदो ब्रह्मणः प्रसज्यत इत्यनन्तत्वं ब्रह्मणो न सिध्यतीति तदयुक्तम् । वस्तुतः परिच्छिन्नानामपि देशकालपरिच्छेदस्य न्यूनाधिकभावेनानियमदर्शनाद्देशकालसंबन्धेयत्तायाः प्रमाणान्तरायत्तनिर्णयत्वेन ब्रह्मणः सर्वदेशकालसंबन्धस्यापि प्रमाणान्तरादापततो विरोधाभावात् । वस्तुतः परिच्छेदमात्रादपि सर्वप्रकारपरिच्छेदरहितत्वाभावादानन्त्यासिद्धिरिति चेत्तद्भवतोप्यविद्याविलक्षणत्वं ब्रह्मणोभ्युपयतः समानम् । अतः सतोविद्याविलक्षणत्वाभ्युपगमाद्ब्रह्मणोपि भिन्नत्वेन भेदप्रयुक्ता दोषाः सर्वे तवापि प्रसज्येरन् ।

यद्यविद्याविलक्षणत्वं नाभ्युपेयते तर्ह्यविद्यात्मकमेव ब्रह्म स्यात् । सत्यं ज्ञानमनन्तं ब्रह्म (तै. २।१) इति लक्षणवाक्यमपि तत एवापार्थकं स्यात् । भेदतत्त्वानभ्युपगमे हि स्वपक्षपरपक्षसाधनदूषणादिविवेकाभावात्सर्वमसमञ्जसं स्यात् । आनन्त्य-

---

1. B. reads स्वरूप after घटादि; A. om. अपि after आत्मनाम्.

5. B. C. om. त्व before अनापादकत्वात्, C. E. read अनापादनात् for अनापादकत्वात्; C. E. read घटादीनाम् for घटानाम्.

6. B. C. read अपरिच्छेदः for अपि परिच्छेद.

10. A. B. om. निर्णय.

13. A. B read अभ्युपेयतः for अभ्युपयतः.

16. E. reads अविद्यात्मकत्वमेव ब्रह्मणः for अविद्यात्मकमेव ब्रह्म; B. om. ब्रह्म.

http://acharya.org

प्रसिद्धिश्च देशकालपरिच्छेदरहितत्वमात्रेण । वस्तुतोपि परिच्छेदरहितत्वे तथाविधस्य शशविषाणायमानस्यानुपलब्धेः । भेदवादिनस्तु सर्वचिदचिद्वस्तुशरीरत्वेन ब्रह्मणः सर्वप्रकारत्वात्स्वतः परतोपि परिच्छेदो न विद्यते । तदेवं कारणाद्भिन्नस्य कार्यस्य सत्यत्वाद्ब्रह्मकार्यं कृत्स्नं जगद्ब्रह्मणोन्यदेवेति प्राप्ते प्रचक्ष्महे ।

तदनन्यत्वमारम्भणशब्दादिभ्यः। तस्मात्परमकारणाद्ब्रह्मणोनन्यत्वं जगत आरम्भणशब्दादिभ्यस्तदुपपादयद्भ्योवगम्यते । आरम्भणशब्द आदिर्येषां वाक्यानां तान्यारम्भणशब्दादीनि । वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् (छा. ६।१।१)। सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् (छा. ६।२।१)। तदैक्षत बहु स्यां प्रजायेयेति। तत्तेजोसृजत (छा. ६।२।३)। अनेन जीवेनात्मनानुप्रविश्य (छा. ६।३।२)। सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः (छा. ६।८।६)। ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो (छा. ६।८।७) इत्येतानि प्रकरणान्तरस्थान्यप्येवंजातीयकान्यत्राभिप्रेतानि । एतानि हि वाक्यानि चिदचिदात्मकस्य जगतः परस्माद्ब्रह्मणोनन्यत्वमुपपादयन्ति । तथा हि। स्तब्धोस्युत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम् (छा. ६।१।१) इति कृत्स्नस्य जगतो ब्रह्मैककारणत्वं कारणात्कार्यस्यानन्यत्वं च हृदि निधाय कारणभूतब्रह्मविज्ञानेन कार्यभूतस्य सर्वस्य विज्ञाने प्रतिज्ञाते सति कृत्स्नस्य ब्रह्मैककारणतामजानता शिष्येण कथं नु भगवः स आदेशः (छा. ६।१।१) इत्यन्यज्ञानेनान्यज्ञानासंभवं चोदितो जगतो ब्रह्मै-

1. C. E. read न after मात्रेण.
2. E. reads रहितत्वेन for रहितत्वे; B. reads अप्युपलब्धेः for अनुपलब्धेः.
23. A. E. read ज्ञाततासंभवम् for ज्ञानासभवम्.

http://acharya.org

ककारणतामुपदेक्ष्यँल्लौकिकप्रतीतिसिद्धं कारणात्कार्यस्यानन्यत्वं तावद्यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात् (छा. ६।१।१) इति दर्शयति। यथैकमृत्पिण्डारब्धानां घटशरावादीनां तस्मादनतिरिक्तद्रव्यतया तज्ज्ञानेन ज्ञाततेत्यर्थः। अत्र काणादवादेन कारणात्कार्यस्य द्रव्यान्तरत्वमाशङ्क्य लोकप्रतीत्यैव कारणात्कार्यस्यानन्यतामुपपादयति वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् (छा. ६।१।१) इति। आरभ्यत आलभ्यते स्पृश्यत इत्यारम्भणम्। कृत्यल्युटो बहुलम् (पा. सू. ३।३।११३) इति कर्मणि ल्युट्। वाचा वाक्पूर्वकेण व्यवहारेण हेतुनेत्यर्थः। घटेनोदकमाहरेत्यादिवाक्पूर्वको ह्युदकाहरणादिव्यवहारः। तस्य व्यवहारस्य सिद्ध्ये तेनैव मृद्द्रव्येण पृथुबुध्नोदरत्वादिलक्षणो विकारः संस्थानविशेषस्तत्प्रयुक्तं च घट इत्यादि नामधेयं स्पृश्यते। उदकाहरणादिव्यवहारविशेषसिद्ध्यर्थं मृद्द्रव्यमेव संस्थानान्तरनामधेयान्तरभाग्भवति। अतो घटाद्यपि मृत्तिकेत्येव सत्यं मृत्तिकाद्रव्यमित्येव सत्यं प्रमाणेनोपलभ्यत इत्यर्थः। न तु द्रव्यान्तरत्वेन। अतस्तस्यैव मृद्धिरण्यादेर्द्रव्यस्य संस्थानान्तरभाक्त्वमात्रेण बुद्धिशब्दान्तरादय उपपद्यन्ते। यथैकस्यैव देवदत्तस्यावस्थाविशेषैर्बालो युवा स्थविर इति बुद्धिशब्दान्तरादयः कार्यविशेषाश्च दृश्यन्ते।

---

6. C. E. read अनन्यत्वम् for अनन्यताम्.
12. E. reads आकार after बुध्नोदर
14. A. B. om. अन्तर after नामधेय.
15. B. om. मृत्तिकाद्रव्यमित्येव सत्यम्.
17. E. reads एव after मात्रेण.
18. E. reads एव after शब्दान्तरादयः; A. B. read भेदैः for विशेषैः.
19. B. om. अन्तर after शब्द; C. reads काय for कार्य.

http://acharya.org

यदुक्तं सत्यामेव मृदि घटो नष्ट इति व्यवहारात्कारणादन्यत्कार्यमिति तदुत्पत्तिविनाशादीनां कारणभूतस्यैव द्रव्यस्यावस्थाविशेषत्वाभ्युपगमादेव परिहृतम्। तत्तदवस्थस्य तस्यैव द्रव्यस्य ते ते शब्दास्तानि तानि च कार्याणीति युक्तं द्रव्यस्य तत्तदवस्थत्वं कारकव्यापारायत्तमिति तस्यार्थवत्त्वम्। अभिव्यक्त्यनुबन्धीनि चोद्यानि तस्या अनभ्युपगमादेव परिहृतानि। उत्पत्त्यभ्युपगमेपि सत्कार्यवादो न विरुध्यते। सत एवोत्पत्तेः। विप्रतिषिद्धमिदमभिधीयते पूर्वमेव सत्तदुत्पद्यते चेति। अज्ञातोत्पत्तिविनाशयाथात्म्यस्येदं चोद्यम्। द्रव्यस्योत्तरोत्तरसंस्थानयोगः पूर्वपूर्वसंस्थानसंस्थितस्य विनाशः स्वावस्थस्य तूत्पत्तिः। अतः सर्वावस्थस्य द्रव्यस्य सत्त्वात्सत्कार्यवादो न विरुध्यते। संस्थानस्यासत उत्पत्तावसत्कार्यवादप्रसङ्ग इति चेदसत्कार्यवादिनोप्युत्पत्तेरनुत्पत्तिमत्त्वे सत्कार्यवादप्रसङ्गः। उत्पत्तिमत्त्वे चानवस्था। अस्माकं त्ववस्थानां पृथक्प्रतिपत्तिकार्ययोगानर्हत्वादवस्थावत एवोत्पत्त्यादिकं सर्वमिति निरवद्यम्। कपालत्वचूर्णत्वपिण्डत्वावस्थाप्रहाणेन घटत्वावस्थावदेकत्वावस्थाप्रहाणेन बहुत्वावस्था तत्प्रहाणेनैकत्वावस्था चेति न कश्चिद्विरोधः।

तथा सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् (छा. ६।२।१) इति सदेवेदमिदानीं विभक्तनामरूपत्वेन नानारूपं जगदग्रे नामरूपविभागाभावेनैकमेवासीत्सर्वशक्तित्वेनाधिष्ठात्रन्तरासहतयाद्वितीयं चेत्यनन्यत्वमेवोपपादितम्। तथा त-

---

3. A. B om. त्व after अवस्थाविशेष; B. reads एव, E. एकस्यैव, after तत्तदवस्थस्य.

9. C. om विनाश

10. C. om. पूर्व after पूर्व.

14. C. reads योग after प्रतिपत्ति.

20. E reads एकम् after जगत्.

http://acharya.org

दैक्षत बहु स्यां प्रजायेय (छा. ६।२।३) इति वक्ष्यमाणतेजः-प्रभृतिविविधविचित्रस्थिरत्रसरूपजगत्त्वेनात्मनो बहुभवनं संकल्प्य जगत्सर्गाभिधानात्कार्यभूतस्य जगतः परमकारणात्परस्माद्ब्रह्मणोनन्यत्वमवसीयते । सच्छब्दवाच्यस्यैव परस्य ब्रह्मणः सर्वज्ञस्य सत्यसंकल्पस्य निरवद्यस्यैव सदेवेदमिति निर्देशार्हजगत्त्वं सच्छब्दवाच्यस्य च जगतो नामरूपविभागाभावेनैकत्वमद्वितीयत्वमधिष्ठात्रन्तरनिरपेक्षत्वं पुनरपि तस्यैव विचित्रस्थिरत्रसरूपजगत्त्वेन बहुभवनसंकल्परूपेक्षणं यथासंकल्पं सर्गश्च कथमुपपद्यत इत्याशङ्क्याह सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति तासां त्रिवृतं त्रिवृतम् (छा. ६।३।२-३) इत्यादि । तिस्रो देवता इति कृत्स्नमचिद्वस्तु निर्दिश्य स्वात्मकजीवानुप्रवेशेनैतद्विचित्रनामरूपभाक्करवाणीत्युक्तम् । अनेन जीवेनात्मना मदात्मकजीवेनात्मतयानुप्रविश्यैतद्विचित्रनामरूपभाक्करवाणीत्यर्थः। स्वात्मनो जीवस्य चात्मतयानुप्रवेशकृतं नामरूपभाक्त्वमित्युक्तं भवति। तत्सृष्ट्वा । तदेवानुप्राविशत् । तदनुप्रविश्य । सच्च त्यच्चाभवत् (तै. २।६) इति श्रुत्यन्तरेण स्पष्टं सजीवं जगत्परेण ब्रह्मणात्मतयानुप्रविष्टमिति तदेतत्कार्यावस्थस्य

---

2. C. om. विविध.

4-6. A. C. om. परस्य ब्रह्मणः—वाच्यस्य च.

6. B. reads एव for च before जगतः.

7. E. reads अनपेक्षत्वम् for निरपेक्षत्वम्; E. reads विविध after तस्यैव.

12. C. reads आदि after देवता इति.

14. B. reads स्वात्मक for मदात्मक.

15. A. B. om. च after जीवस्य.

18. A. E. read च after कार्यावस्थस्य.

http://acharya.org

कारणावस्थस्य च चिदचिद्वस्तुनः सकलस्य स्थूलस्य सूक्ष्मस्य च परब्रह्मशरीरत्वं परस्य च ब्रह्मण आत्मत्वमन्तर्यामिब्राह्मणादिषु सिद्धं स्मारितम्। अनेन पूर्वोक्ताशङ्का निरस्ता। अचिद्वस्तुनि सजीवे ब्रह्मण्यात्मतयावस्थिते नामरूपव्याकरणवचनाच्चिदचिद्वस्तुशरीरकं ब्रह्मैव जगच्छब्दवाच्यमिति सदेव सोम्येदमग्र एकमेवासीत् (छा. ६।२।१) इत्यादि सर्वमुपपन्नतरम्। शरीरभूतचिदचिद्वस्तुगताः सर्वे विकाराश्चापुरुषार्थाश्चेति ब्रह्मणो निरवद्यत्वं कल्याणगुणाकरत्वं च सुस्थितम्। तदेतदधिकं तु भेदनिर्देशात् (ब्र. सू. २।१।२२) इत्यनन्तरमेव वक्ष्यति। तथैतदात्म्यमिदं सर्वम् (छा. ६।८।७) इति कृत्स्नस्य चेतनाचेतनस्य ब्रह्मतादात्म्यमुपदिशति। तदेव च तत्त्वमसि (छा. ६।८।७) इति निगमयति। तथा प्रकरणान्तरस्थेष्वपि वाक्येषु सर्वं खल्विदं ब्रह्म (छा. ३।१४।१)। आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम् (बृ. ४।५।६)। इदं सर्वं यदयमात्मा (बृ. २।४।५,४।५।७, नृ. ता. ५)। ब्रह्मैवेदं सर्वम् (नृ. ता. ५)। आत्मैवेदं सर्वम् (नृ. ता. ५) इत्यनन्यत्वं प्रतीयते। तथान्यत्वं च निषिध्यते सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद (बृ. २।४।६,४।५।७)। नेह नानास्ति किंचन (बृ. ४।४।१९)।

मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति।

(का. ४।१०, बृ. ४।४।१९)

---

1. C. om. सकलस्य; B. reads च after सकलस्य; B. C. om च after सूक्ष्मस्य.
4. C. reads जीवे for सजीवे.
5. A. B. C. om. सोम्य.
8. A. B. read गुणात्मकत्वम् for गुणाकरत्वम्.

http://acharya.org

इति । तथा यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् (बृ. २।४।१४,४।५।१५) इत्यविदुषो द्वैतदर्शनं विदुषश्चाद्वैतदर्शनं प्रतिपादयदनन्यत्वमेव तात्त्विकमिति प्रतिपादयति । तदेवमारम्भणशब्दादिभ्यो जगतः परमकारणात्परस्माद्ब्रह्मणोनन्यत्वमुपपद्यते ।

अत्रेदं तत्त्वम् । चिदचिद्वस्तुशरीरतया तत्प्रकारं ब्रह्मैव सर्वदा सर्वशब्दाभिधेयम् । तत्कदाचित्स्वस्मात्स्वशरीरतयापि पृथग्व्यपदेशानर्हसूक्ष्मदशापन्नचिदचिद्वस्तुशरीरं तत्कारणावस्थं ब्रह्म । कदाचिच्च विभक्तनामरूपव्यवहारार्हस्थूलदशापन्नचिदचिद्वस्तुशरीरं तच्च कार्यावस्थमिति कारणात्परस्माद्ब्रह्मणः कार्यरूपं जगदनन्यत् । शरीरभूतचिदचिद्वस्तुनः शरीरिणो ब्रह्मणश्च कारणावस्थायां कार्यावस्थायां च श्रुतिशतसिद्धया स्वभावव्यवस्थया गुणदोषव्यवस्था च न तु दृष्टान्तभावात् (ब्र. सू. २।१।९) इत्यत्रोक्ता ।

ये तु कार्यकारणयोरनन्यत्वं कार्यस्य मिथ्यात्वाश्रयणेन वर्णयन्ति न तेषां कार्यकारणयोरनन्यत्वं सिध्यति । सत्यमिथ्यार्थयोरैक्यानुपपत्तेः । तथा सति ब्रह्मणो मिथ्यात्वं जगतः सत्यत्वं वा स्यात् ।

ये च कार्यमपि पारमार्थिकमभ्युपयन्त एव जीवब्रह्मणोरौपाधिकमन्यत्वं स्वाभाविकं चानन्यत्वमचिद्ब्रह्मणोस्तु द्वयमपि स्वाभाविकमिति वदन्ति तेषामुपाधिब्रह्मव्यतिरिक्तवस्त्वन्तरा-

5. E. reads उपपाद्यते for उपपद्यते.

6. C. reads ब्रह्मैव तत्प्रकारम् for तत्प्रकार ब्रह्मैव.

9. C. om स्थूल.

11. C. reads अन्यत् for अनन्यत्.

13. B. reads व्यवस्थया for व्यवस्था.

http://acharya.org

भावान्निरवयवस्याखण्डितस्य ब्रह्मण एवोपाधिसंबन्धाद्ब्रह्मस्वरूपस्यैव हेयाकारपरिणामाच्च शक्तिपरिणामाभ्युपगमे शक्तेर्ब्रह्मणोनन्यत्वाच्च जीवब्रह्मणोः कर्मवश्यत्वापहतपाप्मत्वादिव्यवस्थावादिन्योचिद्ब्रह्मणोश्च परिणामापरिणामवादिन्यः श्रुतयो व्याकुप्येयुः ।

ये पुनर्निरस्तनिखिलभोक्तृत्वादिविकल्पविप्लवं सर्वशक्तियुक्तं सन्मात्रद्रव्यमेव कारणं ब्रह्म । तच्च प्रलयवेलायां शान्ताशेषसुखदुःखानुभवविशेषं स्वप्रकाशमपि सुषुप्तात्मवदचिद्विलक्षणमवस्थितं सृष्टिवेलायां मृत्तिकाद्रव्यमिव घटशरावादिरूपं समुद्र इव च फेनतरङ्गबुद्बुदादिरूपो भोक्तृभोग्यनियन्तृरूपेणांशत्रयावस्थमवतिष्ठते । अतो भोक्तृत्वभोग्यत्वनियन्तृत्वानि तत्प्रयुक्ताश्च गुणदोषाः शरावत्वघटत्वमणिकत्ववत्तद्गतकार्यभेदवच्च व्यवतिष्ठन्ते । भोक्तृभोग्यनियन्तृणां सदात्मनैकत्वं च घटशरावमणिकादीनां मृदात्मनैकत्ववदुपपद्यते । अतः सन्मात्रमेव द्रव्यं सर्वावस्थावस्थितमिति ब्रह्मणोनन्यज्जगदातिष्ठन्ते । तेषां सकलश्रुतिस्मृतीतिहासपुराणन्यायविरोधः । सर्वा हि श्रुतयः सस्मृती-

---

2. C. om. च after परिणामात्; C. E read शक्तिब्रह्मणोः for शक्तेर्ब्रह्मण'
4. C. reads व्याकुलीभवेयु' for व्याकुप्येयुः.
6. E. reads समस्त after भोक्तृत्वादि.
8. C. reads अविलक्षणम् for अचिद्विलक्षणम्.
10. C om. च after इव.
11. A. B. read भोक्तृभोग्य for भोक्तृत्वभोग्यत्व.
12. C. reads तत् before तद्गत.
13. B. reads भोग्यभोक्तृ for भोक्तृभोग्य, A. B. read सदात्मकत्वम् for सदात्मनैकत्वम्.
14. C. reads सन्मात्रद्रव्यमेव for सन्मात्रमेव द्रव्यम्.
15. B. reads अन्यत् for अनन्यत्.

http://acharya.org

तिहासपुराणाः सर्वेश्वरेश्वरं सदैव सर्वज्ञं सर्वशक्तिं सत्यसंकल्पं निरवद्यं देशकालानवच्छिन्नानवधिकातिशयानन्दं परमकारणं ब्रह्म प्रतिपादयन्ति। न पुनरीश्वरादपि परमीश्वरांशि सन्मात्रम्।

तथा हि सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् (छा. ६।२।१)। तदैक्षत बहु स्यां प्रजायेयेति (छा. ६।२।३)। ब्रह्म वा इदमग्र आसीदेकमेव। तदेकं सन्न व्यभवत्। तच्छ्रेयोरूपमत्यसृजत क्षत्रं यान्येतानि देवक्षत्राणीन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशानः (बृ. १।४।११) इति। आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत्स ऐक्षत लोकान्नु सृजा इति (ऐ. १।१)। एको ह वै नारायण आसीन्न ब्रह्मा नेशानो नेमे द्यावापृथिवी न नक्षत्राणि नापो नाग्निर्न सोमो न सूर्यः स एकाकी न रमते तस्य ध्यानान्तस्थस्य (म. ना. १) इत्यादिभिः परमकारणं सर्वेश्वरेश्वरो नारायण एवेत्यवगम्यते। सद्ब्रह्मात्मशब्दा हि तुल्यप्रकरणस्थास्तत्तुल्यप्रकरणस्थेन नारायणशब्देन विशेषितास्तमेवावगमयन्ति।

तमीश्वराणां परमं महेश्वरं तद्दैवतानां परमं च दैवतम्।
(श्वे. ६।७)

स कारणं करणाधिपाधिपो न तस्य कश्चिज्जनिता न चाधिपः।
(श्वे. ६।९)

इतीश्वरस्यैव कारणत्वं श्रूयते। स्मृतिरपि मानवी ततः स्वयंभूर्भगवान् (मनुस्मृ. १।६) इति प्रकृत्य

---

3. C. reads ईश्वरांशे for ईश्वराशि.
6. C. reads अत्यसृजत् for अत्यसृजत.
7. A. reads देवत्राक्षत्राणि for देवक्षत्राणि.
14. C. reads समान for तुल्य.
16. B. C. om. तद्दैवताना परम च दैवतम्.

http://acharya.org

सोभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः ।
अप एव ससर्जादौ तासु वीर्यमपासृजत् ॥
(म. स्मृ. १।८)

इति । इतिहासपुराणान्यपि पुरुषोत्तममेव परमकारणमभिदधति ।

नारायणो जगन्मूर्त्तिरनन्तात्मा सनातनः ।
स सिसृक्षुः सहस्रांशादसृजत्पुरुषान्द्विधा ॥ (भार.)
विष्णोः सकाशादुद्भूतं जगत्तत्रैव च स्थितम् ।
(वि. पु. १।१।३५)

इत्यादिषु ।

नचेश्वरः सन्मात्रमेवेति वक्तुं शक्यम् । तस्य तदंशत्वाभ्युपगमात्सविशेषत्वाच्च । न च तस्य ज्ञानानन्दाद्यनन्तकल्याणगुणयोगः कादाचित्क इति वक्तुं शक्यते । तेषां स्वाभाविकत्वेन सदातनत्वात् ।

परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ।
(श्वे. ६।८)

यः सर्वज्ञः सर्ववित् (मु. १।१।९,२।२।७) इत्यादिभ्यो ज्ञानानन्दादिशक्तियोग एवास्य स्वाभाविक इति मा वोचः । शक्तिः स्वाभाविकी ज्ञानबलक्रिया च स्वाभाविकीति पृथङ्निर्देशाल्लक्षणाप्रसङ्गाच्च । न च पाचकादिवत्सर्वज्ञ इत्यादिषु शक्तिमात्रे कृत्प्रत्यय इति वक्तुं शक्यम् । कृत्प्रत्ययमात्रस्य शक्तावस्मरणात् । शक्तौ हस्तिकपाटयोः (पा. सू. ३।२।५४) इत्यादिषु केषांचिदेव कृत्प्रत्ययानां शक्तिविषयत्वस्मरणात् । पाचका-

---

2. E. reads अवासृजत् for अपासृजत्.

http://acharya.org

दिषु त्वगत्या लक्षणा समाश्रीयते । किं चेश्वरस्य तदंशविशेषत्वात्तस्य चांशित्वे तरङ्गात्समुद्रस्येवांशादंशिनोधिकत्वात्तमीश्वराणां परमं महेश्वरम् (श्वे. ६।७)। न तत्समश्चाभ्यधिकश्च दृश्यते (श्वे. ६।८) इत्यादीनीश्वरविषयाणि परःशतानि वचांसि बाध्येरन् । किं च सन्मात्रस्य सर्वात्मकत्वेंशित्वे चेश्वरस्य तदंशविशेषत्वात्तस्य सर्वात्मकत्वांशित्वोपदेशा व्याहन्येरन् । न हि मणिकात्मकत्वं तदंशत्वं वा घटशरावादेः । स्वांशेषु सर्वेषु सन्मात्रस्य पूर्णत्वेनेश्वरांशेपि तस्य पूर्णत्वात्तदात्मकानि तदंशाश्चेतराणि वस्तूनीति चेन्न । घटेपि सन्मात्रस्य पूर्णत्वादीश्वरस्यापि घटात्मकत्वात्तदंशत्वप्रसङ्गात् । न च सन्मात्रस्य घटोस्ति पटोस्तीति वस्तुधर्मतयावगतस्य द्रव्यत्वं कारणत्वं चोपपद्यते । व्यवहारयोग्यता हि सत्त्वं विरोधिव्यवहारयोग्यता च तद्यवहारयोग्यस्यासत्त्वम् । द्रव्यमेव सदित्यभ्युपगमे क्रियादीनामसत्त्वप्रसङ्गः । क्रियादिषु काशकुशावलम्बनेपि सर्वत्रैकरूपा सत्ता दुरुपपादा । सदात्मना च सर्वस्याभिन्नत्वे सर्वज्ञत्वेन सर्वस्वभावप्रतिसंधानात्सर्वगुणदोषसंकरप्रसङ्गश्च पूर्वमेवोक्तः । अतो यथोक्तप्रकारमेवानन्यत्वम् ॥ १५ ॥

अथोच्येतैकस्यैवावस्थान्तरयोगेपि बुद्धिशब्दान्तरादयो बालत्वयुवत्वादिषु दृश्यन्ते । मृद्दारुहिरण्यादिषु द्रव्यान्तरत्वेपि दृश्यन्ते । तत्र मृद्धटादिषु कार्यकारणेषु बुद्धिशब्दान्तरादयोवस्थानिबन्धना एवेति कुतो निर्णीयत इति । तत्रोत्तरम् ।

---

1. C. reads सदश for तदश.
2. B. om. अशात्.
9. B. om. इति after वस्तूनि; B. reads घटादिषु for घटेपि.
10. A. B. read घटात्मकत्व for घटात्मकत्वात्.
11. C. reads वा for च after कारणत्वम्.
13. C. om. च before तद्.

http://acharya.org

भावे चोपलब्धेः ॥ १६ ॥

कुण्डलादिकार्यसद्भावे च कारणभूतहिरण्यस्योपलब्धेः । इदं कुण्डलं हिरण्यमिति हिरण्यत्वेन प्रत्यभिज्ञानादित्यर्थः । न चैवं हिरण्यादिषु द्रव्यान्तरेषु मृदादय उपलभ्यन्ते । अतो बाल्युवादिवत्कारणभूतमेव द्रव्यमवस्थान्तरापन्नं कार्यमिति गीयते । द्रव्यान्तरवादिनाप्यभ्युपेतेनावस्थान्तरयोगेन बुद्धिशब्दान्तरादिषूपपन्नेष्वनुपलब्धद्रव्यान्तरकल्पनानुपपत्तेश्च । न च जातिनिबन्धनेयं प्रत्यभिज्ञा । जात्याश्रयभूतद्रव्यान्तरानुपलब्धेः । एकमेव हि हेमजातीयं द्रव्यं कार्यकारणोभयावस्थं दृश्यते । न च द्रव्यभेदे समवायिकारणानुवृत्त्या कार्ये प्रतिसंधानमिति वक्तुं शक्यम् । द्रव्यान्तरत्वे सत्ताश्रयानुवृत्तिमात्रेण तदाश्रिते द्रव्यान्तरे प्रतिसंधानानुपलब्धेः । गोमयादिकार्ये वृश्चिकादौ गोमयादिप्रतिसंधानं न दृश्यत इति चेन्न । तत्राप्यादिकारणभूतपृथिवीद्रव्यप्रत्यभिज्ञानात् । अग्निकार्ये धूमेऽग्निप्रत्यभिज्ञानं न दृश्यत इति चेद्भवतु न तत्र प्रत्यभिज्ञानम् । तथापि न दोषः । [illegible]र्निमित्तकारणमात्रत्वात् । अग्निसंयुक्तार्द्रेन्धनाद्धि धूमो जायते । गन्धैक्याच्चार्द्रेन्धनकार्यमेव धूमः । अतः का-

---

2 E. reads कारणभूतस्य for कारणभूत

4. C. reads त्व after बाल.

7 B. reads द्रव्यत्व तत् for द्रव्यान्तर; C. reads अजाति for जाति after न च.

8. B reads द्रव्यत्व for जाति.

9. C. om. हि after एव.

11. A, B. read तदाश्रित for तदाश्रिते

13 C, E. read आद्य for आदि before कारण.

15. B. reads न after चेत्; C. reads भवतु after प्रत्यभिज्ञानम् instead of after चेद्.

र्थभावे च तदेवेदमित्युपलब्धेर्बुद्धिशब्दान्तरादयोवस्थाभेदमात्रनिबन्धना इत्यवगम्यते । तस्मात्कारणादनन्यत्कार्यम् ॥ १६ ॥

इतश्च

सत्त्वाच्चापरस्य ॥ १७ ॥

अपरस्य कार्यस्य कारणे सत्त्वाच्च कारणात्कार्यस्यानन्यत्वम् । लोकवेदयोर्हि कार्यमेव कारणतया व्यपदिश्यते । यथा लोके सर्वमिदं घटशरावादिकं पूर्वाह्णे मृत्तिकैवासीदिति । वेदे च सदेव सोम्येदमग्र आसीत् (छा. ६।२।१) इति ॥ १७ ॥

असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषाद्युक्तेः शब्दान्तराच्च ॥ १८ ॥

यदुक्तं कारणे कार्यस्य सत्त्वं लोकवेदाभ्यामवगम्यत इति तदयुक्तम् । असद्व्यपदेशात् । असदेवेदमग्र आसीत् (छा. ३।१९।१,६।२।१) । असद्वा इदमग्र आसीत् (तै. २।७) । इदं वाग्रे नैव किंचनासीत् (बृ. १।२।१) इति । लोके च सर्वं घटशरावादिकं पूर्वाह्णे नासीदिति । अतो यथोक्तं नोपपद्यत इति चेत्तन्न । धर्मान्तरेण तथा व्यपदेशात् । स खल्वसद्व्यपदेशस्तस्यैव कार्यद्रव्यस्य पूर्वकाले धर्मान्तरेण संस्थानान्तरेण न भवदभिप्रेतेन तुच्छत्वेन । सत्त्वासत्त्वे हि द्रव्यधर्मावित्युक्तम् । तत्र सत्त्वधर्माद्धर्मान्तरमसत्त्वम् । इदंशब्दनिर्दिष्टस्य जगतः सत्त्वधर्मो नामरूपे । असत्त्वधर्मस्तु तद्विरोधिनी सूक्ष्मावस्था । अतो जगतो नामरूपयुक्तस्य तद्विरोधिसूक्ष्मदशापत्तिरसत्त्वम् ।

कथमिदमवगम्यते । वाक्यशेषाद्युक्तेः शब्दान्तराच्च । वा-

---

13. A. B. om. असद्वा इदमग्र आसीत्.

http://acharya.org

क्यशेषस्तावदिदं वाग्रे नैव किंचनासीत् (बृ. १।२।१) इत्यत्र तदसदेव सन्मनोकुरुत तस्यामिति (बृ. १।२।१) इति । अनेन वाक्यशेषगतेन मनस्कारलिङ्गेनासच्छब्दार्थे तुच्छातिरिक्ते निश्चिते तदैकार्थ्यादसदेवेदम् (छा. ३।१९।१,६।२।१) इत्यादिष्वप्यसच्छब्दस्यायमेवार्थ इति निश्चीयते । युक्तेश्चासत्त्वस्य धर्मान्तरत्वमवगम्यते । युक्तिर्हि सत्त्वासत्त्वे पदार्थधर्माववगमयति । मृद्द्रव्यस्य पृथुबुध्नोदराकारयोगो घटोस्तीतिव्यवहारहेतुः । तस्यैव तद्विरोध्यवस्थान्तरयोगो घटो नास्तीतिव्यवहारहेतुः । तत्र कपालाद्यवस्थायास्तद्विरोधित्वेन सैव घटाद्यवस्थस्य नास्तीतिव्यवहारहेतुः । न च तद्व्यतिरिक्तो घटाभावो नाम कश्चिदुपलभ्यते । न च कल्प्यते । तावतैवाभावव्यवहारोपपत्तेः । तथा शब्दान्तराच्च पूर्वकाले धर्मान्तरयोग एवावगम्यते । शब्दान्तरं च पूर्वोदाहृतं सदेव सोम्येदमग्र आसीत् (छा. ६।२।१) इत्यादिकम् । तत्र हि कुतस्तु खलु सोम्यैवं स्यात् (छा. ६।२।२) इति तुच्छत्वमाक्षिप्य सत्त्वेव सोम्येदमग्र आसीत् (छा. ६।२।२) इति स्थापितम् । तद्धेदं तर्ह्यव्याकृतमासीत् । तन्नामरूपाभ्यां व्याक्रियत (बृ. १।४।७) इति सुस्पष्टमुक्तम् ॥ १८ ॥

इदानीं कार्यस्य कारणादनन्यत्वे निदर्शनद्वयं द्वाभ्यां सूत्राभ्यां दर्शयति ।

---

2. E. om. सत् after एव.

7. C. reads आकारः for आकारयोगः.

11. E. reads तत् after न च; B. reads कल्पते for कल्प्यते.

12. C. reads शब्दान्तर for धर्मान्तर.

16. E. reads व्यव before स्थापितम्.

http://acharya.org

पटवच्च ॥ १९ ॥

यथा तन्तव एव व्यतिषङ्गविशेषभाजः पट इति नामरूपकार्यान्तरादिकं भजन्ते तद्वद्ब्रह्मापि ॥ १९ ॥

यथा च प्राणादिः ॥ २० ॥

यथा च वायुरेक एव शरीरे वृत्तिविशेषं भजमानः प्राणापानादिनामरूपकार्यान्तराणि भजते तद्वद्ब्रह्मैकमेव विचित्रस्थिरत्रसरूपं जगद्भवतीति परमकारणात्परस्माद्ब्रह्मणोनन्यत्वं जगतः सिद्धम् ॥ २० ॥ आरम्भणाधिकरणं समाप्तम् । (६)

इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॥ २१ ॥

जगतो ब्रह्मानन्यत्वं प्रतिपादयद्भिस्तत्त्वमसि (छा. ६।८।७)। अयमात्मा ब्रह्म (बृ. २।५।१९) इत्यादिभिर्जीवस्यापि ब्रह्मानन्यत्वं व्यपदिश्यत इत्युक्तम् । तत्रेदं चोद्यते । यदीतरस्य जीवस्य ब्रह्मभावोमीभिर्वाक्यैर्व्यपदिश्यते तदा ब्रह्मणः सार्वज्ञ्यसत्यसंकल्पत्वादियुक्तस्यात्मनो हितरूपजगदकरणमहितरूपजगत्करणमित्यादयो दोषाः प्रसज्येरन् । आध्यात्मिकाधिदैविकाधिभौतिकानन्तदुःखाकरं चेदं जगत् । न चेदृशे स्वानर्थे स्वाधीनो बुद्धिमान्प्रवर्तते । जीवाद्ब्रह्मणो भेदवादिन्यः श्रुतयो जगद्ब्रह्मणोरनन्यत्वं वदता त्वयैव परित्यक्ताः । भेदे सत्यनन्यत्वासिद्धेः । औपाधिकभेदविषया भेदश्रुतयः स्वाभाविकाभेदविषयाश्चाभेदश्रुतय इति चेत्तत्रेदं वक्तव्यम् । स्वभावतः स्वस्मादभिन्नं जीवं किमनुपहितं जगत्कारणं ब्रह्म जानाति वा न वा ।

---

3. A. B. read भजन्ति for भजन्ते.

5. B. C read वा for च after यथा

6. E. reads आदि after नामरूप.

21. C. reads अभिन्नजीव- for अभिन्न जीवम्; C. om. वा after जानाति.

http://acharya.org

न जानाति चेत्सर्वज्ञत्वहानिः । जानाति चेत्स्वस्मादभिन्नस्य जीवस्य दुःखं स्वदुःखमिति जानतो ब्रह्मणो हिताकरणाहितकरणादिदोषप्रसक्तिरनिवार्या । जीवब्रह्मणोरज्ञानकृतो भेदस्तद्विषया भेदश्रुतिरिति चेत्तत्रापि जीवाज्ञानपक्षे पूर्वोक्तो विकल्पस्तत्फलं च तदवस्थम् । ब्रह्माज्ञानपक्षे स्वप्रकाशस्वरूपस्य ब्रह्मणोज्ञानसाक्षित्वं तत्कृतजगत्सृष्टिश्च न संभवति । अज्ञानेन प्रकाशस्तिरोहितश्चेत्तिरोधानस्य प्रकाशनिवृत्तिकरत्वेन प्रकाशस्यैव स्वरूपत्वात्स्वरूपनिवृत्तिरेवेति स्वरूपनाशादिदोषसहस्रं प्रागेवोदीरितम् । अत इदमसंगतं ब्रह्मणो जगत्कारणत्वम् ॥ २१ ॥

इति प्राप्तेभिधीयते ।

अधिकं तु भेदनिर्देशात् ॥ २२ ॥

तुशब्दः पक्षं व्यावर्तयति । आध्यात्मिकादिदुःखयोगार्हात्प्रत्यगात्मनोधिकमर्थान्तरभूतं ब्रह्म । कुतः । भेदनिर्देशात् । प्रत्यगात्मनो हि भेदेन निर्दिश्यते परं ब्रह्म । य आत्मनि तिष्ठन्नात्मनोन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्मान्तर्याम्यमृतः (बृ. ३।७।२२) ।

पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति ।
(श्वे. १।६)

स कारणं करणाधिपाधिपः । (श्वे. ६।९)

तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योभिचाकशीति ।
(मु. ३।१।१, श्वे. ४।६)

ज्ञाज्ञौ द्वावजावीशानीशौ (श्वे. १।९) । प्राज्ञेनात्मना संपरिष्वक्तः (बृ. ४।३।२१) । प्राज्ञेनात्मनान्वारूढः (बृ.४।३।३५)।

---

4. E. reads अत्रापि for तत्रापि.

5. B. reads ब्रह्मज्ञान for ब्रह्माज्ञान.

http://acharya.org

अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया संनिरुद्धः। (श्वे. ४।९)

प्रधानक्षेत्रज्ञपतिर्गुणेशः । (श्वे. ६।१६)

नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् । (श्वे. ६।१३)

योऽव्यक्तमन्तरे संचरन्यस्याव्यक्तं शरीरं यमव्यक्तं न वेद । योक्षरमन्तरे संचरन्यस्याक्षरं शरीरं यमक्षरं न वेद । यो मृत्युमन्तरे संचरन्यस्य मृत्युः शरीरं यं मृत्युर्न वेद । एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायणः । (सुबा. १५) इत्यादिभिः ॥ २२ ॥

अश्मादिवच्च तदनुपपत्तिः ॥ २३ ॥

अश्मकाष्ठलोष्टतृणादीनामत्यन्तहेयानां सततविकारास्पदानामचिद्विशेषाणां निरवद्यनिर्विकारनिखिलहेयप्रत्यनीककल्याणैकतानस्वेतरसमस्तवस्तुविलक्षणानन्तज्ञानानन्दैकस्वरूपनानाविधानन्तमहाविभूतिब्रह्मस्वरूपैक्यं यथा नोपपद्यते तथा चेतनस्याप्यनन्तदुःखयोगार्हस्य खद्योतकल्पस्यापहतपाप्मा (छा. ८।१।५) इत्यादिवाक्यावगतसकलहेयप्रत्यनीकानवधिकातिशयासंख्येयकल्याणगुणाकरब्रह्मभावानुपपत्तिः । सामानाधिकरण्यनिर्देशो यस्यात्मा शरीरम् (बृ. ३।७।२२) इत्यादिश्रुतेर्जीवस्य ब्रह्मशरीरत्वाद्ब्रह्मणो जीवशरीरतया तदात्मत्वेनावस्थितेर्जीवप्रकारब्रह्मप्रतिपादनपरश्चैतदविरोधी । प्रत्युतैतस्यार्थस्योपपादकश्चेत्यवस्थितेरिति काशकृत्स्नः (ब्र. सू. १।४।२२) इत्यादिभिरसकृदुपपादितम् । अतः सर्वावस्थं ब्रह्म चिदचिद्वस्तुशरीरमिति सूक्ष्मचिदचिद्वस्तुशरीरं ब्रह्म कारणं तदेव ब्रह्म स्थू-

---

7-8. C. om. यो मृत्यु०... वेद.

14. C. reads स्व before स्वरूप.

http://acharya.org

त्वचिदचिद्वस्तुशरीरं जगदाख्यं कार्यमिति जगद्ब्रह्मणोः सामानाधिकरण्योपपत्तिः । जगतो ब्रह्मकार्यत्वं ब्रह्मणोनन्यत्वमचिद्वस्तुनो जीवस्य च ब्रह्मणश्च परिणामित्वदुःखित्वकल्याणगुणाकरत्वस्वभावासंकरः सर्वश्रुत्यविरोधश्च भवति । सदेव सोम्येदमग्र आसीदेकमेव (छा. ६।२।१) इत्यविभागावस्थायामचिद्युक्तजीवस्य ब्रह्मशरीरतया सूक्ष्मरूपेणावस्थानमवश्याभ्युपगन्तव्यम् । वैषम्यनैर्घृण्ये न सापेक्षत्वात् । न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च (ब्र. सू. २।१।३४–३५) इति सूत्रद्वयोदितत्वात्तदानीमपि सूक्ष्मरूपेणावस्थानस्य । अविभागस्तु नामरूपविभागाभावादुपपद्यते । अतो ब्रह्मकारणत्वं संभवत्येव ।

ये तु पुनरस्यैव जीवस्याविद्यावियुक्तावस्थामभिप्रेत्येमं भेदं वर्णयन्ति तेषामिदं सर्वमसंगतं स्यात् । न हि तदवस्थस्य सर्वज्ञत्वं सर्वेश्वरत्वं समस्तकारणत्वं सर्वात्मकत्वं सर्वनियन्तृत्वमित्यादीनि सन्ति । अनेनैव रूपेण ह्याभिः श्रुतिभिः प्रत्यगात्मनो भेदः प्रतिपाद्यते । तस्य सर्वस्याविद्यापरिकल्पितत्वात् । तत्सर्वं ह्यविद्यापरिकल्पितं त्वन्मते । न चाविद्यापरिकल्पितस्याविद्यावस्थायां शुक्तिकारजतादिभेदवत्परस्परभेदोत्र सूत्रकारेणाधिकं तु भेदनिर्देशात् (ब्र. सू. २।१।२२) इत्यादिषु प्रतिपाद्यते । ब्रह्मजिज्ञासा कर्तव्येति जिज्ञास्यतया प्रक्रान्तस्य ब्रह्मणो जग-

---

4. C. reads संकरः for असंकरः.

5. C. reads अपि after अवस्थायाम्.

12. C. reads न ये for ये तु; B. reads येन for ये; E. om. तु; E. reads एवम् for इमम्.

14. A. B. om. सर्वेश्वरत्वम्.

16. B. om. तस्य सर्वस्याविद्यापरिकल्पितत्वात्; A. reads तत्सर्वस्य for तस्य सर्वस्य.

16–18. C. om. भेदः...शुक्तिकारजतादि.

http://acharya.org

जन्मादिकारणस्य वेदान्तवेद्यत्वं तस्य च स्मृतिन्यायविरोधपरिहारश्च क्रियते । अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् । न तु दृष्टान्तभावात् (ब्र. सू. २।१।८-९) इति सूत्रद्वयमेतदधिकरणसिद्धमनुवदति । तत्र हि विलक्षणयोः कार्यकारणभावसंभव एवाधिकरणार्थः । असदिति चेन्न प्रतिषेधमात्रत्वात् (ब्र.सू. २। १।७) इति च पूर्वाधिकरणस्थमनुवदति ॥ २३ ॥ इतरव्यपदेशाधिकरणं समाप्तम् । (७)

उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि ॥ २४ ॥

परस्य ब्रह्मणः सर्वज्ञस्य सत्यसंकल्पस्य स्थूलसूक्ष्मावस्थसर्वचेतनाचेतनवस्तुशरीरतया सर्वप्रकारत्वेन सर्वात्मकत्वं सकलेतरविलक्षणत्वं चाविरुद्धमिति स्थापितम् । इदानीं सर्वज्ञस्य सत्यसंकल्पस्य परस्य ब्रह्मणः संकल्पमात्रेण विचित्रजगत्सृष्टियोगो न विरुद्ध इति स्थाप्यते । ननु च परिमितशक्तीनां कारककलापोपसंहारसापेक्षत्वदर्शनेनैव सर्वशक्तेर्ब्रह्मणः कारककलापानुपसंहारेण जगत्कारणत्वविरोधः कथमाशङ्क्यते । उच्यते । लोके तत्तत्कार्यजननशक्तियुक्तस्यापि तत्तदुपकरणापेक्षित्वदर्शनात्सर्वशक्तियुक्तस्य परस्य ब्रह्मणोपि तत्तदुपकरणविरहिणः स्रष्टृत्वं नोपपद्यत इति कस्यचिन्मन्दधियः शङ्का जायत इति सा निराक्रियते । घटपटादिकारणभूतानां कुलालकुविन्दादीनां तज्जननसामर्थ्ये सत्यपि कानिचिदुपकरणान्युपसंहृत्यैव जनयितृत्वं दृश्यते । तज्जननाशक्ताः कारककलापोपसंहारेपि जनयितुं

---

4. B. reads भावः for भावसंभव-, C. reads असंभवः for संभवः.

10. A. B. read सर्वात्मत्वम् for सर्वात्मकत्वम्.

11. C. om सर्वज्ञस्य

14. C. om. एव after दर्शनेन.

16. C. reads अपेक्षत्व for अपेक्षित्व.

20. E. reads तत् after तत्.

http://acharya.org

न शक्नुवन्ति । शक्ताः पुनः कारककलापोपसंहारे जनयन्तीत्येतावानेव विशेषः । ब्रह्मणोपि सर्वशक्तेः सर्वस्य जनयितृत्वं तदुपकरणानामनुपसंहारे नोपपद्यते । प्राक्सृष्टेश्चासहायत्वं सदेव सोम्येदमग्र आसीत् (छा. ६।२।१) । एको ह वै नारायण आसीत् (महा. १) इत्येवमादिषु प्रतीयते । अतः स्रष्टृत्वं नोपपद्यत इत्येवं प्राप्तम् । तदिदमाशङ्कते । उपसंहारदर्शनान्नेति चेदिति ।

परिहरति । न क्षीरवद्धीति । न सर्वेषां कार्यजननशक्तानामुपसंहारसापेक्षत्वमस्ति । यथा क्षीरजलादेर्दधिहिमजननशक्तस्य तज्जनने । एवं ब्रह्मणोपि स्वयमेव सर्वजननशक्तेः सर्वस्य जनयितृत्वमुपपद्यते । हीति प्रसिद्धवन्निर्देशश्चोद्यस्य मन्दताख्यापनाय । क्षीरादिष्वातञ्चनाद्यपेक्षा न दध्यादिभावाय । अपि तु शैघ्र्यार्थं रसविशेषार्थं वा ॥ २४ ॥

देवादिवदपि लोके ॥ २५ ॥

यथा देवादयः स्वे स्वे लोके संकल्पमात्रेण स्वापेक्षितानि सृजन्ति तथासौ पुरुषोत्तमः कृत्स्नं जगत्संकल्पमात्रेण सृजति । देवादीनां वेदावगतशक्तीनां दृष्टान्ततयोपादानं ब्रह्मणो वेदावगतशक्तेः सुखग्रहणायेति प्रतिपत्तव्यम् ॥ २५ ॥ उपसंहारदर्शनाधिकरणं समाप्तम् । (८)

---

1. A. B. om. पुनः; C. om. इति after जनयन्ति.
8. B. C. om. इति after क्षीरवद्धि.
9. A. reads हैम for हिम.
12. E. reads सा before न.
13. E. reads च for वा.
15. C. reads स्व before संकल्प.

http://acharya.org

कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा ॥ २६ ॥

सदेव सोम्येदमग्र आसीत् (छा. ६।२।१)। इदं वाग्रे नैव किंचनासीत् (बृ. १।२।१)। आत्मा वा इदमेक एवाग्र आसीत् (ऐ. १।१) इत्यादिषु कारणावस्थायां ब्रह्मैकमेव निरवयवमासीदिति कारणावस्थायां निरस्तचिदचिद्विभागतया निरवयवं ब्रह्मैवासीदित्युक्तम्। तदविभागमेकं निरवयवमेव ब्रह्म बहु स्यामिति संकल्प्याकाशवाय्वादिविभागं ब्रह्मादिस्तम्बपर्यन्तक्षेत्रज्ञविभागं चाभवदिति चोक्तम्। एवं सति तदेव परं ब्रह्म कृत्स्नं कार्यत्वेनोपयुक्तमित्यभ्युपगन्तव्यम्। अथ चिदंशः क्षेत्रज्ञविभागविभक्तोचिदंशश्चाकाशादिविभागविभक्त इत्युच्यते तदा सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् (छा. ६।२।१)। ब्रह्मैकमेव (बृ. १।४।११)। आत्मैक एव (बृ. १।४।१७) इत्येवमादयः कारणभूतस्य ब्रह्मणो निरवयवत्ववादिनः शब्दाः कुप्येयुर्बाधिता भवेयुः। यद्यपि सूक्ष्मचिदचिद्वस्तुशरीरं ब्रह्म कारणं स्थूलचिदचिद्वस्तुशरीरं ब्रह्म कार्यमित्यभ्युपगम्यते तथापि शरीर्यंशस्यापि कार्यत्वाभ्युपगमादुक्तदोषो दुर्वारः। तस्य निरवयवस्य बहुभवनं च नोपपद्यते। कार्यत्वानुपयुक्तांशस्थितिश्च नोपपद्यते। तस्मादसमञ्जसमेवाभाति। अतो ब्रह्मकारणत्वं नोपपद्यते ॥ २६ ॥

इत्याक्षिप्ते समाधत्ते।

श्रुतेस्तु शब्दमूलत्वात् ॥ २७ ॥

तुशब्द उक्तदोषं व्यावर्तयति। नैवमसामञ्जस्यम्। कुतः। श्रुतेः। श्रुतिस्तावन्निरवयवत्वं ब्रह्मणस्ततो विचित्रसर्गं चाह।

---

7. C. reads पर्यन्तम् for पर्यन्त.

15. B. reads ब्रह्मणः for ब्रह्म before कार्यम्.

18. C. reads इव for एव.

http://acharya.org

श्रौतेऽर्थे यथाश्रुति प्रतिपत्तव्यमित्यर्थः । ननु श्रुतिरप्यग्निना सिञ्चेदितिवत्परस्परान्वयायोग्यमर्थं प्रतिपादयितुं न समर्थात आह । शब्दमूलत्वादिति । शब्दैकप्रमाणकत्वेन सकलेतरवस्तुविसजातीयत्वादस्यार्थस्य विचित्रशक्तियोगो न विरुध्यत इति न सामान्यतो दृष्टं साधनं दूषणं वार्हति ब्रह्म ॥ २७ ॥

आत्मनि चैवं विचित्राश्च हि ॥ २८ ॥

किं चैवं वस्त्वन्तरसंबन्धिनो धर्मस्य वस्त्वन्तरे चारोपणे सत्यचेतने घटादौ दृष्टा धर्मास्तद्विसजातीये चेतने नित्य आत्मन्यपि प्रसज्यन्ते । तदप्रसक्तिश्च भावस्वभाववैचित्र्यादित्याह । विचित्राश्च हीति । यथाग्निजलादीनामन्योन्यविसजातीयानामौष्ण्यादिशक्तयश्च विसजातीया दृश्यन्ते तद्वल्लोकदृष्टसर्वविसजातीये परे ब्रह्मणि तत्र तत्रादृष्टाः सहस्रशः शक्तयः सन्तीति न किंचिदनुपपन्नम् । यथोक्तं भगवता पराशरेण ।

निर्गुणस्याप्रमेयस्य शुद्धस्याप्यमलात्मनः ।
कथं सर्गादिकर्तृत्वं ब्रह्मणोभ्युपगम्यते ॥ (वि. पु. १।३।१)

इति सामान्यदृष्ट्या परिचोद्य

शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः ।
यतोतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः ।
भवन्ति तपतां श्रेष्ठ पावकस्य यथोष्णता ॥ (वि.पु.१।३।२-३)

इति । श्रुतिश्च

किंस्विद्वनं क उ स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुः ।
मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन् ॥

---

4. C. reads सर्व for अर्थस्य; B. om. न before विरुध्यते; C. reads विरुद्धः for विरुध्यते.

8. C. reads पटादौ for घटादौ.

12. C. om. one तत्र.

http://acharya.org

ब्रह्म वनं ब्रह्म स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुः ।
मनीषिणो मनसा विब्रवीमि वो ब्रह्माध्यतिष्ठद्भुवनानि धारयन् ॥
(तै. ब्रा. २।८।९)

इति । सामान्यतो दृष्टं चोद्यं सर्ववस्तुविलक्षणे परे ब्रह्मणि नावतरतीत्यर्थः ॥ २८ ॥

इतश्च

स्वपक्षदोषाच्च ॥ २९ ॥

स्वपक्षे प्रधानादिकारणवादे लौकिकवस्तुविसजातीयत्वाभावेन प्रधानादेर्लोकदृष्टा दोषास्तत्र भवेयुरिति सकलेतरविलक्षणं ब्रह्मैव कारणमभ्युपगन्तव्यम् । प्रधानं च निरवयवम् । तस्य निरवयवस्य कथमिव महदादिविचित्रजगदारम्भ उपपद्यते । सत्त्वं रजस्तम इति तस्यावयवा विद्यन्त इति चेत् । तत्रेदं विवेचनीयम् । किं सत्त्वरजस्तमसां समूहः प्रधानमुत सत्त्वरजस्तमोभिरारब्धं प्रधानम् । अनन्तरे कल्पे प्रधानं कारणमिति स्वाभ्युपगमविरोधः । स्वाभ्युपेतसंख्याविरोधश्च । तेषामपि निरवयवानां कार्यारम्भविरोधश्च । समूहपक्षे च तेषां निरवयवत्वेन प्रदेशभेदमनपेक्ष्य संयुज्यमानानां न स्थूलद्रव्यारम्भकत्वसिद्धिः । परमाणुकारणवादेपि तथैव । अणवो हि निरंशा निष्प्रदेशाः प्रदेशभेदमनपेक्ष्य परस्परं संयुज्यमाना अपि न स्थूलकार्यारम्भाय प्रभवेयुः ॥ २९ ॥

सर्वोपेता च तद्दर्शनात् ॥ ३० ॥

सकलेतरवस्तुविसजातीया परा देवता सर्वशक्त्युपेता च । तथैव परां देवतां दर्शयन्तीह श्रुतयः ।

---

11. E. reads प्रधानस्य after निरवयवस्य.
23. C. om. इह.

http://acharya.org

परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च। (श्वे. ६।८) तथापहतपाप्मा विजरो विमृत्युर्विशोकोविजिघत्सोपिपासः (छा. ८।१।५) इति सकलेतरविसजातीयतां परस्या देवतायाः प्रतिपाद्य सत्यकामः सत्यसंकल्पः (छा. ८।१।५) इति सर्वशक्तियोगं प्रतिपादयन्ति। तथा मनोमयः प्राणशरीरो भारूपः सत्यसंकल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोवाक्यनादरः (छा. ३।१४।२) इति च॥ ३०॥

विकरणत्वान्नेति चेत्तदुक्तम्॥ ३१॥

यद्यप्येकमेव ब्रह्म सकलेतरविलक्षणं सर्वशक्ति तथापि न तस्य कार्यं करणं च विद्यते (श्वे. ६।८) इति करणविरहिणस्तस्य न कार्यारम्भः संभवतीति चेत्। तत्रोत्तरं शब्दमूलत्वाद्विचित्राश्च हीत्युक्तम्। शब्दैकप्रमाणकं सकलेतरविलक्षणं तत्तत्करणविरहेणापि तत्तत्कार्यसमर्थमित्यर्थः। तथा च श्रुतिः पश्यत्यचक्षुः स शृणोत्यकर्णः (श्वे. ३।१९)। अपाणिपादो जवनो ग्रहीता (श्वे. ३।१९) इत्येवमाद्या॥ ३१॥ कृत्स्नप्रसक्त्यधिकरणं समाप्तम्। (९)

न प्रयोजनवत्त्वात्॥ ३२॥

यद्यपीश्वरः प्राक्सृष्टेरेक एव सन्सकलेतरविलक्षणत्वेन सर्वार्थशक्तियुक्तः स्वयमेव विचित्रं जगत्स्रष्टुं शक्नोति तथा-

---

7. A. E. read सत्यकामः after भारूपः; A. B. om. सर्वकर्मा.

9. C. om. च.

13. C. reads कार्यारम्भसंभवः for कार्यारम्भः संभवति.

21. E. reads एवम् for एव after स्वयम्; C. om. वि before चित्रम्.

http://acharya.org

पीश्वरस्य कारणत्वं न संभवति । प्रयोजनवत्त्वाद्विचित्रसृष्टेः । ईश्वरस्य च प्रयोजनाभावात् । बुद्धिपूर्वकारिणामारम्भे द्विविधं हि प्रयोजनं स्वार्थः परार्थो वा । न हि परस्य ब्रह्मणः स्वभावत एवावाप्तसमस्तकामस्य जगत्सर्गेण किंचन प्रयोजनमनवाप्तमवाप्यते । नापि परार्थः । आप्तसमस्तकामस्य परार्थता हि परानुग्रहेण भवति । न चेदृशगर्भजन्मजरामरणनरकादिनानाविधानन्तदुःखबहुलं जगत्करुणावान्सृजति । प्रत्युत सुखैकतानमेव सृजेज्जगत्करुणया सृजन् । अतः प्रयोजनाभावाद्ब्रह्मणः कारणत्वं नोपपद्यत इति ॥ ३२ ॥

एवं प्राप्ते प्रचक्ष्महे ।

लोकवत्तु लीलाकैवल्यम् ॥ ३३ ॥

अवाप्तसमस्तकामस्य परिपूर्णस्य स्वसंकल्पविकार्यविविधचिदचिन्मिश्रजगत्सर्गे लीलैव केवला प्रयोजनम् । लोकवत् । यथा लोके सप्तद्वीपां मेदिनीमधितिष्ठतः संपूर्णशौर्यवीर्यपराक्रमस्यापि महाराजस्य केवललीलैकप्रयोजनाः कन्दुकाद्यारम्भा दृश्यन्ते तथैव परस्यापि ब्रह्मणः स्वसंकल्पमात्रावक्लृप्तजगज्जन्मस्थितिध्वंसादेर्लीलैव प्रयोजनमिति निरवद्यम् ॥ ३३ ॥

वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति ॥ ३४ ॥

यद्यपि परमपुरुषस्य सकलेतरचिदचिद्वस्तुविलक्षणस्याचि-

---

1 C. reads ईश्वर for ईश्वरस्य.

4. A. B. read आप्त for अवाप्त.

5. B. C. om. समस्त.

7. C. reads करुणया for करुणावान्.

12. E. reads विचित्र after विविध.

13. E. reads केवलम् for केवला.

http://acharya.org

न्त्यशक्तियोगात्प्राक्सृष्टेरेकस्य निरवयवस्यापि विचित्रचिदचिन्मिश्रजगत्सृष्टिः संभाव्येत तथापि देवतिर्यङ्मनुष्यस्थावरात्मनोत्कृष्टमध्यमापकृष्टसृष्ट्या पक्षपातः प्रसज्येत। अतिघोरदुःखयोगकरणान्नैर्घृण्यं चावर्जनीयमिति। तत्रोत्तरं न सापेक्षत्वादिति। न प्रसज्येयातां वैषम्यनैर्घृण्ये। कुतः। सापेक्षत्वात्। सृज्यमानदेवादिक्षेत्रज्ञकर्मसापेक्षत्वाद्विषमसृष्टेः। देवादीनां क्षेत्रज्ञानां देवादिशरीरयोगं तत्तत्कर्मसापेक्षं दर्शयन्ति हि श्रुतिस्मृतयः। साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पुण्येन कर्मणा भवति पापः पापेन कर्मणा (बृ. ४।४।५)। तथा भगवता पराशरेणापि देवादिवैचित्र्यहेतुः सृज्यमानानां क्षेत्रज्ञानां प्राचीनकर्मशक्तिरेवेत्युक्तम्।

निमित्तमात्रमेवासौ सृज्यानां सर्गकर्मणि।
प्रधानकारणीभूता यतो वै सृज्यशक्तयः॥
निमित्तमात्रं मुक्त्वैव नान्यत्किंचिदपेक्षते।
नीयते तपतां श्रेष्ठ स्वशक्त्या वस्तु वस्तुताम्॥

(वि. पु. १।४।५१-५२)

इति। स्वशक्त्या स्वकर्मणैव देवादिवस्तुताप्राप्तिरिति॥ ३४॥

न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च॥ ३५॥

प्राक्सृष्टेः क्षेत्रज्ञा नाम न सन्ति। कुतः। अविभागश्रवणात्। सदेव सोम्येदमग्र आसीत् (छा. ६।२।१) इति। अतस्तदानीं तदभावात्तत्कर्म न विद्यते कथं तदपेक्षं सृष्टिवैष-

7. B. om. शरीर; E. reads सपेक्षत्वम् for सापेक्षम्; C. om. हि after दर्शयन्ति.

14. A. reads उक्त्वा for मुक्त्वा.

20. A. B. om. नाम.

http://acharya.org

न्यमित्युच्यत इति चेन्न । अनादित्वात्क्षेत्रज्ञानां तत्कर्मप्रवाहाणां च । तदनादित्वेप्यविभाग उपपद्यते च यतस्तत्क्षेत्रज्ञवस्तु परित्यक्तनामरूपं ब्रह्मशरीरतयापि पृथग्व्यपदेशानर्हमतिसूक्ष्ममवतिष्ठते । तथानभ्युपगमेकृताभ्यागमकृतविप्रणाशप्रसङ्गश्च । उपलभ्यते च तेषामनादित्वं न जायते म्रियते वा विपश्चित् (का. २।१८) इति । सृष्टिप्रवाहानादित्वं च सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् (म. ना. ५।७) इत्यादौ। तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत (बृ.१।४।७) इति नामरूपव्याकरणमात्रश्रवणात्क्षेत्रज्ञानां स्वरूपानादित्वं सिद्धम् । स्मृतावपि

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि । (गी. १३।१९) इति । अतः सर्वविलक्षणत्वात्सर्वशक्तित्वाल्लीलैकप्रयोजनत्वात्क्षेत्रज्ञकर्मानुगुण्येन विचित्रसृष्टियोगाद्ब्रह्मैव जगत्कारणम् ॥३५॥

सर्वधर्मोपपत्तेश्च ॥ ३६ ॥

प्रधानपरमाण्वादीनां कारणत्वे यद्धर्मवैकल्यमुक्तं वक्ष्यमाणं च तस्य सर्वस्य धर्मजातस्य कारणत्वोपपादिनो ब्रह्मण्युपपत्तेश्च ब्रह्मैव जगत्कारणमिति स्थितम् ॥ ३६ ॥ प्रयोजनवत्त्वाधिकरणं समाप्तम् । (१०)

इति श्रीमद्भगवद्रामानुजाचार्यविरचिते शारीरकमीमांसाभाष्ये द्वितीयाध्यायस्य प्रथमः पादः ॥

---

2. A. B. read तत् after यतस्तत्.
3. C. reads नामरूप for नामरूपम्.
4. C. om. अवतिष्ठते.
15. C. om. यत् after कारणत्वे.

http://acharya.org

अथ श्रीभाष्ये

द्वितीयाध्यायस्य द्वितीयः पाद आरभ्यते।

रचनानुपपत्तेश्च नानुमानं प्रवृत्तेश्च ॥ १ ॥

उक्तं जगज्जन्मादिकारणं परं ब्रह्मेति । तत्र परैरुद्भाविता दोषाश्च परिहृताः। इदानीं स्वपक्षरक्षणाय परपक्षाः प्रतिक्षिप्यन्ते। इतरथा कस्यचिन्मन्दधियस्तेषां पक्षाणां युक्त्याभासमूलतामजानतः प्रामाणिकत्वशङ्कया वैदिकपक्षे किंचिच्छ्रद्धावैकल्यं जायेतापि । अतः परपक्षप्रतिक्षेपायानन्तरः पादः प्रवर्तते। तत्र प्रथमं तावत्कापिलमतं निरस्यते । वैदिकानुमतसत्कार्यवादाद्यर्थसंग्रहेण तस्य सत्पक्षनिक्षेपसंभावनाभ्रमहेतुत्वातिरेकात्। ईक्षतेर्नाशब्दम् (ब्र. सू. १।१।५) इत्यादिभिर्वैदिकवाक्यानामतत्परत्वमात्रमुक्तम् । अत्रैव तत्पक्षस्वरूपप्रतिक्षेपः क्रियत इति न पौनरुक्त्याशङ्का ।

एषा सांख्यानां दर्शनस्थितिः ।

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥

(सां. का. ३)

इति तत्संग्रहः। मूलप्रकृतिर्नाम सुखदुःखमोहात्मकानि लाघवप्रकाशचलनावष्टम्भनगौरवावरणकार्याण्यत्यन्तातीन्द्रियाणि

---

7. C. reads वैदिके for वैदिक.

8. A. B. read अनन्तर for अनन्तरः.

19. B. C. read उपष्टम्भन for अवष्टम्भन.

http://acharya.org

कार्यैकनिरूपणीयविवेकान्यन्यूनातिरेकाणि समतामुपेतानि सत्त्वरजस्तमांसि द्रव्याणि । सा च सत्त्वरजस्तमसां साम्यरूपा प्रकृतिरेका स्वयमचेतनानेकचेतनभोगापवर्गार्था नित्या सर्वगता सततविक्रिया न कस्यचिद्विकृतिः । अपि तु परमकारणमेव । महदाद्यास्तद्विकृतयोन्येषां च प्रकृतयः सप्त । महानहंकारः शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रमिति । तत्राहंकारस्त्रिविधो वैकारिकस्तैजसो भूतादिश्च क्रमात्सात्त्विको राजसस्तामसश्च । तत्र वैकारिकः सात्त्विक इन्द्रियादिः । भूतादिस्तामसो महाभूतहेतुभूततन्मात्रहेतुः । तैजसो राजसस्तूभयोरनुग्राहकः । आकाशादीनि पञ्च महाभूतानि श्रोत्रादीनि पञ्च ज्ञानेन्द्रियाणि वागादीनि पञ्च कर्मेन्द्रियाणि मन इति केवलविकाराः षोडश । पुरुषस्तु निष्परिणामत्वेन न कस्यचित्प्रकृतिर्न कस्यचिद्विकृतिः । तत एव निर्धर्मकश्चैतन्यमात्रवपुर्नित्यो निष्क्रियः सर्वगतः प्रतिशरीरं भिन्नश्च । निर्विकारत्वान्निष्क्रियत्वाच्च तस्य कर्तृत्वं भोक्तृत्वं च न संभवति । एवंभूतेपि तत्त्वे मूढाः प्रकृतिपुरुषसंनिधिमात्रेण पुरुषस्य चैतन्यं प्रकृतावध्यस्य प्रकृतेश्च कर्तृत्वं स्फटिकमणाविव जपाकुसुमस्यारुणिमानं पुरुषेध्यस्याहं कर्ता भोक्तेति मन्यन्ते । एवमज्ञानाद्भोगस्तत्त्वज्ञानाच्चापवर्गः । तदेतत्प्रत्यक्षानुमानागमैः साधयन्ति । तत्र प्रत्यक्षसिद्धेषु पदार्थेषु नातीव विवादास्पदमस्ति । आगमोपि कपिलादिसर्वज्ञज्ञानमूल इति सोपि प्रथमे काण्डे प्रमाणलक्षणे निरस्तप्रायः । यदिदं प्रधानमेव जगत्कारणमित्यनुमानं तन्निरसनेन तन्मतं निरस्तं भवतीति तदेव निरस्यते ।

ते चैवं वर्णयन्ति । कृत्स्नस्य जगत एकमूलत्वमवश्याभ्यु-

---

1. B. C. E read निरूपण for निरूपणीय; C. reads अनतिरेकाणि for अतिरेकाणि.

23. C. reads सर्वम् after तन्मतम्.

http://acharya.org

पगमनीयम् । अनेकेभ्यः कार्योत्पत्त्यभ्युपगमे कारणानवस्थानात् । तन्तुप्रभृतयो ह्यवयवाः स्वांशभूतैः षड्भिः पार्श्वैः परस्परं संयुज्यमाना अवयविनमुत्पादयन्ति । ते च तन्त्वादयः स्वावयवैस्तथाभूतैरुत्पाद्यन्ते । ते च तथाभूतैः स्वावयवैरिति परमाणुभिरपि स्वकीयैः षड्भिः पार्श्वैः संयुज्यमानैरेव स्वकार्योत्पादनमभ्युपेतव्यम् । अन्यथा प्रथिमानुपपत्तेः । परमाणवोऽप्यंशित्वेन स्वांशैस्तथैवोत्पाद्यन्ते ते च स्वांशैरिति न कचित्कारणव्यवस्थितिः । अतः कारणव्यवस्थासिद्ध्यर्थमेकं द्रव्यं विविधविचित्रपरिणामशक्तियुक्तं स्वयमप्रच्युतस्वरूपमेव महदाद्यनन्तावस्थाश्रयं कारणमाश्रयणीयम् । तच्चैकं कारणं गुणत्रयसाम्यरूपं प्रधानमिति तत्कल्पनहेतूनुपन्यस्यन्ति ।

भेदानां परिमाणात्समन्वयाच्छक्तितः प्रवृत्तेश्च ।
कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य ॥
कारणमस्त्यव्यक्तम् (सां. का. १५-१६) इति ।

अयमर्थः । विश्वरूपमेव वैश्वरूप्यं विचित्रसंनिवेशं तनुभुवनादि कृत्स्नं जगत् । तच्च जगद्विचित्रसंनिवेशत्वेन कार्यभूतं तत्सरूपाव्यक्तकारणकम् । कुतः । कार्यत्वात् । कार्यस्य हि सर्वस्य तत्सरूपात्कारणविशेषाद्विभागस्तस्मिन्नेवाविभागश्च दृश्यते । यथा घटमुकुटादेः कार्यस्य तत्सरूपान्मृत्सुवर्णादेः कारणाद्विभागस्तस्मिन्नेव चाविभागः । अतो विश्वरूपस्य जगत-

---

4. B. om. उत्पाद्यन्ते । ते च तथाभूतैः.

6. C. reads अभ्युपेत्यम् for अभ्युपेतव्यम्.

8. A. B. read तत. for अत., B. reads एक for एकम्.

10 C. E. read आश्रयः for आश्रयम्.

13 A. reads कार्यकारण for कारणकार्य.

18. E. reads स्वरूपात् for सरूपात्.

http://acharya.org

स्तत्सरूपात्प्रधानादुत्पत्तिस्तस्मिन्नेव लयश्चेति प्रधानकारणकमेव जगत्। गुणत्रयसाम्यरूपं प्रधानमेव जगत्सरूपं कारणम्। सत्त्वरजस्तमोमयसुखदुःखमोहात्मकत्वाज्जगतः । यथा च मृदात्मनो घटस्य मृद्द्रव्यमेव कारणम्। तदेव हि तदुत्पत्त्याख्यप्रवृत्तिशक्तिमत्। तथा दर्शनात्। अव्यक्तस्य गुणसाम्यरूपस्य देशतः कालतश्चापरिमितस्यैव कारणत्वं भेदानां महदहंकारतन्मात्रादीनां परिमितत्वादवगम्यते । महदादीनि च घटादिवत्परिमितानि कृत्स्नजगदुत्पत्तौ न प्रभवन्ति। अतस्त्रिगुणं जगद्गुणत्रयसाम्यरूपप्रधानैककारणकमिति निश्चीयते । अत्रोच्यते ।

रचनानुपपत्तेश्च नानुमानं प्रवृत्तेश्च। अनुमीयत इत्यनुमानम्। न भवदुक्तं प्रधानं विचित्रजगद्रचनासमर्थम्। अचेतनत्वे सति तत्स्वभावाभिज्ञानधिष्ठितत्वात्। यदेवं तत्तथा यथा रथप्रासादादिनिर्माणे केवलदार्वादिकम् । दार्वादेरचेतनस्य तज्ज्ञानधिष्ठितस्य कार्यारम्भानुपपत्तेर्दर्शनात्। तज्ज्ञाधिष्ठितस्य कार्यारम्भप्रवृत्तेर्दर्शनाच्च न प्राज्ञानधिष्ठितं प्रधानं कारणमित्युक्तं भवति । चकारादन्वयस्यानैकान्त्यं समुच्चिनोति । न ह्यन्वितं शौक्ल्यगोत्वादि कारणत्वव्याप्तम्। न च वाच्यं माभूदन्वितानामपि शौक्ल्यादिधर्माणां कारणत्वम्। द्रव्यस्य तु हेमादेः कार्यान्वितस्य कारणत्वव्याप्तिरस्त्येव। सत्त्वादीन्यपि द्रव्याणि

1. C. reads प्रधानकारणम् for प्रधानकारणकम्.
2. E. reads जगत्सरूप for जगत्सरूपम्.
3. C. om. च after यथा.
4. E. reads शक्तिप्रकृति for प्रवृत्तिशक्ति.
9. C. reads एककारणम् for एककारणकम्.
12. C. reads स्वभावाविज्ञ for स्वभावाभिज्ञ.
13. C. reads तज्ज्ञान for तज्ज्ञ.
18. A. B. om. तु after द्रव्यस्य.
19. C. reads कार्ये for कार्य.

http://acharya.org

कार्यान्वितानि कारणत्वव्याप्तानीति । यतः सत्त्वादयो द्रव्यधर्मा न तु द्रव्यस्वरूपम् । सत्त्वादयो हि पृथिव्यादिद्रव्यगतलघुत्वप्रकाशादिहेतुभूतास्तत्स्वभावविशेषा एव न तु मृद्धिरण्यादिवद्द्रव्यतया कार्यान्विता उपलभ्यन्ते । गुणा इत्येव च सत्त्वादीनां प्रसिद्धिः । यच्च कारणव्यवस्थासिद्धये जगत एकमूलत्वमुक्तं तदपि सत्त्वादीनामनेकत्वान्नोपपद्यते । अत एव कारणव्यवस्था च न सिध्यति । साम्यावस्थाः सत्त्वादय एव हि प्रधानमिति त्वन्मतम् । अतः कारणबहुत्वादनवस्था तदवस्थैव । न च तेषामपरिमितत्वेन व्यवस्थासिद्धिः । अपरिमितत्वे हि त्रयाणामपि सर्वगतत्वेन न्यूनाधिकभावाभावाद्वैषम्यासिद्धेः कार्यारम्भासंभवात्कार्यारम्भायैव परिमितत्वमवश्याश्रयणीयम्॥१॥

यत्र रथादिषु स्पष्टं चेतनाधिष्ठितत्वं दृष्टं तद्व्यतिरिक्तं सर्वं पक्षीकृतमित्याह ।

पयोम्बुवच्चेत्तत्रापि ॥ २ ॥

यदुक्तं प्रधानस्य प्राज्ञानधिष्ठितस्य विचित्रजगद्रचनानुपपत्तिरिति तन्न । यतः पयोम्बुवत्प्रवृत्तिरुपपद्यते । पयसस्तावद्दधिभावेन परिणममानस्यानन्यापेक्षस्याद्यपरिस्पन्दनप्रभृतिपरिणामपरंपरा स्वत एवोपपद्यते । यथा च वारिदविमुक्तस्याम्बुन एकरसस्य नालिकेरतालचूतकपित्थनिम्बतिन्तिण्यादिविचित्ररसरूपेण परिणामप्रवृत्तिः स्वत एव दृश्यते तथा प्रधानस्यापि

1. C. reads कार्ये for कार्य.

4. B. om वत् before द्रव्यतया; C. reads कार्ये for कार्य.

8. E. reads तन्मतम् for त्वन्मतम्.

17. C. reads परिस्पन्द for परिस्पन्दन.

20. C. reads उप before दृश्यते.

http://acharya.org

परिणामस्वभावस्यान्यानधिष्ठितस्यैव प्रतिसर्गावस्थायां सदृशपरिणामेनावस्थितस्य सर्गावस्थायां गुणवैषम्यनिमित्तविचित्रपरिणाम उपपद्यते। यथोक्तम्।

परिणामतः सलिलवत्प्रतिप्रतिगुणाश्रयविशेषात्।

(सां. का. १६)

इति। तदेवमव्यक्तमन्यानपेक्षं प्रवर्तेत इति चेदत उत्तरं तत्रापीति। यत्क्षीरजलादिदृष्टान्ततया निदर्शितं तत्रापि प्राज्ञानधिष्ठाने प्रवृत्तिर्नोपपद्यते। तदपि पूर्वत्र पक्षीकृतमित्यभिप्रायः। उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि (ब्र. सू. २।१।२४) इत्यत्र दृष्टपरिकरान्तररहितस्यापि स्वासाधारणपरिणाम उपपद्यत इत्येतावदुक्तं न प्राज्ञाधिष्ठितत्वं पराकृतम्। योऽप्सु तिष्ठन् (बृ. ३।७।४) इत्यादिश्रुतेः॥ २॥

व्यतिरेकानवस्थितेश्चानपेक्षत्वात्॥ ३॥

इतश्च सत्यसंकल्पेश्वराधिष्ठानानपेक्षपरिणामित्वे सर्गव्यतिरेकेण प्रतिसर्गावस्थाया अनवस्थितिप्रसङ्गाच्च न प्राज्ञानधिष्ठितं प्रधानं कारणम्। प्राज्ञाधिष्ठितत्वे तस्य सत्यसंकल्पत्वेन सर्गप्रतिसर्गविचित्रसृष्टिव्यवस्थासिद्धिः। न च वाच्यं प्राज्ञाधिष्ठितत्वेपि तस्यावाप्तसमस्तकामस्य परिपूर्णस्यानवधिकातिशयानन्दस्य निरवद्यस्य निरञ्जनस्य सर्गप्रतिसर्गव्यवस्थाहेत्वभावाद्वि-

---

2. C. reads निमित्तः for निमित्त.

6. C. reads अनन्यापेक्षम् for अन्यानपेक्षम्.

8. E. reads पूर्वमेव for पूर्वत्र.

11. A. B. om. एतावदुक्तम्; C. reads प्राज्ञानधिष्ठितत्वम् for प्राज्ञाधिष्ठितत्वम्.

14. C. reads व्यतिरेके for व्यतिरेकेण.

17 C. om. वि before चित्रसृष्टि.

http://acharya.org

षमसृष्टौ निर्दयत्वप्रसङ्गाच्च समानोयं दोष इति । परिपूर्णस्यापि लीलार्थप्रवृत्तिसंभवात् । सर्वज्ञस्य तस्य परिणामविशेषापन्नप्रकृतिदर्शनरूपसर्गप्रतिसर्गविशेषहेतोः संभवात् । क्षेत्रज्ञकर्मणामेव विषमसृष्टेर्व्यवस्थापकत्वाच्च ।

नन्वेवं क्षेत्रज्ञपुण्यापुण्यकर्मभिरेव सर्वा व्यवस्थाः सिध्यन्तीति कृतमीश्वरेणाधिष्ठात्रा । पुण्यापुण्यरूपानुष्ठितकर्मसंस्कृता प्रकृतिरेव पुरुषार्थानुरूपं तथा तथा व्यवस्थया परिणंस्यते । यथा विषादिदूषितानामन्नपानादीनामौषधिविशेषाप्यायितानां च सुखदुःखहेतुभूतः परिणामविशेषो देशकालव्यवस्थया दृश्यते । अतः सर्गप्रतिसर्गव्यवस्था देवादिविषमसृष्टिः कैवल्यव्यवस्था च सर्वप्रकारपरिणामशक्तियुक्तस्य प्रधानस्यैवोपपद्यत इति ।

अनभिज्ञो भवान्पुण्यापुण्यकर्मस्वरूपयोः । पुण्यापुण्यस्वरूपे हि शास्त्रैकसमधिगम्ये । शास्त्रं चानादिनिधनाविच्छिन्नपाठसंप्रदायानाघ्रातप्रमादादिदोषगन्धवेदाख्याक्षरराशिः । तच्च परमपुरुषाराधनतद्विपर्ययरूपे कर्मणी पुण्यापुण्ये तदनुग्रहनिग्रहायत्ते च तत्फले सुखदुःखे इति वदति । तथा चाह द्रमिडाचार्यः फलसंविधित्सया हि कर्मभिरात्मानं पिप्रीषन्ति स प्रीतोलं

2. E. reads लीलार्थम् for लीलार्थ.

3. E. om. प्रतिसर्ग.

4. C. reads विषमसृष्टि for विषमसृष्टे॰.

7. A. B. om. one तथा; B. C read तथा for यथा.

8. C. reads औषध for औषधि.

11. B. C. om. इति after उपपद्यते.

12. C. reads हि after अनभिज्ञः; B. om. स्व before रूपे.

13. A. B. om. पाठ.

15. B. reads निग्रहापन्ने for निग्रहायत्ते.

16. C. reads द्रविड for द्रमिड.

17. A. B. C. read सबिभित्सया for संविधित्सया.

http://acharya.org

फलायेति शास्त्रमर्यादेति । तथा च श्रुतिः । इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः (म. ना. १।६) इति । तथा च भगवता स्वयमेवोक्तम्

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥

(भ. गी. १८।४६)

इति ।

तानहं द्विषतः क्रूरान्संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥

(भ. गी. १६।१९)

इति च । स च भगवान्पुरुषोत्तमोवाप्तसमस्तकामः सर्वज्ञः सर्वेश्वरः सत्यसंकल्पः स्वमाहात्म्यानुगुणलीलाप्रवृत्त एतानि कर्माणि समीचीनान्येतान्यसमीचीनानीति कर्मद्वैविध्यं संविधाय तदुपादानोचितदेहेन्द्रियादिकं तन्नियमनशक्तिं च सर्वेषां क्षेत्रज्ञानां सामान्येन प्रदर्श्य स्वशासनाववोधि शास्त्रं च प्रदर्श्य तदुपसंहारार्थं चान्तरात्मतयानुप्रविश्यानुमन्तृतया च नियच्छंस्तिष्ठति । ते क्षेत्रज्ञास्तु तदाहितशक्तयस्तत्प्रदिष्टकरणकलेवरादिकास्तदाधाराश्च स्वयमेव स्वेच्छानुगुण्येन पुण्यापुण्यरूपे कर्मणी उपाददते । ततश्च पुण्यरूपकर्मकारिणं स्वशासनानुवर्तिनं ज्ञात्वा धर्मार्थकाममोक्षैर्वर्धयते । शासनातिवर्तिनं च

11. A. C. E. om. च after इति; C. om. च after सः; C. om. सर्वज्ञः.

15. A. B. read प्रदिश्य for प्रदर्श्य.

16. A. B. read प्रदिश्य for प्रदर्श्य.

17. C. om. ते before क्षेत्रज्ञाः.

18. C. reads तदाधारान् for तदाधारा॰.

20. C. reads अतिवर्तिनाम् for अतिवर्तिनम्

http://acharya.org

तद्विपर्ययैर्योजयति । अतः स्वातन्त्र्यादिवैकल्यचोद्यानि नावकाशं लभन्ते ।

दया हि नाम स्वार्थनिरपेक्षा परदुःखासहिष्णुता । सा च स्वशासनातिवृत्तिव्यवसायिन्यपि वर्तमाना न गुणायावकल्पते। प्रत्युतापुंस्त्वमेवावहति । तन्निग्रह एव तत्र गुणः । अन्यथा शत्रुनिग्रहादीनामगुणत्वप्रसङ्गात् । स्वशासनातिवृत्तिव्यवसायनिवृत्तिमात्रेणानाद्यनन्तकल्पोपचितदुर्विषहानन्तापराधानङ्गीकारेण निरतिशयसुखसंवृद्धये स्वयमेव प्रयतते । यथोक्तम्

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥
तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥

(भ. गी. १०।१०-११)

इति । अतः प्राज्ञानधिष्ठितं प्रधानमकारणम् ॥ ३ ॥

अथ स्याद्यद्यपि प्राज्ञानधिष्ठितायाः प्रकृतेः परिस्पन्दप्रवृत्तिरपि न संभवतीत्युक्तं तथाप्यनपेक्षाया एव परिणामप्रवृत्तिः संभवति । तथा दर्शनात् । धेन्वादिनोपभुक्तं हि तृणोदकादि स्वयमेव क्षीराद्याकारेण परिणममानं दृश्यते । अतः प्रकृतिरपि स्वयमेव जगदाकारेण परिणंस्यत इति चेत्तत्राह ।

अन्यत्राभावाच्च न तृणादिवत् ॥ ४ ॥

नैतदुपपद्यते । तृणादेः प्राज्ञानधिष्ठितस्य परिणामाभावा-

---

5. A. B. read नृशंसत्वम् for अपुंस्त्वम्.
6. C. om. स्व before शासन; E. reads व्यवसायि for व्यवसाय.
14. C. reads कारणम् for अकारणम्.
16. B. reads अनपेक्षया for अनपेक्षायाः.
17 C. reads उपयुक्तम् for उपभुक्तम्.
19. C. om. चेत्.
21. B. reads असंभवात् for अभावात्.

http://acharya.org

दृष्टान्तासिद्धेः। कथमसिद्धिः। अन्यत्राभावात्। यदि हि तृणोदकादिकमनडुहाद्युपभुक्तं प्रहीणं वा क्षीराकारेण परिणंस्यते तदा प्राज्ञानधिष्ठितमेव परिणमत इति वक्तुं शक्येत। न चैतदस्ति। अतो धेन्वाद्युपभुक्तं प्राज्ञ एव क्षीरीकरोति। पयोम्बुवच्चेत्तत्रापि (ब्र. सू. २।२।२) इत्युक्तमेवात्र प्रपञ्चितं तत्रैव व्यभिचारप्रदर्शनाय ॥ ४ ॥

पुरुषाश्मवदिति चेत्तथापि ॥ ५ ॥

अथोच्यते। यद्यपि चैतन्यमात्रवपुः पुरुषो निष्क्रियः प्रधानमपि दृक्शक्तिविकलं तथापि पुरुषसंनिधानादचेतनं प्रधानं प्रवर्तते। तथा दर्शनात्। गमनशक्तिविकलदृक्शक्तियुक्तपङ्गुसंनिधानात्तच्चैतन्योपकृतो दृक्शक्तिविकलः प्रवृत्तिशक्तियुक्तोन्धः प्रवर्तते। अयस्कान्ताश्मसंनिधानाच्चायः प्रवर्तते। एवं प्रकृतिपुरुषसंयोगकृतो जगत्सर्गः प्रवर्तते। यथोक्तम्

पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥
(सां. का. २१)

इति। पुरुषस्य प्रधानोपभोगार्थं कैवल्यार्थं च पुरुषसंनिधानात्प्रधानं सर्गादौ प्रवर्तत इत्यर्थः।

अत्रोत्तरं तथापीति। एवमपि प्रधानस्य प्रवृत्त्यसंभवस्तदवस्थ एव। पङ्गोर्गमनशक्तिविकलस्यापि मार्गदर्शनतदुपदेशादयः कादाचित्का विशेषाः सहस्रशः सन्ति। अन्धोपि चेतनः संस्तदुपदेशाद्यवगमेन प्रवर्तते। तथायस्कान्तमणेरप्ययःसमीपागमनादयः सन्ति। पुरुषस्य तु निष्क्रियस्य न तादृशा विकाराः

2 C. reads उपयुक्तम् for उपभुक्तम्.
3. C. reads ततः for तदा.
8. C. reads उच्येत for उच्यते.
22. C. reads अवगमे for अवगमेन; B. reads समीपगमन for समीपागमन.

http://acharya.org

संभवन्ति । संनिधानमात्रस्य नित्यत्वेन नित्यसर्गप्रसङ्गः । नित्यमुक्तत्वेन बन्धाभावोपवर्गाभावश्च ॥ ५ ॥

अङ्गित्वानुपपत्तेश्च ॥ ६ ॥

गुणानामुत्कर्षनिकर्षनिबन्धनाङ्गाङ्गिभावाद्धि जगत्प्रवृत्तिः प्रतिप्रतिगुणाश्रयविशेषात् (सां. का. १६) इति वदद्भिर्भवद्भिरभ्युपगम्यते । प्रतिसर्गावस्थायां तु साम्यावस्थानां सत्त्वरजस्तमसामन्योन्याधिक्यन्यूनताभावादङ्गाङ्गिभावानुपपत्तेर्न जगत्सर्ग उपपद्यते । तथापि वैषम्याभ्युपगमे नित्यसर्गप्रसङ्गः । अतश्च न प्राज्ञानधिष्ठितं प्रधानं कारणम् ॥ ६ ॥

अन्यथानुमितौ च ज्ञशक्तिवियोगात् ॥ ७ ॥

दूषितप्रकारातिरिक्तप्रकारान्तरेण प्रधानानुमितौ च प्रधानस्य ज्ञातृत्वशक्तिवियोगात्त एव दोषाः प्रादुःष्युः । अतो न कथंचिदप्यनुमानेन प्रधानसिद्धिः ॥ ७ ॥

अभ्युपगमेप्यर्थाभावात् ॥ ८ ॥

अनुमानेन प्रधानसिद्ध्यभ्युपगमेपि प्रधानेन प्रयोजनाभावान्न तदनुमातव्यम् ।

पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।

(सां. का. २१)

इति प्रधानस्य प्रयोजनं पुरुषभोगापवर्गावभिमतौ । तौ च न संभवतः । पुरुषस्य चैतन्यमात्रवपुषो निष्क्रियस्य निर्विकारस्य निर्मलस्य तत एव नित्यमुक्तस्वरूपस्य प्रकृतिदर्शनरूपो भोगस्तद्वियोगरूपोपवर्गश्च न संभवति । एवंरूपस्यैव प्रकृतिसंनिधानात्तत्परिणामविशेषसुखदुःखदर्शनरूपभोगसंभावनायां प्रकृतिसंनिधानस्य नित्यत्वेन कदाचिदप्यपवर्गो न सेत्स्यति ॥८॥

---

7. C. reads न्यूनत्व for न्यूनता.

19. C. reads उप before भोगापवर्गौ.

http://acharya.org

विप्रतिषेधाच्चासमञ्जसम् ॥ ९ ॥

विप्रतिषिद्धं चेदं सांख्यानां दर्शनम् । तथा हि । प्रकृतेः परार्थत्वेन दृश्यत्वेन भोग्यत्वेन च प्रकृतेर्भोक्तारमधिष्ठातारं द्रष्टारं साक्षिणं च पुरुषमभ्युपगम्य प्रकृत्यैव साधनभूतया तस्य कैवल्यमपि प्राप्यं वदन्त एव तस्य नित्यनिर्विकारचैतन्यमात्रस्वरूपतयाकर्तृत्वं कैवल्यं च स्वरूपमेवाहुः । तत एव बन्धमोक्षसाधनानुष्ठानं मोक्षं च प्रकृतेरेवाहुः । एवंभूतनित्यनिर्विकारोदासीनपुरुषसंनिधानात्प्रकृतेरितरेतराध्यासेन सर्गादिप्रवृत्तिं पुरुषभोगापवर्गार्थत्वं चाहुः ।

संघातपरार्थत्वात्त्रिगुणादिविपर्ययादधिष्ठानात् ।
पुरुषोस्ति भोक्तृभावात्कैवल्यार्थं प्रवृत्तेश्च ॥

(सां. का. १७)

तस्माच्च विपर्यासात्सिद्धं साक्षित्वमस्य पुरुषस्य ।
कैवल्यं माध्यस्थ्यं द्रष्टृत्वं कर्तृभावश्च ॥

(सां. का. १९)

इति ।

पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ।

(सां. का. ५८)

इत्युक्त्वैवमाहुः ।

तस्मान्न बध्यते नापि मुच्यते नापि संसरति कश्चित् ।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः ॥

(सां. का. ६३)

इति । तथा

---

7. C. reads इति before आहुः; B. reads अनित्य for नित्य.

9. C. reads प्रवृत्ति for प्रवृत्तिम्

14. C. reads अकर्तृभावः for कर्तृभावः.

19. A. B. read एव for एवम्.

http://acharya.org

तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।
गुणकर्तृत्वे च तथाकर्तेव भवत्युदासीनः ॥
पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥

(सां. का. २०-२१)

इति । साक्षित्वद्रष्टृत्वभोक्तृत्वादयो नित्यनिर्विकारस्याकर्तुरुदासीनस्य कैवल्यैकस्वरूपस्य न संभवन्ति । एवंरूपस्य तस्याध्यासमूलो भ्रमोपि न संभवति । अध्यासभ्रमयोरपि विकारत्वात् । प्रकृतेश्च तौ न संभवतः । तयोश्चेतनधर्मत्वात् । अध्यासो हि नाम चेतनस्यान्यस्मिन्नन्यधर्मानुसंधानम् । स च चेतनधर्मो विकारश्च । न च पुरुषस्य प्रकृतिसंनिधिमात्रेणाध्यासादयः संभवन्ति । निर्विकारत्वादेव । संभवन्ति चेन्नित्यं प्रसज्येरन् । संनिधेरकिंचित्करत्वं च न विलक्षणत्वात् (ब्र. सू. २।१।४) इत्यत्र प्रतिपादितम् । प्रकृतिरेव संसरति बध्यते मुच्यते चेत्कथं नित्यमुक्तस्य पुरुषस्योपकारिणी सेत्युच्यते । वदन्ति हि

नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः ।
गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकं चरति ॥

(सां. का. ६१)

इति । तथा प्रकृतिर्येन पुरुषेण यथास्वभावा दृष्टा तस्मात्पुरुषात्तदानीमेव निवर्तत इति चाहुः ।

रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात् ।
पुरुषस्य तथात्मानं प्रकाश्य विनिवर्तते प्रकृतिः ॥

(सां. का. ६०)

---

7. C. om. स्व before रूपस्य.

10. C. om. च after सः.

http://acharya.org

प्रकृतेः सुकुमारतरं न किंचिदस्तीति मे मतिर्भवति ।
या दृष्टास्मीति पुनर्न दर्शनमुपैति पुरुषस्य ॥

(सां. का. ६२)

इति । तदप्यसंगतम् । पुरुषो हि नित्यमुक्तत्वान्निर्विकारत्वान्न तां कदाचिदपि पश्यति नाध्यस्यति च । स्वयं च स्वात्मानं न पश्यति । अचेतनत्वात् । पुरुषस्य स्वात्मदर्शनं स्वदर्शनमिति नाध्यस्यति च । स्वयमचेतनत्वात् । पुरुषस्य च दर्शनरूपविकारासंभवात् । अथ संनिधिमात्रमेव दर्शनमित्युच्यते संनिधेर्नित्यत्वेन नित्यदर्शनप्रसङ्ग इत्युक्तम् । स्वरूपातिरिक्तकादाचित्कसंनिधिरपि नित्यनिर्विकारस्य नोपपद्यते । किंच मोक्षहेतुस्तु स्वसंनिधिमात्रमेव दर्शनं चेद्बन्धहेतुरपि तदेवेति नित्यं तद्बन्धो मोक्षश्च स्याताम् । अयथादर्शनं बन्धहेतुर्यथावत्स्वरूपदर्शनं मोक्षहेतुरिति चेदुभयविधस्यापि दर्शनस्य संनिधानरूपतानतिरेकात्सदोभयप्रसङ्ग एव । संनिधेरनित्यत्वे तस्य हेतुरन्वेषणीयस्तस्यापीत्यनवस्था । अथैतद्दोषपरिजिहीर्षया स्वरूपसद्भाव एव संनिधिरिति तदा स्वरूपस्य नित्यत्वेन नित्यबद्धमोक्षौ । अत एवमादेर्विप्रतिषेधात्सांख्यानां दर्शनमसमञ्जसम् ।

येपि कूटस्थनित्यनिर्विशेषस्वप्रकाशचिन्मात्रं ब्रह्माविद्यासाक्षित्वेनापारमार्थिकबन्धमोक्षभागिति वदन्ति तेषामप्युक्तनीत्याविद्यासाक्षित्वाध्यासाद्यसंभवादसामञ्जस्यमेव । इयांस्तु विशेषः । सांख्या जननमरणप्रतिनियमादिव्यवस्थासिद्ध्यर्थं पुरुष-

---

11. C. reads संनिधानरूपम् for संनिधिमात्रम्.

12. C. reads नित्यवत् for नित्यं तत्; C. reads अयथार्थं for अयथा.

19. C reads ब्रह्मविद्या for ब्रह्माविद्या.

21. C. reads अभावात् for असंभवात्.

22. B. reads मरणम् for मरण.

http://acharya.org

बहुत्वमिच्छन्ति । ते तु तदपि नेच्छन्तीति सुतरामसामञ्जस्यम् । यत्तु प्रकृतेः पारमार्थ्यापारमार्थ्यविभागेन वैषम्यमुक्तं तदयुक्तम् । पारमार्थिकत्वे नित्यनिर्विकारस्य प्रकाशैकरसचिन्मात्रस्य स्वव्यतिरिक्तसाक्षित्वाद्यनुपपत्तेः । अपारमार्थिकत्वे तु तस्या दृश्यत्वबाध्यत्वाभ्युपगमात्सुतरामसंगतम् । औपाधिकभेदवादेप्युपाधिसंबन्धिनो ब्रह्मणोयमेव स्वभाव इत्युपाधिसंबन्धाद्यनुपपत्तेरसामञ्जस्यं पूर्वमेवोक्तम् ॥ ९ ॥ रचनानुपपत्त्यधिकरणं समाप्तम् । (१)

महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥ १० ॥

प्रधानकारणवादस्य युक्त्याभासमूलतया विप्रतिषिद्धत्वाच्चासामञ्जस्यमुक्तम् । संप्रति परमाणुकारणवादस्याप्यसामञ्जस्यं प्रतिपाद्यते महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्यामिति । असमञ्जसमिति वर्तते । वाशब्दश्चार्थे । ह्रस्वपरिमण्डलाभ्यां द्व्यणुकपरमाणुभ्यां महद्दीर्घवत्त्र्यणुकद्व्यणुकोत्पत्तिवादवदन्यच्च तदभ्युपगतं सर्वमसमञ्जसम् । परमाणुभ्यो द्व्यणुकादिक्रमेण जगदुत्पत्तिवादवदन्यदप्यसमञ्जसमित्यर्थः ।

तथा हि । तन्तुप्रभृतयो ह्यवयवाः स्वांशैः षड्भिः पार्श्वैः संयुज्यमाना अवयविनमुत्पादयन्ति । परमाणवोपि स्वकीयैः षड्भिः पार्श्वैः संयुज्यमाना एव द्व्यणुकादीनामुत्पादका भवेयुः । अन्यथा परमाणूनां प्रदेशभेदाभावे सति सहस्रपरमाणुसंयोगेप्येकस्मात्परमाणोरनतिरिक्तपरिमाणतयाणुत्वह्रस्वत्वमहत्त्वदीर्घत्वाद्यसिद्धिः स्यात् । प्रदेशभेदाभ्युपगमे परमाणवोपि

---

3. C. reads अप्यपारमार्थिकत्वेपि after पारमार्थिकत्वे; C. reads निर्विकारस्वप्रकाश for निर्विकारस्य प्रकाश.

14. C. reads त्र्यणुकोत्पत्तिवत् for वत्त्र्यणुकद्व्यणुकोत्पत्तिवादवत्; B. om. द्व्यणुक.

http://acharya.org

सांशाः स्वकीयैरंशैस्ते च स्वकीयैरंशैरित्यनवस्था । न च वाच्यमवयवाल्पत्वमहत्त्वाभ्यां हि सर्षपमहीधरयोर्वैषम्यम् । परमाणोरप्यनन्तावयवत्वेवयवानन्त्यसाम्यात्सर्षपमहीधरयोर्वैषम्यासिद्धेरवयवापकर्षकाष्ठावश्याभ्युपगमनीयेति । परमाणूनां प्रदेशभेदाभावे सत्येकपरमाणुपरिमाणातिरेकिप्रथिमा न जायेतेति सर्षपमहीधरयोरेवासिद्धेः । किं कुर्म इति चेद्वैदिकः पक्षः परिगृह्यताम् ।

यत्तु परैर्ब्रह्मकारणवाददूषणपरिहारपरमिदं सूत्रं व्याख्यातं तदसंगतं पुनरुक्तं च । ब्रह्मकारणवादे परोक्तान्दोषान्पूर्वस्मिन्पादे परिहृत्य परपक्षप्रतिक्षेपो ह्यस्मिन्पादे क्रियते । चेतनाद्ब्रह्मणो जगदुत्पत्तिसंभवश्च न विलक्षणत्वात् (ब्र. सू. २।१।४) इत्यत्रैव प्रपञ्चितः। अतो ह्रस्वपरिमण्डलाभ्यां महद्दीर्घाणुह्रस्वोत्पत्तिवदन्यच्च तदभ्युपगतं सर्वमसमञ्जसमित्येव सूत्रार्थः ॥१०॥

किमत्रान्यदसमञ्जसमित्याह ।

उभयथापि न कर्मातस्तदभावः ॥ ११ ॥

परमाणुकारणवादे हि परमाणुगतकर्मजनिततत्संयोगपूर्वकद्व्यणुकादिक्रमेण जगदुत्पत्तिरिष्यते । तत्र निखिलजगदुत्पत्तिकारणभूतपरमाणुगतमाद्यं कर्मादृष्टकारितमित्यभ्युपगम्यते । अग्नेरूर्ध्वज्वलनं वायोस्तिर्यग्गमनमणुमनसोश्चाद्यं कर्मेत्यदृष्टकारितानि (वै. सू. ५।२।१३) इति । तदिदं परमाणुगतं कर्म

1. E. reads स्वीयै· for स्वकीयैः after साशाः.
4. E. reads अवश्यम् for अवश्य.
5. C. reads अतिरेक, E. अतिरेकी for अतिरेकि.
6. A. B read वैदिक for वैदिकः.
14. A. B. read अत्र before आह.
15. B. reads च after तदभावः.
18. C. om. इति after अदृष्टकारितम्.
19. C. reads अदृष्टकारितम् for अदृष्टकारितानि.

http://acharya.org

स्वगतादृष्टकारितमात्मगतादृष्टकारितं वा। उभयथापि न संभवति। क्षेत्रज्ञपुण्यपापानुष्ठानजनितस्यादृष्टस्य परमाणुगतत्वासंभवात्। संभवे च सदोत्पादकत्वप्रसङ्गः। आत्मगतस्य चादृष्टस्य परमाणुगतकर्मोत्पत्तिहेतुत्वं न संभवति। अथादृष्टवदात्मसंयोगादणुषु कर्मोत्पत्तिस्तदा तस्यादृष्टप्रवाहस्य नित्यत्वेन नित्यसर्गप्रसङ्गः।

नन्वदृष्टं विपाकापेक्षं फलायालम्। कानिचिददृष्टानि तदानीमेव विपच्यन्ते। कानिचिज्जन्मान्तरे। कानिचित्कल्पान्तरे। अतो विपाकापेक्षत्वान्न सर्वदोत्पादकत्वप्रसङ्ग इति। नैतत्। अनन्तैरात्मभिरसंकेतपूर्वकयुगपदनुष्ठितानेकविविधकर्मजनितानामदृष्टानामेकस्मिन्काल एकरूपविपाकस्याप्रामाणिकत्वात्। अत एव युगपत्सर्वसंहारो द्विपरार्धकालमविपाकेनावस्थानं च न संगच्छते। न चेश्वरेच्छाहितविशेषादृष्टसंयोगादणुषु कर्म। आनुमानिकेश्वरासिद्धेः शास्त्रयोनित्वात् (ब्र. सू. १।१।४) इत्यत्रोपपादितत्वात्। अतो जगदुत्पत्तेरणुगतकर्मपूर्वकत्वाभावः॥ ११ ॥

समवायाभ्युपगमाच्च साम्यादनवस्थितेः॥ १२॥

समवायाभ्युपगमाच्चासमञ्जसम्। कुतः। साम्यादनवस्थितेः। समवायस्याप्यवयविजातिगुणवदुपपादकान्तरापेक्षासाम्यादुप-

---

3 E. reads सर्वदा for सदा, A. B. om. च after आत्मगतस्य.

4. C reads स्य for गत after परमाणु.

8. C. om. वि before पच्यन्ते.

10. C. reads पूर्वकम् for पूर्वक, A टिप्पणी reads पूर्वकमयुगपत् for पूर्वकयुगपत्, C. reads अनेकविध for अनेकविविध.

11. C. reads एकरूपस्य for एकरूप.

19. B. reads अवयव for अवयवि.

पादकान्तरस्यापि तथेत्यनवस्थितेरसमञ्जसमेव । एतदुक्तं भवति। अयुतसिद्धानामाधाराधेयभूतानामिहप्रत्ययहेतुर्यः संबन्धः स समवाय इति समवायोऽभ्युपगम्यते । अपृथक्स्थित्युपलब्धीनां जात्यादीनां तथाभावस्य निर्वाहकत्वेन चेत्समवायोऽभ्युपगम्यते समवायस्यापि तत्साम्यात्तथाभावहेतुरन्वेषणीयः। तस्यापि तथेत्यनवस्थितिः। समवायस्य तदपृथक्सिद्धत्वं स्वभाव इति परिकल्प्यते चेज्जातिगुणादीनामेवैष स्वभावः परिकल्पनीयः । न पुनरदृष्टचरं समवायमभ्युपगम्य तस्यैष स्वभाव इति कल्पयितुं युक्तमिति । समवायस्य नित्यत्वेनित्यत्वे चायं दोषः समानः ॥ १२ ॥

नित्यत्वे दोषान्तरं चाह।

नित्यमेव च भावात्॥ १३ ॥

समवायस्य संबन्धत्वात्संबन्धनित्यत्वे संबन्धिनो जगतश्च नित्यमेव भावादसमञ्जसम् ॥ १३ ॥

रूपादिमत्त्वाच्च विपर्ययो दर्शनात्॥ १४ ॥

परमाणूनां पार्थिवाप्यतैजसवायवीयानां चतुर्विधानां रूपरसगन्धस्पर्शवत्त्वाभ्युपगमादभिमतनित्यत्वसूक्ष्मत्वनिरवयवत्वादिविपर्ययेणानित्यत्वस्थूलत्वसावयवत्वादि प्रसज्येत । रूपादिमतां घटादीनामनित्यत्वं तथाविधकारणान्तरारब्धत्वादिदर्शनात्। न हि दर्शनानुगुण्येनादृष्टोऽर्थः कल्प्यमानः स्वाभिमतविशेषं

---

2. C. reads आधार्याधार for आधाराधेय, C. om यः.

6. C. om. समवायस्य तदपृ ..पुनरदृष्टचरम्.

9. C. reads परि before कल्पयितुम्.

11. C. om. च after दोषान्तरम्.

20. C. reads विशेषे for विशेषम्.

http://acharya.org

व्यवस्थापयितुं शक्यः । दर्शनानुगुण्येन हि परमाणूना रूपादिमत्त्वं त्वया कल्प्यते । अतोप्यसमञ्जसम् ॥ १४ ॥

अथैतद्दोषपरिजिहीर्षया परमाणूनां रूपादिमत्त्वं नाभ्युपगम्यते तत्राह ।

उभयथा च दोषात् ॥ १५ ॥

न केवलं परमाणूनां रूपादिमत्त्वाभ्युपगम एव दोषः । रूपादिविरहेपि कारणगुणपूर्वकत्वात्कार्यगुणानां पृथिव्यादयो रूपादिशून्याः स्युः । तत्परिजिहीर्षया रूपादिमत्त्वाभ्युपगमे पूर्वोक्तदोष इत्युभयथा च दोषादसमञ्जसम् ॥ १५ ॥

अपरिग्रहाच्चात्यन्तमनपेक्षा ॥ १६ ॥

कापिलपक्षस्य श्रुतिन्यायविरोधपरित्यक्तस्यापि सत्कार्यवादादिना कचिदंशे वैदिकैः परिग्रहोस्ति । अस्य तु काणादपक्षस्य केनाप्यंशेनापरिग्रहादनुपपन्नत्वाच्चात्यन्तमनपेक्षैव निःश्रेयसार्थिभिः कार्या ॥ १६ ॥ महद्दीर्घाधिकरणं समाप्तम् । (२)

समुदाय उभयहेतुकेपि तदप्राप्तिः ॥ १७ ॥

परमाणुकारणवादिनो वैशेषिका निरस्ताः । सौगताश्च जगतः परमाणुकारणत्वमभ्युपगच्छन्तीत्यनन्तरं तन्मतेपि जगदुत्पत्तिव्यवहारादिकं नोपपद्यत इत्युच्यते । ते च चतुर्विधाः । केचित्पार्थिवाप्यतैजसवायवीयपरमाणुसंघातरूपान्भूतभौतिकान्बाह्यांश्चित्तचैत्तरूपांश्चाभ्यन्तरानर्थान्प्रत्यक्षानुमानसिद्धानभ्युपयन्ति । अन्ये तु बाह्यार्थान्सर्वान्पृथिव्यादीन्विज्ञानानुमेयान्व-

---

2. C. reads च after रूपादिमत्त्वम्

15. C. om. अपि after उभयहेतुके.

20. C. reads अभ्यन्तर for अभ्यन्तरान्; C. reads अभ्युपगच्छन्ति

दन्ति । अपरे त्वर्थशून्यं विज्ञानमेव परमार्थसद्बाह्यार्थास्तु स्वाप्नार्थकल्पा इत्याहुः । त्रयोप्येते स्वाभ्युपगतं वस्तु क्षणिकमाचक्षते । उक्तभूतभौतिकचित्तचैत्तव्यतिरिक्तमात्माकाशादिकं स्वरूपेणैव नानुमन्यन्ते । अन्ये तु सर्वशून्यत्वमेव संगिरन्ते ।

तत्र ये बाह्यार्थास्तित्ववादिनस्ते तावन्निरस्यन्ते ।

ते चैवं मन्यन्ते । रूपरसस्पर्शगन्धस्वभावाः पार्थिवाः परमाणवो रूपरसस्पर्शस्वभावाश्चाप्या रूपस्पर्शस्वभावास्तैजसाः स्पर्शस्वभावा वायवीयाः पृथिव्यप्तेजोवायुरूपेण संहन्यन्ते । तेभ्यश्च पृथिव्यादिभ्यः शरीरेन्द्रियविषयरूपसंघाता भवन्ति । तत्र च शरीरान्तर्वर्तिग्राहकाभिमानारूढो ज्ञानसंतान एवात्मत्वेनावतिष्ठते । तत एव सर्वो लौकिकव्यवहारः प्रवर्तत इति । तत्राभिधीयते ।

समुदाय उभयहेतुकेपि तदप्राप्तिः । योयमणुहेतुकः पृथिव्यादिभूतात्मकः समुदायो यश्च पृथिव्यादिहेतुकः शरीरेन्द्रियविषयरूपः समुदायस्तस्मिन्नुभयहेतुकेपि समुदाये तत्प्राप्तिर्नोपपद्यते । जगदात्मकसमुदायोत्पत्तिर्नोपपद्यत इत्यर्थः । परमाणूनां पृथिव्यादिभूतानां च क्षणिकत्वाभ्युपगमात् । क्षणध्वंसिनः परमाणवो भूतानि च कदा संहतौ व्याप्रियन्ते कदा वा संहन्यन्ते कदा विज्ञानविषयीभूताः कदा च हानादिव्यवहारास्पदतां भजन्ते ।

---

1. A. E. read परमार्थम् for परमार्थ.
2. C. reads अभ्युपेतम् for अभ्युपगतम्.
4. C. reads सगिरन्ति for सगिरन्ते.
7. C. reads च before तैजसाः.
8. C. reads च before वायवीयाः.
10. C. om. च after तत्र; B reads रूप. for आरूढ.; C. reads वि before ज्ञानसतान.
11. C. reads सर्वे for सर्वं.
19. C. reads च before विज्ञान; C. reads आदान after हान.

http://acharya.org

को वा विज्ञानात्मा कं च विषयं स्पृशति। कश्च विज्ञानात्मा कमर्थं कदा वेदयते। कं वा विदितमर्थं कश्च कदोपादत्ते। स्प्रष्टा हि नष्टः स्पृष्टश्च नष्टः। तथा वेदिता विदितश्च नष्टः। कथं चान्येन स्पृष्टमन्यो वेदयते। कथं चान्येन विदितमन्यमर्थमन्य उपादत्ते। संतानानामेकत्वेपि संतानिभ्यस्तेषां वस्तुतो वस्त्वन्तरत्वानभ्युपगमान्न तन्निबन्धनं व्यवहारादिकमुपपद्यते। अहमर्थ एवात्मा स च ज्ञातैवेति चोपपादितं पुरस्तात्॥ १७॥

इतरेतरप्रत्ययत्वादुपपन्नमिति चेन्न संघातभावानिमित्तत्वात्॥ १८॥

अविद्यादीनामितरेतरहेतुत्वेनोपपन्नं संघातभावादिकमिति चेत्। एतदुक्तं भवति। यद्यपि क्षणिकाः सर्वे भावास्तथाप्यविद्ययैतत्सर्वमुपपद्यते। अविद्या हि नाम विपरीतबुद्धिः क्षणिकादिषु स्थिरत्वादिगोचरा। तया संस्काराख्या रागद्वेषादयो जायन्ते। ततश्चित्ताभिज्वलनरूपं विज्ञानम्। ततश्च नामाख्याश्चित्तचैत्ताः। ततश्च पृथिव्यादिकं च रूपिद्रव्यम्। ततः षडायतनाख्यमिन्द्रियषट्कम्। ततः स्पर्शाख्यः कायः। ततो वेदनादयः। ततश्च पुनरप्यविद्यादयो यथोक्ता इत्यनादिरियमविद्यादिकान्योन्यमूला चक्रपरिवृत्तिः। एतच्च सर्वं पृथिव्यादिभूतभौतिकसंघातमन्तरेण नोपपद्यते। अतः संघातभावादिकमुपपन्नमिति।

तत्रोत्तरं न संघातभावानिमित्तत्वादिति। नैतदुपपद्यते।

---

1 B reads ज्ञानात्मा for first विज्ञानात्मा

8 C. reads सघातभान for न सघातभाव.

12. C. reads एव तत् for एतत् befoie सर्वम्.

13. B. reads गोचरतया for गोचरा। तया.

14. C. reads नामाख्य foı नामाख्या .

http://acharya.org

एषामविद्यादीनां पृथिव्यादिभूतभौतिकसंघातभावं प्रत्यनिमित्तत्वात् । न खल्वस्थिरादिषु स्थिरत्वादिबुद्ध्यात्मिकाविद्या तन्निमित्ता रागद्वेषादयो वार्थान्तरस्य क्षणिकस्य संहतिहेतुतां प्रतिपद्यन्ते । शुक्तिकारजतादिबुद्धिर्हि न शुक्त्याद्यर्थसंहतिहेतुर्भवति । किं च यस्य क्षणिके स्थिरबुद्धिः स तदैव नष्ट इति कस्य रागादय उत्पद्यन्ते । संस्काराश्रयं स्थिरमेकद्रव्यमनभ्युपगच्छतां संस्कारानुवृत्तिरपि न शक्या कल्पयितुम् ॥ १८ ॥

उत्तरोत्पादे च पूर्वनिरोधात् ॥ १९ ॥

इतश्च क्षणिकत्वपक्षे जगदुत्पत्तिर्नोपपद्यते। उत्तरक्षणोत्पत्तिवेलायां पूर्वक्षणस्य विनष्टत्वात्तस्योत्तरक्षणं प्रति हेतुत्वानुपपत्तेः । अभावस्य हेतुत्वे सर्वं सर्वत्र सर्वदोत्पद्येत । अथ पूर्वक्षणवर्तित्वमेव हेतुत्वमित्युच्यत एवं तर्हि कश्चिदेव घटक्षणस्तदुत्तरकालभाविनां सर्वेषामेव गोमहिषाश्वकुड्यपाषाणादीनां त्रैलोक्यवर्तिनां हेतुः स्यात् । अथैकजातीयस्यैव पूर्वक्षणवर्तिनो हेतुत्वमिष्यते तथापि सर्वदेशवर्तिनामुत्तरक्षणभाविनां घटानामेक एव पूर्वक्षणवर्ती घटो हेतुः स्यात् । अथैकस्यैव हेतुरेक इति मनुषे तथापि कस्यैकस्य को हेतुरिति न ज्ञायते । अथ यस्मिन्देशे यो घटक्षणः स्थितस्तद्देशसंबन्धिन एवोत्तरघटक्षणस्य हेतुरिति । किं देशस्य स्थिरत्वं मनुषे । किं च चक्षुरादिसंप्रयुक्तस्यार्थस्य ज्ञानोत्पत्तिकालेनवस्थितत्वान्न कस्यचिदर्थस्य ज्ञानविषयत्वं संभवति ॥ १९ ॥

असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ॥ २० ॥

असत्यपि हेतौ कार्यमुत्पद्यते चेत्सर्वं सर्वत्र सर्वदोत्पद्येते-

---

1. C reads तेषाम् for एषाम्.

6. C. reads सस्काराश्रयस्थिरमेकम् for सस्काराश्रय स्थिरमेक.

19. B. om. प्र after सम्

http://acharya.org

त्युक्तम् । न केवलमुत्पत्तिविरोध एव प्रतिज्ञा च भवतामुपरुध्येत । अधिपतिसहकार्यालम्बनसमनन्तरप्रत्ययाश्चत्वारो विज्ञानोत्पत्तौ हेतव इति वः प्रतिज्ञा । अधिपतिरिन्द्रियम् । अथ प्रतिज्ञानुपरोधाय घटक्षणे स्थित एव घटक्षणान्तरोत्पत्तिरिष्यते तथा च सति द्वयोः कार्यकारणयोर्घटक्षणयोर्यौगपद्येनोपलब्धिः प्रसज्येत । न च तथोपलभ्यते । क्षणिकत्वप्रतिज्ञा चैवं हीयेत । क्षणिकत्वं स्थितमेवेति चेदिन्द्रियसंप्रयोगज्ञानयोर्यौगपद्यं प्रसज्येत ॥ २० ॥

प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात् ॥ २१ ॥

एवं तावदसत उत्पत्तिर्निरस्ता । सतो निरन्वयो विनाशोपि नोपपद्यत इत्युच्यते । क्षणिकत्ववादिभिर्मुद्गराभिघाताद्यनन्तरभावितयोपलब्धियोग्यः सदृशसंतानावसानरूपः स्थूलो यः सदृशसंताने प्रतिक्षणभावी चोपलब्ध्यनर्हः सूक्ष्मश्च यो निरन्वयो विनाशः प्रतिसंख्याप्रतिसंख्यानिरोधशब्दाभ्यामभिधीयते तौ न संभवत इत्यर्थः । अविच्छेदात् । सतो निरन्वयविच्छेदासंभवात् । असंभवश्च सत उत्पत्तिविनाशौ नामावस्थान्तरापत्तिरेव । अवस्थायोगि तु द्रव्यमेकमेव स्थिरमिति कारणादनन्यत्वं कार्यस्योपपादयद्भिरस्माभिस्तदनन्यत्वम् (ब्र. सू. २।१।१५) इत्यत्र प्रतिपादितम् । निर्वाणस्य दीपस्य निरन्वयविनाशदर्शनादन्यत्रापि विनाशो निरन्वयोनुमीयत इति चेन्न । घट-

1. B. reads उपरुध्यते for उपरुध्येत
6 C. reads हीयते for हीयेत.
7. B om. प्र before योग
14. A. E. read अभिधीयेते for अभिधीयते.
16. C. reads स्वत' for सत after च.

http://acharya.org

शरावादौ मृदादिद्रव्यानुवृत्त्युपलब्ध्या सतो द्रव्यस्यावस्थान्तरापत्तिरेव विनाश इति निश्चिते सति प्रदीपादौ सूक्ष्मदशापत्त्याप्यनुपलम्भोपपत्तेस्तत्राप्यवस्थान्तरापत्तिकल्पनस्यैव युक्तत्वात् ॥ २१ ॥

उभयथा च दोषात् ॥ २२ ॥

क्षणिकत्ववादिभिरभ्युपेतात्तुच्छादुत्पत्तिरुत्पन्नस्य तुच्छतापत्तिश्च न संभवतीत्युक्तम् । तदुभयप्रकाराभ्युपगतो दोषश्च भवति। तुच्छादुत्पत्तौ तुच्छात्मकमेव कार्यं स्यात् । यद्धि यस्मादुत्पद्यते तत्तदात्मकं दृष्टं यथा मृत्सुवर्णादेरुत्पन्नं मणिकमुकुटादि मृत्सुवर्णाद्यात्मकं दृष्टम् । न च जगत्तुच्छात्मकं भवद्भिरभ्युपगम्यते न च प्रतीयते । सतो निरन्वयविनाशे सत्येकक्षणादूर्ध्वं कृत्स्नस्य जगतस्तुच्छतापत्तिरेव स्यात् । पश्चात्तु तुच्छाज्जगदुत्पत्तावनन्तरोक्तं तुच्छात्मकमेव स्यात् । अत उभयथापि दोषान्न भवदुक्तप्रकारावुत्पत्तिनिरोधौ ॥ २२ ॥

आकाशे चाविशेषात् ॥ २३ ॥

बाह्यान्तरवस्तुनः स्थिरत्वप्रतिपादनाय प्रतिसंख्याप्रतिसंख्यानिरोधयोस्तुच्छरूपता निराकृता । तत्प्रसङ्गेन ताभ्यां सह तुच्छत्वेन सौगतैः परिगणितस्याकाशस्यापि तुच्छता प्रतिक्षिप्यते । आकाशे च निरुपाख्यता न युक्ता । भावरूपत्वेनाभ्युपगतपृथिव्यादिवदाकाशस्याप्यबाधितत्वप्रतीतिसिद्धत्वाविशेषात् । प्रतीयते ह्याकाशोऽत्र श्येनः पतत्यत्र गृध्र इति श्येनादिप-

---

10. A. reads दृष्टम् after तुच्छात्मकम्

14. A. B. C. read प्रकारात् for प्रकारौ.

16. C. reads बाह्याभ्यन्तर for बाह्यान्तर.

20. C. om. अपि after आकाशस्य.

http://acharya.org

तनदेशत्वेन। न च पृथिव्याद्यभावमात्रमाकाश इति वक्तुं शक्यम्। विकल्पासहत्वात्। पृथिव्यादेः प्रागभावः प्रध्वंसाभाव इतरेतराभावोत्यन्ताभावो वाकाशः। सर्वथाप्याकाशप्रतीत्यनुपपत्तिः स्यात्। प्रागभावप्रध्वंसाभावयोराकाशत्वे पृथिव्यादिषु वर्तमानेष्वाकाशप्रतीत्ययोगान्निराकाशं जगत्स्यात्। इतरेतराभावस्याकाशत्वेपीतरेतराभावस्य तत्तद्वस्तुगतत्वेन तेषामन्तराल आकाशप्रतीतिर्न स्यात्। अत्यन्ताभावस्तु पृथिव्यादीनां न संभवति। अभावस्य विद्यमानपदार्थावस्थाविशेषत्वोपपादनाच्चाकाशस्याभावरूपत्वेपि न निरुपाख्यत्वम्। अण्डान्तर्वर्तिन आकाशस्य त्रिवृत्करणोपदेशप्रदर्शितपञ्चीकरणेन रूपवत्त्वाच्चाक्षुषत्वेप्यविरोधः॥ २३॥

अनुस्मृतेश्च॥ २४॥

पूर्वप्रस्तुतं वस्तुनः स्थिरत्वमेवोपपाद्यते। अनुस्मरणं पूर्वानुभूतवस्तुविषयं ज्ञानं प्रत्यभिज्ञानमित्यर्थः। तदेवेदमिति सर्वं वस्तुजातमतीतकालानुभूतं प्रत्यभिज्ञायते। न च भवद्भिर्ज्वालादिष्विव सादृश्यनिबन्धनोयमेकत्वव्यामोह इति वक्तुं शक्यम्। व्यामुह्यतो ज्ञातुरेकस्यानभ्युपगमात्। न ह्यन्यानुभूतेनैकत्वं सादृश्यं वा स्वानुभूतस्यान्योनुसंधत्ते। अतो भिन्नकालवस्त्वाश्रयसादृश्यानुभवनिबन्धनमेकत्वव्यामोहं वदद्भिर्ज्ञातुरेकत्वमवश्याश्रयणीयम्। न च ज्ञेयेष्वपि घटादिषु ज्वालादिष्विव भेदसाधनप्रमाणमुपलभामहे। येन सादृश्यनिबन्धनां प्रत्यभिज्ञां कल्पयेम।

---

2. A. B. read न च before पृथिव्यादेः

7. A. B. read अन्तराल for अन्तराले.

17. B. reads अस्य for अन्य after हि.

http://acharya.org

यदपि चेदमुच्यते प्रत्यक्षानुमानाभ्यां घटादेः क्षणिकत्वं सिध्यति। प्रत्यक्षं तावद्वर्तमानार्थविषयमवर्तमानाद्वस्तुनो व्यावृत्तं स्वविषयमवगमयति नीलमिव पीतात् । एवं च भूतभविष्यद्व्यावर्तमानस्य वस्त्वन्तरत्वमवगतं भवति। अनुमानमपि। अर्थक्रियाकारित्वात्सत्त्वाच्च घटादि क्षणिकम् । यदक्षणिकं शशविषाणादि तदनर्थक्रियाकार्यसच्च। तथान्त्यघटक्षणसत्त्वात्पूर्वघटक्षणसत्त्वानि विनाशीनि घटक्षणसत्त्वादन्त्यघटक्षणसत्त्ववदिति । तच्च कार्यकारणभावानुपपत्त्यादिभिः पूर्वमेव निरस्तम् । किं च प्रत्यक्षगम्या वर्तमानस्यावर्तमानाद्व्यावृत्तिर्न वर्तमानस्य वस्त्वन्तरत्वमवगमयति। अपि तु वर्तमानकालयोगितामात्रम्। न च तावता वस्त्वन्तरत्वं सिध्यति । तस्यैव कालान्तरयोगसंभवात् ।

यत्तु सत्त्वादर्थक्रियाकारित्वादिति क्षणिकत्वे हेतुद्वयमुक्तं तदभिमतविपरीतसाधनत्वाद्विरुद्धम् । सत्त्वादर्थक्रियाकारित्वाद्वा घटादि स्थास्नु । यदस्थास्नु तदसदनर्थक्रियाकारि च यथा शशविषाणमित्यपि वक्तुं शक्यम् । किं चार्थक्रियाकारित्वमक्षणिकत्वमेव साधयेत् । क्षणध्वंसिनो हि व्यापारासंभवादर्थक्रियाकारित्वं न संभवतीत्युक्तम् । तथान्त्यघटक्षणस्य हेतुतो नाशदर्शनादितरेपि घटक्षणा हेत्वपेक्षविनाशाः स्युरित्या मुद्गरादिहेतूपनिपातात्स्थास्नुत्वमेव । न च वाच्यं न मुद्गरादयो

---

3 E reads भूतभविष्यद्भ्यां वर्तमानस्य for भूतभविष्यद्व्यावर्तमानस्य.

5. C reads घटादि. क्षणिक for घटादि क्षणिकम्.

9. A. B. om. वर्तमानस्य after न

12. E reads च after अर्थक्रियाकारित्वात्.

13. A. reads त्वत् before अभिमत.

15 E. reads हि after इत्यपि.

16. C. reads अपि for हि.

17. C. reads वि before नाशदर्शनात्.

http://acharya.org

विनाशहेतवोपि तु कपालादिविसदृशसंतानोत्पत्तिहेतव इति । कपालत्वावस्थापत्तिरेव घटादीनां विनाश इत्युपपादितत्वात् । कपालोत्पत्तिव्यतिरिक्तत्वाभ्युपगमेपि विनाशस्य विनाशहेतुत्वमेव मुद्गरादेरानन्तर्याद्युक्तम् । अतः प्रत्यभिज्ञायाःस्थिरत्वमवगम्यमानं न केनापि प्रकारेणापह्नोतुं शक्यम् । पूर्वापरकालसंबन्ध्यर्थैक्यविषयायाः प्रत्यभिज्ञाया अन्यविषयत्वं ब्रुवन्नीलादिज्ञानानामपि नीलादेरर्थान्तरविषयत्वं ब्रूयात् । किं च प्रमातृप्रमेययोः क्षणिकत्वं वदद्भिर्व्याप्त्यवधारणतत्स्मरणपूर्वकानुमानाभ्युपगमोपि दुःशकः । तथेदं क्षणिकमित्यादिप्रतिज्ञापूर्वकहेतूपन्यासादिकमपि नोपपद्यते भवताम् । प्रतिज्ञोपक्रमक्षण एव वक्तुर्विनष्टत्वात् । न ह्यन्येनोपक्रान्तमजानद्भिरन्यैः समापयितुं शक्यम् ॥ २४ ॥

नासतोदृष्टत्वात् ॥ २५ ॥

एवं तावद्वैभाषिकसौत्रान्तिकयोर्बाह्यार्थास्तित्ववादिनोः साधारणानि दूषणान्युक्तानि । तत्र यदुक्तं संप्रयुक्तस्यार्थस्य ज्ञानोत्पत्तिकालेनवस्थितत्वान्न कस्यचिदर्थस्य ज्ञानविषयत्वं संभवतीति तत्र सौत्रान्तिकः प्रत्यवतिष्ठते ।

न ज्ञानकालेवस्थानमर्थस्य ज्ञानविषयत्वहेतुः । ज्ञानोत्पत्तिहेतुत्वमेव हि ज्ञानविषयत्वम् । न चैतावता चक्षुरादेर्ज्ञानविष-

---

2. C. reads अवस्थाविशेषः for अवस्थापत्ति°.

4. C. reads प्रत्यभिज्ञा for प्रत्यभिज्ञाया.

5. C. reads आस्थातुम् for अपह्नोतुम्.

6. B. reads अनन्यविषयत्वम् for अन्यविषयत्वम्.

9. B. reads तत् for तथा before इदम्.

15. A. B. om. तत्र; B. om. प्र before युक्तस्य.

18. A. B. read अनवस्थानमर्थस्य ज्ञानाविषयत्व for अवस्थानमर्थस्य ज्ञानविषयत्व; C. reads विषयत्वे for विषयत्व

http://acharya.org

यत्वप्रसङ्गः । स्वाकारसमर्पणेन ज्ञानहेतोरेव ज्ञानविषयत्वाभ्युपगमात् । ज्ञाने स्वाकारं समर्प्य विनष्टोप्यर्थो ज्ञानगतेन नीलाद्याकारेणानुमीयते । न च पूर्वपूर्वज्ञानेनोत्तरोत्तरज्ञानाकारसिद्धिः । नीलज्ञानसंततौ पीतज्ञानानुत्पत्तिप्रसङ्गात् । अतोर्थकृतमेव ज्ञानवैचित्र्यमिति । अत्रोच्यते ।

नासतोदृष्टत्वादिति । योयं ज्ञाने नीलादिराकार उपलभ्यते स विनष्टस्यासतोर्थस्याकारो भवितुं नार्हति । कुतः । अदृष्टत्वात् । न खलु धर्मिणि विनष्टे तद्धर्मस्यार्थान्तरे संक्रमणं दृष्टम् । प्रतिबिम्बादिकमपि स्थिरस्यैव भवति । तत्रापि न धर्ममात्रस्य । अतोर्थवैचित्र्यकृतं ज्ञानवैचित्र्यमर्थस्य ज्ञानकालेवस्थानादेव भवति ॥ २५ ॥

पुनरपि साधारणं दूषणमाह ।

उदासीनानामपि चैवं सिद्धिः ॥ २६ ॥

एवं क्षणिकत्वासदुत्पत्त्यहेतुकविनाशाद्यभ्युपगम उदासीनानामनुद्युञ्जानानामपि सर्वार्थसिद्धिः स्यात् । इष्टप्राप्तिरनिष्टनिवृत्तिर्वा प्रयत्नादिभिः साध्यते । क्षणध्वंसे हि सर्वेषां भावानां पूर्वपूर्ववस्तु तद्गतो वा विशेषः संस्कारादिकोविद्यादिर्वोत्तरत्र न कश्चिदनुवर्तत इति प्रयत्नादिसाध्यं न किंचिदस्ति । एवं सत्यहेतुसाध्यत्वात्सर्वसिद्धीनामुदासीनानामप्यैहिकामुष्मिकफलं मोक्षश्च सिध्येत् ॥ २६ ॥ समुदायाधिकरणं समाप्तम् । (३)

---

3. C. om. पूर्व after पूर्व, A. B. E. om. उत्तर after उत्तर.
11. E. reads सम् before भवति.
12. B. reads हि for अपि after पुन..
17. A. B. read पूर्वपूर्वम् for पूर्वपूर्व; C. reads वस्तुगतो वा विशेष for वस्तु तद्गतो वा विशेषः.
18. E. reads प्रयत्नादिभिः for प्रयत्नादि.
19. C. reads आमुष्मिकम् for आमुष्मिक.

http://acharya.org

नाभाव उपलब्धेः॥ २७ ॥

विज्ञानमात्रास्तित्ववादिनो योगाचाराः प्रत्यवतिष्ठन्ते । यदुक्तमर्थवैचित्र्यकृतं ज्ञानवैचित्र्यमिति तन्नोपपद्यते । अर्थवज्ज्ञानानामेव साकाराणां स्वयमेव विचित्रत्वात् । तच्च स्वरूपवैचित्र्यं वासनावशादेवोपपद्यते । वासना च विलक्षणप्रत्ययप्रवाह एव । यद्घटाकारं ज्ञानं कपालाकारज्ञानस्योत्पादकं तस्य तथाविधस्योत्पादकं तत्पूर्वघटज्ञानं तस्य च तथाविधस्योत्पादकं ततःपूर्वघटज्ञानमित्येवंरूपः प्रवाह एव वासनेत्युच्यते । कथं बहिष्ठसर्षपमहीधरादिराकार आन्तरस्य ज्ञानस्यैवेत्युच्यते । इत्थम् । अर्थस्यापि व्यवहारयोग्यत्वं ज्ञानप्रकाशायत्तम् । अन्यथा स्वपरवेद्ययोरनतिशयप्रसङ्गात् । प्रकाशमानस्य च ज्ञानस्य साकारत्वमवश्याश्रयणीयम् । निराकारस्य प्रकाशायोगात् । एकश्चायमाकार उपलभ्यमानो ज्ञानस्यैव । तस्य च बहिर्वदवभासोपि भ्रमकृतः । ज्ञानार्थयोः सहोपलम्भनियमाच्च ज्ञानादव्यतिरिक्तोर्थः । किं च बाह्यमर्थमभ्युपयद्भिरपि घटपटादिविज्ञानेषु ज्ञानस्य तत्तदर्थासाधारण्यं तत्तदर्थसारूप्यमन्तरेण नोपपद्यत इत्यवश्यं ज्ञानेर्थसरूपं रूपमास्थेयम् । तावतैव सर्वव्यवहारोपपत्तेस्तद्व्यतिरिक्तार्थकल्पना निष्प्रमाणिका । अतो विज्ञानमात्रमेव तत्त्वं न बाह्यार्थोस्तीत्येवं प्राप्ते प्रचक्ष्महे ।

नाभाव उपलब्धेरिति । ज्ञानव्यतिरिक्तस्यार्थस्याभावो वक्तुं

---

6. A. B. read घटाकार for घटाकारम्; A. reads तत्पूर्वघटज्ञानम् after ज्ञानस्योत्पादकम्; B. om. तस्य तथाविधस्योत्पादकम्.

9. C. om. एव after ज्ञानस्य.

17. C. reads अर्थस्य for अर्थसरूपम्.

19. C. reads बाह्य. for बाह्म.

20. C. om. वि before अतिरिक्तस्य.

http://acharya.org

न शक्यते । कुतः । उपलब्धेः । ज्ञातुरात्मनोऽर्थविशेषव्यवहारयोग्यतापादनरूपेण ज्ञानस्योपलब्धेः । एवमेव हि सर्वे लौकिकाः प्रतियन्ति घटमहं जानामीति । एवंरूपेण सकर्मकेण सकर्तृकेण ज्ञाधात्वर्थेन सर्वलोकसाक्षिकमपरोक्षमवभासमानेनैव ज्ञानमात्रमेव परमार्थ इति साधयन्तः सर्वलोकोपहासोपकरणं भवन्तीति वेदवादच्छद्मप्रच्छन्नबौद्धनिराकरणे निपुणतरं प्रपञ्चितम् (पृ. ३९) । यत्तु

सहोपलम्भनियमादभेदो नीलतद्धियोः ।

इति तत्स्ववचनविरुद्धम् । साहित्यस्यार्थभेदहेतुकत्वात् । तदर्थव्यवहारयोग्यतैकस्वरूपस्य ज्ञानस्य तेन सहोपलम्भनियमस्तस्मादवैलक्षण्यसाधनमिति च हास्यम् । निरन्वयविनाशिनां ज्ञानानामनुवर्तमानस्थिराकारविरहाद्वासना च दुरुपपादा । विनष्टेन पूर्वज्ञानेनानुत्पन्नमुत्तरज्ञानं कथं वास्यते । अतो ज्ञानवैचित्र्यमप्यर्थवैचित्र्यकृतमेव । तत्तदर्थव्यवहारयोग्यतापादनरूपतया साक्षात्प्रतीयमानस्य ज्ञानस्य तत्तदर्थसंबन्धायत्तं तत्तदसाधारण्यम् । संबन्धश्च संयोगलक्षणः । ज्ञानमपि हि द्रव्यमेव । प्रभाद्रव्यस्य प्रदीपगुणभूतस्येव ज्ञानस्याप्यात्मगुणभूतस्य द्रव्यत्वमविरुद्धमित्युक्तम् । अतो न बाह्यार्थाभावः ॥ २७ ॥

यत्परैः स्वप्नज्ञानदृष्टान्तेन जागरितज्ञानानामपि निरालम्बनत्वमुक्तं तत्राह ।

वैधर्म्याच्च न स्वप्नादिवत् ॥ २८ ॥

स्वप्नज्ञानवैधर्म्याज्जागरितज्ञानानामर्थशून्यत्वं न युज्यते स्व-

---

6. A. B. read भवति for भवन्ति.

10. A. B. read आपादनता after योग्यता.

14. C. om. तत् before तदर्थ.

15. C. om. ज्ञानस्य.

http://acharya.org

कुम् । स्वप्नज्ञानानि हि निद्रादिदोषदुष्टकरणजन्यानि बाधितानि च । जागरितज्ञानानि तु तद्विपरीतानीति तेषां न तत्साम्यम् । सर्वेषां च ज्ञानानामर्थशून्यत्वे भवद्भिः साध्योप्यर्थो न सिध्यति । निरालम्बनानुमानज्ञानस्याप्यर्थशून्यत्वात् । तस्यार्थवत्त्वे ज्ञानत्वस्यानैकान्त्यात्सुतरामर्थशून्यत्वासिद्धिः ॥ २८ ॥

न भावोनुपलब्धेः ॥ २९ ॥

न केवलस्यार्थशून्यस्य ज्ञानस्य भावः संभवति । कुतः । क्वचिदप्यनुपलब्धेः । न ह्यकर्तृकस्याकर्मकस्य वा ज्ञानस्य क्वचिदुपलब्धिः । स्वप्नज्ञानादिष्वपि नार्थशून्यत्वमिति ख्यातिनिरूपणे (पृ. ९७) प्रतिपादितम् ॥२९॥ उपलब्ध्यधिकरणं समाप्तम् । (४)

सर्वथानुपपत्तेश्च ॥ ३० ॥

अत्र सर्वशून्यवादी माध्यमिकः प्रत्यवतिष्ठते । शून्यवाद एव हि सुगतमतकाष्ठा । शिष्यबुद्धियोग्यतानुगुण्येनार्थाभ्युपगमादिना क्षणिकत्वादय उक्ताः । विज्ञानं बाह्यार्थाश्च सर्वे न सन्ति । शून्यमेव तत्त्वम् । अभावापत्तिरेव च मोक्ष इत्येव बुद्धस्याभिप्रायः । तदेव हि युक्तम् । शून्यस्याहेतुसाध्यतया स्वतःसिद्धेः । सत एव हि हेतुरन्वेषणीयः । तच्च सद्भावादभावाच्च नोत्पद्यते । भावात्तावन्न कस्यचिदुत्पत्तिर्दृष्टा । न हि घटादिरनुपमृदिते पिण्डादिके जायते । नाप्यभावादुत्पत्तिः संभवति । नष्टे पिण्डादिके ह्यभावादुत्पद्यमानं घटादिकमभावात्मकमेव स्यात् ।

---

7. C reads केवलम् for केवलस्य.
9. C. reads अपि before उपलब्धि; C. reads स्वप्नज्ञानस्य for स्वप्नज्ञानादिषु.
12. E. reads त्व after सर्वशून्य.
14. B. om. सर्वे.
17. C. reads उपपद्यते for उत्पद्यते.
20. A. B. read उत्पाद्यमानम् for उत्पद्यमानम्.

http://acharya.org

तथा स्वतः परतश्चोत्पत्तिर्न संभवति । स्वतश्चोत्पत्तावात्माश्रयदोषप्रसङ्गात्प्रयोजनाभावाच्च । परतः परोत्पत्तौ परत्वाविशेषात्सर्वेषां सर्वेभ्य उत्पत्तिप्रसङ्गः । जन्माभावादेव विनाशस्याप्यभावः । अतः शून्यमेव तत्त्वम् । अतो जन्मविनाशसदसदादयो भ्रान्तिमात्रम् । न च निरधिष्ठानभ्रमासंभवाद्भ्रमाधिष्ठानं किंचित्पारमार्थिकं तत्त्वमाश्रयितव्यम् । दोषदोषाश्रयत्वज्ञातृत्वाद्यपारमार्थ्येऽपि भ्रमोपपत्तिवदधिष्ठानापारमार्थ्येऽपि भ्रमोपपत्तेः । अतः शून्यमेव तत्त्वमिति प्राप्त उच्यते ।

सर्वथानुपपत्तेश्च । सर्वथानुपपत्तेः सर्वशून्यत्वं च भवदभिप्रेतं न संभवति । किं भवान्सर्वं सदिति वा प्रतिजानीतेसदिति वान्यथा वा । सर्वथा तवाभिप्रेतं तुच्छत्वं न संभवति । लोके भावाभावशब्दयोस्तत्प्रतीत्योश्च विद्यमानस्यैव वस्तुनोवस्थाविशेषगोचरत्वस्य प्रतिपादितत्वात् । अतः सर्वं शून्यमिति प्रतिजानता सर्वं सदिति प्रतिजानतेव सर्वस्य विद्यमानस्यावस्थाविशेषयोगितैव प्रतिज्ञाता भवतीति भवदभिमता तुच्छता न कुतश्चिदपि सिध्यति । किं च कुतश्चित्प्रमाणाच्छून्यत्वमुपलभ्य शून्यत्वं सिसाधयिषता तस्य प्रमाणस्य सत्यत्वमभ्युपेत्यम् । तस्यासत्यत्वे सर्वं सत्यं स्यादिति । सर्वथा सर्वशून्यत्वं चानुपपन्नम् ॥ ३० ॥ सर्वथानुपपत्त्यधिकरणं समाप्तम् । (५)

नैकस्मिन्नसंभवात् ॥ ३१ ॥

निरस्ताः सौगताः । जैना अपि परमाणुकारणत्वादिकं जगतो वदन्तीत्यनन्तरं जैनपक्षः प्रतिक्षिप्यते ।

---

15. C. reads योगितया for योगिता.
17. C. reads सत्त्वम् for सत्यत्वम्.
18. C. reads असत्त्वे for असत्यत्वे.
21. C. reads कारणत्वम् for कारणत्वादिकम्.

http://acharya.org

ते किल मन्यन्ते । जीवाजीवात्मकं जगदेतन्निरीश्वरम् । तच्च षड्द्रव्यात्मकम् । तानि च द्रव्याणि जीवधर्माधर्मपुद्गलकालाकाशाख्यानि । तत्र जीवा बद्धा योगसिद्धा मुक्ताश्चेति त्रिविधाः । धर्मो नाम गतिमतां गतिहेतुभूतो द्रव्यविशेषो जगद्व्यापी । अधर्मश्च स्थितिहेतुभूतो व्यापी । पुद्गलो नाम वर्णगन्धरसस्पर्शवद्द्रव्यम् । तच्च द्विविधं परमाणुरूपं तत्संघातरूपं च पवनज्वलनसलिलधरणीतनुभुवनादिकम् । कालस्त्वभूदस्तिभविष्यतीतिव्यवहारहेतुरणुरूपो द्रव्यविशेषः । आकाशोप्येकोनन्तप्रदेशश्च । तेषु चाणुव्यतिरिक्तद्रव्याणि पञ्चास्तिकाया इति च संगृह्यन्ते । जीवास्तिकायो धर्मास्तिकायोधर्मास्तिकायः पुद्गलास्तिकाय आकाशास्तिकाय इति । अनेकदेशवर्तिनि द्रव्येस्तिकायशब्दः । जीवानां मोक्षोपयोगिनमपरमपि संग्रहं कुर्वन्ति जीवाजीवास्रवबन्धनिर्जरसंवरमोक्षा इति । मोक्षसंग्रहेण मोक्षोपायश्च गृहीतः । स च सम्यग्ज्ञानदर्शनचारित्ररूपः । तत्र जीवस्तु ज्ञानदर्शनसुखवीर्यगुणः । अजीवश्च जीवभोग्यवस्तुजातम् । आस्रवस्तद्भोगोपकरणभूतमिन्द्रियादिकम् । बन्धश्चाष्टविधो घातिकर्मचतुष्टयमघातिकर्मचतुष्टयं चेति । तत्राद्यं जीवगुणानां स्वाभाविकानां ज्ञानदर्शनवीर्यसुखानां प्रतिघातकरम् । अपरं शरीरसंस्थानतदभिमानतत्स्थितितत्प्रयुक्तसुखदुःखोपेक्षाहेतुभूतम् । निर्जरं मोक्षसाधनमर्हदुपदेशावगतं तपः । संवरो नामेन्द्रियनिरोधः समाधिरूपः । मोक्षस्तु निवृत्तरागादिक्लेशस्य

---

7. A. B. read भवन for भुवन.
9. C. reads व्यतिरिक्तानि for व्यतिरिक्त.
10. C. om. च after इति.
16. C. reads करणम् for करणभूतम्.
19. B. reads अपेक्षा for उपेक्षा.
20. C. reads साधनभूतम् for साधनम्.

http://acharya.org

स्वाभाविकात्मस्वरूपाविर्भावः। पृथिव्यादिहेतुभूताश्चाणवो वैशेषिकादीनामिव न चतुर्विधा अपि त्वेकस्वभावाः। पृथिव्यादिभेदस्तु परिणामकृतः।

सर्वं च वस्तुजातं सत्त्वासत्त्वनित्यत्वानित्यत्वभिन्नत्वाभिन्नत्वादिभिरनैकान्तिकमिच्छन्ति। १ स्यादस्ति २ स्यान्नास्ति ३ स्यादस्ति च नास्ति च ४ स्यादवक्तव्यम् ५ स्यादस्ति चावक्तव्यम् ६ स्यान्नास्ति चावक्तव्यम् ७ स्यादस्ति च नास्ति चावक्तव्यं चेति सर्वत्र सप्तभङ्गिनयावतारात्। सर्वं वस्तुजातं द्रव्यपर्यायात्मकमिति द्रव्यात्मना सत्त्वैकत्वनित्यत्वाद्युपपादयन्ति। पर्यायात्मना च तद्विपरीतम्। पर्यायाश्च द्रव्यस्यावस्थाविशेषाः। तेषां च भावाभावरूपत्वात्सत्त्वासत्त्वादिकं सर्वमुपपन्नमिति। अत्राभिधीयते।

नैकस्मिन्नसंभवादिति। नैतदुपपद्यते। कुतः। एकस्मिन्नसंभवात्। एकस्मिन्वस्तुन्यस्तित्वनास्तित्वादेर्विरुद्धस्य च्छायातपवद्युगपदसंभवात्। एतदुक्तं भवति। द्रव्यस्य तद्विशेषणभूतपर्यायशब्दाभिधेयावस्थाविशेषस्य च पृथक्पदार्थत्वान्नैकस्मिन्विरुद्धधर्मसमावेशः संभवति। तथा ह्येकेनास्तित्वादिनावस्थाविशेषेण विशिष्टस्य तदानीमेव न तद्विपरीतनास्तित्वादिविशिष्टत्वं संभवति। उत्पत्तिविनाशाख्यपरिणामविशेषास्पदत्वं च द्रव्यस्यानित्यत्वं तद्विपरीतं च नित्यत्वं तस्मिन्कथं समवैति। विरोधिधर्माश्रयत्वं च भिन्नत्वं तद्विपरीतं चाभिन्नत्वं कथं वा तस्मिन्समवैति। यथाश्वत्वमहिषत्वयोर्युगपदेकस्मिन्नसंभवः। अयमर्थः पूर्वमेव भेदाभेदवादिनिरसनसमये तत्तु समन्वयात्

---

15. E. reads तत् after तत्.

19. C. om. सम् before भवति.

23. C. reads वाद for वादि after भेदाभेद.

http://acharya.org

(ब्र. सू. १।१।४) इत्यत्र प्रपञ्चितः । कालस्य पदार्थविशेषणतयैव प्रतीतेस्तस्य पृथगस्तित्वनास्तित्वादयो न वक्तव्या न च परिहर्तव्याः । कालोस्ति नास्तीति व्यवहारो व्यवहर्तॄणां जात्याद्यस्तित्वनास्तित्वव्यवहारतुल्यः । जात्यादयो हि द्रव्यविशेषणतयैव प्रतीयन्त इति पूर्वमेवोक्तम् ।

कथं पुनरेकमेव ब्रह्म सर्वात्मकमिति श्रोत्रियैरुच्यते । सर्वचेतनाचेतनशरीरत्वात्सर्वज्ञस्य सर्वशक्तेः सत्यसंकल्पस्य पुरुषोत्तमस्येत्युक्तम् । शरीरशरीरिणोस्तद्धर्माणां चात्यन्तवैलक्षण्यमप्युक्तम् । किं च जीवादीनां षण्णां द्रव्याणामेकद्रव्यपर्यायत्वाभावात्तेषु द्रव्यैकत्वेन पर्यायात्मना चैकत्वानेकत्वादयो दुरुपपादाः। अथोच्येत षडेतानि द्रव्याणि स्वकीयैः पर्यायैः स्वेन स्वेन चात्मना तथा भवन्तीति । एवमपि सर्वमनैकान्तिकमित्यभ्युपगमविरोधः । अन्योन्यतादात्म्याभावात् । अतो न युक्तमिदं जैनमतम् । ईश्वरानधिष्ठितपरमाणुकारणवादे पूर्वोक्ता दोषास्तथैवावतिष्ठन्ते ।

एवं चात्माकात्स्न्यम् ॥ ३२ ॥

एवं भवदभ्युपगमे सत्यात्मनश्चाकात्स्न्यं प्रसज्यते । जीवोसंख्यातप्रदेशो देहपरिमाण इति हि भवतां स्थितिः । तत्र हस्त्यादिशरीरे स्थितस्यात्मनस्ततो न्यूनपरिमाणे पिपीलिकाशरीरे प्रविशतोल्पदेशव्यापित्वेनाकात्स्न्यं प्रसज्यते। अपरिपूर्णता प्रसज्यत इत्यर्थः ॥ ३२ ॥

---

2. C. om. नास्तित्व.
6. C. om. पुनः.
12. C. reads सम् before भवन्ति
18 B. om. हि after इति.
19. C. reads अव before स्थितस्य; C. reads आदि after पिपीलिका.

http://acharya.org

अथ संकोचविकाशधर्मतयात्मनः पर्यायशब्दाभिधेयावस्थान्तरापत्त्या विरोधः परिह्रियत इत्युच्यते तत्राह ।

न च पर्यायादप्यविरोधो विकारादिभ्यः ॥ ३३ ॥

न च संकोचविकाशरूपावस्थान्तरापत्त्यापि विरोधः परिहर्तुं शक्यते । विकारतत्प्रयुक्तानित्यत्वादिदोषप्रसक्तेर्घटादितुल्यत्वादिदोषप्रसङ्गात् ॥ ३३ ॥

अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः ॥ ३४ ॥

जीवस्य यदन्त्यं परिमाणं मोक्षावस्थागतं तस्य पश्चाद्देहान्तरपरिग्रहाभावादवस्थितत्वादात्मनश्च मोक्षावस्थस्य तत्परिमाणस्य चोभयोर्नित्यत्वात्तदेवात्मनः स्वाभाविकं परिमाणमिति पूर्वमपि तस्मादविशेषः स्यात् । अतो देहपरिमाणत्वमात्मनो न स्यादित्यसंगतमेवेदमार्हतमतम् ॥ ३४ ॥ एकस्मिन्नसंभवाधिकरण समाप्तम् । (६)

पत्युरसामञ्जस्यात् ॥ ३५ ॥

कपिलकणादसुगतार्हतमतानामसामञ्जस्याद्वेदबाह्यत्वाच्च निःश्रेयसार्थिभिरनादरणीयत्वमुक्तम् । इदानीं पशुपतिमतस्य वेदविरोधादसामञ्जस्याच्चानादरणीयतोच्यते । तन्मतानुसारिणश्चतुर्विधाः कापालाः कालामुखाः पाशुपताः शैवाश्चेति । सर्वे चैते वेदविरुद्धां तत्त्वप्रक्रियामैहिकामुष्मिकश्रेयःसाधनकल्पनां च क-

---

1. C. reads विकास for विकाश.
4. C. reads विकास for विकाश.
6. C. om. आदिदोष.
9. C. reads परिग्रहात् for परिग्रहाभावात्.
12. C. reads आर्हतम् for आर्हत.
14. C. reads अर्हत् for आर्हत.
17. C. reads कापालिकाः for कापालाः.
18. C. reads निःश्रेयस for श्रेयः.

http://acharya.org

ल्पयन्ति । निमित्तोपादानयोर्भेदं निमित्तकारणं च पशुपतिमाचक्षते । तथा निःश्रेयससाधनमपि मुद्रिकाषट्कधारणादिकम् । यथाहुः कापालाः ।

मुद्रिकाषट्कतत्त्वज्ञः परमुद्राविशारदः ।
भगासनस्थमात्मानं ध्यात्वा निर्वाणमृच्छति ॥
कण्ठिका रुचकं चैव कुण्डलं च शिखामणिः ।
भस्म यज्ञोपवीतं च मुद्राषट्कं प्रचक्षते ॥
आभिर्मुद्रितदेहस्तु न भूय इह जायते ।

इत्यादि । तथा कालामुखा अपि कपालपात्रभोजनशवभस्मस्नानतत्प्राशनलगुडधारणसुराकुम्भस्थापनतदाधारदेवपूजादिकर्मैहिकामुष्मिकसकलफलसाधनमभिदधति ।

रुद्राक्षकङ्कणं हस्ते जटा चैका च मस्तके ।

कपालं भस्मना स्नानमित्यादि च प्रसिद्धं शैवागमेषु । तथा केनचित्क्रियाविशेषेण विजातीयानामपि ब्राह्मण्यप्राप्तिमुत्तमाश्रमप्राप्तिं चाहुः ।

दीक्षाप्रवेशमात्रेण ब्राह्मणो भवति क्षणात् ।
कापालं व्रतमास्थाय यतिर्भवति मानवः ॥

इति । तत्रेदमुच्यते ।

पत्युरसामञ्जस्यादिति । नैकस्मिन्नसंभवादित्यतो नेत्यनुवर्तते । पत्युः पशुपतेर्मतं नादरणीयम् । कुतः । असामञ्जस्यात् । असामञ्जस्यं चान्योन्यव्याघाताद्वेदविरोधाच्च । मुद्रिकाषट्कधारणभगासनस्थात्मध्यानसुराकुम्भस्थापनतत्स्थदेवतार्चनगूढाचारश्मशानभस्मस्नानप्रणवपूर्वाभिध्यानान्यन्योन्यविरुद्धानि । वेदवि-

---

9. C. reads इत्यादिकम् for इत्यादि, C. reads मात्र for पात्र.

11. E. reads इति after अभिदधति.

22. C. reads वन्दन for अर्चन; C. reads स्मशान for श्मशान.

23. B. om. प्रणव.

http://acharya.org

रुद्धं चेदं तत्त्वपरिकल्पनमुपासनमाचारश्च । वेदाः खलु परं ब्रह्म नारायणमेव जगन्निमित्तमुपादानं च वदन्ति

नारायणपरं ब्रह्म तत्त्वं नारायणः परः । (म.ना.१३।१)

नारायणपरो ज्योतिरात्मा नारायणः परः । (म.ना.१३।१)

तदैक्षत बहु स्यां प्रजायेयेति (छा. ६।२।३) । सोकामयत बहु स्यां प्रजायेयेति (तै. २।६) । तदात्मानं स्वयमकुरुत (तै. २।७।१) इत्यादयः । परब्रह्मभूतपरमपुरुषवेदनमेव च मोक्षसाधनमुपासनं वदन्ति

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसस्तु पारे । (तै. आ. ३।११)

तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते। (तै. आ. ३।११)

इत्यादिनैकतां गताः सर्वे वेदान्ताः । तदितिकर्तव्यताभूतं कर्म च वेदविहितवर्णाश्रमसंबन्धि यज्ञादिकमेव वदन्ति तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन ।··· एतमेव लोकमिच्छन्तः प्रव्राजिनः प्रव्रजन्ति (बृ. ४।४।२२) इत्यादयः । केवलपरतत्त्वप्रतिपादनपरनारायणानुवाकसिद्धतत्त्वपराः केषुचिदुपासनादिविधिपरेषु वाक्येषु श्रुताः प्रजापतिशिवेन्द्राकाशप्राणादिशब्दा इति शास्त्रदृष्ट्या तूपदेशो वामदेववत् (ब्र. सू. १।१।३१) इत्यत्र प्रतिपादितम् । तथैको ह वै नारायण आसीन्न ब्रह्मा नेशानः (महा. १) इत्यारभ्य स एकाकी न रमते (महा. १) इति सृष्टिवाक्योदितं स्रष्टारं नारायणमेव समानप्रकरणस्थाः सदेव सोम्येदमग्र आसीत् (छा. ६।२।१) इत्यादिषु साधा-

---

4. E reads नारायणः for नारायण before परो ज्योतिः.
18. B. om. आदि after उपासन.
24. C. om. अग्र आसीत्.

http://acharya.org

रणाः सद्ब्रह्मादिशब्दाः प्रतिपादयन्तीति जन्माद्यस्य यतः (ब्र. सू. १।१।२) इत्यत्र प्रतिपादितम्। अतो वेदविरुद्धतत्त्वोपासनानुष्ठानाभिधानात्पशुपतिमतमनादरणीयमेव ॥ ३५ ॥

अधिष्ठानानुपपत्तेश्च ॥ ३६ ॥

वेदबाह्यानामनुमानाद्धि केवलनिमित्तेश्वरकल्पना। तथा सति दृष्टानुसारेण कुलालादिवदधिष्ठानं कर्तव्यम्। न च कुलालादेर्मृदाद्यधिष्ठानवत्पशुपतेर्निमित्तभूतस्य प्रधानाधिष्ठानमुपपद्यते। अशरीरत्वात्। सशरीराणामेव हि कुलालादीनामधिष्ठानशक्तिर्दृष्टा। न चेश्वरस्य सशरीरत्वमभ्युपगन्तव्यम्। तच्छरीरस्य सावयवस्य नित्यत्वेनित्यत्वे च शास्त्रयोनित्वात् (ब्र. सू. १।१।४) इत्यत्र (पृ. १४५) दोषस्योक्तत्वात्॥ ३६ ॥

करणवच्चेन्न भोगादिभ्यः ॥ ३७ ॥

यथा भोक्तुर्जीवस्य करणकलेवराद्यधिष्ठानमशरीरस्यैव दृश्यते तद्वन्महेश्वरस्याप्यशरीरस्य प्रधानाधिष्ठानमुपपद्यत इति चेन्न। भोगादिभ्यः। पुण्यपापरूपकर्मफलभोगार्थं पुण्यपापरूपादृष्टकारितं हि तदधिष्ठानम्। तद्वत्पशुपतेरपि पुण्यपापरूपादृष्टवत्तया तत्फलभोगादि सर्वं प्रसज्येत। ततो नाधिष्ठानसंभवः॥ ३७ ॥

अन्तवत्त्वमसर्वज्ञता वा ॥ ३८ ॥

वाशब्दश्चार्थे। पशुपतेः पुण्यपापरूपादृष्टवत्त्वे जीववदन्तवत्त्वं सृष्टिसंहारास्पदत्वमसर्वज्ञता च स्यादित्यनादरणीयमेवेदं मतम्। विरोधे त्वनपेक्षं स्यात् (जै. सू. १।३।३) इत्यादिना वेदविरुद्धस्यानादरणीयत्वे सिद्धेपि पशुपतिमतस्य वेदविरुद्धता-

---

2. B. reads उपन्यासन for उपासन.
14. E. reads च after अशरीरस्य.
17. C. reads अनधिष्ठान for नाधिष्ठान.

http://acharya.org

ख्यापनार्थं पत्युरसामञ्जस्यात् (ब्र. सू. २।२।३५) इति पुनरारम्भः । यद्यपि पाशुपतशैवयोर्वेदाविरोधिन इव केचन धर्माः प्रतीयन्ते तथापि वेदविरुद्धनिमित्तोपादानभेदकल्पनापरावरतत्त्वव्यत्ययकल्पनामूलत्वात्सर्वमसमञ्जसमेवेत्यसामञ्जस्यादित्युक्तम् ॥ ३८ ॥ पशुपत्यधिकरणं समाप्तम् । (७)

उत्पत्त्यसंभवात् ॥ ३९ ॥

कपिलादितन्त्रसामान्याद्भगवदभिहितपरमनिःश्रेयससाधनावबोधिनि पञ्चरात्रतन्त्रेप्यप्रामाण्यमाशङ्क्य निराक्रियते । तत्रैवमाशङ्क्यते । परमकारणात्परब्रह्मभूताद्वासुदेवात्संकर्षणो नाम जीवो जायते । संकर्षणात्प्रद्युम्नसंज्ञं मनो जायते । तस्मादनिरुद्धसंज्ञोहंकारो जायत इति हि भागवतप्रक्रिया । अत्र जीवस्योत्पत्तिः श्रुतिविरुद्धा प्रतीयते । श्रुतयो हि जीवस्यानादित्वं वदन्ति न जायते म्रियते वा विपश्चित् (का. २।१७) इत्याद्याः ॥ ३९ ॥

न च कर्तुः करणम् ॥ ४० ॥

संकर्षणात्प्रद्युम्नसंज्ञं मनो जायत इति कर्तुर्जीवात्करणस्य मनस उत्पत्तिर्न संभवति ।

एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । (मु. २।१।३) इति परस्मादेव ब्रह्मणो मनसोप्युत्पत्तिश्रुतेः । अतः श्रुतिविरुद्धार्थप्रतिपादनादस्यापि तन्त्रस्य प्रामाण्यं प्रतिषिध्यत इति ॥ ४० ॥

एवं प्राप्ते प्रचक्ष्महे ।

विज्ञानादिभावे वा तदप्रतिषेधः ॥ ४१ ॥

वाशब्दात्पक्षो विपरिवर्तते । विज्ञानं चादि चेति परं ब्रह्म

---

3. C. reads परावरत्व for परावरतत्त्व.

http://acharya.org

विज्ञानादि । संकर्षणप्रद्युम्नानिरुद्धानामपि परब्रह्मभावे सति तत्प्रतिपादनपरस्य शास्त्रस्य प्रामाण्यं न प्रतिषिध्यते । एतदुक्तं भवति । भागवतप्रक्रियामजानतामिदं चोद्यं यज्जीवोत्पत्तिर्विरुद्धाभिहितेति । वासुदेवाख्यं परं ब्रह्मैवाश्रितवत्सलं स्वाश्रितसमाश्रयणीयत्वाय स्वेच्छया चतुर्धावतिष्ठत इति हि तत्प्रक्रिया । यथा पौष्करसंहितायाम्

कर्तव्यत्वेन वै यत्र चातुरात्म्यमुपासते ।
क्रमागतैः स्वसंज्ञाभिर्ब्राह्मणैरागमं तु तत् ॥

इत्यादि । तच्च चातुरात्म्योपासनं वासुदेवाख्यपरब्रह्मोपासनमिति सात्वतसंहितायामुक्तम् ।

ब्राह्मणानां हि सद्ब्रह्मवासुदेवाख्ययाजिनाम् ।
विवेकदं परं शास्त्रं ब्रह्मोपनिषदं महत् ॥

इति । तद्धि वासुदेवाख्यं परं ब्रह्म संपूर्णषाड्गुण्यवपुः सूक्ष्मव्यूहविभवभेदभिन्नं यथाधिकारं भक्तैर्ज्ञानपूर्वेण कर्मणाभ्यर्चितं सम्यक्प्राप्यते । विभवार्चनाद्व्यूहं प्राप्य व्यूहार्चनात्परं ब्रह्म वासुदेवाख्यं सूक्ष्मं प्राप्यत इति वदन्ति । विभवो हि नाम रामकृष्णादिप्रादुर्भावगणः । व्यूहो वासुदेवसंकर्षणप्रद्युम्नानिरुद्धरूपश्चतुर्व्यूहः । सूक्ष्मं तु केवलषाड्गुण्यविग्रहं वासुदेवाख्यं परं ब्रह्म । यथा पौष्करे

यस्मात्सम्यक्परं ब्रह्म वासुदेवाख्यमव्ययम् ।
तस्मादवाप्यते शास्त्राज्ज्ञानपूर्वेण कर्मणा ॥

---

4. C. reads इव for एव.
7. C. reads उपास्यते for उपासते.
17. E. reads नाम after व्यूह°.
19. B. reads पर for परम्.
21. C. E. read असात् for तसात्.

http://acharya.org

इत्यादि । अतः संकर्षणादीनामपि परस्यैव ब्रह्मणः स्वेच्छाविग्रहरूपत्वादजायमानो बहुधा विजायते (तै. आ. ३।१२) इतिश्रुतिसिद्धस्यैवाश्रितवात्सल्यनिमित्तस्वेच्छाविग्रहसंग्रहरूपजन्मनोभिधानात्तदभिधायिशास्त्रप्रामाण्यस्याप्रतिषेध इति । तत्र जीवमनोहंकारतत्त्वानामधिष्ठातारः संकर्षणप्रद्युम्नानिरुद्धा इति तेषामेव जीवादिशब्दैरभिधानमविरुद्धम् । यथाकाशप्राणादिशब्दैर्ब्रह्मणोभिधानम् ॥ ४१ ॥

विप्रतिषेधाच्च ॥ ४२ ॥

विप्रतिषिद्धा हि जीवोत्पत्तिरस्मिन्नपि तन्त्रे । यथोक्तं परमसंहितायाम्

अचेतना परार्था च नित्या सततविक्रिया ।
त्रिगुणा कर्मिणां क्षेत्रं प्रकृते रूपमुच्यते ॥
व्याप्तिरूपेण संबन्धस्तस्याश्च पुरुषस्य च ।
स ह्यनादिरनन्तश्च परमार्थेन निश्चितः ॥

इति । एवं सर्वास्वपि संहितासु जीवस्य नित्यत्ववचनाज्जीवस्वरूपोत्पत्तिः पञ्चरात्रतन्त्रे प्रतिषिद्धैव । जन्ममरणादिव्यवहारस्तु लोकवेदयोर्जीवस्य यथोपपद्यते तथा नात्मा श्रुतेः (ब्र. सू. २।३।१८) इत्यत्र वक्ष्यते । अतो जीवस्योत्पत्तिस्तत्रापि प्रतिषिद्धेति जीवोत्पत्तिवादनिमित्ताप्रामाण्यशङ्का दूरोत्सारिता ।

यश्चैष केषांचिदुद्घोषः साङ्गेषु वेदेषु निष्ठामलभमानः शा-

---

1. C. om. आदि after इति.
4. B. reads प्रामाण्यप्रतिषेधः for प्रामाण्यस्याप्रतिषेधः.
5. E. reads सत्त्वानाम् for तत्त्वानाम्.
9. E. reads तस्मिन् for अस्मिन्.
16. B. reads तत्र for तन्त्रे.
19. E. reads एव after प्रतिषिद्धा.

http://acharya.org

ण्डिल्यः पञ्चरात्रशास्त्रमधीतवानिति साङ्गेषु वेदेषु पुरुषार्थनिष्ठा न लब्धेति वचनाद्वेदविरुद्धं तन्त्रमिति सोप्यनाघ्रातवेदवचसामनाकलिततदुपबृंहणन्यायकलापानां श्रद्धामात्रविजृम्भितः। यथा

प्रातः प्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति येग्निहोत्रम्।
(ऐ. आ. ५।३।१।६)

इत्यनुदितहोमनिन्दोदितहोमप्रशंसार्थेत्युक्तम्। यथा च भूमविद्याप्रक्रमे नारदेन ऋग्वेदं भगवोध्येमि यजुर्वेदं सामवेदमथर्वणं चतुर्थमितिहासपुराणं पञ्चमम् (छा. ७।१।२) इत्यारभ्य सर्वविद्यास्थानमभिधाय सोहं भगवो मन्त्रविदेवास्मि नात्मवित् (छा. ७।१।३) इति भूमविद्याव्यतिरिक्तासु सर्वासु विद्यास्वात्मवेदनालाभवचनं वक्ष्यमाणभूमविद्याप्रशंसार्थं कृतम्। अथवास्य नारदस्य साङ्गेषु वेदेषु यत्परतत्त्वं प्रतिपाद्यते तदलाभनिमित्तोयं वादः। एवमेव शाण्डिल्यस्येति पश्चाद्वेदान्तवेद्यवासुदेवाख्यपरब्रह्मतत्त्वाभिधानादवगम्यते। तथा वेदार्थस्य दुर्ज्ञानतया सुखावबोधार्थशास्त्रारम्भः परमसंहितायामुच्यते।

अधीता भगवन्वेदाः साङ्गोपाङ्गाः सविस्तराः।
श्रुतानि च मयाङ्गानि वाकोवाक्ययुतानि च॥
न चैतेषु समस्तेषु संशयेन विना क्वचित्।
श्रेयोमार्गं प्रपश्यामि येन सिद्धिर्भविष्यति॥

---

2. B. om. न after निष्ठा; C. reads एवेदम् after वेदविरुद्धम्; C. reads अयम् after स..
7. C. om. च after यथा.
9. A. B. E. read आथर्वणम् for अथर्वणम्.
12. A. reads आत्मन· for आत्म before वेदन.
16. E. reads बोधार्थं· for बोधार्थ.
17. C. reads सकलाः for भगवन्.

http://acharya.org

इति।

वेदान्तेषु यथासारं संगृह्य भगवान्हरिः।
भक्तानुकम्पया विद्वान्संचिक्षेप यथासुखम्॥

इति च। अतः स भगवान्वेदान्तवेद्यः परब्रह्माभिधानो वासुदेवो निखिलहेयप्रत्यनीककल्याणैकतानानन्तज्ञानानन्दाद्यपरिमितोदारगुणसागरः सत्यसंकल्पश्चातुर्वर्ण्यचातुराश्रम्यव्यवस्थयावस्थितान्धर्मार्थकाममोक्षाख्यपुरुषार्थाभिमुखान्भक्तानवलोक्यापारकारुण्यसौशील्यवात्सल्यौदार्यमहोदधिः स्वस्वरूपस्वविभूतिस्वाराधनतत्फलयाथात्म्यावबोधिनो वेदानृग्यजुःसामाथर्वभेदभिन्नानपरिमितशाखान्विध्यर्थवादमन्त्ररूपान्स्वेतरसकलसुरनरदुरवगाहांश्चावधार्य तदर्थयाथात्म्यावबोधि पञ्चरात्रं शास्त्रं स्वयमेव निरमिमीतेति निरवद्यम्।

यत्तु परैः सूत्रचतुष्टयं कस्यचिद्विरुद्धांशस्य प्रामाण्यनिषेधपरं व्याख्यातं तत्सूत्राक्षराननुगुणं सूत्रकाराभिप्रायविरुद्धं च। तथा हि सूत्रकारेण वेदान्तन्यायाभिधायीनि सूत्राण्यभिधाय वेदोपबृंहणाय च भारतसंहितां शतसाहस्रिकां कुर्वता मोक्षधर्मे ज्ञानकाण्डेऽभिहितम्।

गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः।
य इच्छेत्सिद्धिमास्थातुं देवतां कां यजेत सः॥

(भा. शा. ३३४।१)

इत्यारभ्य महता प्रबन्धेन पञ्चरात्रशास्त्रप्रक्रियां प्रतिपाद्य

इदं शतसहस्राद्धि भारताख्यानविस्तरात्।
आविध्य मतिमन्थानं दध्नो घृतमिवोद्धृतम्॥

---

4. A. (टिप्पणी) C. read वेदैक for वेदान्त.
8. B. C. om. स्व before विभूति.
9. B. reads वेद for भेद.
16. B. reads उपबृंहण for उपबृंहणाय च.

नवनीतं यथा दध्नो द्विपदां ब्राह्मणो यथा ।
(भा. शा. ३४३।११-१२)

आरण्यकं च वेदेभ्य ओषधिभ्यो यथामृतम् ।
(भा. शा. ३४३।१३)

इदं महोपनिषदं चतुर्वेदसमन्वितम् ।
सांख्ययोगकृतान्तेन पञ्चरात्रानुशब्दितम् ॥
(भा. शा. ३३९।१११-११२)

इदं श्रेय इदं ब्रह्म इदं हितमनुत्तमम् ।
(भा. शा. ३३५।३२)

ऋग्यजुःसामभिर्जुष्टमथर्वाङ्गिरसैस्तथा ।
(भा. शा. ३३५।४०)

भविष्यति प्रमाणं वा एतदेवानुशासनम् ।
(भा. शा. ३३५।४४)

इति। सांख्ययोगशब्दाभ्यां ज्ञानयोगकर्मयोगावभिहितौ। यथोक्तम्

ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् । (गी. ३।३)

इति । भीष्मपर्वण्यपि

ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च कृतलक्षणैः ।
(भा. भी. ६६।३९)

अर्चनीयश्च सेव्यश्च पूजनीयश्च माधवः ।
सात्वतं विधिमास्थाय गीतः संकर्षणेन यः ।
(भा. भी. ६६।४०)

इति । कथमेवं ब्रुवाणो बादरायणो वेदविदग्रेसरो वेदान्तवेद्यपरब्रह्मभूतवासुदेवोपासनार्चनादिप्रतिपादनपरस्य सात्वतशास्त्रस्याप्रामाण्यं ब्रूयात् ।

---

6. भारत reads कृत तेन for कृतान्तेन.

23. C. om. आदि after अर्चन.

http://acharya.org

ननु च

सांख्यं योगः पञ्चरात्रं वेदाः पाशुपतं तथा ।
किमेतान्येकनिष्ठानि पृथङ्निष्ठानि वा मुने ॥

(भा. शा. ३४९।२)

इत्यादिना सांख्यादीनामप्यादरणीयतोच्यते । शारीरके तु सांख्यादीनि प्रतिषिध्यन्ते । अत इदमपि तन्त्रं तत्तुल्यम् । नेत्युच्यते । यतस्तत्रापीममेव शारीरोक्तन्यायमवतारयति । किमेतान्येकनिष्ठानि पृथङ्निष्ठानि वेति प्रश्नस्यायमर्थः । किं सांख्ययोगपाशुपतवेदपञ्चरात्राण्येकतत्त्वप्रतिपादनपराणि पृथक्तत्त्वप्रतिपादनपराणि वा । यद्येकतत्त्वप्रतिपादनपराणि कि तदेकं तत्त्वम् । यदा तु पृथक्तत्त्वप्रतिपादनपराणि तदैषां परस्परविरुद्धार्थप्रतिपादनपरत्वाद्वस्तुनि विकल्पासंभवाच्चैकमेव प्रमाणमङ्गीकरणीयम् । किं तदेकमित्यस्योत्तरं ब्रुवन्

ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै ।
सांख्यस्य वक्ता कपिलः (भा. शा. ३४९।६४-६५)

इत्यारभ्य सांख्ययोगपाशुपतानां कपिलहिरण्यगर्भपशुपतिकृतत्वेन पौरुषेयत्वं प्रतिपाद्य

अवान्तरतपा नाम वेदाचार्यः स उच्यते ।

(भा. शा. ३४९।६६)

इति वेदानामपौरुषेयत्वमभिधाय

पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयम् ।

(भा. शा. ४४९।६८)

---

5. E. reads अपि for तु after शारीरके.

10. C. reads यथा foı यदा before एकतत्त्व; C. reads तथा for तत् before एकम्.

12. C. reads प्रतिपादकत्वात् for प्रतिपादनपरत्वात्.

17. C. reads प्रणीत for कृत.

18. C. reads अपान्तरतमाः for अवान्तरतपाः.

http://acharya.org

इति पञ्चरात्रतन्त्रस्य वक्ता नारायणः स्वयमेवेत्युक्तवान् ।

एवं वदतश्चायमाशयः । पौरुषेयाणां हि तन्त्राणां परस्परविरुद्धवस्तुवादितयापौरुषेयत्वेन निरस्तप्रमादादिनिखिलदोषगन्धवेदवेद्यवस्तुविरुद्धाभिधायित्वाच्च यथावस्थितवस्तुनि प्रामाण्यं दुर्लभम् । वेदवेद्यश्च परब्रह्मभूतो नारायणः । अतस्तत्तत्तन्त्राभिहितप्रधानपुरुषपशुपतिप्रभृतितत्त्वस्य वेदान्तवेद्यपरब्रह्मभूतनारायणात्मकतयैव वस्तुत्वमभ्युपगमनीयमिति । तदिदमाह

सर्वेषु च नृपश्रेष्ठ ज्ञानेष्वेतेषु दृश्यते ।
यथागमं यथान्यायं निष्ठा नारायणः प्रभुः ॥

(भा. शा. ३४९।६८-६९)

इति । यथागमं यथान्यायमिति न्यायानुगृहीतं तत्तदागमोक्तं वस्तु परामृशतो नारायण एव सर्वस्य वस्तुनो निष्ठेति दृश्यते। अब्रह्मात्मकतया तत्तत्तन्त्राभिहितानां तत्त्वानां सर्वं खल्विदं ब्रह्म (छा. ३।१४।१)। विश्वं नारायणः (ना. १३) इत्यादिना सर्वस्य ब्रह्मात्मकतामनुसंदधानस्य नारायण एव निष्ठेति प्रतीयत इत्यर्थः । अतो वेदान्तवेद्यः परब्रह्मभूतो नारायणः स्वयमेव पञ्चरात्रस्य कृत्स्नस्य वक्तेति तत्स्वरूपतदुपासनाभिधायि तत्तन्त्रमिति च तस्मिन्नितरतन्त्रसामान्यं न केनचिद्भावयितुं शक्यम्। अतस्तत्रैवेदमुच्यते ।

एवमेकं सांख्ययोगं वेदारण्यकमेव च ।
परस्पराङ्गान्येतानि पञ्चरात्रं तु कथ्यते ॥

(भा. शा. ३४८।८२)

---

2. B. reads पौरुषाणाम् for पौरुषेयाणाम्.
5. C. E om. तत् after तत्.
7. E. reads च after आह.
12. B. reads परामृशता for परामृशतः.
18. E. reads उत् before भावयितुम्.

http://acharya.org

इति । सांख्यं च योगश्च सांख्ययोगम् । वेदाश्चारण्यकानि च वेदारण्यकम् । परस्परान्वितान्येकतत्त्वप्रतिपादनपरतयैकीभूतान्येकं पञ्चरात्रमिति कथ्यते । एतदुक्तं भवति । सांख्योक्तानि पञ्चविंशतितत्त्वानि योगोक्तं च यमनियमाद्यात्मकं योगं वेदोदितकर्मस्वरूपाण्यङ्गीकृत्य तत्त्वानां ब्रह्मात्मकत्वं योगस्य च ब्रह्मोपासनप्रकारत्वं कर्मणां च तदाराधनरूपतामभिदधति ब्रह्मस्वरूपं प्रतिपादयन्त्यारण्यकानि । एतदेव परेण ब्रह्मणा नारायणेन स्वयमेव पञ्चरात्रतन्त्रे विशदीकृतमिति । शारीरके च सांख्योक्ततत्त्वानामब्रह्मात्मकतामात्रं निराकृतं न स्वरूपम् । योगपाशुपतयोश्चेश्वरस्य केवलनिमित्तकारणता परावरतत्त्वविपरीतकल्पना वेदबहिष्कृताचारो निराकृतो न योगस्वरूपं पशुपतिस्वरूपं च । अतः

> सांख्यं योगः पञ्चरात्रं वेदाः पाशुपतं तथा ।
> आत्मप्रमाणान्येतानि न हन्तव्यानि हेतुभिः ॥

इति तत्तदभिहिततत्तत्स्वरूपमात्रमङ्गीकार्यं जिनसुगताभिहिततत्त्ववत्सर्वं न बहिष्कार्यमित्युच्यते ।

> यथागमं यथान्यायं निष्ठा नारायणः प्रभुः ।
> (भा. शा. ३४९।६९)

इत्यनेनैकार्थ्यात् ॥ ४२ ॥ उत्पत्त्यसंभवाधिकरणं समाप्तम् । (८)

इति श्रीमद्भगवद्रामानुजाचार्यविरचिते शारीरकमीमांसाभाष्ये द्वितीयाध्यायस्य द्वितीयः पादः ॥

---

2. B. reads वेदारण्यकानि च before वेदारण्यकम्; E. reads अन्नान्येतानि for अन्वितानि.
10. C. reads परावरत्व for परावरतत्त्व.
11. C. reads बहिष्कृतश्च for बहिष्कृत.
15. C. reads अपि before तत्तदभिहित; B. om. तत् after तत्.

http://acharya.org

अथ श्रीभाष्ये

द्वितीयाध्याये तृतीयः पाद आरभ्यते ।

न वियदश्रुतेः ॥ १ ॥

सांख्यादिवेदबाह्यतन्त्राणां न्यायाभासमूलतया विप्रतिषेधाच्चासामञ्जस्यमुक्तम् । इदानीं स्वपक्षस्य विप्रतिषेधादिदोषगन्धाभावख्यापनाय ब्रह्मकार्यतयाभिमतचिदचिदात्मकप्रपञ्चस्य कार्यताप्रकारो विशोध्यते । तत्र वियदुत्पद्यते न वेति संशय्यते । किं युक्तम् । न वियदुत्पद्यत इति । कुतः । अश्रुतेः । संभावितस्य हि श्रवणसंभवः । असंभावितस्य तु गगनकुसुमवियदुत्पत्त्यादेः शब्दाभिधेयत्वं न संभवति । न खलु निरवयवस्य सर्वगतस्याकाशस्यात्मन इवोत्पत्तिर्निरूपयितुं शक्यते । अत एव चोत्पत्त्यसंभवाच्छान्दोग्ये सृष्टिप्रकरणे तेजःप्रभृतीनामेवोत्पत्तिराम्नायते तदैक्षत बहु स्यां प्रजायेयेति । तत्तेजोऽसृजत (छा. ६।२।३) इति । तैत्तिरीयाथर्वणादिषु तस्माद्वा एतस्मादात्मन आकाशः संभूतः (तै. २।१) ।

एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।

खं वायुर्ज्योतिरापः (मु. २।१।३) इत्यादिषु श्रूयमाणा वियदुत्पत्तिरर्थविरोधाद्बाध्यत इति ॥ १ ॥

---

11. B. om. आकाशस्य.

14. E. reads क after तैत्तिरीय; C. reads आथर्वणिक for आथर्वण.

17. C. reads श्रूयमाण for श्रूयमाणा.

http://acharya.org

एवं प्राप्तेभिधीयते ।

अस्ति तु ॥ २ ॥

अस्ति त्वाकाशस्योत्पत्तिः । अतीन्द्रियार्थविषया हि श्रुतिः प्रमाणान्तराप्रतीतामपि वियदुत्पत्तिं प्रतिपादयितुं समर्थैव । न च श्रुतिप्रतिपन्नेर्थे तद्विरोधि निरवयवत्वादिहेतुकमनुत्पत्त्यनुमानमुदेतुमलम् । आत्मनोप्यनुत्पत्तिर्न निरवयवत्वप्रयुक्तेति वक्ष्यति ॥ २ ॥

पुनश्चोदयति ।

गौण्यसंभवाच्छब्दाच्च ॥ ३ ॥

तस्माद्वा एतस्मादात्मन आकाशः संभूतः (तै. २।१) इत्यादिवियदुत्पत्तिश्रुतिर्गौणीति कल्पयितुं युक्तम् । तत्तेजोसृजत (छा. ६।२।३) इति सिसृक्षोर्ब्रह्मणः प्रथमं तेज उत्पद्यत इति तेजउत्पत्तिप्राथम्येन वियदुत्पत्तिप्रतिपादनासंभवात् । वायुश्चान्तरिक्षं चैतदमृतम् (बृ. २।३।३, श. ब्रा. १४।५।३।४) इति वियतोमृतत्वशब्दाच्च ॥ ३ ॥

कथमेकस्य संभूतशब्दस्याकाशापेक्षया गौणत्वमग्न्याद्यपेक्षया मुख्यत्वमिति चेत्तत्राह ।

स्याच्चैकस्य ब्रह्मशब्दवत् ॥ ४ ॥

एकस्यैव तस्माद्वा एतस्मादात्मन आकाशः संभूतः (तै. २।१) इत्याकाशे मुख्यत्वासंभवाद्गौणतया प्रयुक्तस्य संभूतशब्दस्य वायोरग्निः (तै. २।१) इत्यादिष्वनुषक्तस्य मुख्यत्वं स्यादेव । ब्रह्मशब्दवत् । यथा ब्रह्मशब्दः

---

4. E. reads अप्राप्ताम् for अप्रतीताम्.

7. E. reads वक्ष्यते for वक्ष्यति.

16. A. reads एक for एकस्य.

21. C. reads अग्नि after इति.

http://acharya.org

तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते । (मु. १।१।९)
इत्यत्र प्रधाने गौणतया प्रयुक्तस्तस्मिन्नेव प्रकरणे
तपसा चीयते ब्रह्म ततोऽन्नमभिजायते । (मु. १।१।८)
इति ब्रह्मणि मुख्यतया प्रयुज्यते तद्वत् । अनुषङ्गे च श्रवणावृत्ताविवाभिधानावृत्तिर्विद्यत एवेत्यर्थः ॥ ४ ॥

परिहरति ।

प्रतिज्ञाहानिरव्यतिरेकात् ॥ ५ ॥

छान्दोग्यश्रुत्यनुसारेणान्यासां वियदुत्पत्तिवादिनीनां श्रुतीनां गौणत्वं कल्पयितुं न युज्यते । यतश्छान्दोग्यश्रुत्यैव वियदुत्पत्तिरङ्गीकृता । येनाश्रुतं श्रुतम् (छा. ६।१।१) इत्यादिना ब्रह्मज्ञानेन सर्वज्ञानप्रतिज्ञानात् । तस्या हि प्रतिज्ञाया अहानिराकाशस्यापि ब्रह्मकार्यत्वेन तदव्यतिरेकादेव भवति ॥ ५ ॥

शब्देभ्यः ॥ ६ ॥

इतश्च वियदुत्पत्तिश्छान्दोग्ये प्रतीयते । सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् (छा. ६।२।१) इति प्राक्सृष्टेरेकत्वावधारणशब्दादैतदात्म्यमिदं सर्वम् (छा. ६।८।७) इत्येवमादिशब्देभ्यश्च कार्यत्वेन ब्रह्मणोऽव्यतिरेकप्रतीतेः । न च तत्तेजोऽसृजत (छा. ६।२।३) इति तेजस उत्पत्तिश्रुतिर्वियदुत्पत्तिं वारयति । वियदुत्पत्त्यवचनमात्रेण तेजसः प्रतीयमानं प्राथम्यं श्रुत्यन्तरप्रतिपन्नां वियदुत्पत्तिं न निवारयितुमलम् ॥ ६ ॥

यावद्विकारं तु विभागो लोकवत् ॥ ७ ॥

तुशब्दश्चार्थे । ऐतदात्म्यमिदं सर्वम् (छा. ६।८।७) इत्या-

---

19. B. reads प्रतीयमान for प्रतीयमानम्.

http://acharya.org

दिभिराकाशस्य विकारत्ववचनेन तस्याकाशस्य ब्रह्मणो विभाग उत्पत्तिरप्युक्तैव । लोकवत् । यथा लोक एते सर्वे देवदत्तपुत्रा इत्यभिधाय तेषु केषांचित्तत उत्पत्तिवचनेन सर्वेषामुत्पत्तिरुक्ता स्यात्तद्वत् । एवं च सति वायुश्चान्तरिक्षं चैतदमृतम् (बृ.२।३।३) इति सुराणामिव चिरकालस्थायित्वाभिप्रायम् ॥ ७ ॥

एतेन मातरिश्वा व्याख्यातः ॥ ८ ॥

अनेनैव हेतुना मातरिश्वनो वायोरप्युत्पत्तिर्व्याख्याता । वियन्मातरिश्वनोः पृथग्योगकरणं तेजोतस्तथा ह्याह (ब्र. सू. २।३।१०) इत्यत्र मातरिश्वपरामर्शार्थम् ॥ ८ ॥

असंभवस्तु सतोनुपपत्तेः ॥ ९ ॥

तुशब्दोवधारणार्थः । असंभवोनुत्पत्तिः सतो ब्रह्मण एव । तद्व्यतिरिक्तस्य कस्यचिदनुत्पत्तिर्न संभवति । एतदुक्तं भवति । वियन्मातरिश्वनोरुत्पत्तिप्रतिपादनमुदाहरणार्थम् । उत्पत्त्यसंभवस्तु सतः परमकारणस्य परस्यैव ब्रह्मणः । तद्व्यतिरिक्तस्य कृत्स्नस्याव्यक्तमहदहंकारतन्मात्रेन्द्रियवियत्पवनादिकस्य प्रपञ्चस्यैकविज्ञानेन सर्वविज्ञानप्रतिज्ञादिभिरवगतकार्यभावस्यानुत्पत्तिर्नोपपद्यत इति ॥ ९ ॥ वियदधिकरणं समाप्तम् । (१)

तेजोतस्तथा ह्याह ॥ १० ॥

ब्रह्मव्यतिरिक्तस्य कृत्स्नस्य ब्रह्मकार्यत्वमुक्तम् । इदानीं व्यवहितकार्याणां किं केवलात्तत्तदनन्तरकारणभूताद्वस्तुन उत्पत्तिराहोस्वित्तत्तद्रूपाद्ब्रह्मण इति चिन्त्यते । किं युक्तम् । केवला-

---

9. E. om. अत्र after इति; E. reads मातरिश्वनः for मातरिश्व.

15. C. om. इन्द्रिय.

19. C. om. ब्रह्म before कार्यत्वम्.

http://acharya.org

त्तत्तद्वस्तुन इति । कुतः । तेजस्तावदतो मातरिश्वन एवोत्पद्यते । वायोरग्निः (तै. २।१) इति ह्याह ॥ १० ॥

आपः ॥ ११ ॥

आपोप्यतस्तेजस एवोत्पद्यन्ते । अग्नेरापः (तै. २।१) । तदपोसृजत (छा. ६।२।३) इत्याह ॥ ११ ॥

पृथिवी ॥ १२ ॥

पृथिव्यद्भ्य उत्पद्यते । अद्भ्यः पृथिवी (तै. २।१)। ता अन्नमसृजन्त (छा. ६।२।४) इत्याह ॥ १२ ॥

नन्वन्नशब्देन कथं पृथिव्यभिधीयतेत आह ।

अधिकाररूपशब्दान्तरेभ्यः ॥ १३ ॥

महाभूतसृष्ट्यधिकारात्पृथिव्येवान्नशब्देनोक्तेति प्रतीयते । अदनीयस्य सर्वस्य पृथिवीविकारत्वात्कारणे कार्यशब्दः । तथा वाक्यशेषे भूतानां रूपसंशब्दने यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्य (छा. ६।४।१) इत्यग्नेजसोः सजातीयमेवान्नशब्दवाच्यं प्रतीयते । शब्दान्तरं च समानप्रकरणेग्नेरापः । अद्भ्यः पृथिवी (तै. २।१) इति श्रूयते । अतः पृथिव्येवान्नशब्देनोच्यत इत्यद्भ्य एव पृथिवी जायते । उदाहृतास्तेजःप्रभृतयः प्रदर्शनार्थाः । महदादयोपि हि स्वानन्तरवस्तुन एवोत्पद्यन्ते । यथाश्रुत्यभ्युपगमाविरोधात् ।

एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ॥ (मु. २।१।३)

---

1. A. reads अनन्तरकारणभूतात् after तत्तत्
2 C. om. हि before आह.
8. C. reads हि before आह.
9. E. reads तत्र for अतः.
13. C. reads वाक्यशेष for वाक्यशेषे.

http://acharya.org

तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते । (मु. १।१।९) तस्माद्वा एतस्मादात्मन आकाशः संभूतः (तै. २।१)। तत्तेजोसृजत (छा. ६।२।३) इत्यादयो ब्रह्मणः परंपरया कारणत्वेप्युपपद्यन्त इति ॥ १३ ॥

एवं प्राप्ते प्रचक्ष्महे ।

तदभिध्यानादेव तु तल्लिङ्गात्सः ॥ १४ ॥

तुशब्दात्पक्षो व्यावृत्तः । महदादिकार्याणामपि तत्तदनन्तरवस्तुशरीरकः स एव पुरुषोत्तमः कारणम् । कुतः । तदभिध्यानरूपात्तल्लिङ्गात् । अभिध्यानं बहु स्यामिति संकल्पः। तत्तेज ऐक्षत बहु स्यां प्रजायेयेति (छा. ६।२।३)। ता आप ऐक्षन्त बह्व्यः स्याम प्रजायेमहि (छा. ६।२।४) इत्यात्मनो बहुभवनसंकल्परूपेक्षणश्रवणान्महदहंकाराकाशादीनामपि कारणानां तथाविधेक्षापूर्विकैव स्वकार्यसृष्टिरिति गम्यते । तथाविधं चेक्षणं तत्तच्छरीरकस्य परस्यैव ब्रह्मण उपपद्यते । श्रूयते च सर्वशरीरकत्वेन सर्वात्मकत्वं परस्य ब्रह्मणोन्तर्यामिब्राह्मणे यः पृथिव्यां तिष्ठन् (बृ. ३।७।३)। योप्सु तिष्ठन् (बृ. ३।७।४)। यस्तेजसि तिष्ठन् (बृ.३।७।१४)। यो वायौ तिष्ठन् (बृ.३।७।७)। य आकाशे तिष्ठन् (बृ.३।७।१२) इत्यादि । सुबालोपनिषदि च यस्य पृथिवी शरीरमित्यारभ्य यस्याहंकारः शरीरं यस्य बुद्धिः शरीरं यस्याव्यक्तं शरीरमित्यादि ॥ १४ ॥

यच्चोक्तम्

एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च। (मु.२।१।३) इत्यादिषु श्रूयमाणा ब्रह्मणः प्राणादिसृष्टिः परंपरयाप्युपपद्यत इति । अत्रोच्यते ।

विपर्ययेण तु क्रमोत उपपद्यते च ॥ १५ ॥

तुशब्दोवधारणार्थः । अव्यक्तमहदहंकाराकाशादिक्रमाद्वि-

पर्ययेण यः सर्वेषां कार्याणां ब्रह्मानन्तर्यरूपः क्रम एतस्माज्जायते प्राणः (मु. २।१।३) इत्यादिषु प्रतीयते स च क्रमस्तत्तद्रूपाद्ब्रह्मणस्तत्तत्कार्योत्पत्तेरेवोपपद्यते । परंपरया कारणत्वे ह्यानन्तर्यश्रवणमुपरुध्येत । अत एतस्माज्जायते (मु. २।१।३) इत्यादिकमपि सर्वस्य ब्रह्मणः साक्षात्संभवोत्तम्भनम् ॥ १५ ॥

अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात् ॥ १६ ॥

विज्ञानसाधनत्वादिन्द्रियाणि विज्ञानमित्युच्यन्ते । यदुक्तमेतस्माज्जायते (मु. २।१।३) इत्यादिना सर्वस्य ब्रह्मणोनन्तरकार्यत्वं श्राव्यते। अतश्चानेन वाक्येन सर्वस्य साक्षाद्ब्रह्मण उत्पत्तिरभिध्यानलिङ्गावगतोत्तभ्यत इति । तन्नोपपद्यते । क्रमविशेषपरत्वादस्य वाक्यस्य । अत्रापि सर्वेषां क्रमप्रतीतेः । खादिषु तावच्छ्रुत्यन्तरसिद्धः क्रमोत्रापि प्रतीयते । तैः सहपाठलिङ्गाद्भूतप्राणयोरन्तराले विज्ञानमनसी अपि क्रमेणोत्पद्येते इति प्रतीयते । अतः सर्वस्य साक्षाद्ब्रह्मण एव संभवस्योत्तम्भकमिदं वाक्यं न भवतीति चेत्तन्न । अविशेषात् । एतस्माज्जायते प्राणः (मु. २।१।३) इत्यनेनाविशेषात् । विज्ञानमनसोः खादीनां चैतस्माज्जायत इत्यनेन साक्षात्संभवरूपसंबन्धस्याभिधेयस्य सर्वेषां प्राणादिपृथिव्यन्तानामविशिष्टत्वात्स एव विधेयो न क्रमः । श्रुत्यन्तरसिद्धक्रमविरोधाच्च नेदं क्रमपरम् । पृथिव्यप्सु प्रलीयत इत्यारभ्य तम एकीभवतीत्यन्तेन क्रमान्तर-

1. C. reads रूप for रूपः.
4. B. reads उपरुध्यते for उपरुध्येत.
5. C. reads संभवस्य for सभव.
15. C. reads उत्तम्भनम् for उत्तम्भकम्.
16. C. reads सम् before भवति; E. om. तत् after चेत्.

http://acharya.org

प्रतीतेः। अतोऽव्यक्तादिशरीरकात्परस्माद्ब्रह्मण एव सर्वकार्याणामुत्पत्तिः। तेजःप्रभृतयश्च शब्दास्तदात्मभूतं ब्रह्मैवाभिदधति ॥ १६ ॥

नन्वेवं सर्वशब्दानां ब्रह्मवाचित्वे सति तैस्तैः शब्दैस्तत्तद्वस्तुव्यपदेशो व्युत्पत्तिसिद्ध उपरुध्यते तत्राह।

चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् ॥ १७ ॥

तुशब्दश्चोदिताशङ्कानिवृत्त्यर्थः। निखिलजङ्गमस्थावरव्यपाश्रयस्तत्तच्छब्दव्यपदेशो भाक्तः। वाच्यैकदेशे भज्यत इत्यर्थः। समस्तवस्तुप्रकारिणो ब्रह्मणः प्रकारभूतवस्तुग्राहिप्रत्यक्षादिप्रमाणाविषयत्वाद्वेदान्तश्रवणात्प्राक्प्रकार्यप्रतीतेः प्रकारिप्रतीतिभावभावित्वाच्च तत्पर्यवसानस्य लोके तत्तद्वस्तुमात्रे वाच्यैकदेशे ते ते शब्दा भङ्क्त्वा भङ्क्त्वा व्यपदिश्यन्ते। अथ वा तेजःप्रभृतिभिः शब्दैस्तत्तद्वस्तुमात्रवाचितया व्युत्पन्नैर्ब्रह्मणो व्यपदेशो भाक्तः स्यादमुख्यः स्यादित्याशङ्क्य चराचरव्यपाश्रयस्त्वित्याद्युच्यते। चराचरव्यपाश्रयस्तद्व्यपदेशस्तद्वाचिशब्दश्चराचरवाचिशब्दो ब्रह्मण्यभाक्तो मुख्य एव। कुतः। ब्रह्मभावभावित्वात्सर्वशब्दानां वाचकभावस्य। नामरूपव्याकरणश्रुत्या हि तथावगतम् ॥ १७ ॥ तेजोधिकरणं समाप्तम्। (२)

नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः ॥ १८ ॥

वियदादेः कृत्स्नस्य परस्माद्ब्रह्मण उत्पत्तिरुक्ता। इदानीं जीवस्याप्युत्पत्तिरस्ति नेति संशय्यते। किं युक्तम्। अस्तीति।

---

1. C. om. एव after ब्रह्मणः.
16. E. om. तु after व्यपाश्रयः.
18. E. reads भावितत्वात् for भावित्वात्.

http://acharya.org

कुतः । एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपत्तेः । प्राक्सृष्टेरेकत्वावधारणाच्च । वियदादेरिव जीवस्याप्युत्पत्तिवादिन्यः श्रुतयश्च सन्ति ।

यतः प्रसूता जगतः प्रसूतिस्तोयेन जीवान्विससर्ज भूम्याम् ।
(ना. १।१)

प्रजापतिः प्रजा असृजत (तै. ब्रा. १।१।१०) । सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः (छा. ६।८।४) । यतो वा इमानि भूतानि जायन्ते (तै. ३।१।१) इति । एवं सचेतनस्य जगत उत्पत्तिवचनाज्जीवस्याप्युत्पत्तिः प्रतीयते । न च वाच्यं ब्रह्मणो नित्यत्वात्तत्त्वमस्यादिभिर्जीवस्य ब्रह्मत्वावगमाज्जीवस्य नित्यत्वमिति । ऐतदात्म्यमिदं सर्वम् (छा. ६।८।७)। सर्वं खल्विदं ब्रह्म (छा. ३।१४।१) इत्येवमादिभिर्वियदादेरपि ब्रह्मत्वावगमात्तस्यापि नित्यत्वप्रसक्तेः । अतो जीवोपि वियदादिवदुत्पद्यत इति । एवं प्राप्तेभिधीयते ।

नात्मा श्रुतेरिति । नात्मोत्पद्यते । कुतः । श्रुतेः । न जायते म्रियते वा विपश्चित् (का. २।१८) । ज्ञाज्ञौ द्वावजावीशानीशौ (श्वे. १।९) इत्यादिभिर्जीवस्योत्पत्तिप्रतिषेधो हि श्रूयते । आत्मनो नित्यत्वं च ताभ्यः श्रुतिभ्य एवावगम्यते ।

नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति
कामान् । (श्वे. ६।१३)

अजो नित्यः शाश्वतोयं पुराणो न हन्यते हन्यमाने शरीरे ।
(का. २।१८)

इत्यादिभ्यः । अतश्च नात्मोत्पद्यते । कथं तर्ह्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपद्यते । इत्थमुपपद्यते । जीवस्यापि कार्यत्वा-

---

9. C. reads च after तत्त्वमस्यादिभिः.
11. C. om. एवम् after ब्रह्मेति.
16. C. om. ईशानीशौ.
23. C. om. उपपद्यते after इत्थम्.

http://acharya.org

स्कारणकार्ययोरनन्यत्वाच्च । एवं तर्हि वियदादिवदुत्पत्तिमत्त्वमङ्गीकृतं स्यात् । नेत्युच्यते । कार्यत्वं हि नामैकस्य द्रव्यस्यावस्थान्तरापत्तिः । तज्जीवस्याप्यस्त्येव । इयांस्तु विशेषः । वियदादेरचेतनस्य याहृशोन्यथाभावो न ताहृशो जीवस्य । ज्ञानसंकोचविकासलक्षणो जीवस्यान्यथाभावः । वियदादेस्तु स्वरूपान्यथाभावलक्षणः । सेयं स्वरूपान्यथाभावलक्षणोत्पत्तिर्जीवे प्रतिषिध्यते । एतदुक्तं भवति । भोग्यभोक्तृनियन्तॄन्विविक्तस्वभावान्प्रतिपाद्य भोग्यगतमुत्पत्त्यादिकं भोक्तरि प्रतिषिध्य तस्य नित्यतां च प्रतिपाद्य भोग्यगतमुत्पत्त्यादिकं भोक्तृगतं चापुरुषार्थाश्रयत्वं नियन्तरि प्रतिषिध्य तस्य नित्यत्वं निरवद्यत्वं सर्वदा सर्वज्ञत्वं सत्यसंकल्पत्वं करणाधिपाधिपत्वं विश्वस्य पतित्वं च प्रतिपाद्य सर्वावस्थयोश्चिदचितोस्तं प्रति शरीरत्वं तस्य चात्मत्वं प्रतिपादितम् । अतः सर्वदा चिदचिद्वस्तुशरीरतया तत्प्रकारं ब्रह्म । तत्कदाचित्स्वस्माद्विभक्तव्यपदेशानर्हातिसूक्ष्मदशापन्नचिदचिद्वस्तुशरीरं तिष्ठति । तत्कारणावस्थं ब्रह्म । कदाचिच्च विभक्तनामरूपस्थूलचिदचिद्वस्तुशरीरम् । तच्च कार्यावस्थम् । तत्र कारणावस्थस्य कार्यावस्थापत्तावचिदंशस्य कारणावस्थायां शब्दादिविहीनस्य भोग्यत्वाय शब्दादिमत्तया स्वरूपान्यथाभावरूपविकारो भवति । चिदंशस्य च कर्मफलविशेषभोक्तृत्वाय तदनुरूपज्ञानविकासरूपविकारो भवति । उभयप्रकारविशिष्टनियन्त्रंशे

---

1 B. C. read कार्यकारणयो for कारणकार्ययो.
4. B. reads विकाश for विकास.
9. C. reads प्रतिषेध्य for प्रतिपाद्य.
12. C. reads च after आत्मत्वम्.
13. E. reads ब्रह्म कदाचित् for ब्रह्म । तत्कदाचित्.
14. C. reads विभक्तस्य for विभक्त.
19. B. om. च after चिदशस्य; C. reads विशेषफल for फलविशेष.
20. A. B. read विकाश for विकास.

http://acharya.org

तत्तदवस्थतदुभयविशिष्टतारूपविकारो भवति । कारणावस्थाया अवस्थान्तरापत्तिरूपो विकारः प्रकारद्वये प्रकारिणि च समानः । अत एवैकस्यावस्थान्तरापत्तिरूपविकारापेक्षया येनाश्रुतं श्रुतम् (छा. ६।१।१) इत्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय मृदादिदृष्टान्तो यथा सोम्यैकेन (छा. ६।१।१) इत्यादिना निदर्शितः । ईदृशज्ञानसंकोचविकासकरतत्तद्देहसंबन्धवियोगाभिप्राया जीवस्योत्पत्तिमरणवादिन्यः प्रजापतिः प्रजा असृजत (तै. ब्रा. १।१।१०) इत्याद्याः श्रुतयः । अचिदंशवत्स्वरूपान्यथात्वाभावाभिप्राया उत्पत्तिप्रतिषेधवादिन्यो नित्यत्ववादिन्यश्च न जायते म्रियते (का. २।१८) इत्याद्या नित्यो नित्यानाम् (श्वे. ६।१३) इत्याद्याश्च श्रुतयः । स्वरूपान्यथात्वज्ञानसंकोचविकासरूपोभयविधानिष्टविकाराभावाभिप्रायाः स वा एष महानज आत्माजरोमरोमृतो ब्रह्म (बृ. ४।४।२५) । नित्यो नित्यानाम् (श्वे. ६।१३) इत्याद्याः परविषयाः श्रुतयः । एवं सर्वदा चिदचिद्वस्तुविशिष्टस्य ब्रह्मणः प्राक्सृष्टेरेकत्वावधारणं च नामरूपविभागाभावादुपपद्यते । तद्धेदं तर्ह्यव्याकृतमासीत् । तन्नामरूपाभ्यां व्याक्रियत (बृ. १।४।७) इति हि नामरूपविभागभावाभावाभ्यां नानात्वैकत्वे वदन्तीति ।

ये त्वविद्योपाधिकं जीवत्वं वदन्ति ये च पारमार्थिकोपाधिकृतं ये च सन्मात्रस्वरूपं ब्रह्म स्वयमेव भोक्तृभोग्यनियन्तृरूपेण त्रिधावस्थितं वदन्ति सर्वेप्येतेविद्याशक्तेरुपाधिशक्तेर्भोक्तृभोग्य-

1. E. om. तत् after तत्.
10. B. reads वा कदाचित् after म्रियते
12. C. reads विकार for विधानिष्टविकाराभाव.
14. C. om. परविषया .
18 E reads च after नानात्वैकत्वे.
21. B. om. उपाधिशक्ते..

http://acharya.org

नियन्तृशक्तीनां च प्रलयकालेवस्थानेपि तदानीमेकत्वावधारणं नामरूपविभागाभावादेवोपपादयन्ति । वैषम्यनैर्घृण्ये न सापेक्षत्वात्.... । न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च (ब्र. सू. २।१।३४-३५) इति सूत्राभ्यां जीवभेदस्य तत्कर्मप्रवाहस्य चानादित्वाभ्युपगमाच्च । इयान्विशेषः । एकस्यानाद्यविद्यया ब्रह्म स्वयमेव मुह्यति । अन्यस्य पारमार्थिकानाद्युपाधिना ब्रह्मस्वरूपमेव बध्यते । उपाधिब्रह्मव्यतिरिक्तवस्त्वन्तराभावात् । अपरस्य ब्रह्मैव विचित्राकारेण परिणमते कर्मफलानि चानिष्टानि भुङ्क्ते । नियन्त्रंशस्य भोक्तृत्वाभावेपि सर्वज्ञत्वात्स्वस्मादभिन्नं भोक्तारमनुसंदधातीति स्वयमेव भुङ्क्ते । अस्माकं तु स्थूलसूक्ष्मावस्थचिदचिद्वस्तुशरीरं ब्रह्म कार्यकारणोभयावस्थावस्थितमपि सर्वदा निरस्तनिखिलदोपगन्धं सत्यसंकल्पत्वाद्यपरिमितोदारगुणसागरमवतिष्ठते । प्रकारभूतचिदचिद्वस्तुगता अपुरुषार्थाः स्वरूपान्यथाभावश्चेति सर्वं समञ्जसम् ॥ १८ ॥ आत्माधिकरणं समाप्तम् । (३)

ज्ञोत एव ॥ १९ ॥

वियदादिवज्जीवो नोत्पद्यत इत्युक्तम् । तत्प्रसङ्गेन जीवस्वरूपं निरूप्यते । किं सुगतकपिलाभिमतचिन्मात्रमेवात्मनः स्वरूपमुत कणभुगभिमतपाषाणकल्पस्वरूपमचित्स्वरूपमेवागन्तुकचैतन्यगुणकमथ ज्ञातृत्वमेवास्य स्वरूपमिति । किं युक्तम् । चिन्मात्रमिति । कुतः । तथा श्रुतेः । अन्तर्यामि-

---

1. C. om. अपि after अवस्थाने.
7. B. om. स्व before रूपम्; E. reads स्वयम् for स्वरूपम्.
12. C. reads गन्ध for गन्धम्.
14. E. reads अन्यथाभावाः for अन्यथाभावः.
19. C. reads स्वभावम् for स्वरूपम् after अचित्.

http://acharya.org

ब्राह्मणे हि य आत्मनि तिष्ठन् (बृ. ३।७।२२) इति माध्यंदिनीयपर्यायस्य स्थाने यो विज्ञाने तिष्ठन्निति काण्वा अधीयते । तथा

विज्ञानं यज्ञं तनुते कर्माणि तनुतेपि च । (तै. २।५)

इति कर्तुरात्मनो विज्ञानमेव स्वरूपं श्रूयते । स्मृतिषु च

ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः । (वि. पु. १।२।६)

इत्यादिष्वात्मनो ज्ञानस्वरूपत्वं प्रतीयते । अपरस्तु जीवात्मनो ज्ञानत्वे ज्ञातृत्वे च स्वाभाविकेऽभ्युपगम्यमाने तस्य सर्वगतस्य सर्वदा सर्वत्रोपलब्धिप्रसङ्गात्करणानां च वैयर्थ्यात्सुषुप्तिमूर्छादिषु सतोप्यात्मनश्चैतन्यानुपलब्धेर्जाग्रतः सामग्र्यां सत्यां ज्ञानोत्पत्तिदर्शनादस्य न ज्ञानं स्वरूपं नापि ज्ञातृत्वम् । आगन्तुकमेव तु चैतन्यम् । सर्वगतत्वं चात्मनोवश्याभ्युपेत्यम् । सर्वत्र कार्योपलब्धेः सर्वत्रात्मनः संनिधानाभ्युपगमाच्छरीरगमनेनैव कार्यसंभवे सति गतिकल्पनायां प्रमाणाभावाच्च । श्रुतिरपि सुषुप्तिवेलायां ज्ञानाभावं दर्शयति नाह खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि (छा. ८।११।१) इति । तथा मोक्षदशायां ज्ञानाभावं दर्शयति न प्रेत्य संज्ञास्ति (बृ. २।४।१२,४।५।१३) इति । ज्ञानस्वरूपम् (वि. पु. १।२।६) इत्यादिप्रयोगस्तु ज्ञानस्य तदसाधारणगुणत्वेन लाक्षणिक इति । एवं प्राप्ते प्रचक्ष्महे ।

---

2. C. reads पर्याय for पर्यायस्य.

8. B. om. ज्ञानत्वे.

10. A. B. read हि for अपि; E. reads जाग्रत् for जाग्रतः.

12. C. E. om. तु after एव.

14. C. om. सति.

15. E. reads नाहं खल्वयमेव सम्प्रत्यात्मानं जानामि for नाह खल्वयमेव सम्प्रत्यात्मानं जानाति.

http://acharya.org

ज्ञोत एव । ज्ञ एवायमात्मा ज्ञातृस्वरूप एव न ज्ञानमात्रं नापि जडस्वरूपः । कुतः । अत एव । श्रुतेरेवेत्यर्थः । नात्मा श्रुतेः (ब्र. सू. २।३।१८) इति प्रकृता श्रुतिरत इति शब्देन परामृश्यते । तथा छान्दोग्ये प्रजापतिवाक्ये मुक्तामुक्तात्मस्वरूपकथनेथ यो वेदेदं जिघ्राणीति स आत्मा (छा. ८।१२।४)। मनसैवैतान्कामान्पश्यन्नमते य एते ब्रह्मलोके (छा. ८। १२।५-६)। सत्यकामः सत्यसंकल्पः (छा. ८।१।५)। नोपजनं स्मरन्निदं शरीरम् (छा. ८।१२।३)। अन्यत्रापि न पश्यो मृत्युं पश्यति (छा. ७।२६।२)। तथा वाजसनेयके कतम आत्मा (बृ. ४।३।७) इति पृष्ट्वा योयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः (बृ. ४।३।७) इति । तथा विज्ञातारमरे केन विजानीयात् (बृ. २।४।१४)। जानात्येवायं पुरुषः । तथैष हि द्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः (प्र. ४।९)। एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः (प्र. ६।५) इति ॥ १९ ॥

यत्तूक्तं ज्ञातृत्वे स्वाभाविके सति सर्वगतस्य तस्य सर्वत्रोपलब्धिः प्रसज्यत इति । अत्रोच्यते ।

उत्क्रान्तिगत्यागतीनाम् ॥ २० ॥

नायं सर्वगतः । अपि त्वणुरेवायमात्मा । कुतः । उत्क्रान्तिगत्यागतीनां श्रुतेः । उत्क्रान्तिस्तावच्छ्रूयते तेन प्रद्योते-

---

3. E. om. इति before शब्देन.
4. B. C. om. अमुक्त.
6. C. om. एव after मनसा.
12. A. B. om. तथा.
16. E. reads सर्वदा after तस्य.
17. B. C. read तत्र for अत्र.

http://acharya.org

नैष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्यः (बृ. ४।४।२) इति । गतिरपि ये वै के चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति (कौ. १।२) इति । आगतिरपि तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे (बृ. ४।४।६) इति । विभुत्वे ह्येता उत्क्रान्त्यादयो नोपपद्येरन् ॥ २० ॥

स्वात्मना चोत्तरयोः ॥ २१ ॥

चशब्दोवधारणे । यद्यपि शरीरवियोगरूपत्वेनोत्क्रान्तिः स्थिरस्यात्मनः कथंचिदुपपद्यते गत्यागती तु न कथंचिदुपपद्येते । अतस्ते स्वात्मनैव संपाद्ये ॥ २१ ॥

नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॥ २२ ॥

योयं विज्ञानमयः प्राणेषु (बृ. ४।३।७,४।४।२२) इति जीवं प्रस्तुत्य स वा एष महानज आत्मा (बृ.४।४।२२) इति महत्त्वश्रुतेर्नाणुर्जीव इति चेन्न । इतराधिकारात् । जीवादितरस्य प्राज्ञस्य तत्राधिकारात् । यद्यप्युपक्रमे जीवः प्रस्तुतस्तथापि यस्यानुवित्तः प्रतिबुद्ध आत्मा (बृ. ४।४।१३) इति मध्ये परः प्रतिपाद्यत इति तत्संबन्धीदं महत्त्वं न जीवस्य ॥ २२ ॥

स्वशब्दोन्मानाभ्यां च ॥ २३ ॥

साक्षादणुशब्द एव श्रूयते

एषोणुरात्मा चेतसा वेदितव्यो यस्मिन्प्राणः पञ्चधा संविवेश ।
(मु. ३।१।९)

इति । उद्धृत्य मानमुन्मानम् । अणुसदृशं वस्तूद्धृत्य तन्मानत्वं जीवस्य श्रूयते

---

4. E. reads पत्यास्मै for एत्यस्मै.

8. B. reads स्थितस्यापि, C. स्थितस्य, for स्थिरस्य.

http://acharya.org

बालाग्रशतभागस्य शतधा कल्पितस्य च ।

भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते ॥ (श्वे.५।९)

इति । आराग्रमात्रो ह्यवरोपि दृष्टः (श्वे.५।८) इति च । अतोणुरेवायमात्मा ॥ २३ ॥

अथ स्यादात्मनोणुत्वे सकलशरीरव्यापिनी वेदना नोपपद्यत इति तत्र मतान्तरेण परिहारमाह ।

अविरोधश्चन्दनवत् ॥ २४ ॥

यथा हरिचन्दनबिन्दुर्देहैकदेशवर्त्यपि सकलदेहव्यापिनमाह्लादं जनयति तद्वदात्मापि देहैकदेशवर्ती सकलदेहवर्तिनीं वेदनामनुभवति ॥ २४ ॥

अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि ॥ २५ ॥

हरिचन्दनबिन्द्वादेर्देहदेशविशेषावस्थितिविशेषात्तथाभावः । आत्मनस्तु तन्न विद्यत इति चेन्न । आत्मनोपि देहदेशविशेषे स्थित्यभ्युपगमात् । हृदयदेशे ह्यात्मनः स्थितिः श्रूयते हृदि ह्ययमात्मा तत्रैकशतं नाडीनाम् (प्र. ३।६) इति । तथा कतम आत्मा (बृ. ४।३।७) इति प्रकृत्य योयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः (बृ. ४।३।७) इति । आत्मनो देहदेशविशेषस्थितिख्यापनाय चन्दनदृष्टान्तः प्रदर्शितः । न तु चन्दनस्य देशविशषापेक्षा ॥ २५ ॥

---

2. B. C. om. स चानन्त्याय कल्पते.

9. E. reads सकलदेश for सकलदेह.

13. C. reads एक before देशविशेष.

14. C. reads विशेषेण after देशविशेषे.

18. E. reads हि after आत्मनः.

http://acharya.org

एकदेशवर्तिनः सकलदेहव्यापिकार्यकरत्वप्रकारं स्वमतेनाह ।

गुणाद्वालोकवत् ॥ २६ ॥

वाशब्दो मतान्तरव्यावृत्त्यर्थः । आत्मा स्वगुणेन ज्ञानेन सकलदेहं व्याप्यावस्थितः । आलोकवत् । यथा मणिद्युमणिप्रभृतीनामेकदेशवर्तिनामालोको नैकदेशव्यापी दृश्यते तद्वद्धृदयस्थस्यात्मनो ज्ञानं सकलदेहं व्याप्य वर्तते । ज्ञातुः प्रभास्थानीयस्य ज्ञानस्य स्वाश्रयादन्यत्र वृत्तिर्मणिप्रभावदुपपद्यत इति प्रथमसूत्रे (पृ. ४१) स्थापितम् ॥ २६ ॥

ननूक्तं ज्ञानमात्रमेवात्मेति । तत्कथं ज्ञानस्य स्वरूपव्यतिरिक्तगुणत्वमुच्यते । तत्राह ।

व्यतिरेको गन्धवत्तथा च दर्शयति ॥ २७ ॥

यथा पृथिव्या गन्धस्य गुणत्वेनोपलभ्यमानस्य ततो व्यतिरेकस्तथा जानामीति ज्ञातृगुणत्वेन प्रतीयमानस्य ज्ञानस्यात्मनो व्यतिरेकः सिद्धः । दर्शयति च श्रुतिर्जानात्येवायं पुरुष इति ॥ २७ ॥

पृथगुपदेशात् ॥ २८ ॥

स्वशब्देनैव विज्ञानं विज्ञातुः पृथगुपदिश्यते न हि विज्ञा-

---

1. C reads देश for देह.

5 E. reads अनेकदेश for नैकदेश.

9. E reads वि befo1e ज्ञानमात्रम्.

11. B. reads च after गन्धवत्; B. C. read हि for च.

12. A. B. read पृथिव्याम् for पृथिव्या, C. reads तत् befo1e गुणत्वेन.

13 E. reads ज्ञातु॰ for ज्ञातृ

14. E. reads व्यतिरेकसिद्धिम् for व्यतिरेक सिद्ध॰ ।

17. E om. वि befo1e ज्ञानम्.

http://acharya.org

तुर्विज्ञातेर्विपरिलोपो विद्यते (बृ. ४।३।३०) इति ॥ २८ ॥

यत्तूक्तं यो विज्ञाने तिष्ठन् (बृ. ३।७।२२)। विज्ञानं यज्ञं तनुते (तै. २।५) । ज्ञानस्वरूपमत्यन्तनिर्मलम् (वि. पु. १।२।६) इत्यादिषु ज्ञानमेवात्मेति व्यपदिश्यत इति तत्राह ।

तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॥ २९ ॥

तुशब्दश्चोद्यं व्यावर्तयति । तद्गुणसारत्वाद्विज्ञानगुणसारत्वादात्मनो विज्ञानमिति व्यपदेशः । विज्ञानमेवास्य सारभूतो गुणः । यथा प्राज्ञस्यानन्दः सारभूतो गुण इति प्राज्ञ आनन्दशब्देन व्यपदिश्यते यदेष आकाश आनन्दो न स्यात् (तै. २।७)। आनन्दो ब्रह्मेति व्यजानात् (तै. ३।६) इति । प्राज्ञस्य ह्यानन्दः सारभूतो गुणः । स एको ब्रह्मण आनन्दः (तै.२।८)।

आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन । (तै. २।९) इति । यथा वा सत्यं ज्ञानमनन्तं ब्रह्म (तै. २।१) इति विपश्चितः प्राज्ञस्य ज्ञानशब्देन व्यपदेशः। सह ब्रह्मणा विपश्चिता (तै. २।१) । यः सर्वज्ञः (मु. १।१।९) इत्यादिषु प्राज्ञस्य ज्ञानं सारभूतो गुण इति विज्ञायते ॥ २९ ॥

यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॥ ३० ॥

विज्ञानस्य यावदात्मभाविधर्मत्वात्तेन तद्व्यपदेशो न दोषः । तथा च खण्डादयो यावत्स्वरूपभाविगोत्वादिधर्मशब्देन गौरिति व्यपदिश्यमाना दृश्यन्ते । स्वरूपनिरूपणधर्मत्वादित्यर्थः। चकाराज्ज्ञानवदात्मनोपि स्वप्रकाशत्वेन ज्ञानमिति व्यपदेशे न दोष इति समुच्चिनोति ॥ ३० ॥

---

3. E. reads परमार्थतः after निर्मलम्.

18. C. reads भावित्वात् for भाविधर्मत्वात्; E. reads धर्मत्वेन for धर्मत्वात्तेन.

20. A. reads निरूपक for निरूपण; E. reads चकारः for चकारात्.

21. C. reads व्यपदेशः for व्यपदेशे.

http://acharya.org

यथोक्तं सुषुप्त्यादिषु ज्ञानाभावाज्ज्ञानस्य न स्वरूपानुबन्धिधर्मत्वमिति तत्राह।

पुंस्त्वादिवत्त्वस्य सतोभिव्यक्तियोगात्॥ ३१॥

तुशब्दश्चोदिताशङ्कानिवृत्त्यर्थः। अस्य ज्ञानस्य सुषुप्त्यादिष्वपि विद्यमानस्य जागर्यादिष्वभिव्यक्तिसंभवात्स्वरूपानुबन्धिधर्मत्वोपपत्तिः। पुंस्त्वादिवत्। यथा पुंस्त्वाद्यसाधारणस्य धातोर्बाल्यावस्थायां सतोप्यनभिव्यक्तस्य युवत्वेभिव्यक्तौ पुंसस्तद्वत्ता न कादाचित्की भवति। सप्तधातुमयत्वं हि शरीरस्य स्वरूपानुबन्धि।

तत्सप्तधातु त्रिमलं द्वियोनि चतुर्विधाहारमयं शरीरम्।
(गर्भोप. १)

इति शरीरस्वरूपव्यपदेशात्। सुषुप्त्यादिष्वप्यहमर्थः प्रकाशत इति प्रागेवोक्तम् (पृ. ४९)। तस्य विद्यमानस्य ज्ञानस्य विषयगोचरत्वं जागर्यादावुपलभ्यते। एते चात्मनो ज्ञातृत्वादयो धर्माः प्रागेवोपपादिताः (पृ. ६१)। अतो ज्ञातृत्वमेव जीवात्मनः स्वरूपम्। स चायमात्माणुपरिमाणः। न प्रेत्य संज्ञास्ति (बृ. २।४।१२) इत्यपि न मुक्तस्य ज्ञानाभाव उच्यते। अपि त्वेतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति (बृ. २।४।१२) इति संसारदशायां यद्भूतानुविधायित्वप्रयुक्तं जन्मनाशादिदर्शनं तन्मुक्तस्य न विद्यते।

न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम्।
सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वशः॥ (छा. ७।२६।२)

---

1. E. reads न ज्ञानस्य for ज्ञानस्य न.
4. C. reads व्यावृत्ति for निवृत्ति.
14. B. C. read अर्था. for धर्माः.
19. C. reads प्रयुक्त for प्रयुक्तम्.
21. A. B. read इति after सर्वशः.

http://acharya.org

नोपजनं स्मरन्निदं शरीरम् (छा. ८।१२।३) । मनसैतान्कामान्पश्यन्नमते (छा. ८।१२।५) इत्यादिश्रुत्यैकार्थ्यात् ॥ ३१ ॥

संप्रति ज्ञानात्मवादे तस्य सर्वगतत्वे दूषणमाह ।

नित्योपलब्ध्यनुपलब्धिप्रसङ्गोन्यतरनियमो वान्यथा ॥ ३२ ॥

अन्यथा सर्वगतत्वपक्षे तस्य ज्ञानमात्रत्वपक्षे च नित्यमुपलब्ध्यनुपलब्धी सहैव प्रसज्येयाताम् । अन्यतरनियमो वा । उपलब्धिरेव वा नित्यं स्यादनुपलब्धिरेव वा । एतदुक्तं भवति । लोके तावद्वर्तमानयोरात्मोपलब्ध्यनुपलब्ध्योरयं ज्ञानात्मा सर्वगतो हेतुः स्यादुपलब्धेरेव वानुपलब्धेरेव वा । उभयहेतुत्वे सर्वदा सर्वत्रोभयं प्रसज्येत । यद्युपलब्धेरेव सर्वस्य सर्वदा सर्वत्रानुपलम्भो न स्यात् । अथानुपलब्धेरेव सर्वदा सर्वत्रोपलब्धिर्न स्यादिति । अस्माकं शरीरस्यान्तरेवावस्थितत्वादात्मनस्तत्रैवोपलब्धिर्नान्यत्रेति व्यवस्थासिद्धिः । करणायत्तोपलब्धेरपि सर्वेषामात्मनां सर्वगतत्वेन सर्वैः करणैः सर्वदा संयुक्तत्वाददृष्टादेरप्यनियमादुक्तदोषः समानः ॥ ३२ ॥ ज्ञाधिकरण समाप्तम् । (४)

कर्ता शास्त्रार्थवत्त्वात् ॥ ३३ ॥

अयमात्मा ज्ञाता स चाणुपरिमाण इत्युक्तम् । इदानीं किं स एव कर्तोत स्वयमकर्तैव सन्नचेतनानां गुणानां कर्तृत्वमात्मन्यध्यस्यतीति चिन्त्यते । किमत्र युक्तम् । अकर्तैवात्मेति ।

---

1. A. B. read एव after मनसा.
13. B. om. सर्वदा.
14. A. B. om. अव before स्थितत्वात्.
16. B. reads सर्व for सर्वैः.

http://acharya.org

कुतः । आत्मनो ह्यकर्तृत्वं गुणानामेव च कर्तृत्वमध्यात्मशास्त्रेषु श्रूयते । तथा हि कठवल्लीषु जीवस्य न जायते म्रियते (का. २।१८) इत्यादिना जन्मजरामरणादिकं सर्वं प्रकृतिधर्मं प्रतिषिध्य हननादिषु क्रियासु कर्तृत्वमपि प्रतिषिध्यते

हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम् ।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥ (का.२।१९)

इति । हन्तारमात्मानं जानन्न जानात्यात्मानमित्यर्थः । तथा च भगवता स्वयमेव जीवस्याकर्तृत्वं स्वरूपं कर्तृत्वाभिमानस्तु व्यामोह इत्युच्यते ।

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहंकारविमूढात्मा कर्ताहमिति मन्यते ॥ (गी. ३।२७)
नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति। (गी. १४।१९)
कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते॥ (गी. १३।२०)

इति च । अतः पुरुषस्य भोक्तृत्वमेव । प्रकृतेरेव तु कर्तृत्वम् । एवं प्राप्ते प्रचक्ष्महे ।

कर्ता शास्त्रार्थवत्त्वात् । आत्मैव कर्ता न गुणाः । कस्मात् । शास्त्रार्थवत्त्वात् । शास्त्राणि हि यजेत स्वर्गकामः । मुमुक्षुर्ब्रह्मोपासीतेत्येवमादीनि स्वर्गमोक्षादिफलस्य भोक्तारमेव कर्तृत्वे नियुञ्जते । न ह्यचेतनस्य कर्तृत्वे चेतनो नियुज्यते । शासनाच्च शास्त्रम् । शासनं च प्रवर्तनम् । शास्त्रस्य च प्रवर्तकत्वं बोध-

1. A B. om. च after एव.

12. B. reads यथा for यदा.

15. C. om. च after इति; B. C. read इति after कर्तृत्वम्.

17 C. reads इति after शास्त्रार्थवत्त्वात्; B. reads गुण. for गुणाः.

18. A. B. om. हि after शास्त्राणि.

20. E. reads अन्यः for चेतनः; C. om. च after शासनात्.

http://acharya.org

जननद्वारेण। अचेतनं च प्रधानं न बोधयितुं शक्यम्। अतः शास्त्राणामर्थवत्त्वं भोक्तुश्चेतनस्यैव कर्तृत्वे भवेत्। तदुक्तं शास्त्रफलं प्रयोक्तरि (जै. सू. ३।७।१८) इति। यदुक्तं हन्ता चेन्मन्यते (का. २।१९) इत्यादिना हननक्रियायामकर्तृत्वमात्मनः श्रूयत इति तदात्मनो नित्यत्वेन हन्तव्यत्वाभावादुच्यते। यच्च प्रकृतेः क्रियमाणानि (३।२७) इत्यादिना गुणानामेव कर्तृत्वं स्मर्यत इति तत्सांसारिकप्रवृत्तिष्वस्य कर्तृता सत्त्वरजस्तमोगुणसंसर्गकृता न स्वरूपप्रयुक्तेति प्राप्ताप्राप्तविवेकेन गुणानामेव कर्तृत्वमित्युच्यते। तथा च तत्रैवोच्यते

कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु। (गी. १३।२१)

इति। तथा तत्रैवात्मनश्च कर्तृत्वमभ्युपेत्योच्यते

तत्रैवं सति कर्तारमात्मानं केवलं तु यः।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः॥
(गी. १८।१६)

इति।

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्।
विविधा च पृथक्चेष्टा दैवं चैवात्र पञ्चमम्॥
(गी. १८।१४)

इत्यधिष्ठानादिदैवपर्यन्तसापेक्षे सत्यात्मनः कर्तृत्वे य आत्मानमेव केवलं कर्तारं मन्यते न स पश्यतीत्यर्थः॥ ३३॥

उपादानाद्विहारोपदेशाच्च॥ ३४॥

स यथा महाराजः (बृ. २।१।१८) इति प्रकृत्यैवमेवैष एतान्प्राणान्गृहीत्वा स्वे शरीरे यथाकामं परिवर्तते (बृ. २।१।१८) इति प्राणानामुपादाने विहारे च कर्तृत्वमुपदिश्यते॥ ३४॥

---

17. E. reads विविधाः for विविधा.

19. C. reads कर्तृत्वेन for कर्तृत्वे यः.

http://acharya.org

व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ॥ ३५ ॥

विज्ञानं यज्ञं तनुते कर्माणि तनुतेपि च। (तै. २।५) इति लौकिकवैदिकक्रियासु कर्तृत्वव्यपदेशाच्च कर्ता। विज्ञानशब्देन नात्मनो व्यपदेशोपि त्वन्तःकरणस्य बुद्धेरिति चेदेवं सति निर्देशविपर्ययः स्यात्। बुद्धेः करणत्वाद्विज्ञानेनेति करणविभक्तिनिर्देशः स्यात् ॥ ३५ ॥

उपलब्धिवदनियमः ॥ ३६ ॥

आत्मनोकर्तृत्वे दोष उच्यते। यथात्मनो विभुत्वे नित्योपलब्ध्यनुपलब्धिप्रसङ्गः (ब्र. सू. २।३।३२) इत्यादिनोपलब्धेरनियम उक्तस्तद्वदात्मनोकर्तृत्वे प्रकृतेश्च कर्तृत्वे तस्याः सर्वपुरुषसाधारणत्वात्सर्वाणि कर्माणि सर्वेषां भोगाय स्युः। नैव वा कस्यचित्। आत्मनो विभुत्वाभ्युपगमात्संनिधानमपि सर्वेषामविशिष्टम्। अत एव चान्तःकरणादीनामपि नियमो नोपपद्यते यदायत्ता व्यवस्था स्यात् ॥ ३६ ॥

शक्तिविपर्ययात् ॥ ३७ ॥

बुद्धेः कर्तृत्वे कर्तुरन्यस्य भोक्तृत्वानुपपत्तेर्भोक्तृत्वशक्तिरपि तस्या एव स्यादित्यात्मनो भोक्तृत्वशक्तिर्हीयेत। भोक्तृत्वं च बुद्धेरेव संपद्यत इत्यात्मसद्भावे प्रमाणाभावश्च स्यात्। पुरुषोस्ति भोक्तृभावात् (सां. का. १७) इति हि तेषामभ्युपगमः ॥ ३७ ॥

समाध्यभावाच्च ॥ ३८ ॥

बुद्धेः कर्तृत्वे मोक्षसाधनभूतसमाधावपि सैव कर्त्री स्यात्। स

---

12. C. reads आत्मनाम् for आत्मनः.

13. B. om. च after अत एव; C. reads अन्तःकरणादिना for अन्तःकरणादीनाम्.

http://acharya.org

च समाधिः प्रकृतेरन्योस्मीत्येवंरूपः । न च प्रकृतेरन्योस्मीति प्रकृतिः समाधातुमलम् । अतोप्यात्मैव कर्ता ॥ ३८ ॥

नन्वात्मनः कर्तृत्वेभ्युपगम्यमाने सर्वदा कर्तृत्वं नोपरमेतेत्यत्राह ।

यथा च तक्षोभयथा ॥ ३९ ॥

वागादिकरणसंपन्नोप्यात्मा यदेच्छति तदा करोति यदा तु नेच्छति तदा न करोति । यथा तक्षा वास्यादिकरणसंनिधानेपीच्छानुगुण्येन करोति न करोति च । बुद्धेस्त्वचेतनायाः कर्तृत्वे तस्या भोगवाञ्छादिनियमकारणाभावात्सर्वदा कर्तृत्वमेव स्यात् ॥ ३९ ॥ कर्त्रधिकरणं समाप्तम् । (५)

परात्तु तच्छ्रुतेः ॥ ४० ॥

इदं जीवस्य कर्तृत्वं किं स्वातन्त्र्येणोत परमात्मायत्तमिति । किं प्राप्तम् । स्वातन्त्र्येणेति । परमात्मायत्तत्वे हि विधिनिषेधशास्त्रानर्थक्यं प्रसज्यते । यो हि स्वबुद्ध्या प्रवृत्तिनिवृत्त्यारम्भशक्तः स एव नियोज्यो भवति । अतः स्वातन्त्र्येणास्य कर्तृत्वमिति प्राप्तेभिधीयते ।

परात्त्विति । तुशब्दः पक्षं व्यावर्तयति । तत्कर्तृत्वमस्य परात्परमात्मन एव हेतोर्भवति । कुतः । श्रुतेः । अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा (तै. आ. ३।११।२) । य आत्मनि तिष्ठन्नात्मनोन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्मान्तर्याम्यमृतः (बृ.३।७।२२) इति । स्मृतिरपि

2. C. reads हि for अपि after अतः.

14. C. E. read प्रसज्येत for प्रसज्यते.

17. E. om. परात्त्विति; C. reads जीवस्य after अस्य.

http://acharya.org

सर्वस्य चाहं हृदि संनिविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च ।
(गी. १५।१५)

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥ (गी. १८।६१)

इति ॥ ४० ॥

नन्वेवं विधिनिषेधशास्त्रानर्थक्यं प्रसज्येतेत्युक्तं तत्राह ।

कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ॥ ४१ ॥

सर्वासु क्रियासु पुरुषेण कृतं प्रयत्नमुद्योगमपेक्ष्यान्तर्यामी परमात्मा तदनुमतिदानेन प्रवर्तयति । परमात्मानुमतिमन्तरेणास्य प्रवृत्तिर्नोपपद्यत इत्यर्थः । कुत एतत् । विहितप्रतिषिद्धावैयर्थ्यादिभ्यः । आदिशब्देनानुग्रहनिग्रहादयो गृह्यन्ते । यथा द्वयोः साधारणे धने परस्वत्वापादनमन्यतरानुमतिमन्तरेण नोपपद्यते तथापीतरानुमतिः स्वेनैव कृतेति तत्फलं स्वस्यैव भवति । पापकर्मसु निवर्तनशक्तस्याप्यनुमन्तृत्वं न निर्दयत्वमावहतीति सांख्यसमयनिरूपणे प्रतिपादितम् । नन्वेवमेष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषति । एष एवासाधु कर्म कारयति तं यमधो निनीषति (कौ. ३।९) इत्युन्निनीषयाधोनिनीषया च स्वयमेव साध्वसाधुनी कर्मणी कारयतीति तन्नोप-

9. C. reads अवेक्ष्य for अपेक्ष्य.
10. A. reads प्रवर्तयते for प्रवर्तयति.
13. C. reads अन्यतम for अन्यतर.
14. C. reads अथापि for तथापि; A. B read अनुमतेस्तु for अनुमति ; B. C. read कृतम् for कृता; E. reads तस्यैव for स्वस्यैव.
15. C. reads नियन्तृत्वम् for निवर्तनशक्तस्याप्यनुमन्तृत्वम्.
17. C. reads हि after एषः.
19. C. reads साध्वसाधूनि कर्माणि for साध्वसाधुनी कर्मणी; C reads इत्येतत्; E. एतत्, for इति तत्.

http://acharya.org

पद्यते । उच्यते । एतन्न सर्वसाधारणम् । यस्त्वतिमात्रपरमपुरुषानुकूल्ये व्यवस्थितः प्रवर्तते तमनुगृह्णन्भगवान्स्वयमेव स्वप्राप्त्युपायेष्वतिकल्याणेषु कर्मस्वेव रुचिं जनयति । यश्चातिमात्रप्रातिकूल्ये व्यवस्थितः प्रवर्तते तं स्वप्राप्तिविरोधिष्वधोगतिसाधनेषु कर्मसु रुचिं जनयति । यथोक्तं भगवता स्वयमेव ।

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥

(भ. गी. १०।८)

इत्यारभ्य

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥
तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥

(भ. गी. १०।१०-११)

इति । तथा

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् । (भ. गी. १६।८)

इत्यादि

मामात्मपरदेहेषु प्रद्विषन्तोभ्यसूयकाः ।

(भ. गी. १६।१८)

---

2. B. reads अनुकूले for आनुकूल्ये; C. E. read व्यवसितः for व्यवस्थित.

3. E. reads एव after कल्याणेषु.

4. C. reads व्यवसितः for व्यवस्थितः; E. reads निगृह्णन् after तम्.

5. C. reads सज्जयति for रुचिं जनयति.

18. C. reads हि for अभि before असूयकाः.

http://acharya.org

इत्यन्तमुक्त्वा

तानहं द्विषतः क्रूरान्संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥

(भ. गी. १६।१९)

इत्युक्तम् ॥ ४१ ॥ परायत्ताधिकरणं समाप्तम् । (६)

अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ॥ ४२ ॥

जीवस्य कर्तृत्वं परमपुरुषायत्तमित्युक्तम् । इदानीं किमयं जीवः परस्मादत्यन्तभिन्न उत परमेव ब्रह्म भ्रान्तमुत ब्रह्मैवोपाध्यवच्छिन्नमथ ब्रह्मांश इति संशय्यते । श्रुतिविप्रतिपत्तेः संशयः । ननु तदनन्यत्वमारम्भणशब्दादिभ्यः (ब्र. सू. २।१।१५)। अधिकं तु भेदनिर्देशात् (ब्र. सू. २।१।२२) इत्यत्रैवायमर्थो निर्णीतः । सत्यम् । स एव नानात्वैकत्वश्रुतिविप्रतिपत्त्याक्षिप्य जीवस्य ब्रह्मांशत्वोपपादनेन विशेषतो निर्णीयते । यावद्धि जीवस्य ब्रह्मांशत्वं न निर्णीतं तावज्जीवस्य ब्रह्मणोनन्यत्वं ब्रह्मणस्तस्मादधिकत्वं च न प्रतितिष्ठति । किं तावत्प्राप्तम् । अत्यन्तभिन्न इति । कुतः । ज्ञाज्ञौ द्वावजौ (श्वे. १।९) इत्यादिना भेदनिर्देशात् । ज्ञाज्ञयोरभेदश्रुतयस्त्वग्निना सिञ्चेदितिवद्विरुद्धार्थप्रतिपादनादौपचारिक्यः । ब्रह्मणोंशो जीव इत्यपि न साधीयः । एकवस्त्वेकदेशवाची ह्यंशशब्दः । जीवस्य ब्रह्मैकदेशत्वे तद्गता दोषा ब्रह्मणि भवेयुः । न च ब्रह्मखण्डो जीव इत्यंशत्वोपपत्तिः । खण्डनानर्हत्वाद्ब्रह्मणः । प्रागुक्तदोषप्रसङ्गाच्च ।

---

5. C. om. उक्तम् after इति.
9. B. om. ब्रह्म before भ्रान्तम्.
15. C. om. न before निर्णीतम्.
17. E. reads ईशानीशौ after द्वावजौ.

http://acharya.org

तस्मादत्यन्तभिन्नस्य च तदंशत्वं दुरुपपादम् । यद्वा भ्रान्तं ब्रह्मैव जीवः । कुतः । तत्त्वमसि (छा. ६।८।७) । अयमात्मा ब्रह्म (बृ. २।५।१९) इत्यादिब्रह्मात्मभावोपदेशात् । नानात्ववादिन्यस्तु प्रत्यक्षादिसिद्धार्थानुवादित्वादनन्यथासिद्धाद्वैतोपदेशपराभिः श्रुतिभिः प्रत्यक्षादय इवाविद्यान्तर्गताः ख्याप्यन्ते । अथ वा ब्रह्मैवानाद्युपाध्यवच्छिन्नं जीवः । कुतः । तत एव ब्रह्मात्मभावोपदेशात् । न चायमुपाधिर्भ्रान्तिपरिकल्पित इति वक्तुं शक्यम् । बन्धमोक्षादिव्यवस्थानुपपत्तेरिति । एवं प्राप्तेभिधीयते ।

ब्रह्मांश इति । कुतः । नानात्वव्यपदेशात् । अन्यथा च । एकत्वेन व्यपदेशात् । उभयथा हि व्यपदेशो दृश्यते । नानात्वव्यपदेशस्तावत्स्रष्टृत्वसृज्यत्वनियन्तृत्वनियाम्यत्वसर्वज्ञत्वाज्ञत्वस्वाधीनत्वपराधीनत्वशुद्धत्वाशुद्धत्वकल्याणगुणाकरत्वतद्विपरीतत्वपतित्वशेषत्वादिभिर्दृश्यते । अन्यथा चाभेदेन व्यपदेशोपि तत्त्वमसि (छा. ६।८।७) । अयमात्मा ब्रह्म (बृ. २।५।१९) इत्यादिभिर्दृश्यते । अपि दाशकितवादित्वमधीयत एके । ब्रह्म दाशा ब्रह्म दासा ब्रह्मेमे कितवाः (आथ.

---

3 C. reads ब्रह्मभाव for ब्रह्मात्मभाव.

4. C. om. उपदेश after अद्वैत.

6. B. reads न after ब्रह्मैव.

7. C. reads ब्रह्मभाव for ब्रह्मात्मभाव; C. reads शक्यं वक्तुम् for वक्तुं शक्यम्

8. C. reads व्यवस्थासिद्धेः for व्यवस्थानुपपत्तेः; A.B. read प्रचक्ष्महे for अभिधीयते.

9. B. C. om. त्व after नाना.

10. A. B. read अपि for हि.

11. B. C. om.. त्व after नाना.

12. B. om. अज्ञत्व, C. om. अशुद्धत्व.

13. A. reads अभेद for अभेदेन.

http://acharya.org

अ. सूक्त) इत्याथर्वणिका ब्रह्मणो दाशकितवादित्वमप्यधीयते । ततश्च सर्वजीवव्यापित्वेनाभेदो व्यपदिश्यत इत्यर्थः । एवमुभयव्यपदेशमुख्यत्वसिद्धये जीवोयं ब्रह्मणोंश इत्यभ्युपगन्तव्यः । न च भेदव्यपदेशानां प्रत्यक्षादिप्रसिद्धार्थत्वेनान्यथासिद्धत्वम् । ब्रह्मसृज्यत्वतन्नियाम्यत्वतच्छरीरत्वतच्छेषत्वतदाधारत्वतत्पाल्यत्वतत्संहार्यत्वतदुपासकत्वतत्प्रसादलभ्यधर्मार्थकाममोक्षरूपपुरुषार्थभाक्त्वादयस्तत्कृतश्च जीवब्रह्मणोर्भेदः प्रत्यक्षाद्यगोचरत्वेनानन्यथासिद्धः । अतो न जगत्सृष्ट्यादिवादिनीनां प्रमाणान्तरसिद्धभेदानुवादेन मिथ्यार्थोपदेशपरत्वम् । न चाखण्डैकरसचिन्मात्रस्वरूपेण ब्रह्मणात्मनोतद्भावानुसंधानं बहुभवनसंकल्पपूर्वकवियदादिसृष्टिं जीवभावेन तत्प्रवेशं विचित्रनामरूपव्याकरणं तत्कृतानन्तविषयानुभवनिमित्तसुखदुःखभागित्वमभोक्तृत्वेन तत्र स्थित्वा तन्नियमनेनान्तर्यामित्वं जीवभूतस्य स्वस्य कारणब्रह्मात्मभावानुसंधानं संसारमोक्षं तदुपदेशशास्त्रं च कुर्वाणेन भ्रमितव्यमित्युपदिश्यते । तथा सत्युन्मत्तप्रलपितत्वापातात् । उपाध्यवच्छिन्नं ब्रह्म जीव इत्यपि न साधीयः । पूर्वनिर्दिष्टनियन्तृत्वनियाम्यत्वादिव्यपदेशभावादेव । न हि देवदत्तादेरेकस्यैव गृहाद्युपाधिभेदान्नियन्तृनियाम्य-

---

4. C. om. प्र before सिद्धार्थत्वेन.

7. E. reads भोक्तृत्व for भाक्त्व.

8. C. reads अन्यथासिद्ध॰ for अनन्यथासिद्ध॰.

10 C. reads आत्मनां तद्भेदाभाव for आत्मनोतद्भाव, A. B. read अतद्भाव for अतद्भाव.

12. B. om. व्या before करणम्.

14. C. reads उपदेशम् for उपदेशशास्त्रम्.

17. B. E. om. त्व after नियन्तृ; E. reads बाधात् for भावात्.

18. C. reads भेदानियन्तृत्व for भेदान्नियन्तृ.

http://acharya.org

भावादिसिद्धिः । अत उभयव्यपदेशोपपत्तये जीवोयं ब्रह्मणोंश इत्यभ्युपेत्यम् ॥ ४२ ॥

मन्त्रवर्णात् ॥ ४३ ॥

पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि । (तै.आ.३।१०) इति मन्त्रवर्णाच्च ब्रह्मांशो जीवः । अंशवाची हि पादशब्दः । विश्वा भूतानीति जीवानां बहुत्वाद्बहुवचनं मन्त्रे । सूत्रेप्यंश इत्येकवचनं जात्यभिप्रायम् । नात्मा श्रुतेः (ब्र. सू. २।३।१८) इत्यत्राप्येकवचनं जात्यभिप्रायम् ।

नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् । (श्वे. ६।१३)

इत्यादिश्रुतिभ्य ईश्वराद्भेदस्यात्मनां बहुत्वनित्यत्वयोश्चाभिधीयमानत्वात् । एवं नित्यानामात्मनां बहुत्वे प्रामाणिके सति ज्ञानस्वरूपत्वेन सर्वेषामेकरूपत्वेपि भेदकाकार आत्मयाथात्म्यवेदनक्षमैरवगम्यते । असंततेश्चाव्यतिकरः (ब्र. सू. २।३।४८) इत्यनन्तरमेव चात्मबहुत्वं वक्ष्यति ॥ ४३ ॥

अपि स्मर्यते ॥ ४४ ॥

ममैवांशो जीवलोके जीवभूतः सनातनः । (भ.गी.१५।७) इति जीवस्य पुरुषोत्तमांशत्वं स्मर्यते । अतश्चायमंशः ॥ ४४ ॥

अंशत्वेपि जीवस्य ब्रह्मैकदेशत्वेन जीवगता दोषा ब्रह्मण एवेत्याशङ्क्याह ।

प्रकाशादिवत्तु नैवं परः ॥ ४५ ॥

तुशब्दश्चोद्यं व्यावर्तयति । प्रकाशादिवज्जीवः परमात्मनोंशः । यथाग्न्यादित्यादेर्भास्वतो भारूपः प्रकाशोंशो भवति ।

---

6. A. B. read च after जीवानाम्; C. reads अत्र before मन्त्रे.

8. A, B. om. एकवचनम् after इत्यत्रापि.

13. C. reads आत्मत्व for आत्म.

23. A. B. read भारूप for भारूपः.

http://acharya.org

यथा गवाश्वशुक्लकृष्णादीनां गोत्वादिविशिष्टानां वस्तूनां गोत्वादीनि विशेषणान्यंशाः। यथा वा देहिनो देवमनुष्यादेर्देहोंशस्तद्वत्। एकवस्त्वेकदेशत्वं ह्यंशत्वम्। विशिष्टस्यैकस्य वस्तुनो विशेषणमंश एव। तथा च विवेचका विशिष्टे वस्तुनि विशेषणांशोयं विशेष्यांशोयमिति व्यपदिशन्ति। विशेषणविशेष्ययोरंशांशित्वेपि स्वभाववैलक्षण्यं दृश्यते। एवं जीवपरयोर्विशेषणविशेष्ययोरंशांशित्वं स्वभावभेदश्चोपपद्यते। तदिदमुच्यते नैवं पर इति। यथाभूतो जीवो न तथाभूतः परः। यथैव हि प्रभायाः प्रभावानन्यथाभूतस्तथा प्रभास्थानीयात्स्वांशाज्जीवादंशी परोप्यर्थान्तरभूत इत्यर्थः। एवं जीवपरयोर्विशेषणविशेष्यत्वकृतं स्वभाववैलक्षण्यमाश्रित्य भेदनिर्देशाः प्रवर्तन्ते। अभेदनिर्देशास्तु पृथक्सिद्ध्यनर्हविशेषणानां विशेष्यपर्यन्तत्वमाश्रित्य मुख्यत्वेनोपपद्यन्ते। तत्त्वमसि (छा. ६।८।७)। अयमात्मा ब्रह्म (बृ. २।५।१९) इत्यादिषु तच्छब्दब्रह्मशब्दवत्त्वमयमात्मेति शब्दा अपि जीवशरीरकब्रह्मवाचकत्वेनैकार्थाभिधायित्वादिति। अयमर्थः प्रागेव प्रपञ्चितः॥ ४५॥

स्मरन्ति च॥ ४६॥

एवं प्रभाप्रभावद्रूपेण शक्तिशक्तिमद्रूपेण शरीरात्मभावेन चांशांशिभावं जगद्ब्रह्मणोः पराशरादयः स्मरन्ति

---

3. C. reads च after एकस्य.
4. C. reads विशिष्ट for विशिष्टे.
5. C. reads विशेष्यांशयोः for विशेष्ययोः.
7. C. reads अशांशि for अशांशित्वम्
8. E. reads तथाभूतो न for न तथाभूतः.
12. C. reads अपृथक् for पृथक्.
15. A. B. read शब्दः for शब्दा; C. om. क after शरीर; A. B. read ऐकार्थ्य for एकार्थ,

http://acharya.org

एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा ।
परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत् ॥
(वि. पु. १।२२।५५)

यत्किंचित्सृज्यते येन सत्त्वजातेन वै द्विज ।
तस्य सृज्यस्य संभूतौ तत्सर्वं वै हरेस्तनुः ॥
(वि. पु. १।२२।३७)

इत्यादिना । चकाराच्छ्रुतयोपि यस्यात्मा शरीरम् (बृ.३।७।२२) इत्यादिनात्मशरीरभावेनांशांशित्वं वदन्तीत्युच्यते ॥ ४६ ॥

एवं ब्रह्मणोंशत्वे ब्रह्मप्रवर्त्यत्वे ज्ञत्वे च सर्वेषां समाने केषांचिद्वेदाध्ययनतदर्थानुष्ठानाद्यनुज्ञा केषांचित्तत्परिहारः केषांचिद्दर्शनस्पर्शनाद्यनुज्ञा केषांचित्तत्परिहारश्च शास्त्रेषु कथमुपपद्यत इत्याशङ्क्याह ।

अनुज्ञापरिहारौ देहसंबन्धाज्ज्योतिरादिवत् ॥ ४७ ॥

सर्वेषां ब्रह्मांशत्वज्ञत्वादिनैकरूपत्वे सत्यपि ब्राह्मणक्षत्रियवैश्यशूद्रादिरूपशुच्यशुचिदेहसंबन्धनिबन्धनावनुज्ञापरिहारावुपपद्येते । ज्योतिरादिवत् । यथाग्नेरग्नित्वेनैकरूपत्वेपि श्रोत्रियागारादग्निराह्रियते श्मशानादेस्तु परिह्रियते । यथा चान्नादि श्रोत्रियादेरनुज्ञायतेभिशस्तादेस्तु परिह्रियते ॥ ४७ ॥

असंततेश्चाव्यतिकरः ॥ ४८ ॥

ब्रह्मांशत्वादिनैकरूपत्वे सत्यपि जीवानामन्योन्यभेदादणुत्वेन प्रतिशरीरं भिन्नत्वाच्च भोगव्यतिकरोपि न भवति । भ्रान्तब्र-

---

9. A. B. read च after प्रवर्त्यत्वे; C. om. ज्ञत्वे.
11. C. om. स्पर्शन.
16. C. reads सति after एकरूपत्वे.
17. A. B. read वा for च after यथा.
20. C. reads ब्रह्मांशत्वेन for ब्रह्मांशत्वादिना.
21. E. reads सम् before भवति.

http://acharya.org

ह्मजीववादे चोपहितब्रह्मजीववादे च जीवपरयोर्जीवानां च भोगव्यतिकरादयः सर्वे दोषाः सन्तीत्यभिप्रायेण स्वपक्षे भोगव्यतिकराभाव उक्तः ॥ ४८ ॥

ननु भ्रान्तब्रह्मजीववादेऽप्यविद्याकृतोपाधिभेदाद्भोगव्यवस्थादय उपपद्यन्तेत आह ।

आभास एव च ॥ ४९ ॥

अखण्डैकरसप्रकाशमात्रस्वरूपस्य स्वरूपतिरोधानपूर्वकोपाधिभेदोपपादनहेतुराभास एव । प्रकाशैकस्वरूपस्य प्रकाशतिरोधानं प्रकाशनाश एवेति प्रागेवोपपादितम् (पृ. ८५)। आभासा एवेति वा पाठः । तथा सति हेतव आभासाः । चकारात्पृथगात्मानं प्रेरितारं च मत्वा (श्वे. १।६)। ज्ञाज्ञौ द्वावजावीशानीशौ (श्वे. १९) । तयोरन्यः पिप्पलं स्वाद्वत्ति (मु. ३।१।१, श्वे. ४।६) इत्यादिश्रुतिविरोधश्च । अविद्यापरिकल्पितोपाधिभेदे हि सर्वोपाधिभिरुपहितस्वरूपस्यैकत्वाभ्युपगमाद्भोगव्यतिकरस्तदवस्थ एव ॥ ४९ ॥

पारमार्थिकोपाध्युपहितब्रह्मजीववादेऽप्युपाधिभेदहेतुभूतानामदृष्टवशाद्व्यवस्था भविष्यतीत्याशङ्क्याह ।

अदृष्टानियमात् ॥ ५० ॥

उपाधिपरंपराहेतुभूतस्यादृष्टस्यापि ब्रह्मस्वरूपाश्रयत्वेन नियमहेत्वभावादव्यवस्थैव । उपाधिभिरदृष्टैश्च स्वसंबन्धेन ब्रह्मस्वरूपच्छेदासंभवात् ॥ ५० ॥

---

5. E. reads तत्र for अतः.
7. C. reads औपाधिक for उपाधि.
12. B. C. om. अजावीशानीशौ.
14. C. reads अपि for हि.
16. E. om. अपि.
20. A. B. read स्व after नियमहेतु.

http://acharya.org

अभिसंध्यादिष्वपि चैवम् ॥ ५१ ॥

अदृष्टहेतुभूताभिसंध्यादिष्वप्युक्तादेव हेतोरनियम एव॥५१॥

प्रदेशभेदादिति चेन्नान्तर्भावात् ॥ ५२ ॥

यद्यप्येकमेव ब्रह्मस्वरूपं तच्छेदानर्हं नानाविधोपाधिभिः संबध्यते तथाप्युपाधिसंबन्धिब्रह्मप्रदेशभेदादुपपद्यत एव भोगव्यवस्थेति चेत्तन्न । उपाधीनां तत्र तत्र गमनात्सर्वप्रदेशानां सर्वोपाध्यन्तर्भावाद्व्यतिकरस्तदवस्थ एव । प्रदेशभेदेन संबन्धेपि सर्वस्य ब्रह्मप्रदेशत्वात्तत्तत्प्रदेशसंबन्धि दुःखं ब्रह्मण एव स्यात् । पूर्वत्र नित्योपलब्ध्यनुपलब्धिप्रसङ्गोन्यतरनियमो वान्यथा (ब्र. सू. २।३।३२)। उपलब्धिवदनियमः (ब्र. सू. २।३।३६) इति द्वाभ्यां सूत्राभ्यां वेदबाह्यानां सर्वगतजीववादिनां दोष उक्तः । अत्र त्वाभास एव च (ब्र. सू. २।३।४९) इत्यादिभिः सूत्रैर्वेदावलम्बिनामात्मैकत्ववादिनां दोष उच्यते ॥५२॥

अशाधिकरणं समाप्तम् । (७)

इति श्रीमद्भगवद्रामानुजाचार्यविरचिते शारीरकमीमांसाभाष्ये द्वितीयाध्यायस्य तृतीयः पादः ॥

---

3. B. reads प्रदेशात् for प्रदेशभेदात्.
4. C. reads छेदन for छेद्.
6. C. om. तत्र after तत्र.
8. E. om. तत् after तत्.
11. C. reads आभ्याम् for द्वाभ्यां सूत्राभ्याम्.
13. C. reads दोषा उच्यन्ते for दोष उच्यते.

http://acharya.org

अथ श्रीभाष्ये

द्वितीयाध्याये चतुर्थः पाद आरभ्यते ।

तथा प्राणाः ॥ १ ॥

ब्रह्मव्यतिरिक्तस्य वियदादेः कृत्स्नस्य कार्यत्वेनोत्पत्तावुक्तायां जीवस्य कार्यत्वेपि स्वरूपान्यथाभावलक्षणोत्पत्तिरपोदिता । तत्प्रसङ्गेन जीवस्वरूपं विशोधितम् । संप्रति जीवोपकरणानामिन्द्रियाणां प्राणस्य चोत्पत्त्यादिप्रकारो विशोध्यते । तत्र किमिन्द्रियाणां कार्यत्वं जीववदुत वियदादिवदिति चिन्त्यते । किं युक्तम् । जीववदेवेत्याह पूर्वपक्षी तथा प्राणा इति । प्राणा इन्द्रियाणि । यथा जीवो नोत्पद्यते तथेन्द्रियाण्यपि नोत्पद्यन्ते। कुतः । श्रुतेः । यथा जीवस्यानुत्पत्तिः श्रुतेरवगम्यते तथा प्राणानामप्यनुत्पत्तिः श्रुतेरेवावगम्यते । तथा प्राणा इति प्रमाणमप्यतिदिश्यते । का पुनरत्र श्रुतिः । असद्वा इदमग्र आसीत्। तदाहुः कि तदासीदिति । ऋषयो वाव तेग्रे सदासीत् । तदाहुः के ते ऋषय इति । प्राणा वाव ऋषयः (शत. ब्रा. ६।१।१) इति जगदुत्पत्तेः प्रागिन्द्रियाणां सद्भावः श्रूयते । प्राणशब्दे बहुवचनादिन्द्रियाण्येवेति निश्चीयते । न चेयं श्रुतिर्वायुश्चान्तरिक्षं चैतदमृतम् (बृ. २।३।३) । सैषानस्तमिता देवता यद्वायुः

---

5. C. reads रूप for लक्षण.

7. C. reads इन्द्रियादीनाम् for इन्द्रियाणाम्.

12. C. om. प्राणा इति.

16. A. B. read प्राणशब्द for प्राणशब्दे.

http://acharya.org

(बृ. १।५।२२) इतिवच्चिरकालावस्थायित्वेन परिणेतुं शक्या । असद्वा इदमग्र आसीत् (शत. ब्रा. ६।१।१) इति कृत्स्नप्रपञ्चप्रलयवेलायामप्यवस्थितत्वश्रवणात् । उत्पत्तिवादिन्यस्तु जीवोत्पत्तिवादिन्य इव नेतव्या इत्येवं प्राप्तेभिधीयते । वियदादिवदेव प्राणाश्चोत्पद्यन्ते । कुतः । सदेव सोम्येदमग्र आसीत् (छा. ६।२।१) । आत्मा वा इदमेक एवाग्र आसीत् (ऐ. १।१) इत्यादिषु प्राक्सृष्टेरेकत्वावधारणात् ।

एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । (मु. २।१।३) इतीन्द्रियाणामुत्पत्तिश्रवणाच्च प्रागवस्थानासंभवात् । न चात्मोत्पत्तिवादवदिन्द्रियोत्पत्तिवादाः परिणेतुं शक्याः । आत्मवदुत्पत्तिप्रतिषेधश्रुतीनां नित्यत्वबोधकश्रुतीनां चादर्शनात् । असद्वा इदमग्र आसीत् (शत. ब्रा. ६।१।१) इत्यादिवाक्येपि प्राणशब्देन परमात्मैव निर्दिश्यते । सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते (छा. १।११।५) इति प्राणशब्दस्य परमात्मन्यपि प्रसिद्धेः । प्राणा वाव ऋषयः (शत. ब्रा. ६।१।१) इत्यृषिशब्दश्च सर्वज्ञे तस्मिन्नेव युज्यते न त्वचेतनेष्विन्द्रियेषु ॥ १ ॥

ऋषयः प्राणा इति बहुवचनश्रुतिः कथमुपपद्यत इति चेत्तत्राह ।

---

1. C. reads नेतुम् for परिणेतुम्.
9. A. B. read च after संभवात्.
10. A. B read आत्मनः for आत्म after च; A. B. read उत्पत्तिवादः परिणेतुं शक्यः for उत्पत्तिवादाः परिणेतु शक्याः.
11. C. om. बोधक.
15. B. C. read वा for वाव.
17. C. reads अचेतन for अचेतनेषु.
18. E. reads च after इति.

http://acharya.org

गौण्यसंभवात्तत्प्राक्श्रुतेश्च ॥ २ ॥

बहुवचनश्रुतिर्गौणी बह्वर्थासंभवात्तस्यैव परमात्मनः सृष्टेः प्रागवस्थानश्रुतेरेव ॥ २ ॥

तत्पूर्वकत्वाद्वाचः ॥ ३ ॥

इतश्च प्राणशब्दः परमात्मवचनः । वाचः परमात्मव्यतिरिक्तविषयस्य नामधेयस्य वाग्विषयभूतस्य वियदादिसृष्टिपूर्वकत्वात् । तद्धेदं तर्ह्यव्याकृतमासीत् । तन्नामरूपाभ्यां व्याक्रियत (बृ. १।४।७) इति नामरूपभाजामभावात्तदानीं वागादीन्द्रियकार्याभावाच्च तानि न सन्तीत्यर्थः ॥ ३ ॥ प्राणोत्पत्त्यधिकरणं समाप्तम् । (१)

सप्त गतेर्विशेषितत्वाच्च ॥ ४ ॥

तानीन्द्रियाणि किं सप्तैव स्युरथ वैकादशेति चिन्त्यते । श्रुतिविप्रतिपत्तेः संशयः । किं प्राप्तम् । सप्तेति । कुतः । गतेर्विशेषितत्वाच्च । गतिस्तावज्जायमानेन म्रियमाणेन च जीवेन सह लोकेषु संचरणरूपा सप्तानामेव श्रूयते ।

सप्त इमे लोका येषु चरन्ति प्राणा गुहाशया निहिताः सप्त सप्त । (मु. २।१।८)

इति । वीप्सा पुरुषभेदाभिप्राया । विशेषिताश्च ते गतिमन्तः प्राणाः स्वरूपतः

यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह ।
बुद्धिश्च न विचेष्टेत तामाहुः परमां गतिम् ॥ (का. ६।१०)

---

6. E. reads विषयभूत for विषयभूतस्य; C. reads वेद for वियत्.
13. C. reads एव after सप्त.
14. C. om. च after म्रियमाणेन.
16. E. reads सम् before चरन्ति.

http://acharya.org

इति । शरीरान्तःसंचरणं विहाय मोक्षार्थगमनं परमा गतिः । एवं जीवेन सह जन्ममरणयोः सप्तानामेव गतिश्रवणाद्योगदशायां ज्ञानानीति विशेषितत्वाच्च जीवस्य करणानि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणबुद्धिमनांसि सप्तैवेति गम्यते । यानि त्वितराणि विषयाणां ग्राहकत्वेनाष्टौ ग्रहाः (बृ. ३।२।१) । सप्त वै शीर्षण्याः प्राणा द्वाववाञ्चौ (तै. सं ५।१।७।१) इत्यादिषु चतुर्दशपर्यन्तानि प्राणप्रतिपादकवाक्येषु वाक्पाणिपादपायूपस्थाहंकारचित्ताख्यानीन्द्रियाणि प्रतीयन्ते तेषां जीवेन सह गतिश्रवणाभावाज्जीवस्याल्पोपकारकत्वमात्रेणौपचारिकः प्राणव्यपदेश इति ॥ ४ ॥

एवं प्राप्ते प्रचक्ष्महे ।

हस्तादयस्तु स्थितेतो नैवम् ॥ ५ ॥

न सप्तैवेन्द्रियाणि । अपि त्वेकादश । हस्तादीनामपि शरीरे स्थिते जीवे तस्य भोगोपकरणत्वात्कार्यभेदाच्च । दृश्यते हि श्रोत्रादीनामिव हस्तादीनामपि कार्यभेद आदानादिः । अतस्तेपि सन्त्येव । अतो नैवम् । अतो हस्तादयो न सन्तीत्येवं न मन्तव्यमित्यर्थः । अध्यवसायाभिमानचिन्तावृत्तिभेदान्मन एव बुद्ध्यहंकारचित्तशब्दैर्व्यपदिश्यत इत्येकादशेन्द्रियाणि । अतो

2. B. reads जनन for जन्म.
3. A. reads वि before ज्ञानानि.
7. C. reads पादपाणि for पाणिपाद.
9. E. reads अल्प before अल्प.
11. E. om. एवम् before प्राप्ते.
13. B. reads शरीर for शरीरे.
16. C. om. इति after सन्ति.
18. C. reads एव after एकादश.

http://acharya.org

दशेमे पुरुषे प्राणा आत्मैकादशः (बृ. ३।९।४) इत्यात्मशब्देन मनोभिधीयते ।

इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः। (गी. १३।५)
तैजसानीन्द्रियाण्याहुर्देवा वैकारिका दश ।
एकादशं मनश्चात्र (वि. पु. १।२।४५-४६)

इत्यादिश्रुतिस्मृतिसिद्धेन्द्रियसंख्या स्थिता । अधिकसंख्यावादा मनोवृत्तिभेदाभिप्रायाः । न्यूनव्यपदेशास्तु तत्र तत्र विवक्षितगमनादिकार्यविशेषप्रयुक्ताः ॥ ५ ॥ सप्तगत्यधिकरणं समाप्तम् । (२)

अणवश्च ॥ ६ ॥

त एते सर्व एव समाः सर्वेनन्ताः (बृ. १।५।१३) इत्यानन्त्यश्रवणाद्विभुत्वं प्राणानामिति प्राप्तेभिधीयते । प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति (बृ. ४।४।२) इत्युत्क्रान्त्यादिश्रवणात्परिमितत्वे सिद्धे सत्युत्क्रान्त्यादिषु पार्श्वस्थैरनुपलभ्यमानत्वादणवश्च प्राणाः । आनन्त्यश्रुतिस्त्वथ यो हैताननन्तानुपास्ते (बृ. १।५।१३) इत्युपासनश्रवणादुपास्यप्राणविशेषभूतकार्यबाहुल्याभिप्राया ॥ ६ ॥

श्रेष्ठश्च ॥ ७ ॥

प्राणसंवादे शरीरस्थितिहेतुत्वेन श्रेष्ठतया निर्णीतो मुख्यप्राण आनीदवातं स्वधया तदेकम् (तै. ब्रा. २।८।९) इति महाप्रलयसमये स्वकार्यभूतप्राणनसद्भावश्रवणादेतस्माज्जायते (मु. २।१।३) इति जन्मश्रवणस्य जीवजन्मश्रवणवदुपपत्तेर्नोत्पद्यत इत्याशङ्क्य प्राक्सृष्टेरेकत्वावधारणादिविरोधादेतस्मा-

7. C. om. तत्र after तत्र.

15. C. E. read विशेषण for विशेष, B. reads कार्यभूत for भूतकार्य.

18. E. reads मुख्य. for मुख्य.

http://acharya.org

ज्जायते प्राणः (मु. २।१।३) इति पृथिव्यादितुल्योत्पत्तिश्रवणादुत्पत्तिनिषेधाभावाच्च जायत एव श्रेष्ठश्च प्राण इत्युच्यते । आनीदवातम् (तै. ब्रा. २।८।९) इति तु न जैवं श्रेष्ठं प्राणमभिप्रेत्योच्यते । अपि तु परस्य ब्रह्मण एकस्यैव विद्यमानत्वमुच्यते । अवातमिति तत्रैव श्रवणात् । पूर्वेणैव तुल्यन्यायत्वेपि पृथग्योगकरणमुत्तरचिन्तार्थम् ॥७॥ प्राणाणुत्वाधिकरणं समाप्तम् । (३)

न वायुक्रिये पृथगुपदेशात् ॥ ८ ॥

सोयं श्रेष्ठः प्राणः किं महाभूतद्वितीयवायुमात्रं तस्य वा स्पन्दरूपक्रियाथ वायुरेव कंचन विशेषमापन्न इति विशये वायुरेवेति प्राप्तम् । यः प्राणः स वायुः (बृ. ३।१।५) इति व्यपदेशात् । यद्वा वायुमात्रे प्राणत्वप्रसिद्ध्यभावादुच्छ्वासनिःश्वासादिवायुक्रियायां प्राणशब्दप्रसिद्धेश्च तत्क्रियैवेति प्राप्ते न वायुमात्रं न च तत्क्रियेत्युच्यते । कुतः । पृथगुपदेशात् ।

एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।

खं वायुः (मु. २।१।३)

इति । तत एव पृथगुपदेशाद्वायुक्रियापि न भवति प्राणः । न हि तेजःप्रभृतीनां क्रिया तैः सह पृथग्द्रव्यतयोपदिश्यते । यः प्राणः स वायुः (बृ. ३।१।५) इति तु वायुरेवावस्थान्तरमापन्नः प्राणो न तेजःप्रभृतिवत्तत्त्वान्तरमिति ज्ञापनार्थम् । उच्छ्वासनिःश्वासादावपि प्राणः स्पन्दत इति क्रियावति द्रव्य एव प्राणशब्दप्रसिद्धिर्न क्रियामात्रे ॥ ८ ॥

---

3. C. reads चैव for जैवम्.
6. C. reads त्र after उत्तर.
8. C. reads श्रेष्ठ for श्रेष्ठः.
11. B. reads वायुमात्रेण for वायुमात्रे.
13. C. om. कुतः.
21. B. reads प्रसिद्धेः for प्रसिद्धिः.

http://acharya.org

किमयं प्राणो वायोर्विकारः सन्नग्निवद्भूतान्तरम् । नेत्याह ।

चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः ॥ ९ ॥

नायं भूतविशेषः । अपि तु चक्षुरादिवज्जीवोपकरणविशेषः । तच्चोपकरणत्वमुपकरणभूतैरिन्द्रियैः सहशिष्ट्यादिभ्योवगम्यते । चक्षुरादिभिः सहायं प्राणः शिष्यते प्राणसंवादादिषु । तत्सजातीयत्वे हि तैः सह शासनं युज्यते । प्राणशब्दपरिगृहीतेषु करणेष्वस्य विशिष्याभिधानमादिशब्देन गृह्यते । अथ ह य एवायं मुख्यप्राणः (छा. १।२।७) । योयं मध्यमप्राणः (बृ. १।५।२१) इत्यादिषु विशिष्याभिधानात् ॥ ९ ॥

चक्षुरादिवदस्यापि करणत्वे तद्वदस्यापि जीवं प्रत्युपकारविशेषरूपक्रियया भवितव्यम् । सा तु न दृश्यते । अतो नायं चक्षुरादिवद्भवितुमर्हतीति चेत्तत्राह ।

अकरणत्वाच्च न दोषस्तथा हि दर्शयति ॥ १० ॥

अकरणत्वात् । करणं क्रिया । अक्रियत्वात् । अस्य प्राणस्य जीवं प्रत्युपकारविशेषरूपक्रियारहितत्वाच्च यो दोष उद्भाव्यते स नास्ति । यत उपकारविशेषरूपशरीरेन्द्रियधारणादिरूपां क्रियां दर्शयति श्रुतिः । यस्मिन्नुत्क्रान्त इदं शरीरं पापिष्ठतरमिव दृश्यते स एव श्रेष्ठः (छा. ५।१।७) इत्युक्त्वा वागाद्युत्क्रमणेपि शरीरस्येन्द्रियान्तराणां च स्थितिं दर्शयित्वा प्राणोत्क्रमणे शरीरे-

---

4. E. reads विशेष before भूतैः.
10. C. om. अपि before करणत्वे; C. reads तद्वदेव for तद्वदस्यापि.
14. B. reads अक्रियात्वात् for अक्रियत्वात्.
16. E. reads विशेषरूपाम् for विशेषरूप; C. om. रूपशरीरेन्द्रियधारणादि.
18. C. reads वै for एव after सः.

न्द्रियशैथिल्याभिधानात् । अतः प्राणापानव्यानोदानसमानाकारेण पञ्चधावस्थितोयं प्राणः शरीरेन्द्रियधारणादिना जीवस्योपकरोतीति चक्षुरादिवत्करणत्वम् ॥ १० ॥

नन्वेवं नामभेदात्कार्यभेदाच्च प्राणापानादयस्तत्त्वान्तराणि स्युस्तत्राह ।

पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ॥ ११ ॥

यथा कामादिवृत्तिभेदे तत्कार्यभेदेपि न कामादिकं मनसस्तत्त्वान्तरम् । कामः संकल्पो विचिकित्सा श्रद्धाश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव (बृ. १।५।३) इति वचनात् । एवं प्राणोपानो व्यान उदानः समान इत्येतत्सर्वं प्राण एव (बृ. १।५।३) इति वचनादपानादयोपि प्राणस्यैव वृत्तिविशेषा न तत्त्वान्तरमित्यवगम्यते ॥११॥ वायुक्रियाधिकरणं समाप्तम् । (४)

अणुश्च ॥ १२ ॥

अणुश्चायम् । पूर्ववदुत्क्रान्त्यादिश्रवणात् । तमुत्क्रामन्तं प्राणोनूत्क्रामति (बृ. ४।४।२) इत्यादिषु । अधिकाशङ्का तु सम एभिस्त्रिभिर्लोकैः समोनेन सर्वेण (बृ. १।३।२२) । प्राणे सर्वं प्रतिष्ठितम् (प्र. २।६) । सर्वं हीदं प्राणेनावृतमित्यादिश्रवणान्महापरिमाण इति । परिहारस्तूत्क्रान्त्यादिश्रवणात्परिच्छिन्नत्वे निश्चिते सर्वस्य प्राणिजातस्य प्राणायत्तस्थितित्वेन वैभववादोपपत्तिरिति ॥ १२ ॥ श्रेष्ठाणुत्वाधिकरणं समाप्तम् ।(५)

ज्योतिराद्यधिष्ठानं तु तदामननात्प्राणवता शब्दात् ॥ १३ ॥

सश्रेष्ठानां प्राणानां ब्रह्मण उत्पत्तिरियत्तापरिमाणं चोक्तम् ।

---

10. E. reads प्राणापानव्यानोदान for प्राणोपानो व्यान उदानः.
11. A. B. om. एव after प्राणस्य.

http://acharya.org

तेषां प्राणानामग्न्यादिदेवताधिष्ठितत्वं च पूर्वमेवाभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् (ब्र. सू. २।१।५) इत्यनेन सूत्रेण प्रसङ्गादुपपादितम् । जीवस्य च स्वभोगसाधनानामेषामधिष्ठातृत्वं लोकसिद्धम् । एवमेवैष एतान्प्राणान्गृहीत्वा स्वे शरीरे यथाकामं परिवर्तते (बृ. २।१।१८) इत्यादिश्रुतिसिद्धं च । तदिदं जीवस्याग्न्यादिदेवतानां च प्राणविषयमधिष्ठानं किं स्वायत्तमुत परायत्तमिति विशये नैरपेक्ष्यात्स्वायत्तमिति प्राप्त उच्यते ज्योतिराद्यधिष्ठानमिति । प्राणवता जीवेन सह ज्योतिरादीनामग्न्यादिदेवतानां प्राणविषयमधिष्ठानं तदामननात्तस्य परमात्मन आमननाद्भवति । आमननमाभिमुख्येन मननं परमात्मनः संकल्पादेव भवतीत्यर्थः । कुत एतत् । शब्दात् । इन्द्रियाणां साभिमानिदेवतानां जीवात्मनश्च स्वकार्येषु परमपुरुषमननायत्तत्वशास्त्रात् । यथान्तर्यामिब्राह्मणादिषु योऽग्नौ तिष्ठन्नग्नेरन्तरो यमग्निर्न वेद यस्याग्निः शरीरं योऽग्निमन्तरो यमयति स त आत्मान्तर्याम्यमृतः (बृ. ३।७।५)। यो वायौ तिष्ठन् (बृ. ३।७।७)। य आदित्ये तिष्ठन् (बृ. ३।७।९)। य आत्मनि तिष्ठन् (बृ. ३।७।२२)। यश्चक्षुषि तिष्ठन् (बृ. ३।७।१८) इत्यादि । यथा च भीषास्माद्वातः पवते । भीषोदेति सूर्यः । भीषास्मादग्निश्चेन्द्रश्च । मृत्युर्धावति पञ्चमः (तै. २।८) इति। तथैतस्य वाक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः (बृ. ३।८।९) इत्यादि ॥ १३ ॥

---

3. B. om. च after जीवस्य.
4. C. om. प्राणान्.
10. E. reads परात्मन for परमात्मनः.
12. C. reads स्वाभिमानि for साभिमानि; A. B. om. स्व before कार्येषु.
13. A. reads आयत्तत्वम् for आयत्तत्व.
20. E. reads चैतस्य for एतस्य वा.

तस्य च नित्यत्वात् ॥ १४ ॥

सर्वेषां परमात्माधिष्ठितत्वस्य नित्यत्वात्स्वरूपानुबन्धित्वेन नियतत्वाच्च तत्संकल्पादेवैषामधिष्ठातृत्वमवर्जनीयम् । तत्सृष्ट्वा । तदेवानुप्राविशत् । तदनुप्रविश्य । सच्च त्यच्चाभवत् (तै. २।६) इत्यादिना परमपुरुषस्य नियन्तृत्वेन सर्वचिदचिद्वस्त्वनुप्रवेशः स्वरूपानुबन्धी श्रूयते । स्मर्यते च ।

विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् । (गी १०।४२) इति ॥ १४ ॥ ज्योतिराद्यधिष्ठानाधिकरणं समाप्तम् । (६)

त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥ १५ ॥

किं सर्वे प्राणशब्दनिर्दिष्टा इन्द्रियाण्युत श्रेष्ठप्राणव्यतिरिक्ता एवेति विशये प्राणशब्दवाच्यत्वात्करणत्वाच्च सर्व एवेन्द्रियाणीति प्राप्त उच्यते । श्रेष्ठव्यतिरिक्ता एव प्राणा इन्द्रियाणि । कुतः । श्रेष्ठादन्येष्वेव प्राणेषु तद्व्यपदेशात् । इन्द्रियव्यपदेशात् ।

इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः । (गी. १३।५) इत्यादिभिर्हि चक्षुरादिषु समनस्केष्वेवेन्द्रियशब्दो व्यपदिश्यते ॥ १५ ॥

भेदश्रुतेर्वैलक्षण्याच्च ॥ १६ ॥

एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । (मु. २।१।३) इत्यादिष्विन्द्रियेभ्यः प्राणस्य पृथक्श्रवणात्प्राणव्यतिरिक्तानामेवेन्द्रियत्वमवगम्यते । मनसः पृथक्श्रवणेपि तस्यान्यत्रेन्द्रिया-

---

5. C. om. सर्व before चिदचित्.

9. B. om. ते and reads तु after इन्द्रियाणि.

16. E. om. हि; C. om. एव.

21. C. om. तस्य.

http://acharya.org

न्तर्भाव उक्तो मनःषष्ठानीन्द्रियाणि (गी. १५।७) इत्यादौ । वैलक्षण्यं चक्षुरादिभ्यः श्रेष्ठप्राणस्योपलभ्यते । सुषुप्तौ हि प्राणस्य वृत्तिरुपलभ्यते । चक्षुरादीनां तु वृत्तिर्नोपलभ्यते । कार्यं च चक्षुर्वागादीनां समनस्कानां ज्ञानकर्मसाधनत्वम् । प्राणस्य तु शरीरेन्द्रियधारणम् । प्राणाधीनधारणत्वादिन्द्रियेषु प्राणशब्दव्यपदेशः । तथा च श्रुतिस्त एतस्यैव सर्वे रूपमभवन् । तस्मादेत एतेनाख्यायन्ते (बृ. १।५।२१) इति । रूपमभवञ्छरीरमभवंस्तदधीनप्रवृत्तयोभवन्नित्यर्थः ॥ १६ ॥ इन्द्रियाधिकरणं समाप्तम् । (७)

संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥ १७ ॥

भूतेन्द्रियादीनां समष्टिसृष्टिर्जीवानां कर्तृत्वं च परस्माद्ब्रह्मण इत्युक्तं पुरस्तात् । जीवानां स्वेन्द्रियाधिष्ठानं च परायत्तमिति चानन्तरं स्थिरीकरणाय स्मारितम् । या त्वियं नामरूपव्याकरणात्मिका प्रपञ्चव्यष्टिसृष्टिः सा किं समष्टिजीवस्य हिरण्यगर्भस्यैव कर्मोत तेजःप्रभृतिशरीरकस्य परस्याबादिसृष्टिवद्धिरण्यगर्भशरीरकस्य परस्य ब्रह्मण इतीदानीं चिन्त्यते । किं युक्तम् । समष्टिजीवस्येति । कुतः । अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि (छा. ६।३।२) इति जीवकर्तृत्व-

4. E. om. वाक् after चक्षु .
6. B. om. ते after श्रुतिः.
7. A. B. read वि before आख्यायन्ते; C. reads आप्यायन्ते for आख्यायन्ते.
8. B. om. शरीरमभवन्.
12. C. om. च after अधिष्ठानम्.
13. C. om. व्याकरण.
14. C. reads जीवरूपस्य for जीवस्य.
15. A. B. om. एव after हिरण्यगर्भस्य.
16. B. om. परस्य.
18. E. reads कर्तृकत्व for कर्तृत्व.

श्रवणात्। न हि परा देवता स्वेन रूपेण नामरूपे व्याकरवाणीत्यैक्षत। अपि तु स्वांशभूतेन जीवरूपेण। अनेन जीवेनात्मनेति वचनात्। नन्वेवं चारेणानुप्रविश्य परबलं संकलयानीतिवद्व्याकरवाणीत्युत्तमपुरुषः कर्तृस्थक्रियश्च प्रविशतिर्लाक्षणिकः स्यात्। नैवम्। तत्र राजचारयोः स्वरूपभेदाल्लाक्षणिकत्वम्। इह तु जीवस्यापि स्वांशत्वेन स्वरूपत्वात्तेन रूपेण प्रवेशो व्याकरणं चात्मन एवेति न लाक्षणिकत्वप्रसङ्गः। न च सहयोगलक्षणेयं तृतीया। कारकविभक्तौ संभवन्त्यामुपपदविभक्तेरन्याय्यत्वात्। न च करणे तृतीया। ब्रह्मकर्तृकयोः प्रवेशव्याकरणयोर्जीवस्य साधकतमत्वाभावात्। न च जीवस्य कर्तृत्वं प्रवेशमात्रे पर्यवस्यति नामरूपव्याकरणं तु ब्रह्मण एवेति शक्यं वक्तुम्। क्त्वाप्रत्ययेन समानकर्तृकत्वप्रतीतेः। जीवस्य स्वांशत्वेन स्वरूपत्वेपि परस्वरूपव्यावृत्त्यर्थोनेन जीवेनेति पराक्त्वेन परामर्शः। अतो हिरण्यगर्भकर्तृकेयं नामरूपव्याक्रिया। अत एव स्मृतिषु चतुर्मुखकर्तृकं सृष्टिप्रकरणे नामरूपव्याकरणं संकीर्त्यते।

नाम रूपं च भूतानां कृत्यानां च प्रपञ्चनम्।
वेदशब्देभ्य एवादौ देवादीनां चकार सः॥

(वि. पु. १।५।६२)

इत्यादि। एवं प्राप्तेभिधीयते।

संज्ञामूर्तिक्लृप्तिस्त्विति। तुशब्दः पक्षं व्यावर्तयति। संज्ञामूर्तिक्लृप्तिर्नामरूपव्याकरणम्। तत्त्रिवृत्कुर्वतः परस्यैव ब्रह्मणः। तस्यैव नामरूपव्याकरणोपदेशात्। त्रिवृत्करणं कुर्वत

---

13. B. reads परत्वात्केन for पराक्त्वेन.

15. E. reads च after एव; C. E. read कर्तृक for कर्तृकम्.

22. C. om. एव after परस्य.

http://acharya.org

एव हि नामरूपव्याकरणमुपदिश्यते। सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि तासां त्रिवृतं त्रिवृतमेकैकां करवाणि (छा. ६।३।२-३) इति समानकर्तृकत्वप्रतीतेः। त्रिवृत्करणं तु चतुर्मुखस्याण्डान्तर्वर्तिनो न संभवति। त्रिवृत्कृतैस्तेजोबन्नैर्ह्यण्डमुत्पाद्यते। चतुर्मुखस्य चाण्डे संभवः स्मर्यते।

तस्मिन्नण्डेऽभवद्ब्रह्मा सर्वलोकपितामहः। (मनु. १।९)

इति। अतस्त्रिवृत्करणं परस्यैव ब्रह्मणः। तत्समानकर्तृकं नामरूपव्याकरणं च तस्यैवेति विज्ञायते। कथं तर्ह्यनेन जीवेन (छा. ६।३।२) इति संगच्छते। आत्मना जीवेनेति सामानाधिकरण्याज्जीवशरीरकं परं ब्रह्मैव जीवशब्देनाभिधीयते। यथा तत्तेज ऐक्षत।....तदपोऽसृजत (छा. ६।२।३)। ता आप ऐक्षन्त।.... ता अन्नमसृजन्त (छा. ६।२।४) इति तेजःप्रभृतिशरीरकं परमेव ब्रह्माभिधीयते। अतो जीवसमष्टिभूतहिरण्यगर्भशरीरकस्य परस्यैव ब्रह्मणः कर्म नामरूपव्याकरणम्। एवं च प्रविश्य नामरूपे व्याकरवाणि (छा. ६।३।२) इति प्रविशतिरुत्तमपुरुषश्चाक्लिष्टौ मुख्यार्थावेव भवतः। प्रवेशव्याकरणयोः समानकर्तृकत्वमप्युपपद्यते। चतुर्मुखशरीरकस्य परस्यैव ब्रह्मणः कर्म देवादिविचित्रसृष्टिरिति चतुर्मुखकर्तृकसृष्टिप्रकरणे नामरूपव्याक्रियोपदेशश्चोपपद्यते। अतः सेयं देवता (छा. ६।३।२) इत्यादिवाक्यस्यायमर्थः। इमास्तेजोबन्नरूपास्तिस्रो देवता अनेन जीवेन जीवसमष्टिविशिष्टेनात्मनानुप्रविश्य

5. C. E. read उत्पद्यते for उत्पाद्यते.

11. A. B. read परब्रह्म for परं ब्रह्म.

19. A. B. om. कर्तृक after चतुर्मुख.

22. B. C. om. जीवेन.

http://acharya.org

नामरूपे व्याकरवाणि देवादिविचित्रसृष्टिं तन्नामधेयानि च करवाणि तदर्थमन्योन्यसंसर्गमप्राप्तानामेषां तेजोबन्नानां विशेषसृष्ट्यसमर्थानां तत्सामर्थ्यायैकैकां त्रिवृतं त्रिवृतं करवाणीति । अतः परस्यैव ब्रह्मणः कर्मेदं नामरूपव्याकरणम् ॥ १७ ॥

अथ स्यान्नामरूपव्याकरणस्य त्रिवृत्करणेनैककर्तृकत्वात्परमात्मकर्तृकत्वमिति न शक्यते वक्तुम् । त्रिवृत्करणस्यापि जीवकर्तृकत्वसंभवात् । अण्डसृष्ट्युत्तरकालं हि चतुर्मुखसृष्टजीवेषु त्रिवृत्करणप्रकार उपदिश्यते यथा खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति (छा. ६।४।७) । अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो भागस्तत्पुरीषं भवति यो मध्यमस्तन्मांसं योणिष्ठस्तन्मनः (छा. ६।५।१) इत्यादिना । तथा पूर्वस्मिन्नपि वाक्ये यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्य (छा. ६।४।१) इत्यादिना चतुर्मुखसृष्टाग्न्यादित्यचन्द्रविद्युत्सु त्रिवृत्करणं प्रदर्श्यते । नामरूपव्याकरणोत्तरकालं च त्रिवृत्करणं श्रूयते । सेयं देवतेमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत् । तासां त्रिवृतं त्रिवृतमेकैकामकरोत् (छा. ६।३।२-४) इति । तत्राह ।

---

1. B. reads सृष्टि for सृष्टिम्.
2. E. reads इति before तदर्थम्.
3. B. om. त्रिवृतम्.
6. E. om. त्व after परमात्मकर्तृक.
7. C. reads सृष्टि for सृष्ट.
8. C. reads तु after यथा.
10. A. C. E. read त्रिधा for त्रेधा.
16. A. reads ऐक्षत after देवता.

http://acharya.org

मांसादि भौमं यथाशब्दमितरयोश्च ॥ १८ ॥

यदुक्तमण्डसृष्ट्युत्तरकालं चतुर्मुखसृष्टदेवतादिविषयोयं तासां त्रिवृतं त्रिवृतमेकैकामकरोत् (छा. ६।३।४) इति त्रिवृत्करणोपदेश इति तन्नोपपद्यते । अन्नमशितं त्रेधा विधीयते (छा. ६।५।१) इत्यत्र मांसमनसोः पुरीषादणुत्वेनाणीयस्त्वेन च व्यपदिष्टयोः कारणानुविधायित्वेनाप्यतैजसत्वप्रसङ्गात् । आपः पीताः (छा. ६।४।२) इत्यत्रापि मूत्रप्राणयोः स्थविष्ठाणीयसोः पार्थिवतैजसत्वप्रसङ्गाच्च । न चैवमिष्यते । मांसादेर्हि भौमत्वमिष्यते पुरीषवत् । मांसमनसी अपि भौमे पार्थिवे इष्येते । अन्नमशितं त्रेधा (छा. ६।५।१) इति प्रक्रमात् । यथाशब्दमितरयोश्च । इतरयोरप्याप: पीतास्तेजोशितमिति पर्याययोर्यथाशब्दं विकारा इष्यन्ते । आपः पीतास्त्रेधा विधीयन्ते (छा. ६।५।२) इत्यपामेव त्रिधा परिणामः शब्दात्प्रतीयते । तथा तेजोशितं त्रेधा विधीयते (छा. ६।५।३) इत्यपि तेजस एव त्रिधा परिणामः शब्दात्प्रतीयते । अतः पुरीषमांसमनांसि पृथिवीविकाराः । मूत्रलोहितप्राणा अब्विकाराः । अस्थिमज्जावाचस्तेजोविकारा इति प्रतिपत्तव्यम् । अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वाक् (छा. ६।५।४) इति वाक्यशेषाविरोधाच्च । अतस्तासां त्रिवृतं त्रिवृतमेकैकामकरोत् (छा. ६।३।४) इत्युक्तस्त्रिवृत्करणप्रकारोन्नमशितम् (छा. ६।५।१) इत्यादिना न

---

8. E. reads त्व after पार्थिव; B. C. read मांसादि हि भौमम् for मांसादेर्हि भौमत्वम्.

12 A. B. read विकाराविष्येते for विकारा इष्यन्ते.

13. C. reads त्रेधा for त्रिधा after अपामेव; E. reads यथा for तथा.

14. B. C. read त्रेधा for त्रिधा after तेजस एव.

19. C. reads इत्युक्तम् for इत्युक्तः.

प्रदर्श्येते । तथा सति मनःप्राणवाचां त्रयाणामप्यणीयस्त्वेन तैजसत्वादन्नमयं हि सोम्य मनः (छा. ६।५।४) इत्यादिर्विरुध्यते । प्रागेव त्रिवृत्कृतानां पृथिव्यादीनां पुरुषं प्राप्तानामन्नमशितम् (छा. ६।५।१) इत्यादिनैकैकस्य त्रेधा परिणाम उच्यते । अण्डसृष्टेः प्रागेव च तेजोबन्नानां त्रिवृत्करणेन भवितव्यम् । अत्रिवृत्कृतानां तेषां कार्यारम्भासामर्थ्यात् । अन्योन्यसंयुक्तानामेव हि कार्यारम्भसामर्थ्यम् । तदेव च त्रिवृत्करणम् । तथा च स्मर्यते

नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना ।
नाशक्नुवन्प्रजाः स्रष्टुमसमागम्य कृत्स्नशः ॥
समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः ।
महदाद्या विशेषान्ता ह्यण्डमुत्पादयन्ति ते ॥
(वि. पु. १।२।५०-५२)

इति । अत एव चानेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत् । तासां त्रिवृतं त्रिवृतमेकैकामकरोत् (छा. ६।३।३-४) इति पाठक्रमोर्थक्रमेण बाध्यते । अण्डान्तर्वर्तिष्वग्न्यादित्यादिषु त्रिवृत्करणप्रदर्शनं श्वेतकेतोः शुश्रूषोरण्डान्तर्वर्तित्वेन तस्य बहिष्ठवस्तुषु त्रिवृत्करणप्रदर्शनायोगात्त्रिवृत्कृतानां कार्येष्वग्न्यादित्यादिषु क्रियते ॥ १८ ॥

---

2. C. reads इत्यादि विरुध्येत for इत्यादिर्विरुध्यते.

5. C. om. च after प्रागेव.

8. E. reads यथा for तथा.

14. A. B. read एव चानेनैव for अत एवं चानेन.

16. C. reads अपि after पाठक्रम'; B. om. अग्न्यादित्यादिषु; A. om. आदित्य.

18. C. reads योगात् for अयोगात्.

http://acharya.org

स्यादेतत् । अन्नमशितम् (छा. ६।५।१) । आपः पीताः (छा. ६।५।२) । तेजोशितम् (छा. ६।५।३) इति त्रिवृत्कृतानामन्नादीनामेकैकस्य तेजोबन्नात्मकत्वेन त्रिरूपस्य कथमन्नमापस्तेज इत्येकैकरूपेण व्यपदेश उपपद्यत इति । तत्राह ।

वैशेष्यात्तु तद्वादस्तद्वादः ॥ १९ ॥

वैशेष्यं विशेषभावः । त्रिवृत्करणेन त्रिरूपेप्येकैकस्मिन्नन्नाद्याधिक्यात्तत्र तत्रान्नादिवादः । द्विरुक्तिरध्यायपरिसमाप्तिं द्योतयति ॥ १९ ॥ संज्ञामूर्त्तिकॢप्त्यधिकरणं समाप्तम् ॥ (८)

इति श्रीमद्भगवद्रामानुजाचार्यविरचिते शारीरकमीमांसाभाष्ये द्वितीयाध्यायस्य चतुर्थः पादः समाप्तः ॥ समाप्तश्चायमध्यायः ॥

3. C. reads अन्नात्मत्वेन for अन्नात्मकत्वेन.

अथ श्रीभाष्ये

तृतीयाध्याये प्रथमः पाद आरभ्यते ।

तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् ॥ १ ॥

अतिक्रान्ताध्यायद्वयेन निखिलजगदेककारणं निरस्तनिखिलदोषगन्धमपरिमितोदारगुणसागरं सकलेतरविलक्षणं परं ब्रह्म मुमुक्षुभिरुपास्यतया वेदान्ताः प्रतिपादयन्तीत्ययमर्थः स्मृतिन्यायविरोधपरिहारपरपक्षप्रतिक्षेपवेदान्तवाक्यपरस्परविरोधपरिहाररूपकार्यस्वरूपसंशोधनैस्तदुद्धर्षणत्वहेतुभिः सह स्थापितः । अतोऽध्यायद्वयेन ब्रह्मस्वरूपं प्रतिपादितम् । उत्तरेणेदानीं तत्प्राप्त्युपायैः सह प्राप्तिप्रकारश्चिन्तयितुमिष्यते । तत्र तृतीयेऽध्याय उपायभूतोपासनविषया चिन्ता वर्तते । उपासनारम्भाभ्यर्हितोपायश्च प्राप्यवस्तुव्यतिरिक्तवैतृष्ण्यं प्राप्यतृष्णा चेति तत्सिद्ध्यर्थं जीवस्य लोकान्तरेषु संचरतो जाग्रतः स्वपतः सुषुप्तस्य मूर्छितश्च दोषाः परस्य च ब्रह्मणस्तद्रहितता कल्याणगुणाकरता च प्रथमद्वितीययोः पादयोः प्रतिपाद्यते ।

तत्र देहाद्देहान्तरं गच्छन्नयं जीवो देहान्तरारम्भहेतुभिर्भूतसूक्ष्मैः संपरिष्वक्त एव गच्छत्युत नेति चिन्तायां यत्र

---

11. A. reads तृतीय for तृतीये.

15. C. om. च after परस्य; B. reads गुणाकरत्वम् for गुणाकरता च.

17. C. om. अन्तर before आरम्भ.

http://acharya.org

यत्र जीवो याति तत्र तत्र भूतसूक्ष्माणां सुलभत्वादसंपरिष्वक्तो यातीति प्राप्तम् । पश्चादपि पूर्वपक्षबीजान्युपन्यस्य निरसिष्यति । तत्र सिद्धान्तमाह ।

तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्त इति । संज्ञामूर्तिक्लृप्तिः (ब्र. सू. २।४।१७) इति मूर्तिशब्देन देहः प्रस्तुतः स तच्छब्देन परामृश्यते । तदन्तरप्रतिपत्तौ देहान्तरगमने भूतसूक्ष्मैः संपरिष्वक्तो जीवो रंहति गच्छतीत्यर्थः । कुतः । प्रश्ननिरूपणाभ्याम् । प्रश्नप्रतिवचनाभ्याम् । पञ्चाग्निविद्यायामेवं प्रश्नप्रतिवचने आम्नायेते । श्वेतकेतुं किलारुणेयं पाञ्चालः प्रवाहणः कर्मिणां गन्तव्यदेशं पुनरावृत्तिप्रकारं देवयानपितृयाणपथव्यावर्तने अमुष्य लोकस्याप्राप्तारं च वेत्थेति पृष्ट्वेदमपि पप्रच्छ वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति (छा. ५।३।३) इति । तत्रेमं पश्चिमं प्रश्नं प्रतिब्रुवंश्च द्युलोकमग्नित्वेन रूपयित्वा तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेः सोमो राजा संभवति (छा. ५।४।२) इत्यादिना देवाख्या जीवस्य प्राणा अग्नित्वेन रूपिते द्युलोके श्रद्धाख्यं वस्तु प्रक्षिपन्ति । सा च श्रद्धा सोमराजाख्यामृतमयदेहरूपेण परिणमते । तं चामृतमयं देहं त एव प्राणाः पर्जन्येऽग्नित्वरूपिते

2. B. reads निरसिष्यते for निरसिष्यति.
7. A B. om. सम् before परिष्वक्तः.
11. B. reads प्राप्तारम् for अप्राप्तारम्.
13. C. reads पञ्चमम् for पश्चिमम्; C. reads प्र for प्रति.
15. B. om. सम् before भवति; C. reads देवाख्यजीवस्य प्राणाग्नित्वेन रूपिते for देवाख्या जीवस्य प्राणा अग्नित्वेन रूपिते.
16. A. reads नि befoɪe रूपिते.
17. B. reads स्व before रूपेण.
18. B. reads परिणमति for परिणमते; E. reads अग्नित्वेन for अग्नित्व.

http://acharya.org

प्रक्षिपन्ति । स च देहस्तत्र प्रक्षिप्तो वर्षं भवति । तच्च वर्षं त एव प्राणाः पृथिव्यामग्नित्वरूपितायां प्रक्षिपन्ति । तच्च तत्र प्रक्षिप्तमन्नं भवति । तच्चान्नं त एव पुरुषेऽग्नित्वरूपिते प्रक्षिपन्ति। तच्च तत्र रेतो भवति । तच्च त एव योषायामग्नित्वरूपितायां प्रक्षिपन्ति । तच्च तत्र प्रक्षिप्तं गर्भो भवतीत्युक्त्वाहेति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति (छा. ५।९।१) इति । एवं पञ्चम्यामाहुतौ हुतायामापः पुरुषशब्दाभिलप्या भवन्तीत्यर्थः । एवमुक्ते पूर्वास्वप्याहुतिष्वनुवर्तमानानामेवापां सूक्ष्मरूपाणामिदानीं पुरुषाकारत्वं भवतीत्युक्तं भवति । अत एवं प्रश्नप्रतिवचनाभ्यां देहहेतुभूतैर्भूतसूक्ष्मैः सह तत्र तत्र यातीति गम्यते ॥ १ ॥

नन्वापः पुरुषवचसः (छा. ५।९।१) इत्युक्तेपां पुरुषाकारपरिणामप्रतीतेर्गच्छता जीवेन तासामेव परिष्वङ्गः प्रतीयते । अतः कथं सर्वेषां भूतसूक्ष्माणां परिष्वङ्ग इत्यतः प्राह ।

त्र्यात्मकत्वात्तु भूयस्त्वात् ॥ २ ॥

तुशब्दश्चोद्यं व्यावर्तयति । देहारम्भिकाणामपां केवलानां न देहारम्भसंभवः। देहाद्यारम्भायैव हि तासां त्रिवृतं त्रिवृतमेकैकाम् (छा. ६।३।३) इति त्रिवृत्करणम् । केवलानामपां

---

1. A. B. read परि for प्र before क्षिप्त॰.
3. B. reads प्रति for प्र before क्षिप्तम्.
5. B. reads प्रति for प्र before क्षिप्तम्.
12. C. reads भवन्ति after पुरुषवचसः.
14. C. reads तत्र, E. अत्र for अतः प्र; B. om. प्र before आह.
16. A. reads आरम्भकाणाम् for आरम्भिकाणाम्.
17. E. om. एव before हि.
18. C. reads अकरोत् after एकैकाम्.

http://acharya.org

श्रवणं तु तासां भूयस्त्वात् । देहे च लोहितादिभूयस्त्वेनारम्भकेष्वपां भूयस्त्वं गम्यते ॥ २ ॥

प्राणगतेश्च ॥ ३ ॥

इतश्च भूतसूक्ष्मपरिष्वक्तस्य गमनमिति गम्यते । उत्क्रामति जीवे प्राणानां तदनुगतिः श्रूयते तमुत्क्रामन्तं प्राणोनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति (बृ. ४।४।२) इति । स्मर्यते च

मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ।
शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥ (गी. १५।७-८)

इति । न च निराश्रयाणां गतिरुपपद्यत इति तदाश्रयभूतानां भूतसूक्ष्माणामपि गतिरभ्युपगन्तव्या ॥ ३ ॥

अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॥ ४ ॥

यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यम् (बृ. ३।२।१३) इत्यादिना प्राणानां जीवमरणकालेऽग्न्यादिष्वप्ययश्रवणान्न तेषां जीवेन सह गमनमिति गतिश्रुतिरन्यथा नेयेति चेन्न । भाक्तत्वादग्न्यादिष्वप्ययश्रवणस्य । कथं भाक्तत्वम् । ओषधीर्लोमानि वनस्पतीन्केशाः (बृ. ३।२।१३) इत्यनपियद्भिर्लोमादिभिः सह श्रवणात् । अतश्चक्षुराद्यप्ययश्रुतिरधिष्ठातृदेवतापक्रमणपरा ॥ ४ ॥

प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ॥ ५ ॥

यदुक्तमद्भिः सूक्ष्माभिर्भूतान्तरसंसृष्टाभिः परिष्वक्तो जीवो

---

5. B. reads तदनुगतिः प्राणानाम् for प्राणानां तदनुगतिः.

16. C. om. गति before श्रुतिः.

19. A. reads ततः for अतः.

22. C. om. सूक्ष्माभिः.

http://acharya.org

गच्छतीति प्रश्नप्रतिवचनाभ्यामवगम्यत इति तन्नोपपद्यते । द्युलोकाग्निविषये प्रथमे होमेपां होम्यत्वाश्रवणात् । तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति (छा. ५।४।२) इति श्रद्धैव होम्यत्वेन श्रुता । श्रद्धा नाम जीवस्य मनोवृत्तिविशेषत्वेन प्रसिद्धा । अतो नापस्तत्र होम्या इति चेन्न । यतस्ता आप एव श्रद्धाशब्देन तत्राभिधीयन्ते । कुतः । प्रश्नप्रतिवचनोपपत्तेः । वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति (छा. ५।३।३) इति प्रश्नस्य प्रतिवचनोपक्रमे श्रद्धा द्युलोकाग्नौ होम्यत्वेन श्रुता । तत्र यदि श्रद्धाशब्देनापो नोच्येरंस्ततोन्यथा प्रश्नोन्यथा प्रतिवचनमित्यसंगतं स्यात् । इति तु पञ्चम्यामाहुतावापः पुरुषवचसः (छा. ५।९।१) इति प्रतिवचने निगमनं च श्रद्धाया अप्त्वमेव सूचयति । वेत्थ यथा (छा. ५।३।३) इति हि प्रश्नगतः प्रकार इति तु पञ्चम्याम् (छा. ५।९।१) इतीतिशब्देन परिहारो निगम्यते । श्रद्धासोमराजवर्षान्नरेतोगर्भरूपेणापां परिणाममुक्त्वा ह्येवमापः पुरुषवचस इति निगम्यते । श्रद्धाशब्दस्य चाप्सु वैदिकः प्रयोगो दृश्यतेपः प्रणयति । श्रद्धा वा आपः (तै. ब्रा. ३।२।४) इति । श्रद्धां जुह्वति । तस्या आहुतेः सोमो राजा संभवति (छा. ५।४।२) इति सोमाकारेण परिणामश्चापामेवोपपद्यते । अतो भूतान्तरसंसृष्टाभिरद्भिः संपरिष्वक्तो जीवो रंहतीत्युपपन्नम् ॥ ५ ॥

---

3. A. B. om. एतस्मिन्.
8. E. reads हि after उपक्रमे.
11. C. reads प्रतिवचनम् for प्रतिवचने.
12. E. reads साधयति for सूचयति.
14. C. om. राज after सोम.
16. A. B. E. read वैदिक for वैदिकः.
18. A. om. सम् before भवति.
20. A. B. om. जीवः.

http://acharya.org

अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॥ ६ ॥

यत्पुनरुक्तमद्भिः संपरिष्वक्तो जीवो यातीत्ययमर्थ एतस्माद्वाक्यादवगम्यत इति तन्नोपपद्यते । अस्मिन्वाक्ये जीवस्याश्रवणात् । अत्र हि श्रद्धादय एवाम्ब्ववस्थाविशेषा होम्यत्वेन श्रुता न तु जीवस्तत्परिष्वक्त इति चेत्तन्न । इष्टादिकारिणां प्रतीतेः । तस्मिन्नेव वाक्ये ह्युत्तरत्र ब्रह्मज्ञानविधुरेष्टापूर्तदत्तकारिणो द्युलोकं प्राप्य सोमराजानो भवन्तीति पुण्यकर्मावसाने च पुनरागत्य गर्भं प्राप्नुवन्तीत्युच्यते । अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्ति (छा. ५।१०।३) इत्यारभ्य पितृलोकादाकाशमाकाशाच्चन्द्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति । तस्मिन्यावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तन्ते । ...यो यो ह्यन्नमत्ति यो यो रेतः सिञ्चति तद्भूय एव भवति (छा. ५।१०।४-५-६) इति । अत्रापि द्युलोकाग्नौ श्रद्धां जुह्वति तस्या आहुतेः सोमो राजा संभवति (छा. ५।४।२) इति तदेकार्थत्वाच्छ्रद्धावस्थदेहविशिष्टः सोमरूपदेहविशिष्टो भवतीत्युक्तमिति गम्यते । देहस्य जीवविशेषणतैकस्वरूपस्य वाचकः शब्दो विशेष्ये जीव एव पर्यवस्यति । अतः संपरिष्वक्तो जीवो यातीत्युपपद्यते ॥ ६ ॥

ननु च तं देवा भक्षयन्ति (छा. ५।१०।४) इति देवै-

---

2 C. reads एतद्वाक्यादेव for एतस्माद्वाक्यात्.

3. E. reads एतस्मिन् for अस्मिन्

4. A. om. अम्बु.

6. E. reads अस्मिन् for तस्मिन्.

7. E. om. इति after भवन्ति.

9. C. reads संविशन्ति for संभवन्ति.

11. A. om. तत्.

13. C. reads इति after सिञ्चति.

भक्ष्यमाणत्ववचनात्सोमो राजेति न जीव उच्यते । जीवस्यानदनीयत्वात् । तत्राह ।

भाक्तं वानात्मवित्त्वात्तथा हि दर्शयति ॥ ७ ॥

वाशब्दश्चोद्यं व्यावर्तयति । इष्टादिकारिणोनात्मवित्त्वात्स देवानां भोगोपकरणत्वेनेहामुत्र च वर्तते । इहेष्टादिना तदाराधनं कुर्वन्नुपकरोति । आराधनप्रीतैर्देवैर्दत्तममुं लोकं प्राप्य तत्र तत्समानभोगस्तदुपकरणं भवति । यथा पशुरेवं स देवानाम् (बृ. १।४।१०) इत्यनात्मविदो देवानामुपकरणत्वं दर्शयति श्रुतिः । स्मृतिरप्यात्मविदां ब्रह्मप्राप्तिमनात्मविदां च देवभोग्यत्वं दर्शयति

देवान्देवयजो यान्ति मद्भक्ता यान्ति मामपि । (गी.७।२३)

इति । अतो जीवस्य देवानां भोगोपकरणत्वाभिप्रायमन्नत्वेन भक्ष्यत्ववचनम् । अतस्तद्भाक्तम् । तेन तृप्तिरेव च देवानां भक्षणमिति श्रूयते । न ह वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति (छा. ३।६।१) इति । तस्माद्भूतसूक्ष्मैः संपरिष्वक्तो जीवो रंहतीति सिद्धम् ॥ ७ ॥ तदन्तरप्रतिपत्त्यधिकरणं समाप्तम् । (१)

कृतात्ययेनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवं च॥८॥

केवलेष्टापूर्तदत्तकारिणां धूमादिना पितृयाणेन पथा गमनं कर्मफलावसाने पुनरावर्तनं चाम्नातम् । यावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तन्ते (छा. ५।१०।५) इति । तत्र प्रत्यव-

---

1. B. om. त्व after भक्ष्यमाण.
5. C. om. इह before इष्टादिना; E. reads इष्टापूर्तादिना for इष्टादिना.
7. A. reads एव for एवम् after पशुः.
19. C. reads पितृयानेन for पितृयाणेन.

http://acharya.org

रोहञ्जीवः किमनुशयवान्प्रत्यवरोहत्युत नेति संशय्यते। किं युक्तम्। कर्मणः कृत्स्नस्योपभुक्तत्वान्नानुशयवानिति प्राप्तम्। अनुशयो ह्युपभुक्तशिष्टं कर्म। तच्च कृत्स्नफलोपभोगे सति नावशिष्यते। यावत्संपातमुषित्वा (छा. ५।१०।५) इति वचनात्कृत्स्नोपभोगश्च ज्ञायते। संपतन्त्यनेन स्वर्गं लोकमिति संपातः कर्मोच्यते। श्रुत्यन्तरं च

प्राप्यान्तं कर्मणस्तस्य यत्किंचेह करोत्ययम्।
तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे॥ (बृ. ४।४।६)

इति। एवं प्राप्तेभिधीयते।

अनुशयवान्प्रत्यवरोहतीति। कुतः। दृष्टस्मृतिभ्याम्। श्रुतिस्मृतिभ्यामित्यर्थः। श्रुतिस्तावत्तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्ब्राह्मणयोनिं क्षत्रिययोनिं वैश्ययोनिं वा। अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरञ्छ्वयोनिं वा शूकरयोनिं वा चण्डालयोनिं वा (छा. ५।१०।७) इति प्रत्यवरूढान्प्रति श्रूयते। अमुष्माल्लोकात्प्रत्यवरूढेषु रमणीयकर्माणो रमणीयां ब्राह्मणादियोनिं प्रतिपद्यन्ते कपूयचरणाः कुत्सितकर्माणः कुत्सितां श्वशूकरचाण्डालादियोनिं प्रतिपद्यन्त इति प्रत्यवरूढानां पुण्यपापकर्मभोगं दर्शयति। स्मृतिरपि वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुःश्रुतवित्तवृत्तसुखमेधसो जन्म प्रतिपद्यन्ते। विष्वञ्चो विपरीता नश्यन्ति

3. E. om. उप before भोगे.
5. C. reads वि before ज्ञायते; E. reads स्वर्ग for स्वर्गम्.
8. C. reads एत्य for एति.
18. A. B. E. read योगम् for भोगम् after कर्म.
20. C. reads तत् for ततः.
21. E. reads हि before जन्म.

http://acharya.org

(गौत. स्मृ. २।११।१२-१३) इति । तथा ततः परिवृत्तौ कर्मफलशेषेण जातिं रूपं वर्णं बलं मेधां प्रज्ञां द्रव्याणि धर्मानुष्ठानमिति प्रतिपद्यन्ते । तच्चक्रवदुभयोर्लोकयोः सुख एव वर्तन्ते (आ. ध. सू. २।१।२।३) इति । यावत्संपातम् (छा. ५।१०।५) इति फलदानप्रवृत्तकर्मविशेषविषयम् । यत्किंचेह करोत्ययम् (बृ. ४।४।६) इतीदमपि तद्विषयमेव । अभुक्तफलानामकृतप्रायश्चित्तानां च कर्मणां कर्मान्तरफलानुभवान्नाशोऽप्यनुपपन्नः । अतोऽमुं लोकं गताः सानुशया एव यथेतमनेवं च पुनर्निवर्तन्ते । आरोहणप्रकारेण प्रकारान्तरेण च पुनर्निवर्तन्त इत्यर्थः । आरोहणं च धूमरात्र्यपरपक्षदक्षिणायनषण्मासपितृलोकाकाशचन्द्रक्रमेण । अवरोहणं तु चन्द्रमसः स्थानादाकाशवायुधूमाभ्रमेघक्रमेण । तत्राकाशावरोहणाद्यथेतं वाय्वादिप्राप्तेः पितृलोकाद्यप्राप्तेश्चानेवम् ॥८॥

चरणादिति चेन्न तदुपलक्षणार्थेति कार्ष्णाजिनिः ॥९॥

रमणीयचरणाः कपूयचरणा इति न चरणशब्देन पुण्यपापरूपं कर्माभिधीयते । चरणशब्दस्य लोकवेदयोराचारे प्रसिद्धेः । लौकिकाः खलु चरणमाचारः शीलं वृत्तमिति पर्यायानभिमन्यन्ते । वेदे च यान्यनवद्यानि कर्माणि । तानि सेवितव्यानि । नो इतराणि । यान्यस्माकं सुचरितानि । तानि त्वयोपास्यानि (तै. १।११।२) इति चरणकर्मणी भेदेन व्यपदिश्येते । अतश्चरणाच्छीलाद्योनिविशेषप्राप्तिर्नानुशयादिति चेत् । तन्न । चरणश्रुतिः कर्मोपलक्षणार्थेति हि कार्ष्णाजिनिराचार्यो

---

1. C. om. इति.
3. B. reads वर्तते for वर्तन्ते.
9 E. reads हि for च after आरोहणम्.
11 B. om. मेघ.
12. A. B. read आ for अव before रोहणात्; C. reads वाय्वादिप्राप्तिः पितृलोकाप्राप्ति॰ for वाय्वादिप्राप्तेः पितृलोकाद्यप्राप्ते॰.
17. C. reads अभिधीयन्ते for अभिमन्यन्ते.

http://acharya.org

मन्यते । केवलाचारात्सुखदुःखप्राप्त्यसंभवात् । सुखदुःखे हि पुण्यपापरूपकर्मफले ॥ ९ ॥

आनर्थक्यमिति चेन्न तदपेक्षत्वात् ॥ १० ॥

एवं तर्ह्यफलत्वादाचारस्य स्मृतिविहितस्यानर्थक्यमेवेति चेत्तन्न । तदपेक्षत्वात्पुण्यस्य कर्मणः । आचारवत एव पुण्यकर्मस्वधिकारः ।

संध्याहीनोशुचिर्नित्यमनर्हः सर्वकर्मणि । (दक्षस्मृ. २।२७) आचारहीनं न पुनन्ति वेदाः (वसिष्ठस्मृ. ६।३) इत्यादिवचनेभ्यः । अतश्चरणश्रुतिः कर्मोपलक्षणार्थेति कार्ष्णाजिनेरभिप्रायः ॥ १० ॥

सुकृतदुष्कृते एवेति तु बादरिः ॥ ११ ॥

पुण्यं कर्माचरति पापं कर्माचरतीति कर्मणि चरतेः प्रयोगात्पृथङ्निर्देशस्य च प्रत्यक्षश्रुतिसिद्धाचारानुमितश्रुतिसिद्धविषयत्वेन गोबलीवर्दन्यायेनोपपत्तेर्मुख्ये संभवति न लक्षणा न्याय्येति सुकृतदुष्कृते एव चरणशब्दाभिधेये इति बादरिराचार्यो मन्यते । अत्र बादरिमतमेव स्वमतम् । आचारानुमितश्रुतिविहितसंध्यावन्दनादेः कर्मान्तराधिकारापादनं फलमिति तु स्वीकृतम् । अतः सानुशय एव प्रत्यवरोहति ॥ ११ ॥

कृतात्ययाधिकरणं समाप्तम् । (२)

---

1. C. reads केवलात् for केवल.
5. A. B. E. read आचरतः for आचारवत'.
7. C. reads कर्मसु for कर्मणि.
12. C. reads इति before पापम्
16. C. reads अत for अत्र, E. reads च after अत्र.
17. B. reads अपादानम्, E. सपादनम्, for आपादनम्.
18. C. om. तु after इति, E. reads सानुशया एव प्रत्यवरोहन्ति for सानुशय एव प्रत्यवरोहति.

http://acharya.org

अनिष्टादिकारिणामपि च श्रुतम् ॥ १२ ॥

केवलेष्टापूर्तदत्तकारिणश्चन्द्रमसं गत्वा सानुशया एव निवर्तन्त इत्युक्तम् । इदानीमनिष्टादिकारिणोपि चन्द्रमसं गच्छन्ति नेति चिन्त्यते । ये विहितं न कुर्वन्ति निषिद्धं च कुर्वन्ति त उभयेपि पापकर्माणोनिष्टादिकारिणः । किं युक्तम् । तेपि चन्द्रमसं गच्छन्तीति । कुतः । तेषामपि हि तद्गमनं श्रुतम् । ये वै के चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति (कौ. १।२) इत्यविशेषेण सर्वेषामेव गतिश्रवणात् ॥ १२ ॥

एवं तर्हि सुकृतदुष्कृतकारिणोरुभयोरप्यविशिष्टैव गतिः स्यात् । नेत्याह ।

संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ॥ १३ ॥

तुशब्दः शङ्कां व्यावर्तयति । इतरेषामनिष्टादिकारिणां चन्द्रारोहावरोहौ संयमने यमशासने तत्प्रयुक्तयातना अनुभूयैव नान्यथा । कुतः । तद्गतिदर्शनात् । दृश्यते हि पापकर्मणां यमवश्यतया तद्गमनम् ।

अयं लोको नास्ति न पर इति मानी पुनःपुनर्वशमापद्यते मे ।
(का. २।६)

वैवस्वतं संयमनं जनानां यमं राजानम् (ऋ. सं. १०। १४।१, तै. आ. ६।१) इत्यादिषु ॥ १३ ॥

---

4. C. reads अविहितम् before निषिद्धम्; E. reads ये च निषिद्धम् for निषिद्धं च.

5. C. reads कर्मकारिणः for कर्माणः.

9. C. om. तर्हि.

17. A. reads इमानि for इति मानी.

http://acharya.org

स्मरन्ति च ॥ १४ ॥

स्मरन्ति च सर्वेषां यमवश्यतां पराशरादयः ।

सर्वे चैते वशं यान्ति यमस्य भगवन्किल । (वि.पु.३।७।५)

इत्यादिषु ॥ १४ ॥

अपि सप्त ॥ १५ ॥

पापकर्मणां गन्तव्यत्वेन रौरवादीन्सप्त नरकानपि स्मरन्ति ॥ १५ ॥

ननु सप्तसु लोकेषु गच्छतां कथं यमसदनप्राप्तिरत आह ।

तत्रापि तद्व्यापारादविरोधः ॥ १६ ॥

तेष्वपि सप्तसु यमाज्ञयैव गमनादविरोधः । अतोनिष्टादिकारिणामपि यमलोकं प्राप्य स्वकर्मानुरूपं यातनाश्चानुभूय पश्चाच्चन्द्रारोहावरोहौ स्तः ॥ १६ ॥

इति प्राप्त उच्यते ।

विद्याकर्मणोरिति तु प्रकृतत्वात् ॥ १७ ॥

तुशब्दः पक्षव्यावृत्त्यर्थः । अनिष्टादिकारिणामपि चन्द्रप्राप्तिरस्तीत्येतन्नोपपद्यते । कुतः । विद्याकर्मणोरिति । विद्याकर्मणोः फलभोगार्थत्वाद्देवयानपितृयाणयोः । एतदुक्तं भवति । अनिष्टादिकारिणां यथा विद्याविधुरत्वाद्देवयानेन पथा गमनं न संभवति तद्वदेवेष्टापूर्तदत्तविधुरत्वात्पितृयाणेन चन्द्रगमनमपि न संभवतीति । देवयानपितृयाणयोर्विद्याविषयत्वं पुण्यकर्मविषयत्वं च कथमवगम्यत इति चेत् । प्रकृतत्वात्तयोः ।

---

3. A. om. किल.

20. C. om. अपि.

प्रकृता हि देवयाने विद्या पितृयाणे च कर्म । तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धां तप इत्युपासते (छा. ५।१०।१) इत्युक्त्वा तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहः (छा. ५।१०।१) इत्यादिना देवयानवचनात् । अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते (छा. ५।१०।३) इत्युक्त्वा ते धूममभिसंभवन्ति (छा. ५।१०।३) इत्यादिना पितृयाणवचनाच्च । ये वै के चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति (कौ. १।२) इत्यपि वचनं य इष्टादिकारिणस्ते सर्वे इति परिणेयम् ॥१७॥

ननु पापकर्मणां चन्द्रगमनाभावे पञ्चमाहुत्यसंभवाच्छरीरारम्भ एव नोपपद्यते । पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति (छा. ५।९।१) इति हि शरीरारम्भः श्रूयते । सा चाहुतिश्चन्द्रप्राप्तिपूर्विकेति दर्शितम् । अतः शरीरारम्भायैव तेषामपि चन्द्रारोहावरोहाववश्याभ्युपेत्यावित्यत आह ।

न तृतीये तथोपलब्धेः ॥ १८ ॥

तृतीयस्थानस्य शरीरारम्भाय न पञ्चमाहुत्यपेक्षा । कुतः । तथोपलब्धेः । तृतीयस्थानशब्देन केवलपापकर्माण उच्यन्ते । तेषां देहारम्भे पञ्चमाहुत्यनपेक्षत्वमुपलभ्यते । वेत्थ यथा केनासौ लोको न संपूर्यते (छा. ५।३।३) इत्यस्य प्रश्नस्य प्रति-

---

1. A. reads पितृयाने for पितृयाणे.
3. C. reads सविशन्तीति for सभवन्ति.
4. E. om. इत्युपासते.
5. C. reads संविशन्ति for संभवन्ति.
6. A. reads पितृयान for पितृयाण.
8. C. reads एतत् before अपि.
11. B. E. om. हि after इति.
15. E. reads न तृतीयस्य स्थानस्य शरीरारम्भाय for तृतीयस्थानस्य शरीरारम्भाय न.

http://acharya.org

वचनेथैतयोः पथोर्न कतरेण च तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत्तृतीयं स्थानं तेनासौ लोको न संपूर्यते (छा. ५।१०।८) इति तृतीयस्थानस्य द्युलोकारोहावरोहाभावेन द्युलोकासंपूर्तिवचनादस्य तृतीयस्थानस्य शरीरारम्भाय न पञ्चमाहुत्यपेक्षा । पञ्चम्यामाहुताविति चापां पञ्चमाग्निसंबन्धस्य पुरुषवचस्त्वहेतुत्वमात्रं प्रतिपादयति नान्यन्निवारयति । अवधारणाश्रवणात् ॥ १८ ॥

स्मर्यतेपि च लोके ॥ १९ ॥

पुण्यकर्मणामपि केषांचित्पञ्चमाहुत्यनपेक्षया देहारम्भो लोके स्मर्यते द्रौपदीधृष्टद्युम्नप्रभृतीनाम् ॥ १९ ॥

दर्शनाच्च ॥ २० ॥

श्रुतावपि दृश्यते केषांचित्पञ्चमाहुत्यनपेक्षया देहारम्भः । तषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्ति । अण्डजं जीवजमुद्भिज्जम् (छा. ६।३।१) इति । तेषूद्भिज्जस्वेदजयोर्भूतयोः पञ्चमाहुतिमन्तरेणोत्पत्तिर्दृश्यते ॥ २० ॥

ननु न स्वेदजानामत्र संकीर्तनमस्ति । त्रीण्येव बीजानीति वचनात् । तत्राह ।

तृतीयशब्दावरोधः संशोकजस्य ॥ २१ ॥

संशोकजस्य स्वेदजस्याप्यण्डजं जीवजमुद्भिज्जम् (छा. ६।३।१) इत्यत्र तृतीयेनोद्भिज्जशब्देनावरोधः संग्रहो विद्यत इत्यर्थः। अतः केवलपापकर्मणां चन्द्रप्राप्तिर्न संभवति ॥ २१ ॥

अनिष्टादिकार्यधिकरणं समाप्तम् । (३)

---

12. A. B. E. read चकारात् before श्रुतावपि.

14. E. reads एषु for तेषु.

20. A. B. read तृतीय for तृतीयेनोद्भिज्ज.

तत्स्वाभाव्यापत्तिरुपपत्तेः ॥ २२ ॥

इष्टादिकारिणो भूतसूक्ष्मसंपरिष्वक्ताः सानुशयाश्चन्द्रमसमवरोहन्तीत्युक्तम्। अवरोहप्रकारश्चाथैतमेवाध्वानं पुनर्निवर्तन्ते। यथेतमाकाशम्। आकाशाद्वायुम्। वायुर्भूत्वा धूमो भवति। धूमो भूत्वाऽभ्रं भवति। अभ्रं भूत्वा मेघो भवति। मेघो भूत्वा प्रवर्षति (छा. ५।१०।५-६) इति वचनाद्यथेतमनेवं चेत्युक्तम्। तत्रास्याकाशादिप्रतिपत्तौ देवमनुष्यादिभाववदाकाशादिभाव उत तत्सादृश्यापत्तिमात्रमिति विशये श्रद्धावस्थस्य सोमभाववदविशेषादाकाशादिभाव इति प्राप्ते तत्स्वाभाव्यापत्तिरेवेत्युच्यते। तत्स्वाभाव्यापत्तिस्तत्सादृश्यापत्तिरित्यर्थः। कुत एतत्। उपपत्तेः। सोमभावमनुष्यभावादौ हि सुखदुःखोपभोगाय तद्भावः। अत्र त्वाकाशादौ सुखदुःखोपभोगाभावात्तद्भावानुपपत्तेस्तदापत्तिवचनं तत्संसर्गकृतं तत्सादृश्यापत्त्यभिप्रायम् ॥ २२ ॥

तत्स्वाभाव्यापत्त्यधिकरणं समाप्तम्। (४)

नातिचिरेण विशेषात् ॥ २३ ॥

आकाशप्राप्तिप्रभृति यावद्व्रीह्यादिप्राप्ति किं तत्र तत्र नातिचिरं तिष्ठत्युतानियम इति विशये नियमहेत्वभावादनियम इति प्राप्त उच्यते नातिचिरेणेति। कुतः। विशेषात्। उत्तरत्र व्रीह्यादिप्राप्तावतो वै खलु दुर्निष्प्रपतरम् (छा. ५।१०।६) इति विशिष्य कृच्छ्रनिष्क्रमणत्वाभिधानात्पूर्वत्र ह्याकाशादिप्रा-

---

2. C. E. om. सम् before परिष्वक्ताः; A. B. read चन्द्रमसः for चन्द्रमसम्.

6. B. reads यथैतम् for यथेतम्.

9. B. reads इव for एव before इति.

11. E. om. उप before भोगाय.

13. A. B. read कृत for कृतम्; C. om. ७पत्ति.

http://acharya.org

प्रावचिरं निष्क्रमणं गम्यते । दुर्निष्प्रपतरमिति छान्दसस्तश-ब्दलोप. । दुर्निष्प्रपततरं दुःखनिष्क्रमणमित्यर्थः ॥ २३ ॥

नातिचिराधिकरण समाप्तम् । (५)

अन्याधिष्ठिते पूर्ववदभिलापात् ॥ २४ ॥

अवरोहन्तो जीवा व्रीह्यादिभावेन जायन्त इति श्रूयते । मेघो भूत्वा प्रवर्षति । त इह व्रीहियवा ओषधिवनस्पतयस्तिल-माषा जायन्ते (छा. ५।१०।६) इति । ते किमन्यैर्भोक्तृ-भिर्व्रीह्यादिशरीरैरधिष्ठितान्व्रीह्यादीनाश्लिष्यन्त्युत ते भोक्तारो व्रीह्यादिशरीरा जायन्त इति विशये जायन्त इति वचना-द्देवो जायते मनुष्यो जायत इतिवद्व्रीह्यादिशरीरा एवेति प्राप्त उच्यतेन्याधिष्ठित इति । जीवान्तरेणाधिष्ठिते व्रीह्या-दिशरीरे तेषां संश्लेषमात्रमेव । कुतः । पूर्ववदभिलापात् । आकाशादिमेघपर्यन्तवत्केवलतत्तद्भावाभिलापात् । यत्र हि भो-क्तृत्वमभिप्रेतं तत्र तत्साधनभूतं कर्माभिलप्यते । रमणीयच-रणाः कपूयचरणाः (छा. ५।१०।७) इति । इह चाकाशा-दिवन्नाभिलप्यते कर्म । फलदाने प्रवृत्तस्य स्वर्गोपभोग्यफलस्ये-ष्टादेः कर्मणः स्वर्गभोगादेव समाप्तत्वात् । अनारब्धस्य च रम-णीयचरणाः कपूयचरणा इति वक्ष्यमाणत्वात् । मध्ये कर्मा-न्तराभावाच्च । अत आकाशादिभाववचनवद्व्रीह्यादिभावेन जन्मवचनमौपचारिकम् ॥ २४ ॥

---

1. E. reads छान्दसत्वात् for छान्दसः.
2. C. reads दुर्निष्क्रमतरम् for दुर्निष्प्रपततरम्; E. reads निष्क्रमण-तरम् for निष्क्रमणम्.
13. A. E. om. तत् before तद्भाव.
16. E. reads प्र before दाने; A. B. read दानप्रवृत्त for दाने प्रवृत्तस्य.
17. A. B. om. च after अनारब्धस्य.

http://acharya.org

अशुद्धमिति चेन्न शब्दात् ॥ २५ ॥

नैतदस्ति यदन्याधिष्ठिते व्रीह्यादिशरीरे संश्लेषमात्रं भोक्तृत्वहेत्वभावान्न व्रीह्यादिभावेन जन्मेति । भोक्तृत्वहेतुसद्भावात् । स्वर्गोपभोग्यफलमिष्टादिकर्मैवाशुद्धं पापमिश्रम् । अग्नीषोमीयादिहिंसायुक्तत्वात् । हिंसा च न हिंस्यात्सर्वभूतानि (भा.शा.२७८।५) इति निषिद्धत्वात्पापमेव । न चात्र पदाहवनीयादिवदुत्सर्गोपवादः संभवति । भिन्नविषयत्वात् । अग्नीषोमीयादिहिंसाविधिर्हिंसायाः क्रतूपकारकत्वं बोधयति । न हिंस्यादिति तु हिंसायाः प्रत्यवायफलत्वम् । अथोच्येताग्नीषोमीयादिषु विधितः प्रवृत्तेर्न तद्विषयं निषेधविधिरास्कन्दति । रागप्राप्तविषयत्वात्तस्येति । नैवम् । इहापि रागप्राप्तेरविशिष्टत्वात् । स्वर्गकामो यजेत (तै. सं. २।५।५) इत्येवमादौ हि कामिनः कर्तव्यतया यागाद्युपदेशाद्यागादेः स्वर्गादिसाधनत्वमवगम्य फलरागत एव यागादौ प्रवर्तते । अग्नीषोमीयादिष्वपि तेषां फलसाधनभूतस्य यागादेरुपकारकत्वं शास्त्रादवगम्य रागादेव प्रवर्तते । लौकिक्यामपि हिंसायां केनचित्प्रमाणेन हिंसायाः स्वसमीहितसाधनत्वमवगम्य रागात्प्रवर्तत इति न कश्चन विशेषः । तथा नित्येष्वपि कर्मसु सर्ववर्णानां स्वधर्मानुष्ठाने परमपरिमितं सुखम् (आ. ध. सू. २।१।२।२) इत्यादिवचनात्फलसाधनत्वमवगम्य रागादेव प्रवृत्तिरिति तेषामप्यशुद्धियुक्तत्वम् । अत इष्टादीनां पापमिश्रत्वेनाशुद्धियुक्तानां स्वर्गेनुभाव्यं फलं स्वर्गे-

---

4. C. reads इष्टादिकम् for इष्टादिकर्म; A. B. E. om. आदि after अग्नीषोमीय.

7. A. B. read आदि after हिंसा.

16. C. om. स्व before समीहित.

21. B. reads इष्टानाम् for इष्टादीनाम्.

http://acharya.org

नुभूय हिंसांशस्य फलं व्रीह्यादिस्थावरभावेनानुभूयते । स्थावरभावं च पापफलं स्मरन्ति ।

शरीरजैः कर्मदोषैर्याति स्थावरतां नरः । (मनुः १२।९)

इति । अतो व्रीह्यादिभावेन भोगायानुशयिनो जायन्त इति चेत्तन्न । कुतः । शब्दात् । अग्नीषोमीयादेः संज्ञपनस्य स्वर्गलोकप्राप्तिहेतुतया हिंसात्वाभावशब्दात् । पशोर्हि संज्ञपननिमित्तां स्वर्गलोकप्राप्तिं वदन्तं शब्दमामनन्ति हिरण्यशरीर ऊर्ध्वस्स्वर्गं लोकमेतीत्यादिकम् । अतिशयिताभ्युदयसाधनभूतो व्यापारोल्पदुःखोपि न हिंसा । प्रत्युत रक्षणमेव । तथा च मन्त्रवर्णः

न वा उ वैतन्म्रियसे न रिष्यसि देवानिदेषि पथिभिः सुगेभिः ।
यत्र यन्ति सुकृतो नापि दुष्कृतस्तत्र त्वा देवः सविता दधातु ॥ (तै. ब्रा. ३।७।७।१४)

इति । चिकित्सकं च तादात्विकाल्पदुःखकारिणमपि रक्षकमेव वदन्ति पूजयन्ति च तज्ज्ञाः ॥ २५ ॥

रेतःसिग्योगोथ ॥ २६ ॥

इतश्चौपचारिकं व्रीह्यादिजन्मवचनम् । व्रीह्यादिभाववचनानन्तरं यो यो ह्यन्नमत्ति यो यो रेतः सिञ्चति तद्भूय एव भ-

---

4. B. reads अनुशायिन॰ for अनुशयिन .
7. E reads यज्ञे हिंसित॰ पशुर्दिव्यदेहो भूत्वा स्वर्गं लोकं यातीति शब्दार्थं कुर्वन्ति after आमनन्ति.
8. C. reads और्ध्वम् for उर्ध्वं.
11. A. reads उदेषि for इदेषि.
16. B. reads अपि for एव.
19. A. reads यो योनौ for यो यः.

वति (छा. ५।१०।६) इति रेतःसिग्योगोनुशयिनां श्रूयमाणो यथा तद्भावमात्रं प्रतिपादयति तद्वद्व्रीह्यादिभावोपीत्यर्थः॥२६॥

योनेः शरीरम् ॥ २७ ॥

योनिप्राप्तेः पश्चादेवानुशयिनां शरीरप्राप्तिः । तत्रैव सुखदुःखोपभोगसद्भावात् । ततः प्रागाकाशादिप्राप्तिप्रभृति तत्तद्योगमात्रमेवेत्यर्थः ॥ २७ ॥ अन्याधिष्ठिताधिकरणं समाप्तम् । (६)

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये तृतीयाध्यायस्य प्रथमः पादः ॥

1. E. reads भावः for योगः after रेतःसिक्; B. reads अनुशायिनाम् for अनुशयिनाम्.
2. C. reads तद्योग for तद्भाव.
4. B. reads अनुशायिनाम् for अनुशयिनाम्.
5. E. om. तत् before तद्योग.

http://acharya.org

अथ श्रीभाष्ये

तृतीयाध्यायस्य द्वितीयः पाद आरभ्यते ।

संध्ये सृष्टिराह हि ॥ १ ॥

एवं कर्मानुरूपगमनागमनजन्मादियोगेन जाग्रतो जीवस्य दुःखित्वं स्थापितम् । इदानीमस्य स्वप्नावस्था परीक्ष्यते । स्वप्नमधिकृत्य श्रूयते न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान्रथयोगान्पथः सृजते । न तत्रानन्दा मुदः प्रमुदो भवन्त्यथानन्दान्मुदः प्रमुदः सृजते । न तत्र वेशान्ताः पुष्करिण्यः स्रवन्त्यो भवन्त्यथ वेशान्तान्पुष्करिण्यः स्रवन्त्यः सृजते । स हि कर्ता (बृ. ४।३।१०) इति । तत्र संशयः किमियं रथादिसृष्टिर्जीवेनैव क्रियत आहोस्विदीश्वरेणेति । किं युक्तम् । संध्ये सृष्टिर्जीवेनेति । कुतः । संध्यं स्वप्नस्थानमुच्यते । संध्यं तृतीयं स्वप्नस्थानमिति वचनात् । सा तु जीवेनैव क्रियते । सृजते स हि कर्ता (बृ. ४।३।१०) इत्याह हि । स्वप्नदृग्जीव एव तत्र प्रतीयते ॥ १ ॥

निर्मातारं चैके पुत्रादयश्च ॥ २ ॥

किं चैनं जीवं स्वप्ने कामानां निर्मातारमेके शाखिनोधीयते य एषु सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः (का. ५।८) इति । पुत्रादयश्च तत्र काम्यमानतया कामशब्देन निर्दिश्यन्ते नेच्छामात्रम् । पूर्वत्र हि सर्वान्कामां-

---

13. C. om. एव after जीवेन.

20. C. om. पूर्वत्र हि.

http://acharya.org

इच्छन्दतः प्रार्थयस्व (का. १।२५)। शतायुषः पुत्रपौत्रान्वृणीष्व (का. १।२३) इति पुत्रादय एव कामाः प्रकृताः । अतो रथादीञ्जीवः स्वप्ने सृजति । जीवस्य च सत्यसंकल्पत्वं प्रजापतिवाक्ये श्रुतम् । अत उपकरणाद्यभावेपि सृष्टिरुपपद्यते ॥२॥

इति प्राप्तेभिधीयते ।

मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ॥३॥

तुशब्दः पक्षं व्यावर्तयति । स्वप्ने रथपुष्करिण्याद्यर्थजातं मायामात्रं परमपुरुषसृष्टमित्यर्थः । मायाशब्दो ह्याश्चर्यवाची ।

जनकस्य कुले जाता देवमायेव निर्मिता । (रा. बा. १।२७)

इत्यादिषु तथा दर्शनात् । अत्रापि न तत्र रथा न रथयोगा न पन्थानः सकलेतरपुरुषानुभाव्यतया न भवन्तीत्यर्थः । अथ रथान्रथयोगान्पथः सृजते स्वप्नदृगनुभाव्यतया तत्कालमात्रावसानान्सृजत इत्याश्चर्यरूपत्वमेवाह । एवंविधाश्चर्यरूपा सृष्टिः सत्यसंकल्पस्य परमपुरुषस्यैवोपपद्यते न जीवस्य । तस्य सत्यसंकल्पत्वादियुक्तस्यापि संसारदशायां कार्त्स्न्येनानभिव्यक्तस्वरूपत्वान्न जीवस्य तथाविधाश्चर्यसृष्टिरुपपद्यते । कामं कामं पुरुषो निर्मिमाणः (का. ५।८) इति च परमपुरुषमेव निर्मातारमाह । य एषु सुप्तेषु जागर्ति (का. ५।८) ।

तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते ।
तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन ॥ (का. ५।८)

इत्युपक्रमोपसंहारयोः परमपुरुषासाधारणस्वभावप्रतीतेः ।

---

3. A. B. read इति after सृजति.

14. C. reads भूता for रूपा.

15. C. om. तस्य before सत्यसंकल्पत्वादि.

16. B om आश्चर्य.

http://acharya.org

अथ वेशान्तान्पुष्करिण्यः स्रवन्त्यः सृजते । स हि कर्ता (बृ. ४।३।१०) इति च तया श्रुत्यैकार्थ्यात्परमपुरुषमेव कर्तारमाह ॥ ३ ॥

स्वाभाविकं चेज्जीवस्यापहतपाप्मत्वादिकं कुतस्तन्नाभिव्यज्यत इत्यत आह ।

पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॥ ४ ॥

तुशब्दः शङ्काव्यावृत्त्यर्थः । पराभिध्यानात्परमपुरुषसंकल्पादस्य जीवस्य स्वाभाविकं रूपं तिरोहितम् । अनादिकर्मपरम्परया कृतापराधस्य ह्यस्य स्वाभाविकं कल्याणरूपं परमपुरुषस्तिरोधापयति । ततस्तत्संकल्पादेव ह्यस्य जीवस्य बन्धमोक्षौ श्रुतौ यदा ह्येवैष एतस्मिन्नदृश्येनात्म्येनिरुक्तेनिलयनेभयं प्रतिष्ठां विन्दते । अथ सोभयं गतो भवति । यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते । अथ तस्य भयं भवति (तै. २।७।१) । एष ह्येवानन्दयाति (तै. २।७।१) । भीषास्माद्वातः पवते (तै. २।८।१) इत्यादिषु ॥ ४ ॥

देहयोगाद्वा सोपि ॥ ५ ॥

सोपि तिरोभावोपि देहयोगद्वारेण वा भवति सूक्ष्माचिच्छक्तियोगद्वारेण वा । सृष्टिकाले देहावस्थेनाचिद्वस्तुना संयोगाद्भवति । प्रलयकाले नामरूपविभागानर्हातिसूक्ष्माचिद्वस्तुयोगात् । अतोनभिव्यक्तस्वरूपत्वात्स्वप्ने जीवो न रथादीन्संकल्पमात्रेण स्रष्टुं शक्नोति ।

तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन । (का.५।८) इति सर्वेषु सुप्तेषु जागरणं सर्वलोकाश्रयत्वमित्यादयो

18. C om. अपि after तिरोभाव°.

http://acharya.org

हि परमपुरुषस्यैव संभवन्ति। अतो जीवानामल्पाल्पकर्मानुगुणफलानुभवार्थं तावन्मात्रकालावसानांस्तदेकानुभाव्यानर्थानुत्पादयति ॥ ५ ॥

सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॥ ६ ॥

इतश्च स्वाप्ना अर्था न जीवसंकल्पपूर्वकाः। यतः स्वप्नोभ्युदयानभ्युदययोः सूचकश्च श्रुतेरवगम्यते।

यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति।

समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शने ॥ (छा. ५।२।९)

इति। अथ स्वप्ने पुरुषं कृष्णं कृष्णदन्तं पश्यति स एनं हन्ति (ऐ. श्रु.) इत्यादेश्च। स्वप्नाध्यायविदश्च स्वप्नं शुभाशुभयोः सूचकमाचक्षते। सूचकत्वं च स्वसंकल्पायत्तस्य नोपपद्यते। तथा चाशुभस्यानिष्टत्वाच्छुभस्य सूचकमेव स्रष्टा पश्येत्। अतः स्वप्ने सृष्टिरीश्वरेणैव कृता ॥ ६ ॥ सध्याधिकरणं समाप्तम्। (१)

तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥ ७ ॥

इदानीं सुषुप्तिस्थानं परीक्ष्यते। इदमाम्नायतेथ यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न कंचन विजानात्यासु तदा नाडीषु सुप्तो भवति (छा. ८।६।३) इति। तथाथ यदा सुषुप्तो भवति यदा न कश्चन वेद हिता नाम नाड्यो द्वासप्ततिसहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते। ताभिः प्रत्यवसृप्य

---

1. E. reads हि after एव.
5. E. reads स्वाप्न for स्वाप्नाः.
6. A. B. read अनभ्युदय for अनभ्युदययोः; C. E. om. च after सूचकः.
10. C. reads इत्यादयः for इत्यादे॰.
13. A. B. read स्वप्न for स्वप्ने.
16. E. reads सपन्नः for सप्रसन्नः; C. om. कचन.
18. A. reads सुप्तः for सुषुप्तः; A. B. E. read द्विसप्तति for द्वासप्तति.

http://acharya.org

पुरीतति शेते (बृ. २।१।१९) इति । तथा यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा संपन्नो भवति (छा. ६।८।१) इति । एवं नाड्यः पुरीतद्ब्रह्म च सुषुप्तिस्थानत्वेन श्रूयन्ते । किमेषां विकल्पः समुच्चयो वेति विशये निरपेक्षत्वप्रतीतेर्युगपदनेकस्थानवृत्त्यसंभवाच्च विकल्प इति प्राप्त उच्यते तदभाव इति । तदभावः स्वप्नाभावः सुषुप्तिर्नाडीषु पुरीतत्यात्मनि च भवति । एषां स्थानानां समुच्चय इत्यर्थः । कुतः । तच्छ्रुतेः । त्रयाणां स्थानत्वश्रुतेः । न च कार्यभेदेन समुच्चये संभवति पाक्षिकबाधगर्भविकल्पो न्याय्यः । संभवति च प्रासादखट्वापर्यङ्कवन्नाड्यादीनां कार्यभेदः । तत्र नाडीपुरीततौ प्रासादखट्वास्थानीयौ । ब्रह्म तु पर्यङ्कस्थानीयम् । अतो ब्रह्मैव साक्षात्सुषुप्तिस्थानम् ॥ ७ ॥

अतः प्रबोधोऽस्मात् ॥ ८ ॥

यतो ब्रह्मैव साक्षात्सुषुप्तिस्थानमतोऽस्माद्ब्रह्मण एषां जीवानां प्रबोधः श्रूयमाण उपपद्यते । सत आगम्य न विदुः सत आगच्छामहे (छा. ६।१०।२) इत्यादिषु ॥ ८ ॥ तदभावाधिकरणं समाप्तम् । (२)

स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ ९ ॥

किं सुषुप्त एव प्रबोधसमय उत्तिष्ठत्युतान्य इति संशये-

---

5. A. B read प्र before वृत्त्यसंभवात्.
7. E. reads तेषाम् for एषाम्.
8. C. reads स्थानानाम् for स्थानत्व.
9. E. om. च
11. A. B. read च for तु after ब्रह्म.
15. E. reads आगत्य for आगम्य.
19. A. B. read अपि after प्रबोधसमये.

http://acharya.org

स्य सकलोपाधिविनिर्मुक्तस्य ब्रह्मणि संपन्नस्य मुक्तादविलक्षणत्वेन प्राचीनशरीरेन्द्रियादिसंबन्धाभावादन्य इति प्राप्त उच्यते स एव त्विति । तुशब्दः पक्षं व्यावर्तयति । स एवोत्तिष्ठति । कुतः । कर्मानुस्मृतिशब्दविधिभ्यः । कर्म तावत्सुषुप्तेन पूर्वकृतं पुण्यपापरूपं तत्त्वज्ञानात्प्राक्तेनैव भोक्तव्यम् । अनुस्मृतिरपि य एवाहं सुप्तः स एव प्रबुद्धोस्मीति । शब्दोपि सुषुप्तप्रबुद्धः स एवेति दर्शयति । त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद्भवन्ति तथा भवन्ति (छा. ६।१०।२) इति । विधयश्च मोक्षार्थाः सुषुप्तस्य मुक्तत्वेनर्थकाः स्युः । न चासौ सर्वोपाधिविनिर्मुक्त आविर्भूतस्वरूपः । तद्यत्रैतत्सुषुप्त इति सुप्तं प्रकृत्य नाहं खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामि (छा. ८।११।१) इति वचनात् । मुक्तस्य च परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते । स तत्र पर्येति जक्षन्क्रीडन्रममाणः (छा. ८।१२।३) । स स्वराड्भवति । तस्य सर्वेषु लोकेषु कामचारो भवति (छा. ७।२५।२) ।

सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वशः । (छा. ७।२६।२) इति सर्वज्ञत्वादि श्रूयते । अतः सुषुप्तः संसरन्नेवापास्तसर्वकरणो

---

1. B. reads अविलक्षणत्वे for अविलक्षणत्वेन.

7. E. reads प्रतिबुद्ध' for प्रबुद्धः.

8. A. B. om. कीटो वा पतङ्गो वा.

9. A. B. read तत् before तथा.

11. E. reads सुषुप्तम् for सुप्तम्; C. reads नाह for नाहम्.

14. A. E. om. च after मुक्तस्य.

19. A. B. read आवस्त for अपास्त.

ज्ञानभोगाद्यशक्तो विश्रमस्थानं परमात्मानमुपसंपद्याश्वस्तः पुनर्भोगायोत्तिष्ठति ॥ ९ ॥ कर्मानुस्मृतिशब्दविध्यधिकरणं समाप्तम् । (३)

मुग्धेर्धसंपत्तिः परिशेषात् ॥ १० ॥

मुग्धमधिकृत्य चिन्त्यते । किमियं मूर्छा सुषुप्त्यादिष्वन्यतमावस्थोतावस्थान्तरमिति विशये सुषुप्त्यादीनामन्यतमावस्थायामेव मूर्छाप्रसिद्ध्युपपत्तेरवस्थान्तरकल्पने प्रमाणाभावादन्यतमावस्थेति प्राप्त उच्यते मुग्धेर्धसंपत्तिरिति। मुग्धे पुरुषे या तस्यावस्था सा मरणायार्धसंपत्तिः । कुतः । परिशेषात् । न तावत्स्वप्नजागरौ । ज्ञानाभावात् । निमित्तवैरूप्यादाकारवैरूप्याच्च न सुषुप्तिमरणे । निमित्तं हि मूर्छाया अभिघातादिः । परिशेषान्मरणायार्धसंपत्तिर्मूर्छा । मरणं हि सर्वप्राणदेहसंबन्धोपरतिः । सूक्ष्मप्राणदेहसंबन्धावस्थितिर्मूर्छा ॥ १० ॥
मुग्धाधिकरणं समाप्तम् । (४)

न स्थानतोपि परस्योभयलिङ्गं सर्वत्र हि ॥ ११ ॥

दोषदर्शनाद्वैराग्योदयाय जीवस्यावस्थाविशेषा निरूपिताः । इदानीं ब्रह्मप्राप्तितृष्णाजननाय प्राप्यस्य ब्रह्मणो निर्दोषत्वकल्याणगुणात्मकत्वप्रतिपादनायारभते । तत्र जागरस्वप्नसुषुप्तिमुग्ध्युत्क्रान्तिषु स्थानेषु तत्तत्स्थानप्रयुक्ता जीवस्य ये दोषास्ते तदन्तर्यामिणः परस्य ब्रह्मणोपि तत्र तत्रावस्थितस्य सन्ति नेति विचार्यते । किं युक्तम् । सन्तीति । कुतः । तत्तदवस्थशरीरेवस्थानात् । ननु संभोगप्राप्तिरिति चेन्न वैशेष्यात् (ब्र. सू. १।२।८)। स्थित्यदनाभ्यां च (ब्र. सू. १।३।६) इत्यादिषु

---

1. A. B. E. read विश्राम for विश्रम.
10. E. reads पारिशेष्येण for परिशेषात्.
16. A. B. read प्राप्य for प्राप्यस्य.
17. C. reads जागरण for जागर.

परस्याकर्मवश्यत्वेन दोषाभाव उक्तः। तत्कथमकर्मवश्यस्य परस्य ब्रह्मणस्तत्तत्स्थानसंबन्धाद्दोष उच्यते। इत्थमुच्यते। कर्माण्यपि देहसंबन्धमापादयन्त्यपुरुषार्थजननानि भवन्तीति देहयोगाद्वा (ब्र. सू. ३।२।५) इत्यत्रोक्तम्। तच्च देहसंबन्धस्यापुरुषार्थत्वेन भवति। इतरथा कर्माण्येव दुःखं जनयिष्यन्ति किं देहसंबन्धेन। अतोकर्मवश्यत्वे सत्यपि नानाविधाशुचिदेहसंबन्धोपुरुषार्थ एव। अतस्तन्नियमनार्थं स्वेच्छया तत्प्रवेशेप्यपुरुषार्थसंबन्धोवर्जनीयः। पूयशोणितादिमज्जनं हि स्वेच्छाकारितमप्यपुरुषार्थ एव। यद्यपि जगदेककारणं सर्वज्ञत्वादिकल्याणगुणाकरं च ब्रह्म तथापि यः पृथिव्यां तिष्ठन् (बृ. ३।७।३)। य आत्मनि तिष्ठन् (बृ. ३।७।२२)। यश्चक्षुषि तिष्ठन् (बृ. ३।७।१८)। यो रेतसि तिष्ठन् (बृ. ३।७।२३) इत्यादिवचनात्तत्र तत्रावस्थितस्य तत्तत्संबन्धरूपापुरुषार्थाः सन्तीत्येवं प्राप्ते प्रचक्ष्महे।

न स्थानतोपि परस्येति। न पृथिव्यात्मादिस्थानतोपि परस्य ब्रह्मणोपुरुषार्थगन्धः संभवति। कुतः। उभयलिङ्गं सर्वत्र हि। यतः सर्वत्र श्रुतिस्मृतिषु परं ब्रह्मोभयलिङ्गमुभयलक्षणमभिधीयते। निरस्तनिखिलदोषत्वकल्याणगुणाकरत्वलक्षणोपेतमित्यर्थः। अपहतपाप्मा विजरो विमृत्युर्विशोकोविजिघत्सोपिपासः सत्यकामः सत्यसंकल्पः (छा. ८।१।५)।

समस्तकल्याणगुणात्मकोसौ स्वशक्तिलेशोद्धृतभूतसर्गः।
तेजोबलैश्वर्यमहावबोधसुवीर्यशक्त्यादिगुणैकराशिः।
परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे॥
(वि. पु. ६।५।८४-८५)

---

7. A. reads तत् before तन्नियमनार्थम् and before तत्प्रवेशे; A. B. om. अपि after प्रवेशे.
9. A. B. read सर्वज्ञता for सर्वज्ञत्व.
21. E. reads भूतवर्गः for भूतसर्गः.

समस्तहेयरहितं विष्ण्वाख्यं परमं पदम् । (वि.पु. १।२२।५१) इत्यादिश्रुतिस्मृतिभ्य उभयलक्षणं हि ब्रह्मावगतम् ॥ ११ ॥

भेदादिति चेन्न प्रत्येकमतद्वचनात् ॥ १२ ॥

यथा जीवस्य प्रजापतिवाक्यावगतापहतपाप्मत्वाद्युभयलिङ्गस्यापि देवादिदेहयोगरूपावस्थाभेदादपुरुषार्थयोगस्तथान्तर्यामिणः परस्यापि स्वतोपहतपाप्मत्वाद्युभयलिङ्गस्य तत्तद्देवादिशरीरयोगरूपावस्थाभेदादपुरुषार्थयोगोवर्जनीय इति चेत्तन्न । प्रत्येकमतद्वचनात् । यः पृथिव्यां तिष्ठन् (बृ. ३।७।३) । य आत्मनि तिष्ठन् (३।७।२२) इत्यादिषु प्रतिपर्यायं स त आत्मान्तर्याम्यमृत इत्यन्तर्यामिणोमृतत्ववचनेन तत्र तत्र स्वेच्छया नियमनं कुर्वतस्तत्तत्संबन्धप्रयुक्तापुरुषार्थप्रतिषेधात् । जीवस्य तु तत्स्वरूपं तिरोहितमिति पराभिध्यानात्तु तिरोहितम् (ब्र. सू. ३।२।४) इत्यत्रोक्तम् ।

ननु स्वेच्छया कुर्वतोपि तत्तद्वस्तुस्वभावायत्तापुरुषार्थसंबन्धोवर्जनीय इत्युक्तम् । नैतद्युक्तम् । न ह्यचिद्वस्त्वपि स्वभावतोऽपुरुषार्थरूपम् । कर्मवश्यानां तु कर्मस्वभावानुगुण्येन परमपुरुषसंकल्पादेकमेव वस्तु कालभेदेन पुरुषभेदेन च सुखाय दुःखाय च भवति । वस्तुस्वरूपप्रयुक्ते तु ताद्रूप्ये सर्वं सर्वदा सर्वस्य सुखायैव दुःखायैव वा स्यात् । न चैवं दृश्यते । तथा चोक्तम् ।

---

10. E. reads वचनात् for वचनेन.
14. C. reads आयत्तः for आयत्त.
16. E. reads स्व before रूपम्.
17. A. B. om. च after पुरुषभेदेन.
18. C. reads प्रयुक्तत्वे for प्रयुक्ते; B. om. तु.

नरकस्वर्गसंज्ञे वै पापपुण्ये द्विजोत्तम।
वस्त्वेकमेव दुःखाय सुखायेर्ष्यागमाय च।
कोपाय च यतस्तस्माद्वस्तु वस्त्वात्मकं कुतः॥
तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते।
तदेव कोपाय यतः प्रसादाय च जायते॥
तस्माद्दुःखात्मकं नास्ति न च किंचित्सुखात्मकम्।

(वि. पु. २।६।४४-४७)

इति। अतो जीवस्य कर्मवश्यत्वात्तत्तत्कर्मानुगुण्येन तत्तद्वस्तुसंबन्ध एवापुरुषार्थः स्यात्। परस्य तु ब्रह्मणः स्वाधीनस्य स एव संबन्धस्तत्तद्विचित्रनियमनरूपलीलारसायैव स्यात्॥१२॥

अपि चैवमेके॥ १३॥

अपि चैके शाखिन एकस्मिन्नेव देहसंयोगे जीवस्यापुरुषार्थं परस्य तु तद्भावं नियमनरूपैश्वर्यायत्तं दीप्तियोगं च स्वशब्देनाधीयते।

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योभिचाकशीति॥

(मु. ३।१।१)

इति॥ १३॥

अथ स्यादनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि (छा. ६।३।२) इति ब्रह्मात्मकजीवानुप्रवेशपूर्वकं नामरूपव्याकरणमिति ब्रह्मणोपि तदात्मभूतस्य देवमनुष्यादिरूपत्वं तत्तन्नामभाक्त्वं चास्ति। ततश्च ब्राह्मणो यजेतेत्यादिविधिनिषेधशास्त्रगोचरत्वेन कर्मवश्यत्वमवर्जनीयमिति। तत्राह।

---

3. C. reads अवस्त्वात्मकम् for वस्त्वात्मकम्.
8. C. om. तत्तत् before कर्म.
13. C. reads तद्भाव for तद्भावम्; E. reads आयत्त for आयत्तम्.
22. A. B. E. om. तत् after तत्.

http://acharya.org

अरूपवदेव हि तत्प्रधानत्वात् ॥ १४ ॥

देवादिशरीरानुप्रवेशे तेन तेन रूपेण युक्तमप्यरूपवदेव तद्ब्रह्म रूपरहिततुल्यमेव । जीववच्छरीरित्वनिबन्धनं कर्मवश्यत्वमस्य न विद्यत इत्यर्थः । कुतः । तन्निर्वाहकत्वेन प्रधानत्वात् । आकाशो ह वै नामरूपयोर्निर्वहिता । ते यदन्तरा तद्ब्रह्म (छा. ८।१४।१) इति सर्वानुप्रवेशेपि नामरूपकार्यास्पर्शेन नामरूपयोर्निर्वोढृत्वमेव ब्रह्मणः प्रतिपादयति । ननु तच्छरीरत्वेन तदन्तर्यामित्वे कथमरूपवदिति रूपसंबन्धरहिततुल्यत्वमुच्यते । इत्थम् । यथा जीवस्य तत्तज्जन्यसुखदुःखभाक्त्वेन तत्तद्रूपसंबन्धस्तथा तदभावात्परस्य ब्रह्मणोरूपवत्त्वम् । विधिनिषेधशास्त्राण्यपि कर्मवश्यमेवाधिकुर्वन्ति । तस्मादरूपतुल्यमेव परं ब्रह्म । ततश्चान्तर्यामिरूपेणावस्थितमपि ब्रह्म निरस्तनिखिलदोषत्वकल्याणगुणाकरत्वरूपोभयलिङ्गमेव ॥ १४ ॥

ननु च सत्यं ज्ञानमनन्तं ब्रह्म (तै. २।१) इत्यादिभिर्निर्विशेषप्रकाशैकस्वरूपं ब्रह्मावगम्यते । अन्यत्तु सर्वज्ञत्वसत्यसंकल्पत्वजगत्कारणत्वसर्वान्तरात्मत्वसत्यकामत्वादिकं नेति नेति (बृ. ४।२।४) इत्यादिभिः प्रतिषिध्यमानत्वेन मिथ्याभूतमित्यवगन्तव्यम् । तत्कथं कल्याणगुणाकरत्वनिरस्तनिखिलदोषत्वरूपोभयलिङ्गत्वं ब्रह्मण इत्यत आह ।

---

4. A. B E. om. तत् before निर्वाहकत्वेन.
6. C. reads अनुप्रवेशः for अनुप्रवेशे.
7. E. reads क्व after तच्छरीर.
9. A. reads भोक्तृत्वेन, B. उपभोक्तृत्वेन, for भाक्त्वेन.
10. C. reads अरूपत्वम् for ब्रह्मणोरूपवत्त्वम्.
11. E. reads कर्मवश्यान् for कर्मवश्यम्.
15. C. om. स्व before रूपम्.
16. A. reads एष आदेशः, B. स एष आदेशः, before नेति नेति.
19. E. reads तत्र for अतः.

http://acharya.org

प्रकाशवच्चावैयर्थ्यात् ॥ १५ ॥

यथा सत्यं ज्ञानमनन्तं ब्रह्म (तै. २।१) इत्यादिवाक्यावैयर्थ्यात्प्रकाशस्वरूपत्वं ब्रह्मणोऽभ्युपगम्यते तथा सत्यसंकल्पत्वसर्वज्ञत्वसर्वजगत्कारणत्वसर्वात्मकत्वनिरस्तनिखिलाविद्यादिदोषत्वाद्यभिधायिवाक्यावैयर्थ्यादुभयलिङ्गमेव ब्रह्म ॥ १५ ॥

आह च तन्मात्रम् ॥ १६ ॥

किं च सत्यं ज्ञानमनन्तम् (तै. २।१) इत्यादि वाक्यं ब्रह्मणः प्रकाशस्वरूपतामात्रं प्रतिपादयति । नान्यत्सत्यसंकल्पत्वादिकं वाक्यान्तरावगतं निषेधति । नेति नेति (बृ.४।२।४) इति च निषेधस्य विषयोनन्तरमेव वक्ष्यते ॥ १६ ॥

दर्शयति चाथो अपि स्मर्यते ॥ १७ ॥

दर्शयति च वेदान्तवाक्यगणः कल्याणगुणाकरत्वं निरस्तनिखिलदोषत्वं च ।

तमीश्वराणां परमं महेश्वरं तं दैवतानां परमं च दैवतम् ।
(श्वे. ६।७)

स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः । (श्वे. ६।९)

न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते ।
परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ॥
(श्वे. ६।८)

---

2. E. reads च after यथा.

4. A. B. om. सर्वज्ञत्व; C. om. सर्व before जगत्कारणत्व; A. B. om. सर्वात्मकत्व.

5. E. reads अर्थं after वाक्य.

9. A. B. E. read निषेधयति for निषेधति.

http://acharya.org

यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः (मु. १।१।९)। भीषास्माद्वातः पवते। भीषोदेति सूर्यः (तै. २।८।१)। स एको ब्रह्मण आनन्दः (तै. २।८)।

यतो वाचो निवर्तन्ते अप्राप्य मनसा सह।
आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन ॥ (तै. २।९)
निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्। (श्वे. ६।१९)

इत्यादि। स्मर्यते च

योमामजमनादिं च वेत्ति लोकमहेश्वरम्। (गी. १०।३)
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्। (गी. १०।४२)
मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्।
हेतुनानेन कौन्तेय जगद्विपरिवर्तते ॥ (गी. ९।१०)
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥ (गी. १५।१७)
सर्वज्ञः सर्वकृत्सर्वशक्तिज्ञानबलर्द्धिमान्।
अन्यूनश्चाप्यवृद्धिश्च स्वाधीनोनादिमान्वशी ॥
क्लमतन्द्राभयक्रोधकामादिभिरसंयुतः।
निरवद्यः परः प्राप्तेर्निरधिष्ठोक्षरक्रमः ॥ (वि. पु. ५।१।४६-४८)

इत्यादि। अतः सर्वावस्थावस्थितस्यापि ब्रह्मण उभयलिङ्गत्वान्न तत्तत्स्थानप्रयुक्ता दोषाः परं ब्रह्म स्पृशन्ति ॥ १७ ॥

अत एव चोपमा सूर्यकादिवत् ॥ १८ ॥

यतो नानाविधेषु स्थानेषु स्थितस्यापि परस्य ब्रह्मणो न तत्प्रयुक्तदोषभाक्त्वमत एव जलदर्पणादिप्रतिबिम्बितसूर्या-

---

17. A. reads परप्राप्तिः, C. परप्राप्तः, for परः प्राप्तेः.

21. C. reads अव before स्थितस्यापि; E. reads उभयलिङ्गत्वान्न तत्तत्स्थान for न तत्.

दिवत्परमात्मा तत्र तत्रावस्थितोपि निर्दोष इति शास्त्रेषूपमा क्रियते

आकाशमेकं हि यथा घटादिषु पृथग्भवेत् ।
तथात्मैको ह्यनेकस्थो जलाधारेष्विवांशुमान् ॥
एक एव हि भूतात्मा भूतेभूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥

(याज्ञ. स्मृ. ३।१४३-४)

इत्यादिषु ॥ १८ ॥

अत्र चोदयति ।

अम्बुवदग्रहणात्तु न तथात्वम् ॥ १९ ॥

तुशब्दश्चोद्यं द्योतयति । अम्बुवदिति सप्तम्यन्ताद्वतिः । अम्बुदर्पणादिषु यथा सूर्यमुखादयो गृह्यन्ते न तथा पृथिव्यादिषु स्थानेषु परमात्मा गृह्यते । अम्ब्वादिषु हि सूर्यादयो भ्रान्त्या तत्रस्था इव गृह्यन्ते न परमार्थतस्तत्रस्थाः । इह तु यः पृथिव्यां तिष्ठन् (बृ. ३।७।३) । योप्सु तिष्ठन् (बृ. ३।७।४)। य आत्मनि तिष्ठन् (बृ. ३।७।२२) इत्येवमादिना परमार्थत एव परमात्मा पृथिव्यादिषु स्थितो गृह्यते । अतः सूर्यादेरम्बुदर्पणादिप्रयुक्तदोषाननुषङ्गस्तत्र तत्र स्थित्यभावादेव । अतो न तथात्वं दार्ष्टान्तिकस्य न दृष्टान्ततुल्यत्वमित्यर्थः ॥ १९ ॥

---

12. C. reads तथा न for न तथा.
13. B. om. हि after अम्ब्वादिषु.
14. A. B. read इति for इव.
16. B. om. एवम् before आदिना.
18. A. B. om. तत्र after तत्र.
19. B. reads तु after न.

http://acharya.org

परिहरति ।

वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवं दर्शनाच्च ॥ २० ॥

पृथिव्यादिस्थानान्तर्भावात्स्थानिनः परस्य ब्रह्मणः स्वरूपतो गुणतश्च पृथिव्यादिस्थानगतवृद्धिह्रासादिदोषभाक्त्वमात्रं सूर्यादिदृष्टान्तेन निवर्त्यते । कथमिदमवगम्यते । उभयसामञ्जस्यादेवम् । उभयदृष्टान्तसामञ्जस्यादेवमिति निश्चीयते ।

आकाशमेकं हि यथा घटादिषु पृथग्भवेत् ।

...जलाधारेष्विवांशुमान् (याज्ञ. स्मृ. ३।१४३) इति दोषवत्स्वनेकेषु वस्तुषु वस्तुतोवस्थितस्याकाशस्य वस्तुतोनवस्थितस्यांशुमतश्चोभयस्य दृष्टान्तस्योपादानं हि परमात्मनः पृथिव्यादिगतदोषभाक्त्वनिवर्तनमात्रे प्रतिपाद्ये समञ्जसं भवति। घटकरकादिषु यथा वृद्धिह्रासभाक्षु पृथक्पृथक्संयुज्यमानमप्याकाशं वृद्धिह्रासादिदोषैर्न स्पृश्यते यथा च जलाधारेषु विषमेषु दृश्यमानोंशुमांस्तद्गतवृद्धिह्रासादिभिर्न स्पृश्यते तथायं परमात्मा पृथिव्यादिषु नानाकारेष्वचेतनेषु चेतनेषु च स्थितस्तत्तद्गतवृद्धिह्रासादिदोषैरसंस्पृष्टः सर्वत्र वर्तमानोप्येक एवास्पृष्टदोषगन्धः कल्याणगुणाकर एव । एतदुक्तं भवति । यथा जलादिषु वस्तुतोनवस्थितस्यांशुमतो हेत्वभावाज्जलादिदोषानभिष्वङ्गस्तथा पृथिव्यादिष्ववस्थितस्यापि परमात्मनो दोषप्रत्यनीकाकारतया दोषहेत्वभावान्न दोषसंबन्ध इति ।

---

11. B. reads उभय for उभयस्य, A. reads आपादनम्, B. उपपादनम्, for उपादानम्.
14. E. reads सम् before स्पृश्यते.
15 C. reads अपि after दृश्यमान°.
16. C. reads नानाप्रकारेषु for नानाकारेषु, B. om. च after चेतनेषु.
18. A. B. read तदुक्तम् for एतदुक्तम्.

http://acharya.org

दर्शनाच्च । दृश्यते चैवं सर्वात्मना साधर्म्याभावेपि विवक्षितांशसाधर्म्याद्दृष्टान्तोपादानं सिंह इव माणवक इत्यादौ । अतः स्वभावतो निरस्तनिखिलाज्ञानादिदोषगन्धस्य समस्तकल्याणगुणाकरस्य पृथिव्यादिस्थानतोपि न दोषसंभवः ॥ २० ॥

अथ स्याद्द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तं च (बृ.२।३।१) इति प्रकृत्य समस्तस्थूलसूक्ष्मरूपं प्रपञ्चं ब्रह्मणो रूपत्वेन परामृश्य तस्य ह वा एतस्य पुरुषस्य रूपं यथा माहारजनं वासः (बृ. २।३।६) इत्यादिनाकारविशेषं चाभिधायाथात आदेशो नेति नेतीति न ह्येतस्मादिति नेत्यन्यत्परमस्ति (बृ. २।३।६) इति सर्वं प्रकृतं ब्रह्मणः प्रकारमितिशब्देन परामृश्य तत्सर्वं प्रतिषिध्य सर्वविशेषाधिष्ठानं सन्मात्रमेव ब्रह्म विशेषास्त्वेवंविधं स्वस्वरूपमजानता ब्रह्मणा कल्पिता इति दर्शयति । अतः कथमुभयलिङ्गत्वं ब्रह्मण इत्यत्राह ।

प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥ २१ ॥

नैतदुपपद्यते यद्ब्रह्मणः प्रकृतविशेषवत्त्वं नेति नेति (बृ. २।३।६) इति प्रतिषिध्यत इति । तथा सति भ्रान्तजल्पितायमानत्वात् । न हि ब्रह्मणो विशेषणतया प्रमाणान्तराप्रज्ञातं सर्वं तद्विशेषणत्वेनोपदिश्य पुनस्तदेवानुन्मत्तः प्रतिषेधति । यद्यपि निर्दिश्यमानेषु केचन पदार्थाः प्रमाणान्तरप्रसिद्धास्तथापि

7. E. reads महारजनम् for माहारजनम्.
13. C. reads तत्र for अत्र.
17. B. E. read भ्रान्ति for भ्रान्त.
18. C. reads विशेषतया for विशेषणतया.
19. B. reads प्रतिषेधयति for प्रतिषेधति.
20, E. om. केचन.

http://acharya.org

तेषां ब्रह्मणः प्रकारत्वमप्रज्ञातमेव । इतरेषां तु स्वरूपं ब्रह्मणः प्रकारत्वं चाप्रज्ञातम् । अतस्तेषामनुवादासंभवादत्रैवोपदिश्यन्ते । अतस्तन्निषेधो नोपपद्यते । यस्मादेवं तस्मात्प्रकृतैतावत्त्वं ब्रह्मणः प्रतिषेधतीदं वाक्यम् । ये ब्रह्मणो विशेषाः प्रकृतास्तद्विशिष्टतया ब्रह्मणः प्रतीयमानेयत्ता नेति नेति (बृ. २।३।६) इति प्रतिषिध्यते । नेति नेति नैवं नैवम् । उक्तप्रकारमात्रविशिष्टं न भवति ब्रह्म । उक्तप्रकारविशिष्टतया या ब्रह्मण इयत्ता प्रकृता सात्रेतिशब्देन परामृश्यत इत्यर्थः । यतश्च निषेधानन्तरं ब्रह्मणो भूयो गुणजातं ब्रवीति । अतश्च प्रकृतविशेषयोगित्वमात्रतां ब्रह्मणः प्रतिषेधति । ब्रवीति हि भूयो गुणजातं न ह्येतस्मादिति नेत्यन्यत्परमस्ति । अथ नामधेयं सत्यस्य सत्यमिति । प्राणा वै सत्यं तेषामेष सत्यम् (बृ. २।३।६) इति । अयमर्थः । इति नेति नेति यद्ब्रह्म प्रतिपादितं तस्मादेतस्मादन्यद्वस्तु परं न ह्यस्ति । ब्रह्मणोन्यत्स्वरूपतो गुणतश्चोत्कृष्टं नास्तीत्यर्थः । तस्य च ब्रह्मणः सत्यस्य सत्यमिति नामधेयम् । तस्य च निर्वचनं प्राणा वै सत्यं तेषामेष सत्यमिति । प्राणशब्देन प्राणसाहचर्याज्जीवाः परामृश्यन्ते । ते तावत्सत्यम् । वियदादिवत्स्व-

---

1. E. reads अप्रतिज्ञातम् for अप्रज्ञातम्.
2. C. E. read अज्ञातम् for अप्रज्ञातम्.
4. E. reads तु after ये.
5. C. om. ब्रह्मण· after विशिष्टतया.
7. B. reads मात्रम् for मात्र
9. C. reads प्र before ब्रवीति, E. reads विशेषण for विशेष.
13. A. B. om. नेति after नेति.
16. A. B. read वाव for वै after प्राणाः; B. reads एव for एषः after तेषाम्.
17. A. B. read वाव for तावत्; C. reads सत्य for सत्यम्.

http://acharya.org

रूपान्यथाभावरूपपरिणामाभावात् । तेषामेष सत्यम् । तेभ्योप्येष परमपुरुषः सत्यम् । जीवानां कर्मानुगुण्येन ज्ञानसंकोचविकासौ विद्येते । परमपुरुषस्य त्वपहतपाप्मनस्तौ न विद्येते । अतस्तेभ्योप्येष सत्यम् । अतश्चैवं वाक्यशेषोदितगुणजातयोगान्नेति नेति (बृ. २।३।६) इति ब्रह्मणः सविशेषत्वं न प्रतिषिध्यते । अपि तु पूर्वप्रकृतेयत्तामात्रम् । अत उभयलिङ्गमेव परं ब्रह्म ॥ २१ ॥

ब्रह्मणः प्रमाणान्तरागोचरत्वेन तत्संबन्धितया मूर्तामूर्तादिरूपानुवादेन तन्निषेधासंभवात्प्रकृतेयत्ताप्रतिषेध उक्तः । तदेव प्रमाणान्तरागोचरत्वं द्रढयति ।

तदव्यक्तमाह हि ॥ २२ ॥

तद्ब्रह्म प्रमाणान्तरेण न व्यज्यते । आह हि शास्त्रम्

न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् ।
(का. ६।९)

न चक्षुषा गृह्यते नापि वाचा (मु. ३।२।८) इत्यादि ॥ २२ ॥

हेत्वन्तरं चाह ।

अपि संराधने प्रत्यक्षानुमानाभ्याम् ॥ २३

अपि च संराधने सम्यक्प्रीणने भक्तिरूपापन्ने निर्वि

---

1. B. reads एव for एषः after तेषाम्; A. reads तेभ्योप्ये before तेभ्योपि.
3. B. reads विकाशौ for विकासौ.
4. E. reads ततश्च for अतश्च; C. reads वि before शेषो reads त्रात for जात.
5. C. om. नेति after नेति.
8. E. reads तथा च before ब्रह्मणः; C. om. अमूर्त.
12. C. om. न before व्यज्यते; E. reads एव after न.
13. A. B. read आपन्न for आपन्ने.

http://acharya.org

सन एवास्य साक्षात्कारो नान्यत्रेति श्रुतिस्मृतिभ्यामवगम्यते ।

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं
स्वाम् ॥ (मु. ३।२।३)
ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं
ध्यायमानः । (मु. ३।१।८)

इति श्रुतिः । स्मृतिरपि

नाहं वेदैर्न तपसा न दानेन न चेज्यया । (गी. ११।५३)
भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ॥ (गी. ११।५४)

इति । भक्तिरूपापन्नमेवोपासनं संराधनं तस्य प्रीणनमिति पूर्वमेवोक्तम् । अतो निदिध्यासनाय ब्रह्मस्वरूपमुपदिशद्वै वाव ब्रह्मणः (बृ. २।३।१) इत्यादि शास्त्रं ब्रह्मणो मूर्तामूर्तरूपद्वयादिविशिष्टतां प्रागसिद्धां नानुवदितुं क्षमम् ॥२३॥

प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् ॥ २४ ॥

इतश्च प्रकृतैतावत्त्वमेव प्रतिषेधति न मूर्तामूर्तादिविशिष्टत्वम् । यतः साक्षात्कृतपरब्रह्मस्वरूपाणां वामदेवादीनां दर्शने प्रकाशादिवज्ज्ञानानन्दादिस्वरूपवन्मूर्तामूर्तादिप्रपञ्चविशिष्टताया अपि ब्रह्मगुणत्वावैशेष्यं प्रतीयते तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्च (बृ. १।४।१०) इत्यादि । ब्रह्मस्वरूपभूतप्रकाशानन्दादिश्च तेषां वामदेवादीनां संराधना-

---

5. A. E. read पश्यति for पश्यते.
11. C. reads तत् for तस्य before प्रीणनम्.
12. E. reads उपादिशत् for उपदिशत्.
17. E. om. एव.

http://acharya.org

त्मके कर्मण्यभ्यासादुपलभ्यते । तद्वदाभ्यस्तसंराधनानां तेषां मूर्तामूर्तादिविशिष्टत्वमप्यविशेषेण प्रतीयत इत्यर्थः ॥ २४ ॥

उक्तं ब्रह्मण उभयलिङ्गत्वमुपसंहरति ।

अतोनन्तेन तथा हि लिङ्गम् ॥ २५ ॥

अत उक्तैर्हेतुभिर्ब्रह्मणोनन्तेन कल्याणगुणगणेन विशिष्टत्वं सिद्धम् । तथा हि सत्युभयलिङ्गं ब्रह्मोपपन्नं भवति ॥ २५ ॥

उभयलिङ्गाधिकरण समाप्तम् । (५)

उभयव्यपदेशात्त्वहिकुण्डलवत् ॥ २६ ॥

मूर्तामूर्तात्मकस्याचित्प्रपञ्चस्य ब्रह्मणो रूपत्वं द्वे वाव ब्रह्मणो रूपे (बृ. २।३।१) इत्यादिनोपदिश्यते । अथात आदेशो नेति नेति (बृ. २।३।६) इति मूर्तामूर्ताचिद्वस्तुरूपतया ब्रह्मण इयत्ता प्रतिषिध्यते । न ह्येतस्मादिति नेत्यन्यत्परमस्ति (बृ. २।३।६) इति ब्रह्मणोन्यदुत्कृष्टं नास्तीति प्रतिपादितम् । तदुपपादनायाथ नामधेयं सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम् (बृ. २।३।६) इति प्राणशब्दनिर्दिष्टेभ्यश्चेतनेभ्योप्येष सत्यमिति कदाचिदपि ज्ञानादिसंकोचाभावादुक्तम् । तथा प्रधानक्षेत्रज्ञपतिर्गुणेशः (श्वे. ६।१६) । पतिं विश्वस्यात्मेश्वरम् (ना. १३।१) । नित्यो नित्यानां चेतनश्चेतनानाम् (श्वे. ६।१३) इत्यादिश्रुतेश्चायमर्थोवगम्यते । तस्याचिद्वस्तुनो ब्रह्मरूपत्वप्रकार इदानीं चिन्त्यते ब्रह्मणो निर्दोषत्वसिद्ध्यर्थम् ।

किमस्याचिद्वस्तुनो ब्रह्मरूपत्वमहिकुण्डलन्यायेनोत प्रभा-

---

9. C. reads चित् for अचित्.

13. C. reads हि after न.

14. E. om. अथ.

प्रभावतोरिवैकजातियोगेनोत जीवस्येव विशेषणविशेष्यतयांशांशिभावेनेति। इह स्थाप्यमानं विशेषणविशेष्यभावमङ्गीकृत्य प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् (ब्र. सू. १।४।२३)। तदनन्यत्वमारम्भणशब्दादिभ्यः (ब्र. सू. २।१।१५) इत्यत्र सूक्ष्मचिदचिद्वस्तुविशिष्टाद्ब्रह्मणः स्थूलचिदचिद्विशिष्टस्योत्पत्तिरनन्यत्वं चोक्तम्। किं युक्तम्। अहिकुण्डलवदिति। कुतः। उभयव्यपदेशात्। ब्रह्मैवेदं सर्वम् (नृ. ता. ५)। आत्मैवेदं सर्वम् (नृ. ता. ५) इति तादात्म्यव्यपदेशाद्धन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि (छा. ६।३।२) इति भेदव्यपदेशाच्चाहेः कुण्डलभाववर्जुभाववत्तस्यैव ब्रह्मणः संस्थानविशेषा एवाचिद्वस्तूनि॥ २६॥

प्रकाशाश्रयवद्वा तेजस्त्वात्॥ २७॥

वाशब्दः पक्षव्यावृत्त्यर्थः। ब्रह्मस्वरूपस्यैवाचिद्रूपेणावस्थाने भेदश्रुतयो ब्रह्मणोपरिणामित्ववादिन्योपि बाधिता भवेयुः। अतो यथा तेजस्त्वेन प्रभातदाश्रययोर्भिन्नयोरपि तादात्म्यमेवमचित्प्रपञ्चस्य ब्रह्मणो रूपत्वमित्यर्थः॥ २७॥

पूर्ववद्वा॥ २८॥

वाशब्दः पक्षद्वयव्यावृत्त्यर्थः। एकस्यैव द्रव्यस्यावस्थाविशेषयोगेपि ब्रह्मस्वरूपस्यैवाचिद्रूपत्वादुक्तदोषादनिर्मोक्षः। अथ

---

5. B. om. वस्तु.

9. B. reads इत्यादि for नामरूपे व्याकरवाणीति.

11. C. E. read कुण्डलभाववद्रज्जुभाववत् for कुण्डलभाववर्जुभाववत्.

14. E. reads द्वय after पक्ष.

16. C. reads यतः for अत°.

20. C. reads द्रव्यत्वात्, E. द्रव्यस्वरूपत्वात्, for रूपत्वात्; E. reads अनिर्मोक्षप्रसङ्गः for अनिर्मोक्ष°.

प्रभातदाश्रययोरिवाचिद्ब्रह्मणोर्ब्रह्मत्वजातियोगमात्रं विवक्षितम् । एवं तद्वाश्वत्वगोत्ववद्ब्रह्मापीश्वरे चिदचिद्वस्तुनोश्चानुवर्तमानं सामान्यमिति सकलश्रुतिस्मृतिव्यवहारविरोधः पूर्ववदेव । अंशो नानाव्यपदेशात् (ब्र. सू. २।३।४२) । प्रकाशादिवत्तु नैवं परः (ब्र. सू. २।३।४५) इति जीववत्पृथक्सिद्ध्यनर्हविशेषणत्वेनाचिद्वस्तुनो ब्रह्मांशत्वम् । विशिष्टवस्त्वेकदेशत्वेनाभेदव्यवहारो मुख्यः । विशेषणविशेष्ययोः स्वरूपस्वभावभेदेन भेदव्यवहारोपि मुख्यः । ब्रह्मणो निर्दोषत्वं च रक्षितम् । तदेवं प्रकाशजातिगुणशरीराणां मणिव्यक्तिगुण्यात्मनः पृथक्सिद्ध्यनर्हविशेषणतया यथांशत्वं तथेह जीवस्याचिद्वस्तुनश्च ब्रह्म प्रत्यंशत्वम् ॥ २८ ॥

प्रतिषेधाच्च ॥ २९ ॥

स एष महानज आत्माजरोमरः (बृ. ४।४।२५) । नास्य जरयैतज्जीर्यति (छा. ८।१।५) इत्यादिभिर्ब्रह्मणोचिद्धर्मप्रतिषेधाच्च विशेषणविशेष्यत्वेनैवांशांशिभाव इत्यर्थः । अतः सूक्ष्मचिदचिद्वस्तुविशिष्टं कारणभूतं ब्रह्म स्थूलचिदचिद्वस्तुविशिष्टं कार्यभूतं ब्रह्मेति कारणात्कार्यस्यानन्यत्वं कारणभूतब्रह्मविज्ञानेन कार्यस्य ज्ञाततेत्यादि सर्वमुपपन्नम् । ब्रह्मणो निर्दो-

---

2. A. B. read ब्रह्मणि for ब्रह्मापि.
6. C. reads त्व after पृथक्.
8. B. om. स्वभाव; A. B. om. अपि after भेदव्यवहारः.
9. E. om. च; B. reads एव for एवम्.
10. A. reads प्रत्यपृथक्सिद्धलक्षण, E. प्रत्यपृथक्सिद्धिलक्षण, for पृथक्सिद्ध्यनर्ह.
16. B. om. वस्तु after सूक्ष्मचिदचित् and स्थूलचिदचित्.
18. A. B. om. ब्रह्मणो निर्दोषत्वं च रक्षितम्.

http://acharya.org

षत्वं च रक्षितम् । ब्रह्मणो निर्दोषत्वेन कल्याणगुणाकरत्वेन चोभयलिङ्गत्वमपि सिद्धम् ॥ २९ ॥ अहिकुण्डलाधिकरणं समाप्तम् । (६)

परमतः सेतून्मानसंबन्धभेदव्यपदेशेभ्यः ॥ ३० ॥

इदानीमस्मात्परस्माज्जगन्निमित्तोपादानरूपपरमकारणात्परब्रह्मणः परमपि किंचित्तत्त्वमस्तीति कैश्चिद्धेत्वाभासैराशङ्क्य निराक्रियतेस्योपास्यस्य निर्दोषत्वानवधिकातिशयासंख्येयकल्याणगुणाकरत्वस्थेम्ने ।

तत्रेयमाशङ्का यदिदं परं ब्रह्मोभयलिङ्गमेतस्मान्निखिलजगत्कारणात्परमपि किंचित्तत्त्वमस्ति । कथम् । अथ य आत्मा स सेतुर्विधृतिः (छा. ८।४।१) इत्यस्य परस्य सेतुत्वव्यपदेशात् । सेतुशब्दस्य च लोके कूलान्तरप्राप्तिहेतौ प्रसिद्धेरितोन्यदनेन प्राप्यमस्तीति गम्यते । तथैतं सेतुं तीर्त्वान्धः सन्ननन्धो भवति (छा. ८।४।२) इति तरितव्यता चास्याभिधीयते । अतश्चान्यत्प्राप्यमस्ति । उन्मानव्यपदेशाच्च । उन्मितं परिमितमिदं परं ब्रह्म । चतुष्पाद्ब्रह्म (छा. ३।१८।२) । षोडशकलम् (प्र. ६।१) इत्युन्मानव्यपदेशात् । स चायमुन्मानव्यपदेशस्तेन सेतुना प्राप्यस्यानुन्मितस्यास्तित्वं द्योतयति । तथा संबन्धव्यपदेशश्च सेतुसेतुमतोः प्रापकत्वप्राप्यत्वलक्षणो दृश्यते ।

---

8. E. om. आ before शङ्का.

12. C. reads प्राप्तव्यम् for प्राप्यम्; E. reads अथ संनद्धः for अन्धः सन्ननन्धः.

13. A. B. read तर्तव्यता for तरितव्यता.

14. C. reads प्राप्तव्यम् for प्राप्यम्.

15. A. B. om. इदम्.

17. C. reads अस्तिताम् for अस्तित्वम्.

http://acharya.org

अमृतस्य परं सेतुं दग्धेन्धनमिवानलम् । (श्वे. ६।१९) अमृतस्यैष सेतुः (मु. २।२।५) इति । अतश्च परात्परमस्ति । भेदेन च परात्परं व्यपदिश्यते परात्परं पुरुषमुपैति (मु. ३।२।८) । परात्परं यन्महतो महान्तम् (ना. १।५) इति च । तथा

तेनेदं पूर्णं पुरुषेण सर्वम् ।

ततो यदुत्तरतरं तद्रूपमनामयम् । (श्वे. ३।९–१०)

इति । अत एभ्यो हेतुभ्यः परस्माद्ब्रह्मणः परमपि किंचिदस्तीति गम्यत इति ॥ ३० ॥

एवं प्राप्तेभिधीयते ।

सामान्यात्तु ॥ ३१ ॥

तुशब्दः पक्षं व्यावर्तयति । यत्तावदुक्तं सेतुत्वव्यपदेशात्परात्परमस्तीति तन्नोपपद्यते । न ह्ययमत्र किंचित्प्राप्यं प्रति सेतुरुच्यते । एषां लोकानामसंभेदाय (छा. ८।४।१) इति सेतुसामान्येन सर्वलोकासंकरत्वश्रुतेः । सिनोति बध्नाति स्वस्मिन्सर्वं चिदचिद्वस्तुजातमसंकीर्णमिति सेतुरुच्यते । एतं सेतुं तीर्त्वा (छा. ८।४।२) इति तरतिश्च प्राप्तिवचनो यथा वेदान्तं तरतीति ॥ ३१ ॥

बुद्ध्यर्थः पादवत् ॥ ३२ ॥

योयं चतुष्पाद्ब्रह्म (छा. ३।१८।२) । षोडशकलम् (प्र. ६।१) । पादोस्य विश्वा भूतानि (तै. आ. ३।१०) इत्युन्मानव्यपदेशः स बुद्ध्यर्थः । उपासनार्थः । सत्यं ज्ञानमनन्तं ब्रह्म (तै. २।१) इत्यादिभिर्जगत्कारणस्य ब्रह्मणोपरिच्छि-

12. E. om. त्व after सेतु.

18. C. reads देवताम् for वेदान्तम्.

23. C. reads इति हि for इत्यादिभिः.

http://acharya.org

त्वावगमात्स्वत उन्मितत्वासंभवात् । जगत्कारणत्वं हि तस्यैव श्रूयते तस्माद्वा एतस्मादात्मन आकाशः संभूतः (तै. २।१)। सोकामयत बहु स्यां प्रजायेय (तै. २।६) इति। अतो यथा वाक्पादः प्राणः पादश्चक्षुष्पादः (छा. ३।१८।२) इत्यादिना ब्रह्मणो वागादिपादव्यपदेश उपासनार्थ एवमथमपि ॥ ३२ ॥

स्वयमनुन्मितस्य कथमुपासनार्थतयाप्युन्मानसंभवस्तत्राह ।

स्थानविशेषात्प्रकाशादिवत् ॥ ३३ ॥

प्रतिपन्नवागादिस्थानविशेषरूपोपाधिभेदात्तत्संबन्धितयोन्मितत्वानुसंधानं संभवति । यथा प्रकाशादेर्विततस्य वातायनघटादिस्थानभेदैः परिच्छिन्नत्वानुसंधानसंभव इत्यर्थः ॥ ३३ ॥

उपपत्तेश्च ॥ ३४ ॥

यदुक्तममृतस्यैष सेतुः (मु. २।२।५) इति प्राप्यप्रापकसंबन्धव्यपदेशात्प्रापकात्परं प्राप्यमस्तीति तन्न । प्राप्यस्य परमपुरुषस्य स्वप्राप्तौ स्वस्यैवोपायत्वोपपत्तेः ।

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥ (मु. ३।२।३)

इत्यनन्योपायत्वश्रवणात् ॥ ३४ ॥

तथान्यप्रतिषेधात् ॥ ३५ ॥

यत्पुनरुक्तं ततो यदुत्तरतरम् (श्वे. ३।१०) । परात्परं

---

4. A. reads चक्षुःपादः for चक्षुष्पादः; E. reads मनः पादः after चक्षुष्पादः.

14. C. om. प्रापकात्.

http://acharya.org

पुरुषम् (मु. ३।२।८) । अक्षरात्परतः परः (मु. २।१।२) इत्यादिभेदव्यपदेशात्परात्परमस्तीति तन्नोपपद्यते । तत्रैव ततोन्यस्य परस्य प्रतिषेधात् ।

यस्मात्परं नापरमस्ति किंचि-
द्यस्मान्नाणीयो न ज्यायोस्ति कश्चित् । (श्वे. ३।९)

इति । यस्मादपरं परं नास्ति किंचित् । न केनापि प्रकारेण परमस्तीत्यर्थः । तथान्यत्रापि न ह्येतस्मादिति नेत्यन्यत्परमस्ति (बृ. २।३।६) इति नेति निर्दिष्टादेतस्माद्ब्रह्मणोन्यत्परं न ह्यस्तीत्यर्थः । तथा

न तस्येशे कश्चन तस्य नाम महद्यशः । (ना. १।२)

इति । तद्धि जगदुपादानकारणतयानन्तरमुक्तम्

सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि । (ना. १।२)

स आपः प्रदुघे उभे इमे (ना. १।२) इत्यादिना । अद्भ्यः संभूतो हिरण्यगर्भे इत्यष्टौ (ना. १।३) इति च जगत्कारणं पुरुषमेनं प्रत्यभिज्ञापयति ।

ततो यदुत्तरतरम् (श्वे. ३।१०) इति किमुच्यत इति चेत् । पूर्वत्र

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेयनाय ॥
(श्वे. ३।८)

---

2. C. om. भेद after इत्यादि.
5. C. reads किंचित् for कश्चित्.
8. C. reads अस्मात् for एतस्मात्.
9. C. om. हि.
15. E. reads च after प्रत्यभिज्ञापयति.
16. B. reads उत्तरम् for उत्तरतरम्.
19. A. B. E. read तमेवं विद्वानमृत इह भवति for तमेव विदित्वाति मृत्युमेति.

http://acharya.org

इति परस्य ब्रह्मणो महापुरुषस्य वेदनमेवामृतत्वसाधनं नान्योमृतत्वस्य पन्था इत्युपदिश्य तदुपपादनाय

यस्मात्परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोस्ति कश्चित् ।
वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् ॥
(श्वे. ३।९)

इति पुरुषस्य परतरत्वं तद्व्यतिरिक्तस्य परत्वासंभवं च प्रतिपाद्य

ततो यदुत्तरतरं तद्रूपमनामयम् ।
य एतद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवापियन्ति ॥
(श्वे. ३।१०)

इति पूर्वोक्तमर्थं हेतुतो निगमयति । यदुत्तरतरं पुरुषतत्त्वं तदेवारूपमनामयं यतस्ततो ये तत्पुरुषतत्त्वं विदुस्त एवामृता भवन्त्यथेतरे दुःखमेवापियन्तीति । अन्यथोपक्रमविरोधोनन्तरोक्तविरोधश्च । परात्परं पुरुषमुपैति दिव्यम् (मु. ३।२।८) इत्यपि पूर्वत्राक्षरात्परतः परः (मु. २।१।२) इत्यक्षराद्व्याकृताद्यः परः समष्टिपुरुषस्तस्मात्परो योदृश्यत्वादिगुणकः सर्वज्ञः परमपुरुषः स एवेहापि परात्पर इति समष्टिपुरुषात्परत्वेनोच्यते ॥ ३५ ॥

अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥ ३६ ॥

अनेन ब्रह्मणा सर्वगतत्वं सर्वस्य जगतो व्याप्तत्वमायामशब्दादिभ्यः सर्वव्याप्तिवाचिशब्देभ्योवगम्यमानमस्मात्परं

---

3. C om. यस्मान्नाणीयो न ज्यायोस्ति कश्चित्.
7. B. reads परतत्त्वम्, E परत्वम्, for परतरत्वम्.
14. E. reads उक्ति for उक्त.
20. E reads व्याप्यत्वम् for व्याप्तत्वम्.

http://acharya.org

नास्तीत्यवगमयति । आयामशब्दस्तावत्तेनेदं पूर्णं पुरुषेण सर्वम् (श्वे. ३।९) ।

यच्च किंचिज्जगत्यस्मिन्दृश्यते श्रूयतेपि वा ।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥ (ना. ११।६)
नित्यं विभुं सर्वगतं सुसूक्ष्मं यद्भूतयोनिं परिपश्यन्ति धीराः । (मु. १।१।६)

इति । आदिशब्दाद्ब्रह्मैवेदं सर्वम् (नृ. ता. ५) । आत्मैवेदं सर्वम् (नृ. ता. ५) इत्यादयो गृह्यन्ते । अत इदं परं ब्रह्मैव सर्वस्मात्परम् ॥ ३६ ॥ पराधिकरणं समाप्तम् । (७)

फलमत उपपत्तेः ॥ ३७ ॥

उक्तमुपासिसिषोपजननार्थं जीवस्य सर्वावस्थासु सदोषत्वं प्राप्यस्य च परमपुरुषस्य निर्दोषत्वं कल्याणगुणाकरत्वं सर्वस्मात्परत्वं च । अतः परमुपासनं विवक्षन्नुपासीनानां परस्मादेवास्मात्पुरुषात्तत्प्राप्तिरूपमपवर्गाख्यं फलमिति संप्रति ब्रूते । तुल्यन्यायतया शास्त्रीयमैहिकामुष्मिकमपि फलमत एव परस्मात्पुरुषाद्भवतीति सामान्येन फलमत इत्युच्यते । कुत एतत् । उपपत्तेः । स एव हि सर्वज्ञः सर्वशक्तिर्महोदारो यागदानहोमादिभिरुपासनेन चाराधित ऐहिकामुष्मिकं भोगजातं स्वस्वरूपावाप्तिरूपमपवर्गं च दातुमीष्टे । न ह्यचेतनं कर्म क्षणध्वंसि कालान्तरभाविफलसाधनं भवितुमर्हति ॥ ३७ ॥

---

7. E om. इति.
12. C. reads परमपुरुषस्य च for च परमपुरुषस्य.
13. A. om. च after परत्वम्.
14. C. reads प्राप्तिरूप for प्राप्तिरूपम्.
18. A. B. read आमुष्मिक for आमुष्मिकम्.
19. E. reads प्राप्ति for अवाप्ति.

http://acharya.org

श्रुतत्वाच्च ॥ ३८ ॥

स वा एष महानज आत्मान्नादो वसुदानः (बृ.४।४।२४)। एष ह्येवानन्दयाति (तै. २।७) इति भोगापवर्गरूपं फलमयमेव ददातीति हि श्रूयते ॥ ३८ ॥

संप्रति पूर्वपक्षमाह।

धर्मं जैमिनिरत एव ॥ ३९ ॥

अत एवोपपत्तेः शास्त्राच्च यागदानहोमोपासनरूपधर्ममेव फलप्रदं जैमिनिराचार्यो मन्यते। लोके हि कृष्यादिकं कर्म दानादिकं च कर्म साक्षाद्वा परंपरया वा स्वयमेव फलसाधनं दृष्टम्। एवं वेदेपि यागदानहोमादीनां साक्षात्फलसाधनत्वाभावेपि परंपरयापूर्वद्वारेण फलसाधनत्वमुपपद्यते। तथा यजेत स्वर्गकाम इत्यादिशास्त्रमपि सिषाधयिषितस्वर्गस्य कर्तव्यतया यागाद्यभिदधदन्यथानुपपत्त्यापूर्वद्वारेण फलसाधनत्वमेव गमयति ॥ ३९ ॥

पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ ४० ॥

तुशब्दः पक्षव्यावृत्त्यर्थः। पूर्वोक्तं परमपुरुषस्यैव फलप्रदत्वं भगवान्बादरायणो मन्यते। कुतः। हेतुव्यपदेशात्। यज देवपूजायामिति देवताराधनभूतयागादावाराध्यभूताग्नि-

---

4. C. om. हि after इति.

7. C. reads रूपम् for रूप.

8. B. reads फलदम् for फलप्रदम्; C. om हि; B. reads खननादिक च कृष्यादिकम् for कृष्यादिक कर्म दानादिक च कर्म, A. reads खननादिकम्, C. reads मर्दनादिकम् for कर्म दानादिकम्.

13. C. reads अव for एव; E. reads अव after एव.

18. A. B. E. read यागादि for यागादौ.

http://acharya.org

वाय्वादिदेवतानामेव तत्तत्फलहेतुतया तस्मिंस्तस्मिन्नपि वाक्ये व्यपदेशाद्वायव्यं श्वेतमालभेत भूतिकामो वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति (तै. सं. २।१।१) इत्यादिषु। कामिनः सिषाधयिषितफलसाधनत्वप्रकारोपदेशोपि विध्यपेक्षित एवेति नातत्परत्वशङ्का युक्ता।

एवमपेक्षितेपि फलसाधनत्वप्रकारे शब्दादेवावगते सति तत्परित्यागमश्रुतापूर्वादिपरिकल्पनं च प्रामाणिका न सहन्ते। लिङादयोपि देवताराधनभूतयागादेः प्रकृत्यर्थस्य कर्तृव्यापारसाध्यतां व्युत्पत्तिसिद्धां शब्दानुशासनानुमतामभिदधति नान्यदलौकिकमिति प्रागेव (पृ. १३१) उक्तम्। तदेवं वायुर्वै क्षेपिष्ठा देवता (तै. सं. २।१।१) इत्यादिशब्दाद्वाय्वादीनां फलप्रदत्वमवगम्यते। वाय्वाद्यात्मना च परमपुरुष एवाराध्यतया फलप्रदायित्वेन चावतिष्ठत इति श्रूयते

इष्टापूर्त्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः।
तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः॥ (ना. १।२)

इति। अन्तर्यामिब्राह्मणे च यो वायौ तिष्ठन्····यस्य वायुः शरीरम् (बृ. ३।७।७)। योग्नौ तिष्ठन् (बृ. ३।७।५)। य आदित्ये तिष्ठन् (बृ. ३।७।९) इत्यादि श्रूयते। स्मर्यते च

यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्॥
स तया श्रद्धया युक्तस्तस्याराधनमीहते।
लभते च ततः कामान्मयैव विहितान्हि तान्॥

(गी. ७।२१–२२)

---

1. A. B. om. तत् after तत्; C. om. तस्मिन् after तस्मिन्.
6. C. om. अपि after अपेक्षिते.
7. C. reads वि for परि before कल्पनम्.
16. C. reads च after इति.

http://acharya.org

इति।

अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च। (गी. ९।२४)

इति। प्रभुरिति फलप्रदायीत्यर्थः।

देवान्देवयजो यान्ति मद्भक्ता यान्ति मामपि। (गी.७।२३)

यान्ति मद्याजिनोपि माम् (गी. ९।२५) इति च। लोके च कृष्यादिभिर्विचित्ररूपान्द्रव्यविशेषान्संपाद्य तै राजानं भृत्यद्वारेण साक्षाद्वार्चयन्ति। अर्चितश्च राजा तत्तदर्चनानुगुणं फलं च प्रयच्छन्दृश्यते। वेदास्त्वतिपतितसकलेतरप्रमाणसंभावनाभूमिं निरस्तसमस्ताविद्यादिदोषगन्धं स्वाभाविकानवधिकातिशयापरिमितोदारगुणसागरं पुरुषोत्तमं प्रतिपाद्य तदाराधनरूपाणि च यागदानहोमात्मकानि स्तुतिनमस्कारकीर्तनार्चनध्यानानि च तदाराधनानि तदाराधितात्परस्मात्पुरुषाद्भोगापवर्गरूपं फलं च वदन्तीति सर्वं समञ्जसम् ॥ ४० ॥

फलाधिकरण समाप्तम्। (८)

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये तृतीयाध्यायस्य द्वितीयः पादः ॥ २ ॥

---

5. C. reads लोकादि for लोके च.

7 A. B. E read आराधन for अर्चन.

8. E reads वेदान्ता. for वेदा

9. B reads ऽभूमिम् for भूमिम्.

12. E. reads च after तदाराधनानि, A. B. om. तत् before आराधितात्.

13. A. reads च after इति.

http://acharya.org

अथ श्रीभाष्ये

तृतीयाध्याये तृतीयः पाद आरभ्यते ।

सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ १ ॥

उक्तं ब्रह्मोपासिषोपजननाय वक्तव्यं ब्रह्मणः फलदायितापर्यन्तम् । इदानीं ब्रह्मोपासनानां गुणोपसंहारविकल्पनिर्णयाय विद्याभेदाभेदचिन्ता प्रस्तूयते । प्रथमं तावदेकस्या वैश्वानरविद्यादिकाया अनेकशाखासु श्रूयमाणायाः किमेकविद्यात्वमुत विद्याभेद इति चिन्त्यते । अविशेषपुनःश्रवणस्य प्रकरणान्तरस्य च भेदकत्वाच्छाखान्तरे चोभयोरवर्जनीयत्वाद्विद्याभेद इति प्राप्तम् । अत एव

तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णम् ।
(मु. ३।२।१०)

इति शिरोव्रतवतामाथर्वणिकानामेव विद्योपदेशनियम उपपद्यते । विद्यैक्ये हि विद्याङ्गस्य शिरोव्रतस्यान्येषामपि शाखिनां प्राप्तेर्नियमो नोपपद्यते । एवं प्राप्त उच्यते ।

सर्ववेदान्तप्रत्ययमेकमुपासनमिति । कुतः । चोदनाद्यविशेषात् । चोदना तावदुपासीत विद्यादित्येवंजातीयको धात्वर्थविशेषविधिः । आदिशब्देनैकं वा संयोगरूपचोदनाख्याविशेषात् (जै. सू. २।४।९) इति कर्मकाण्डशाखान्तराधिकर-

---

4. C. reads फलदायित्व for फलदायिता.

14. C. om. विद्याङ्गस्य.

http://acharya.org

णसूत्रोक्ताः संयोगरूपाख्या गृह्यन्ते । एषां चोदनादीनामविशेषात्सैवेयं विद्येति शाखान्तरे प्रत्यभिज्ञायते । तथा हि च्छान्दोग्यवाजसनेयकयोर्वैश्वानरमुपास्ते (छा. ५।११, श. ब्रा. १०।६।१।११) इति चोदना तावदेकरूपा । विदिपर्यायस्योपासेर्निर्देशात् । वेद्यैकनिरूपणीयस्वरूपस्योपासनस्य वेद्यभूतवैश्वानरैक्याद्रूपमप्यविशिष्टम् । आख्या च वैश्वानरविद्येत्यविशिष्टा । फलसंयोगोप्युभयत्रापि ब्रह्मप्राप्तिरूपोविशिष्टः । अत एभिः प्रत्यभिज्ञानाच्छाखान्तरेपि विद्यैक्यम् ॥ १ ॥

यत्तूक्तमविशेषपुनःश्रवणात्प्रकरणान्तराच्च विधेयभेदप्रतीतेर्न विद्यैक्यमिति तदनुभाष्य परिहरति ।

भेदान्नेति चेदेकस्यामपि ॥ २ ॥

अविशेषपुनःश्रुत्या प्रकरणान्तराच्च विधेयभेदान्न विद्यैक्यमिति चेदेकस्यामपि विद्यायां प्रतिपत्तृभेदात्पुनःश्रुतिः प्रकरणान्तरं चोपपद्यते । यत्र ह्येकस्मिन्प्रतिपत्तरि पुनःश्रुतिः प्रकरणान्तरं च विद्यते तत्रान्यथानुपपत्त्या विधेयभेदाद्विद्याभेदः । प्रतिपत्तृभेदे तु तत्प्रतिपत्त्यर्थतया पुनःश्रुत्याद्युपपत्तेस्तत्र न विधेयान्तरसंभवः ॥ २ ॥

यच्चोक्तं शिरोव्रतवतामाथर्वणिकानामेव विद्योपदेशनियमदर्शनाद्विद्याभेदः प्रतीयत इत्यत्राह ।

---

4. B. reads उपास्ते' for उपासेः.
5. B. reads विद्या for वेद्य.
9. B. reads भेदात् for भेदप्रतीते'.
11. C. om. न after भेदात्.
15. B. om च after प्रकरणान्तरम्.
19. C. reads तत्र for अत्र.

http://acharya.org

स्वाध्यायस्य तथात्वे हि समाचारेधिकाराच्च सववच्च तन्नियमः ॥ ३ ॥

नैतदस्ति शिरोव्रतोपदेशनियमदर्शनं विद्याभेदं द्योतयतीति। शिरोव्रतस्य विद्याङ्गत्वाभावात्। स्वाध्यायस्य तथात्वे हि तन्नियमः। स्वाध्यायस्य तथात्वसिद्ध्यर्थं तज्जन्यसंस्कारभाक्त्वसिद्ध्यर्थं हि शिरोव्रतोपदेशनियमो न विद्यायाः। कुत एतत्। नैतदचीर्णव्रतोधीते (मु. ३।२।११) इति तस्याध्ययनसंयोगात्। समाचारेधिकाराच्च। समाचाराख्ये ग्रन्थ इदमपि वेदव्रतत्वेन व्याख्यातमित्यतिदेशात्। तेषामेवैतां ब्रह्मविद्यां वदेत (मु. ३।२।१०) वेदविद्यामित्यर्थः। सववच्च तन्नियमः। यथा हि सवहोमाः सप्तसूर्यादयः शतौदनपर्यन्ता आथर्वणिकैकाग्निसंबन्धिनस्तत्रैव भवन्ति न त्रेताग्निषु ॥ ३ ॥

दर्शयति च ॥ ४ ॥

दर्शयति च श्रुतिरुपासनस्य सर्ववेदान्तप्रत्ययत्वम्। तथा हि च्छान्दोग्ये तस्मिन्यदन्तस्तदन्वेष्टव्यम् (छा. ८।१।१) इत्युक्त्वा किं तदत्र विद्यते यदन्वेष्टव्यम् (छा. ८।१।२) इति प्रश्नपूर्वकमपहतपाप्मत्वादिगुणाष्टकविशिष्टः परमात्मा तस्मिन्नुपास्य इत्युक्तम्। तैत्तिरीयके तु च्छान्दोग्यस्थं प्रतिनिर्देशमुपजीव्य

---

7. A. E. read अधीयीत for अधीते.

8. A. B read समाचाराख्य for समाचाराख्ये.

11. C reads शतादन, E. शतोदन, for शतौदन.

12. A. B. read इति after भवन्ति.

15. C. reads उपासितव्यम् foı अन्वेष्टव्यम्.

16. E. ıeads तत्र for तदत्र.

18. A B read इत्युक्तः for इत्युक्तम्.

http://acharya.org

तत्रापि दहरं गगनं विशोकस्तस्मिन्यदन्तस्तदुपासितव्यम् ।
(ना. १२।३)

इति गुणाष्टकविशिष्टस्य परमात्मन उपासनमुच्यते । तदुभयत्र विद्यैकत्वेन गुणोपसंहारादेवोपपद्यते ॥ ४ ॥

तदेवं शाखान्तराधिकरणन्यायसिद्धं विद्यैक्यं स्थिरीकृत्य तत्प्रयोजनमाह ।

उपसंहारोर्थाभेदाद्विधिशेषवत्समाने च ॥ ५ ॥

एवं सर्ववेदान्तेषु समाने सत्युपासने वेदान्तान्तराम्नातानां गुणानां वेदान्तान्तर उपसंहारः कर्तव्यः । कुतः । विधिशेषवदर्थाभेदात् । यथैकस्मिन्वेदान्ते श्रुतो वैश्वानरदहरादिविधिशेषो गुणस्तद्विद्यासंबन्धात्तदुपकाररूपप्रयोजनसिद्ध्यर्थमनुष्ठीयते तथा वेदान्तान्तरोदितोपि तद्विद्यासंबन्धित्वेन तदुपकाराविशेषादुपसंहर्तव्य इत्यर्थः । चशब्दोवधारणे ॥ ५ ॥
सर्ववेदान्तप्रत्ययाधिकरणं समाप्तम् । (१)

अन्यथात्वं शब्दादिति चेन्नाविशेषात् ॥ ६ ॥

एवं चोदनाद्यविशेषाद्विद्यैकत्वमेकत्वे च गुणोपसंहारः कर्तव्य इत्युक्तम् । अतः परं काश्चन विद्या अधिकृत्य प्रत्यभिज्ञाहेतुभूतचोदनाद्यविशेषोस्ति नेतीति निरूप्य निर्णीयते । अस्त्युद्गीथविद्या वाजिनां छन्दोगानां च । वाजिनां तावद्द्वया ह प्राजापत्या देवाश्चासुराश्च (बृ. १।३।१) इत्यारभ्य ते ह

---

1. C. reads दह्रम् for दहरम्.

8. C. om. अन्त before अन्तराम्नातानाम्.

13. C. reads उपसहार· कर्तव्यः for उपसंहर्तव्यः.

18. C. reads हि before उद्गीथविद्या.

20. A. E. read वा after ते ह.

देवा ऊचुर्हन्तासुरान्यज्ञ उद्गीथेनात्ययाम (बृ. १।३।१) इत्युद्गीथेनासुरविध्वंसं प्रतिज्ञायोद्गीथे वागादिमनःपर्यन्तदृष्टावसुरैरभिभवमुक्त्वाथ हेममासन्यं प्राणमूचुः (बृ. १।३।७) इत्यादिनोद्गीथे प्राणदृष्ट्यासुरपराभवमुक्त्वा भवत्यात्मना परास्य द्विषन्भ्रातृव्यो भवति य एवं वेद (बृ. १।३।७) इति शत्रुपराजयफलायोद्गीथे प्राणदृष्टिर्विहिता । एवं छन्दोगानामपि देवासुरा ह वै यत्र संयेतिरे (छा. १।२।१) इत्यारभ्य तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिहनिष्यामः (छा. १।२।१) इत्युद्गीथेनासुरपराभवं प्रतिज्ञाय तद्वदेवोद्गीथे वागादिदृष्टौ दोषमभिधायाथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासांचक्रिरे (छा. १।२।७) इत्यादिनोद्गीथे प्राणदृष्ट्यासुरपराभवमुक्त्वा यथाश्मानमाखणमृत्वा विध्वंसत एवं हैव स विध्वंसते य एवंविदि पापं कामयते (छा. १।२।८) इति शत्रुपराभवायोद्गीथे प्राणदृष्टिर्विहिता । वेदनविषयविधिप्रत्ययाश्रवणेपि फलसाधनत्वश्रवणाद्वेदनविषयो विधिः कल्प्यते । उद्गीथविद्यायाः क्रत्वर्थत्वेन क्रतुसाद्गुण्यफलत्वेप्यार्थवादिकमपि फलं तदविरुद्धं ग्राह्यमेवेति देवताधिकरणे (ब्र. सू. १।३।२५) प्रतिपादितम्।

तत्र संशय्यते किमत्र विद्यैक्यमुत नेति । किं युक्तम् । विद्यैक्यमिति । कुतः । उभयत्रोद्गीथस्यैवाध्यस्तप्राणभावस्योपास्यत्वश्रवणाच्चोदनाद्यविशेषात् । फलसंयोगस्तावच्छत्रुपरिभवरूपो न विशिष्यते । रूपमप्यध्यस्तप्राणभावोद्गीथाख्योपास्यैक्यादविशि-

2. C. reads विध्वसनम् for विध्वंसम्.

8. B. reads एतान् for एनान्.

10. B. E. om. ह after अथ; E. reads मुख्य for मुख्यः.

12. A. B. read ह वै for हैव.

16. C. reads क्रत्वर्थत्वे for क्रत्वर्थत्वेन; B. reads विरुद्धम् for अविरुद्धम्.

http://acharya.org

ष्टम्। चोदना च विद्धात्वर्थगताविशिष्टा। आख्या चोद्गीथविधेयत्वविशिष्टा। अत्र राद्धान्तिच्छायया परिचोद्य परिहरत्यन्यथात्वं शब्दादिति चेन्नाविशेषादिति। यदुक्तं विद्यैक्यमिति तन्नोपपद्यते। रूपभेदात्। रूपान्यथात्वं हि शब्दादेव प्रतीयते। वाजसनेयके ह्यथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति। तथेति तेभ्य एष प्राण उदगायत् (बृ. १।३।७) इत्युद्गानस्य कर्तरि प्राणदृष्ट्यासुरपराभवमुक्त्वा य एवं वेद (बृ. १।३।७) इति कर्तर्येव प्राणदृष्टिरेवंशब्दादवगम्यते। छान्दोग्येथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासांचक्रिरे (छा. १।२।७) इत्युद्गानस्य कर्मण्युद्गीथे प्राणदृष्ट्यासुरपराभवमुक्त्वा य एवंविदि पापं कामयते (छा. १।२।८) इत्येवंशब्दात्कर्मण्येवोद्गीथे प्राणदृष्टिर्विहिता। अत एकत्र कर्तरि प्राणदृष्टिशब्दादन्यत्र कर्मणि प्राणदृष्टिशब्दाच्च रूपान्यथात्वं स्पष्टम्। रूपान्यथात्वे च विधेयभेदे सति केवलचोदनाद्यविशेषोकिंचित्कर इति विद्याभेद इति चेत्तन्न। अविशेषात्। अविशेषेण ह्युभयत्रोद्गीथसाधनकः परपरिभव उपक्रमे प्रतीयते। वाजसनेयके ते ह देवा ऊचुर्हन्तासुरान्यज्ञ उद्गीथेनात्ययाम (बृ. १।३।१) इत्युपक्रमे श्रूयते। छान्दोग्येपि तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिहनिष्याम: (छा. १।२।१) इति। अत उपक्रमाविरोधाय तेभ्य एष प्राण उदगायत् (बृ. १।३।७)

---

2. A. B. read राद्धान्त for राद्धान्ति.

7. B reads उद्गायनस्य for उद्गानस्य.

9. C. om ह after अथ; B. om. प्राणः.

16. E. reads साधनक for साधनकः; C. reads परिभवरूपः for परिभवः.

18 A. B. om. अपि after छान्दोग्ये.

19. C. reads एतान् for एनान्.

http://acharya.org

इत्यध्यस्तप्राणभाव उद्गीथ उद्गानकर्मभूत एव पाकादिष्वोदनादिवत्सौकर्यातिशयविवक्षया कर्तृत्वेनोच्यते । अन्यथोपक्रमगत उद्गीथशब्दः कर्तरि लाक्षणिकः स्यात् । अतो विद्यैक्यम् ॥ ६ ॥

इति प्राप्ते प्रचक्ष्महे ।

न वा प्रकरणभेदात्परोवरीयस्त्वादिवत् ॥ ७ ॥

न वेति पक्षं व्यावर्तयति । न चैतदस्ति यद्विद्यैक्यमिति । कुतः । प्रकरणभेदात् । ओमित्येतदक्षरमुद्गीथमुपासीत (छा. १।१।१) इति प्रकृतमुद्गीथावयवभूतं प्रणवं प्रस्तुत्यैतस्यैवाक्षरस्योपव्याख्यानं भवति । देवासुरा ह वै यत्र संयेतिरे (छा. १।१।१०—१।२।१) इत्यारभ्याथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासांचक्रिरे (छा. १।२।७) इत्युद्गीथावयवभूतप्रणवविषयमुपासनं छन्दोगा अधीयते । वाजिनस्तु तादृशप्राचीनप्रकरणाभावाद्धन्तासुरान्यज्ञ उद्गीथेनात्ययाम (बृ. १।३।१) इति कृत्स्नमुद्गीथं प्रस्तुत्याथ हेममासन्यं प्राणमूचुस्त्वं न उद्गाय (बृ. १।३।७) इत्यादि कृत्स्नोद्गीथविषयमधीयते । अतः प्रकरणभेदेन विधेयभेदः । विधेयभेदे च रूपभेद इति न विद्यैक्यम् ।

किं चाथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासांचक्रिरे (छा. १।२।७) इति पूर्वप्रकृतोद्गीथावयवभूतः प्रणव एवाध्यस्तप्राणभावश्छन्दोगानामुपास्यः । वाजिनां तु कृत्स्नस्यो-

---

3. C. reads गत for गतः.

9. A. B. read अवयवम् for अवयवभूतम्; A. E. read वा for एव after एतस्य.

17. C. reads विधेयभेदेन for विधेयभेदे.

http://acharya.org

द्गीथस्य कर्तोद्गाता प्राणदृष्ट्योपास्य इति । अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति । तथेति तेभ्य एष प्राण उदगायत् (बृ. १।३।७) इत्युद्गातरि प्राणाध्यासं निर्दिश्य य एवं वेद (बृ. १।३।७) इत्युद्गातैवाध्यस्तप्राणभाव उपास्यो विधीयते । अतश्च रूपभेदः । न चोद्गातर्युपास्ये विहित उद्गीथेनात्ययाम (बृ. १।३।१) इत्याख्यायिकोपक्रमविरोधः शङ्कनीयः । उद्गातुरुपासन उद्गीथस्योद्गानकर्मभूतस्यावश्यापेक्षितत्वात्तस्यापि परपरिभवाख्यं फलं प्रति हेतुत्वात् । अतो रूपभेदाद्विद्याभेद इति चोदनाविशेषेपि न विद्यैक्यम् ।

परोवरीयस्त्वादिवत् । यथैकस्यामेव शाखायामुद्गीथावयवभूते प्रणवे परमात्मदृष्टिविधानसाम्येपि हिरण्मयपुरुषदृष्टिविधानात्परोवरीयस्त्वादिगुणविशिष्टदृष्टिविधानमर्थान्तरभूतम् ॥ ७ ॥

संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ॥ ८ ॥

उद्गीथविद्येति संज्ञैक्यात्तद्विद्यैक्यमुक्तं चेत्तत्संज्ञैक्यं विधेयभेदेप्यस्त्येव । यथाग्निहोत्रसंज्ञा नित्याग्निहोत्रे कुण्डपायिनामयनाग्निहोत्रे च । यथा चोद्गीथविद्येति च्छान्दोग्ये प्रथमप्रपाठकोदितासु बह्वीषु विद्यासु ॥ ८ ॥

व्याप्तेश्च समञ्जसम् ॥ ९ ॥

छान्दोग्ये प्रथमप्रपाठक उत्तरास्वपि विद्यासूद्गीथावयवस्य प्रणवस्य प्रथमप्रस्तुतस्योपास्यत्वेन व्याप्तेश्च तन्मध्यगतस्य तद्ध देवा उद्गीथमाजह्रुः (छा. १।२।१) इत्युद्गीथशब्दस्य प्रणवविषयत्वमेव समञ्जसम् । अवयवे च समुदायशब्दः पटो दग्ध

---

9. E. reads आदि after चोदना.

10. C. reads यदेकस्यामेव for यथैकस्यामेव.

16. A. B. om. अयन before अग्निहोत्रे.

http://acharya.org

इत्यादिषु दृश्यते । अतश्चोद्गीथावयवभूतः प्रणव एवोद्गीथशब्द-निर्दिष्ट इति स एव प्राणदृष्ट्योपास्यश्छान्दोग्ये प्रतिपत्तव्यः । वाजसनेयके तु कृत्स्नोद्गीथविषय उद्गीथशब्द इति कृत्स्नोद्गीथस्य कर्तोद्गाता प्राणदृष्ट्योपास्य इति विद्यानानात्वं सिद्धम् ॥ ९ ॥

अन्यथात्वाधिकरणं समाप्तम् । (२)

सर्वाभेदादन्यत्रेमे ॥ १० ॥

छान्दोग्यवाजसनेयकयोः प्राणविद्याम्नायते यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च ह वै श्रेष्ठश्च भवति प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च (छा. ५।१।१, बृ. ६।१।१) इत्यादि । तत्र ज्यैष्ठ्य-श्रैष्ठ्यगुणकं प्राणमुपास्यं प्रतिपाद्य वाक्चक्षुःश्रोत्रमनःसु व-सिष्ठत्वप्रतिष्ठात्वसंपत्त्यायतनत्वाख्यान्गुणान्प्रतिपाद्य वागादीनां देहस्य च प्राणायत्तस्थितित्वेन तदायत्ततत्तत्कार्यत्वेन च प्राणस्य श्रैष्ठ्यं प्रतिपाद्य वागादिसंबन्धितया श्रुतान्वसिष्ठत्वादीन्गुणांश्च प्राणसंबन्धितया प्रतिपादयति । एवं छान्दोग्यवाजसनेयकयोर्ज्यै-ष्ठ्यश्रैष्ठ्यगुणको वसिष्ठत्वादिगुणकश्च प्राण उपास्यः प्रतिपाद्यते । कौषीतकिनां तु प्राणविद्यायां (कौ. २।१४) तथैव ज्यैष्ठ्य-श्रैष्ठ्यगुणकः प्राण उपास्यः प्रतिपादितः । न पुनर्वसिष्ठत्वादयो वागादिसंबन्धिनो गुणाः प्राणसंबन्धितया प्रतिपादिताः ।

तत्र संशयः । किमत्र विद्या भिद्यत उत नेति । किं युक्तम् । भिद्यत इति । कुतः । रूपभेदात् । यद्यप्युभयत्र प्राण एव

8 E. reads ह after प्राणः.

10. B. reads वशिष्ठत्व for वसिष्ठत्व.

12. C. om. च before प्राणस्य

13. B. reads वशिष्ठत्व for वसिष्ठत्व.

15. A. B. E. read श्रैष्ठ्यजैष्ठ्य for ज्यैष्ठ्यश्रैष्ठ्य.

17. B. reads वशिष्ठ for वसिष्ठ; B. reads वा after वसिष्ठत्वादयः.

http://acharya.org

ज्यैष्ठ्यश्रैष्ठ्यगुणक उपास्यः प्रतीयते तथाप्येकत्र वसिष्ठत्वादिभिरपि गुणैर्युक्तः प्राण उपास्यः प्रतीयत इतरत्र तु तद्विधुर इत्युपास्यरूपभेदाद्विद्याभेद इति प्राप्ते ब्रूमः।

सर्वाभेदादन्यत्रेमे। नात्र विद्याभेदः। अन्यत्र कौषीतकिनां प्राणविद्यायामपीमे वसिष्ठत्वादयो गुणा उपास्याः सन्ति। कुतः। सर्वाभेदात्। प्रतिज्ञातप्राणज्यैष्ठ्यश्रैष्ठ्योपपादनप्रकारस्य सर्वस्य तत्राप्यभेदात्।

तथा हि च्छन्दोगवाजसनेयिनां प्राणविद्यायामेता ह वै देवता अहंश्रेयसि व्यूदिरे (छा. ५।१।६)। अहंश्रेयसे विवदमानाः (बृ. ६।१।७) इति चोपक्रम्य वागाद्येकैकापक्रमणेन्येषां सप्राणानामिन्द्रियाणां शरीरस्य च स्थितिं तत्तत्कार्यं चाविकलं प्रतिपाद्य प्राणोत्क्रमणे सर्वेषां विशरणमकार्यकरत्वं चाभिधाय सर्वेषां प्राणाधीनस्थितित्वतदधीनकार्यत्वाभ्यां प्राणस्य ज्यैष्ठ्यमुपपादितम्। एवमुपपादितं वागादिकार्यस्य प्राणाधीनत्वमथ हैनं वागुवाच यदहं वसिष्ठास्मि त्वं तद्वसिष्ठोसि (छा. ५।१।१३, बृ. ६।१।१४) इत्यादिना वागादिभिरनूद्यते। कौषीतकिनां प्राणविद्यायामपि प्राणज्यैष्ठ्यश्रैष्ठ्यप्रतिपादनाय वागादिषु वसिष्ठत्वादयः प्रतिपादिताः। अथ हेमा देवताः प्रजापतिं पितरमेत्याब्रुवन्को वै नः श्रेष्ठ इत्यादिना वागादिगता गुणा वागादयश्च देहश्च प्राणाधीन इति प्राणस्य ज्यैष्ठ्य-

---

1. A. B. read तथा before प्रतीयते.

2. A. B. om. तु after इतरत्र.

9. E. reads अहंश्रेयसे for अहंश्रेयसि.

11. C. om. तत् after तत्.

15. C. reads तावत् for तत्; B. reads वशिष्ठः for वसिष्ठः.

18. B. reads वशिष्ठ for वसिष्ठ.

20. A. B. read प्राणाधीनाः for देहश्च प्राणाधीनः.

http://acharya.org

मुपपादितम् । वागादिभिः स्वस्वगुणानां वसिष्ठत्वादीनां प्राणाधीनत्वानुवादमात्रं तु न कृतम् । नैतावता रूपभेदः । वागादीनां वसिष्ठत्वादिगुणान्वितानां प्राणाधीनकार्यत्वोपपादनेनैव प्राणस्य वागादिवसिष्ठत्वादिगुणहेतुत्वस्य सिद्धत्वात् । तदेव हि प्राणस्य वसिष्ठत्वादिगुणयोगित्वं यद्वागादिवसिष्ठत्वादिहेतुत्वम् । अतोत्रापि वसिष्ठत्वादिगुणयोगात्प्राणो ज्येष्ठः प्रतिपन्न इति नास्ति विद्याभेदः । प्राणविद्याङ्गविषयमन्यदपि निरूपणमनन्तरमेव करिष्यते ॥ १० ॥ सर्वाभेदाधिकरणं समाप्तम् । (३)

यथा प्राणस्य वसिष्ठत्वाद्यनुसंधानेन विना ज्यैष्ठ्यश्रैष्ठ्यानुसंधानानुपपत्तेरनुक्तानामपि वसिष्ठत्वादीनां कौषीतकिप्राणविद्यायां प्राप्तिस्तथा ब्रह्मस्वरूपानुसंधानं यैर्गुणैर्विना नोपपद्यते ते ब्रह्मविद्यासु सर्वास्वनुसंधेया इत्ययमर्थः प्रतिपाद्यते ।

आनन्दादयः प्रधानस्य ॥ ११ ॥

अत्र ब्रह्मस्वरूपगुणानां सर्वासु परविद्यासूपसंहारोस्ति नेति विचार्यते । अप्रकरणाधीतानामुपसंहारे प्रमाणाभावात्प्रकरणश्रुतानामेवोपसंहार इत्येवं प्राप्ते ब्रूमः ।

आनन्दादयः प्रधानस्य । अभेदादिति वर्तते । प्रधानस्य गुणिनो ब्रह्मणः सर्वेषूपासनेष्वभेदाद्गुण्यपृथक्भावाद्गुणानां सर्वेष्वानन्दादयस्तद्गुणा उपसंहर्तव्याः ॥ ११ ॥

---

1. C. om. स्व after स्व; B. reads वशिष्ठ for वसिष्ठ.
3. B. reads वशिष्ठ for वसिष्ठ.
4. B. reads वशिष्ठ for वसिष्ठ; B. om. हि after तदेव.
5. B. reads वशिष्ठ for वसिष्ठ; E. reads गुणयोगित्वम् after वसिष्ठत्वादिहेतुत्वम्.
6. B. reads वशिष्ठ for वसिष्ठ.

एवं तर्हि गुण्यपृथग्भावादेवानन्दादिवत्प्रियशिरस्त्वाद्योपि तस्य प्रियमेव शिरः (तै. २।५) इत्यादौ ब्रह्मगुणत्वेन श्रुताः सर्वत्र प्रसज्येरन् । नेत्याह ।

प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥ १२ ॥

ब्रह्मस्वरूपगुणानां प्राप्तावुच्यमानायां प्रियशिरस्त्वादीनामप्राप्तिः । तेषामब्रह्मगुणत्वात् । ब्रह्मणः पुरुषविधत्वरूपणमात्रान्तर्गतत्वात्प्रियशिरस्त्वादीनाम् । अन्यथा शिरःपक्षपुच्छाद्यवयवभेदे सति ब्रह्मणोऽप्युपचयापचयौ प्रसज्येयाताम् । तथा च सति सत्यं ज्ञानमनन्तं ब्रह्म (तै. २।१) इत्यादि विरुध्यते॥१२॥

नन्वेवमेव ब्रह्मसंबन्धिनामेवैश्वर्यगाम्भीर्यौदार्यकारुण्यादीनां गुणानामनन्तानां गुण्यपृथक्स्थितित्वमात्रेण तत्राश्रुतानामप्युपसंहारे सति सर्वे सर्वत्र प्रसज्येरन । आनन्त्यादुपसंहाराशक्तिश्च । तत्राह ।

इतरे त्वर्थसामान्यात् ॥ १३ ॥

तुशब्दश्चोद्यं व्यावर्तयति । इतरे त्वानन्दादयोर्थसामान्यात्सर्वत्रानुवर्तन्ते । ये त्वर्थसमाना अर्थस्वरूपनिरूपणधर्मत्वेनार्थप्रतीत्यनुबन्धिनस्तेर्थस्वरूपवत्सर्वत्रानुवर्तन्ते । ते च गुणाः सत्यज्ञानानन्दामलत्वादयः । यतो वा इमानि (तै. ३।१) इत्यादिना जगत्कारणतयोपलक्षितं ब्रह्म सत्यं ज्ञानमनन्तं ब्रह्म

---

3. C reads आनन्त्यादुपसंहाराशक्तिश्च तत्राह for नेत्याह.
8. A. B read हि for अपि after ब्रह्मणः.
10. A B om. औदार्य.
11. C. E. read स्थितत्व for स्थितित्व.
16. A. B. om. तु after ये.
17. A. B read च after अनुबन्धिन..
18. A. B. read अनन्तत्व after अमलत्व.

http://acharya.org

(तै. २।१)। आनन्दो ब्रह्म (तै. ३।६) इत्यानन्दादिभिर्हि स्वरूपतो निरूप्यते। अत उपास्यब्रह्मस्वरूपावगमाय सर्वासु विद्यास्वानन्दादयोनुवर्तन्ते। ये तु निरूपितस्वरूपस्य ब्रह्मणः कारुण्यादयो गुणाः प्रतिपन्नास्तेषां गुण्यपृथक्स्थितित्वेपि प्रतीत्यनुबन्धित्वाभावाद्ये यत्र श्रुतास्ते तत्रोपसंहार्या इति निरवद्यम्॥ १३॥

यद्युपचयापचयप्रसङ्गात्प्रियशिरस्त्वादयो ब्रह्मणः पुरुषविधत्वनिरूपणमात्रार्था न तु ब्रह्मगुणास्तर्ह्यतथारूपस्य ब्रह्मणस्तथात्वेन रूपणं किमर्थं क्रियते। अतथाभूतस्य हि तथात्वरूपणे केनचित्प्रयोजनेन भवितव्यम्। यथात्मानं रथिनं विद्धि (का. ३।३) इत्यादिनोपासकस्य तदुपकरणानां च रथिरथादित्वरूपणमुपासनोपकरणभूतशरीरेन्द्रियादिवशीकरणार्थं क्रियत इत्युक्तम्। न चेह तथाविधं किंचित्प्रयोजनं दृश्यत इति बलाद्ब्रह्मगुणत्वं प्रियशिरस्त्वादीनामभ्युपेत्यम्। तत्राह।

आध्यानाय प्रयोजनाभावात्॥ १४॥

प्रयोजनान्तराभावादाध्यानायायं रूपणोपदेशः क्रियते। आध्यानमनुचिन्तनमुपासनमुच्यते। ब्रह्मविदाप्नोति परम् (तै. २।१) इत्यत्रोपदिष्टाध्यानरूपवेदनसिद्धये ह्यानन्दमयब्रह्मप्रतिपत्त्यर्थमानन्दमयं ब्रह्म प्रियमोदादिरूपेण विभज्य शिरःपक्षादित्वेन रूपयित्वोपदिश्यते। यथान्नमयः पुरुषोयं देहः शिरःपक्षादिभिस्तस्येदमेव शिरः (तै. २।१) इत्यादिना बुद्धा-

---

2. C. reads अपि aftei सर्वासु.

7. B. C. E. read अपि after यदि.

8. A. B. om. त्ति before रूपण, A. B. read तथाभूतस्य for तथारूपस्य.

21. E. reads पुच्छ after पक्ष.

http://acharya.org

वारोप्यते यथा च प्राणमयमनोमयविज्ञानमयात्मस्य प्राण एव शिरः (तै. २।२) इत्यादिना प्राणाद्यवयवैर्बुद्धावारोप्यन्त एवमेवैभ्योर्थान्तरभूतस्तदन्तरात्मानन्दमयोपि प्रियमोदादिभिरेकदेशैः शिरःप्रभृतित्वेन रूपितैराध्यानाय बुद्धावारोप्यते । एवमानन्दमयोपलक्षणत्वात्प्रियशिरस्त्वादीनां न सर्वदानन्दमयप्रतीतावनुवर्तन्ते ॥ १४ ॥

आत्मशब्दाच्च ॥ १५ ॥

अन्योन्तर आत्मानन्दमयः (तै. २।५) इत्यात्मशब्देन निर्देशादात्मनश्च शिरःपक्षपुच्छासंभवात्प्रियशिरस्त्वादयस्तस्य सुखप्रतिपत्त्यर्थं रूपणमात्रमिति गम्यते ॥ १५ ॥

नन्वन्योन्तर आत्मा प्राणमयः (तै. २।२)। अन्योन्तर आत्मा मनोमयः (तै. २।३) इत्यात्मशब्दस्यानात्मस्वपि पूर्वं प्रयुक्तत्वादन्योन्तर आत्मानन्दमयः (तै. २।५) इत्यात्मशब्दस्यात्मविषयत्वं कथं निश्चीयते । तत्राह ।

आत्मगृहीतिरितरवदुत्तरात् ॥ १६ ॥

अन्योन्तर आत्मानन्दमयः (तै. २।५) इत्यत्रात्मशब्देन परमात्मन एव ग्रहणम् । इतरवत् । यथेतरत्रात्मा वा इदमेक एवाग्र आसीत्।...स ऐक्षत लोकान्नु सृजै (ऐ. १।१) इत्यादिष्वात्मशब्देन परमात्मन एव ग्रहणं तद्वत् । कुत एतत् । उत्तरात् । सोकामयत बहु स्यां प्रजायेय (तै. २।६) इत्यानन्दमयविषयादुत्तराद्वाक्यात् ॥ १६ ॥

अन्वयादिति चेत्स्यादवधारणात् ॥ १७ ॥

पूर्वत्र प्राणमयादिष्वनात्मस्वात्मशब्दान्वयदर्शनान्नोत्तरान्नि-

http://acharya.org

श्चेतुं शक्यत इति चेत्स्यादवधारणात् । स्यादेव निश्चयः । कुतः । अवधारणात् । पूर्वत्रापि तस्माद्वा एतस्मादात्मन आकाशः संभूतः (तै. २।१) इति परमात्मन एव बुद्ध्यावधारितत्वादन्नमयादन्तरे प्राणमये प्रथमं परमात्मबुद्धिरवतीर्णा । तदनन्तरं च प्राणमयादन्तरे मनोमये । ततो विज्ञानमये । तत आनन्दमये प्रक्रान्ता परमात्मबुद्धिस्तदन्तराभावादुत्तराच्च सोकामयत (तै. २।६) इति वाक्यात्प्रतिष्ठितेत्युपक्रमेप्यपरमात्मनि परमात्मबुद्ध्यात्मशब्दान्वय इति निरवद्यम् ॥ १७ ॥

आनन्दाद्यधिकरणं समाप्तम्। (४)

कार्याख्यानादपूर्वम् ॥ १८ ॥

पूर्वप्रस्तुतप्राणविद्याशेषभूतमिदानीं चिन्त्यते । छान्दोग्यवाजसनेयकयोर्ज्येष्ठं श्रेष्ठं च प्राणमुपास्यमुक्त्वा प्राणस्य वासस्त्वेनापोभिधीयन्ते । छान्दोग्ये तावत्स होवाच किं मे वासो भविष्यतीत्याप इति होचुस्तस्माद्वा एतदशिष्यन्तः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधति लम्भुको ह वासो भवत्यनग्नो भवति (छा. ५।२।२) इति । वाजसनेयके किं मे वासः (बृ. ६।१।१४) इति प्राणेन पृष्टा वागादय ऊचुरापो वासः (बृ. ६।१।१४) इति । तद्विद्वांसः श्रोत्रिया अशिष्यन्त आचामन्त्यशित्वा चाचामन्ति । एतमेव तदनमनग्नं कुर्वन्तो मन्यन्ते (बृ. ६।१।१४)। तस्मादेवंविदशिष्यन्नाचामेदशित्वा चाचामेदेतमेव

---

1. E. reads शक्यः for शक्यते.
4. B. reads अनन्तरे, C. reads उत्तरे for अन्तरे.
5. B reads अन्तन्तरे for अन्तरे.
17. E. reads दृष्टाः for पृष्टाः
19. C. reads एतत् for एतमेव तत्.
20. A. reads वा for च after अशित्वा; E. reads एतदेव for एतमेव.

तदनमनग्नं कुरुते (श. ब्रा. १४।९।२।१५) इति। तत्र संशयः। किमत्राचमनं विधीयत उतापां प्राणवासस्त्वानुसंधानमिति। अशिष्यन्नाचामेदशित्वा चाचामेदित्याचमने विधिप्रत्ययश्रवणादेतमेव तदनमनग्नं कुरुत इति वेदने विधिप्रत्ययाभावादनग्नतासंकीर्तनस्य स्तुत्यर्थतयान्वयोपपत्तेश्च भोजनाङ्गस्याचमनस्य स्मृत्याचारप्राप्तत्वेन विधिप्रत्ययबलात्प्राणविद्याङ्गमाचमनान्तरं विधीयत इति प्राप्ते ब्रूमः।

आचमनीयानामपां प्राणस्य वासस्त्वानुसंधानमेवेहापूर्वमप्राप्तं विधीयते। कार्याख्यानात्। अप्राप्ताख्यानात्। अप्राप्ताख्याने शास्त्रस्यार्थवत्त्वादित्यर्थः। एतदुक्तं भवति। किं मे वासः। आपो वासः (छा. ५।२।२, बृ. ६।१।१४)। अद्भिः परिदधति (छा. ५।२।२)। एतमेव तदनमनग्नं कुरुते (श. ब्रा. १४।९।२।१५) इत्युपक्रमोपसंहारयोर्वाक्यस्यापां प्राणवासोदृष्टिपरत्वप्रतीतेराचमनस्य स्मृत्याचारप्राप्तत्वादाचमनमनूद्याचमनीयास्वप्सु प्राणवासस्त्वानुसंधानं विधीयत इति। अत एव च्छान्दोग्ये तस्माद्वा एतदशिष्यन्तः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधति (छा. ५। २।२) इत्यद्भिः परिधानमेवोक्तं नाचमनम्॥ १८॥ कार्याख्यानाधिकरणं समाप्तम्। (५)

समान एवं चाभेदात्॥ १९॥

वाजसनेयकेग्निरहस्ये शाण्डिल्यविद्याम्नाता। सत्यं ब्रह्मेत्युपासीत। अथ खलु क्रतुमयोयं पुरुषः (श. ब्रा. १०।६।३।१) इत्यारभ्य स आत्मानमुपासीत मनोमयं प्राणशरीरं भारूपं सत्यसंकल्पमाकाशात्मानम् (श. ब्रा. १०।६।३।२) इति। तथा

---

5. C. reads अन्यथा for अन्वय.
10. A. B. read शब्दस्य for शास्त्रस्य.
12. E. reads एतदेव for एतमेव
21. C reads उपक्रम्य for उपासीत.

http://acharya.org

तस्मिन्नेव बृहदारण्यके पुनरपि शाण्डिल्यविद्याम्नायते । मनोमयोयं पुरुषो भाः सत्यं तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा स एष सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किं च (बृ. ५।६।१) इति। तत्र संशयः। किमत्र विद्या भिद्यत उत नेति । संयोगचोदनाख्यानामविशेषेपि वशित्वाद्युपास्यगुणभेदेन रूपभेदाद्विद्याभेद इति प्राप्त उच्यते समान एवमिति । यथाग्निरहस्ये मनोमयप्राणशरीरभारूपसत्यसंकल्पत्वादिगुणगणः श्रुत एवं बृहदारण्यकेपि मनोमयत्वादिके समाने सत्यधिकस्य वशित्वादेश्च सत्यसंकल्पत्वगुणाभेदान्न रूपभेदः । अतो विद्यैक्यम् ॥ १९ ॥ समानाधिकरणं समाप्तम् । (६)

संबन्धादेवमन्यत्रापि ॥ २० ॥

बृहदारण्यके श्रूयते । सत्यं ब्रह्म (बृ. ५।५।१) इत्युपक्रम्य तद्यत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेक्षन् (बृ. ५।५।२) इत्युपक्रम्यादित्यमण्डलेक्षणि च सत्यस्य ब्रह्मणो व्याहृतिशरीरत्वेनोपास्यत्वमुक्त्वा तस्योपनिषदहः (बृ. ५।५।३) इत्यधिदैवतं तस्योपनिषदहम् (बृ.५।५।४) इत्यध्यात्ममिति द्वे उपनिषदौ रहस्यनामनी उपासनशेषतयाम्नायेते । ते किं यथाश्रुतस्थानविशेषनियतत्वेन व्यवस्थिते उतोभयत्रोभे अनियमेनेति संशये सत्यस्य व्याहृतिशरीरस्यैवोपास्यस्य ब्रह्मणो द्वयोः स्थानयोः संबन्धादुपास्यैक्येन रूपाभेदात्संयोगाद्यभेदाच्च विद्यैक्यादनियमेनेति प्राप्तम्। तदिदमुच्यते सं-

---

2. A. B. read सर्षपो वा श्यामाको वा after यवो वा.

7. E. reads मनोमयः प्राणशरीरो भारूपः for मनोमयप्राणशरीरभारूप; A. B. read भारूपप्राणशरीर for प्राणशरीरभारूप.

14. E. reads अक्षिन् for अक्षन्; C. E. read अक्षिणि for अक्षणि.

http://acharya.org

बन्धादेवमन्यत्रापीति । यथा मनोमयत्वादिगुणविशिष्टस्यैक्यादुपास्यैक्येन रूपाभेदाद्विद्यैक्याद्गुणोपसंहार एवमन्यत्राक्ष्यादित्यसंबन्धिनो ब्रह्मणः सत्यस्यैकत्वेन विद्यैक्यादुभयोरुभयत्रोपसंहार इति ॥ २० ॥

एवं प्राप्ते प्रचक्ष्महे ।

न वा विशेषात् ॥ २१ ॥

न वैतदस्ति यद्विद्यैक्यादुपसंहार इति । कुतः । विशेषात् । उपास्यरूपविशेषात् । ब्रह्मण एकत्वेप्येकत्रादित्यमण्डलस्थतयोपास्यत्वमितरत्राक्ष्याधारतयोपास्यत्वमिति स्थानसंबन्धित्वभेदेन रूपभेदाद्विद्याभेदः । नैवं शाण्डिल्यविद्याया उपास्यस्थानं भिद्यते । उभयत्र हृदयाधारत्वेनोपास्यत्वात् । अतो व्यवस्थिते इति ॥ २१ ॥

दर्शयति च ॥ २२ ॥

दर्शयति चाक्ष्याधारादित्याधारयोर्गुणानुपसंहारं तस्यैतस्य तदेव रूपं यदमुष्य रूपम् (छा. १।७।५) इत्यादिना रूपाद्यतिदेशेन । स्वतो ह्यप्राप्तावतिदेशेन प्राप्त्यपेक्षा ॥ २२ ॥ संबन्धाधिकरणं समाप्तम् । (७)

संभृतिद्युव्याप्त्यपि चातः ॥ २३ ॥

तैत्तिरीयके राणायनीयानां खिलेषु च

---

1 A C. read एकत्वात् for ऐक्यात्; B. reads ऐक्येन रूपाभावात् for ऐक्यादुपास्यैक्येन रूपाभेदात्.

2. C. om. रूपाभेदात्.

3. C. reads विध्यैक्यात् for विद्यैक्यात्, A. B. om. उभयोः.

7. C. om. वा after न, E. reads च for वा.

19 C. E. read नारायणीयानाम् for राणायनीयानाम्.

http://acharya.org

ब्रह्म ज्येष्ठा वीर्या संभृतानि ब्रह्माग्रे ज्येष्ठं दिवमाततान ।
ब्रह्म भूतानां प्रथमोथ जज्ञे तेनार्हति ब्रह्मणा स्पर्धितुं कः ॥
(तै. ब्रा. २।४।६, अथर्वसं. १९।२२।२१)

इति ब्रह्मणि ज्येष्ठानां वीर्याणां संभृतिर्द्युव्याप्तिश्चेत्यादिगुणजातमाम्नातम् । तेषामुपासनविशेषमनारभ्याधीतानां गुणानां सर्वासु विद्यासूपसंहारे प्राप्त उच्यते संभृतिद्युव्याप्त्यपीति । संभृतिद्युव्याप्तीति समाहारद्वंद्वत्वादेकवद्भावः । संभृत्यादिकमनारभ्याधीतमप्यत एव स्थानभेदाद्व्यवस्थाप्यं न सर्वत्रोपसंहर्तव्यम् । कथमनारभ्याधीतानां स्थानविशेषनियतत्वम् । स्वसामर्थ्यादिति ब्रूमः । द्युव्याप्तिस्तावद्धृदयाद्यल्पस्थानगोचरासु विद्यासु नोपसंहर्तुं शक्या । संभृत्यादयोपि तत्सहचारिणस्तत्तुल्यदेशा इत्यल्पस्थानविषयासु विद्यास्वनुपसंहार्याः । शाण्डिल्यदहरादिविद्यास्वल्पस्थानविषयासु ज्यायान्पृथिव्याः (छा. ३।१४।३) । यावान्वायमाकाशस्तावानेषोन्तर्हृदय आकाशः (छा. ८।१।३) इत्यादयस्तत्र तत्राशक्योपसंहारा मनोमयत्वापहतपाप्मत्वादिविशिष्टस्योपास्यस्य माहात्म्यप्रतिपादनपराः ॥ २३ ॥ संभृत्यधिकरणं समाप्तम् । (८)

पुरुषविद्यायामपि चेतरेषामनाम्नानात् ॥ २४ ॥

तैत्तिरीयके पुरुषविद्याम्नायते तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिः (ना. ८०) इत्यादिका । छान्दोग्येपि पुरुषविद्याम्नायते पुरुषो वाव यज्ञस्तस्य यानि चतुर्विंशतिवर्षाणि (छा. ३।१६।१) इत्यादिका । तत्र संशयः । किमत्र विद्या भिद्यत उत नेति । पुरुषविद्येति नामैक्यात्पुरुषावयवेषु यज्ञावयवकल्पनसाम्येन रूपैक्यात्तैत्तिरीयके फलसंयोगाश्रवणात्प्राह षोडशं वर्षशतं जी-

25. E. reads प्र ह for प्राह.

http://acharya.org

वति (छा. ३।१६।७) इति च्छान्दोग्ये श्रुतस्यैव पुरुषविद्याफलत्वात्फलसंयोगस्याप्यविशेषाद्विद्यैक्यमिति प्राप्त उच्यते ।

उभयत्राम्नातयोर्विद्ययोः पुरुषविद्यात्वेपि विद्याभेदोस्त्येव । कुतः । इतरेषामनाम्नानात् । एकस्यां शाखायामाम्नातानां गुणानामन्यत्रानाम्नानात् । तथा हि यत्सायं प्रातर्मध्यंदिनं च तानि सवनानि (ना. ८०) इत्यादयस्तैत्तिरीयक आम्नाताश्छान्दोग्ये सवनत्वेन नाम्नायन्ते । त्रेधा विभक्तं पुरुषायुषं छान्दोग्ये सवनत्वेन कल्प्यते । छान्दोग्ये (छा. ३।१७।१) श्रुतानामशिशिषादीनां दीक्षादित्वकल्पनं तैत्तिरीयके न कृतम् । यजमानपत्न्यादिपरिकल्पनं चान्यथा । अतो रूपमुभयत्र भिद्यते । तथा फलसंयोगोपि भिद्यते । तैत्तिरीयके हि पूर्वानुवाके ब्रह्मणे त्वा महस ओमित्यात्मानं युञ्जीत (ना. ७९) इति ब्रह्मविद्यामभिधाय तत्फलत्वेन ब्रह्मणो महिमानमाप्नोति (ना. ७९) इत्युक्त्वा तस्यैवं विदुषः (ना. ८०) इत्यादिनाम्नाता पुरुषविद्या तस्यैव ब्रह्मविदुषो यज्ञत्वकल्पनमिति गम्यते । अतो ब्रह्मविद्याङ्गत्वाद्ब्रह्मप्राप्तिरेवात्र फलम् । फलवत्संनिधावफलं तदङ्गमिति च न्यायात्तैत्तिरीयकाम्नाता पुरुषविद्या ब्रह्मविद्याङ्गमिति गम्यते । छान्दोग्ये त्वायुष्प्राप्तिफला पुरुषविद्येत्युक्तम् । अतो रूपफलसंयोगयोर्भेदाद्विद्याभेद इत्येकत्राम्नातानां गुणानामितरत्रानुपसंहारः ॥ २४ ॥ पुरुषविद्याधिकरणं समाप्तम् । (९)

---

8. B. om. छान्दोग्ये श्रुताना०....रूपमुभयत्र भिद्यते; E. reads आशिशिषा for अशिशिषा; A. om. त्व after दीक्षादि.
10. C. reads अन्यथा after अन्यथा.
14. E. reads अस्यैव for तस्यैव.
16. A. B. om. च after तदङ्गमिति.
17. C. reads तथैवात्राप्याम्नायते ब्रह्मणो महिमानमाप्नोतीति after गम्यते.
18. A. E. read आयुःप्राप्ति for आयुष्प्राप्ति; A. om. फल after रूप.
19. E. reads एकत्र for इतरत्र.

http://acharya.org

वेधाद्यर्थभेदात्॥ २५॥

आथर्वणिका उपनिषदारम्भे शुक्रं प्रविध्य हृदयं प्रविध्येत्यादीन्मन्त्रानधीयते। सामगाश्च रहस्यब्राह्मणारम्भे देव सवितः प्रसुव यज्ञं प्रसुव (सा. ब्रा. १।१।१) इत्याद्यामनन्ति। काठकास्तैत्तिरीयकाश्च शं नो मित्रः शं वरुणः (तै. १।१।१) इत्यादिकम्। शाठ्यायनिनश्च श्वेतोश्वो हरिनीलोसीत्यादिकम्। ऐतरेयिणस्तु महाव्रतब्राह्मणमधीयत इन्द्रो ह वै वृत्रं हत्वा महानभवदित्यादि। कौषीतकिनोपि महाव्रतब्राह्मणमेव प्रजापतिर्वै संवत्सरस्तस्यैष आत्मा यन्महाव्रतमिति। वाजसनेयिनस्तु प्रवर्ग्यं ब्राह्मणं देवा ह वै सत्रं निषेदुः (श. ब्रा. १४।१।१।१) इत्यादि।

तत्र संशयः। किमुपनिषदारम्भेष्वधीताः शुक्रं प्रविध्य। शं नो मित्रः (तै. १।१।१) इत्यादयो मन्त्राः प्रवर्ग्यादीनि च कर्माणि विद्याङ्गमुत नेति। किं युक्तम्। विद्याङ्गमिति। कुतः। संनिधिसमाम्नानाद्विद्याङ्गत्वप्रतीतेः। यद्यपि शुक्रं प्रविध्येत्यादीनां मन्त्राणां प्रवर्ग्यादेश्च कर्मणः श्रुतिलिङ्गवाक्यैर्बलवद्भिर्यथायथं कर्मसु विनियोगोवगम्यते तथापि शं नो मित्रः (तै. १।१।१)। स ह नाववतु (का. १।१।१, तै. २, तै. ३) इत्यादेर्मन्त्रस्यान्यत्र विनियो-

3. C. reads इत्यादिकान् for इत्यादीन्.
4. A. B. om. आदि after इति.
5. A. B. read काठाः for काठका°.
6. C. reads हरिनीलोनीति for हरिनीलोसीति.
7. A. B. om. ह before वै.
10. A. B. read प्रवर्ग्यं for प्रवर्ग्यम्.
12. C. reads आरम्भे for आरम्भेषु.

http://acharya.org

गाभावाद्विद्याधिकाराच्च विद्याङ्गत्वमवर्जनीयमिति सर्वासु विद्यासु ते मन्त्रा उपसंहर्तव्या इति प्राप्ते प्रचक्ष्महे ।

वेधाद्यर्थभेदात् । शुक्रं प्रविध्य हृदयं प्रविध्य । ऋतं वदिष्यामि । सत्यं वदिष्यामि (तै. १।१) । ऋतमवादिषम् । सत्यमवादिषम् (तै. १।१२) । तेजस्वि नावधीतमस्तु । मा विद्विषावहै (तै. २।१, का. १।१) इत्यादिभिर्लिङ्गैरभिचाराध्ययनादिष्वेषां विनियोगावगमान्न विद्याङ्गत्वम् । एतदुक्तं भवति । यथा हृदयं प्रविध्येत्यादिमन्त्रसामर्थ्याच्छुक्रं प्रविध्येत्यादीनामभिचारादिशेषत्वमवगम्यत एवमेवर्तं वदिष्यामि (तै. १।१।१) । तेजस्वि नावधीतमस्तु (तै. २।१, का. १।१) इत्यादिमन्त्रसामर्थ्यादेव स्वाध्यायविधिशेषत्वं शं नो मित्रः (तै. १।१।१) इत्यादिमन्त्राणामवगम्यते । अतो न तेषां विद्याङ्गत्वमिति । शुक्रं प्रविध्येत्यादीनां प्रवर्ग्यादिब्राह्मणानां चेह पाठो दिवाकीर्त्यत्वारण्येनुवाक्यत्वकृतः ॥ २५ ॥ वेधाद्यधिकरणं समाप्तम् । (१०)

हानौ तूपायनशब्दशेषत्वात्कुशाच्छन्दस्तुत्युपगानवत्तदुक्तम् ॥ २६ ॥

छन्दोगा आमनन्त्यश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामि (छा. ८।१३।१) इति । आथर्वणिकाश्च

---

2. A. B. read इमे for ते.
5. B. om. सत्यमवादिषम्
8. C. E. read वै after यथा.
11. A. E. om. विधि after स्वाध्याय.
19. A. B. read कृत आत्मा for कृतात्मा.
20. C. E. read सभवानि for सभवामि.

तथा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति । (मु. ३।१।३)

इति । शाट्यायनिनस्तु तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्यामित्यादि । कौषीतकिनस्तु तत्सुकृतदुष्कृते विधूनुते । तस्य प्रिया ज्ञातयः सुकृतमुपयन्त्यप्रिया दुष्कृतम् (कौ. १।४) इति । एवं क्वचित्पुण्यपापयोर्हानिः क्वचित्प्रियाप्रियेषु तत्प्राप्तिः क्वचिदुभयं च श्रुतम् । तदुभयमेकैकविद्यायां श्रुतमपि सर्वविद्याङ्गमास्थेयम् । सर्वब्रह्मविद्यानिष्ठस्यापि ब्रह्म प्राप्नुवतः पुण्यपापप्रहाणस्यावश्यंभावित्वात् । प्रहीणविषयत्वाच्चोपायनस्य । तच्चिन्तनं च विधीयमानं सर्वविद्याङ्गं भवितुमर्हति ।

तत्रेदं विचार्यते हानिचिन्तनमुपायनचिन्तनमुभयचिन्तनं च विकल्पेरन्नुपसंह्रियेरन्वा । किं युक्तम् । विकल्पेरन्निति । कुतः । पृथगाम्नानसामर्थ्यात् । समुच्चये हि सर्वदोभयानुसंधानं स्यात् । तच्च कौषीतकिवाक्येनैव सिद्धमित्यन्यत्राम्नानमनर्थकमेव स्यात् । अतोनेकत्राम्नानस्य विकल्प एव प्रयोजनम् । न चाध्येतृभेदेन परिहर्तुं शक्यम् । अनेकत्राम्नानमविशेषपुनःश्रवणं ह्यध्येतृभेदपरिहार्यम् । अत्र तु हानिरेव द्वयोः शाखयोरुपायनमेव चैकस्याम् । न च विद्याभेदेन व्यवस्थापयितुं शक्यम् । सर्वशेषभूतमिदमनुसंधानमित्युक्तत्वात् । अत्रेदमुच्यते ।

---

4. C. om. आदि after इति.
7. A. B. om. च after उभयम्.
14. E reads सर्वत्र for सर्वदा.
15. E. reads कौषीतकी for कौषीतकि.
18. C. om. पुनः.

http://acharya.org

हानौ तूपायनशब्दशेषत्वादिति । तुशब्दः पक्षं व्यावर्तयति । हानाविति प्रदर्शनार्थम् । केवलायां हानौ केवले चोपायने श्रूयमाणे तयोरितरेतरसमुच्चयोवश्यंभावी । कुतः । उपायनशब्दशेषत्वात् । उपायनशब्दस्य हानिवाक्यशेषत्वात् । उपायनवाक्यस्य हि हानिवाक्यशेषत्वमेवोचितम् । विदुषा त्यक्तयोः पुण्यपापयोः प्रवेशस्थानवाचित्वादुपायनवाक्यस्य । प्रदेशान्तराम्नातस्य वाक्यस्य प्रदेशान्तराम्नातवाक्यशेषत्वे दृष्टान्ता उपन्यस्यन्ते कुशाच्छन्दस्तुत्युपगानवदिति । कौषीतकिनः कुशा वानस्पत्या इत्यामनन्ति । शाट्यायनिनां त्वौदुम्बर्यः कुशा इति वाक्यं सामान्येन वानस्पत्यत्वेनावगताः कुशा औदुम्बर्य इति विशिंषत्तद्वाक्यशेषतामापद्यते । तथा देवासुराणां छन्दोभिरित्यादिनाविशेषेण देवासुराणां छन्दसां प्रसङ्गे देवच्छन्दांसि पूर्वमिति वचनं क्रमविशेषं प्रतिपादयत्तद्वाक्यशेषभावं भजते । तथा हिरण्येन षोडशिनः स्तोत्रमुपाकरोतीत्यविशेषेण प्राप्ते समयाविषिते सूर्ये षोडशिनः स्तोत्रमुपाकरोति (तै. सं. ६।६ ११, सत्या. श्रौ. सू. ९।७।१९) इति विशेषविषयं वाक्यं तद्वाक्यशेषभावं भजते । तथर्त्विज उपगायन्तीत्यविशेषप्राप्तस्य नाध्वर्युरुपगायेत् (तै. सं. ६।३।१) इति वाक्यमनध्वर्युविषयतामवगमयत्तद्वाक्यशेषत्वमृच्छति । एवं सामान्येनावगतमर्थं विशेषेण व्यवस्थापयितुं क्षमस्य वाक्यस्य तच्छेषत्वमनभ्युपगच्छद्भिस्तयोरर्थयोर्विकल्पः समाश्रयितव्यः । स च संभवन्त्यां गतौ

6. C. om. पुण्यपापयोः.
8. A C. read काळापिनः for कौषीतकिनः.
10. C. reads वानस्पत्या इति for वानस्पत्यत्वेन.
11. A. reads विशेषयत्, B. विशेषम्, for विशिषत्
13. A. E. read वाक्यशेषतां गच्छति for वाक्यशेषभावं भजते.
16. A B. read विशेषयत् for विशेषविषयम्.
17. B. E. read वाक्यशेषत्वम् for वाक्यशेषभावम्.

http://acharya.org

न युज्यते । तदुक्तं पूर्वस्मिन्काण्डेपि तु वाक्यशेषः स्यादन्याय्यत्वाद्विकल्पस्य विधीनामेकदेशः स्यात् (जै. सू. १०।८।४) इति । तदेवं केवलहानोपायनवाक्ययोरेकवाक्यत्वात्केवलस्य हानस्य केवलस्य चोपायनस्याभावाद्विकल्पो नोपपद्यते । कौषीतकिनामुभयाम्नानमविशेषपुनःश्रवणत्वेन प्रतिपत्तृभेदाद्विरुद्धम् ॥ २६ ॥ हान्यधिकरणं समाप्तम् । (११)

सांपराये तर्तव्याभावात्तथा ह्यन्ये ॥ २७ ॥

सुकृतदुष्कृतयोर्हानमुपायनं च सर्वासु विद्यासु चिन्तनीयमित्युक्तम् । तद्धानं किं देहवियोगकाले देहादुत्क्रान्तस्याध्वनि चोत देहवियोगकाल एवेति विशय उभयत्रेति युक्तम् । उभयथा श्रुतत्वात् । एवं हि कौषीतकिनः समामनन्ति स एतं देवयानं पन्थानमापद्याग्निलोकं गच्छति (कौ. १।३) इत्युपक्रम्य स आगच्छति विरजां नदीम् । तां मनसात्येति । तत्सुकृतदुष्कृते धूनुते (कौ. १।४) इति । अत्र वाक्येऽध्वनि सुकृतदुष्कृतहानिः प्रतीयते । ताण्डिनस्त्वश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामि (छा. ८।१३।१) इति । अत्र तु देहवियोगकाल एवेति प्रतीयते । शाट्यायनकेपि तस्य पुत्रा दा-

---

1. E. reads वाक्यशेषत्वात् for वाक्यशेषः स्यात्.
3. A. B. read केवल for केवलस्य.
4. E. reads कौषीतकीनाम् for कौषीतकिनाम्.
11. A. E. om. हि after एवम्.
15. C. reads दुष्कृतयो. for दुष्कृत.
16. A. B. read कृत आत्मा for कृतात्मा.
17. C. E. read संभवानि for संभवामि.
18. B. C. om. एव after वियोगकाले.

http://acharya.org

यमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्यामिति पुत्रेषु दायसंक्रान्तिसमकालं सुकृतदुष्कृतसंक्रमणं श्रूयमाणं देहवियोगकाल इति प्रतीयते । अतः सुकृतदुष्कृतयोरेकदेशो देहवियोगकाले हीयते शेषस्त्वध्वनीति प्राप्त उच्यते ।

सांपराय इति । सांपराये देहापक्रमणकाल एव विदुषः सुकृतदुष्कृते निरवशेषं हीयेते । कुतः । तर्तव्याभावात् । विदुषो देहवियोगात्पश्चात्सुकृतदुष्कृताभ्यां तरितव्यभोगाभावात् । विद्याफलभूतब्रह्मप्राप्तिव्यतिरेकेण हि सुकृतदुष्कृताभ्यां भोक्तव्ये सुखदुःखे न विद्येते । तथा ह्यन्ये देहवियोगादूर्ध्वं ब्रह्मप्राप्तिव्यतिरिक्तसुखदुःखोपभोगाभावमधीयतेशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः (छा. ८।१२।१) । एष संप्रसादोस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते (छा. ८।३।४) । तस्य तावदेव चिरं यावन्न विमोक्ष्येथ संपत्स्ये (छा. ६।१४।२) इति च ॥ २७ ॥

छन्दत उभयाविरोधात् ॥ २८ ॥

एवमर्थस्वाभाव्यात्सुकृतदुष्कृतहानिकालेवधृते सत्युभयाविरोधेन श्रुतेरर्थस्वभावस्य चाविरोधेन च्छन्दतो यथेष्टं पदानामन्वयो वर्णनीयः । कौषीतकिवाक्ये तत्सुकृतदुष्कृते धूनुते (कौ. १।४) इति चरमश्रुतो वाक्यावयव एतं देवयानं पन्थानमापद्य (कौ. १।३) इति प्रथमश्रुतावयवात्प्रागनुगमयितव्य इत्यर्थः ॥ २८ ॥

---

2. E. reads वियोगकालम् for वियोगकाले.
3. B. E. read गम्यते for प्रतीयते.
5. E. reads उत्क्रमण for अपक्रमण.
8. C. reads भोक्तव्य for भोक्तव्ये.
14. A. B. om. च after इति.
18. E. reads कौषीतकी for कौषीतकि.

अत्र पूर्वपक्षी प्रत्यवतिष्ठते ।

गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः ॥ २९ ॥

सुकृतदुष्कृतयोरेकदेशस्य देहवियोगकाले हानिः शेषस्य पश्चादित्युभयथा कर्मक्षये सत्येव गतेरर्थवत्त्वम् । देवयानगतिश्रुतेरर्थवत्त्वमित्यर्थः । अन्यथा हि विरोधः । देहवियोगकाल एव सर्वकर्मक्षये सूक्ष्मशरीरस्यापि विनाशः स्यात् । तथा सति केवलस्यात्मनो गमनं नोपपद्यते । अत उत्क्रान्तिसमये विदुषो निःशेषकर्मक्षयोनुपपन्नः ॥ २९ ॥

अत्रोत्तरम् ।

उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥ ३० ॥

उपपन्न एवोत्क्रान्तिकाले सर्वकर्मक्षयः । कथम् । तल्लक्षणार्थोपलब्धेः । क्षीणकर्मणोप्याविर्भूतस्वरूपस्य देहसंबन्धलक्षणार्थोपलब्धेः । परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते (छा. ८।३।४) । स तत्र पर्येति जक्षत्क्रीडन्रममाणः (छा. ८। १२।३) । स स्वराड्भवति । तस्य सर्वेषु लोकेषु कामचारो भवति (छा. ७।२५।२)। स एकधा भवति त्रिधा भवति (छा. ७।२६।२) इत्यादिषु देहसंबन्धाख्योर्थो ह्युपलभ्यते । अतः क्षीणकर्मणोपि सूक्ष्मशरीरयुक्तस्य देवयानेन गमनमुपपद्यते । कथं सूक्ष्मशरीरमप्यारम्भककर्मविनाशेवतिष्ठत इति चेत् । विद्यामाहात्म्यादिति ब्रूमः । विद्या हि स्वयं सूक्ष्मशरीरस्यानारम्भिकापि प्राकृतसुखदुःखोपभोगसाधनस्थूलशरीरस्य सर्व-

---

2. B. om. अन्यथा.

6. E. reads हि after एव; E. om. वि before नाशः.

8. A. B. read नोपपन्नः for अनुपपन्नः.

12. C. reads अथ for अपि; B. reads स्वरूप for स्वरूपस्य.

17. C. reads असंबन्ध for संबन्ध.

http://acharya.org

कर्मणां च निरवशेषक्षयेपि स्वफलभूतब्रह्मप्राप्तिप्रदानाय देवयानेन पथैनं गमयितुं सूक्ष्मशरीरं स्थापयति । लोकवत् । यथा लोके सस्यादिसमृद्ध्यर्थमारब्धे तडागादिके तद्धेतुषु तदिच्छादिषु विनष्टेष्वपि तदेव तडागादिकमशिथिलं कुर्वन्तस्तत्र पानीयपानादिकं कुर्वन्ति तद्वत् ॥ ३० ॥

अथ स्याज्ज्ञानिनां साक्षात्कृतपरतत्त्वानां देहपातसमये कर्मणो निरवशेषक्षयाद्देहपातादूर्ध्वं सूक्ष्मशरीरमात्रं गत्यर्थमनुवर्तते सुखदुःखानुभवो न विद्यत इति यदुक्तं तन्नोपपद्यते । वसिष्ठापान्तरतमःप्रभृतीनां साक्षात्कृतपरतत्त्वानां देहपातादूर्ध्वं देहान्तरसंगमः पुत्रजन्मविपत्त्यादिनिमित्तसुखदुःखानुभवश्च दृश्यत इति । अत उत्तरं पठति ।

यावदधिकारमवस्थितिराधिकारिकाणाम् ॥ ३१ ॥

नास्माभिः सर्वेषां ज्ञानिनां देहपातसमये सुकृतदुष्कृतयोर्विनाश उक्तः । अपि तु येषां ज्ञानिनां देहपातानन्तरमर्चिरादिका गतिः प्राप्ता तेषां ज्ञानिनां देहपातसमये सुकृतदुष्कृतहानिरुक्ता । वसिष्ठादीनां त्वाधिकारिकाणां न देहपातादनन्तर-

2. A. B. om. लोकवत्.
3. A. B. read तटाक for तडाग here and in next line.
5. A. B. read पानादि for पानादिकम्.
6. C. reads अवर after पर
9. A. B. E. read अवान्तरतप॰ for अपान्तरतम॰.
14–16. B. reads तेषाम् for येषां ज्ञानिनां देह॰.. आधिकारिकाणां न.
14–15. A. reads अर्चिरादि for अर्चिरादिका.
15. C. reads तत् for ज्ञानिनाम्
16. C. reads च for तु after वसिष्ठादीनाम्; C. reads देहपात for देहपातात्.

मर्चिरादिगतिप्राप्तिः। प्रारब्धस्याधिकारस्यासमाप्तत्वात्। तेषां कर्मविशेषेणाधिकारविशेषं प्राप्तानां यावदधिकारसमाप्ति तदारम्भकं कर्म न क्षीयते। प्रारब्धस्य हि कर्मणो भोगादेव क्षयः। अत आधिकारिकाणां तदारम्भकं कर्म यावदधिकारमवतिष्ठते। अतस्तेषां न देहपातादनन्तरमर्चिरादिगतिप्राप्तिः ॥ ३१ ॥

सापरायाधिकरणं समाप्तम्। (१२)

अनियमः सर्वेषामविरोधः शब्दानुमानाभ्याम्॥३२॥

उपकोसलादिषु येषूपासनेष्वर्चिरादिगतिः श्रूयते किं तन्निष्ठानामेव तया ब्रह्मप्राप्तिरुत सर्वेषां ब्रह्मोपासननिष्ठानामिति संशय इतरेष्वनाम्नानाद्ये चेमेरण्ये श्रद्धा तप इत्युपासते (छा. ५।१०।१)। श्रद्धां सत्यमुपासते (बृ. ६।२।१५) इतीतरसकलब्रह्मविद्योपस्थापकत्वे प्रमाणाभावाच्च तन्निष्ठानामेवेति प्राप्तेभिधीयते।

अनियम इति। सर्वेषां सर्वोपासननिष्ठानां तयैव गन्तव्यत्वात्तन्निष्ठानामेवेति नियमो नास्ति। सर्वेषां तयैव गमने हि सति शब्दानुमानाभ्यां श्रुतिस्मृतिभ्यामविरोधः। अन्यथा विरोध एवेत्यर्थः। श्रुतिस्तावच्छान्दोग्यवाजसनेयकयोः पञ्चाग्निविद्यायामर्चिरादिमार्गेण सर्वब्रह्मोपासननिष्ठानां गमनमाह। य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धां सत्यमुपासते तेर्चिषमभिसंभवन्ति (बृ. ६।२।१५) इति वाजसनेयके तत्र इत्थं विदुर्ये चेमेरण्ये श्रद्धा तप इत्युपासते तेर्चिषमभिसंभवन्ति

---

1. C. E. read अर्चिरादिका for अर्चिरादि.
5. C. E. read देहपात for देहपातात्
8. A. B read उपकोशल for उपकोसल.
18. E. om. ब्रह्म after सर्व.
19. C. E. read इमे for अमी.

http://acharya.org

(छा. ५।१०।१) इति च्छान्दोग्ये य इत्थं विदुः (छा. ५।१०।१) इति पञ्चाग्निविद्यानिष्ठान्ये चेमेऽरण्य इत्यादिना श्रद्धापूर्वकं ब्रह्मोपासीनांश्चोद्दिश्यार्चिरादिगतिरुपदिश्यते । सत्यं ज्ञानमनन्तं ब्रह्म (तै. २।१)। सत्यं त्वेव विजिज्ञासितव्यम् (छा. ७।१६।१) इति सत्यशब्दस्य ब्रह्मणि प्रसिद्धेः । तपःशब्दस्यापि तेनैकार्थ्यात्सत्यतपःशब्दाभ्यां ब्रह्मैवाभिधीयते । श्रद्धापूर्वकं ब्रह्मोपासनं चान्यत्र श्रुतम् । सत्यं त्वेव विजिज्ञासितव्यम् (छा. ७।१६।१) इत्युपक्रम्य श्रद्धा त्वेव विजिज्ञासितव्या (छा. ७।१९।१) इति । स्मृतिरपि

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥ (गी. ८।२४)

इति सर्वेषां ब्रह्मविदामनेनैव मार्गेण गमनमित्याह । एवंजातीयकाः श्रुतिस्मृतयो बह्व्यः सन्ति । एवं सर्वविद्यासाधारणीयं गतिः प्राप्तैवोपकोसलविद्यादावनूद्यते ॥ ३२ ॥ अनियमाधिकरणं समाप्तम् । (१३)

अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ॥ ३३ ॥

बृहदारण्यके श्रूयत एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोवाय्वनाकाशमसङ्गमरसमगन्धमचक्षुष्कमश्रोत्रमवागमनोतेजस्कमप्राणममुखममात्रमनन्तरमबाह्यं न तदश्नाति किंचन ।...एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः (बृ. ३।८।८-९) इति । तथाथर्वणेऽथ परा यया तदक्षरमधि-

---

3. C. E. read अर्चिरादिका for अर्चिरादि.
14. C. E. read उपकोशल for उपकोसल.
21. E. reads असुखम् for अमुखम्.

गम्यते यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादम् (मु. १।१।५-६) इति । तत्र संशयः किमिमेक्षरशब्दनिर्दिष्टब्रह्मसंबन्धितया श्रुता अस्थूलत्वादयः प्रपञ्चप्रत्यनीकतास्वरूपाः सर्वासु ब्रह्मविद्यास्वनुसंधेया उत यत्र श्रूयन्ते तत्रैवेति । किं युक्तम् । यत्र श्रुतास्तत्रैवेति । कुतः । विद्यान्तरस्य रूपभूतानां गुणानां विद्यान्तरस्य रूपत्वे प्रमाणाभावात् । प्रतिषेधरूपाणामेषां गुणानामानन्दादिवत्स्वरूपावगमोपायत्वाभावाच्च । आनन्दादिभिरवगतस्वरूपे हि ब्रह्मणि स्थूलत्वादयः प्रपञ्चधर्माः प्रतिषिध्यन्ते । निरालम्बनप्रतिषेधायोगात् । एवं प्राप्ते प्रचक्ष्महे ।

अक्षरधियां त्ववरोध इति । अक्षरब्रह्मसंबन्धिनीनामस्थूलत्वादिधियां सर्वब्रह्मविद्यास्ववरोधः संग्रहणमित्यर्थः । कुतः । सामान्यतद्भावाभ्याम् । सर्वेषूपासनेषूपास्यस्याक्षरस्य ब्रह्मणः समानत्वादस्थूलत्वादीनां तत्स्वरूपप्रतीतौ भावाच्च । एतदुक्तं भवति । असाधारणाकारेण ग्रहणं हि वस्तुनो ग्रहणम् । न च केवलानन्दादि ब्रह्मणोसाधारणमाकारमुपस्थापयति । प्रत्यगात्मन्यप्यानन्दादेर्विद्यमानत्वात् । हेयप्रत्यनीको ह्यानन्दादिर्ब्रह्मणोसाधारणं रूपम् । प्रत्यगात्मनस्तु स्वतो हेयविरहिणोपि हेयसंबन्धयोग्यतास्ति । हेयप्रत्यनीकत्वं च चिदचिदात्मकप्रपञ्चधर्मभूतस्थूलत्वादिविपरीतरूपम् । अतोसाधारणाकारेण ब्रह्मानुसंदधतास्थूलत्वादिविशेषितज्ञानानन्दाद्याकारं ब्रह्मानुसंधेयमित्य-

---

2. A. reads इत्येतत् for इमे.

4. A. om. स्व before रूपाः.

7. A. B. om. गुणानाम्.

19. C. om. हेय before प्रत्यनीकत्वम्; B om. च after प्रत्यनीकत्वम्.

21. A. B. read दधत. for दधता.

http://acharya.org

स्थूलत्वादीनामानन्दादिवद्ब्रह्मस्वरूपप्रतीत्यन्तर्भावात्सर्वासु ब्रह्मविद्यासु तथैव ब्रह्मानुसंधेयमिति । गुणानां प्रधानानुवर्तित्वे दृष्टान्तमाहौपसदवदिति । यथा जामदग्न्यचतूरात्रपुरोडाशाद्युपसद्गुणभूतः सामवेदपठितोऽग्निर्वै होत्रं वेतु (ता. ब्रा. २१।१०।११) इत्यादिको मन्त्रः प्रधानानुवर्तितया याजुर्वैदिकेनोपांशुत्वेन प्रयुज्यते। तदुक्तं प्रथमे काण्डे गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोगः (जै. सू. ३।३।९) इति॥३३॥

नन्वेवं सर्वासु ब्रह्मविद्यासु ब्रह्मण एव गुणित्वाद्गुणानां च प्रधानानुवर्तित्वात्सर्वकर्मा सर्वगन्धः सर्वरसः (छा. ३। १४।२) इत्यादेर्गुणजातस्य प्रतिविद्यं व्यवस्थितस्याप्यव्यवस्था स्यात् । तत्राह ।

इयदामननात् ॥ ३४ ॥

आमननमाभिमुख्येन मननमनुचिन्तनम् । आमननाद्धेतोरियदेव गुणजातं सर्वत्रानुसंधेयत्वेन प्राप्तं यदस्थूलत्वादिविशेषितमानन्दादिकम् । येन गुणजातेन विना ब्रह्मस्वरूपस्येतरव्यावृत्तस्यानुसंधानं न संभवति तदेव सर्वत्रानुवर्तनीयं तच्चेयदेवेत्यर्थः । इतरे तु सर्वकर्मत्वादयः प्रधानानुवर्तिनोऽपि चिन्तनीयत्वेन प्रतिविद्यं व्यवस्थिताः ॥ ३४ ॥ अक्षरध्यधिकरणं समाप्तम्। (१४)

---

3. A. B. read चतूरात्रे for चतूरात्र; A. reads पुरोडाश्य for पुरोडाशादि.
4. A. B. read गुणभूत for गुणभूतः.
5. A. B. read वैदिकेषु for वैदिकेन.
11. B. om. तत्राह.
13. C om. अनु before चिन्तनम्.

http://acharya.org

अन्तरा भूतग्रामवत्स्वात्मनोन्यथाभेदानुपपत्तिरिति चेन्नोपदेशवत् ॥ ३५ ॥

बृहदारण्यक उषस्तप्रश्न एवमाम्नायते यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तन्मे व्याचक्ष्व (बृ. ३।४।१) इति । तस्य प्रतिवचनं यः प्राणेन प्राणिति स त आत्मा सर्वान्तरो योपानेनापानिति स त आत्मा (बृ. ३।४।१) इत्यादि । अतुष्टेन तेन पुनः पृष्ट आह न दृष्टेर्द्रष्टारं पश्येः। न श्रुतेः श्रोतारं शृणुयाः । न मतेर्मन्तारं मन्वीथाः । न विज्ञातेर्विज्ञातारं विजानीयाः । एष त आत्मा सर्वान्तरः । अतोन्यदार्तम् (बृ. ३।४।२) इति । तथा तदनन्तरं कहोलप्रश्ने चैवमाम्नायते यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तन्मे व्याचक्ष्व (बृ. ३।५।१) इति । प्रतिवचनं च योशनायापिपासे शोकं मोहं जरां मृत्युमत्येति । एवं हैतमात्मानं विदित्वा ब्राह्मणः पुत्रैषणायाश्च वित्तैषणायाश्च (बृ. ३।५।१) इत्याद्यतोन्यदार्तम् (बृ. ३।५।१) इत्यन्तम् ।

तत्र संशय्यते किमनयोर्विद्याभेदोस्ति नेति । किं युक्तम् । भेद इति । कुतः । रूपभेदात् । प्रतिवचनभेदाद्रूपं भिद्यते । प्रश्नस्यैकरूप्येपि प्रतिवचनप्रकारो हि भेदेनोपलभ्यते। पूर्वत्र प्राणनादीनां कर्ता सर्वान्तरात्मत्वेनोच्यते परत्राशनायापिपासादिरहितः । अतः पूर्वत्र प्राणिता देहेन्द्रियबुद्धिमनःप्राणव्यतिरिक्तः प्रत्यगात्मोच्यते । परत्र तु तदतिरिक्तोशनायापिपासादिरहितः परमात्मा । अतो रूपं भिद्यते । भूतग्राम-

16. C. reads विद्यते for अस्ति.

19. B. reads प्राण for प्राणन.

20. C. reads प्राणि for प्राणिता.

20-1. C. reads मनःप्राणबुद्धि for बुद्धिमनःप्राण.

http://acharya.org

वतश्च प्रत्यगात्मनस्तस्य भूतग्रामस्य सर्वस्यान्तरात्मत्वेन सर्वान्तरत्वमप्युपपन्नम् । यद्यपि प्रत्यगात्मनः सर्वान्तरत्वं भूतग्राममात्रापेक्षत्वेनापेक्षिकं तथापि तदेव ग्राह्यम् । अन्यथा मुख्यान्तरात्मपरिग्रहलोभात्परमात्मस्वीकारे प्रतिवचनभेदो नोपपद्यते । प्रतिवचनं हि पूर्वत्र प्रत्यगात्मविषयम् । परमात्मनः प्राणितृत्वापानितृत्वाद्यसंभवात् । परं च परमात्मविषयम् । अशनायाद्यतीतत्वात् । तदिदमाशङ्कतेन्तरा भूतग्रामवत्स्वात्मनोन्यथा भेदानुपपत्तिरिति चेदिति । अन्तरा सर्वान्तरत्वेन प्रथमप्रतिवचनं भूतग्रामवत्स्वात्मनः । भूतग्रामवांस्तदन्तरः स्वात्मा प्रत्यगात्मा सर्वान्तर इत्युच्यत इत्यर्थः । अन्यथा यः प्राणेन प्राणिति (बृ. ३।४।१) योशनायापिपासाद्यतीत इति प्रतिवचनभेदानुपपत्तिरिति चेत् ।

अत्रोत्तरं नेति । न विद्याभेद इत्यर्थः । उभयत्र परविषयत्वात्प्रश्नप्रतिवचनयोः । तथा हि यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः (बृ. ३।४।१) इति प्रश्नस्तावत्परमात्मविषय एव । ब्रह्मशब्दस्य परमात्मासाधारणत्वेपि प्रत्यगात्मन्यपि कदाचिदुपचरितप्रयोगदर्शनात्तद्व्यावृत्त्या परमात्मप्रतिपत्त्यर्थं यत्साक्षाद्ब्रह्मेति विशेषणं क्रियते । अपरोक्षत्वमपि सर्वदेशसर्वकालसंबन्धित्वं सत्यं ज्ञानमनन्तं ब्रह्म (तै. २।१) इत्यनन्तत्वेनावगतस्य परमात्मन एवोपपद्यते । सर्वान्तरत्वमपि यः पृथिव्यां

---

1. C. reads अन्तरत्वेन for अन्तरात्मत्वेन.
4. C. reads लाभात् for लोभात्; A. B. read उपपद्येत for उपपद्यते.
6. C. reads पिपासा after अशनाया.
8. E. reads सर्वान्तरात्मत्वेन for सर्वान्तरत्वेन.
17. C. reads परमात्मनः for परमात्म.
18. B. om. काल.

तिष्ठन्पृथिव्या अन्तरः (श. ब्रा. १४।६।७।७) इत्यारभ्य य आत्मनि तिष्ठन्नात्मनोन्तरः (श. ब्रा. १४।६।७।३०) इति सर्वान्तर्यामिणः परमात्मन एव संभवति । प्रतिवचनमपि तथैव परमात्मविषयं यः प्राणेन प्राणिति (बृ. ३।४।१) इति । निरुपाधिकं प्राणनस्य कर्तृत्वं परमात्मन एव । प्रत्यगात्मनः सुषुप्तौ प्राणनं प्रति कर्तृत्वाभावात् ।

एवमजानतोषस्तेन प्राणने कर्तृत्वमात्रमुक्तं मन्वानेन प्रत्यगात्मनोपि साधारणत्वं प्रतिवचनस्य मत्वातुष्टेन पुनः पृष्टस्तं प्रति प्रत्यगात्मनो व्यावृत्तं निरुपाधिकत्वेन प्राणनस्य कर्तारं परमात्मानमाह न दृष्टेर्द्रष्टारं पश्येः (बृ. ३।४।२) इत्यादिना । इन्द्रियाधीनानां दर्शनश्रवणमननविज्ञानानां कर्तारं प्रत्यगात्मानं प्राणनस्य कर्तृत्वेनोक्त इति न मन्वीथाः । तस्य सुषुप्तिमूर्छादौ प्राणनादेरकर्तृत्वात् । को ह्येवान्यात्कः प्राण्यात् । यदेष आकाश आनन्दो न स्यात् (तै. २।७) इति सर्वप्राणिप्राणनहेतुत्वं हि परमात्मन एवान्यत्र श्रुतम् । अतः पूर्वप्रश्नप्रतिवचने परमात्मविषये । एवमुत्तरे अपि । अशनायाद्यतीतत्वस्य परमात्मासाधारणत्वात् । उभयत्रातोन्यदार्तम् (बृ. ३।४।२,३।५।१) इत्युपसंहारश्चैकरूपः । प्रश्नप्रतिवचनावृत्तिस्तु कृत्स्नप्राणिप्राणनहेतोः परस्य ब्रह्मणोशनायाद्यतीतत्वप्रतिपादनाय । तत्र दृष्टान्तमाहोपदेशवदिति । यथा सद्विद्यायामुत तमादेशमप्राक्ष्यः

---

5. B. reads संभवति after परमात्मन एव.

7. A. B. om. उक्तम्.

9. C. reads प्राणस्य for प्राणनस्य.

11. C. reads इन्द्रियादीनाम् for इन्द्रियाधीनानाम्.

15. A. B. om. हि.

18-9. A. reads प्राणने for प्राणन.

http://acharya.org

(छा. ६।१।१) इति प्रक्रान्ते सदुपदेशे भगवांस्त्वेवमेतद्ब्रवीतु (छा. ६।१।४) इति भूय एव मा भगवान्विज्ञापयतु (छा. ६।५।४) इति प्रश्नस्यैषोणिमैतदात्म्यमिदं सर्वं तत्सत्यम् (छा. ६।८।७) इति प्रतिवचनस्य च भूयो भूय आवृत्तिः सतो ब्रह्मणस्तन्माहात्म्यविशेषप्रतिपादनाय दृश्यते तद्वत्। अत एकस्यैव सर्वान्तरभूतस्य ब्रह्मणः कृत्स्नप्राणिप्राणनहेतुत्वाशनायाद्यतीतत्वप्रतिपादनेन रूपैक्याद्विद्यैक्यम् ॥ ३५ ॥

अथ स्याद्यद्यप्युभे प्रश्नप्रतिवचने परब्रह्मविषये तथापि विद्याभेदोवर्जनीयः। एकत्र सर्वप्राणिप्राणनहेतुत्वेनोपास्यमितरत्राशनायाद्यतीतत्वेनेत्युपास्यगुणभेदेन रूपभेदात्। प्रष्टृभेदाच्च। पूर्वत्र ह्युषस्तः प्रष्टोत्तरत्र तु कहोल इति। तत्राह।

व्यतिहारो विशिंषन्ति हीतरवत् ॥ ३६ ॥

नात्र विद्याभेदः। प्रश्नप्रतिवचनाभ्यामेकरूपार्थविषयाभ्यामेकेन च विधिपदेनैकवाक्यत्वप्रतीतेः। प्रश्नद्वयं तावत्सर्वान्तरात्मत्वविशिष्टब्रह्मविषयम्। द्वितीये प्रश्ने यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः (बृ. ३।५।१) इत्येवकारश्च पूर्वत्रोषस्तेन पृष्टगुणविशिष्टब्रह्मविषयत्वं कहोलप्रश्नस्यावधारयति। प्रतिवचनं चोभयत्रैष त आत्मा सर्वान्तरः (बृ. ३।४।१, ३।५।१) इति सर्वान्तरात्मत्वविशिष्टब्रह्मविषयमेकरूपमेव। विधिप्रत्ययश्चोत्तरत्रैव दृश्यते तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् (बृ. ३।५।१) इति। एवं सर्वान्तरात्मत्व-

---

2. C. om. इति after ब्रवीतु; C. E. read एवमाह for एव मा.
5. C. reads तस्मात्, E. तत्तत्, for तत् before माहात्म्य.
6. B. reads हेतुत्वाय for हेतुत्व.
9. A. B. read उपास्यः for उपास्यम्.
18. E. reads सः for एषः before त आत्मा.
21. A. B. om. एवम्.

विशिष्टब्रह्मैकविषयत्वे द्वयोरवधृते सत्येकस्मिन्नेव सर्वान्तरात्मत्वविशिष्टे ब्रह्मण्युपास्य उषस्तकहोलयोरितरेतरबुद्धिव्यतिहारः कर्तव्यः। उषस्तस्य या सर्वान्तरात्मनो ब्रह्मणः सर्वप्राणिप्राणनहेतुत्वविषया बुद्धिः सा कहोलेनापि प्रष्ट्रा कार्या। या च कहोलस्य तस्यैव ब्रह्मणोशनायाद्यतीतत्वविषया बुद्धिः सोषस्तेनापि कार्या। एवं व्यतिहारे कृत उभाभ्यां सर्वान्तरस्य ब्रह्मणो जीवव्यावृत्तिरवधृता भवति। एवं सर्वान्तरात्मानं प्रत्यगात्मनो व्यावृत्तमवगमयितुं सर्वप्राणिप्राणनहेतुत्वाशनायाद्यतीतत्वप्रतिपादनेन विशिंषन्ति हि याज्ञवल्क्यस्य प्रतिवचनानि। अतो ब्रह्मणः सर्वान्तरात्मत्वमेवोपास्यगुणः। प्राणनहेतुत्वादयस्तु तस्योपपादका नोपास्याः।

ननूपास्यगुणः सर्वान्तरात्मत्वमेव चेत्प्राणनहेतुत्वस्याशनायाद्यतीतत्वस्य च प्रष्ट्रोर्व्यतिहृत्यानुसंधानं किमर्थम्। तदुच्यते। सर्वप्राणिप्राणनहेतुत्वेन सर्वान्तरात्मनि जीवाद्व्यावृत्ते ब्रह्मण्युषस्तेनावधृते सति कहोलेन जीवस्य सर्वात्मनासंभावितेन स्वभावविशेषेण सर्वान्तरात्मा व्यावृत्तोनुसंधेय इति कृत्वा पुनः प्रश्नः कृतः। याज्ञवल्क्योपि तदभिप्रायमभिज्ञाय प्रत्यगात्मनोसंभावितमशनायादिप्रत्यनीकत्वमुक्तवान्। अतश्चोपास्यस्य व्यावृत्तिप्रतीतिसिद्ध्यर्थमुभाभ्यां परस्परबुद्धिव्यतिहारः कर्तव्यः। इतरवत्। यथेतरत्र सद्विद्यायां (छा. ६) भूयो भूयः प्रश्नैश्च प्रतिवचनैश्च तदेव सद्ब्रह्म व्यवच्छिद्यते न पुनः पूर्वप्रतिपन्नाद्गुणाद्गुणान्तरविशिष्टतयोपास्यं प्रतिपाद्यते तद्वत्॥३६॥

---

7. E. reads एतम् for एवम्.
8. C. om. सर्व before प्राणि.
11. A. B. read एव after तस्य.
19. C. reads उपास्यप्रीतिव्यावृत्ति for उपास्यस्य व्यावृत्तिप्रतीति.
21. A. B. om. च after प्रश्नैः.

तत्रापि प्रश्नप्रतिवचनभेदे सति कथमैक्यमवगम्यत इति चेत्तत्राह ।

सैव हि सत्यादयः ॥ ३७ ॥

सैव हि सच्छब्दाभिहिता परमकारणभूता परा देवतैव सेयं देवतैक्षत (छा. ६।३।२) । तेजः परस्यां देवतायाम् (छा. ६।८।६) इति प्रकृता यथा सोम्य मधु मधुकृतो निस्तिष्ठन्ति (छा. ६।९।१) इत्यादिषु पर्यायेषु सर्वेषूपपाद्यते । यत ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा (छा. ६।८।७) इति प्रथमपर्यायोदिताः सत्यादयः सर्वेषु पर्यायेषूपपाद्योपसंह्रियन्ते ।

केचित्तु व्यतिहारो विशिंषन्ति हीतरवत् । सैव हि सत्यादय इति सूत्रद्वयमधिकरणद्वयं वर्णयन्ति ।

तत्र पूर्वेण त्वं वाहमस्मि भगवो देवते । अहं वै त्वमसि भगवो देवते (जाबा.) । तद्योहं सोसौ योसौ सोहम् (ऐ. आ. २।२।४।६) इति वाक्ये जीवपरयोर्व्यतिहारानुसंधानं प्रतिपाद्यत इत्युच्यत इत्याहुः । तत्सर्वं खल्विदं ब्रह्म (छा. ३।१४।१) । ऐतदात्म्यमिदं सर्वम्....तत्त्वमसि (छा. ६।८।७) इत्यवगतसर्वात्मभावविषयत्वादस्य वाक्यस्य नात्र प्रतिपादनीयमपूर्वमस्तीत्यनादरणीयम् । तत्तु वक्ष्यत्यात्मेति तूपगच्छन्ति ग्राहयन्ति च (ब्र. सू. ४।१।३) इति । न च सर्वात्मत्वा-

---

1. C. reads अत्रापि for तत्रापि.

4. B. reads पर for परा.

6. B. reads मधुनि for मधु after सोम्य.

13. A. B. om. भगवो देवते after त्वमसि.

18. B. reads तत्र for नात्र.

http://acharya.org

नुसंधानातिरेकेण परस्मिन्ब्रह्मणि जीवत्वानुसंधानं जीवे च परब्रह्मत्वानुसंधानं तथ्यं संभवति ।

उत्तरेण च सूत्रेण स यो ह वै तन्महद्यक्षं प्रथमजं वेद सत्यं ब्रह्म (बृ. ५।४।१) इत्यादिवाक्यप्रतिपादितस्य सत्योपासनस्य तद्यत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन् (बृ. ५।५।२) इत्यादिवाक्यप्रतिपादितोपासनस्य चैक्यं प्रतिपाद्यत इति तदप्ययुक्तम् । उत्तरवाक्येऽक्ष्यादित्यस्थानभेदेन विद्याभेदस्य पूर्वमेव न वा विशेषात् (ब्र. सू. ३।३।२१) इत्यनेन प्रतिपादितत्वात् । न च द्वयोरनयोर्व्याहृत्यादिशरीरकत्वेन रूपवतोर्हन्ति पाप्मानं जहाति च य एवं वेद (छा. ५।५।३) इति च पृथक्संयोगचोदनावतोर्द्वयोरुपासनयोः स यो ह वै तन्महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति जयतीमांल्लोकान् (बृ. ५।४।१) इति संयोगरूपादिमत्तया निरपेक्षेण पूर्वेणैकेनोपासनेनाभेदः संभवति । न च हन्ति पाप्मानं जहाति (बृ. ५।५।३) इति च गुणफलाधिकारत्वम् । प्रमाणाभावात् । पूर्वेणैकविद्यात्वं प्रमाणमिति चेन्न । इतरेतराश्रयत्वात् । एकविद्यात्वे निश्चिते सति पूर्वफलस्यैव प्रधानफलत्वेनोत्तरयोः फलयोर्गुणफलत्वं तयोर्गुणफलत्वे निश्चिते सति संयोगभेदाभावात्पूर्वेण विद्यैक्यमितीतरेतराश्रयत्वमित्येवमादिभिर्यथोक्तप्रकारमेव सूत्रद्वयम् ॥ ३७ ॥ अन्तरत्वाधिकरणं समाप्तम् । (१५)

---

2. C. om. सम् before भवति.

5. C. E. read अक्षिन् for अक्षन्.

10. C. om. च after जहाति.

15. B. om. च after इति.

17. B. om. सति.

http://acharya.org

कामादीतरत्र तत्र चायतनादिभ्यः ॥ ३८ ॥

छान्दोग्ये श्रूयतेथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यम् (छा. ८।१।१) इत्यादि। वाजसनेयके च स वा एष महानज आत्मा योयं विज्ञानमयः प्राणेषु य एषोन्तर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी सर्वस्येशानः (बृ. ४।४।२२) इत्यादि। तत्र संशयः किमनयोर्विद्याभेद उत नेति। किं युक्तम्। भेद इति। कुतः। रूपभेदात्। अपहतपाप्मत्वादिगुणाष्टकविशिष्ट आकाशश्छान्दोग्य उपास्यः प्रतीयते। वाजसनेयके त्वाकाशे शयानो वशित्वादिगुणविशिष्ट उपास्यः प्रतीयते। अतो रूपभेदाद्विद्याभेद इति प्राप्ते प्रचक्ष्महे।

न भेद इति। कुतः। रूपाभेदात्। इतरत्र तत्र च कामाद्येव हि रूपम्। वाजसनेयके छान्दोग्ये च सत्यकामत्वादिविशिष्टमेव ब्रह्मोपास्यमित्यर्थः। कुत एतदवगम्यते। आयतनादिभ्यः। हृदयायतनत्वसेतुत्वविधरणत्वादिभिस्तावदुभयत्र सैव विद्येति प्रत्यभिज्ञायते। वशित्वादयश्च वाजसनेयके श्रुताश्छान्दोग्ये श्रुतस्य गुणाष्टकान्यतमभूतस्य सत्यसंकल्पत्वस्य विशेषा एवेति सत्यसंकल्पत्वसहचारिणां सत्यकामत्वादीनामपहतपाप्मत्वपर्यन्तानां सद्भावमवगमयन्ति। अतो रूपं न भिद्यते। संयोगोपि परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते (छा. ८।३।४।)। अभयं वै ब्रह्म भवति (बृ. ४।४।२५) इति ब्रह्मप्राप्तिरूपो न भिद्यते। आकाशशब्दश्छान्दोग्ये परमात्मविषय इति दहर

3. E. reads अन्तर आकाशः for अन्तराकाशः.
12. B. reads भेदात् for अभेदात्
13. E. om. त्व after सत्यकाम.
18. B. om. त्व after संकल्प.

http://acharya.org

उत्तरेभ्यः (ब्र. सू. १।३।१३) इत्यत्र निर्णीतम् । वाजसनेयके त्वाकाशे शयानस्य वशित्वादिश्रवणात्तस्य शयानस्य परमात्मत्वे सति तदाधाराभिधायिन आकाशशब्दस्य तस्यान्ते सुषिरं सूक्ष्मम् (ना. १३।२) इति हृदयान्तर्गतस्य सुषिरशब्दवाच्यस्यावकाशस्याभिधायकत्वमवगम्यते । अतो विद्यैक्यम् ॥ ३८ ॥

अथ स्याद्यदुक्तं वाजसनेयके वशित्वादिभिः सह सत्यकामत्वादिसद्भावोवगम्यत इति तन्नोपपद्यते । वशित्वादीनामेव तत्र परमार्थतः सद्भावाभावात् । तदभावश्च

मनसैवानुद्रष्टव्यं नेह नानास्ति किंचन ।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥
एकधैवानुद्रष्टव्यमेतदप्रमेयं ध्रुवम् । (बृ. ४।४।१९-२०)

इति प्रकृतेन वाक्येन स एष नेति नेत्यात्मा (बृ. ४।४।२२) इत्युत्तरेण चोपास्यस्य ब्रह्मणो निर्विशेषत्वप्रतीतेरवगम्यते । अतो वशित्वादयोपि स्थूलत्वादिवन्निषेध्या इति प्रतीयन्ते । अत एव च्छान्दोग्येपि सत्यकामत्वादयो न ब्रह्मणः पारमार्थिका गुणा उच्यन्ते । अतोपारमार्थिकत्वादेवंजातीयकानां गुणानां मोक्षार्थेषूपासनेषु लोप इति । तत्राह ।

आदरादलोपः ॥ ३९ ॥

ब्रह्मगुणत्वेन प्रमाणान्तराप्रतिपन्नानां गुणानामेषां सत्यकामत्वादीनां तस्मिन्यदन्तस्तदन्वेष्टव्यम् (छा. ८।१।१) । एष आत्मापहतपाप्मा विजरो विमृत्युर्विशोकोविजिघत्सोपिपासः

---

5. C. om. अवकाशस्य; E. reads आकाशस्य for अवकाशस्य.

13. E. reads वक्ष्यमाणेन after इति.

14. C. reads अणुत्व after स्थूलत्व.

http://acharya.org

सत्यकामः सत्यसंकल्पः (छा. ८।१।५) । सर्वस्य वशी सर्वस्येशानः ।.... एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय (बृ. ४।४।२२) इत्यादिभिरनयोः श्रुत्योरन्यासु च मोक्षार्थोपासनोपास्यब्रह्मगुणत्वेन सादरमुपदेशादेषामलोपः । अपि तूपसंहार एव कार्यः । छान्दोग्ये तावत्तद्य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति (छा. ८।१।६) इति सत्यकामत्वादिगुणविशिष्टस्य ब्रह्मणो वेदनं विधायाथ य इहात्मानमननुविद्य व्रजन्त्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेष्वकामचारो भवति (छा. ८।१।६) इत्यवेदननिन्दा क्रियमाणा गुणविशिष्टवेदनस्यादरं दर्शयति । तथा वाजसनेयके सर्वस्य वशी सर्वस्येशानः ।...एष सर्वेश्वर एष भूताधिपतिरेष भूतपालः (बृ. ४।४।२२) इति भूयो भूय ऐश्वर्योपदेशाद्गुणेष्वादरः प्रतीयते । एवमन्यत्रापि ।

नच मातापितृसहस्रेभ्योपि वत्सलतरं शास्त्रं प्रतारकवदपारमार्थिकान्निरसनीयान्गुणान्प्रमाणान्तराप्रतिपन्नानादरेणोपदिश्य संसारचक्रपरिवर्तनेन पूर्वमेव बम्भ्रम्यमाणान्मुमुक्षून्भूयोपि भ्रमयितुमलम् । नेह नानास्ति किंचन (बृ. ४।४।१९) । एकधैवानुद्रष्टव्यम् (बृ. ४।४।२०) इति तु सर्वस्य ब्रह्मकार्यत्वेन तदात्मकत्वादेकधानुदर्शनं विधायाब्रह्मात्मकत्वेन पूर्वसिद्धनानात्वदर्शनं निषेधतीत्ययमर्थः प्रागेव प्रपञ्चितः । स एष नेति नेत्यात्मा (बृ. ४।४।२२) इत्यत्र चेतिशब्देन प्रमाणान्तरप्रतिपन्नं प्रपञ्चाकारं परामृश्य न

9. A. reads सर्वान् for सत्यान्.
11. E. reads आदरणीयताम् for आदरम्.
15. E. reads वात्सल्यपरम् for वत्सलतरम्.
23. C. E. read प्रकारम् for आकारम्.

http://acharya.org

तथाविधं ब्रह्मेति सर्वात्मभूतस्य ब्रह्मणः प्रपञ्चविलक्षणत्वं प्रतिपाद्यते । तदेव चानन्तरमुपपादयत्यग्राह्यो न हि गृह्यते । अशीर्यो न हि शीर्यते । असङ्गो न हि सज्जते । अव्यथितो न व्यथते न रिष्यति (बृ. ४।४।२२) इति । प्रमाणान्तरग्राह्यविसजातीयत्वात्प्रमाणान्तरेण न गृह्यते । विशरणीयविसजातीयत्वान्न विशीर्यते । एवमुत्तरत्रानुसंधेयम् । छान्दोग्येपि नास्य जरयैतज्जीर्यति न वधेनास्य हन्यत एतत्सत्यं ब्रह्मपुरमस्मिन्कामाः समाहिताः (छा. ८।१।५) इति सर्वविसजातीयत्वं ब्रह्मणः प्रतिपाद्य तस्मिन्सत्यकामत्वादयो विधीयन्ते ॥ ३९ ॥

नन्वेवमपि तद्य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति । स यदि पितृलोककामो भवति (छा. ८।१।६) इत्यादिना सत्यकामत्वादिगुणविशिष्टवेदनस्य सांसारिकफलसंबन्धश्रवणान्मुमुक्षोर्ब्रह्म प्रेप्सोर्न सगुणं ब्रह्मोपास्यम् । परविद्याफलं च परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते (छा. ८।३।४) इतीदमेव । अतः सत्यकामत्वादयो ब्रह्म प्रेप्सोर्नोपसंहार्या इति । अत उत्तरं पठति ।

उपस्थितेतस्तद्वचनात् ॥ ४० ॥

उपस्थितिरुपस्थानं ब्रह्मोपसंपत्तिः । उपस्थिते ब्रह्मोपसंपन्ने सर्वबन्धविनिर्मुक्ते स्वेन रूपेणाभिनिष्पन्ने प्रत्यगात्मन्यत एवो-

---

2. A. B. read उपपादयन्ति for उपपादयति; A. B. om. हि before गृह्यते.

3. E. reads सज्यते for सज्जते.

5. B. om न after प्रमाणान्तरेण.

7. A. B. read जीर्यते for जीर्यति.

13. E. om. त्व after सत्यकाम.

http://acharya.org

पसंपत्तेरेव हेतोः सर्वेषु लोकेषु कामचार उच्यते परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते । स उत्तमः पुरुषः । स तत्र पर्येति जक्षत्क्रीडन्रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा नोपजनं स्मरन्निदं शरीरम् (छा. ८।१२।३) । स स्वराड् भवति तस्य सर्वेषु लोकेषु कामचारो भवति (छा. ७।२५।२) इति । तदेतच्चतुर्थे निपुणतरमुपपादयिष्यते । अतः सर्वेषु लोकेषु कामचारस्य मुक्तोपभोग्यफलत्वान्मुमुक्षोः सत्यकामत्वादयो गुणा उपसंहार्याः ॥ ४० ॥ कामाद्यधिकरणं समाप्तम् । (१६)

तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ॥ ४१ ॥

ओमित्येतदक्षरमुद्गीथमुपासीत (छा. १।१।१) इत्यादीनि कर्माङ्गाश्रयाण्युपासनानि कर्माङ्गभूतोद्गीथादिमुखेन जुह्वादिमुखेन पर्णतादिवत्कर्माङ्गत्वेन निरूढानुष्ठानानीत्युद्गीथाद्युपासनसंबन्धिनो यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति (छा. १।१।१०) इति वर्तमाननिर्देशस्य पर्णतादिसंबन्ध्यपापश्लोकश्रवणवत्पृथक्फलत्वकल्पनायोगात्क्रतुषु नियमेनोपसंहार्याणीत्येवं प्राप्ते प्रचक्ष्महे तन्निर्धारणानियम इति । निर्धारणं निश्चयेन मनसोवस्थापनं ध्यानमित्यर्थः । तन्निर्धारणानियमः कर्मसूद्गीथाद्युपासनानामनियमः । कुतः । तद्दृष्टेः । उपलभ्यते ह्युपासनानुष्ठानानियमः । तेनोभौ कुरुतो यश्चैतदेवं वेद

3. C. om. ज्ञातिभिर्वा.

14. C. reads रूढानि for निरूढानुष्ठानानि.

16 C. om. भवति.

http://acharya.org

यश्च न वेद (छा. १।१।१०) इत्यविदुषोप्यनुष्ठानवचनात् । न चाङ्गत्वे सत्युपासनस्यानुष्ठानानियम उपपद्यते । एवमुपासनस्यानङ्गत्वे निश्चिते सत्युपासनविधेः फलाकाङ्क्षायां रात्रिसत्रन्यायेन वीर्यवत्तरत्वं कर्मफलात्पृथग्भूतमेव फलमित्यवगम्यते । किमिदं वीर्यवत्तरत्वम् । कर्मफलस्यैवाप्रतिबन्धः । प्रतिबध्यते हि कर्मफलं प्रबलकर्मान्तरफलेन । तावन्तं कालं तद्भावोप्रतिबन्धः । स ह्यप्रतिबन्धः कर्मफलात्स्वर्गादिलक्षणात्पृथग्भूतमेव फलम् । तदिदमुच्यते पृथग्घ्यप्रतिबन्धः फलमिति । अतः कर्माङ्गाश्रयाणामपि पृथक्फलत्वाद्गोदोहनादिवत्कर्मसूद्गीथाद्युपासनानामनियमेनोपसंहारः ॥ ४१ ॥ तन्निर्धारणानियमाधिकरणं समाप्तम् । (१७)

प्रदानवदेव तदुक्तम् ॥ ४२ ॥

दहरविद्यायां तद्य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामान् (छा. ८।१।६) इति दहराकाशस्य परमात्मन उपासनमुक्त्वैतांश्च सत्यान्कामानिति गुणानामपि पृथगुपासनं विहितम् । तत्र संशयो गुणचिन्तनेपि तत्तद्गुणविशिष्टतया दहरस्यात्मनश्चिन्तनमावर्तनीयमुत नेति । दहराकाशस्यैवापहतपाप्मत्वादीनां गुणित्वात्तस्य च सकृदेवानुसंधातुं शक्यत्वाद्गुणार्थं तच्चिन्तनं नानुवर्तनीयमिति प्राप्त उच्यते ।

---

1. C. reads अति for अपि after अविदुषः
7. A. B. read हि after तद्भाव०, C. om. स ह्यप्रतिबन्धः.
10. C. reads न नियमेन for अनियमेन.
16. C. om. तत् before तद्गुण.
18. C. reads गुणत्वात् for गुणित्वात्; E. reads सदा for सकृत्.
19. A. B. read आ for अनु before वर्तनीयम्.

http://acharya.org

प्रदानवदेवेति । प्रदानवदावर्तनीयमेवेत्यर्थः । यद्यपि दहराकाश एक एवापहतपाप्मत्वादीनां गुणानां गुणी । स च प्रथमं चिन्तितः । तथापि स्वरूपमात्राद्गुणविशिष्टाकारस्य भिन्नत्वादपहतपाप्मा विजरः (छा ८।१।५) इत्यादिना गुणविशिष्टतया चोपास्यत्वेन विहितत्वात्पूर्वं स्वरूपेणानुसंहितस्यापहतपाप्मत्वादिविशिष्टतयानुसंधानार्थमावृत्तिः कर्तव्या । यथेन्द्राय राज्ञे पुरोडाशमेकादशकपालं निर्वपेदिन्द्रायाधिराजायेन्द्राय स्वराज्ञे (तै. सं.२।३।६) इतीन्द्रस्यैव राजत्वादिगुणविशिष्टत्वेपि तत्तद्गुणसंबन्ध्याकारस्य भिन्नत्वात्प्रदानावृत्तिः क्रियते । तदुक्तं संकर्षणे नाना वा देवता पृथक्त्वात् (जै. सं. का. १४।२।१५) इति ॥ ४२ ॥ प्रदानाधिकरणं समाप्तम् । (१८)

लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॥ ४३ ॥

तैत्तिरीयके दहरविद्यानन्तरमधीयते

सहस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवम् ।
विश्वं नारायणं देवमक्षरं परमं प्रभुम् ॥ (ना. १३।१)

इत्यारभ्य सोक्षरः परमः स्वराट् (ना. १३।२) इत्यन्तम् । तत्र संशयः किं पूर्वप्रकृतविद्यैकविद्यात्वेन तदुपास्यविशेषनिर्धारणमनेन क्रियत उत सर्ववेदान्तोदितपरविद्योपास्यविशेषनिर्धारणमिति । किं युक्तम् । दहरविद्योपा-

---

1. B. reads प्रधान for प्रदान before वदेव and वदावर्तनीयम्.
2. A. reads पाप्मत्वादि for पाप्मत्वादीनाम्.
7. E. reads अनु before निर्वपेत्.
9. B. C. read प्रधान for प्रदान.
14. A. B. read तैत्तिरीयाः for तैत्तिरीयके.
15. E. reads संभवम् for शम्भुवम्.

http://acharya.org

स्यविशेषनिर्धारणमिति । कुतः । प्रकरणात् । पूर्वस्मिन्ननुवाके दहरविद्या हि प्रकृता

दहरं विपापं परवेश्मभूतं यत्पुण्डरीकं पुरमध्यसंस्थम् ।
तत्रापि दहरं गगनं विशोकस्तस्मिन्यदन्तस्तदुपासितव्यम् ॥
(ना. १२।३)

इति । अस्मिंश्चानुवाके

पद्मकोशप्रतीकाशं हृदयं चाप्यधोमुखम् । (ना. १३।२)

इत्यादिना हृदयपुण्डरीकाभिधानमस्य नारायणानुवाकस्य दहरविद्योपास्यविशेषनिर्धारणार्थत्वमुपोद्बलयतीति । एवं प्राप्ते प्रचक्ष्महे ।

लिङ्गभूयस्त्वादिति । अस्य निखिलपरविद्योपास्यविशेषनिर्धारणार्थत्वे भूयांसि लिङ्गानि दृश्यन्ते । तथा हि परविद्यास्वक्षरशिवशंभुपरब्रह्मपरज्योतिःपरतत्त्वपरमात्मादिशब्दनिर्दिष्टमुपास्यं वस्त्विह तैरेव शब्दैरनूद्य तस्य नारायणत्वं विधीयते । भूयसीषु विद्यासु श्रुताननूद्य नारायणत्वविधानभूयस्त्वं नारायण एव सर्वविद्यासूपास्यमस्थूलत्वादिविशेषितानन्दादिगुणकं परं ब्रह्मेति विशेषनिर्णये भूयो बहुतरं लिङ्गं भवति । अत्र लिङ्गशब्दश्चिह्नपर्यायः । चिह्नभूतं वाक्यं बहुतरमस्तीत्यर्थः । तद्धि प्रकरणाद्बलीयः । तदप्युक्तं प्रथमे काण्डे श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात् (जै. सू. ३।३।१४) इति ।

---

3. A. E. read विपाप्मम् for विपापम्.
9. E. om. विशेष after उपास्य; B. C. om. इति after उपोद्बलयति.
15. A. B. read भूयस्त्वात् for भूयस्त्वम्.
16. B. reads उपास्यः for उपास्यम्.
17. C. reads निर्णयः for निर्णये.
20. E. reads पर for पार.

http://acharya.org

यत्तूक्तं पद्मकोशप्रतीकाशम् (ना १३।२) इत्यादि वचनं दहरविद्याशेषत्वमस्योपोद्बलयतीति तन्न । बलीयसा प्रमाणेन सर्वविद्योपास्यविशेषनिर्धारणार्थत्वेवधृते सति दहरविद्यायामपि तस्यैव नारायणस्योपास्यत्वेन तद्वचनोपपत्तेः । न च सहस्रशीर्षम् (ना. १३।१) इत्यादिद्वितीयानिर्देशेन पूर्वानुवाकोदितोपासिना संबन्धः शङ्कनीयः । तस्मिन्यदन्तस्तदुपासितव्यम् (ना. १२।३) इत्युपासिगतेन कृत्प्रत्ययेनोपास्यस्य कर्मणोभिहितत्वात्तदुपास्ये द्वितीयानुपपत्तेः । विश्वमेवेदं पुरुषः (ना. १३।१) । तत्त्वं नारायणः परः (ना. १३।१) इत्यादिप्रथमानिर्देशाच्च प्रथमार्थे द्वितीया वेदितव्या ।

अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः। (ना. १३।१)
तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः ।
स ब्रह्म स शिवः सेन्द्रः सोक्षरः परमः स्वराट्॥ (ना. १३।२)

इति निर्देशैः सर्वस्मात्परो नारायण एव सर्वत्रोपास्य इति निर्णीयमानत्वाच्च प्रथमार्थे द्वितीयेति निश्चीयते ॥ ४३ ॥

लिङ्गभूयस्त्वाधिकरणं समाप्तम् । (१९)

पूर्वविकल्पः प्रकरणात्स्यात्क्रिया मानसवत् ॥४४॥

वाजसनेयकेग्निरहस्ये (श. ब्रा. १०।५।३) मनश्चितादयोग्नयः श्रूयन्ते मनश्चितो वाक्चितः प्राणचितश्चक्षुश्चितः श्रोत्रचितः कर्मचितोग्निचित इति । तत्र संशयः । किमेते मनश्चितादयः सांपादिकत्वेन विद्यारूपा अग्नयः क्रियामयक्र-

---

2. B. om. इति after उपोद्बलयति.

3. A. B. E. om. विशेष after उपास्य.

13. A B. read ब्रह्मा for ब्रह्म.

19. C. reads अनग्नय. for अग्नय..

21. C. reads विद्यारूप for विद्यारूपाः.

http://acharya.org

त्वनुप्रवेशेन क्रियारूपा आहोस्विद्विद्यामयक्रत्वनुप्रवेशेन विद्यारूपा एवेति विशये क्रियारूपत्वं तावदाह पूर्वविकल्प इत्यादिना । चित्याग्नित्वेन संपादितानामेषां मनश्चितादीनां क्रत्वनुप्रवेशसाकाङ्क्षाणां स्वदेशे क्रतुविध्यभावात्पूर्वत्रासद्वा इदमग्र आसीत् (श. ब्रा. १०।५।३।१) इत्यादिनेष्टकचितस्याग्नेः प्रकृतत्वात्तस्य च क्रियामयक्रत्वव्यभिचारित्वेन तत्र क्रतुसंनिधानात्तत्प्रकरणगृहीता मनश्चितादयस्तेनेष्टकचितेनाग्निना विकल्प्यमानाः क्रियारूपा एव स्युः । विद्यारूपाणामपि क्रियामयक्रत्वनुप्रवेशेन क्रियारूपत्वं मानसग्रहवदुपपद्यते । यथा द्वादशाहेविवाक्ये दशमेहनि मानसग्रहस्य मनोनिष्पाद्यग्रहणासादनस्तोत्रशस्त्रप्रत्याहरणभक्षणत्वेन विद्यारूपस्यापि क्रियामयक्रत्वङ्गतया क्रियारूपत्वं तथेहापि ॥ ४४ ॥

अतिदेशाच्च ॥ ४५ ॥

इतश्चेष्टकचितेनाग्निना मनश्चितादीनां विकल्पः क्रियारूपत्वं चावगम्यते । तेषामेकैक एव तावान्यावानसौ पूर्वः (श. ब्रा. १०।५।३।११) इति पूर्वस्येष्टकचितस्याग्नेर्वीर्यं मनश्चितादिष्वतिदिश्यते । तेन तुल्यकार्यत्वाद्विकल्पः । ततश्चेष्टकचितवत्तत्क्रतुनिर्वर्तनेन तदङ्गभूता मनश्चितादयः क्रियामयक्रत्वनुप्रवेशेन क्रियामया एवेति ॥ ४५ ॥

एवं प्राप्ते प्रचक्ष्महे ।

विद्यैव तु निर्धारणाद्दर्शनाच्च ॥ ४६ ॥

तुशब्दः पक्षं व्यावर्तयति । यदुक्तं मनश्चितादयः क्रियामय-

---

3. C. reads चित्ताग्नि for चित्याग्नि.
6 B. om. च after तस्य.
8. A. reads विकल्पमानाः for विकल्प्यमानाः.
19. E. reads क्रियारूपा. for क्रियामयाः.
20 A om. एवम्.
22. B. reads क्रियामयाक्रतु for क्रियामयक्रतु.

http://acharya.org

क्रत्वनुप्रवेशेन क्रियामया एवेति नैतदस्ति । विद्यारूपा एवैते । विद्यारूपक्रत्वन्वयिन इत्यर्थः । कुतः । निर्धारणाद्दर्शनाच्च । निर्धारणं तावत्ते हैते विद्याचित एव । विद्यया हैवैत एवंविदश्चिता भवन्ति (श. ब्रा. १०।५।३।१२) इति । वाङ्मनश्चक्षुरादिव्यापाराणामिष्टकादिवच्चयनानुपपत्तेर्मनसा संपादिताग्नित्वेन विद्यारूपत्वे सिद्धेपि विद्याचित एव । विद्यया हैवैते (श. ब्रा. १०।५।३।१२) इति चावधारणं विद्यामयक्रत्वन्वयेन विद्यारूपत्वज्ञापनार्थमिति निश्चीयते ।

दृश्यते चात्रैवैषां शेषी विद्यारूपः क्रतुः । ते मनसैवाधीयन्त मनसैवाचीयन्त मनसैषु ग्रहा अगृह्यन्त मनसास्तुवन्त मनसा शंसन्यत्किं च यज्ञे कर्म क्रियते यत्किं च यज्ञीयं कर्म मनसैव तेषु मनोमयेषु मनश्चित्सु मनोमयमक्रियत (श. ब्रा. १०।५।३।३) इति । इष्टकचितेष्वग्निषु यत्क्रियामयं यज्ञीयं कर्म क्रियते तन्मनोनिर्वर्त्येषु मनश्चिताद्यग्निषु मनोमयमेवाक्रियतेति वचनात्क्रतुरपि विद्यामयोत्र प्रतीयते ॥ ४६ ॥

नन्वत्र विधिपदाश्रवणात्फलसंबन्धाप्रतीतेश्चेष्टकचिताभ्युपस्थापितक्रियामयक्रतुप्रकरणाद्विद्यामयक्रत्वन्वयेन विद्यारूपतैषां बाध्येत । नेत्याह ।

---

1. B. reads क्रियारूपाः for क्रियामया'.

6. C. om. विद्यारूपत्वे, B. om. अपि after सिद्धे.

9. A. B. read एतेषाम् for एवैषाम्.

11. A. E. read मनसा पश्यति after शसन्, C. reads यज्ञियम् for यज्ञीयम् here and in l. 13.

12. A. B. read क्रियते for अक्रियत here and in l. 15.

18. B. reads बाध्यते for ।

श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥ ४७ ॥

श्रुतिलिङ्गवाक्यानां प्रकरणाद्बलीयस्त्वेन श्रुत्याद्यवगतः क्रतुरेषां तदन्वयश्च दुर्बलेन प्रकरणेन बाधितुं न शक्यते । श्रुतिस्तावत्ते हैते विद्याचित एव (श. ब्रा. १०।५।३।१२) इति । तान्विवृणोति विद्यया हैवैत एवंविदश्चिता भवन्ति (श. ब्रा. १०।५।३।१२) इति । विद्यया विद्यामयेन क्रतुना संबद्धा मनश्चितादयश्चिता भवन्तीत्यर्थः । तान्हैतानेवंविदे सर्वदा सर्वाणि भूतानि चिन्वन्त्यपि स्वपते (श. ब्रा. १०।५।३।१२) इति लिङ्गम् । वाक्यं चैवंविदे चिन्वन्ति (श. ब्रा. १०।५।३।१२) इति । समभिव्याहारो वाक्यम् । एवंविदे विद्यामयक्रतुमते सर्वदा सर्वाणि भूतानि चिन्वन्तीत्यर्थः । सर्वभूतकर्तृकं सर्वकालव्यापि चयनं मनसा संपादितं परिमितकर्तृकालक्रियामयेष्टकचितकार्यद्वारेण क्रत्वनुप्रवेशसंभवमलभमानं विद्यामयक्रत्वनुप्रवेशे लिङ्गं भवति ॥४७॥

यच्चेदमुक्तं विधिप्रत्ययाश्रवणात्फलसंबन्धाप्रतीतेश्च क्रियामयात्क्रतोरन्योत्र विद्यामयः क्रतुर्न संभवतीति तत्राह ।

---

5. A. B. read ताम् for तान्.

7. C. reads मनश्चिता· for मनश्चितादयश्चिताः.

8. A. B. read सदा for सर्वदा here and in l. 11; C. E. read वि before चिन्वन्त्यपि.

9. C. reads एवविधे for एवविदे.

12. E. reads वि before चिन्वन्तीत्यर्थ .

13. C. reads आ for सम् before पादितम्; C. reads इष्टकचिदकार्य for इष्टकचितकार्य.

http://acharya.org

अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववदृष्टश्च तदुक्तम् ॥ ४८ ॥

इष्टकचितान्वयिनः क्रियामयात्क्रतोर्विद्यामयोयं क्रतुः पृथक्त्वेनानुबन्धादिभ्यः पृथक्त्वहेतुभ्योवगम्यते। अनुबन्धा यज्ञानुबन्धिनो ग्रहस्तोत्रशस्त्रादयो मनसैषु ग्रहा अगृह्यन्त मनसास्तुवन्त मनसाशंसन् (श. ब्रा. १०।५।३।३) इत्यादिना प्रतिपादिताः । आदिशब्देन श्रुत्यादयः पूर्वोक्ता गृह्यन्ते। श्रुत्यादिभिः सानुबन्धैर्विद्यामयः क्रतुः पृथगवगम्यत इत्यर्थः। प्रज्ञान्तरपृथक्त्ववत् । यथा प्रज्ञान्तरं दहरविद्यादिक्रियामयात्क्रतोः पृथग्भूतं श्रुत्यादिभिरवगम्यत एवमयमपि । एवं चानुबन्धादिभिः पृथग्भूते विद्यामये यज्ञेवगते सति विधिः परिकल्प्यते। दृष्टश्चानुवादसरूपेषु कल्प्यमानो विधिः। तदुक्तं वचनानि त्वपूर्वत्वात् (जै. सू. १०।४।२०) इति। फलं च तेषामेकैक एव तावान्यावानसौ पूर्वः (श. ब्रा. १०।५।३। ११) इत्यतिदेशात् । स्वक्रतुद्वारेणेष्टकचितस्याग्नेर्यत्फलं तदेव मनश्चितादीनामपि स्वक्रतुद्वारेण फलमित्यवगम्यते॥४८॥

यत्पुनरतिदेशेन तुल्यवीर्यत्वावगमात्क्रियामयक्रत्वनुप्रवेशोवगम्यत इत्युक्तं तत्राह।

न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॥ ४९ ॥

नावश्यमतिदेशादवान्तरव्यापारस्यापि तुल्यतया भवितव्यं येन क्रियामयक्रत्वनुप्रवेश एषां स्यात् । यस्मात्कस्मा-

---

8. E. reads लिङ्ग after श्रुति.
12. C. reads स्वरूपेषु for सरूपेषु.
14. E. reads एव before एकैकः.

http://acharya.org

श्चित्सामान्यमात्रादतिदेशोपलब्धेः । उपलभ्यते हि स एष एव मृत्युर्य एष एतस्मिन्मण्डले पुरुषः (श. ब्रा. १०।५। २।२३) इत्यादिषु संहर्तृत्वादिसामान्यमात्रादतिदेशः । न हि तत्र मण्डलपुरुषस्य मृत्युवत्तल्लोकापत्तिस्तद्देशप्राप्तिरपि भवति । एवमिहापि मनश्चितादीनामिष्टकचिताग्निवद्भावातिदेशमात्रेणेष्टकचिताग्निदेशरूपक्रियामयक्रत्वनुप्रवेशेनापि न भवितव्यम् । अत इष्टकचिताग्नेः स्वक्रतुद्वारेण यत्फलं तदेव मनश्चितादीनामपि विद्यामयक्रतुद्वारेण फलमित्यतिदेशादवगम्यते ॥ ४९ ॥

परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः॥५०॥

परेण च ब्राह्मणेनास्यापि मनश्चिताद्यभिधायिनः शब्दस्य ताद्विध्यं तद्विधत्वं विद्यामयप्रतिपादित्वमवगम्यते । परेण हि ब्राह्मणेनायं वाव लोक एषोऽग्निश्चितस्तस्याप एव परिश्रिताः (श. ब्रा. १०।५।४।१) इत्यादिना स यो हैतदेवं वेद लोकं पृणानमेनं भूतमेतत्सर्वमभिसंपद्यते (श. ब्रा. १०। ५।४।१) इति पृथक्फला विद्यैव विधीयते । तथा वैश्वानरविद्यादौ च विद्यैव विधीयते । अतोऽग्निरहस्यस्य क्रियैकविषयत्वं नास्ति। एवं तर्हि विद्यामया मनश्चितादयो बृहदारण्यकेऽनुबन्धव्याः किमर्थमिहानुबध्यन्ते । तत्रोच्यते भूयस्त्वात्त्वनुबन्ध इति ।

4. C. reads अप्राप्तिः for प्राप्तिः.

12. B. reads विद्या for विद्यामय, C. reads प्रतिपादितत्वम् for प्रतिपादित्वम्.

15. C. reads लोक प्राणानाम् for लोकं पृणानम्, A. reads लोक पृणीनामेवभूतम् or लोक पृणानामेन भूतम् for लोकं पृणानमेन भूतम्.

17. E. om. च.

18. A. B. read अनुबद्धव्याः for अनुबन्धव्याः.

http://acharya.org

मनश्चितादिषु संपादनीयानामग्न्यङ्गानां भूयस्त्वात्तत्संनिधाविह्यानुबन्धः कृतः॥ ५० ॥ पूर्वविकल्पाधिकरणं समाप्तम्। (२०)

एक आत्मनः शरीरे भावात्॥ ५१ ॥

सर्वासु परविद्यासूपास्योपासनस्वरूपवदुपासकस्वरूपस्यापि ज्ञातव्यत्वमुक्तं त्रयाणामेव चैवमुपन्यासः प्रश्नश्च (ब्र. सू. १।४।६) इति। वक्ष्यति चास्य प्रत्यगात्मनः परमात्मात्मकत्वेनानुसंधानमात्मेति तूपगच्छन्ति ग्राहयन्ति च (ब्र.सू. ४।१।३) इति। किमयं प्रत्यगात्मा ज्ञाता कर्ता भोक्तेहामुत्र संचारक्षमोऽनुसंधेय उत प्रजापतिवाक्योदितापहतपाप्मत्वादिस्वरूपः। किं युक्तम्। ज्ञातृत्वाद्याकारमात्र इत्येके मन्यन्ते। कुतः। अस्योपासकस्यात्मनः शरीरे भावात्। आत्मनः शरीरे वर्तमानस्य तादृशमेव रूपम्। तावतैवानुसंधानेन तत्फलसिद्ध्युपपत्तेश्च। न हि कर्मस्वधिकृतानां स्वर्गादिफलार्थिनां ज्ञातृत्वाद्यतिरेकेण फलानुभवदशायां यादृशं रूपं तादृशं रूपं साधनानुष्ठानदशायामनुसंधातव्यम्। तावतैव साधनानुष्ठानतत्फलयोः सिद्धेरतिरिक्तानुसंधाने प्रयोजनाभावात्। तद्विशेषादिहापि तथैव। ननु चात्र यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति (छा. ३।१४। १) इति विशेषवचनादपहतपाप्मत्वाद्याकार एवानुसंधातव्य इत्यवगम्यते। नैवम्। तं यथा यथोपासते (मुद्र. ख. ३) इत्युपास्यविषयत्वात्तस्येति॥ ५१ ॥

एवं प्राप्ते प्रचक्ष्महे।

व्यतिरेकस्तद्भावभावित्वान्न तूपलब्धिवत्॥ ५२ ॥

न त्वेतदस्ति यज्ज्ञातृत्वाद्याकार एवानुसंधेय इति। अस्यात्मनः संसारदशाया मोक्षदशायां यो व्यतिरेकः सोपहतपाप्म-

---

11. A. B. C. om. आत्मनः.
24. B. C. read ससारदशायाम् for संसारदशाया; C. om. मोक्षदशायाम्.

http://acharya.org

त्वादिकोनुसंधेयः । अस्य मोक्षदशायां यादृशं रूपं तादृग्रूप एवोपासनवेलायामात्मानुसंधेय इत्यर्थः । कुतः । तद्भावभावित्वात्तद्रूपोपपत्तेः । यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति (छा. ३।१४।१)। तं यथा यथोपासते तथैव भवति (मुद्र. ख. ३) इति यथोपासनमेव हि प्राप्तिः श्रूयते। न च परस्वरूपमात्रविषयमेवेदमिति वक्तुं शक्यते । प्रत्यगात्मनोप्युपास्यभूतपरब्रह्मशरीरतयोपास्यकोटिनिक्षिप्तत्वात्। अतः प्रजापतिवाक्योदितापहतपाप्मत्वादिगुणकप्रत्यगात्मशरीरकपरमात्मोपासनस्य तथा रूपमेव प्राप्यमित्युक्तं भवति । अत एवैवंक्रतुरिहामुं लोकं प्रेत्याभिसंभवितास्मि (छा. ३।१४।४) इत्युच्यते । तस्मात्प्रत्यगात्मा प्राप्याकार एवानुसंधेयः ।

उपलब्धिवत् । ब्रह्मोपलब्धिवत् । यथा ब्रह्मोपलब्धिर्विहिता यथावस्थितब्रह्मस्वरूपविषया तथात्मोपलब्धिरपि यथावस्थितात्मस्वरूपविषयेत्यर्थः । कर्मस्वात्मस्वरूपानुसंधानं न कर्माङ्गम् । यजेत स्वर्गकाम इति कर्मानुष्ठानमेव हि फलाय चोद्यते। देहाद्यतिरिक्तज्ञातृत्वाद्याकारात्मावगतिः कालान्तरभाविफलसाधनकर्माधिकारार्थेति तावन्मात्रमेव तत्रापेक्षितमिति न किंचिदपहीनम् ॥ ५२ ॥ शरीरे भावाधिकरणं समाप्तम्। (२१)

---

3. B. E. read आपत्तेः for उपपत्ते..
5. C. reads परस्पर for परस्व.
7. C. reads परमात्म for परब्रह्म.
8. E. om. क after शरीर.
9. C. reads प्राप्तम् for प्राप्यम्.
14. E. om. न before कर्माङ्गम्.
16. B. om. आदि after देह.
18. C. reads अव for अप before हीनम्.

http://acharya.org

अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥ ५३ ॥

ओमित्येतदक्षरमुद्गीथमुपासीत (छा. १।१।१) । लोकेषु पञ्चविधं सामोपासीत (छा. २।२।१) । उक्थमुक्थमिति वै प्रजा वदन्ति तदिदमेवोक्थमियमेव पृथिवी (ऐ.आ.२।१।२)। अयं वाव लोक एषोऽग्निश्चित: (श. ब्रा. १०।५।४।१) इत्येवमाद्या: क्रत्वङ्गाश्रया उपासना भवन्ति । ता: किं यासु शाखासु श्रूयन्ते तास्वेव नियता उत सर्वासु शाखासूद्गीथादिषु संबध्यन्त इति विचार: । सर्ववेदान्तप्रत्ययत्वे स्थितेपि प्रतिवेदं स्वरभेदादुद्गीथादयो भिद्यन्त इति तत्र तत्र व्यवतिष्ठेरन्निति युक्ता शङ्का । किं युक्तम् । व्यवतिष्ठेरन्निति । कुत: । उद्गीथमुपासीत (छा. १।१।१) इति सामान्येनोद्गीथसंबन्धितया श्रुतायास्तस्यामेव शाखायां स्वरविशेपयुक्तस्योद्गीथविशेषस्य संनिधानात्तस्मिन्नेव विशेषे पर्यवसानं युक्तमित्येवमाद्यास्तास्वेव शाखासु व्यवतिष्ठेरन्निति। एवं प्राप्ते प्रचक्ष्महे ।

अङ्गावबद्धास्त्विति । तुशब्द: पक्षं व्यावर्तयति । न ह्युद्गीथाद्यङ्गावबद्धा उपासनास्तास्वेव शाखासु व्यवतिष्ठेरन् । अपि तु प्रतिवेदं संबध्येरन् । सर्वासु शाखास्वित्यर्थ: । हिशब्दो हेतौ । यस्माच्छ्रुत्यैवोद्गीथाद्यङ्गमात्रावबद्धास्तस्माद्यत्रोद्गीथादयस्तत्र सर्वत्र संबध्येरन् । यद्यपि स्वरभेदेनोद्गीथव्यक्तयो भिद्यन्ते तथापि सामान्येनोद्गीथश्रुत्या सर्वा व्यक्तय: संनिहिता इति न क्वचिद्व्यवस्थायां प्रमाणमस्ति । सर्वशाखाप्रत्ययन्यायेन च सर्वासु शाखासु क्रतुरेक: । अत: सर्वासु

5. E. reads वा for वाव.
10. C. reads शङ्का युक्ता for युक्ता शङ्का.
13. B. reads विशेप for विशेषे; E reads इति before इत्येवम्.
20. A. B. read सामान्य for सामान्येन.
22. C. om. च after न्यायेन.

http://acharya.org

शाखास्वेकस्य क्रतोः संनिधानात्क्रत्वङ्गभूतोद्गीथादयोपि संनिहिता इति नैकस्य संनिधिविशेषोस्तीति न व्यवस्था ॥ ५३ ॥

मन्त्रादिवद्वाविरोधः ॥ ५४ ॥

वाशब्दश्चार्थे । आदिशब्देन जातिगुणसंख्यासादृश्यक्रमद्रव्यकर्माणि गृह्यन्ते । यथा मन्त्रादीनामेकैकशाखास्वाम्नातानामपि शेषिणः क्रतोः सर्वशाखास्वेकत्वेन यथायथं श्रुत्यादिभिः सर्वासु शाखासु विनियोगो न विरुध्यते तद्वदिहाप्यविरोधः ॥ ५४ ॥ अङ्गावबद्धाधिकरणं समाप्तम् । (२२)

भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति ॥ ५५ ॥

प्राचीनशाल औपमन्यवः (छा. ५।११।१) इत्यारभ्य वैश्वानरविद्याम्नाता । तत्र वैश्वानरः परमात्मा त्रैलोक्यशरीर उपास्यः श्रुतः स्वर्लोकादित्यवाय्वाकाशाप्पृथिव्यवयवः । तत्र च द्यौर्मूर्धादित्यश्चक्षुर्वायुः प्राण आकाशः संदेहो मध्यकाय इत्यर्थः । आपो बस्तिः पृथिवी पादावित्यवयवविशेषाः ।

तत्र संशयः किमस्य त्रैलोक्यशरीरस्य व्यस्तस्योपासनं कर्तव्यमुत व्यस्तस्य समस्तस्य चाथ समस्तस्यैवेति । किं युक्तम् । व्यस्तस्येति । कुतः । उपक्रमे व्यस्तोपासनोपदेशात् । तथा ह्युपदिश्यते । औपमन्यवादयः किलोद्दालकषष्ठाः केकयमश्वपतिमुपसद्यात्मानमेवेमं वैश्वानरं संप्रत्यध्येषि तमेव नो ब्रूहि (छा. ५।११।६) इति पप्रच्छुः । स च तेभ्यः प्रत्येकं स्वोपास्यान्द्युप्रभृतीनुक्तवद्भ्यो मूर्धादिषु व्यस्तेषूपासनं तत्र तत्र फलं चोक्तवान् । अत्त्यन्नं पश्यति प्रियं भव-

---

12. B. om. अप् after आकाश.

21. C. om. व्यस्तेषु.

22. C. reads तत् for तत्र तत्र.

http://acharya.org

त्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते मूर्धा त्वेष आत्मनः (छा. ५।१२।२) इति । एष वै सुतेजा आत्मा वैश्वानरः (छा. ५।१२।१) इत्यादिना तेषु तेषूपासनेषूपास्यस्य वैश्वानरत्वं चाह । अतो व्यस्तस्योपासनं कर्तव्यम् । परत्र यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते (छा. ५।१८।१) इति द्युप्रभृतिप्रदेशावच्छिन्नमात्रे वैश्वानर उक्तस्य मूर्धाद्युपासनस्य समासेनोपसंहार इत्यवगन्तव्यम् ।

अपर आहैवमेव समस्तस्याप्युपासनं कार्यमिति । पृथक्फलनिर्देशात् । यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति (छा. ५।१८।१) इति । न चैतावता वाक्यभेदः । यथा भूमविद्योपक्रमे नामाद्युपासनं तत्फलं चाभिधायैष तु वा अतिवदति यः सत्येनातिवदति (छा. ७।१६।१) इत्यादिना भूमविद्यामुपदिश्य स स्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवति (छा. ७।२५।२) इति तत्फलं च व्यपदिशति । तत्र भूमविद्यापरत्वेपि वाक्यस्य नामाद्यवान्तरोपासनं तत्फलं चाङ्गीक्रियते तथेहापीति । एवं प्राप्तेभिधीयते ।

---

1. A. B. om. एवम्, C. reads एव for एवम्.
3. A. B. om. तेषु after तेषु.
4. E. reads एव after व्यस्तस्य.
6. C. reads विच्छिन्न for अवच्छिन्न.
10. E. om. आत्मानम्.
13. A. reads तत् before तत्फलम्.
17. A. B. read परस्यापि for परत्वेपि.
18. A. reads तत् before तत्फलम्.

भूम्नः क्रतुवज्ज्यायस्त्वमिति । भूम्नो विपुलस्य समस्तस्यैव ज्यायस्त्वं प्रामाणिकत्वमित्यर्थः । एकवाक्यत्वावगतेः । तथा हि प्राचीनशाल औपमन्यवः (छा. ५।११।१) इत्युपक्रम्योद्दालको वै भगवन्तोयमारुणिः संप्रतीममात्मानं वैश्वानरमध्येति तं हन्ताभ्यागच्छाम (छा. ५।११।२) इति वैश्वानरात्मबुभुत्सयौपमन्यवादयः पञ्च महर्षयस्तमुद्दालकमुपेत्य तत्र वैश्वानरात्मवेदनमलभमानास्तेन च सहाश्वपतिं केकयं वैश्वानरात्मवेदिनमुपसङ्गम्यात्मानमेवेमं वैश्वानरं संप्रत्यध्येषि तमेव नो ब्रूहि (छा. ५।११।६) इति पृष्ट्वा तत्सकाशात्परमात्मानं वैश्वानरं स्वर्लोकादिपृथिव्यन्तशरीरमुपास्यमवगम्य तत्फलं च सर्वलोकसर्वभूतसर्वात्मान्नभूतब्रह्मानुभवमवगतवन्त इत्युपसंहारतो वाक्यस्यैकत्वमवगम्यते । एवमेकवाक्यत्वेवगते सत्यवयवविशेषेषूपास्तिवचनं फलनिर्देशश्च समस्तोपासनैकदेशानुवादमात्रमिति निश्चीयते ।

क्रतुवत् । यथा वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते (तै. सं. २।२।५) इति विहितस्यैव क्रतोरेकदेशा यदष्टाकपालो भवति (तै. सं. २।२।५) इत्यादिभिरनूद्यन्ते तथा समस्तोपासनमेव न्याय्यं न व्यस्तोपासनम् । तथा हि दर्शयतीयं श्रुतिर्व्यस्तोपासनेनर्थं ब्रुवती मूर्धा ते व्यपतिष्यद्यन्मां नागमिष्य इति (छा. ५।१२।२) । अन्धो भविष्यसि यन्मां

---

1. B. om. क्रतुवत.
4. A. B. E. read इ after उद्दालकः.
8. E. reads उपसंगत्यात्मानम् for उपसगम्यात्मानम्.
12. B. reads उपसहरतः for उपसहारतः.
16. B. om. एव after विहितस्य.
17. A. B. read इत्यादिना for इत्यादिभिः.
19. C. om. इयम् before श्रुतिः.
20. B. om. अन्धो भविष्यसि यन्मां नागमिष्य इति.

http://acharya.org

नागमिष्य: (छा. ५।१३।२) इत्यादिका । अत इदमप्यपास्तं यन्नामाद्युपासनसाम्यमुक्तम् । तत्र हि नामाद्युपासनेष्वनर्थो न श्रुत: । नामाद्युपासनेभ्यो भूमोपासनस्यातिशयितफलत्वं श्रुतमेष तु वा अतिवदति य: सत्येनातिवदति (छा. ७।१६।१) इति । तत एव तत्र भूमविद्यापरत्वेपि वाक्यस्य नामाद्युपासनानां सफलानां विवक्षितत्वम् । अन्यथातिशयितफलत्वनिमित्तातिवादेन भूमविद्यास्तुत्यनुपपत्ते: । अत: समस्तोपासनमेव न्याय्यम् ॥ ५५ ॥ भूमज्यायस्त्वाधिकरणं समाप्तम् । (२३)

नाना शब्दादिभेदात् ॥ ५६ ॥

इह ब्रह्मविद्या: सर्वा ब्रह्मप्राप्तिरूपमोक्षैकफला: सद्विद्याभूमविद्यादहरविद्योपकोसलविद्याशाण्डिल्यविद्यावैश्वानरविद्यानन्दमयविद्याक्षरविद्यादिका एकशाखागता: शाखान्तरगताश्चोदाहरणम् । अन्या: प्राणाद्येकविषयफलाश्च । किमत्र विद्यैक्यमुत विद्याभेद इति संशय्यते । अत्रैवासां परस्परभेदे समर्थिते सत्येकस्या दहरविद्यादिकाया: सर्ववेदान्तप्रत्ययन्याय: । किं युक्तम् । विद्यैक्यमिति । कुत: । वेद्यस्य ब्रह्मण एकत्वात् । वेद्यं हि विद्याया रूपम् । अतो रूपैक्याद्विद्यैक्यमिति । एवं प्राप्तेभिधीयते ।

नानेति । नानाभूता विद्या: । कुत: । शब्दादिभेदात् । आदिशब्देनाभ्याससंख्यागुणप्रक्रियानामधेयानि गृह्यन्ते । शब्दान्तरादिभिरत्र विधेयभेदहेतवोनुबन्धभेदा दृश्यन्ते । यद्यपि वेदोपासीतेत्यादय: शब्दा: प्रत्ययावृत्त्यभिधायिन: प्रत्ययाश्च ब्रह्मैकविषयास्तथापि तत्तत्प्रकरणोदितजगदेककारणत्वापह-

11. B. reads उपकोशल for उपकोसल.

12. A. B. read अत्र after एकशाखा.

20. C. om. प्र before क्रिया.

http://acharya.org

तपाप्मत्वादिविशेषणविशिष्टब्रह्मविषयप्रत्ययावृत्त्यवबोधिनः प्रत्यावृत्तिरूपा विद्या भिन्दन्ति। ब्रह्मप्राप्तिरूपफलसंबन्ध्युपासनविशेषाभिधायीनि च निराकाङ्क्षाणि वाक्यानि प्रतिप्रकरणं विलक्षणविद्याभिधायीनीति निश्चीयते। अस्मिन्नर्थे शब्दान्तरे कर्मभेदः (जै. सू. २।२।१) इत्यादिभिः पूर्वकाण्डोदितैः सूत्रैः सिद्धेपि पुनरिह प्रतिपादनं वेदान्तवाक्यान्यभिधेयज्ञानपराणीति कुदृष्टिनिरसनाय। अतो विद्याभेद इति स्थितम्॥ ५६॥ शब्दादिभेदाधिकरणं समाप्तम्। (२४)

विकल्पोविशिष्टफलत्वात्॥ ५७॥

ब्रह्मप्राप्तिफलानां सद्विद्यादहरविद्यादीनां नानात्वमुक्तम्। इदानीमासां विद्यानां किमेकस्मिन्पुरुषे प्रयोजनवत्त्वेन समुच्चयोपि संभवत्युत प्रयोजनाभावाद्विकल्प एवेति विशये किं युक्तम्। समुच्चयोपि संभवतीति। कुतः। एकफलानां भिन्नशास्त्रार्थानामपि समुच्चयदर्शनात्। दृश्यते ह्येकस्यैव स्वर्गादेः साधनानामग्निहोत्रदर्शपूर्णमासादीनां तस्यैव स्वर्गस्य भूयस्त्वापेक्षयैकत्र पुरुषे समुच्चयः। एवमिहापि ब्रह्मानुभवभूयस्त्वापेक्षया समुच्चयोपि संभवतीति। एवं प्राप्ते प्रचक्ष्महे।

विकल्प एव न समुच्चयः संभवति। कुतः। अविशिष्टफलत्वात्। सर्वासां हि ब्रह्मविद्यानामनवधिकातिशयानन्दब्रह्मानुभवः फलमविशिष्टं श्रूयते ब्रह्मविदाप्नोति परम् (तै. २।१)। स एको ब्रह्मण आनन्दः। श्रोत्रियस्य चाकामहतस्य (तै. २।८)।

6-7. A. B. read अविधेय for अभिधेय.

11. A. B. om. किम् after विद्यानाम्; A. reads प्रयोजनत्वेन for प्रयोजनवत्त्वेन.

18. E. reads इति after संभवति.

http://acharya.org

यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् ।
तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति ॥
(मु. ३।१।३)

इत्यादिभ्यः । ब्रह्म हि स्वस्य परस्य च स्वयमनुभूयमानमनवधिकातिशयानन्दं भवति । स च तादृशो ब्रह्मानुभव एकया विद्ययावाप्यते चेत्किमन्ययेति न समुच्चयसंभवः । स्वर्गादेर्हि देशतः कालतः स्वरूपतश्च परिमितत्वेन तत्र देशाद्यपेक्षया भूयस्त्वसंभवात्तदर्थिनः समुच्चयः संभवति । इह तु तद्विपरीतस्वरूपे ब्रह्मणि तन्न संभवति । सर्वाश्च विद्या ब्रह्मानुभवविरोध्यनादिकर्माविद्यानिरसनमुखेन ब्रह्मप्राप्तिफला इत्यविशिष्टफलत्वात्सर्वासां विकल्प एव । ब्रह्मप्राप्तिव्यतिरिक्तफलास्तु विद्याः स्वर्गादिफलकर्मवद्यथेष्टं विकल्पेरन्समुच्चीयेरन्वा । तासां परिमितफलत्वेन भूयस्त्वापेक्षासंभवात् ॥ ५७ ॥

तदाह ।

काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥ ५८ ॥

अपरिमितफलत्वाभावादित्यर्थः ॥ ५८ ॥ विकल्पाधिकरणं समाप्तम् । (२५)

अङ्गेषु यथाश्रयभावः ॥ ५९ ॥

उद्गीथादिक्रत्वङ्गेष्वाश्रिता ओमित्येतदक्षरमुद्गीथमुपासीत

---

4. E. reads स्वरूपम् for स्वयम्.
6. C. om. न before समुच्चय.
8. E reads इति after संभवति.
12. E. reads विकल्प्येरन् for विकल्पेरन्.

http://acharya.org

(छा. १।१।१) इत्यादिका विद्याः किमुद्गीथादिवत्क्रत्वर्थतया क्रतुषु नियमेनोपादेया उत गोदोहनादिवत्पुरुषार्थतया यथाकाममिति विशये नियमेनोपादेया इति युक्तम् । ननु चासां पुरुषार्थत्वेनानियमः प्रतिपादितस्तन्निर्धारणानियमस्तद्दृष्टेः पृथग्ध्यप्रतिबन्धः फलम् (ब्र. सू. ३।३।४१) इत्यत्र । सत्यम् । तदेव द्रढयितुं कैश्चिल्लिङ्गदर्शनैर्युक्त्या चाक्षिप्यते । तत्र हि तेनोभौ कुरुतः (छा. १।१।१०) इत्यनियमदर्शनात्पृथक्फलत्वमुक्तम् । उपासनाश्रयभूतोद्गीथादिवदुपासनानामप्यङ्गतयोपादाननियमे बहवो हेतव उपलभ्यन्ते । न ह्यत्र गोदोहनेन पशुकामस्य प्रणयेदित्यादिवदुपासनाविधिवाक्ये फलसंबन्धः श्रूयते । उद्गीथमुपासीत (छा. १।१।१) इत्युद्गीथादिसंबन्धितयैवोपासनं प्रतीयते । यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरम् (छा. १।१।१०) इति वर्तमानापदेशरूपवाक्यान्तराद्धि फलसंबन्धो ज्ञायते । स्ववाक्येनैवाव्यभिचरितक्रतुसंबन्ध्युद्गीथादिसंबन्धेन निर्ज्ञातक्रत्वङ्गभावस्य वाक्यान्तरस्थवर्तमानफलसंबन्धनिर्देशोऽर्थवादमात्रं स्यात् । अपापश्लोकश्रवणादिवत् । अतो यथोद्गीथादय उपासनाश्रयाः क्रत्वङ्गतया प्रयोगविधिना नियमेनोपादीयन्ते तथा तदाश्रिताश्चोपासनास्तन्मुखेन क्रत्वङ्गभूता इति नियमेनोपादेया एव ॥ ५९ ॥

शिष्टेश्च ॥ ६० ॥

शिष्टिः शासनं विधानमित्यर्थः । उद्गीथमुपासीत (छा.

---

3. B. om. यथा before कामम्.
4. C. reads अपुरुषार्थत्वेन for पुरुषार्थत्वेन.
14 A. B. read निर्देश for अपदेश.
.१६. A. B. om. आदि after उद्गीथ, C. reads विज्ञात for निर्ज्ञात.

http://acharya.org

१।१।१) इत्युद्गीथाङ्गतयोपासनविधानाच्चोपादाननियमः । गोदोहनेन पशुकामस्य प्रणयेदित्यादिवद्विधिवाक्येधिकारान्तराश्रवणादुद्गीथाद्यङ्गभाव एव हि विधेय इति गम्यते ॥ ६० ॥

समाहारात् ॥ ६१ ॥

होतृषदनाद्धैवापि दुरुद्गीथमनुसमाहरति (छा. १।५।५) इत्युपासनस्य समाहारनियमो दृश्यते । दुरुद्गीथं वेदनविहीनमुद्गीथम् । वेदनहानावन्येन समाधानं ब्रुवंस्तस्य नियमेनोपादानं दर्शयति ॥ ६१ ॥

गुणसाधारण्यश्रुतेश्च ॥ ६२ ॥

उपासनगुणस्योपासनाश्रयस्य प्रणवस्य सोपासनस्य तेनेयं त्रयी विद्या वर्तत ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायति (छा. १।१।९) इति साधारण्यश्रुतेश्चोपासनसमाहारो गम्यते । तेनेति प्रकृतपरामर्शात्सोपासन एव प्रणवः सर्वत्र संचरति । अत उपासनस्य प्रणवसहभावनियमदर्शनाच्चोद्गीथाद्युपासनानामुद्गीथादिवन्नियमेनोपादानम् ॥ ६२ ॥

इति प्राप्त उच्यते ।

न वा तत्सहभावाश्रुतेः ॥ ६३ ॥

न वैतदस्ति यदुद्गीथाद्युपासनानां क्रतुषूद्गीथादिवदुपादाननियम इति । कुतः । तत्सहभावाश्रुतेः । उद्गीथाङ्गभावा-

---

2. C. reads इतिवत् for इत्यादिवत्.

6-7. C. om. वेदनविहीनमुद्गीथम्; C. E. read ब्रुवत् for ब्रुवन्.

12. A. B. read अत before गम्यते.

13. C. reads प्राण. for प्रणवः.

14. B. reads श्रवण for प्रणव.

18. E. reads न चैतत् for न वैतत्.

http://acharya.org

श्रुतेरित्यर्थः । अङ्गभावे हि सहभावनियमो भवति । यद्यप्युद्गीथमुपासीत (छा. १।१।१) इत्यस्मिन्पदसमुदायेधिकारान्तरं न प्रतीयते तथापि तदनन्तरमेव यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति (छा. १।१।१०) इति विद्यायाः क्रतुवीर्यवत्तरत्वं प्रति साधनभावः प्रतिपाद्यते । तेन क्रतुफलात्पृथग्भूतफलसाधनभूता विद्योद्गीथमुपासीत (छा. १।१।१) इति कर्तव्यतया विधीयते । क्रतुफलात्पृथग्भूतफलसाधनतयावगतस्योपासनस्य क्रत्वङ्गभूतोद्गीथाङ्गतया विनियोगो नोपपद्यते । अत उपासनस्याश्रयापेक्षायां संनिहित उद्गीथ आश्रयमात्रं भवति । उद्गीथश्च क्रत्वङ्गभूत इति क्रतुप्रयुक्तोद्गीथाद्याश्रय उपासने क्रत्वधिकारिण एव क्रतोर्वीर्यवत्तरत्वेच्छानिमित्तमिदमधिकारान्तरमिति न क्रतुषु तदुपादाननियमः । वीर्यवत्तरत्वं च क्रतुफलस्य प्रबलकर्मान्तरफलेनाप्रतिबन्ध इत्युक्तम् । क्रतोरविलम्बितफलत्वमित्यर्थः । पर्णतादीनां तु यदेव विद्यया करोति तदेव वीर्यवत्तरं भवति (छा. १।१।१०) इति विद्यायाः फलसाधनत्ववदपापश्लोकश्रवणादिफलं प्रति साक्षात्साधनभावो न श्रुत इति क्रत्वङ्गभूतजुह्वाद्यङ्गतया विनियोगाविरोधात्तदङ्गभूतानां फलान्तरसाधनभावकल्पनानुपपत्तेस्तत्र फलश्रुतिरर्थवादमात्रं स्यात् ॥ ६३ ॥

दर्शनाच्च ॥ ६४ ॥

दर्शयति च श्रुतिरुपासनोपादानानियममेवंविद्ध वै

---

5. C. reads विद्यया for विद्याया' क्रतु
11. A. B. om. आदि after उद्गीथ.
12. C. om. इदम्
17. C. reads श्रुति after साधनत्व.
22. B. om. च after दर्शयति.

ब्रह्मा यज्ञं यजमानं सर्वांश्च ऋत्विजोभिरक्षति (छा. ४।१७। १०) इति ब्रह्मणो वेदनेन सर्वेषां रक्षणं ब्रुवती। उद्गातृप्रभृतीनां वेदनस्यानियमे सत्येतदुपपद्यते । अनेन लिङ्गेन पूर्वोक्तानां समाहारादिलिङ्गानां प्रायिकत्वमवगम्यते । अतोनियम एवेति स्थितम् ॥ ६४ ॥ यथाश्रयभावाधिकरण समाप्तम्। (२६)

इति श्रीभगवद्रामानुजाचार्यविरचिते शारीरकमीमांसाभाष्ये तृतीयाध्यायस्य तृतीयः पादः ॥ ३ ॥

1. B. reads ब्रह्मयज्ञम् for ब्रह्मा यज्ञम्.

http://acharya.org

अथ श्रीभाष्ये

तृतीयाध्याये चतुर्थः पाद आरभ्यते ॥

पुरुषार्थोतः शब्दादिति बादरायणः ॥ १ ॥

गुणोपसंहारानुपसंहारफला विद्यैकत्वनानात्वचिन्ता कृता । इदानीं किं विद्यातः पुरुषार्थ उत विद्याङ्गकात्कर्मण इति चिन्त्यते । किं युक्तम् । अतो विद्यातः पुरुषार्थ इति भगवान्बादरायणो मन्यते । कुतः । शब्दात् । दृश्यते ह्यौपनिषदः शब्दो विद्यातः पुरुषार्थं ब्रुवन्ब्रह्मविदाप्नोति परम् (तै. २।१) ।

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
तमेवं विद्वानमृत इह भवति नान्यः पन्था विद्यतेयनाय ॥
(श्वे. ३।८)

यथा नद्यः स्यन्दमानाः समुद्रेस्तं गच्छन्ति नामरूपे विहाय ।
तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ॥
(मु. ३।२।८)

इत्यादिः ॥ १ ॥

तत्र पूर्वपक्षी प्रत्यवतिष्ठते ।

शेषत्वात्पुरुषार्थवादो यथान्येष्विति जैमिनिः ॥ २ ॥

नैतदेवं यद्विद्यातः पुरुषार्थावाप्तिः शब्दादवगम्यत इति ।

---

5. A. B. E. om. किम् after इदानीम्; C. reads विद्याङ्गात् for विद्याङ्गकात्.

8. C. reads पुरुषार्थं इति for पुरुषार्थम्

16. C. reads अत्र for तत्र.

http://acharya.org

न ह्येष ब्रह्मविदाप्नोति परम् (तै. २।१) इत्यादिशब्दो वेदनात्पुरुषार्थावाप्तिमवगमयति । कर्मसु कर्तृभूतस्यात्मनो याथात्म्यवेदनप्रतिपादनपरत्वात् । अतः कर्तुः संस्कारद्वारेण विद्यायाः क्रतुशेषत्वात्तत्र फलश्रुतिरर्थवादमात्रं यथान्येषु द्रव्यादिष्विति जैमिनिराचार्यो मन्यते । तदुक्तं द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः स्यात् (जै. सू. ४।३।१) इति ।

ननु च कर्मसु कर्तुर्जीवादन्यो मुमुक्षुभिः प्राप्यतया वेदान्तेषु वेद्य उपदिश्यत इति प्रागेवोपपादितं नेतरोऽनुपपत्तेः (ब्र.सू. १।१।१७)। भेदव्यपदेशाच्च (ब्र. सू. १।१।१८) । अनुपपत्तेस्तु न शारीरः (ब्र. सू. १।२।३) । इतरपरामर्शात्स इति चेन्नासंभवात् (ब्र. सू. १।३।१७) इत्येवमादिभिः सूत्रैः । तदेव ब्रह्म तत्त्वमसि (छा. ६।८।७) इत्यादिसामानाधिकरण्येन जीवादनतिरिक्तमित्येतदप्यधिकं तु भेदनिर्देशात् (ब्र. सू. २।१।२२) इत्येवमादिभिर्निरस्तम् । सामानाधिकरण्यनिर्देशश्चैतदात्म्यमिदं सर्वम् (छा. ६।८।७)। सर्वं खल्विदं ब्रह्म (छा. ३।१४।१) इति चेतनाचेतनसाधारणो यः पृथिव्यां तिष्ठन् (बृ. ३।७।३) । य आत्मनि तिष्ठन् (श. ब्रा. १४।६।७।३०) इत्यादिनावगततत्तदात्मतयावस्थितिनिबन्धन इत्यवस्थितेरिति काशकृत्स्नः (ब्र. सू. १।४।२२) इत्यादिभिरुपपादितम् । तत्कथं कर्मसु कर्तुरात्मनो याथात्म्योपदेशपरा वेदान्तशब्दा इति विद्यायाः कर्माङ्गत्वं प्रतिपाद्यते। उच्यते। वेदान्तवाक्येष्वेव विद्यायाः कर्मप्राधान्यं सूचयद्भिर्लिङ्गैस्तदुपबृंहितसामानाधिकरण्यनिर्देशेन

---

1. C. reads इत्यादिः for इत्यादि.
4. A. B. read तत् for तत्र.
5. A. E. read गुण after द्रव्य.
12. E. om. इति after तत्त्वमसि.

http://acharya.org

च वेदान्तशब्दा देहातिरिक्तजीवस्वरूपयाथात्म्योपदेशपरा इति बलादभ्युपगमनीयमिति पूर्वपक्षिणोभिप्रायः ।

ननु च कर्तृसंस्कारमुखेन विद्यायाः क्रत्वनुप्रवेशो न शक्यते वक्तुम् । कर्तुर्लौकिकवैदिकसाधारणत्वेनाव्यभिचरितक्रतुसंबन्धित्वाभावात् । नैवम् । लौकिकस्य कर्मणः कर्तुर्देहादव्यतिरिक्तत्वेप्युपपत्तेर्देहातिरिक्तनित्यात्मस्वरूपस्य क्रतावेवोपयोगात्तत्स्वरूपप्रतिपादनमुखेन क्रत्वनुप्रवेशो न विरुध्यते । अतो विद्यायाः क्रतुशेषत्वान्नातः पुरुषार्थः ॥ २ ॥

कानि पुनस्तानि लिङ्गानि यदुपबृंहितसामानाधिकरण्यनिर्देशेन वेदान्तशब्दा जीवस्वरूपपरा इति निर्णीयन्ते तत्राह ।

आचारदर्शनात् ॥ ३ ॥

ब्रह्मविदां प्राधान्येन कर्मस्वेवाचारो दृश्यतेश्वपतिः केकयः किलात्मवित्तमस्तद्विज्ञानायोपगतांस्तानृषीन्प्रत्याह यक्ष्यमाणो ह वै भगवन्तोहमस्मि (छा. ५।११।५) इति । तथा च जनकादयो ब्रह्मविदग्रेसराः कर्मनिष्ठाः स्मृतिषु दृश्यन्ते

कर्मणैव हि संसिद्धिमास्थिता जनकादयः । (गी. ३।२०)
इयाज सोपि सुबहून्यज्ञाञ्ज्ञानव्यपाश्रयः ।
(वि. पु. ६।६।१२)

इति । अतो ब्रह्मविदां कर्मप्रधानत्वदर्शनाद्विद्यायाः कर्तुः स्वरूपवेदनपरत्वेन कर्माङ्गत्वमेवेति न विद्यातः पुरुषार्थः ॥३॥

---

3. C. reads कर्तुः for कर्तृ.
5. A. B. read लौकिक for लौकिकस्य.
10. C. reads निर्णीयते for निर्णीयन्ते.
15. C. reads च after स्मृतिषु.
19. A. B. read कर्तृ for कर्तुः

http://acharya.org

लिङ्गमिदं प्राप्तिरुच्यतामित्यत्राह ।

तच्छ्रुतेः ॥ ४ ॥

श्रुतिरेव हि विद्यायाः कर्माङ्गत्वमाह यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति (छा. १।१।१०) इति । नेयं श्रुतिः प्रकरणादुद्गीथमात्रविषयेति व्यवस्थापयितुं शक्या । यतः प्रकरणाच्छ्रुतिर्बलीयसी । यदेव विद्यया करोति (छा. १।१।१०) इति विद्यामात्रविषया ह्रीयं श्रुतिः ॥ ४ ॥

समन्वारम्भणात् ॥ ५ ॥

तं विद्याकर्मणी समन्वारभेते (बृ. ४।४।२) इति विद्याकर्मणोः साहित्यं च दृश्यते । साहित्यं चोक्तेन न्यायेन विद्यायाः कर्माङ्गत्वे सत्येव भवति ॥ ५ ॥

तद्वतो विधानात् ॥ ६ ॥

विद्यावतः कर्मविधानाद्विद्या कर्माङ्गमित्यवगम्यते । आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे (छा. ८।१५।१) इत्यादौ वेदमधीत्येत्यध्ययनवतः कर्माणि विदधदर्थावबोधपर्यन्ताध्ययनवत एव विदधाति । अर्थावबोधपर्यन्तं ह्यध्ययनमिति स्थापितम् । अतो ब्रह्मविद्यापि कर्मसु विनियुक्तेति न पृथक्फलायावकल्पते ॥ ६ ॥

नियमात् ॥ ७ ॥

इतश्च न विद्यातः पुरुषार्थः ।

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः । (ई. २)

इत्यात्मविदः पुरुषायुषस्य सर्वस्य कर्मसु नियमेन विनियोगात्कर्मण एव फलमित्यवगम्यते । विद्या तु कर्माङ्गमिति ॥ ७ ॥

---

13. C. reads कर्तुः for कर्म before विधानात्.
17. C. om. इति after अध्ययनम्.
23. C. reads नियमन for नियमेन

एवं प्राप्ते प्रचक्ष्महे ।

अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॥ ८ ॥

तुशब्दात्पक्षो व्यावृत्तः । विद्यात एव पुरुषार्थः । कुतः । अधिकोपदेशात् । कर्मसु कर्तुर्जीवाद्धेयप्रत्यनीकानवधिकातिशयासंख्येयकल्याणगुणाकरत्वेनाधिकस्यार्थान्तरभूतस्य परस्य ब्रह्मणो वेद्यतयोपदेशाद्भगवतो बादरायणस्य विद्यातः फलमित्येव मतम् ।

लिङ्गानि तिष्ठन्तु । वेद्यतयोपदेशस्तु तावत्कर्तुः प्रत्यगात्मनोधिकस्यैव । कथम् । तद्दर्शनात् । प्रत्यगात्मन्यशुद्धे शुद्धेप्यसंभावनीयानन्तगुणाकरस्य वेद्यस्य निरस्तनिखिलहेयगन्धस्य स्वसंकल्पकृतजगदुदयविभवलयलीलस्य सर्वज्ञस्य सर्वशक्तेर्वाङ्मनसापरिच्छेद्यानन्दस्य जीवाधिपस्य कृत्स्नस्य प्रशासितुः परस्य ब्रह्मणो वेदनोपदेशवाक्येषु दर्शनादपहतपाप्मा विजरो विमृत्युर्विशोकोविजिघत्सोपिपासः सत्यकामः सत्यसंकल्पः (छा. ८।१।५) । तदैक्षत । बहु स्यां प्रजायेयेति । तत्तेजोसृजत (छा. ६।२।३) । यः सर्वज्ञः सर्ववित् (मु. १।१।९) ।

परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ।
(श्वे. ६।८)

स एको ब्रह्मण आनन्दः (तै. २।८) ।

यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।
आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति ॥ (तै. २।९)

---

7. A. B. read एवम् before एव मतम्.
8. C. om. तु after उपदेशः.
9. C. om. शुद्धे before अपि.
10 A. B. read निखिलनिरस्त for निरस्तनिखिल.
11. C. reads वि before लय.

http://acharya.org

एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरणः (बृ. ४।४।२२)।

स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः। (श्वे. ६।९)

एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः (बृ. ३।८।९)। भीषास्माद्वातः पवते। भीषोदेति सूर्यः। भीषास्मादग्निश्चेन्द्रश्च। मृत्युर्धावति पञ्चमः (तै. २।८) इत्यादिषु। तस्माद्वेदनोपदेशशब्देषु कर्तुः प्रत्यगात्मनः खद्योतकल्पस्याविद्यादिहेयसंबन्धयोग्यस्य गन्धोपि नास्तीति परमपुरुषविषयाया विद्यायास्तत्प्राप्तिरूपममृतत्वं तत्र तत्र श्रूयमाणं फलमिति विद्यातः पुरुषार्थ इति सुष्ठूक्तम्॥ ८॥

लिङ्गान्यपि निरस्यन्ते।

तुल्यं तु दर्शनम्॥ ९॥

यदुक्तं ब्रह्मविदां कर्मानुष्ठानदर्शनाद्विद्या कर्माङ्गमिति तन्न। विद्याया अनङ्गत्वेपि तुल्यं दर्शनम्। ब्रह्मविदां कर्मानुष्ठानदर्शनमनैकान्तिकमित्यर्थः। अननुष्ठानस्यापि दर्शनात्। दृश्यते हि ब्रह्मविदां कर्मत्याग ऋषयः कावषेयाः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे (कौ. २।५) इत्यादौ। अतो ब्रह्मविदां कर्मत्यागदर्शनान्न विद्या कर्माङ्गम्। कथमिदमुपपद्यते ब्रह्मविदां कर्मानुष्ठानमननुष्ठानं च। फलाभिसंधिरहितस्य यज्ञादिकर्मणो ब्रह्मविद्याङ्गत्वात्तथाविधस्य कर्मणोनुष्ठानदर्शनमुपपद्यते। वक्ष्यति च सर्वापेक्षा च यज्ञादिश्रु-

---

6. E. reads एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः after तिष्ठतः.

22. A. B. read वक्ष्यते for वक्ष्यति.

http://acharya.org

तेरश्ववत् (ब्र. सू. ३।४।२६) इति । फलार्थस्य तस्यैव यज्ञादेः कर्मणो मोक्षैकफलब्रह्मविद्याविरोधित्वात्तस्यैवाननुष्ठानदर्शनमुपपन्नतरम् । विद्यायाः कर्माङ्गत्वे कर्मत्यागः कथमपि नोपपद्यते ॥ ९ ॥

यदुक्तं श्रुत्यैव विद्यायाः कर्माङ्गत्वमवगम्यत इति तत्राह ।

असार्वत्रिकी ॥ १० ॥

न सर्वविद्याविषयेयं श्रुतिः । अपि तूद्गीथविद्याविषयैव । यदेव विद्यया करोति (छा. १।१।१०) इति यच्छब्दस्यानिर्धारितविशेषस्योद्गीथमुपासीत (छा. १।१।१) इति प्रस्तुतोद्गीथविशेषनिष्ठत्वात् । न हि यत्करोति तद्विद्ययेति संबध्यते । यदेव विद्यया करोति....तदेव वीर्यवत्तरम् (छा.१।१।१०) इति विद्यया क्रियमाणं यच्छब्देन निर्दिश्य तस्य हि वीर्यवत्तरत्वमुच्यते ॥ १० ॥

यच्चेदमुक्तं तं विद्याकर्मणी समन्वारभेते (बृ. ४।४।२) इति विद्याकर्मणोः साहित्यदर्शनाद्विद्या कर्माङ्गमिति तत्राह ।

विभागः शतवत् ॥ ११ ॥

तं विद्याकर्मणी समन्वारभेते (बृ. ४।४।२) इत्यत्रोक्तेन न्यायेन विद्याकर्मणोर्भिन्नफलत्वाद्विद्या स्वस्मै फलाय समन्वारभते कर्म च स्वस्मै फलायेति विभागो द्रष्टव्यः । शतवत् । यथा क्षेत्ररत्नविक्रयिणं शतद्वयमन्वेतीत्युक्ते क्षेत्रार्थं शतं रत्नार्थं शतमिति विभागः प्रतीयते तथेहापि ॥ ११ ॥

---

1. C. om. अश्ववत्.
2. B. C. read तस्यानुष्ठान for तस्यैवाननुष्ठान.
8–9. B. reads निर्धारित for अनिर्धारित.
12. C. om. हि after तस्य.

http://acharya.org

अध्ययनमात्रवतः ॥ १२ ॥

यदुक्तं विद्यावतः कर्मविधानाद्विद्या कर्माङ्गमिति नैतद्युक्तम् । वेदमधीत्य (छा. ८।१५।१) इत्यध्ययनमात्रवतो विधानात् । न चाध्ययनविधिरेवार्थावबोधे प्रवर्तयति । आधानवदध्ययनस्याक्षरराशिग्रहणमात्रे पर्यवसानात् । गृहीतस्य च स्वाध्यायस्य फलवत्कर्मावबोधित्वदर्शनात्तन्निर्णयफले तदर्थविचारे पुरुषः स्वयमेव प्रवर्तते । ततः कर्मार्थी कर्मज्ञाने प्रवर्तते मोक्षार्थी च ब्रह्मज्ञान इति न विद्या कर्माङ्गम् । यद्यप्यध्ययनविधिरेवार्थावबोधे प्रवर्तयति तथापि न विद्या कर्माङ्गम् । अर्थज्ञानादर्थान्तरत्वाद्विद्यायाः । यथा ज्योतिष्टोमादिकर्मस्वरूपविज्ञानात्फलसाधनभूतं तत्कर्मानुष्ठानमर्थान्तरं तथार्थज्ञानरूपाद्ब्रह्मस्वरूपविज्ञानादर्थान्तरमेव ध्यानोपासनादिशब्दवाच्या पुरुषार्थसाधनभूता विद्येति न तस्याः कर्मसंबन्धगन्धो विद्यते ॥ १२ ॥

नाविशेषात् ॥ १३ ॥

यच्चोक्तं कुर्वन्नेवेह कर्माणि (ई. २) इत्यात्मविदं ज्ञानाद्व्यावर्त्य यावज्जीवं कर्मानुष्ठाने नियमयतीति तन्नोपपद्यते । कुतः । अविशेषात् । न ह्ययं नियमः फलसाधनभूतस्वतन्त्रकर्मविषय इति विशेषहेतुरस्ति । विद्याङ्गभूतकर्मविषयतयाप्युपपत्तेः ।

---

11. C. reads फलसाधनभूतकर्मानुष्ठानमर्थान्तरभूतम् for फलसाधनभूत तत्कर्मानुष्ठानमर्थान्तरम्; A. B. om. तत् before कर्मानुष्ठान.

12. E. reads स्व after अर्थज्ञान.

13. C. om. पुरुषार्थसाधनभूता.

14. E. reads अपि after गन्ध..

17. C. E. read व्यावृत्य for व्यावर्त्य.

18. A. B. om. कुतः.

http://acharya.org

कर्मणैव हि संसिद्धिमास्थिता जनकादयः । (गी. ३।२०)

इतिवद्विदुषस्त्वा प्रायणादुपासनस्यानुवर्तमानत्वात् ॥ १३ ॥

एवमर्थस्वाभाव्येन चोद्यं परिहृत्य कुर्वन्नेवेह कर्माणि (ई. २) इत्यस्य वाक्यस्यार्थमाह ।

स्तुतयेनुमतिर्वा ॥ १४ ॥

वाशब्दोवधारणार्थः । ईशावास्यमिदं सर्वम् (ई. १) इति विद्याप्रकरणाद्विद्यास्तुतये सर्वदा कर्मानुष्ठानानुमतिरियम् । विद्यामाहात्म्यात्सर्वदा कर्म कुर्वन्नपि न लिप्यते कर्मभिरिति हि विद्या स्तुता भवति । वाक्यशेषश्चैतदेव दर्शयति

एवं त्वयि नान्यथेतोस्ति न कर्म लिप्यते नरे । (ई. २)

इति । अतो न कर्माङ्गं विद्या ॥ १४ ॥

कामकारेण चैके ॥ १५ ॥

अपि चैवमेके शाखिनः कामकारेण ब्रह्मविद्यानिष्ठस्य गार्हस्थ्यत्यागमधीयते किं प्रजया करिष्यामो येषां नोयमात्मायं लोकः (बृ. ४।४।२२) इति । विदुषो विरक्तस्य कामकारेण गार्हस्थ्यत्यागं ब्रुवदिदं वचनं ब्रह्मविद्यायाः कर्मानङ्गत्वं दर्शयति । यज्ञादिकर्माङ्गत्वे हि विद्याया विद्यानिष्ठस्य कामकारेण गार्हस्थ्यत्यागो न संभवति । अतो न विद्या कर्माङ्गम् ॥ १५ ॥

---

2. E reads इति च for इतिवत्; A. B. read आ प्रयाणात् for आ प्रायणात्.
3. C. reads स्वभावेन for स्वाभाव्येन.
4. C. om. अस्य; E. om. वाक्यस्य.
9. A. B. read एवम् for एतत्.
10. C. E. read कर्मणा for कर्म.
15. C. om. विदुषः.
16. C. reads कर्म after गार्हस्थ्य.

http://acharya.org

उपमर्दं च ॥ १६ ॥

पुण्यापुण्यरूपस्य समस्तसांसारिकदुःखमूलस्य कर्मणो ब्रह्मविद्ययोपमर्दं प्रतिवेदान्तमधीयते

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥ (मु.२।२।८)

इत्यादिकम् । तद्विद्यायाः कर्माङ्गत्वे न संगच्छते ॥ १६ ॥

ऊर्ध्वरेतःसु च शब्दे हि ॥ १७ ॥

ऊर्ध्वरेतःस्वाश्रमेषु ब्रह्मविद्यादर्शनात्तेष्वग्निहोत्रदर्शपूर्णमासादिकर्माभावाच्च न विद्या कर्माङ्गम् । ननूर्ध्वरेतस आश्रमा न सन्त्येव । यावज्जीवमग्निहोत्रं जुहोति (आप.श्रौ.३।१४।८) इत्यादिनाग्निहोत्रदर्शपूर्णमासादीनां यावज्जीवाधिकारश्रुतेः । श्रुतिविरुद्धानां स्मृतीनां चाप्रामाण्यात् । अत आह शब्दे हीति । वैदिक एव हि शब्दे ते दृश्यन्ते त्रयो धर्मस्कन्धाः (छा. २।२३।१) । ये चेमेरण्ये श्रद्धा तप इत्युपासते (छा. ५।१०।१) । एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति (बृ. ४।४।२२) इत्यादौ । यावज्जीवश्रुतिस्त्वविरक्तविषया ॥ १७ ॥

परामर्शं जैमिनिरचोदनाच्चापवदति हि ॥ १८ ॥

यदिदं त्रयो धर्मस्कन्धाः (छा. २।२३।१) इत्यादौ वैदिके शब्द ऊर्ध्वरेतस आश्रमा दृश्यन्तेतस्ते सन्त्येवेति नैतद्-

---

3. A. B. read विद्या for विद्यया; A. B. read च after उपमर्दम्.

9. C. om. न before विद्या.

11. C. reads त्व after अधिकार.

18. C. reads एवम् before आदौ.

19. C. reads और्ध्व for ऊर्ध्व.

http://acharya.org

पपद्यते । यतस्त्रयो धर्मस्कन्धाः (छा. २।२३।१) इत्येवमादिषु वाक्येषु तेषामाश्रमाणां परामर्शमात्रं क्रियते । अनुवादमात्रमित्यर्थः । कुत एतत् । अचोदनात् । अविधानादित्यर्थः । न ह्यत्र विधिशब्दः श्रूयते । त्रयो धर्मस्कन्धाः (छा. २।२३।१) इत्यादिना हि प्रकृतं प्रणवेन ब्रह्मोपासनं स्तूयते । ब्रह्मसंस्थोमृतत्वमेति (छा. २।२३।१) इत्युपसंहारात् । अतोन्यार्थमनुवादमात्रमत्र क्रियते तेषामाश्रमाणाम् । ये चेमेरण्ये श्रद्धा तप इत्युपासते (छा. ५।१०।१) इति च देवयानविधिपरत्वात्तत्रापि नाश्रमान्तरविधिसंभवः । अपि चापवदति हि श्रुतिराश्रमान्तरं वीरहा वा एष देवानां योग्निमुद्वासयते (तै. सं. १।५।२) इत्यादिका । अत ऊर्ध्वरेतस आश्रमा न सन्तीति जैमिनिराचार्यो मन्यते ॥ १८ ॥

अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ १९ ॥

गृहस्थाश्रमवदाश्रमान्तरमप्यनुष्ठेयं भगवान्बादरायणो मन्यते । कुतः । साम्यश्रुतेः । उपादेयतयाभिमतगृहस्थाश्रमसाम्यं हि तेषामप्याश्रमाणां श्रूयते । त्रयो धर्मस्कन्धाः (छा. २।२३।१) इत्यारभ्य ब्रह्मसंस्थस्तुत्यर्थतया संकीर्तनं गृहस्थाश्रमस्येतरेषां च समानम् । अथ गृहस्थाश्रमस्यानुवादः प्राप्तौ सत्यामेव संभवतीति तस्य प्राप्तिरवश्याभ्युपेत्येति मतं तदितरेषामपि समानं किमन्यत्राभिनिवेशात् । न च गार्हस्थ्यधर्म एव यज्ञोध्ययनं दानं तपो ब्रह्मचर्यमिति सर्वैः शब्दैरभिधीयते

1. A. B. om. एवम् after इति.
5. C. reads एवम् before आदिना.
9. B. reads उभयत्र for तत्र.
19. C. om. सम् before भवति.
20. B. C. om. किम् before अन्यत्र; E. reads अन्याभिनिवेशात् for अन्यत्राभिनिवेशात्.

http://acharya.org

ब्रह्मचर्यतपसोर्गृहस्थस्यैव संभवादिति युक्तम्। त्रयो धर्मस्कन्धाः (छा. २।२३।१) इति त्रित्वेन संगृह्य प्रथमो द्वितीयस्तृतीय इति विभागवचनानुपपत्तेः। अतो यज्ञोध्ययनं दानम् (छा. २।२३।१) इति गृहस्थाश्रम उच्यते। अध्ययनशब्दो वेदाभ्यासपरः। तपःशब्देन वैखानसपारिव्राज्ययोर्ग्रहणम्। उभयोस्तपःप्रधानत्वात्। तपःशब्दो हि कायक्लेशे रूढः। स च द्वयोरपि समानः। ब्रह्मचारिधर्म एव ब्रह्मचर्यशब्देनाभिधीयते। ब्रह्मसंस्थोमृतत्वमेति (छा. २।२३।१) इति परत्र श्रूयमाणो ब्रह्मसंस्थशब्दो यौगिकः सर्वाश्रमसाधारणः। सर्वेषामाश्रमिणां ब्रह्मसंस्थासंभवात्। ब्रह्मणि संस्था संस्थितिर्ब्रह्मसंस्थत्वम्। तच्च सर्वेषां संभवत्येव। ब्रह्मनिष्ठाविकलाः केवलाश्रमिणः पुण्यलोकभाजः। तेष्वेव ब्रह्मनिष्ठोमृतत्वभाग्भवति। तदेतद्विस्पष्टमुक्तं भगवता पराशरेण प्राजापत्यं ब्राह्मणानाम् (वि. पु. १।६।३४) इत्यारभ्य ब्राह्मं संन्यासिनां स्मृतम् (वि. पु. १।६।३७) इत्यन्तेन वर्णानामाश्रमाणां च केवलानां ब्रह्मलोकप्राप्त्यन्तं फलमभिधाय

एकान्तिनः सदा ब्रह्मध्यायिनो योगिनो हि ये।
तेषां तत्परमं स्थानं यद्वै पश्यन्ति सूरयः॥
(वि. पु. १।६।३८)

इति तेष्वेव ब्रह्मनिष्ठानां ब्रह्मप्राप्तिमभिदधता। अतो गृहस्थाश्रमतुल्या ऊर्ध्वरेतस आश्रमा अपि दृश्यन्त इति तेप्यनुष्ठेयाः। ये चेमेरण्ये श्रद्धा तप इत्युपासते (छा. ५।१०।१) इति

---

2. C. reads परि for सम् after त्रित्वेन; B. om. तृतीयः.

11. C. reads विकलाश्रमिणः for विकलाः केवलाश्रमिणः.

13. A. B. read गृहस्थानाम् for ब्राह्मणानाम्.

14. C. reads स्थानम् for स्मृतम्.

http://acharya.org

चारण्य इति तपःप्रधानाश्रमप्राप्त्यपेक्षत्वाद्देवयानविधानस्य तत्रापि तत्प्राप्तिरङ्गीकरणीया ॥ १९ ॥

परामर्शपक्षे विधानपक्षे च गृहस्थाश्रमतुल्यमेषामप्यनुष्ठेयत्वमित्युपपाद्य विधिरेवायमाश्रमाणां सर्वेषां नानुवाद इत्युपपादयितुमाह ।

विधिर्वा धारणवत् ॥ २० ॥

वाशब्दोवधारणार्थः । विधिरेवायमाश्रमाणां धारणवत् । यथा दिष्टाग्निहोत्रेधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयतीत्यत्रानुवादसरूपादपि वाक्यादुपरि धारणस्याप्राप्तत्वाद्विधिराश्रीयते । तदुक्तं शेषलक्षणे विधिस्तु धारणेपूर्वत्वात् (जै. सू. ३।४।३) इति । तथात्राप्यप्राप्तत्वाद्विधिरेवाश्रयणीयः । ब्रह्मचर्यं समाप्य गृही भवेद्गृहाद्वनी भूत्वा प्रव्रजेत् । यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वा । यदहरेव विरजेत्तदहरेव प्रव्रजेत् (जा. ४) इति जाबालानामाश्रमविधिमसन्तमिव कृत्वैतेष्वन्यपरेष्वपि वाक्येष्वाश्रमप्राप्तिरवश्याश्रयणीयेत्युपपादितम् । एवमाश्रमान्तरविधानादृणश्रुतिर्यावज्जीवश्रुतिरपवादश्रुतिश्चाविरक्तविषया एवेति वेदितव्याः । अन्याश्च ब्रह्मविदः कर्मणामा प्रयाणादवश्यकर्तव्यताविधायिन्यः श्रुतयः स्मृतयश्च स्वस्वाश्रमधर्मविषयाः । अत ऊर्ध्वरेतःसु च ब्रह्मविद्याविधानाद्विद्यातः पुरुषार्थ इति सिद्धम् ॥ २० ॥ पुरुषार्थाधिकरणं समाप्तम् । (१)

---

15. B. om. अन्यपरेषु.

16. C. reads गुणश्रुतिः for ऋणश्रुतिः.

18. B. reads अब्रह्मविदः for ब्रह्मविदः; B. reads आश्रयणात् for आ प्रयाणात्.

19. C. om. च after ऊर्ध्वरेतःसु.

http://acharya.org

स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥ २१ ॥

इदमिदानीं चिन्त्यते स एष रसानां रसतमः परमः पराध्योंऽष्टमो य उद्गीथः (छा. १।१।३) इत्येवंजातीयकानि वाक्यानि क्रत्ववयवभूतोद्गीथादिस्तुतिमात्रपराण्याहोस्विदुद्गीथादिषु रसतमादिदृष्टिविधानार्थानीति । अत्र प्रतिपादितमुपासनपरत्वमङ्गीकृत्योपासनस्य पुरुषार्थत्वेन क्रतुषूपादानानियम उक्तः । किं युक्तम् । स्तुतिमात्रपराणीति । कुतः । उद्गीथाद्युपादानात् । क्रत्वङ्गभूतानि ह्युद्गीथादीन्युपादाय तेषां रसतमादित्वं प्रतिपादितम् । यथा जुह्वादीनां पृथिव्यादित्वं प्रतिपादयतो वचनस्येयमेव जुहूः स्वर्गो लोक आहवनीय इत्यादिकस्य तत्स्तुतिमात्रपरत्वं तथेहापि । तदिदमाशङ्कते स्तुतिमात्रमुपादानादिति चेदिति । उद्गीथाद्युपादानात्तत्स्तुतिमात्रमेवैषां वाक्यानां विवक्षितमिति चेत् ।

अत्रोत्तरं नापूर्वत्वादिति । न स्तुतिमात्रत्वमुपपद्यते । कुतः । अपूर्वत्वात् । अप्राप्तत्वात् । न ह्युद्गीथादयो रसतमादितया प्रमाणान्तरेण प्रतिपन्ना येन तत्प्राशस्त्यबुद्ध्युत्पत्त्यर्थं रसतमादित्वेनानूद्येरन् । न चोद्गीथादिविधिरत्र संनिहितो येनेयमेव जुहूः स्वर्गो लोक आहवनीय इत्यादिवत्तदेकवाक्यत्वेन यया कयाचिद्विधया तत्स्तुतिपरत्वमाश्रीयेत । अतः क्रतु-

8. C. reads अवयव for अङ्ग after क्रतु.
10. E. reads स्वः for स्वर्गः.
12. A. B. om. तत् before स्तुति.
14. A. B. read स्तुतिमात्रम् for स्तुतिमात्रत्वम्.
16. A. B. om. उत्पत्ति.
18. C. reads एकवाक्यत्वे for एकवाक्यत्वेन.
19. A. B. read च for चित् after कया.

http://acharya.org

वीर्यवत्त्वादिफलसिद्ध्यर्थमुद्गीथादिषु रसतमादिदृष्टिविधानमेव न्याय्यम् ॥ २१ ॥

भावशब्दाच्च ॥ २२ ॥

उपासीत (छा. १।१।१) इत्यादिभावशब्दाच्च विधिपरत्वमेव न्याय्यम्। विधिप्रत्यययुक्तो हि क्रियाशब्दो विधेयमेव स्वार्थमवगमयति। तस्मादुपासनविधानार्था एताः श्रुतयः ॥२२॥

स्तुतिमात्राधिकरणं समाप्तम्। (२)

पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥ २३ ॥

प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम (कौ. ३।१)। श्वेतकेतुर्हारुणेय आस (छा. ६।१।१) इत्येवमादीनि वेदान्तेष्वाख्यानानि किं पारिप्लवप्रयोगार्थान्युत विद्याविशेषप्रतिपादनार्थानीति चिन्तायामाख्यानानि शंसन्तीत्याख्यानानां पारिप्लवे विनियोगान्न विद्याप्रधानत्वं न्याय्यमिति चेन्न। सर्वाण्याख्यानानि परिप्लवप्रयोगे न विनियोगमर्हन्ति। कुतः। विशेषितत्वाद्विनियोगस्य। आख्यानानि शंसन्तीत्युक्त्वा तत्रैव मनुर्वैवस्वतो राजेत्यादिना मन्वादीनामाख्यानानि विशेष्यन्ते। अतस्तेषामेव तत्र विनियोग इति गम्यते। तस्मान्न सर्ववेदान्तेष्वाख्यानश्रुतयः पारिप्लवप्रयोगार्थाः। अपि तु विद्याविध्यर्थाः ॥ २३ ॥

तथा चैकवाक्योपबन्धात् ॥ २४ ॥

आत्मा वा अरे द्रष्टव्यः (बृ. २।४।५) इत्यादिविधिनैक-

---

6. B. om. अव before गमयति; C. om. विधान.

15. B. reads शंसति for शंसन्ति.

16. E. reads वै before वैवस्वतः.

http://acharya.org

वाक्यतयोपबन्धाद्व्याख्यानानां विद्याविध्यर्थान्येव तानीति गम्यते । यथा सोरोदीत् (तै. सं. १।५।१) इत्येवमादेः कर्मविध्यर्थत्वं न पारिप्लवार्थत्वम् ॥ २४ ॥ पारिप्लवाधिकरणं समाप्तम् । (३)

अत एव चाग्नीन्धनाद्यनपेक्षा ॥ २५ ॥

स्तुतिप्रसङ्गादवान्तरसंगतिविशेषेणार्थद्वयं चिन्तितम् । विद्यावन्त ऊर्ध्वरेतस आश्रमिणः सन्तीत्युक्तमूर्ध्वरेतःसु च शब्दे हि (ब्र. सू. ३।४।१७) इत्यादिभिः सूत्रैः । इदानीमूर्ध्वरेतसो यज्ञाद्यभावात्तदङ्गिका विद्या न संभवतीत्याशङ्क्याहात एव चाग्नीन्धनाद्यनपेक्षेति । यत ऊर्ध्वरेतस आश्रमिणो विद्यासंबन्धित्वेन श्रुत्या परिगृह्यन्ते ब्रह्मसंस्थोमृतत्वमेति (छा. २।२३।१) । ये चेमेरण्ये श्रद्धा तप इत्युपासते (छा. ५।१०।१) । एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति (बृ. ४।४।२२) । यदिच्छन्तो ब्रह्मचर्यं चरन्ति (का. २। १५) इत्यादिकयात एवोर्ध्वरेतःसु विद्याग्नीन्धनाद्यनपेक्षा । अग्नीन्धनमग्न्याधानम् । आधानपूर्वकाग्निहोत्रदर्शपूर्णमासादिकर्मानपेक्षा तेषु विद्या केवलस्वाश्रमविहितकर्मापेक्षेत्यर्थः ॥२५॥ अग्नीन्धनाद्यधिकरण समाप्तम् । (४)

सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ २६ ॥

यदि विद्या यज्ञाद्यनपेक्षैवामृतत्वं साधयति तर्हि गृहस्थेष्वपि तदनपेक्षैव साधयितुमर्हति । यज्ञादिश्रुतिरपि विविदिषन्ति (बृ. ४।४।२२) इति शब्दात्कर्मणो वेदनाङ्गतां न प्रतिपादयति । अत आह सर्वापेक्षेति । अग्निहोत्रादिसर्वकर्मा-

---

1. A. B. read सम् before बन्धात्; C. reads एतानि for तानि.

11. E. reads इति after एति.

13. A. reads एवमेव for एतमेव.

http://acharya.org

पेक्षैव विद्या कर्मवत्सु गृहस्थेषु । कुतः । यज्ञादिश्रुतेः । तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन (बृ. ४।४।२२) इत्यादिना यज्ञादयो हि विद्याङ्गत्वेन श्रूयन्ते । यज्ञादिना विविदिषन्ति वेदितुमिच्छन्ति । यज्ञादिभिर्वेदनं प्राप्तुमिच्छन्तीत्यर्थः । यज्ञादीनां ज्ञानसाधनत्वे सत्येव यज्ञादिभिर्ज्ञानं प्राप्तुमिच्छन्तीति व्यपदेश उपपद्यते । यथा-ऽसेर्हननसाधनत्वे सत्यसिना जिघांसतीति व्यपदेशः । अतो यज्ञादीनां ज्ञानसाधनत्वमवगम्यते । ज्ञानं च वाक्यार्थज्ञानादर्थान्तरभूतं ध्यानोपासनादिशब्दवाच्यं विशदतमप्रत्यक्षतापन्नस्मृतिरूपं निरतिशयप्रियमहरहरभ्यासाधेयातिशयमा प्रयाणादनुवर्तमानं मोक्षसाधनमित्युक्तमस्माभिः पूर्वमेव । वक्ष्यति चावृत्तिरसकृदुपदेशात् (ब्र. सू. ४।१।१) इत्यादिना । एवंरूपं च ध्यानमहरहरनुष्ठीयमानैर्नित्यनैमित्तिकैः कर्मभिः परमपुरुषाराधनरूपैः परमपुरुषप्रसादद्वारेण जायत इति यज्ञादिना विविदिषन्तीति शास्त्रेण प्रतिपाद्यते । अतः कर्मवत्सु गृहस्थेषु यज्ञादिनित्यनैमित्तिकसर्वकर्मापेक्षा विद्या ।

अश्ववत् । यथा पुरुषगमनसाधनभूतोऽश्वः स्वपरिकरबन्धपरिकर्मापेक्ष एवं मोक्षसाधनभूतापि विद्या नित्यनैमित्तिककर्मपरिकरापेक्षा । तदिदमाह स्वयमेव भगवान्

---

1. C. reads कर्मवत् for कर्मवत्सु.
9–10. E. reads आपन्नं स्मृतिरूप for आपन्नस्मृतिरूपम्.
13. E. om. च after एवंरूपम्; C. E. read नित्यैर्नैमित्तिकैः for नित्यनैमित्तिकैः.
17. C. E. read पुरुष before गमन; E. reads सपरिकर for परिकर.
18. C. om. अपि after मोक्षसाधनभूता.
19. A. B. om. परिकर after कर्म.

http://acharya.org

यज्ञो दानं तपः कर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥ (गी. १८।५)

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥
(गी. १८।४६)

इति ॥ २६ ॥ सर्वापेक्षाधिकरणं समाप्तम् । (५)

शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामप्यवश्यानुष्ठेयत्वात् ॥ २७ ॥

गृहस्थस्य शमदमादीन्यप्यनुष्ठेयान्युत नेति चिन्तायामान्तरबाह्यकरणव्यापाररूपत्वात्कर्मानुष्ठानस्य शमदमादीनां तद्विपरीतरूपत्वाच्चानुष्ठेयानीति प्राप्त उच्यते । यद्यपि गृहस्थः करणव्यापाररूपकर्मसु प्रवृत्तस्तथापि स विद्वाञ्छमदमाद्युपेतः स्यात् । कुतः । तदङ्गतया तद्विधेः । विद्याङ्गतया तेषां विधेः । तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येत् (बृ. ४।४।२३) इति । विद्योत्पत्तेश्चित्तसमाधानरूपत्वेन दृष्टपरिकरत्वाच्छमादीनां विद्यानिर्वृत्तये तेषां शमादीनामवश्यानुष्ठेयत्वाच्च तान्यप्यनुष्ठेयानि । न च करणव्यापारतद्विपर्ययरूपत्वेन कर्मणां शमदमादीनां च परस्परविरोधः । भिन्नविषयत्वात् । विहितेषु करणव्यापारोऽविहितेषु प्रयोजनशून्येषु च तदुपशम इति । न च करणव्यापाररूपकर्मसु वर्तमानस्य वासनावशाच्छमादीनामुपादेयत्वा-

---

1. A. B. read यज्ञदान for यज्ञो दानम्.
8. A. C. om. अपि after तेषाम्; E. reads आवश्य for अवश्य.
9. A. B. read च after गृहस्थस्य.
11. C. reads नानुष्ठेयानि for अननुष्ठेयानि.

http://acharya.org

संभवः। विहितानां कर्मणां परमपुरुषाराधनतया तत्प्रसादद्वारेण निखिलविपरीतवासनोच्छेदहेतुत्वात्। अतो गृहस्थस्य शमदमाद्योऽप्यनुष्ठेयाः॥ २७॥ शमदमाधिकरणं समाप्तम्। (६)

सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्॥ २८॥

वाजिनां छन्दोगानां च प्राणविद्यायां न ह वा अस्यानन्नं जग्धं भवति नानन्नं परिगृहीतं भवति (बृ. ६।१।१४)। न ह वा एवंविदि किंचनानन्नं भवति (छा. ५।२।१) इति प्राणविदः सर्वान्नानुमतिः संकीर्त्यते। किमियं सर्वान्नानुमतिः प्राणविद्यानिष्ठस्य सर्वदोत प्राणात्ययापत्ताविति विशये विशेषानुपादानात्सर्वदेति प्राप्त उच्यते प्राणात्यय इति। चशब्दोऽवधारणे। प्राणात्ययापत्तावेवेत्यर्थः। कुतः। तद्दर्शनात्। दृश्यते ह्यन्यत्र ब्रह्मविदामपि प्राणात्ययापत्तावेव सर्वान्नाभ्यनुज्ञा किं पुनः प्राणविदः। उपस्तः किल चाक्रायणो ब्रह्मविदग्रेसरो मटचीहतेषु कुरुषु दुर्भिक्षदूषितेष्विभ्यग्रामे वरान्नमशनेन प्राणसंशयमापन्नो ब्रह्मविद्यानिष्पत्तये प्राणानामनवसादमाकाङ्क्षमाण इभ्यं कुल्माषान्खादन्तं भिक्षमाणस्तेन चोच्छिष्टेभ्योऽन्ये न विद्यन्त इति प्रत्युक्तः पुनरप्येतेषां मे देहीत्युक्त्वा तेन चेभ्येनोच्छिष्टेभ्य आदाय दत्तान्कुल्माषान्परिगृह्यानुपानप्रतिग्रहमिभ्येनार्थित उच्छिष्टं मे पीतं स्यात् (छा. १।१०।३) इति वदंश्चाक्रायणः किमेते कुल्माषा अनुच्छिष्टा इतीभ्येन पर्यनुयुक्तो न वा अजीविष्यमिमानखादन्कामो म उदपानम् (छा. १।१०।४) इति कुल्माषाखादने स्वस्य

10–11. B om. चशब्दोवधारणे.
13. A. B. read उषस्तिः for उपस्तः.
18. A B read प्रतिगृह्य for परिगृह्य.
19. E. reads एव after उच्छिष्टम्.
22. A. B. read उदक for उद.

http://acharya.org

प्राणसंशयापत्तेस्तावन्मात्रखादनेन धृतप्राणस्य स्वस्योच्छिष्टोदकपानं कामकारितं निषिद्धं स्यादित्युक्त्वा स्वखादितशेषं जायायै दत्त्वा तया च रक्षितानपरेद्युर्याजनेनार्जिजीषया जिगमिषुः पुनरपि प्राणसंशयमापन्नस्तानेवेभ्योच्छिष्टान्स्वोच्छिष्टभूतान्पर्युषितांश्चखाद । अतो ब्रह्मविदामपि प्राणसंशय एव सर्वान्नानुमतिदर्शनादत्राविशेषेण कीर्तितमपि प्राणविदः सर्वान्नीनत्वं प्राणात्ययापत्तावेवेति निश्चीयते ॥ २८ ॥

अबाधाच्च ॥ २९ ॥

आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः (छा. ७।२६।२) इति ब्रह्मविद्योत्पत्तावाहारशुद्धिविधानाबाधादपि ब्रह्मविदां सर्वान्नीनत्वमापद्विषयमवगम्यते । एवं ब्रह्मविदामतिशयितशक्तीनामपि सर्वान्नीनत्वस्यापद्विषयत्वात्प्राणविदोऽल्पशक्तेः सर्वान्नानुमतिरापद्विषयैव ॥ २९ ॥

अपि स्मर्यते ॥ ३० ॥

अपि चापद्विषयमेव सर्वान्नीनत्वं ब्रह्मविदामन्येषां च स्मर्यते

प्राणसंशयमापन्नो योऽन्नमत्ति यतस्ततः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥

इति ॥ ३० ॥

शब्दश्चातोऽकामकारे ॥ ३१ ॥

यतो ब्रह्मविदामन्येषां च सर्वान्नीनत्वमापद्विषयमेवात एव सर्वेषामकामकारे शब्दः कामकारस्य प्रतिषेधकः शब्दो

---

1. A. B. read आपत्तिः. for आपत्ते .
4. A. B. om. इभ्योच्छिष्टान्स्व.
12. C. reads वृत्तीनाम् for शक्तीनाम् .

वर्तते । अस्ति हि कठानां संहितायां कामकारस्य प्रतिषेधकः शब्दस्तस्माद्ब्राह्मणः सुरां न पिबति पाप्मना नोत्सृजा इतीति । पाप्मना संसृष्टो न भवानीति मत्वा ब्राह्मणः सुरां न पिबतीत्यर्थः ॥ ३१ ॥ सर्वान्नानुमत्यधिकरणं समाप्तम् । (७)

विहितत्वाच्चाश्रमकर्मापि ॥ ३२ ॥

यज्ञादिकर्माङ्गिका ब्रह्मविद्येत्युक्तम् । तानि च यज्ञादीनि कर्माण्यमुमुक्षुणा केवलाश्रमिणाप्यनुष्ठेयान्युत नेति चिन्तायां विद्याङ्गानां सतां केवलाश्रमशेषत्वे नित्यानित्यसंयोगविरोधः प्रसज्यत इति यज्ञादीनां केवलाश्रमधर्मत्वं न संभवतीति प्राप्त उच्यत आश्रमकर्मापीति । आश्रमस्य कर्मापि भवति केवलाश्रमिणामप्यनुष्ठेयानीत्यर्थः । कुतः । यावज्जीवमग्निहोत्रं जुहोति (आ.श्रौ.३।१४।११) इत्यादिना विहितत्वात् । जीवननिमित्ततया नित्यवद्विहितत्वादित्यर्थः ॥ ३२ ॥

तथा विद्याङ्गतया च तमेतं वेदानुवचनेन (बृ. ४।४।२२) इत्यादिना विहितत्वाद्विद्याशेषतयाप्यनुष्ठेयानीत्याह ।

सहकारित्वेन च ॥ ३३ ॥

विद्योत्पत्तिद्वारेण विद्यासहकारितयाप्यनुष्ठेयानि । अग्निहोत्रादीनामिव जीवनाधिकारस्वर्गादिवद्विनियोगपृथक्त्वेनोभयार्थत्वं न विरुध्यत इत्यर्थः ॥ ३३ ॥

---

1. A. B. read काठानाम् for कठानाम्.
2. A. B. read सम् after उत्; C. om. इति after उत्सृजा इति.
3. E. om. सम् before सृष्टः.
8. E. reads आश्रमिशेषत्वे for आश्रमशेषत्वे.
14. C. om. च before तमेतम्.
18. B. reads एव for इव before जीवन; A. B. read स्वर्गाधिकारवत् for स्वर्गादिवत्.

http://acharya.org

तद्वदेव कर्मान्तरत्वमपि नास्तीत्याह।

सर्वथापि त एवोभयलिङ्गात् ॥ ३४ ॥

सर्वथा विद्यार्थत्व आश्रमार्थत्वेपि त एव यज्ञादय इति प्रतिपत्तव्यं न कर्मस्वरूपभेद इत्यर्थः। कुतः। उभयलिङ्गात्। उभयत्र श्रुतौ यज्ञादिशब्दैः प्रत्यभिज्ञाप्यविनियोगात्कर्मस्वरूपभेदे प्रमाणाभावाच्च ॥ ३४ ॥

अनभिभवं च दर्शयति ॥ ३५ ॥

धर्मेण पापमपनुदति (म. ना. २२।१) इत्यादिभिश्च तानेव यज्ञादिधर्मान्निर्दिश्य तैर्विद्याया अनभिभवं पापकर्मभिरुत्पत्तिप्रतिबन्धाभावं दर्शयति। अहरहरनुष्ठीयमानैर्हि यज्ञादिभिर्विशुद्धेन्तःकरणे प्रत्यहं प्रकृष्यमाणा विद्योत्पद्यते। अतस्त एवोभयत्र यज्ञादयः ॥ ३५ ॥ विहितत्वाधिकरणं समाप्तम्। (८)

अन्तरा चापि तु तद्दृष्टेः ॥ ३६ ॥

चतुर्णामाश्रमिणां ब्रह्मविद्यायामधिकारोस्ति विद्यासहकारिण आश्रमधर्मा इति चोक्तम्। ये पुनराश्रमानन्तरा वर्तन्ते विधुरादयस्तेषां ब्रह्मविद्यायामधिकारोस्ति नेति विशय आश्रमधर्मेतिकर्तव्यताकत्वाद्विद्याया अनाश्रमिणां चाश्रमधर्माभावान्नास्त्यधिकार इति प्राप्त उच्यतेन्तरा चापि त्विति। तुशब्दः

---

3. C. om. आश्रमार्थत्वे.
9. C. om. तैः.
11. B. om. प्र before कृष्यमाणा.
12. E. reads यज्ञादरः for यज्ञादय'.
14. B. reads ब्रह्मविद्याया. for ब्रह्मविद्यायामधिकारोस्ति.
15. B. reads आश्रमान्तरा for आश्रमानन्तरा.
16. E. reads ब्रह्मविद्या for ब्रह्मविद्यायाम्; A. B. read न वेति for नेति.

http://acharya.org

पक्षव्यावृत्त्यर्थः । चशब्दोवधारणे । अन्तरा वर्तमानानामनाश्रमिणामपि विद्यायामधिकारोस्त्येव । कुतः । तद्दृष्टेः । दृश्यते हि रैक्वभीष्मसंवर्तादीनामनाश्रमिणामपि ब्रह्मविद्यानिष्ठत्वम् । न चाश्रमधर्मैरेव विद्यानुग्रह इति शक्यं वक्तुम् । यज्ञेन दानेन तपसानाशकेन (बृ. ४।४।२२) इति दानादीनामाश्रमेष्वनैकान्तिकानामप्यनुग्राहकत्वश्रवणात् । यथोर्ध्वरेतःसु विद्यानिष्ठत्वदर्शनादग्निहोत्रादिव्यतिरिक्तैरेव विद्यानुग्रहः क्रियते तथानाश्रमिष्वपि विद्यादर्शनादाश्रमानियतैर्जपोपवासदानदेवताराधनादिभिर्विद्यानुग्रहः शक्यते कर्तुम् ॥ ३६ ॥

अपि स्मर्यते ॥ ३७ ॥

अपि चानाश्रमिणामपि जपादिभिरेव विद्यानुग्रहः स्मर्यते

जप्येनापि च संसिध्येद्ब्राह्मणो नात्र संशयः ।
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ॥

(मनुस्मृ. २।८७)

इति । संसिध्येज्जपाद्यनुगृहीतया विद्यया सिद्धो भवतीत्यर्थः ॥ ३७ ॥

विशेषानुग्रहश्च ॥ ३८ ॥

न केवलं न्यायस्मृतिभ्यामयमर्थः साधनीयः । श्रूयते चानाश्रमनियतैर्धर्मविशेषैर्विद्यानुग्रहस्तपसा ब्रह्मचर्येण श्रद्धया विद्ययात्मानमन्विष्येत् (प्र. १।१०) इति ॥ ३८ ॥

---

1. E. reads अवधारणार्थः for अवधारणे.
3. C. om. आदि after संवर्त, B om. विद्या before निष्ठत्वम्
6. E. reads अनेकान्तानाम् for अनैकान्तिकानाम्; C. reads दर्शनात् for श्रवणात्.
7. C. reads अदर्शनात् for दर्शनात्.
20. C. om. विद्यया.

http://acharya.org

अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥ ३९ ॥

तुशब्दोवधारणे । अतोनाश्रमित्वादितरदाश्रमित्वमेव ज्यायः । अनाश्रमित्वमापद्विषयम् । शक्तस्य त्वाश्रमित्वमेवोपादेयमित्यर्थः । भूयोधर्मकाल्पधर्मकयोरतुल्यकार्यत्वात् । लिङ्गाच्च । स्मृतेरित्यर्थः । स्मर्यते च शक्तं प्रत्याश्रमस्योपादेयत्वम्

अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विजः । (दक्षस्मृ. १।१०)

इत्यादिना । निवृत्तब्रह्मचर्यस्याकृतदारस्य मृतभार्यस्य चावैराग्ये सति दारालाभ आपत् ॥ ३९ ॥ विधुराधिकरणं समाप्तम् । (९)

तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः ॥ ४० ॥

नैष्ठिकवैखानसपरिव्राजकाश्रमेभ्यः प्रच्युतानामपि ब्रह्मविद्यायामधिकारोस्ति नेति चिन्तायां विधुरादिवदनाश्रमैकान्तैर्दानादिभिर्विद्यानुग्रहसंभवादस्त्यधिकार इति प्राप्त उच्यते तद्भूतस्य तु नातद्भाव इति । तुशब्दः पक्षव्यावृत्त्यर्थः । तद्भूतस्य नैष्ठिकाद्याश्रमनिष्ठस्य नातद्भावः । अतथाभावोनाश्रमित्वेनावस्थानं न संभवति । कुतः । तद्रूपाभावेभ्यो नियमात् । तद्रूपाणि तेषां नैष्ठिकादीनां रूपाणि तेषां धर्मा इत्यर्थः । तेषामभावास्तद्रूपाभावाः । तेभ्यः शास्त्रैर्नियमात् । नैष्ठिकाद्याश्रमं प्रविष्टान्स्वाश्रमधर्मनिवृत्तिभ्यो नियच्छन्ति हि शास्त्राणि । ब्रह्मचा-

---

3. E. reads च for तु after शक्तस्य.

7. B. om. नि before वृत्तब्रह्मचर्यस्य; C. E. om. अकृतदारस्य.

11. C. om. परिव्राजक.

12. C. om. आश्रम before एकान्तैः.

17. C. E. read वेषाः for तेषाम्.

18. A. B. read तद्रूपाभावेभ्यो नियमात् after नियमात्; C. reads आश्रम for आश्रमम्.

http://acharya.org

यश्चाचार्यकुलवासी तृतीयोत्यन्तमात्मानमाचार्यकुलेवसादयन् (छा. २।२३।१) इति । अरण्यमियात्ततो न पुनरेयादिति च । संन्यस्याग्निं न पुनरावर्तयेदिति च । अतो विधुरादिवन्नैष्ठिकादीनामनाश्रमित्वेनावस्थानासंभवान्न तानधिकरोति ब्रह्मविद्या । जैमिनेरपीत्यविगानं दर्शयन्नुक्तं स्वाभिमतं द्रढयति ॥ ४० ॥

अथ स्यान्नैष्ठिकादीनां ब्रह्मचर्यात्प्रच्युतानां प्रायश्चित्ताद्धिकारः संभवति । अस्ति च प्रायश्चित्तमधिकारलक्षणे निरूपितमवकीर्णिपशुश्च तद्वत् (जै. सू. ६।८।२४) इति । अतः प्रच्युतब्रह्मचर्यस्य प्रायश्चित्तसंभवात्कृतप्रायश्चित्तो ब्रह्मविद्यायामधिकरिष्यतीति । तत्राह ।

न चाधिकारिकमपि पतनानुमानात्तदयोगात्॥४१॥

अधिकारलक्षणोक्तमपि प्रायश्चित्तं नैष्ठिकादीनां ततो भ्रष्टानां न संभवति । कुतः । पतनानुमानात्तदयोगात् । नैष्ठिकादीनां प्रच्युतानां पतनस्मृतेस्तस्य प्रायश्चित्तस्यासंभवात् ।

आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते द्विजः ।
प्रायश्चित्तं न पश्यामि येन शुध्येत्स आत्महा ॥

(अत्रिस्मृ. ८।१६)

इति । अतोधिकारलक्षणोक्तं प्रायश्चित्तमितरब्रह्मचारिविषयम् ॥ ४१ ॥

उपपूर्वमपीत्येके भावमशनवत्तदुक्तम् ॥ ४२ ॥

नैष्ठिकादीनां ब्रह्मचर्यप्रच्यवनमुपपूर्वमुपपातकं महापात-

---

2. A. B. read ईयात् for इयात्.
6. C. reads प्रायश्चित्त for प्रायश्चित्तात्.
9–10. C. reads विद्यायामधिकारी भवति for ब्रह्मविद्यायामधिकरिष्यतीति.
12. A. B. read तत् for ततः.
13. C. reads अधिकारि for अधिकार.

केष्वपरिगणितत्वादिति तत्र प्रायश्चित्तस्य भावं विद्यमानतामप्येक आचार्या मन्यन्ते । अशनवत् । यथा मध्वशनादिनिषेधस्तत्प्रायश्चित्तं चोपकुर्वाणस्य नैष्ठिकादीनां च समानम् । तदुक्तं स्मृतिकारैरुत्तरेषां चैतदविरोधि (गौत. १।३।४) इति । गुरुकुलवासिनो यदुक्तं तत्स्वाश्रमाविरोध्युत्तरेषामप्याश्रमिणां भवतीत्यर्थः । तद्वदिहापीति ब्रह्मचर्यप्रच्यवने प्रायश्चित्तसंभवाद्ब्रह्मविद्यायोग्यताप्यस्ति ॥ ४२ ॥

बहिस्तूभयथापि स्मृतेराचाराच्च ॥ ४३ ॥

तुशब्दो मतान्तरव्यावृत्त्यर्थः । उपपातकत्वे महापातकत्वेप्येते बहिर्भूता एव ब्रह्मविद्याधिकारिभ्यः । ब्रह्मविद्यायामनधिकृता इत्यर्थः । कुतः । स्मृतेः । पूर्वोक्तात्पतनस्मरणात् । यद्यपि कलुषनिर्हरणाय कैश्चिद्वचनैः प्रायश्चित्ताधिकारो विद्यते तथापि कर्माधिकारानुगुणशुद्धिहेतुप्रायश्चित्तं न संभवति ।

प्रायश्चित्तं न पश्यामि येन शुध्येत्स आत्महा ।

(अत्रिस्मृ. ८।१६)

इति स्मृतेरित्यर्थः । आचाराच्च । शिष्टा हि नैष्ठिकादीन्भ्रष्टान्कृतप्रायश्चित्तानपि वर्जयन्ति । तेभ्यो ब्रह्मविद्यादिकं नोपदिशन्ति । अतस्तेषां नास्ति ब्रह्मविद्यायामधिकारः ॥ ४३ ॥

तद्भूताधिकरणं समाप्तम् । (१०)

स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ४४ ॥

कर्माङ्गाश्रयाण्युद्गीथाद्युपासनानि किं यजमानकर्तृकाण्युत-

---

6. E. reads सम् before भवति; C. om. इति after इहापि; C. reads सद्भावात् for संभवात्.

7. A. B. om. अपि after योग्यता.

12. C. reads कल्मष for कलुष.

16. C. E. read हि before शिष्टाः.

र्त्विक्कर्तृकाणीति चिन्तायां यजमानकर्तृकाणीत्यात्रेयो मन्यते। कुतः। फलश्रुतेः। वेदान्तविहितेषु दहराद्युपासनेषु फलोपासनयोरेकाश्रयत्वदर्शनादिह च क्रतुफलाप्रतिबन्धरूपस्योद्गीथोपासनफलस्य यजमानाश्रयत्वश्रवणादित्यर्थः। न च गोदोहनादिवदङ्गाश्रयत्वेन यजमानकर्तृकात्वसंभवः। गोदोहनादिषु ह्यध्वर्युकर्तृकप्रणयनाश्रयगोदोहनोपादानमन्येनाशक्यम्। इह तूद्गातृकर्तृकेप्युद्गीथे तस्योद्गीथादे रसतमत्वानुसंधानं यजमानेनैव कर्तुं शक्यते ॥ ४४ ॥

इति प्राप्तेभिधीयते।

आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते ॥४५॥

आर्त्विज्यमृत्विजः कर्मोद्गीथाद्युपासनमित्यौडुलोमिराचार्यो मन्यते। कुतः। तस्मै हि प्रयोजनायर्त्विक्परिक्रीयते। फलसाधनभूतस्य साङ्गस्य क्रतोरुपादानायेत्यर्थः। कर्मविधिष्वृत्विजो वृणीते (सत्या. श्रौ.सू.१०।१)। ऋत्विग्भ्यो दक्षिणां ददातीत्यृत्विक्कर्तृकत्वशास्त्रेण फलसाधनभूतं साङ्गं कर्मर्त्विग्भिरनुष्ठेयमित्यवगम्यते। तदन्तर्गतानि कायिकानि मानसानि च कर्माण्यृत्विक्कर्तृकाण्येव। न च शक्त्यशक्ती तस्य निबन्धनम्। यद्यप्युद्गीथाद्युपासनं पुरुषार्थस्तथापि क्रत्वधिकृताधिकारत्वात्क्रतोश्च साङ्गस्यर्त्विक्कर्तृकत्वाद्यदेव विद्यया करोति तदेव वीर्यवत्तरम् (छा. १।१।१०) इत्यृत्विक्कर्तृकक्रियोपयोगित्वेन विद्या-

---

2. C. reads दहरविद्यासु for दहराद्युपासनेषु.

6–7. C. reads यस्तु for इह तूद्गातृकर्तृकेपि; B. reads कर्तृकत्वे for कर्तृके.

10,12. F. reads परिक्रियते for परिक्रीयते.

18. C. om. अधिकृत.

http://acharya.org

यास्तदेककर्तृकत्वश्रवणादृत्विक्कर्तृकाण्येतानि। दहरादिषूपासनेष्वृत्विक्कर्तृकत्वाश्रवणाच्छास्त्रफलं प्रयोक्तरि (जै. सू. ३।७।१८) इति न्यायाच फलिकर्तृकत्वमेव ॥ ४५ ॥ स्वाम्यधिकरणं समाप्तम्। (११)

सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ ४६ ॥

तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्। बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः (बृ. ३।५।१) इत्यत्र बाल्यपाण्डित्यवन्मौनमपि विधीयत उतानूद्यत इति विशये मौनपाण्डित्यशब्दयोर्ज्ञानार्थत्वात्पाण्डित्यं निर्विद्येति विहितमेव ज्ञानमथ मुनिरित्यनूद्यते। विधिशब्दो न ह्यत्र श्रूयत इति। एवं प्राप्ते ब्रूमः।

सहकार्यन्तरविधिरिति। तद्वतो विद्यावतः। विध्यादिवत्। विधीयत इति विधिः। यज्ञादिः सर्वाश्रमधर्मः शमदमादयश्च विधिशब्देनोच्यन्ते। आदिशब्देन श्रवणमनने गृह्येते। सहकार्यन्तरविधिरित्यत्रापि विधीयत इति विधिः। सहकार्यन्तरं विधिश्चेति सहकार्यन्तरविधिः। एतदुक्तं भवति। यथा तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन (बृ.४।४।२२) इत्यादिना शान्तो दान्तः (बृ. ४।४।२३) इत्यादिना च सहकारी यज्ञादिः शमदमादिश्च विधीयते यथा च श्रोतव्यो मन्तव्यः (बृ. २।४।५) इति श्रवणमनने चार्थप्राप्ते विद्यासहकारित्वेन गृह्येते तथा तस्माद्ब्राह्मणः पाण्डित्यं

1. B. reads अश्रवणात् for श्रवणात्.
9. C. om. अपि after मौनम्.
17. B. reads तथा for यथा; E. om. यथा.
18. A. B. E. om. तपसानाशकेन.

http://acharya.org

निर्विद्य (बृ. ३।५।१) इत्यादिना पाण्डित्यं बाल्यं मौनमिति त्रितयं विद्यायाः सहकार्यन्तरं विधीयत इति । मौनं च पाण्डित्यादर्थान्तरमित्याह पक्षेणेति । मुनिशब्दस्य पक्षेण प्रकृष्टमननशीले व्यासादौ प्रयोगदर्शनान्मौनं पाण्डित्यबाल्ययोर्द्वयोस्तृतीयम् । यद्यप्यथ मुनिः (बृ. ३।५।१) इत्यत्र विधिप्रत्ययो न श्रूयते तथापि मौनस्याप्राप्तत्वाद्विधेयत्वमङ्गीकरणीयमथ मुनिः स्यादिति । इदं च मौनं श्रवणप्रतिष्ठार्थमननादर्थान्तरभूतमुपासनालम्बनस्य पुनः पुनः संशीलनं तद्भावनारूपम् ।

तदेवं वाक्यार्थः । ब्राह्मणो विद्यावान्पाण्डित्यं निर्विद्योपास्यं ब्रह्मतत्त्वं परिशुद्धं परिपूर्णं च विदित्वा श्रवणमननाभ्यां प्राप्तं वेदनं प्रतिलभ्येत्यर्थः । तच्च भगवद्भक्तिकृतसत्त्वविशुद्धिकृतम् । यथोक्तं नाहं वेदैः (गी. ११।५३) इत्यारभ्य भक्त्या त्वनन्यया शक्यो ज्ञातुम् (गी. ११।५४) इति । श्रुतिश्च यस्य देवे परा भक्तिः (श्वे. ६।२३) । नायमात्मा प्रवचनेन (का. २।२३, मु. ३।२।३) इत्यादिका । बाल्येन तिष्ठासेत् (बृ. ३।५।१) । बाल्यस्वरूपं चानन्तरमेव वक्ष्यते । बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः स्यात् (बृ. ३।५।१) । बाल्यपाण्डित्ये यथावदुपादाय परिशुद्धे परिपूर्णे ब्रह्मणि मननशीलो भवेन्निदिध्यासनरूपविद्यावाप्तये । एवं त्रितयोपादानेन लब्धविद्यो भवतीत्याहामौनं मौनं च निर्विद्याथ ब्राह्मणः (बृ. ३।५।१) इति । अमौनं मौनेतरसहकारिकलापः । तं च

---

3. B. om. इति before आह.

5. C. om. द्वयोः.

7-8. E. reads प्रतिष्ठार्थात् for प्रतिष्ठार्थं.

12. C. reads प्राप्त for प्राप्तम्; B. reads शुद्धि for विशुद्धि.

15. E. reads लभ्यः after प्रवचनेन.

http://acharya.org

मौनं च यथावदुपाददानो विद्याकाष्ठां तदेकनिष्पाद्यां लभेतेत्यर्थः । स ब्राह्मणः केन स्यात् (बृ.३।५।१) इत्युक्तादुपायात्किमन्योऽप्युपायोऽस्तीति पृष्टे येन स्यात्तेनेदृश एव (बृ. ३।५।१) इति येन मौनपर्यन्तेन ब्राह्मणः स्यादित्युक्तं तेनैवेदृशः स्यान्न केनाप्यन्येनोपायेनेति परिहृतम् । अतः सर्वेष्वाश्रमेषु स्थितस्य विदुषो यज्ञादिस्वाश्रमधर्मवत्पाण्डित्यादिकं मौनतृतीयं विद्यायाः सहकार्यन्तरं विधीयते ॥ ४६ ॥

अथ स्याद्यदि सर्वेष्वाश्रमेषु स्थितानां विदुषां तत्तदाश्रमधर्मसहकारिणी मौनतृतीयसचिवा विद्या ब्रह्मप्राप्तिसाधनमुच्यते कथं तर्हि च्छान्दोग्येऽभिसमावृत्य कुटुम्बे शुचौ देशे (छा. ८।१५।१) इत्यारभ्य स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते (छा. ८।१५।१) इति यावदायुषं गार्हस्थ्यधर्मेण स्थितिदर्शनमुपपद्यत इति । अत्राह ।

कृत्स्नभावात्तु गृहिणोपसंहारः ॥ ४७ ॥

तुशब्दश्चोद्यं व्यावर्तयति । कृत्स्नभावात्कृत्स्नेषु भावात्कृत्स्नेष्वाश्रमेषु विद्यायाः सद्भावाद्गृहिणोऽप्यस्तीति तेनोपसंहारः । तस्मात्सर्वाश्रमधर्मप्रदर्शनार्थो गृहिणोपसंहार इत्यभिप्रायः ॥ ४७ ॥

---

3. C. reads अपि after उपाय .

10. A. B. read हि for अभि before समावृत्य.

12. B. om. अभि before सपद्यते; C. reads सः for च

13. A. B. read स्थिति. for स्थितिदर्शनम्; A. B. read अत. for इति । अत्र.

14. वेदान्तदीपे तुशब्दरहितः सूत्रपाठो दृश्यते.

15. A. B. om. कृत्स्नेषु भावात्.

http://acharya.org

तथैतस्मिन्नपि वाक्ये ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति (बृ. ३।५।१) इति पारिव्राज्यैकान्तधर्मं प्रतिपाद्य तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य (बृ. ३।५।१) इत्यादिना पारिव्राज्यधर्मस्थितिहेतु-कर्मौनतृतीयसहकारिविधानं प्रदर्शनार्थमित्याह ।

मौनवदितरेषामप्युपदेशात् ॥ ४८ ॥

सर्वैषणाविनिर्मुक्तस्य भिक्षाचरणपूर्वकमौनोपदेशः सर्वेषामाश्रमधर्माणां प्रदर्शनार्थः । कुतः । एवंविधमौनोपदेशवदितरेषामाश्रमिणामपि त्रयो धर्मस्कन्धाः (छा. २।२३।१) इत्यारभ्य ब्रह्मसंस्थोमृतत्वमेति (छा. २।२३।१) इति ब्रह्मप्राप्त्युपदेशात् । उपपादितश्च पूर्वमेव ब्रह्मसंस्थशब्दः सर्वाश्रमिसाधारण इति । अतः सुष्ठूक्तं यज्ञादिसर्वाश्रमधर्मवन्मौनतृतीयः पाण्डित्यादिर्विद्यासहकारित्वेन विधीयत इति ॥ ४८ ॥ सहकार्यन्तरविध्यधिकरणं समाप्तम् । (१२)

अनाविष्कुर्वन्नन्वयात् ॥ ४९ ॥

तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् (बृ. ३।५।१) इत्यत्र विदुषो बाल्यमुपादेयतया श्रुतम् । बालस्य भावः कर्म वा बाल्यम् । बालभावस्य वयोवस्थाविशेषस्यानुपादे-

1. C. reads एव after तथा; E. reads ब्राह्मणः for ब्राह्मणाः.
2. A B. read सर्वैषणाया॰ for लोकैषणाया॰; E reads चरति for चरन्ति.
4. C. om. धर्म before स्थिति.
5. C. reads तृतीयम् for तृतीय.
9. E. reads आश्रमिधर्माणाम् for आश्रमिणाम्.
11. C. reads उपपादितम् for उपपादितः; A. B. read सर्वाश्रम for सर्वाश्रमि.
16. B. om. ब्राह्मणः.
18 C. om. बाल before भावस्य; E. reads आदि after वयोवस्था.

http://acharya.org

यत्वात्कर्मैवेह गृह्यते । तत्र किं बालस्य कर्म कामचारादिकं सर्वं विदुषोपादेयमुत दम्भादिरहितमेवेति विशये विशेषाभावात्सर्वमुपादेयम् । नियमशास्त्राणि च विशेषविधिनानेन बाध्यन्त इति । एवं प्राप्तेभिधीयते ।

अनाविष्कुर्वन्निति । बालस्य यत्स्वभावानाविष्काररूपं कर्म तदुपाददानो वर्तेत विद्वान् । कुतः । अन्वयात् । तस्यैवान्वयात् । बाल्येन तिष्ठासेत् (बृ. ३।५।१) इत्यस्मिन्विधौ तस्यैव ह्यन्वयसंभवः । इतरेषां विद्याविरोधित्वश्रवणात्

नाविरतो दुश्चरितान्नाशान्तो नासमाहितः ।
नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात् ॥ (का.२।२३)

आहारशुद्धौ सत्त्वशुद्धिः (छा. ७।२६।२) इत्यादिषु ॥ ४९ ॥

अनाविष्काराधिकरणं समाप्तम् । (१३)

ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ ५० ॥

द्विविधा विद्याभ्युदयफला मुक्तिफला च । तत्राभ्युदयफला स्वसाधनभूतैः पुण्यकर्मभिः कर्मानन्तरमेवोत्पद्यत उतानन्तरं कालान्तरे वेत्यनियम इति संशयः । पूर्वकृतैः पुण्यकर्मभिर्हि विद्वाञ्जायते । यथोक्तं भगवता

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन । (गी.७।१६)

इति । साधने निर्वृत्ते विलम्बहेत्वभावादनन्तरमेवेति प्राप्त उच्यते ।

---

1. C. E. read कामचारादि for कामचारादिकम्.
2. C. E. read रहितत्वम् for रहितम्.
5. C. reads स्व before स्वभाव.
6–7. B. om. तस्यैवान्वयात्.
15. C. reads पुण्य for कर्म before अनन्तरम्; E. reads पुण्य before कर्मानन्तरम्.
16. A. B. read च for वा after कालान्तरे; C. reads पूर्वप्रकृतैः for पूर्वकृतैः.
17. C. om. हि after पुण्यकर्मभिः.

ऐहिकमप्रस्तुतप्रतिबन्ध इति । ऐहिकमभ्युदयफलमुपासनम् । अप्रस्तुतप्रतिबन्धेप्रस्तुते प्रबलकर्मान्तरप्रतिबन्धे सत्यनन्तरं प्रतिबन्धे सति तदुत्तरकालमित्यनियमः । कुतः । तद्दर्शनात् । दृश्यते हि प्रबलेन कर्मान्तरेण कर्मफलप्रतिबन्धाभ्युपगमः श्रुतौ । यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरम् (छा. १।१।१०) इत्युद्गीथविद्यायुक्तस्य कर्मणः फलाप्रतिबन्धश्रवणात् ॥ ५० ॥ ऐहिकाधिकरणं समाप्तम् । (१४)

एवं मुक्तिफलानियमस्तदवस्थावधृते-स्तदवस्थावधृतेः ॥ ५१ ॥

मुक्तिफलस्याप्युपासनस्य स्वसाधनभूतैरतिशयितकर्मभिरुत्पत्तावेवमेव कालानियमः । तस्यापि पूर्ववत्प्रतिबन्धाभावप्रतिबन्धसंप्राप्तिरूपावस्थावधृतेः । अत्रापि तस्य हेतोः समानत्वादित्यर्थः । सर्वेभ्यः कर्मभ्यो मुक्तिफलविद्यासाधनस्य कर्मणः प्रबलत्वात्प्रतिबन्धासंभव इत्यधिकाशङ्का । तत्रापि ब्रह्मविदपचाराणां पूर्वकृतानां प्रबलानां संभवात्प्रतिबन्धसंभव इति परिहारः । द्विरुक्तिरध्यायपरिसमाप्तिं द्योतयति ॥ ५१ ॥
मुक्तिफलाधिकरणं समाप्तम् । (१५)

इति श्रीभगवद्रामानुजाचार्यविरचिते शारीरकमीमांसाभाष्ये तृतीयाध्यायस्य चतुर्थः पादः ॥

---

1. A B. om. प्रतिबन्धे.
3. B. reads अप्रतिबन्धे for प्रतिबन्धे.
4. A B. read प्रबल for प्रबलेन.
12. A. B. om. सम्प्राप्ति; E. reads समाप्ति for सम्प्राप्ति; C. reads तत्रापि for अत्रापि.
13. C. om. कर्मभ्यः.
15. C. reads सद्भावात् for संभवात्; A. B. read प्रतिबन्धः for प्रतिबन्धसंभवः.

http://acharya.org

अथ श्रीभाष्ये

चतुर्थाध्याये प्रथमः पाद आरभ्यते ।

आवृत्तिरसकृदुपदेशात् ॥ १ ॥

तृतीयेऽध्याये साधनैः सह विद्या चिन्तिता । अथेदानीं विद्यास्वरूपविशोधनपूर्वकं विद्याफलं चिन्त्यते । तत्र ब्रह्मविदाप्नोति परम् (तै. २।१) । तमेव विदित्वाति मृत्युमेति (श्वे. ३।८) । ब्रह्म वेद ब्रह्मैव भवति (मु. ३।२।९) । यदा पश्यः पश्यते रुक्मवर्णम् (मु. ३।१।३) इत्यादिवेदान्तवाक्येषु ब्रह्मप्राप्तिसाधनतया विहितं वेदनं किं सकृत्कृतमेव शास्त्रार्थ उतासकृदावृत्तमिति संशयः । किं युक्तम् । सकृत्कृतमिति । कुतः । ब्रह्म वेद ब्रह्मैव भवति (मु. ३।२।९) इति वेदनमात्रस्यैव विधानादसकृदावृत्तौ प्रमाणाभावात् । न चावघातादिवद्वेदनस्य ब्रह्मापरोक्ष्यं प्रति दृष्टोपायत्वाद्यावत्कार्यमावृत्तिरिति शक्यं वक्तुम् । वेदनस्य दृष्टोपायत्वाभावात् । ज्योतिष्टोमादिकर्माणि वेदान्तविहितं च वेदनं परमपुरुषाराधनरूपम् । आराधिताच्च परमपुरुषाद्धर्मार्थकाममोक्षाख्यपुरुषार्थावाप्तिरिति हि फलमत उपपत्तेः (ब्र. सू. ३।२।३७) इत्यत्र प्रतिपादितम् । अतो ज्योतिष्टोमादिवद्यथाशब्दं सकृत्कृतमेव शास्त्रार्थ इति प्राप्ते प्रचक्ष्महे ।

आवृत्तिरसकृदिति । असकृदावृत्तमेव वेदनं शास्त्रार्थः । कुतः । उपदेशात् । ध्यानोपासनपर्यायेण वेदनशब्देनोपदेशात् । तत्पर्यायत्वं च विद्युपास्तिध्यायतीनामेकस्मिन्विषये वेदनोपदे-

---

6. E. reads एवम् for एव.
21. E. om. शब्देन.

शपरवाक्येषु प्रयोगादवगम्यते । तथा हि मनो ब्रह्मेत्युपासीत (छा. ३।१८।१) इत्युपासिनोपक्रान्तोर्थो भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद (छा. ३।१८।३) इति विदिनोपसंह्रियते । तथा यस्तद्वेद यत्स वेद स मयैतदुक्तः (छा. ४।१।४) इत्युपक्रमे विदिनोक्तं रैकस्य ज्ञानमनु म एतां भगवो देवतां शाधि यां देवतामुपास्से (छा. ४।२।२) इत्युपासिनोपसंह्रियते । तथा ब्रह्मविदाप्नोति परम् (तै. २।१) इत्यादिवाक्यसमानार्थेषु वाक्येष्वात्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः (बृ. २।४।५) । ततस्तु तं पश्यते निष्कलं ध्यायमानः (मु. ३।१।८) इत्यादिषु ध्यायतिना वेदनमभिधीयते। ध्यानं च चिन्तनम्। चिन्तनं च स्मृतिसंततिरूपं न स्मृतिमात्रम् । उपास्तिरपि तदेकार्थः । एकाग्रचित्तवृत्तिनैरन्तर्ये प्रयोगदर्शनात् । तदुभयैकार्थ्यादसकृदावृत्तसंततस्मृतिरिह ब्रह्म वेद ब्रह्मैव भवति (मु. ३।२।९) । ज्ञात्वा देवं मुच्यते सर्वपाशैः (श्वे. १।८) इत्यादिषु वेदनादिशब्दैरभिधीयत इति निश्चीयते ॥ १ ॥

लिङ्गाच्च ॥ २ ॥

लिङ्गं स्मृतिः । स्मृतेश्चायमर्थोवगम्यते । स्मर्यते हि मोक्षसाधनभूतं वेदनं स्मृतिसंततिरूपम्

2. A. B. read उपक्रान्त for उपक्रान्त'.
10. E. reads पश्यति for पश्यते.
11. C. E. read तच्च for चिन्तनं च.
12. B. reads तदेकार्था for तदेकार्थः, C. reads एकार्थं for एकाग्रचित्त.
13–14. B. reads स्मृतिसंततिः for सततस्मृतिः.
15. B. reads सर्वपापैः for सर्वपाशैः.
19. B. om. संतति after स्मृति.

http://acharya.org

तद्रूपप्रत्यये चैका संततिश्चान्यनिःस्पृहा।
तद्ध्यानं प्रथमैः षड्भिरङ्गैर्निष्पाद्यते तथा॥ (वि.पु.६।७।९१)

इति। तस्मादसकृदावृत्तमेव वेदनं शास्त्रार्थः॥ २॥

आवृत्त्यधिकरणं समाप्तम्। (१)

आत्मेति तूपगच्छन्ति ग्राहयन्ति च॥ ३॥

इदमिदानीं चिन्त्यते किमुपास्यं ब्रह्मोपासितुरन्यत्वेनोपास्यमुतोपासितुरात्मत्वेनेति। किं युक्तम्। अन्यत्वेनेति। कुतः। उपासितुः प्रत्यगात्मनोर्थान्तरत्वाद्ब्रह्मणः। अर्थान्तरत्वं चाधिकं तु भेदनिर्देशात् (ब्र. सू. २।१।२२)। अधिकोपदेशात् (ब्र. सू. ३।४।८)। नेतरोनुपपत्तेः (ब्र. सू. १।१।१७) इत्यादिषूपपादितम्। यथावस्थितं च ब्रह्मोपास्यम्। अयथावस्थितोपासने हि ब्रह्मप्राप्तिरप्ययथाभूता स्यात्। यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति (छा. ३। १४।१) इति न्यायात्। अतोन्यत्वेनोपास्यमिति। एवं प्राप्तेभिधीयते।

आत्मेति त्विति। तुशब्दोवधारणे। उपासितुरात्मेत्येवोपास्यम्। उपासिता प्रत्यगात्मा स्वशरीरस्य स्वयं यथात्मा तथा स्वात्मनोपि परं ब्रह्मात्मेत्येवोपासीतेत्यर्थः। कुतः। एवं ह्युपगच्छन्ति पूर्वे उपासितारस्त्वं वा अहमस्मि भगवो देवतेहं वै त्वमसि (जाबा.) इति। उपासितुरर्थान्तरभूतं ब्रह्मोपासितारोहमिति कथमभ्युपगच्छन्तीत्यत्राह ग्राहयन्ति चेति। इममर्थमविरुद्धमुपासितॄन्ग्राहयन्ति शास्त्राणि। तान्प्रत्युपपादयन्ती-

---

12. A. B. om. अवस्थित.

18. B. om. स्व before आत्मनोपि.

19. E reads अभि for हि before उपगच्छन्ति.

21. B. reads इदम् for इमम्.

http://acharya.org

त्यर्थः। य आत्मनि तिष्ठन्नात्मनोन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्मान्तर्याम्यमृतः (श. ब्रा. १४।१६।७।३०) इति। तथा सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः (छा. ६।८।६)। ऐतदात्म्यमिदं सर्वम् (छा. ६।८।७) इति। सर्वं खल्विदं ब्रह्म तज्जलान् (छा. ३।१४।१) इति च सर्वस्य चिदचिद्वस्तुनस्तज्जत्वात्तल्लत्वात्तदनत्वात्तन्नियाम्यत्वात्तच्छरीरत्वाच्च सर्वस्यायमात्मा। अतः स त आत्मा। अतो यथा प्रत्यगात्मनः स्वशरीरं प्रत्यात्मत्वाद्देवोहं मनुष्योहमित्यनुसंधानं तथा प्रत्यगात्मनोप्यात्मत्वात्परमात्मनस्तस्याप्यहमित्येवानुसंधानं युक्तमिति। एवं शास्त्रैरुपपादितम्। सर्वबुद्धीनां ब्रह्मैकनिष्ठत्वेन सर्वशब्दानां ब्रह्मैकनिष्ठत्वमभ्युपगच्छन्तस्त्वं वा अहमस्मि भगवो देवतेहं वै त्वमसि भगवो देवते (जाबा.) इति व्यतिहारेणोक्तवन्तः। एवं चाथ योन्यां देवतामुपास्तेन्योसावन्योहमस्मीति न स वेद (बृ. १।४।१०)। अकृत्स्नो ह्येषः....आत्मेत्येवोपासीत (बृ. १।४।७)। सर्वं तं परादाद्योन्यत्रात्मनः सर्वं वेद (बृ. २।४।६) इत्यात्मत्वाननुसंधाननिषेधः पृथगात्मानं प्रेरितारं च मत्वा (श्वे. १।६) इति पृथक्त्वानुसंधानविधानं चाविरुद्धम्। अहमिति स्वात्मतया-

---

5. A. B. om. इति after इद सर्वम्.
8. A. B. om. अतः before सः
9. B. reads च after तथा.
11. B. reads निष्ठत्वे for निष्ठत्वेन.
13. B. om. भगवो देवते after त्वमसि.
14. A. B. read व्यतिकरेण for व्यतिहारेण.
17. E. reads अन्यत्वानुसंधान for आत्मत्वाननुसंधान.
19. A. B. read पृथक्त्वानुसंधानात् before पृथक्त्वानुसंधानविधानम्; B. reads त्वात्मतया for स्वात्मतया.

http://acharya.org

नुसंधानादन्यत्वानुसंधाननिषेधो रक्षितः। स्वशरीरात्स्वात्मनोधिकत्वानुसंधानवत्स्वात्मनोपि परमात्मनोधिकत्वानुसंधानात्पृथक्त्वानुसंधानविधानं च रक्षितम् । अधिकस्य ब्रह्मणः प्रत्यगात्मन आत्मत्वात्तस्य च ब्रह्मशरीरत्वान्निषेधवाक्यैकत्वो ह्येषः (बृ. १।४।७) इत्युक्तम् । अत उपासितुरात्मत्वेन ब्रह्मोपास्यमिति स्थितम् ॥ ३ ॥ आत्मत्वोपासनाधिकरणं समाप्तम् । (२)

न प्रतीके न हि सः ॥ ४ ॥

मनो ब्रह्मेत्युपासीत (छा. ३।१८।१) । स यो नाम ब्रह्मेत्युपास्ते (छा. ७।१।५) इत्यादिप्रतीकोपासनेष्वप्यात्मत्वानुसंधानं कार्यमुत नेति चिन्तायां मनो ब्रह्मेत्युपासीत (छा. ३।१८।१) इति ब्रह्मोपासनत्वसाम्याद्ब्रह्मणश्चोपासितुरात्मत्वादात्मेत्येवोपासीतेत्येवं प्राप्तेभिधीयते न प्रतीक इति । प्रतीके नात्मत्वानुसंधानं कार्यम् । न हि सः । न ह्युपासितुरात्मा प्रतीकः । प्रतीकोपासनेषु प्रतीक एवोपास्यो न ब्रह्म । ब्रह्म तु तत्र दृष्टिविशेषणमात्रम् । प्रतीकोपासनं हि नामाब्रह्मणि ब्रह्मदृष्ट्यनुसंधानम् । तत्रोपास्यस्य प्रतीकस्योपासितुरात्मत्वाभावान्न तथानुसंधेयम् ॥ ४ ॥

नन्वत्रापि ब्रह्मैवोपास्यम् । ब्रह्मण उपास्यत्वसंभवे मनआदीनामचेतनानामल्पशक्तीनां चोपास्यत्वाश्रयणस्यान्याय्यत्वात् । अतो मनआदिदृष्ट्या ब्रह्मैवोपास्यमिति । तत्राह ।

---

1. C. reads अनुसंधान for अनुसधानात्.
3. B. reads अनुसंधानम् for अनुसंधानविधानम्.
8. A. reads इ वै after स यः.
12. A. B. om. एवम् before प्राप्ते.
13. C. om. न हि सः.
14. B. reads च after उपास्यो न.
16. E. reads दृष्ट्या for दृष्टि; B. reads उपास्य for उपास्यस्य.
18. C. reads असभवे for संभवे.

http://acharya.org

ब्रह्मदृष्टिरुत्कर्षात् ॥ ५ ॥

मनआदिषु ब्रह्मदृष्टिरेव युक्ता । न ब्रह्मणि मनआदिदृष्टिः । ब्रह्मणो मनआदिभ्य उत्कर्षात् । तेषां च विपर्ययात् । उत्कृष्टे हि राजनि भृत्यदृष्टिः प्रत्यवायकरी । भृत्ये तु राजदृष्टिरभ्युदयाय ॥ ५ ॥ प्रतीकाधिकरणं समाप्तम् । (३)

आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ ६ ॥

य एवासौ तपति तमुद्गीथमुपासीत (छा. १।३।१) इत्यादिषु कर्माङ्गाश्रयेषूपासनेषु संशयः किमुद्गीथादौ कर्माङ्ग आदित्यादिदृष्टिः कर्तव्योतादित्यादिषूद्गीथादिदृष्टिरिति । उत्कृष्टदृष्टिर्निकृष्टे कर्तव्येति न्यायादुद्गीथादीनां च फलसाधनभूतकर्माङ्गत्वेनाफलेभ्य आदित्यादिभ्य उत्कृष्टत्वादादित्यादिषूद्गीथादिदृष्टिरिति प्राप्तेभिधीयत आदित्यादिमतयश्चाङ्ग इति । चशब्दोवधारणे । क्रत्वङ्ग उद्गीथादावादित्यादिदृष्टय एव कार्याः । कुतः । उपपत्तेः । आदित्यादीनामेवोत्कृष्टत्वोपपत्तेः । आदित्यादिदेवताराधनद्वारेण हि कर्मणामपि फलसाधनत्वम् । अतस्तद्दृष्टिरुद्गीथाद्यङ्गे ॥ ६ ॥ आदित्यादिमत्यधिकरणं समाप्तम् । (४)

आसीनः संभवात् ॥ ७ ॥

मोक्षसाधनतया वेदान्तशास्त्रैर्विहितं ज्ञानं ध्यानोपासनादिशब्दवाच्यमसकृदावृत्तं संततस्मृतिरूपमित्युक्तम् । तदनुतिष्ठन्नासीन उतासीनः शयानस्तिष्ठन्गच्छंश्च विशेषाभावादनियमे-

---

3. C. reads त्वविपर्ययात् for च विपर्ययात्.
12. C. reads दृष्टेः for दृष्टिः.
18. C. om. ज्ञानम्.
19. E. reads स्मृत for स्मृति; A. B. read एव after स्मृतिरूपम्.
20. B. C. E. om. उतासीनः.

http://acharya.org

नानुतिष्ठेदिति प्राप्त उच्यत आसीन इति । आसीन उपासनमनुतिष्ठेत् । कुतः । संभवात् । आसीनस्यैव ह्येकाग्रचित्ततासंभवः । स्थितिगत्योः प्रयत्नसापेक्षत्वाच्छयाने च निद्रासंभवात् । पश्चार्धधारणप्रयत्ननिवृत्तये सापाश्रय आसीनः कुर्यात् ॥ ७ ॥

ध्यानाच्च ॥ ८ ॥

निदिध्यासितव्यः (बृ. २।४।५) इति ध्यानरूपत्वादुपासनस्यैकाग्रचित्ततावश्यंभाविनी । ध्यानं हि विजातीयप्रत्ययान्तराव्यवहितमेकचिन्तनमित्युक्तम् ॥ ८ ॥

अचलत्वं चापेक्ष्य ॥ ९ ॥

निश्चलत्वं चापेक्ष्य पृथिव्यन्तरिक्षादिषु ध्यानवाचोयुक्तिर्दृश्यते ध्यायतीव पृथिवी ध्यायतीवान्तरिक्षं ध्यायतीव द्यौर्ध्यायन्तीवापो ध्यायन्तीव पर्वताः (छा. ७।६।१) इति । अतः पृथिवीपर्वतादिवदेकाग्रचित्ततया निश्चलत्वमुपासकस्यासीनस्यैव संभवेत् ॥ ९ ॥

स्मरन्ति च ॥ १० ॥

स्मरन्ति चासीनस्यैव ध्यानम्

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥

---

2. B. reads अनुतिष्ठेत for अनुतिष्ठेत्.

3. A. B. read शयने for शयाने.

4. B. reads पश्चात् for पश्चार्ध; A. B. C. read निर्वृत्तये for निवृत्तये; E. reads साश्रयः for सापाश्रयः.

11. C. reads हि for च after निश्चलत्वम्.

http://acharya.org

तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः ।
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये ॥

(भ. गी. ६।११-१२)

इति ॥ १० ॥

यत्रैकाग्रता तत्राविशेषात् ॥ ११ ॥

एकाग्रतातिरिक्तदेशकालविशेषाश्रवणादेकाग्रतानुकूलो यो देशः कालश्च स एवोपासनस्य देशः कालश्च । समे शुचौ शर्करावह्निवालुकाविवर्जिते (श्वे. २।१०) इति वचनमेकाग्रतैकान्तमाह न तु देशं नियच्छति । मनोनुकूले (श्वे.२।१०) इति वाक्यशेषात् ॥ ११ ॥ आसीनाधिकरणं समाप्तम् । (५)

आ प्रयाणात्तत्रापि हि दृष्टम् ॥ १२ ॥

तदिदमपवर्गसाधनमुक्तलक्षणमुपासनमेकाह एव संपाद्यमुत प्रयाणात्प्रत्यहमनुवर्तनीयमिति विशये एकस्मिन्नेवाह्नि शास्त्रार्थस्य कृतत्वात्तावतैव परिसमापनीयमिति प्राप्त उच्यते आ प्रयाणादिति । आ मरणादनुवर्तनीयम् । कुतः । तत्रापि हि दृष्टम् । उपासनोद्योगप्रभृत्या प्रयाणान्मध्ये यः कालस्तत्र सर्वत्रापि दृष्टमुपासनं स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसंपद्यते (छा. ८।१५।१) इति ॥ १२ ॥ आप्रयाणाधिकरणं समाप्तम् । (६)

तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ १३ ॥

एवं विद्यास्वरूपं विशोध्य विद्याफलं चिन्तयितुमारभते ।

---

1. C. reads क्रमः for क्रियः after इन्द्रिय.
7. E. reads देशे after शुचौ.
8. C. E. read आदि after वालुका.
9. A. E. read एकान्तदेशम् for एकान्तम्.
12. E. reads उक्तलक्षण for उक्तलक्षणम्.
20. C. reads विनाशात् for विनाशौ.

http://acharya.org

ब्रह्मविद्याप्राप्तौ पुरुषस्योत्तरपूर्वाघयोरश्लेषविनाशौ श्रूयेते। तद्यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते (छा. ४।१४।३)।

तस्यैवात्मा पदवित्तं विदित्वा न कर्मणा लिप्यते पापकेन।
(बृ. ४।४।२३)

इत्युत्तराघाश्लेषः। तद्यथेषीकतूलमग्नौ प्रोतं प्रदूयेतैवं ह्यस्य सर्वे पाप्मानः प्रदूयन्ते (छा. ५।२४।३)।

क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे। (मु.२।२।८)

इति पूर्वाघविनाशः। एतावश्लेषविनाशौ विद्याफलभूतावुपपद्येते नेति संशयः। किं युक्तम्। नोपपद्येते इति। कुतः।

नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि।
(ब्रह्मवै. प्रकृ. २६।७०)

इत्यादिशास्त्रविरोधात्। अश्लेषविनाशव्यपदेशस्तु मोक्षसाधनभूतविद्याविधायिवाक्यशेषगतः कथंचिद्विद्यास्तुतिप्रतिपादनेनाप्युपपद्यते। न च विद्या पूर्वोत्तराघयोः प्रायश्चित्ततया विधीयते। येन प्रायश्चित्तेनाघविनाश उच्येत। विद्या हि ब्रह्मविदाप्नोति परम् (तै. २।१)। ब्रह्म वेद ब्रह्मैव भवति (मु. ३।२।९) इति ब्रह्मप्राप्त्युपायतया विधीयते। अतो विद्यास्तुत्यर्थवादोयमघविनाशाश्लेषव्यपदेश इति। एवं प्राप्तेभिधीयते।

तदधिगम इति। विद्याप्राप्तौ पुरुषस्य विद्यामाहात्म्यादुत्तरपूर्वाघयोरश्लेषविनाशावुपपद्येते। कुतः। एवंविधं हि विद्यामाहात्म्यमवगम्यते। एवंविदि पापं कर्म न श्लिष्यते (छा.४।१४।३)। एवं ह्यस्य सर्वे पाप्मानः प्रदूयन्ते (छा. ५।२४।३) इत्यादिव्यपदेशात्।

6. A. B. reads इषीका for इषीक.
14. A. om. भूत after साधन.
16. C. reads उच्यते for उच्येत
18. A B. E. om. स्तुति after विद्या.

http://acharya.org

न च नाभुक्तं क्षीयते कर्म (ब्रह्मवै. प्रकृ. २६।७०) इत्यनेनास्य विरोधः । भिन्नविषयत्वात् । तद्धि कर्मणां फलजननसामर्थ्यदृढिमविषयम् । एतत्तूत्पन्नाया विद्यायाः प्राक्कृतानां पाप्मनां फलजननशक्तिविनाशसामर्थ्यमुत्पत्स्यमानानां च फलजननशक्त्युत्पत्तिप्रतिबन्धकरणसामर्थ्यं च प्रतिपादयतीति द्वयोर्विषयो भिद्यते । यथाग्निजलयोरौष्ण्यतन्निवारणसामर्थ्यविषययोर्द्वयोः प्रमाणयोरपि विषयभेदादप्रामाण्यमेवमत्रापीति न कश्चिद्विरोधः । अघस्याश्लेषकरणं वैदिककर्मायोग्यतावासनाप्रत्यवायहेतुशक्त्युत्पत्तिप्रतिबन्धकरणम् । अघानि हि कृतानि पुरुषस्य वैदिककर्मायोग्यतां सजातीयकर्मान्तरारम्भरुचिं प्रत्यवायं च कुर्वन्ति । अघस्य विनाशकरणमुत्पन्नायास्तच्छक्तेर्विनाशकरणम् । शक्तिरपि परमपुरुषाप्रीतिरेव । तदेवं विद्या वेदितुर्वेद्यात्यर्थप्रियत्वेन स्वयमपि निरतिशयप्रिया सती वेद्यभूतपरमपुरुषाराधनस्वरूपा पूर्वकृताघसंचयजनितपरमपुरुषाप्रीतिं विनाशयति । सैव विद्या स्वोत्पत्त्युत्तरकालभाव्यघनिमित्तपरमपुरुषाप्रीत्युत्पत्तिं च प्रतिबध्नाति । तदिदमश्लेषवचनं प्रामादिकविषयं मन्तव्यम् । नाविरतो दुश्चरितात् (का. २। २४) इत्यादिभिः शास्त्रैरा प्रयाणादहरहरुत्पद्यमानाया उत्तरोत्तरातिशयभागिन्या विद्याया दुश्चरितविरतिनिष्पाद्यत्वावगमात् ॥ १३ ॥ तदधिगमाधिकरण समाप्तम् । (७)

इतरस्याप्येवमसंश्लेषः पाते तु ॥ १४ ॥

उत्तरपूर्वाघयोर्विद्ययाश्लेषविनाशावुक्तौ । इतरस्य पुण्यस्या-

---

1. B. C. read न कर्म क्षीयते for नाभुक्तं क्षीयते कर्म; C. E. read शास्त्रेण after अनेन.
5. C. reads तयो. for द्वयोः.
10. C. reads रुचि for रुचिम्.
11. B. om. च after प्रत्यवायम्.
18-19. C. om. उत्तरोत्तरातिशयभागिन्याः.

http://acharya.org

प्येवमुक्तेन न्यायेनाश्लेषविनाशौ विद्यया स्याताम् । विद्याफलविरोधित्वसामान्यात् । व्यपदेशाच्च । भवति च व्यपदेश उभे सुकृतदुष्कृते निर्दिश्य सर्वे पाप्मानोतो निवर्तन्ते (छा. ८।४।१) इति । तत्सुकृतदुष्कृते धूनुते (कौ. १।४) इति च । मुमुक्षोरनिष्टफलत्वात्सुकृतस्यापि पाप्मशब्देन व्यपदेशः । सुकृतस्य शास्त्रीयत्वात्तत्फलस्य केषांचिदिष्टत्वदर्शनाच्च विद्याविरोधशङ्कां निवर्तयितुमतिदेशः । ननु विदुषोपि सेतिकर्तव्यताकोपासननिर्वृत्तये वृष्ट्यन्नादिफलानीष्टान्येव । कथं तेषां विरोधाद्विनाश उच्यते । तत्राह पाते त्विति । शरीरपाते तु तेषां विनाशः । शरीरपातादूर्ध्वं तु विद्यानुगुणदृष्टफलानि सुकृतानि नश्यन्तीत्यर्थः ॥ १४ ॥ इतराधिकरणं समाप्तम् । (८)

अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥ १५ ॥

ब्रह्मविद्योत्पत्तेः पूर्वोत्तरभाविनोः सुकृतदुष्कृतयोरश्लेषविनाशावुक्तौ । ततः पूर्वभाविनोः सुकृतदुष्कृतयोः किमविशेषेण विनाश उतानारब्धकार्ययोरेवेति विशये सर्वे पाप्मानः प्रदूयन्ते (छा. ५।२४।३) इति विद्याफलस्याविशेषश्रवणाद्विद्योत्पत्त्युत्तरकालभाविन्याश्च शरीरस्थितेः कुलालचक्रभ्रमणादिवत्संस्कारवशादप्युपपत्तेरविशेषेणेति प्राप्त उच्यतेनारब्धकार्ये एव तु पूर्वे इति । विद्योत्पत्तेः पूर्वे सुकृतदुष्कृते अनारब्धकार्ये अप्रवृत्तफले एव विद्यया विनश्यतः । कुतः ।

---

1. A. B. read असश्लेष for अश्लेष.

4. C. E. read वि before धूनुते.

5. C. reads शब्द for शब्देन.

6. E. reads अपि after सुकृतस्य; A. B. read विद्यायाः for विद्यया.

8. C. reads अन्नादीनि for अन्नादि.

16. C. reads अविशेषेण for अविशेष.

तद्वधेः । तस्य तावदेव चिरं यावन्न विमोक्ष्येथ संपत्स्ये (छा. ६।१४।२) इति शरीरपातविलम्बावधिश्रुतेः । न च पुण्यापुण्यकर्मजन्यभगवत्प्रीत्यप्रीतिव्यतिरेकेण शरीरस्थिति-हेतुभूतसंस्कारसद्भावे प्रमाणमस्ति ॥ १५ ॥ अनारब्धकार्याधिकरण समाप्तम् । (९)

अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥ १६ ॥

इतरस्याप्येवमसंश्लेषः (ब्र. सू. ४।१।१४) इति विद्या-बलात्सुकृतस्याप्यसंश्लेष उक्तः । अग्निहोत्रादीनां नित्यनैमित्तिकानां स्वाश्रमधर्माणामपि सुकृतत्वसामान्येन तत्फलस्याश्लेषादनिच्छतोननुष्ठाने प्राप्त उच्यतेग्निहोत्रादि त्विति । तुशब्दः सुकृतान्तरेभ्यो विशेषार्थः । अग्निहोत्राद्याश्रमधर्माः फलाश्लेषासंभवादनुष्ठेया एव । तदसंभवश्च तत्कार्यार्थत्वात्तेषाम् । विद्याख्यकार्यायैव हि विदुषोग्निहोत्राद्यनुष्ठानम् । कथमिदमवगम्यते । तद्दर्शनात् । दृश्यते हि तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन (बृ. ४।४।२२) इत्यादिनाग्निहोत्रादीनां विद्यासाधनत्वम् । विद्यायाश्चा प्रयाणादभ्यासाधेयातिशयाया अहरहरुत्पाद्यत्वात्तदुत्पत्त्यर्थमाश्रमकर्माण्यहरहरनुष्ठेयमेव । अन्यथाश्रमकर्मलोपे दूषितान्तःकरणस्य विद्योत्पत्तिरेव न स्यात् ॥ १६ ॥

यद्यग्निहोत्रादिसाधुकृत्या विद्योत्पत्त्यर्था विद्योत्पत्तेः प्राचीनं च सुकृतं यावत्संपातमुषित्वा (छा. ५।१०।५) प्राप्यान्तं

---

3. C. om. कर्म after अपुण्य.

8. C. reads एवम् after सुकृतस्यापि; B. reads अत्र before अग्निहोत्रादीनाम्.

11. C. E. read विशेषणार्थः for विशेषार्थः; B. reads धर्म for धर्माः after आश्रम.

http://acharya.org

कर्मणः (बृ. ४।४।६) इत्यनुभवेन विनष्टं भुक्तावशिष्टं च प्रारब्धफलं सुहृदः साधुकृत्यामित्यस्य को विषयः । तत्राह ।

अतोन्यापि ह्येकेषामुभयोः ॥ १७ ॥

अतोग्निहोत्रादिसाधुकृत्याया विद्योत्पत्त्यर्थाया अन्यापि विद्याधिगमात्पूर्वोत्तरयोरुभयोरपि पुण्यकर्मणोः प्रबलकर्मप्रतिबद्धफला साधुकृत्यानन्ता संभवत्येव । तद्विषयमिदमेकेषां शाखिनां वचनं तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यामिति । विद्याश्लेषविनाशश्रुतिश्च तद्विषया ॥ १७ ॥

अनुष्ठितस्यापि कर्मणः फलप्रतिबन्धसंभवं पूर्वोक्तं स्मारयति ।

यदेव विद्ययेति हि ॥ १८ ॥

यदेव विद्यया करोति तदेव वीर्यवत्तरम् (छा. १।१।१०) इत्युद्गीथविद्यायाः क्रतुफलाप्रतिबन्धफलत्ववचनेनानुष्ठितस्यापि कर्मणः फलप्रतिबन्धः सूच्यते हि । अतो विदुषोनुष्ठितप्रतिबद्धफलविषयं सुहृदः साधुकृत्यामिति शाट्यायनकम् ॥ १८ ॥
अग्निहोत्राद्यधिकरणं समाप्तम् । (१०)

भोगेन त्वितरे क्षपयित्वाथ संपद्यते ॥ १९ ॥

ययोः पुण्यपापयोरश्लेषविनाशावुक्तौ ताभ्यामितरे आरब्धकार्ये पुण्यपापे किं विद्यायोनिशरीरावसाने उत तच्छरीरावसाने शरीरान्तरावसाने वेत्यनियम इति संशये तस्य तावदेव चिरं यावन्न विमोक्ष्येथ संपत्स्ये (छा. ६।१४।२)

---

1. B. C. read भुक्तशिष्टम् for भुक्तावशिष्टम्.
2. E. reads प्रारब्ध कर्मफलम् for प्रारब्धफलम्; E. reads विधेयः for विषयः.
5-6. C. reads प्रतिपिद्धफल for प्रतिबद्धफला.
14. E. reads शाट्यायनिकम् for शाट्यायनकम्.
20. C. om. अथ संपत्स्ये.

http://acharya.org

इति तच्छरीरविमोक्षावसानत्वश्रवणात्तदवसाने इति प्राप्त उच्यते भोगेन त्विति । तुशब्दः पक्षव्यावृत्त्यर्थः । इतरे आरब्धकार्ये पुण्यपापे स्वारब्धफलभोगेन क्षपयित्वा तत्फलभोगसमाप्त्यनन्तरं ब्रह्म संपद्यते । ते च पुण्यपापे एकशरीरोपभोग्यफले चेत्तच्छरीरावसाने संपद्यते । अनेकशरीरोपभोग्यफले चेत्तदवसाने संपद्यते । भोगेनैव च क्षपयितव्यत्वादारब्धफलयोः कर्मणोः । तस्य तावदेव चिरं यावन्न विमोक्ष्ये (छा. ६।१४।२) इति च भोगेन तयोः कर्मणोर्विमोक्ष उच्यते । देहावधिनियमाश्रवणात् । तदेवं ब्रह्मविद्यायाः प्रागनुष्ठितमभुक्तफलमनारब्धफलं पुण्यपापरूपं कर्मानादिकालसंचितमनन्तं विद्यामाहात्म्याद्विनश्यति । विद्यारम्भोत्तरकालमनुष्ठितं च न श्लिष्यति । तत्र पुण्यरूपं सर्वं विदुषः सुहृदो गृह्णन्ति पापं च द्विषन्त इति निरवद्यम् ॥ १९ ॥ इतरक्षपणाधिकरणं समाप्तम् । (११)

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये चतुर्थाध्यायस्य प्रथमः पादः ॥

---

1. C. om. वि before मोक्षावसानत्व.
5. A. B. om. उप in both the places; E. reads इति after अवसाने.
6. A. B. om. च after भोगेनैव; E. reads क्षययितव्यत्वात् for क्षपयितव्यत्वात्.

http://acharya.org

अथ श्रीभाष्ये

चतुर्थाध्यायस्य द्वितीयः पादः प्रारभ्यते ॥

वाङ्मनसि दर्शनाच्छब्दाच्च ॥ १ ॥

इदानीं विदुषो गतिप्रकारं चिन्तयितुमारभते । प्रथमं तावदुत्क्रान्तिश्चिन्त्यते । तत्रेदमाम्नायतेस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम् (छा. ६।८।६) इति । अत्र वाङ्मनसि संपद्यत इति वाचो मनसि संपत्तिश्रुतिः किं वाग्वृत्तिमात्रविषयोत वाग्विषयेति विशये वृत्तिमात्रविषयेति युक्तम् । कुतः । मनसो वाक्प्रकृतित्वाभावात्तत्र वाक्स्वरूपसंपत्त्यसंभवात् । वागादिवृत्तीनां मनोधीनत्वेन वृत्तिसंपत्तिश्रुतिः कथंचिदुपपद्यत इति । एवं प्राप्तेभिधीयते ।

वाङ्मनसीति । वाक्स्वरूपमेव मनसि संपद्यते । कुतः । तद्दर्शनात् । दृश्यते हि वागिन्द्रिय उपरतेपि मनःप्रवृत्तिः । वृत्तिमात्रसंपत्त्यापि तदुपपद्यत इति चेत्तत्राह शब्दाच्चेति । वाङ्मनसि संपद्यते (छा. ६।८।६) इति वाक्स्वरूपसंपत्तावेव हि शब्दो न वृत्तिमात्रसंपत्तौ । न हि तदानीं वृत्त्युपरमे वागिन्द्रियं प्रमाणान्तरेणोपलभ्यते येन वृत्तिमात्रं संपद्यत इत्युच्येत । यदुक्तं मनसो वाक्प्रकृतित्वाभावाद्वाचो मनसि संपत्तिर्नोपपद्यत इति तद्वाङ्मनसि संपद्यते (छा. ६।८।६)

---

10. C. reads अभावात् for असंभवात्.

16. A. om. स्वरूप.

18. C. reads एव after वृत्तिमात्रम्.

19. E. reads क after प्रकृति.

http://acharya.org

इति वचनान्मनसा वाक्संयुज्यते न तु तत्र लीयत इति परिहर्तव्यम् ॥ १ ॥

अत एव सर्वाण्यनु ॥ २ ॥

यतो वाचो मनसा संयोगमात्रं संपत्तिर्न तु लयोत एव वाचमनु सर्वेषामिन्द्रियाणां मनसि संपत्तिश्रुतिरुपपद्यते । तस्मादुपशान्ततेजाः पुनर्भवमिन्द्रियैर्मनसि संपद्यमानैः (प्र. ३।९) इति ॥ २ ॥ वागधिकरणं समाप्तम् । (१)

तन्मनः प्राण उत्तरात् ॥ ३ ॥

तत्सर्वेन्द्रियसंयुक्तं मनः प्राणे संपद्यते प्राणेन संयुज्यते । न मनोवृत्तिमात्रम् । कुतः । उत्तरात् । मनः प्राणे (छा. ६।८।६) इति वाक्यात् । अधिकाशङ्का त्वन्नमयं हि सोम्य मनः (छा. ६।५।४) इति वचनान्मनसोन्नप्रकृतिकत्वमवगम्यते । अन्नस्य च ता अन्नमसृजन्त (छा. ६।२।४) इत्यम्मयत्वं सिद्धम् । आपोमयः प्राणः (छा. ६।५।४) इति चाप्प्रकृतित्वं प्राणस्यावगम्यते । अतो मनः प्राणे संपद्यते (छा. ६। ८।६) इत्यत्र प्राणशब्देन प्राणप्रकृतिभूता अपो निर्दिश्य तासु मनःसंपत्तिप्रतिपादने परंपरया स्वकारणे लय इति संपत्तिवचनमुपपन्नं भवतीति । परिहारस्त्वन्नमयं हि सोम्य मन आपोमयः प्राणः (छा. ६।५।४) इति मनःप्राणयोरन्नेनाद्भिश्चाप्यायनमुच्यते न तत्प्रकृतित्वम् । आहंकारिकत्वान्मनस आकाशविकारत्वाच्च प्राणस्य । प्राणशब्देनापां लक्षणा च स्यादिति ॥ ३ ॥ मनोधिकरणं समाप्तम् । (२)

---

6. A. C. E. read अपुनर्भवम् for पुनर्भवम्.
10. A. B. read मनसो वृत्ति for मनोवृत्ति.
12. B. om. क after प्रकृति.
13. A. B. om च after अन्नस्य.
21. C. E. read आदि after आकाश.

http://acharya.org

सोऽध्यक्षे तदुपगमादिभ्यः ॥ ४ ॥

यथा वाङ्मनसि संपद्यते मनः प्राणे (छा. ६।८।६) इति वचनानुरोधेन मनःप्राणयोरेव वाङ्मनसयोः संपत्तिस्तथा प्राणस्तेजसि (छा. ६।८।६) इति वचनात्तेजस्येव प्राणः संपद्यत इति प्राप्त उच्यते सोऽध्यक्ष इति । स प्राणोऽध्यक्षे करणाधिपे जीवे संपद्यते । कुतः । तदुपगमादिभ्यः । प्राणस्य जीवोपगमस्तावच्छ्रूयत एवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति (बृ. ४।३।३८) इति । तथा जीवेन सह प्राणस्योत्क्रान्तिः श्रूयते तमुत्क्रामन्तं प्राणोऽनूत्क्रामति (बृ. ४।४।२) इति । प्रतिष्ठा च जीवेन सह श्रूयते कस्मिन्नुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामि (प्र.६।३) इति । एवं जीवेन संयुज्य तेन सह तेजःसंपत्तिरिह प्राणस्तेजसि (छा. ६।८।६) इत्युच्यते । यथा यमुनाया गङ्गया संयुज्य सागरगमनेऽपि यमुना सागरं गच्छतीति वचो न विरुध्यते तद्वत् ॥ ४ ॥ अध्यक्षाधिकरणं समाप्तम् । (३)

भूतेषु तच्छ्रुतेः ॥ ५ ॥

प्राणस्तेजसि (छा. ६।८।६) इति जीवसंयुक्तस्य प्राणस्य तेजसि संपत्तिरुक्ता । सा संपत्तिः किं तेजोमात्र उत संहतेषु सर्वेषु भूतेष्विति विशये तेजोमात्रश्रवणात्तेजसीति प्राप्त उच्यते भूतेष्विति । भूतेषु संपद्यत इति । कुतः । तच्छ्रुतेः । पृथिवीमय आपोमयस्तेजोमयः (बृ. ४।४।५) इति जीवस्य संचरतः सर्वभूतमयत्वश्रुतेः ॥ ५ ॥

---

11. A. E. read प्रतिष्ठितः स्याम् for प्रतिष्ठास्यामि.

19. A. B om. विशये.

20. A. B. om. भूतेष्विति.

ननु तेजःप्रभृतिष्वेकैकस्मिन्क्रमेण संपत्तावपि पृथिवीमयः (बृ.४।४।५) इत्यादिका श्रुतिरुपपद्यतेत आह ।

नैकस्मिन्दर्शयतो हि ॥ ६ ॥

नैकस्मिन् । एकैकस्य कार्याक्षमत्वात् । दर्शयतो ह्यक्षमत्वं श्रुतिस्मृती । अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि तासां त्रिवृतं त्रिवृतमेकैकां करवाणि (छा. ६।३।२-३) इति नामरूपव्याकरणयोग्यत्वाय त्रिवृत्करणमुपदिश्यते ।

नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना ।
नाशक्नुवन्प्रजाः स्रष्टुमसमागम्य कृत्स्नशः ॥
समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः ।
महदाद्या विशेषान्ता ह्यण्डमुत्पादयन्ति ते ॥

(वि. पु. १।२।५०-५२)

इति । अतः प्राणस्तेजसि (छा. ६।८।६) इति तेजःशब्देन भूतान्तरसंसृष्टमेव तेजोभिधीयते । अतो भूतेष्वेव संपत्तिः ॥ ६ ॥ भूताधिकरण समाप्तम् । (४)

समाना चा सृत्युपक्रमादमृतत्वं चानुपोष्य ॥ ७ ॥

इयमुत्क्रान्तिः किं विद्वदविदुषोः समानोताविदुष एवेति चिन्तायामविदुष एवेति प्राप्तम् । कुतः । विदुषोत्रैवामृतत्ववचनादुत्क्रान्त्यभावात् । विदुषो ह्यत्रैवामृतत्ववचनं श्राव्यते

यदा सर्वे प्रमुच्यन्ते कामा येस्य हृदि श्रिताः ।
अथ मर्त्योमृतो भवत्यत्र ब्रह्म समश्नुते ॥

(का. ६।१४; बृ.४।४।७)

इति । एवं प्राप्तेभिधीयते समाना चा सृत्युपक्रमादिति । विदुषो-

---

19. C. reads अमृतत्वम् for अमृतत्ववचनम्.

20. C. E. read स्थिताः for श्रिताः.

http://acharya.org

प्या सृत्युपक्रमादुत्क्रान्तिः समाना । आ सृत्युपक्रमादा गत्युपक्रमान्नाडीप्रवेशात्प्रागित्यर्थः । विदुषोपि हि नाडीविशेषेणोत्क्रम्य गतिः श्रूयते

शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका ।
तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति ॥
(का. ६।१६, छा. ८।६।६)

इति । एवं नाडीविशेषेण गतिश्रवणाद्विदुषोप्युत्क्रान्तिरवर्जनीया । सा च नाडीप्रवेशात्प्राग्विशेषाश्रवणात्समाना । तत्प्रवेशदशायां च विशेषः श्रूयते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्यः (बृ.४।४।२) इति । शतं चैका च हृदयस्य (का. ६।१६; छा. ८।६।६) इत्यनया श्रुत्यैकार्थ्यान्मूर्ध्नो निष्क्रमणं विद्वद्विषयमितरदविद्वद्विषयम् ।

यदुक्तं विदुषोत्रैवामृतत्वं श्राव्यत इति तत्रोच्यतेमृतत्वं चानुपोष्येति । चशब्दोवधारणे । अनुपोष्य शरीरेन्द्रियादिसंबन्धमदग्ध्वैव यदमृतत्वमुत्तरपूर्वाघयोरश्लेषविनाशरूपं प्राप्यते तदुच्यते यदा सर्वे प्रमुच्यन्ते (का. ६।१४) इत्यादिकया श्रुत्येत्यर्थः । अत्र ब्रह्म समश्नुते (बृ. ६।१४) इति चोपासनवेलायां यो ब्रह्मानुभवस्तद्विषयमित्यभिप्रायः ॥ ७ ॥

तदापीतेः संसारव्यपदेशात् ॥ ८ ॥

अवश्यं च तदमृतत्वमदग्धदेहसंबन्धस्यैवेति विज्ञेयम् । कुतः । आपीतेः संसारव्यपदेशात् । अपीतिरप्ययो ब्रह्म-

---

2. B. om. हि after विदुषोपि.
9. C. E. read प्रद्योतनेन for प्रद्योतेन.
12. A. B. read मूर्ध्ना for मूर्ध्नः.
14. C. reads अत्र for तत्र.

http://acharya.org

प्राप्तिः । सा चार्चिरादिमार्गेणं देशविशेषं गत्वेति वक्ष्यते । आ तदवस्थाप्राप्तेः संसारो देहसंबन्धलक्षणो हि व्यपदिश्यते तस्य तावदेव चिरं यावन्न विमोक्ष्येथ संपत्स्ये (छा.६।१४।२) इति । अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामि (छा. ८।१३।१) इति च ॥ ८ ॥

सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥ ९ ॥

इतश्च विदुषोपि बन्धो नात्र विदग्धः । यतः सूक्ष्मं शरीरमनुवर्तते । कुत इदमवगम्यते । प्रमाणतस्तथोपलब्धेः । उपलभ्यते हि देवयानेन पथा गच्छतो विदुषस्तं प्रतिब्रूयात्सत्यं ब्रूयात् (कौ. १।६) इति चन्द्रमसा संवादवचनेन शरीरसद्भावः । अतः सूक्ष्मशरीरमनुवर्तते । अतश्च बन्धो न दग्धः ॥९॥

नोपमर्देनातः ॥ १० ॥

अतो

यदा सर्वे प्रमुच्यन्ते कामा येस्य हृदि श्रिताः ।
अथ मर्त्योमृतो भवत्यत्र ब्रह्म समश्नुते ॥
(का. ६।१४ बृ. ४।४।७)

इति वचनं न बन्धोपमर्देनामृतत्वं वदति ॥ १० ॥

अस्यैव चोपपत्तेरूष्मा ॥ ११ ॥

अस्य सूक्ष्मशरीरस्य कचिद्ध्रियमाणत्वोपपत्तेर्विदुषः प्रक्रान्त-

---

1. C. om. च after सा; C. E. read अर्चिरादिना for अर्चिरादि.
5. A. B. read कृत आत्मा for कृतात्मा.
6. C. om. च after इति.
8. C. E. read सूक्ष्म for सूक्ष्मम्.
15. A. B. E. read स्थिताः for श्रिताः.
18. C. om. न after वचनम्.

http://acharya.org

मरणस्य मरणात्प्रागूष्मा स्थूले शरीरे क्वाचित्क उपलभ्यते। न च स्थूलस्यैव शरीरस्यायमूष्मा । अन्यत्रानुपलब्धेः । ततश्चोष्मणः क्वचिदुपलब्धिर्विदुषः सूक्ष्मशरीरस्योत्क्रान्तिनिबन्धनेति गम्यते । तस्माद्विदुषोप्या सृत्युपक्रमात्समानोत्क्रान्तिरिति सुष्ठूक्तम् ॥ ११ ॥

पुनरपि विदुष उत्क्रान्तिर्न संभवतीत्याशङ्क्य परिह्रियते ।

प्रतिषेधादिति चेन्न शारीरात्स्पष्टो ह्येकेषाम्॥ १२॥

यदुक्तं विदुषोप्युत्क्रान्तिः समानेति तन्नोपपद्यते । विदुष उत्क्रान्तिप्रतिषेधात् । तथा हि स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति (बृ. ४।४।१) इत्युपक्रम्य तेन प्रद्योतेनैष आत्मा निष्क्रामति तमुत्क्रामन्तं प्राणोनूत्क्रामति (बृ. ४।४।२) इत्यविदुष उत्क्रान्तिप्रकारमभिधायान्यन्नवतरं कल्याणतरं रूपं कुरुते (बृ. ४।४।४) इति देहान्तरपरिग्रहं चाभिधाय

प्राप्यान्तं कर्मणस्तस्य यत्किंचेह करोत्ययम् ।
तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे ॥

इति तु कामयमानः (बृ. ४।४।६) इत्यविद्वद्विषयं परिसमाप्याथाकामयमानो योकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन्ब्रह्माप्येति (बृ. ४।४।६) इति विदुष उत्क्रान्तिः प्रतिषिध्यते । तथा पूर्वत्रार्तभागप्रश्नेपि विदुष उत्क्रान्तिप्रतिषेधो दृश्यते । अप पुनर्मृत्युं जयति (बृ. ३।२।१०) इति विद्वांसं प्रस्तुत्य याज्ञवल्क्येति होवाच यत्रायं

---

1. E. reads स्थूल for स्थूले.
2. B. reads उपलब्धेः for अनुपलब्धेः.
10. A. E. read अप for अव before क्रामति.
13. C. reads कल्याणम् for कल्याणतरम्

http://acharya.org

पुरुषो म्रियत उदस्मात्प्राणाः क्रामन्त्याहो न (बृ. ३।२।११) इति पृष्टे नेति होवाच याज्ञवल्क्योऽत्रैव समवलीयन्ते स उच्छ्वयत्याध्मातो मृतः शेते (बृ. ३।२।११) इति । अतो विद्वानिहैवामृतत्वं प्राप्नोतीति चेत्तन्न । शारीरात्प्रत्यगात्मनः प्राणानामुत्क्रान्तिर्ह्यत्र प्रतिषिध्यते न शरीरात् । न तस्य प्राणा उत्क्रामन्ति (बृ. ४।४।६) इत्यत्र तच्छब्देनाथाकामयमानः (बृ. ४।४।६) इति प्रकृतः शारीर एव परामृश्यते नाश्रुतं शरीरम् ।

तस्येति षष्ठ्या प्राणानां संबन्धित्वेन शारीरो निर्दिष्टो न तूत्क्रान्त्यपादानत्वेन । उत्क्रान्त्यपादानं तु शरीरमेवेति चेन्न । अपादानापेक्षायामश्रुताच्छरीरात्संबन्धितया श्रुतस्यात्मन एव संनिहितत्वेनापादानतयापि ग्राह्यत्वात् । किं च प्राणानां जीवसंबन्धितयैव प्रज्ञातानां तत्संबन्धकथने प्रयोजनाभावात्संबन्धमात्रवाचिन्या षष्ठ्यापादानमेव विशेष इति निश्चीयते । यथा नटस्य शृणोतीति । न चात्र विवदितव्यम् । स्पष्टो ह्येकेषां माध्यंदिनानामाम्नाये शारीरो जीव एवापादानमिति योऽकामो निष्काम आप्तकाम आत्मकामो न तस्मात्प्राणा उत्क्रामन्ति (श. ब्रा. १४।७।२।८) इति । शारीरात्प्राणानामुत्क्रान्तिप्रसङ्गाभावात्तन्निषेधो नोपपद्यत इति चेन्न । तस्य तावदेव चिरम् (छा. ६।१४।२) इति विदुषः शरीरवियोगकाले ब्रह्मसंपत्तिवचनेन

1. C. E. read उत् before क्रामन्ति.
6. C. reads इति न after तच्छब्देन.
7. B. reads प्रकृत for प्रकृतः.
13. C. reads संबन्धित्व for संबन्ध after तत्.
14. C. reads अपादानत्वम् for अपादानम्.
19. B. om. तत्; C. E. read प्रतिषेधः for निषेधः.

http://acharya.org

प्राणानामपि तस्मिन्काले शारीराद्विदुषो वियोगः प्रसज्यते । ततश्च देवयानेन पथा ब्रह्मसंपत्तिर्नोपपद्यत इति न तस्य प्राणा उत्क्रामन्ति देवयानेन पथा ब्रह्मप्राप्तेः प्राग्जीवाद्विदुषोपि प्राणा न विश्लिष्यन्त इत्युच्यते ।

आर्तभागप्रश्नोपि यदा विद्वद्विषयस्तदायमेव परिहारः । स त्वविद्वद्विषयः । तत्र प्रश्नप्रतिवचनयोर्ब्रह्मविद्याप्रसङ्गादर्शनात् । तत्र हि ग्रहातिग्रहरूपेणेन्द्रियेन्द्रियार्थस्वभावोपामग्न्यन्नत्वं म्रियमाणस्य जीवस्य प्राणापरित्यागो मृतस्य नामवाच्यकीर्त्यनुवृत्तिस्तस्य च पुण्यपापानुगुणगतिप्राप्तिरित्येतेर्थाः प्रश्नपूर्वकं प्रत्युक्ताः । तत्र चाप पुनर्मृत्युं जयति (बृ. ३।२।१०) इत्यपामग्न्यन्नत्वज्ञानादग्निजय एव मृत्युजय उच्यते । अतो नात्र विदुषः प्रसङ्गः । अविदुषस्तु प्राणानुत्क्रान्तिवचनं स्थूलदेहवत्प्राणा न मुञ्चन्त्यपि तु भूतसूक्ष्मवज्जीवं परिष्वज्य गच्छन्तीति प्रतिपादयतीति निरवद्यम् ॥ १२ ॥

स्मर्यते च ॥ १३ ॥

स्मर्यते च विदुषोपि मूर्धन्यनाड्योत्क्रान्तिः

ऊर्ध्वमेकः स्थितस्तेषां यो भित्त्वा सूर्यमण्डलम् ॥

ब्रह्मलोकमतिक्रम्य तेन याति परां गतिम् ॥

(याज्ञ. स्मृ. ३।१६७)

इति ॥ १३ ॥ आसृत्युपक्रमाधिकरणं समाप्तम् । (५)

---

1. A. B. om. अपि.
4. E. reads विश्लिष्यन्ति for विश्लिष्यन्ते.
7. C. reads एव after तत्र; A. reads रूप for रूपेण after अतिग्रह; B. reads इन्द्रियेण for इन्द्रिय before इन्द्रियार्थ.
9. A. B. read प्रश्नपूर्वम् for प्रश्नपूर्वकम्.
11. B. reads मृत्युजयः for मृत्युजयः.
14. C. om. प्रतिपादयतीति.

http://acharya.org

तानि परे तथा ह्याह ॥ १४ ॥

सकरणग्रामः सप्राणः करणाध्यक्षः प्रत्यगात्मोत्क्रान्तिवेलायां तेजःप्रभृतिभूतसूक्ष्मेषु संपद्यत इत्युक्तम् । सैषा संपत्तिर्विदुषो न विद्यत इत्याशङ्क्य परिहृतम् । तानि पुनर्जीवपरिष्वक्तानि भूतसूक्ष्माणि किं यथाकर्म यथाविद्यं च स्वकार्याय गच्छन्त्युत परमात्मनि संपद्यन्त इति विशये मध्ये परमात्मसंपत्तौ सुखदुःखोपभोगरूपकार्यादर्शनात्तदुपभोगानुगुण्येन यथाकर्म यथाविद्यं च गच्छन्तीति प्राप्त उच्यते तानि पर इति । तानि परस्मिन्नात्मनि संपद्यन्ते । कुतः । तथा ह्याह श्रुतिस्तेजः परस्यां देवतायाम् (छा. ६।८।६) इति । यथाह श्रुतिस्तदनुगुणं कार्यं परिकल्प्यमित्यर्थः। सुषुप्तिप्रलययोर्यथा परमात्मसंपत्त्या सुखदुःखोपभोगायासविश्रमस्तद्वदिहापि ॥ १४ ॥ परसंपत्त्यधिकरण समाप्तम् । (६)

अविभागो वचनात् ॥ १५ ॥

सेयं परमात्मनि संपत्तिः किं प्राकृतलयवत्कारणापत्तिरूपोत वाङ्मनसीत्यादिवदविभागरूपेति चिन्तायां परमात्मनः सर्वेषां योनिभूतत्वात्कारणापत्तिरूपेति प्राप्त उच्यतेविभाग इति । अपृथग्भावः पृथग्व्यवहारानर्हः संसर्ग इत्यर्थः । कुतः । वचनात् । तेजः परस्यां देवतायाम् (छा. ६।८।६) इत्यत्रापि वाङ्मनसि संपद्यत (छा. ६।८।६) इत्यतः संपद्यत इति वच-

---

11. C. E. om. परि before कल्प्यम्.
12. E. reads विश्रामः for विश्रमः.
14. C. reads अविभागेन for अविभाग°.
16. C. reads परमात्मनि for परमात्मनः.
18. C. E. read अनर्ह for अनर्हः.
20. B. E. om. इत्यतः सपद्यते.

http://acharya.org

नस्यानुषङ्गात् । तस्य च संसर्गविशेषवाचित्वादनुषक्तस्याभिधानवैरूप्ये प्रमाणाभावादुत्क्रान्तिवेलायां कारणापत्तिप्रयोजनाभावात्पुनस्तत्राव्यक्तादिसृष्टिवचनाच्च ॥ १५ ॥ अविभागाधिकरणं समाप्तम् । (७)

तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥ १६ ॥

एवं गत्युपक्रमावधि विद्वदविदुषोः समानाकार उत्क्रान्तिप्रकार उक्तः । इदानीं विदुषो विशेष उच्यते । तत्रेदमाम्नायते

शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका ।
तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति ॥
(का. ६।१६, छा. ८।६।६)

इति । अनया नाडीनां शताधिकया मूर्धन्यया नाड्यैव विदुषो गमनमन्याभिरेव चाविदुषो गमनमित्ययं नियम उपपद्यते नेति संशयः । किं युक्तम् । नियमो नोपपद्यत इति । कुतः । नाडीनां भूयस्त्वादतिसूक्ष्मत्वाच्च दुर्विवेचनतया पुरुषेणोपादातुमशक्यत्वात् ।

तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति ।
(का. ६।१६ छा. ८।६।६)

इति यादृच्छिकीमुत्क्रान्तिमनुवदतीति युक्तमिति । एवं प्राप्ते प्रचक्ष्महे ।

शताधिकयेति । विद्वाञ्छताधिकया मूर्धन्ययैव नाड्यो-

---

1. A. B. om. च after तस्य; E. reads तत् before अनुषक्तस्य; C. om. अनुषक्तस्य.

13. C. E. read मूर्धन्य for मूर्धन्यया.

20 C. om. इति after युक्तम्.

त्क्रामति । न चास्या विदुषो दुर्विवेचनत्वम् । विद्वान्हि परमपुरुषाराधनभूतात्यर्थप्रियविद्यासामर्थ्याद्विद्याशेषभूततया-त्मनोत्यर्थप्रियगत्यनुस्मरणयोगाच्च प्रसन्नेन हार्देन परमपुरुषेणानुगृहीतो भवति । ततश्च तदोकस्तस्य जीवस्य स्थानं हृदयमग्रज्वलनं भवति । अग्रे ज्वलनं प्रकाशनं यस्य तदिदमग्रज्वलनम् । परमपुरुषप्रसादात्प्रकाशितद्वारो विद्वांस्तां नाडी विजानातीति तया विदुषो गतिरुपपद्यते ॥ १६ ॥ तदोकोधिकरणं समाप्तम् । (८)

रश्म्यनुसारी ॥ १७ ॥

विदुषो हृदयाच्छताधिकया मूर्धन्यनाड्या निर्गतस्याप्यादित्यरश्मीननुसृत्यादित्यमण्डलगतिः श्रूयतेथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमते (छा. ८।६।५) इति । तत्र रश्म्यनुसारेणैवेत्ययं गतिनियमः संभवति नेति चिन्तायां निशि मृतस्य विदुषो रश्म्यनुसारासंभवादनियमः । वचनं तु पक्षप्राप्तविषयमिति प्राप्त उच्यते रश्म्यनुसारीति । रश्म्यनुसार्येव विद्वानूर्ध्वं गच्छति । कुतः । अथैतैरेव रश्मिभिः (छा. ८।६।५) इत्यवधारणात् । पाक्षिकत्वे ह्येवकारोनर्थकः स्यात् ।

यदुक्तं निशि मृतस्य रश्म्यसंभवाद्रश्मीननुसृत्य गमनं नोपपद्यत इति तन्न । निश्यपि सूर्यरश्म्यनुसारः संभवति ।

---

1. A. B. read विवेचत्वम् for विवेचनत्वम्.
2. C. om. भूत after आराधन; C. reads विद्याशेषभूत for विद्याशेषभूततया.
6. C. E. read तत्प्रसादात् before परमपुरुष.
10. C. E. om. अपि after निर्गतस्य
11. A. E. read एतस्मात् for एतदस्मात्.
18. E. reads हि after यदुक्तम्.

http://acharya.org

लक्ष्यते हि निश्यपि निदाघसमय ऊष्मोपलब्ध्या रश्मिसंभवः। हेमन्तादौ तु हिमाभिभवाद्दुर्दिन इवोष्मानुपलम्भः। श्रूयते च नाडीरश्मीनां सर्वदान्योन्यान्वयस्तद्यथा महापथ आतत उभौ ग्रामौ गच्छतीमं चामुं चैवमेवैता आदित्यस्य रश्मय उभौ लोकौ गच्छन्तीमं चामुं चामुष्मादादित्यात्प्रतायन्ते ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मिन्नादित्ये सृप्ताः (छा. ८।६।२) इति। तस्मान्निश्यपि रश्मिसंभवान्निशि मृतानामपि विदुषां रश्म्यनुसारेण ब्रह्मप्राप्तिरस्त्येव ॥ १७ ॥ रश्म्यनुसाराधिकरण समाप्तम्। (९)

निशि नेति चेन्न संबन्धस्य यावद्देहभावित्वाद्दर्शयति च ॥ १८ ॥

इदमिदानीं चिन्त्यते विदुषो निशि मृतस्य ब्रह्मप्राप्तिरस्ति नेति। यद्यपि निशायां सूर्यरश्मिसंभवाद्रश्म्यनुसारेण गतिर्निशायामपि संभवति तथापि निशामरणस्य शास्त्रेषु गर्हितत्वात्परमपुरुषार्थलक्षणा ब्रह्मप्राप्तिर्निशामृतस्य न संभवति। शास्त्रेषु दिवामरणं प्रशस्तं विपरीतं निशामरणम्

दिवा च शुक्लपक्षश्च उत्तरायणमेव च।
मुमूर्षतां प्रशस्तानि विपरीतं तु गर्हितम् ॥

इति। दिवामरणनिशामरणयोः प्रशस्तत्वविपरीतत्वे चोत्तमाधमगतिहेतुत्वेन स्याताम्। अतो निशामरणमधोगतिहेतु-

---

1-2. E. reads औष्ण्योपलब्ध्या for ऊष्मोपलब्ध्या; E. reads सद्भावः for संभव.
4. C. E. read यते for एता°.
6. A. E. read ते for ता..
8. C E read एव after रश्म्यनुसारेण.
15. E. reads लक्षण for लक्षणा.
20. A. B. read निशि for निशा.

http://acharya.org

त्वान्न ब्रह्मप्राप्तिहेतुरिति चेन्न । विदुषः कर्मसंबन्धस्य यावद्देहभावित्वात् ।

एतदुक्तं भवति । अनारब्धकार्याणामधोगतिहेतुभूतानां कर्मणां विद्यासंबन्धेनैव विनाशादुत्तरेषां चाश्लेषात्प्रारब्धकार्यस्य च चरमदेहावधित्वाद्बन्धहेत्वभावाद्विदुषो निशामृतस्यापि ब्रह्मप्राप्तिः सिद्धैव । दर्शयति च श्रुतिस्तस्य तावदेव चिरं यावन्न विमोक्ष्येथ संपत्स्ये (छा. ६।१४।२) इति । दिवा च शुक्लपक्षश्चेत्यादिवचनमविद्वद्विषयम् ॥ १८ ॥ निशाधिकरणं समाप्तम् । (१०)

अतश्चायनेपि दक्षिणे ॥ १९ ॥

निशि मृतस्यापि विदुषो ब्रह्मप्राप्तौ यो हेतुरुक्तस्तत एव हेतोर्दक्षिणेप्ययने मृतस्य ब्रह्मप्राप्तिः सिद्धा । अधिकाशङ्का त्वथ यो दक्षिणे प्रमीयते पितॄणामेव महिमानं गत्वा चन्द्रमसः सायुज्यं गच्छति (ना. ८०) इति दक्षिणायने मृतस्य चन्द्रप्राप्तिश्रवणाच्चन्द्रमसं प्राप्तानां च तेषां यदा तत्पर्यवैति (बृ. ६।२।१६) । अथैतमेवाध्वानं पुनर्निवर्तन्ते (छा. ५।१०।५) इति पुनरावृत्तिश्रवणाद्भीष्मादीनां च ब्रह्मविद्यानिष्ठानामुत्तरायणप्रतीक्षादर्शनाद्दक्षिणायने मृतस्य ब्रह्मप्राप्तिर्न संभवतीति । परिहारस्त्वविदुषां पितृयाणेन पथा चन्द्रं प्राप्तानामेव पुनरावृत्तिर्विदुषस्तु चन्द्रं प्राप्तस्यापि तस्माद्ब्रह्मणो महिमानमाप्नोति

---

1. B. reads प्राप्तिः for प्राप्तिहेतुः; C. reads तत् after चेत्.
5. C. E read निशि for निशा.
6. C. reads इति after सिद्धैव.
10. C om. अपि विदुषः.
13. A. B. om. मृतस्य.
14. C. reads चन्द्रम् for चन्द्रमसम्.
18. E reads चन्द्रमसम् for चन्द्रम्; A. B. read चन्द्र for चन्द्रम्.

http://acharya.org

(ना. ८०) इति वाक्यशेषात्तस्य दक्षिणायनमृतस्य चन्द्रप्राप्तिर्ब्रह्म प्रपित्सतो विश्रमहेतुमात्रमिति गम्यते । वाक्यशेषाभावेपि पूर्वोक्तादेव बन्धहेत्वभावाद्विदुषश्चन्द्रं प्राप्तस्यापि ब्रह्मप्राप्तिरनिवार्या । भीष्मादीनां योगप्रभावात्स्वच्छन्दमरणानां धर्मप्रवर्तनायोत्तरायणप्राशस्त्यप्रदर्शनार्थस्तथाविधाचारः ॥ १९ ॥

ननु च विदुषो मुमूर्षून्प्रति पुनरावृत्त्यपुनरावृत्तिहेतुत्वेन कालविशेषविधिर्दृश्यते

यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः ।
प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥
अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥
धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥
शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ।
एकया यात्यनावृत्तिमन्ययावर्तते पुनः ॥

(गी. ८।२३-२६)

इति । तत्राह ।

योगिनः प्रति स्मर्येते स्मार्ते चैते ॥ २० ॥

नात्र मुमूर्षून्प्रति मरणकालविशेषोपादानं स्मर्यते । अपि तु योगिनो योगनिष्ठान्प्रति स्मार्ते स्मृतिविषयभूते स्मर्तव्ये देवयानपितृयाणाख्ये गती स्मर्येते योगाङ्गतयानुदिनं स्मर्तुम् । तथा ह्युपसंहारः

---

2. C. reads प्रेप्सतः for प्रपित्सत; A. B. E. read विश्राम for विश्रम; C. read अव before गम्यते.
3. B. reads हेतुभावात् for हेत्वभावात्.
15. A. E. read यान्ति for याति.
18. C. E. read स्मर्यते for स्मर्येते.

http://acharya.org

नैते सृती पार्थ जानन्योगी मुह्यति कश्चन ।
तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥
(गी. ८।२७)

इति । अग्निर्ज्योतिः (गी. ८।२४) । धूमो रात्रिः (गी. ८।२५) इति देवयानपितृयाणे प्रत्यभिज्ञायेते । उपक्रमे च यत्र काले तु (गी. ८।२३) इति कालशब्दः कालाभिमानिदेवतातिवाहिकपरः । अग्न्यादेः कालत्वासंभवात् । अतस्तेऽर्चिषमभिसंभवन्ति (बृ. ६।२।१५) इति विहितदेवयानानुस्मृतिरत्र विद्यानिष्ठान्प्रति विधीयते न मुमूर्षून्प्रति मरणकालविशेषः ॥ २० ॥ दक्षिणायनाधिकरणं समाप्तम् । (११)

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये चतुर्थाध्यायस्य द्वितीयः पादः ॥

4. B. om. इति.
5. E. reads च after इति.

http://acharya.org

अथ श्रीभाष्ये

चतुर्थाध्याये तृतीयः पाद आरभ्यते ।

अर्चिरादिना तत्प्रथितेः ॥ १ ॥

विदुष उत्क्रान्तस्य नाडीविशेषेण हार्दानुगृहीतत्युपक्रम उक्तः । तस्य गच्छतो मार्गं इदानीं निर्णीयते । तत्र श्रुतिषु मार्गप्रकारा बहुविधा आम्नायन्ते । छान्दोग्ये तावद्यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते (छा. ४।१४।३) इत्युपक्रम्य ब्रह्मविद्यामुपदिश्याम्नायतेथ यदु चैवास्मिञ्छव्यं कुर्वन्ति यदि च नार्चिषमेवाभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्ङेति मासांस्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषो मानवः स एनान्ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते नावर्तन्ते (छा. ४।१५।५-६) इति । तथात्रैवाष्टमेथैतैरेव रश्मिभिरूर्ध्वमाक्रमते (छा. ८।६।५) इति । कौषीतकिनश्च देवयानमार्गमन्यथाधीयते स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स आदित्यलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकम् (कौ. १।३) इति । तथा बृहदारण्यके य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धां सत्यमुपासते तेर्चिषमभिसंभवन्त्यर्चिषोऽहरह्न आपूर्य-

---

6. B. om. बहुविधाः; A. E. read बहुधा for बहुविधा
9. E. om. एव after यदु च; A. reads यदु च for यदि च.
14. A. B. om नावर्तन्ते after नावर्तन्ते
19. C. reads एव after एवम्, C. E. read इमे for अमी.
20. C. reads इति after सत्यम्.

http://acharya.org

माणपक्षमापूर्यमाणपक्षाद्यान्षण्मासानुदङ्ङादित्य एति मासेभ्यो देवलोकं देवलोकादादित्यमादित्याद्वैद्युतं वैद्युतात्पुरुषोमानवः स एत्य ब्रह्मलोकान्गमयति (बृ. ६।२।१५) इति । तत्रैव पुनरन्यथा यदा वै पुरुषोस्माल्लोकात्प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्वमाक्रमते स आदित्यमागच्छति तस्मै स तत्र विजिहीते यथा डम्बरस्य खं तेन स ऊर्ध्वमाक्रमते स चन्द्रमसमागच्छति तस्मै स तत्र विजिहीते यथा दुन्दुभेः खम् (बृ. ५।१०।१) इत्यादि ।

तत्र संशयः किमर्चिरादिरेक एव मार्ग आभिः श्रुतिभिः प्रतिपाद्यत इति तेनैव ब्रह्म गच्छति विद्वानुत तस्मादन्येन्यत्र मार्गा इति तैर्वानेन वेत्यनियम इति । किं युक्तम् । अनियम इति । कुतः । अनेकरूपत्वान्नैरपेक्ष्याच्चेति । एवं प्राप्तेभिधीयते ।

अर्चिरादिनेति । अर्चिरादिरेक एव मार्गः सर्वत्र प्रतिपाद्यते । अतोर्चिरादिनैव गच्छन्ति । कुतः । तत्प्रथितेः । तस्यैव सर्वत्र प्रथितेः । प्रथितिः प्रसिद्धिः । तस्यैव सर्वत्र प्रत्यभिज्ञानादित्यर्थः । प्रत्यभिज्ञानात्स एव मार्गः सर्वत्र न्यूनाधिकभावेन प्रतिपाद्यत इति विद्यागुणोपसंहारवदन्यत्रोक्तानामन्यत्रोपसंहारः क्रियते । छान्दोग्ये तावदुपकोसलविद्यायां (छा. ४।१५।५-६) पञ्चाग्निविद्यायां (छा. ५।१०।१-२)

1. A. B. read मासान् before मासेभ्यः
5. A. reads ह before ऊर्ध्वम्
6. C. E. read विजिहीर्षते for विजिहीते.
7. A. E. read आडम्बरस्य for डम्बरस्य.
8. A. E. read विजिहीर्षते for विजिहीते.
11. A. reads अपि after अन्ये.
17. C. reads हि after एव.

http://acharya.org

चैकरूप एवाम्नायते । वाजसनेयके च पञ्चाग्निविद्यायां (बृ. ६।२।१५) तथैवार्चिरादिरल्पान्तर आम्नायते । अतस्तत्रापि स एवेति प्रतीयते । अन्यत्रापि सर्वत्राग्न्यादित्यादयः प्रत्यभिज्ञायन्ते ॥ १ ॥ अर्चिराद्यधिकरणं समाप्तम्। (१)

वायुमब्दादविशेषविशेषाभ्याम् ॥ २ ॥

अर्चिरादिनैव गच्छन्ति विद्वांस इत्युक्तम् । तत्रार्चिरादिके मार्गे छन्दोगा मासादित्ययोरन्तराले संवत्सरमधीयते मासेभ्यः संवत्सरं संवत्सरादादित्यम् (छा. ४।१५।५) इति । वाजसनेयिनस्तु तयोरेवान्तराले देवलोकं मासेभ्यो देवलोकं देवलोकादादित्यम् (बृ. ६।२।१५) इति । उभयत्रापि मार्गस्यैकत्वादुभावुभयत्रोपसंहार्यौ । तत्र मासादूर्ध्वमभिहितयोः संवत्सरदेवलोकयोः पञ्चम्याभिहितस्य श्रौतक्रमस्य तुल्यत्वेप्यर्चिषोहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्ङेति मासांस्तान् (छा. ४।१५।५, बृ. ६।२।१५) इत्यधिककालानां न्यूनकालेभ्य उत्तरोत्तरत्वेन निवेशदर्शनात्संवत्सरस्यैव मासानन्तरं बुद्धौ विपरिवृत्तेः संवत्सर एव मासादूर्ध्वं निवेशयितव्य इति तत ऊर्ध्वं देवलोक इति निश्चीयते । अन्यत्र वाजसनेयिनो यदा वै पुरुषोस्माल्लोकात्प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्वमाक्रमते स आदित्यमागच्छति (बृ. ५।१०।१) इत्यादित्या-

---

2. A. B. read अल्पान्तरम् for अल्पान्तरः

9. B. reads अन्तरे for एवान्तराले.

16. C. E. read मासात् for मास before अनन्तरम्

17. C. reads च after अन्यत्र.

19. C. E. read विजिहीर्षते for विजिहीते; A. reads इ before ऊर्ध्वम्.

http://acharya.org

त्पूर्वं वायुमधीयते । कौषीतकिनस्तु स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकम् (कौ. १।३) इत्यग्निलोकशब्दनिर्दिष्टादर्चिषः परं वायुमधीयते । तत्र कौषीतकिनां पाठक्रमेणार्चिषः परत्वेन प्राप्तस्य वायोर्वाजसनेयिनां तेन स ऊर्ध्वमाक्रमते स आदित्यमागच्छति (बृ.५।१०।१) इत्यूर्ध्वशब्दनिर्दिष्टश्रौतक्रमेण पाठक्रमाद्बलीयसादित्यात्पूर्वं प्रवेशो निश्चीयते । अत आदित्यात्पूर्वं संवत्सरादूर्ध्वं देवलोको वायुश्च प्राप्तौ ।

तत्रेदं चिन्त्यते । किं देवलोको वायुश्चार्थान्तरभूतौ यथेष्टक्रमेण विद्वानभिगच्छेदुतानर्थान्तरत्वेन संवत्सरादूर्ध्वं देवलोकं सन्तं वायुमभिगच्छेदिति । किं युक्तम् । भिन्नार्थत्वम् । प्रसिद्धेः । भिन्नार्थत्वे चोर्ध्वशब्देन पञ्चम्या चोभयोः संवत्सरादित्यान्तराले श्रुतिक्रमेण प्राप्तत्वाद्विशेषाभावाच्च यथेष्टमिति प्राप्त उच्यते ।

वायुमब्दादिति । वायुं संवत्सरादूर्ध्वमभिगच्छेत् । कुतः । अविशेषविशेषाभ्यां वायोरेव निर्दिष्टत्वात् । देवलोकशब्दोऽप्यविशेषेण सामान्येन देवानां लोक इत्यनेन रूपेण वायुमभिधत्ते । स वायुमागच्छति तस्मै स तत्र (बृ. ५।१०।१) इति वायुशब्दो विशेषेण वायुमभिधत्ते । अतो देवलोकवायुशब्दाभ्यामविशेषविशेषाभ्यां वायुरेवाभिधीयत इति संवत्स-

1. B. reads एनम् for एतम्.

3. E. reads वायुलोकम् for वायुम्.

5. A. reads इ before ऊर्ध्वम्.

8. A. B. read वायुलोकः for वायुः before च प्राप्तौ.

16. E. reads हि for अपि after शब्दः.

18. C. E. read अभि for आ before गच्छति.

http://acharya.org

रादूर्ध्वं वायुमेवाभिगच्छेत् । कौषीतकिनां वायुलोकशब्दश्चाग्निलोकशब्दवद्वायुश्चासौ लोकश्चेति व्युत्पत्त्या वायुमेवाभिधत्ते । वायुश्च देवानामावासभूत इत्यन्यत्र श्रूयते योयं पवत एष देवानां गृहा इति ॥ २ ॥ वाय्वधिकरणं समाप्तम् । (२)

तडितोधि वरुणः संबन्धात् ॥ ३ ॥

कौषीतकिनां स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स आदित्यलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकम् (कौ. १।३) इत्यत्राग्निलोकस्यार्चिःपर्यायत्वेन प्राथम्यमविगीतम् । वायोश्च संवत्सरादूर्ध्वं निवेश उक्तः । आदित्यस्याप्यत्र प्राप्तपाठक्रमबाधेन देवलोकादादित्यमादित्याच्चन्द्रमसम् (बृ. ६।२।१५) इति वाजसनेयकोक्तश्रुतिक्रमाद्देवलोकशब्दाभिहिताद्वायोरुपरि निवेशः सिद्धः । इदानीं वरुणेन्द्रादिषु चिन्ता प्राप्ता । किमेते वरुणादयो यथापाठं वायोरूर्ध्वं निवेशयितव्या आहोस्विद्विद्युतोधीति विशयेर्चिःप्रभृतिषु सर्वेष्वर्चिषोहः (छा. ४।१५।५,५।१०।१; बृ. ६।२।१५) इत्यादिश्रुतिक्रमोपरोधाद्विद्युतः परस्ताच्च तत्पुरुषोमानवः स एनान्ब्रह्म गमयति (छा. ४।१५।५,५।१०।२) इति विद्युत्पुरुषस्य ब्रह्मगमयितृत्वश्रवणाच्च सर्वत्रावकाशाभावेनाप्राप्तौ चोपदेशावैयर्थ्यायावश्यं कस्यचिद्बाध्यत्वे पाठक्रमानुरोधेन वायोरनन्तरं वरुणो

---

1. A. B. read आ for अभि before गच्छेत्.

3 C. reads एषाम् for एष'.

4 B. reads ग्रहाः for गृहा .

7-8. C. om. स इन्द्रलोकम्.

9. E. reads लोकशब्दस्य for लोकस्य.

16. E. om. आदि after इति; B. reads मात्र for क्रम.

http://acharya.org

निवेशयितव्यः । वाय्वादित्ययोः क्रमस्य बाधितत्वेनेन्द्रप्रजापती अपि ह्यत्रैव निवेशयितव्याविति प्राप्त उच्यते ।

तडितोधि वरुण इति । वरुणस्तावद्विद्युत उपरिष्टान्निवेशयितव्यः । कुतः । संबन्धात् । मेघोदरवर्तित्वाद्विद्युतो हि वरुणेन संबन्धो लोकवेदयोः प्रसिद्धः । एतदुक्तं भवति । वरुणादीनामुपदेशावैयर्थ्याय क्वचिन्निवेशयितव्यत्वे सति पाठक्रमादर्थक्रमस्य बलीयस्त्वाद्विद्युतोधि वरुणो निवेशयितव्यः । ततश्चामानवस्य गमयितृत्वं व्यवधानसहमित्यवगम्यते । तस्य च व्यवधानसहत्वादिन्द्रादेश्चोपदिष्टस्यावश्यं निवेशयितव्यस्य वरुणादुपर्युपदिष्टत्वादागन्तूनामन्ते निवेशयितव्यत्वाच्च वरुणादुपरीन्द्रादिर्निवेशयितव्य इति ॥ ३ ॥ वरुणाधिकरणं समाप्तम् ।(३)

आतिवाहिकास्तल्लिङ्गात् ॥ ४ ॥

इदमिदानीं चिन्त्यते किमर्चिरादयो मार्गचिह्नभूता उत भोगभूमयोथ वा विदुषां ब्रह्म प्रेप्सतामतिवोढार इति । किं तावद्युक्तम् । मार्गचिह्नभूता इति । कुतः । उपदेशस्य तथाविधत्वात् । दृश्यते हि लोके ग्रामान्प्रति गन्तॄणामेवंविधो देशिकैरुपदेश इतो निष्क्रम्यामुकं वृक्षममुकां नदीममुकं च

---

4. C. om. हि after विद्युतः.

7. E. reads अर्थक्रमो बलीयानिति for अर्थक्रमस्य बलीयस्त्वात्; C. reads एवम् for ततः.

8. E. om. च after तस्य.

9. C. reads च after निवेशयितव्यस्य.

10. B. reads उपदिष्टात् for उपदिष्टत्वात्.

11. C. reads इन्द्रः for इन्द्रादिः

16. E. reads लोके हि दृश्यते for दृश्यते हि लोके; B. reads ग्रामादीन् for ग्रामान्.

17. E. reads अमुकीम् for अमुकाम्

http://acharya.org

पर्वतपार्श्वं गत्वामुकं ग्रामं गच्छेति । अथवा भोगभूमय एताः स्युः । कालविशेषतया प्रसिद्धानामहरादीनां मार्गचिह्नत्वानुपपत्तेः । अन्यस्य च मार्गचिह्नभूतस्यैतेषामनभिधायित्वात् । भोगभूमित्वं चैत एव लोका यदहोरात्राण्यर्धमासा मासा ऋतवः संवत्सरा इत्यहरादीनां लोकत्ववचनादुपपद्यते । अत एव च कौषीतकिनोऽग्निलोकमागच्छति (कौ. १।३) इत्यादिना लोकशब्दानुविधानेनार्चिरादीन्पठन्तीति । एवं प्राप्ते ब्रूमः ।

आतिवाहिका इति । विदुषामतिवाहे परमपुरुषेण नियुक्ता आतिवाहिका देवताविशेषा एतेऽर्चिरादयः । कुतः । तल्लिङ्गात् । अतिवहनलिङ्गात् । अतिवहनं हि गन्तॄणां गमयितृत्वम् । तच्च तत्पुरुषोऽमानवः स एनान्ब्रह्म गमयति (छा. ४।१५।५,५।१०।२) इत्युपसंहारे श्रूयमाणं पूर्वेषामप्यविशेषश्रुतानां स एव संबन्ध इति गमयति । वदन्ति चार्चिरादयः शब्दा अर्चिराद्यात्मभूतानभिमानिदेवताविशेषांस्तं पृथिव्यब्रवीत् (तै. सं. ५।६।२) इतिवत् ॥ ४ ॥

यद्येवं तत्पुरुषोऽमानवः स एनान्ब्रह्म गमयति (छा. ४।१५।५,५।१०।२) इति वैद्युतस्यैव पुरुषस्य ब्रह्म प्रति गमयितृत्वश्रुतेर्विद्युतः परेषां वरुणादीनां कथमातिवाहिकत्वेनान्वय इत्यत आह ।

वैद्युतेनैव ततस्तच्छ्रुतेः ॥ ५ ॥

ततो विद्युत उपरि वैद्युतेनामानवेनैवातिवाहिकेन विदुषा-

6. C. E. om. च after एव.

8. C. reads अतिवाहि for अतिवाहे.

9. C. reads एव ते for एते.

10. C. reads गमयितृत्वं च for तच्च.

17. A. B. om. प्रति after ब्रह्म.

http://acharya.org

माब्रह्मप्राप्ति गमनम् । कुतः । तच्छ्रुतेः । स एनान्ब्रह्म गमयति (छा. ४।१५।५,५।१०।२) इति तस्यैव गमयितृत्वश्रुतेः । वरुणादयस्त्वनुग्राहका इति तेषामप्यातिवाहिकत्वेनान्वयो विरुद्ध एव ॥ ५ ॥ आतिवाहिकाधिकरणं समाप्तम् । (४)

कार्यं बादरिरस्य गत्युपपत्तेः ॥ ६ ॥

अर्चिरादिनैव गच्छति विद्वानर्चिरादिरमानवान्तश्च गण आतिवाहिको विद्वांसं ब्रह्म गमयतीत्युक्तम् । इदमिदानीं चिन्त्यते । किमयमर्चिरादिको गणः कार्यं हिरण्यगर्भमुपासीनान्नयत्युत परब्रह्मोपासीनानेवाथ परब्रह्मोपासीनान्प्रत्यगात्मानं ब्रह्मात्मकतयोपासीनांश्चेति विशये कार्यमुपासीनानेव गमयतीति बादरिराचार्यो मन्यते । कुतः । अस्य हिरण्यगर्भमुपासीनस्यैव गत्युपपत्तेः । न हि परिपूर्णं सर्वज्ञं सर्वगतं सर्वात्मभूतं परं ब्रह्मोपासीनस्य तत्प्राप्तये देशान्तरगतिरुपपद्यते । प्राप्तत्वादेव । नित्यप्राप्तपरब्रह्मविषयाविद्यानिवृत्तिमात्रमेव हि परविद्याकार्यम् । कार्यं तु हिरण्यगर्भरूपं ब्रह्मोपासीनस्य परिच्छिन्नदेशवर्तिप्राप्यप्राप्त्यर्थं गमनमुपपद्यते । अतोऽर्चिरादिक आतिवाहिकगणस्तमेव नयति ॥ ६ ॥

विशेषितत्वाच्च ॥ ७ ॥

पुरुषोमानवः स एत्य ब्रह्मलोकान्गमयति (बृ. ६।२।१५) इति लोकशब्देन बहुवचनेन च लोकविशेषवर्तिनं हिरण्य-

---

1. C. E. read प्राप्ते. for प्राप्ति.

8. A. B. om. अयम् after किम्

9. A B om परब्रह्मोपासीनानेवाथ, C. reads अथ वा for अथ पर.

13. A B. read पर for परम् before ब्रह्म.

16 C. om. वर्ति after देश.

17. A. B. read अर्चिरादि. for अर्चिरादिक.

http://acharya.org

गर्भमुपासीनमेवामानवो गमयतीति विशेष्यते । किं च प्रजापतेः सभां वेश्म प्रपद्ये (छा. ८।१४।१) इति कार्यस्य हिरण्यगर्भस्य समीपगमनमर्चिरादिना गतोभिसंधत्ते ॥ ७ ॥

नन्वेवं तत्पुरुषोमानवः स एनान्ब्रह्म गमयति (छा. ४।१५।५,५।१०।२) इत्ययं निर्देशो नोपपद्यते । हिरण्यगर्भनयने हि स एनान्ब्रह्माणं गमयतीति निर्देष्टव्यं स्यात् । अत आह ।

सामीप्यात्तु तद्व्यपदेशः ॥ ८ ॥

यो ब्रह्माणं विदधाति (श्वे. ६।१८) इति हिरण्यगर्भस्य प्रथमजत्वेन ब्रह्मसामीप्यात्तस्य ब्रह्मशब्देन व्यपदेश इति गत्यनुपपत्तिविशेषणादिभिरुक्तैर्हेतुभिर्निश्चीयत इत्यर्थः ॥ ८ ॥

अथ स्यादर्चिरादिना हिरण्यगर्भप्राप्तावेप देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते (छा. ४।१५।६) । तयोर्ध्वमायन्नमृतत्वमेति (का. ६।१६; छा. ८।६।६) इत्यमृतत्वप्राप्त्यपुनरावृत्तिव्यपदेशो नोपपद्यते । हिरण्यगर्भस्य कार्यभूतस्य द्विपरार्धकालावसाने विनाशशास्त्रात् ।

आ ब्रह्मभुवनाल्लोकाः पुनरावर्तिनोर्जुन । (गी. ८।१६)

इति वचनाद्धिरण्यगर्भं प्राप्तस्य पुनरावृत्तेरवर्जनीयत्वादिति। तत्राह ।

कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ॥ ९ ॥

कार्यस्य ब्रह्मलोकस्यात्यये तदध्यक्षेण हिरण्यगर्भेणाधिका-

---

2. E. reads प्रपद्यते for प्रपद्ये
3 C. reads अनु for अभि before सधत्ते.
4. B. reads एतान् for एनान्
12. B reads प्रतिपाद्यमाना' for प्रतिपद्यमाना'.
11. A B C. om. प्राप्ति after अमृतत्व
18. A. B read अत्र for तत्र.

http://acharya.org

रिकेणावसिताधिकारेण विदुषा सह स्वयमपि तत्राधिगतविद्योतः कार्याद्ब्रह्मलोकात्परं ब्रह्म प्राप्नोतीत्यर्चिरादिना गतस्यामृतत्वप्राप्त्यपुनरावृत्त्यभिधानात्

ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे ।
(ना. १२।३)

इति वचनाच्चावगम्यते ॥ ९ ॥

स्मृतेश्च ॥ १० ॥

स्मृतेश्चायमर्थोऽवगम्यते

ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे ।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम् ॥
(कूर्मपु. पू. ख. १२।२६९)

इति । अतः कार्यमुपासीनमेवार्चिरादिको गणो नयतीति बादरेर्मतम् ॥ १० ॥

अत्र जैमिनिः पक्षान्तरपरिग्रहेण प्रत्यवतिष्ठते ।

परं जैमिनिर्मुख्यत्वात् ॥ ११ ॥

परं ब्रह्मोपासीनानर्चिरादिर्नयतीति जैमिनिराचार्यो मन्यते । कुतः । मुख्यत्वात् । तत्पुरुषोऽमानवः स एनान्ब्रह्म गमयति (छा. ४।१५।५; ५।१०।२) इति ब्रह्मशब्दस्य परस्मिन्नेव ब्रह्मणि मुख्यत्वात् । प्रमाणान्तरेण कार्यत्वनिश्चये सत्येव हि लाक्षणिकत्वं युक्तम् । न च गमनानुपपत्तिः प्रमाणम् । परस्य ब्रह्मणः सर्वगतत्वेपि विदुषो विशिष्टदेशगतस्यैवाविर्भा-

1. A. B. read अधिकृत for अधिगत.
2. A. B. read कार्यं for कार्यात्.
4. B. reads ब्रह्मलोकेषु for ब्रह्मलोके तु
16. E. reads उपासीनमेव for उपासीनान्.
17. C. om. मुख्यत्वात्.

http://acharya.org

निवृत्तिशास्त्रात् । यथा हि विद्योत्पत्तिर्वर्णाश्रमधर्मशौचाचारदेशकालाद्यपेक्षा तमेतं वेदानुवचनेन (बृ. ४।४।२२) इत्यादिशास्त्रादवगम्यते तथा निःशेषाविद्यानिवर्तनरूपविद्यानिष्पत्तिरपि विशिष्टदेशगतिसापेक्षेति गतिशास्त्रादवगम्यते । विदुष उत्क्रान्तिप्रतिषेधादि तु पूर्वमेव परिहृतम् ।

यत्तु ब्रह्मलोकान् (बृ. ६।२।१५) इति लोकशब्दबहुवचनाभ्यां विशेषणात्कार्यभूतहिरण्यगर्भप्रतीतिरिति तदयुक्तम् । निषादस्थपतिन्यायेन ब्रह्मैव लोको ब्रह्मलोक इति कर्मधारयस्यैव युक्तत्वात् । अर्थस्य चैकत्वे निश्चिते बहुवचनस्यादितिः पाशानितिवदुपपत्तेः । परस्य ब्रह्मणः परिपूर्णस्य सर्वगतस्य सत्यसंकल्पस्य स्वेच्छापरिकल्पिताः स्वासाधारणा अप्राकृताश्च लोका नात्यन्ताय न सन्तीति श्रुतिस्मृतीतिहासपुराणप्रामाण्यात् ॥ ११ ॥

दर्शनाच्च ॥ १२ ॥

दर्शयति च श्रुतिर्मूर्धन्यनाड्या निर्गत्य देवयानेन गतस्य परब्रह्मप्राप्तिमेष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते (छा. ८।३।४) इति ॥१२॥

यदुक्तं प्रजापतेः सभां वेश्म प्रपद्ये (छा. ८।१४।१) इत्यर्चिरादिना गतस्य कार्ये प्रत्यभिसंधिर्दृश्यत इति तत्रोत्तरम् ।

---

1. B. reads तथा हि for यथा हि; A. reads विद्योत्पत्तेः for विद्योत्पत्ति॰.

3–4. C. om. विद्यानिष्पत्तिरपि; A. B. om. गति॰before शास्त्रात्.

9. C. reads तत् before अर्थस्य.

12. B. reads अनन्ताश्च for नात्यन्ताय न; C. reads आवसन्ति for न सन्तीति.

http://acharya.org

न च कार्ये प्रत्यभिसंधिः ॥ १३ ॥

न चायं प्रत्यभिसंधिः कार्ये हिरण्यगर्भे । अपि तु परस्मिन्नेव ब्रह्मणि । वाक्यशेषे यशोहं भवामि ब्राह्मणानाम् (छा. ८।१४।१) इति तस्याभिसंधातुः सर्वाविद्याविमोकपूर्वकसर्वात्मभावाभिसंधानात् । अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामि (छा. ८।१३।१) इत्यभिसंभाव्यस्य ब्रह्मलोकस्याकृतत्वश्रवणात् । सर्वबन्धविनिर्मोकस्य च साक्षाच्छ्रवणात् । अतः परमेव ब्रह्मोपासीनमर्चिरादिरातिवाहिको गणो नयतीति जैमिनेर्मतम् ॥ १३ ॥

इदानीं बादरायणस्तु भगवान्स्वमतेन सिद्धान्तमाह ।

अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषात्तत्क्रतुश्च ॥ १४ ॥

अप्रतीकालम्बनान्प्रतीकालम्बनव्यतिरिक्तान्नयत्यर्चिरादिरातिवाहिको गण इति भगवान्बादरायणो मेने । एतदुक्तं भवति । कार्यमुपासीनान्नयतीति नायं पक्षः संभवति । परमेवोपासीनानित्ययमपि नियमो नास्ति । न च प्रतीकालम्बनानपि नयति । अपि तु ये परं ब्रह्मोपासते ये चात्मानं प्रकृतिवियुक्तं ब्रह्मात्मकमुपासते तानुभयविधान्नयति । ये तु ब्रह्मकार्यान्तर्भूतं

---

2. A. reads कार्यं for कार्ये before हिरण्यगर्भे.
3. A. B. read सम् before भवामि.
6. A. B. read कृत आत्मा for कृतात्मा.
7. C. E. read संभवानि for सभवामि; B. reads सभाव्य for सभाव्यस्य.
8. A. B. read विनिर्मोचकस्य for विनिर्मोकस्य.
15. E. reads मन्यते for मेने.
17. A. B. om. अयम् before अपि.
19. A. B. read अन्तर्भूत for अन्तर्भूतम्.

http://acharya.org

नामादिकं वस्तु देवदत्तादिषु सिंहादिदृष्टिवद्ब्रह्मदृष्ट्या केवलं वा तत्तद्वस्तूपासते न तान्नयति। अतः परं ब्रह्मोपासीनानात्मानं च प्रकृतिवियुक्तं ब्रह्मात्मकमुपासीनान्नयतीति। कुतः। उभयथा च दोषात्। कार्यमुपासीनान्नयतीति पक्षेऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य (छा. ८।३।४, ८।१२।३) इत्यादिकाः श्रुतयः प्रकुप्येयुः। परमेवोपासीनानिति च नियमे तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्ति (छा. ५।१०।१) इति पञ्चाग्निविदोऽर्चिरादिगणो नयतीति श्रुतिः प्रकुप्येत्। अत उभयस्मिन्नपि पक्षे दोषः स्यात्। तस्मादुभयविधान्नयतीति।

तदेतदाह तत्क्रतुश्चेति। तत्क्रतुस्तथोपासीनस्तथैव प्राप्नोतीत्यर्थः। यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति (छा. ३।१४।१)। तं यथा यथोपासत इति न्यायात्। पञ्चाग्निविदोऽप्यर्चिरादिना गतिश्रवणादर्चिरादिना गतस्य ब्रह्मप्राप्त्यपुनरावृत्तिश्रवणाच्च। अत एव तत्क्रतुन्यायात्प्रकृतिविनिर्मुक्तब्रह्मात्मकात्मानुसंधानं सिद्धम्। नामादिप्राणपर्यन्तप्रतीकालम्बनानां तूभयविधश्रुतिसिद्धोपासनाभावादचिन्मिश्रोपासने तत्क्रतुन्यायाच्चार्चिरादिना गतिर्ब्रह्मप्राप्तिश्च न विद्यते॥ १४॥

तमिमं विशेषं श्रुतिरेव दर्शयतीत्याह।

---

2. C. om. तत् after तत्.
6. E. reads ब्रह्म after परमेव; A. B. om. च after इति.
8. A. C. read अपि after पञ्चाग्निविदः.
10. C. om. इति after उभयविधान्नयति.
12. B. om. तथेतः प्रेत्य भवति.
14. C. reads अर्चिरादि for अर्चिरादिना before गति.
15. C. reads वियुक्त for विनिर्मुक्त.
16. C. om. आत्मन् after ब्रह्मात्मक.
18. A. reads संपद्यते, B. संपद्येते, for विद्यते.

http://acharya.org

विशेषं च दर्शयति ॥ १५ ॥

यावन्नाम्नो गतं तत्रास्य यथा कामचारो भवति (छा. ७।१।५) इत्यादिका श्रुतिर्नामादिप्राणपर्यन्तप्रतीकमुपासीनानां गत्यनपेक्षं परिमितफलविशेषं च दर्शयति । तस्मादचिन्मिश्रं केवलं वा चिद्वस्तु ब्रह्मदृष्ट्या तद्वियोगेन च य उपासते न तान्नयति । अपि तु परं ब्रह्मोपासीनानात्मानं च प्रकृतिवियुक्तं ब्रह्मात्मकमुपासीनानातिवाहिको गणो नयतीति सिद्धम् ॥ १५ ॥
कार्याधिकरणं समाप्तम् । (५)

इति श्रीभगवद्रामानुजाचार्यविरचिते शारीरकमीमांसाभाष्ये चतुर्थाध्यायस्य तृतीयः पादः ॥

---

2. C. reads तस्य for तत्रास्य
3. B. reads पर्यन्तम् for पर्यन्तप्रतीकम्.
6. A. B. read पर for परम्.
7. E. reads च after ब्रह्मात्मकम्.

http://acharya.org

अथ श्रीभाष्ये

चतुर्थाध्याये चतुर्थः पाद आरभ्यते ।

संपद्याविर्भावः स्वेनशब्दात् ॥ १ ॥

परं ब्रह्मोपासीनानामात्मानं च प्रकृतिवियुक्तं ब्रह्मात्मकमुपासीनानामर्चिरादिना मार्गेणापुनरावृत्तिलक्षणा गतिरुक्ता। इदानीं मुक्तानामैश्वर्यप्रकारं चिन्तयितुमारभते ।

इदमाम्नायत एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते (छा. ८।१२।३) इति । किमस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपन्नस्य देवादिरूपवत्साध्येन रूपेण संबन्धोऽनेन वाक्येन प्रतिपाद्यत उत स्वाभाविकस्य स्वरूपस्याविर्भाव इति संशये साध्येन रूपेण संबन्ध इति युक्तम् । अन्यथा ह्यपुरुषार्थावबोधित्वं मोक्षशास्त्रस्य स्यात् । स्वरूपस्य स्वतोऽपुरुषार्थत्वदर्शनात् । न हि सुषुप्तौ देहेन्द्रियव्यापारेषूपरतेषु केवलस्यात्मस्वरूपस्य पुरुषार्थसंबन्धो दृश्यते । न च दुःखनिवृत्तिमात्रं परं ज्योतिरुपसंपन्नस्य पुरुषार्थः । येन स्वरूपाविर्भाव एव मोक्ष इत्युच्येत । स एको ब्रह्मण आनन्दः । श्रोत्रियस्य चाकामहतस्य (तै. २।८) । रसं ह्येवायं लब्ध्वानन्दी भवति (तै. २।७) इत्यादिभ्यो मुक्तस्य सुखानन्त्यश्रवणात् । न चापरिच्छिन्नानन्दरूपचैतन्य-

---

4–5. C. om. आत्मानं च प्रकृतिवियुक्त ब्रह्मात्मकमुपासीनानाम्; A. B. read अर्चिरादि for अर्चिरादिना; C. reads धृतिः for गतिः.

16. A. B. read उच्यते for उच्येत.

http://acharya.org

मेवास्य स्वरूपं तच्च संसारदशायामविद्यातिरोहितं परं ज्योतिरुपसंपन्नस्याविर्भवतीति शक्यं वक्तुम् । ज्ञानस्वरूपस्य तिरोधानासंभवात् । प्रकाशपर्यायस्य ज्ञानस्य तिरोधानं तद्विनाश एवेति हि पूर्वमेवोक्तम् । न च प्रकाशमात्रस्यानन्दता संभवति । सुखस्वरूपता ह्यानन्दस्वरूपता । सुखस्वरूपत्वं चात्मनोनुकूलत्वम् । प्रकाशमात्रात्मवादिनः कस्य प्रकाशोनुकूलवेदनीयो भवेदिति प्रकाशमात्रात्मवादिनः कथंचिदप्यानन्दस्वरूपता दुरुपपादा । स्वरूपापत्तिमात्रे च साध्ये स्वरूपस्य नित्यनिष्पन्नत्वादुपसंपन्नस्य स्वेन रूपेणाभिनिष्पद्यते (छा. ८।३।४,८।१२।३) इति वचनमनर्थकं स्यात् । अतोपूर्वेण साध्येन रूपेण संबध्यते । एवं चाभिनिष्पद्यत इति वचनं मुख्यार्थमेव भवति । स्वेन रूपेणेत्यप्यानन्दैकान्तेन स्वासाधारणेनाभिनिष्पद्यत इति संगच्छत इति । एवं प्राप्ते ब्रूमः ।

संपद्याविर्भाव इति । अयं प्रत्यगात्मार्चिरादिना परं ज्योतिरुपसंपद्य यं दशाविशेषमापद्यते स स्वरूपाविर्भावरूपः । नापूर्वाकारोत्पत्तिरूपः । कुतः । स्वेनशब्दात् । स्वेन रूपेणेति विशेषणोपादानादित्यर्थः । आगन्तुकदेहपरिग्रहे हि स्वेन रूपेणेति विशेषणमनर्थकं स्यात् । अविशेषणेपि तस्य स्वकीयरूपत्वसिद्धेः ॥ १ ॥

यत्तूक्तं स्वरूपस्य नित्यप्राप्तत्वादुपसंपद्याभिनिष्पद्यत इति वचनमनर्थकमिति तत्रोत्तरम् ।

---

1. A, B. read अविद्यया for अविद्या.
2. C. reads न । स्वरूपस्य for ज्ञानस्वरूपस्य.
5. A. om. आत्मनः; C. reads आत्म for आत्मनः.
8. B. C. om. साध्ये.
11. B. reads न भवति । स्वरूपेण for भवति । स्वेन रूपेण.
13. C. reads प्रचक्ष्महे, E. अभिधीयते, for ब्रूमः.

http://acharya.org

मुक्तः प्रतिज्ञानात् ॥ २ ॥

कर्मसंबन्धतत्कृतदेहादिविनिर्मुक्तस्वाभाविकरूपेणावस्थितोत्र स्वेन रूपेणाभिनिष्पद्यते (छा. ८।१२।३) इत्युच्यते । अतो नित्यप्राप्तस्यापि स्वरूपस्य कर्मरूपाविद्यातिरोहितस्य तिरोधाननिवृत्तिरत्राभिनिष्पत्तिरुच्यते । कुतः । प्रतिज्ञानात् । सा हि प्रतिपाद्यतया प्रतिज्ञाता । कुत इदमवगम्यते । य आत्मा (छा. ८।७।१) इति प्रकृतं प्रत्यगात्मानं जागराद्यवस्थात्रितयविनिर्मुक्तं प्रियाप्रियहेतुभूतकर्मारब्धशरीरविनिर्मुक्तं च प्रतिपादयितुमेतं त्वेव ते भूयोनुव्याख्यास्यामि (छा. ८।९।३) इति पुनः पुनरुक्त्वैवमेवैष संप्रसादोस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते (छा. ८।१२।३) इत्यभिधानात् । अतः कर्मणा संबद्धस्य परं ज्योतिरुपसंपद्य बन्धनिवृत्तिरूपा विनिर्मुक्तिः स्वेन रूपेणाभिनिष्पत्तिरुच्यते । स्वरूपाविर्भावेप्यभिनिष्पत्तिशब्दो दृश्यते युक्त्यायमर्थो निष्पद्यत इत्यादिषु ॥ २ ॥

यद्युक्तमात्मस्वरूपस्य सुषुप्तावपुरुषार्थत्वदर्शनात्स्वरूपाविर्भावे मोक्षशास्त्रस्यापुरुषार्थावबोधित्वं स्यादिति कृत्वा देवाद्यवस्थावत्सुखसंबन्ध्यवस्थान्तरप्राप्तिरभिनिष्पत्तिरिति तत्रोत्तरम् ।

आत्मा प्रकरणात् ॥ ३ ॥

स्वरूपेणैवायमात्मापहतपाप्मत्वादिसत्यसंकल्पत्वपर्यन्तगुणक इति प्रकरणादवगम्यते । य आत्मापहतपाप्मा विजरो विमृत्यु-

---

2. E. reads विनिर्मुक्तः for विनिर्मुक्त; C. E. read स्वाभाविकेन for स्वाभाविक.

7. C. E. read जागरित for जागर.

13. C. reads सम् before बन्धनिवृत्ति; A. B. om. विनिर् before मुक्तिः; E. reads अभिनिष्पद्यत इति for अभिनिष्पत्तिः.

20. A. B. read गुणाकरः for गुणकः.

http://acharya.org

विशोकोविजिघत्सोपिपासः सत्यकामः सत्यसंकल्पः (छा. ८।७।१) इति प्रजापतिवाक्यप्रक्रमः । इदं च प्रकरणं प्रत्यगात्मविषयमित्युत्तराच्चेदाविर्भूतस्वरूपस्तु (ब्र. सू. १।३।१८) इत्यत्र प्रतिपादितम् । अतोपहतपाप्मत्वादिस्वरूप एवायमात्मा संसारदशायां कर्माख्ययाविद्यया तिरोहितस्वरूपः परं ज्योतिरुपसंपद्याविर्भूतस्वरूपो भवति । अतः प्रत्यगात्मनोपहतपाप्मत्वादयः स्वाभाविका गुणाः परं ज्योतिरुपसंपन्नस्याविर्भवन्ति नोत्पद्यन्ते । यथोक्तं भगवता शौनकेनापि

यथा न क्रियते ज्योत्स्ना मलप्रक्षालनान्मणेः ।
दोषप्रहाणान्न ज्ञानमात्मनः क्रियते तथा ॥
यथोद्पानकरणात्क्रियते न जलाम्बरम् ।
सदेव नीयते व्यक्तिमसतः संभवः कुतः ॥
तथा हेयगुणध्वंसादवबोधादयो गुणाः ।
प्रकाश्यन्ते न जन्यन्ते नित्या एवात्मनो हि ते ॥

(शौनकः सि. त्र. पृ. ६७)

इति । अतो ज्ञानानन्दादिगुणानां कर्मणात्मनि संकुचितानां परं ज्योतिरुपसंपद्य कर्मरूपबन्धक्षये विकासरूपाविर्भावो नानुपपन्न इति सुष्ठूक्तं संपद्याविर्भाव इति ॥ ३ ॥ सपद्याविर्भावाधिकरणं समाप्तम् । (१)

अविभागेन दृष्टत्वात् ॥ ४ ॥

किमयं परं ज्योतिरुपसंपन्नः सर्वबन्धविनिर्मुक्तः प्रत्य-

2. E. reads हि after इति.

5. A. B. read कर्माख्य for कर्माख्यया.

11. A. B. read जलान्तरम् for जलाम्बरम्.

17. C. reads स्व before रूपबन्ध; B. reads विकाश for विकास; C. reads रूपः for रूप after विकास.

http://acharya.org

गात्मा स्वात्मानं परमात्मनः पृथग्भूतमनुभवत्युत तत्प्रकारतया तदविभक्तमिति विशये सोश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता (तै. २।१)।

यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम्।
तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति ॥
(मु. ३।१।३)

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः।
सर्गेपि नोपजायन्ते प्रलये न व्यथन्ति च ॥ (गी. १४।२)

इत्यादिश्रुतिस्मृतिभ्यो मुक्तस्य परेण साहित्यसाम्यसाधर्म्यावगमात्पृथग्भूतमनुभवतीति प्राप्त उच्यते।

अविभागेनेति। परस्माद्ब्रह्मणः स्वात्मानमविभागेनानुभवति मुक्तः। कुतः। दृष्टत्वात्। परब्रह्मोपसंपत्त्या निवृत्ताविद्यातिरोधानस्य याथातथ्येन स्वात्मनो दृष्टत्वात्। स्वात्मनः स्वरूपं हि तत्त्वमसि (छा. ६।८।७)। अयमात्मा ब्रह्म (बृ. २।५।१९)। ऐतदात्म्यमिदं सर्वम् (छा. ६।८।७)। सर्वं खल्विदं ब्रह्म (छा. ३।१४।१) इत्यादिसामानाधिकरण्यनिर्देशैर्य आत्मनि तिष्ठन्नात्मनोन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्मान्तर्याम्यमृतः (श. ब्रा. १४।६।७।३०)। अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा(तै. आ. ३।११।२) इत्यादिभिश्च परमात्मात्मकं तच्छरीरतया तत्प्रकारभूतमिति प्रतिपादितमवस्थितेरिति काशकृत्स्नः (ब्र. सू. १।४।२२)

9. C. om. आदि before श्रुतिस्मृतिभ्यः.
12. C. E. read पर ब्रह्मोपसपद्य for परब्रह्मोपसंपत्त्या.
19. E. reads स त आत्मा for सर्वात्मा.
20. B. reads तत् before तच्छरीरतया; C. reads तत्प्रकारम् for तत्प्रकारभूतम्.

इत्यत्र । अतोविभागेनाहं ब्रह्मास्मीत्येवानुभवति । साम्यसाधर्म्यव्यपदेशो ब्रह्मप्रकारभूतस्यैव प्रत्यगात्मनः स्वरूपं तत्सममिति देवादिप्राकृतरूपप्रहाणेन ब्रह्मसमानशुद्धिं प्रतिपादयति । सहश्रुतिस्त्वेवंभूतस्य प्रत्यगात्मनः प्रकारिणा ब्रह्मणा सह तद्गुणानुभवं प्रतिपादयतीति न कश्चिद्विरोधः । ब्रह्मप्रकारतया तदविभागोक्तेर्हि संकल्पादेव तच्छ्रुतेः (ब्र. सू. ४।४।८) इत्यादि न विरुध्यते । अधिकं तु भेदनिर्देशात् (ब्र. सू. २।१।२२) । अधिकोपदेशात् (ब्र. सू. ३।४।८) इत्यादि च ॥ ४ ॥ अविभागेन दृष्टत्वाधिकरणं समाप्तम् । (२)

ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥ ५ ॥

प्रत्यगात्मनः परं ज्योतिरुपसंपद्य निवृत्ततिरोधानस्य स्वरूपाविर्भाव एवेत्युक्तम् । तत्र येन स्वरूपेणायमात्माविर्भवति तत्स्वरूपं श्रुतिवैविध्याद्विचार्यते किमपहतपाप्मत्वादिकमेवास्य स्वरूपमिति तेन रूपेणायमाविर्भवत्युत विज्ञानमात्रमेवेति तेन रूपेणाथोभयोरविरोध इत्युभयरूपेणेति । किं तावत्प्राप्तम् । ब्राह्मेणेति जैमिनिराचार्यो मन्यते । ब्राह्मेणापहतपाप्मत्वादिनेत्यर्थः । अपहतपाप्मत्वादयो हि दहरवाक्ये ब्रह्मसंबन्धितया श्रुताः । ब्राह्मेणेति कुतोवगम्यते । उपन्यासादिभ्यः । उपन्यस्यन्ते हि ब्रह्मगुणा अपहतपाप्मत्वादयः प्रत्यगात्मनोपि प्रजापतिवाक्ये य आत्मापहतपाप्मा (छा. ८।७।१) इत्या-

---

1. A. B. om. अस्मि.

12. C. om. स्व before रूपेणायम्; A. B. om. आत्मा; C. reads अनुभवति for आविर्भवति.

14. C. om. अयम् after रूपेण.

15. C. E read स्व after उभय; C. reads अपि for इति after रूपेण.

16–17. C. reads पाप्मत्वादिगुणकेन for पाप्मत्वादिना.

http://acharya.org

दिना सत्यसंकल्प इत्यन्तेन । आदिशब्देन सत्यसंकल्पत्वादिगुणायत्ता जक्षणादयो जक्षत्क्रीडन्रममाणः (छा. ८।१२।३) इत्यादिवाक्यावगतव्यवहारा गृह्यन्ते । अत एभ्य उपन्यासादिभ्यः प्रत्यगात्मनो विज्ञानमात्रस्वरूपत्वं न संभवतीति जैमिनेर्मतम् ॥ ५ ॥

चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ॥ ६ ॥

चैतन्यमात्रमेवास्यात्मनः स्वरूपमिति तेन रूपेणाविर्भवतीत्यौडुलोमिराचार्यो मन्यते । कुतः । तदात्मकत्वात् । तावन्मात्रात्मकत्वादस्य प्रत्यगात्मनः । स यथा सैन्धवघनोनन्तरोबाह्यः कृत्स्नो रसघन एवैवं वा अरेयमात्मानन्तरोबाह्यः कृत्स्नः प्रज्ञानघन एव (बृ. ४।५।१३) । विज्ञानघन एव (बृ. २।४।१२) इत्यवधारणाद्विज्ञानमात्रमेवास्य स्वरूपमित्यवगम्यते । अतोस्य गुणान्तराभावादपहतपाप्मेत्यादयः शब्दा विकारसुखदुःखाद्यविद्यात्मकधर्मव्यावृत्तिपरा इति चितितन्मात्ररूपेणाविर्भाव इत्यौडुलोमेर्मतम् ॥ ६ ॥

संप्रति भगवान्बादरायणः स्वमतेन सिद्धान्तमाह ।

एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ॥ ७ ॥

एवमपि विज्ञानमात्रस्वरूपत्वप्रतिपादने सत्यपि सत्यकाम-

---

2. A. om. जक्षणादय°.
3. A E. read अवगताः for अवगत.
4. A. B. read सगच्छते for संभवति.
7. C. reads चैतन्यमेवास्य for चैतन्यमात्रमेवास्यात्मनः; A. B. om. अस्य after एव; A. B read स्व before °रूपेण.
9-10. C. om. स यथा सैन्धवघनोनन्तरोबाह्यः कृत्स्नो रसघन एव.
11. B. om. विज्ञानघन एव.
13. C. reads पाप्मत्व for पाप्मेति
14. B. om. चिति; C. reads तन्मात्रेण for तन्मात्ररूपेण.

http://acharya.org

त्वादीनां पूर्वोक्तानां गुणानामविरोधं बादरायण आचार्यो मन्यते । कुतः । उपन्यासात्पूर्वभावात् । औपनिषदाद्य आत्मापहतपाप्मा (छा. ८।७।१) इत्याद्युपन्यासात्प्रमाणात्पूर्वेषामपहतपाप्मत्वसत्यकामत्वादीनामपि भावाद्विद्यमानत्वात् । तुल्यप्रमाणकानामितरेतरबाधो न युज्यत इत्यर्थः । न च वस्तुविरोधादपहतपाप्मत्वादीनामविद्यापरिकल्पितत्वं न्याय्यम् । विशेषाभावाद्विपरीतं कस्मान्न भवतीति न्यायात् । तुल्यबलत्वे ह्यशक्यस्यावधारणस्यान्यपरत्वमेव न्याय्यम् । एवमप्यविरोध इत्यभ्युपगम्य वदञ्ज्ञानमात्रमेवास्य स्वरूपं नान्यत्किंचिदस्तीत्ययमर्थो विज्ञानघन एव (बृ. २।४।१२) इत्यादिभिर्न प्रतिपाद्यत इति मन्यते ।

कस्तर्हि विज्ञानघन एव (बृ. २।४।१२) इत्यवधारणार्थः । कृत्स्नोप्यात्मा जडव्यावृत्तः स्वप्रकाशो नान्यायत्तप्रकाशः स्वल्पोपि प्रदेशोस्तीत्ययमर्थो वाक्यादेव सुव्यक्तः । स यथा सैन्धवघनोनन्तरोबाह्यः कृत्स्नो रसघन एवैवं वा अरेयमात्मानन्तरोबाह्यः कृत्स्नः प्रज्ञानघन एव (बृ. ४।५।१३) इति । न चैवं प्रत्यगात्मनो धर्मिस्वरूपस्य कृत्स्नस्य विज्ञानघनत्वेप्यपहतपाप्मत्वसत्यसंकल्पत्वादिधर्मसंबन्धो वाक्यान्तरावगतो विरुध्यते । यथा सैन्धवघनस्य कृत्स्नस्य रसघनत्वे रसनेन्द्रियावगते चक्षुराद्यवगता रूपकाठिन्यादयो न विरुध्यन्ते । इदमत्र

---

4. E. reads सत्यसंकल्पत्व for सत्यकामत्व.

6–8. C. om. विशेषाभावाद्विप–न्याय्यम्.

12–13. C. reads अस्य after इति; E. reads अवधारणस्य for अवधारण.

14. A. reads स्व before प्रकाशः; C. om. प्रदेशः.

17. B. om. कृत्स्नस्य after धर्मिस्वरूपस्य.

19–20. A. B. read अवगतिः for अवगते.

http://acharya.org

वाक्यतात्पर्यम् । यथा रसवत्स्वाम्रफलादिषु त्वगादिप्रदेशभेदेन रसभेदे सत्यपि सैन्धवघनस्य सर्वत्रैकरसत्वं तथात्मनोपि सर्वत्र विज्ञानस्वरूपत्वं स्वप्रकाशस्वरूपत्वमित्यर्थः ॥ ७ ॥ ब्राह्माधिकरणं समाप्तम् । (३)

संकल्पादेव तच्छ्रुतेः ॥ ८ ॥

मुक्तः परं ब्रह्मोपसंपद्य ज्ञानस्वरूपोपहतपाप्मत्वादिसत्य-संकल्पत्वपर्यन्तगुणक आविर्भवतीत्युक्तम् । तमधिकृत्य तस्य सत्यसंकल्पत्वप्रयुक्ता व्यवहाराः श्रूयन्ते स तत्र पर्येति जक्षत्क्रीडन्रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा (छा. ८।१२।३) इति । किमस्य ज्ञात्यादिप्राप्तिः प्रयत्नान्तरसापेक्षोत परमपुरुषस्येव संकल्पमात्रादेव भवतीति विशये लोके राजादीनां सत्यसंकल्पत्वेन व्यवह्रियमाणानां कार्यनिष्पादने प्रयत्नान्तर-सापेक्षत्वदर्शनादस्यापि तत्सापेक्षेति प्राप्त उच्यते ।

संकल्पादेवेति । कुतः । तच्छ्रुतेः । स यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठन्ति (छा. ८।२।१) इति हि संकल्पादेवास्य पित्रादीनां समुत्थानं श्रूयते । न च प्रयत्नान्तर-सव्यपेक्षत्वाभिधायि श्रुत्यन्तरं दृश्यते । येनास्य संकल्पादेवेत्य-वधारणस्य विज्ञानघन एव (बृ. २।४।१२) इतिवद्व्यवस्था-पनं क्रियते ॥ ८ ॥

---

3. C. om. स्व before रूपत्वमिति.
6. C. reads स्वेन रूपेण for ज्ञानस्वरूपः.
8 C. E. read च after व्यवहाराः.
11. B. C. read एव for इव after पुरुषस्य.
16. A. B. om अस्य after एव.
17. C. reads सापेक्षत्व for सव्यपेक्षत्व.

http://acharya.org

अत एव चानन्याधिपतिः ॥ ९ ॥

यतो मुक्तः सत्यसंकल्पोत एवानन्याधिपतिश्च । अन्याधिपतित्वं हि विधिनिषेधयोग्यत्वम् । विधिनिषेधयोग्यत्वे हि प्रतिहतसंकल्पत्वं भवेत् । अतः सत्यसंकल्पत्वश्रुत्यैवानन्याधिपतित्वं च सिद्धम् । अत एव स स्वराड्भवति (छा. ७।२५।२) इत्युच्यते ॥ ९ ॥ संकल्पाधिकरणं समाप्तम् । (४)

अभावं बादरिराह ह्येवम् ॥ १० ॥

किं मुक्तस्य देहेन्द्रियाणि न सन्त्युत सन्त्यथ वा यथासंकल्पं सन्ति न सन्ति चेति विशये शरीरेन्द्रियाणामभावं बादरिराचार्यो मन्यते । कुतः । आह ह्येवम् । न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति । अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः (छा. ८।१२।१) इति शरीरसंबन्धे सुखदुःखस्यावर्जनीयत्वमभिधायास्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते (छा. ८।१२।३) इति मुक्तस्याशरीरत्वं ह्याह श्रुतिः ॥ १० ॥

भावं जैमिनिर्विकल्पामननात् ॥ ११ ॥

मुक्तस्य शरीरेन्द्रियादिभावं जैमिनिराचार्यो मन्यते । कुतः । विकल्पामननात् । विविधः कल्पो विकल्पः । वैविध्यमित्यर्थः । स एकधा भवति त्रिधा भवति पञ्चधा सप्तधा (छा.

---

2. B. om. च after अधिपतिः and reads it after अत एव.
3. C. om. हि after अधिपतित्वम्.
5. A. B. om. च before सिद्धम्.
6. A. B. read उक्तम् for उच्यते.
8. A. B. read सन्त्युत न for न सन्त्युत.
12. A. B. om. सुख.
17. E. om. आदि after इन्द्रिय.
19. C. E. read भवति after पञ्चधा.

http://acharya.org

७।२६।२) इत्यादिश्रुतेः । आत्मन एकस्याच्छेद्यस्यानेकधाभावासंभवात्त्रिधाभावादयः शरीरनिबन्धना इत्यवगम्यते । अशरीरत्ववचनं तु कर्मनिमित्तशरीराभावपरम् । तदेव हि शरीरं प्रियाप्रियहेतुः ॥ ११ ॥

भगवांस्तु बादरायणः स्वमतेन सिद्धान्तमाह ।

द्वादशाहवदुभयविधं बादरायणोतः ॥ १२ ॥

संकल्पादेवेत्येतदतःशब्देन परामृश्यते । अत एव संकल्पादुभयविधं सशरीरमशरीरं च मुक्तं भगवान्बादरायणो मन्यते । एवं चोभयी श्रुतिरुपपद्यते । द्वादशाहवत् । यथा द्वादशाहमृद्धिकामा उपेयुः (ता. ब्रा. २३।२३।१)। द्वादशाहेन प्रजाकामं याजयेदित्युपैतियजतिचोदनाभ्यां संकल्पभेदेन सत्रमहीनं च भवति ॥ १२ ॥

यदा शरीराद्युपकरणवत्त्वं तदा तानि शरीराद्युपकरणानि स्वेनैव सृष्टानीति नास्ति नियम इत्याह ।

तन्वभावे संध्यवदुपपत्तेः ॥ १३ ॥

स्वेनैव सृष्टतनुप्रभृत्युपकरणाभावे परमपुरुषसृष्टैरुपकरणैर्भोगोपपत्तेः सत्यसंकल्पोपि स्वयं न सृजति । यथा स्वप्नेऽथ रथान्रथयोगान्पथः सृजते (बृ. ४।३।१०) इत्यारभ्याथ वेशान्तान्पुष्करिण्यः स्रवन्त्यः सृजते स हि कर्ता (बृ. ४।३।१०) इति

---

4. A. B. om. प्रिय before अप्रिय.
5. A. B. om. तु after भगवान्.
9. A. B. read उभय for उभयी; C. reads द्वादशाहे before द्वादशाहम्.
15. A. reads संधिवत् for संध्यवत्.

http://acharya.org

य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः ।
तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते ।
तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन । (का. ५।८)

इति चेश्वरसृष्टै रथाद्युपकरणैर्जीवो भुङ्क्ते तथा मुक्तोपि लीलाप्रवृत्तेनेश्वरेण सृष्टैः पितृलोकादिभिर्लीलारसं भुङ्क्ते ॥१३॥

भावे जाग्रद्वत् ॥ १४ ॥

स्वसंकल्पादेव सृष्टतनुप्रभृतिपितृलोकाद्युपकरणभावे जाग्रत्पुरुषभोगवन्मुक्तो लीलारसं भुङ्क्ते । परमपुरुषोपि लीलार्थी दशरथवसुदेवादिपितृलोकादिकमात्मनः सृष्ट्वा तैर्मनुष्यधर्मलीलारसं यथा भुङ्क्ते तथा मुक्तानामपि स्वलीलायै पितृलोकादिकं स्वयमेव सृजति कदाचित् । कदाचिच्च मुक्ताः सत्यसंकल्पत्वात्परमपुरुषलीलान्तर्गतस्वपितृलोकादिकं स्वयमेव सृजन्तीति सर्वमुपपन्नम् ॥ १४ ॥

नन्वात्माणुपरिमाण इत्युक्तम् । कथमनेकशरीरेष्वेकस्याणोरात्माभिमानसंभव इत्यत्राह ।

प्रदीपवदावेशस्तथा हि दर्शयति ॥ १५ ॥

यथा प्रदीपस्यैकस्यैकस्मिन्देशे वर्तमानस्य स्वप्रभया देशान्तरावेशस्तथात्मनोप्येकदेशस्थितस्यैव स्वप्रभारूपेण चैतन्येन सर्वशरीरावेशो नानुपपन्नः । यथा चैकस्मिन्नपि देहे हृदयाद्येकप्रदेशवर्तिनोपि चैतन्यव्याप्त्या सर्वस्मिन्देह आत्माभिमानस्तद्वत् ।

---

5. A. B. read लीलया for लीला before प्रवृत्तेन.
9. C. reads मानुष for मनुष्य.
10. B. om. यथा after रसम्.
18. C. reads देहे for देश after एक.
19. C. reads अनुप्र for आ before वेशः.
20. C. om. प्र before देशवर्तिनः.

http://acharya.org

इयान्विशेषः । अमुक्तस्य कर्मणा संकुचितज्ञानस्य देहान्तरेष्वात्माभिमानानुगुणा व्याप्तिर्न संभवति । मुक्तस्य त्वसंकुचितज्ञानस्य यथासंकल्पमात्माभिमानानुगुणा व्याप्तिरिदमिति ग्रहणानुगुणा च नानुपपन्ना । तथा हि दर्शयति

बालाग्रशतभागस्य शतधा कल्पितस्य च ।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते ॥ (श्वे.५।९)

इति । अमुक्तस्य कर्म नियामकं मुक्तस्य तु स्वेच्छेति विशेषः ॥ १५ ॥

ननु परं ब्रह्म प्राप्तस्यान्तरबाह्यज्ञानलोपं दर्शयति श्रुतिः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरम् (बृ. ४।३।२१) इति । तत्कथं मुक्तस्य सार्वज्ञ्यमुच्यते । तत्रोत्तरम् ।

स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥ १६ ॥

नेदं वचनं मुक्तविषयम् । अपि तु स्वाप्ययसंपत्त्योरन्यतरापेक्षम् । स्वाप्ययः सुषुप्तिरित्युक्तम् । संपत्तिश्च मरणम् । वाङ्मनसि संपद्यते (छा. ६।८।६) इत्यारभ्य तेजः परस्यां देवतायाम् (छा. ६।८।६) इति वचनात् । तयोश्चावस्थयोः प्राज्ञप्राप्तिर्निःसंबोधत्वं च विद्यते । अतस्तयोरन्यतरापेक्षमिदं वचनम् । सुषुप्तिमरणयोर्निःसंबोधत्वं मुक्तस्य च सर्वज्ञत्वमाविष्कृतं हि श्रुत्या । नाह खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामि (छा. ८।११।१) इति सुषुप्तिवेलायां निःसंबोधत्व-

---

1. C. reads न before देहान्तरेषु.
2. C. om. न after व्याप्तिः.
13. B. reads तु after वचनम्.
17. E. reads विद्येते for विद्यते.
19. A. E. read नाहम् for नाह.

http://acharya.org

मुक्त्वा तस्मिन्नेव वाक्ये मुक्तमधिकृत्य स वा एष दिव्येन चक्षुषा मनसैतान्कामान्पश्यन्रमते य एते ब्रह्मलोके (छा. ८।१२।५-६) इति सर्वज्ञत्वमुच्यते । तथा

सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वशः। (छा. ७।२६।२) इति च स्पष्टमेव सर्वज्ञत्वमुच्यते । तथा मरणे च निःसंबोधत्वमेतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति (बृ. २।४।१२) इत्युक्तम् । विनश्यति न पश्यतीत्यर्थः । अतः प्राज्ञेनात्मनेति वचनं स्वाप्ययसंपत्त्योरन्यतरापेक्षम् ॥ १६ ॥

अभावाधिकरणं समाप्तम् । (५)

जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च ॥ १७ ॥

किं मुक्तस्यैश्वर्यं जगत्सृष्ट्यादि परमपुरुषासाधारणं सर्वेश्वरत्वमप्युत तद्रहितं केवलपरमपुरुषानुभवविषयमिति संशयः। किं युक्तम् । जगदीश्वरत्वमपीति । कुतः । निरञ्जनः परमं साम्यमुपैति (मु. ३।१।३) इति परमपुरुषेण परमसाम्यापत्तिश्रुतेः । सत्यसंकल्पत्वश्रुतेश्च । न हि परमसाम्यसत्यसंकल्पत्वे सर्वेश्वरासाधारणजगद्व्यापाररूपजगन्नियमनेन विनोपपद्येते । अतः सत्यसंकल्पत्वपरमसाम्योपपत्तये समस्तजगन्नियमनरूपमपि मुक्तस्यैश्वर्यमिति । एवं प्राप्ते प्रचक्ष्महे ।

जगद्व्यापारवर्जमिति । जगद्व्यापारो निखिलचेतनाचेतनस्वरूपस्थितिप्रवृत्तिभेदनियमनम् । तद्वर्जं निरस्तनिखिलतिरो-

---

5. C. om. च after इति.

7. B. om. इत्युक्तम् । विनश्यति; C. E. om. विनश्यति before न पश्यति.

11. C. reads असाधारण for असाधारणम्.

16. A. B. om. जगद्व्यापाररूप.

18. C. E read मुक्त for मुक्तस्य.

http://acharya.org

धानस्य निर्व्याजब्रह्मानुभवरूपं मुक्तस्यैश्वर्यम् । कुतः । प्रकरणात् । निखिलजगन्नियमनं हि परं ब्रह्म प्रकृत्याम्नायते यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्म (तै. ३।१) इति । यद्येतन्निखिलजगन्नियमनं मुक्तानामपि साधारणं स्यात्तत इदं जगदीश्वरत्वरूपं ब्रह्मलक्षणं न संगच्छते । असाधारणस्य हि लक्षणत्वम् । तथा सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् । तदैक्षत बहु स्यां प्रजायेयेति । तत्तेजोऽसृजत (छा. ६।२।२-३) इति । ब्रह्म वा इदमग्र आसीदेकमेव । तदेकं सन्न व्यभवत् । तच्छ्रेयोरूपमत्यसृजत क्षत्रं यान्येतानि देवत्रा क्षत्राणीन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशानः (बृ. १।४।११) इति । आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत्स ऐक्षत लोकान्नु सृजा इति स इमाँल्लोकानसृजत (ऐ. १।१-२) इति । एको ह वै नारायण आसीन्न ब्रह्मा नेशानो नेमे द्यावापृथिवी न नक्षत्राणि नापो नाग्निर्न सोमो न सूर्यः स एकाकी न रमते तस्य ध्यानान्तस्थस्यैका कन्या दशेन्द्रियाणि (महो. १) इत्यादिषु यः पृथिव्यां तिष्ठन्पृथिव्या अन्तरः (श. ब्रा. १४।६।७।७) इत्यारभ्य य आत्मनि तिष्ठन् (श. ब्रा. १४।६।७।३०) इत्यादिषु च निखिलजगन्नियमनं परमपुरुषं प्रकृत्यैव श्रूयते । असंनिहि-

---

2. C. om. हि after नियमनम्; A. B. read पर for परम्.

6. A. E. read च after तत..

7. B. reads यथा for तथा.

9. E. om. एकमेव after आसीत् and reads it after इदम्.

10. C. reads व्यभजत् for व्यभवत्; C. reads देवता, E. देव, for देवत्रा.

14. A. B. om. इति after असृजत.

http://acharya.org

तत्वाच्च । न चैतेषु निखिलजगन्नियमनप्रसङ्गेषु मुक्तस्य संनिधानमस्ति । येन जगद्व्यापारस्तस्यापि स्यात् ॥ १७ ॥

प्रत्यक्षोपदेशान्नेति चेन्नाधिकारिकमण्डलस्थोक्तेः ॥ १८ ॥

स स्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवति (छा. ७।२५।२) । इमाँल्लोकान्कामान्नी कामरूप्यनुसंचरन् (तै. ३।१०।५) इति प्रत्यक्षेण श्रुत्या मुक्तस्य जगद्व्यापार उपदिश्यते । अतो न जगद्व्यापारवर्जमिति चेत्तन्न । आधिकारिकमण्डलस्थोक्तेः । आधिकारिका अधिकारेषु नियुक्ता हिरण्यगर्भादयः । मण्डलानि तेषां लोकाः । तत्स्था भोगा मुक्तस्याकर्मवश्यस्य भवन्तीत्ययमर्थस्तस्य सर्वेषु लोकेषु कामचारो भवति (छा. ७।२५।२) इत्यादिनोच्यते । अकर्मप्रतिहतज्ञानो मुक्तो विकारिलोकान्ब्रह्मविभूतिभूताननुभूय यथाकामं तृप्यतीत्यर्थः । तदेवं विकारान्तर्वर्तिन आधिकारिकमण्डलस्थान्सर्वान्भोगान्ब्रह्मविभूतिभूताननुभवतीत्यनेन वाक्येनोच्यते न जगद्व्यापारः ॥ १८ ॥

यदि संसारिवन्मुक्तोपि विकारान्तर्वर्तिनो भोगान्भुङ्क्ते तर्हि बद्धस्येव मुक्तस्याप्यन्तवदेव भोग्यजातमल्पं च स्यात् । तत्राह ।

विकारावर्ति च तथा हि स्थितिमाह ॥ १९ ॥

विकारे जन्मादिके न वर्तत इति विकारावर्ति । निर्धूत-

---

6. A. E. read सः before इमान्.
13. C. reads अधिकान्, E. विकार, for विकारि.
14. C. reads अन्तर्वर्तिना for अन्तर्वर्तिनः; A. B. read अधिकारि for आधिकारिक.
15. A. B. om. सर्वान्.
16. B. reads तत् for जगत्.
18. B. om. तत्राह.

http://acharya.org

निखिलविकारं निखिलहेयप्रत्यनीककल्याणैकतानं निरतिशयानन्दं परं ब्रह्म सविभूतिकं सकलकल्याणगुणमनुभवति मुक्तः। तद्विभूत्यन्तर्गतत्वेन विकारवर्तिनां लोकानामपि मुक्तभोग्यत्वम्। तथा हि परस्मिन्ब्रह्मणि निर्विकारेनवधिकातिशयानन्दे मुक्तस्यानुभवितृत्वेन स्थितिमाह श्रुतिर्यदा ह्येवैष एतस्मिन्नदृश्येनात्म्येनिरुक्तेनिलयनेभयं प्रतिष्ठां विन्दते। अथ सोभयं गतो भवति (तै. २।७)। रसो वै सः। रसं ह्येवायं लब्ध्वानन्दी भवति (तै. २।७) इत्यादिका। तद्विभूतिभूतं च जगत्तत्रैव वर्तते।

तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन। (का. ५।८) इति श्रुतेः। अतः सविभूतिकं ब्रह्मानुभवन्विकारान्तर्वर्तिन आधिकारिकमण्डलस्थानपि भोगान्भुङ्क्त इति सर्वेषु लोकेषु कामचारः (छा. ७।२५।२) इत्यादिनोच्यते न मुक्तस्य जगद्व्यापारः॥ १९॥

दर्शयतश्चैवं प्रत्यक्षानुमाने॥ २०॥

अस्य प्रत्यगात्मनो मुक्तस्य नियाम्यभूतस्य नियन्तृभूतपरमपुरुषासाधारणं जगद्व्यापाररूपं नियमनं न संभवतीत्युक्तम्। निखिलजगन्नियमनरूपो व्यापारः परमपुरुषासाधारण इति दर्शयतः श्रुतिस्मृती। भीषास्माद्वातः पवते। भीषोदेति सूर्यः। भीषास्मादग्निश्चेन्द्रश्च। मृत्युर्धावति पञ्चम इति (तै. २।८)। एतस्य

1. B. C. om. निखिलविकारम्.
2. A. B. read सविभूति for सविभूतिकम्; C. reads स for सकल.
5 A. reads आनन्दस्य for आनन्दे; B. om. श्रुतिः.
8. E. om. च after विभूतिभूतम्.
11. B. reads अनुभवस्तीकारान्तदन्तर्वर्तिनः for अनुभवन्विकारान्तर्वर्तिनः.
16. C. reads नियम्य for नियाम्य.
17. C. om. रूपम् after व्यापार.

http://acharya.org

वा अक्षरस्य प्रशासने सूर्याचन्द्रमसौ विधृतौ तिष्ठतः (बृ. ३।८।९) इत्यादि। तथैष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय (बृ. ४।४।२२) इति च श्रुतिः। स्मृतिरपि

मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्।
हेतुनानेन कौन्तेय जगद्विपरिवर्तते ॥ (गी. ९।१०)

इति।

विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्। (गी. १०।४२)

इति च।

तथा मुक्तस्य सत्यसंकल्पत्वादिपूर्वकस्याप्यानन्दस्य परमपुरुष एव हेतुरिति श्रुतिस्मृती दर्शयत एष ह्येवानन्दयाति (तै. २।७)।

मां च योऽव्यभिचारेण भक्तियोगेन सेवते।
स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते ॥
ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥
(गी. १४।२६-२७)

इति। यद्यप्यपहतपाप्मत्वादिः सत्यसंकल्पत्वपर्यन्तो गुणगणः प्रत्यगात्मनः स्वाभाविक एवाविर्भूतस्तथापि तस्य तथाविधत्वमेव परमपुरुषायत्तं तस्य नित्यस्थितिश्च तदायत्ता। परमपुरुषस्यैतन्नित्यताया नित्येष्टत्वान्नित्यतया वर्तत इति न कश्चिद्विरोधः। एवमेव परमपुरुषभोगोपकरणस्य लीलोपकरणस्य च नित्यतया

4. B. om. च before श्रुतिः.
7. A. E. om. इति.
10. C om. अपि after पूर्वकस्य.
19. C. reads आविष्कृतः for आविर्भूतः.
22. A. B. om. च after उपकरणस्य.

http://acharya.org

शास्त्रावगतस्य परमपुरुषस्य नित्येष्टत्वादेव तथावस्थानमस्तीति शास्त्रादवगम्यते । अतो मुक्तस्य सत्यसंकल्पत्वं परमपुरुषसाम्यं च जगद्व्यापारवर्जम् ॥ २० ॥

भोगमात्रसाम्यलिङ्गाच्च ॥ २१ ॥

ब्रह्मयाथात्म्यानुभवरूपभोगमात्रेण मुक्तस्य ब्रह्मसाम्यप्रतिपादनाच्च लिङ्गाज्जगद्व्यापारवर्जमित्यवगम्यते । सोश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता (तै. २।१) इति । अतो मुक्तस्य परमपुरुषसाम्यं सत्यसंकल्पत्वं च परमपुरुषासाधारणनिखिलजगन्नियमनश्रुत्यानुगुण्येन वर्णनीयमिति जगद्व्यापारवर्जमेव मुक्तैश्वर्यम् ॥ २१ ॥

यदि परमपुरुषायत्तं मुक्तस्यैश्वर्यं तर्हि तस्य स्वतन्त्रत्वेन तत्संकल्पान्मुक्तस्य पुनरावृत्तिसंभवशङ्केत्यत्राह ।

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥ २२ ॥

यथा निखिलहेयप्रत्यनीककल्याणैकतानो जगज्जन्मादिकारणं समस्तवस्तुविलक्षणः सर्वज्ञः सत्यसंकल्प आश्रितवात्सल्यैकजलधिः परमकारुणिको निरस्तसमाभ्यधिकसंभावनः परब्रह्माभिधानः परमपुरुषोस्तीति शब्दादवगम्यत एवमहरहरनुष्ठीयमानवर्णाश्रमधर्मानुगृहीततदुपासनरूपतत्समाराधनप्रीत उपासीनाननादिकालप्रवृत्तानन्तदुस्तरकर्मसंचयरूपाविद्यां विनिवर्त्य स्वयाथात्म्यानुभवरूपानवधिकातिशयानन्दं प्रापय्य पुनर्नावर्तय-

---

1. C. reads शास्त्रात् for शास्त्र.
5. A. B. read भोगमात्रे for भोगमात्रेण
11. E. reads एव after पुरुषायत्तम्; A. B read मुक्त for मुक्तस्य.
12. C. reads सभावना शङ्केत for सभवशङ्का; E. reads आ before शङ्का.
16-17 E. reads समस्त after निरस्त; C. om. परब्रह्माभिधानः.
18. C. reads सराधन for समाराधन.
20. B. reads प्राप्य for प्रापय्य.

http://acharya.org

तीत्यपि शब्दादेवावगम्यते । शब्दश्च स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते (छा. ८ १५।१) इत्यादिकः । तथा च भगवता स्वयमेवोक्तम्

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥
आ ब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥ (गी. ८।१५-१६)

इति ।

न चोच्छिन्नकर्मबन्धस्यासंकुचितज्ञानस्य परब्रह्मैकानुभवैकस्वभावस्य तदेकप्रियस्यानवधिकातिशयानन्दं ब्रह्मानुभवतोऽन्यापेक्षातदर्थारम्भाद्यसंभवात्पुनरावृत्तिशङ्का । न च परमपुरुषः सत्यसंकल्पोऽत्यर्थप्रियं ज्ञानिनं लब्ध्वा कदाचिदावर्तयिष्यति । य एवमाह

प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ।
उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् ॥
बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥ (गी. ७।१७-१९)

इति । सूत्राभ्यासः शास्त्रपरिसमाप्तिं द्योतयतीति सर्वं समञ्जसम् ॥ २२ ॥ जगद्व्यापारवर्जाधिकरणं समाप्तम् । (६)

इति श्रीभगवद्रामानुजाचार्यविरचिते शारीरकमीमांसाभाष्ये चतुर्थाध्यायस्य चतुर्थः पादः समाप्तः ॥ अध्यायश्चतुर्थो ग्रन्थश्च शास्त्रं च परिसमाप्तम् ॥ नमो भगवते रामानुजमुनये योगिवर्याय ॥ नमः पूर्वाचार्येभ्यः ॥

---

1. C. om. अव before गम्यते.
3. C. E. om. च after तथा.
9. B. om. एक after अनुभव.
11. E. reads तदर्थान्तरारम्भ for तदर्थारम्भ.

http://acharya.org

अधिकरणानां वर्णानुक्रमेण सूचीपत्रम्।

	पृ.
अशाधिकरणम्	५३९
अक्षरध्यधि°	६४३
अक्षराधि°	२९०
अग्निहोत्राद्यधि°	७२४
अग्नीन्धनाधि°	६९५
अङ्गावबद्धाधि°	६६९
अत्रधि°	२४३
अदृश्यत्वादिगुणकाधि°	२६०
अध्यक्षाधि°	७२९
अनारब्धकार्याधि°	७२३
अनाविष्काराधि°	७१०
अनियमाधि°	६४२
अनिष्टादिकार्यधि°	५७४
अन्तरत्वाधि°	६४६
अन्तरधि°	२१०
अन्तराधि°	२४९
अन्तर्याम्यधि°	२५६
अन्यथात्वाधि°	६१७
अन्याधिष्ठिताधि°	५७९
अपशूद्राधि°	३२२
अभावाधि°	७६६
अर्चिराद्यधि°	७४३
अर्थान्तरत्वाधि°	३३३
अविभागाधि°	७३६
अविभागेन दृष्टत्वाधि°	७६०
अहिकुण्डलाधि°	६०२
आकाशाधि°	२१६
आतिवाहिकाधि°	७४८
आत्मत्वोपासनाधि°	७१५
आत्माधि°	५२०
आदित्यादिमत्यधि°	७१८
आनन्दमयाधि°	१७९
आनन्दाद्यधि°	६२४
आनुमानिकाधि°	३३८
आप्रयाणाधि°	७२०
आरम्भणाधि°	४१९
आवृत्त्यधि°	७१३
आसीनाधि°	७१८
आसृत्युपक्रमाधि°	७३०
इतरक्षपणाधि°	७२५
इतरव्यपदेशाधि°	४५२
इतराधि°	७२२
इन्द्रप्राणाधि°	२२५
इन्द्रियाधि°	५५६
ईक्षतिकर्माधि°	२९३
ईक्षत्यधि°	१७०
उत्पत्त्यसंभवाधि°	५०४
उपलब्ध्यधि°	४९३
उपसंहारदर्शनाधि°	४५६
उभयलिङ्गाधि°	५८९
एकस्मिन्नसंभवाधि°	४९६
ऐहिकाधि°	७११
कर्त्रधि°	५३२
कर्मानुस्मृतिशब्दविध्यधि°	५८७
कामाद्यधि°	६५३
कारणत्वाधि°	३६१

http://acharya.org

	पृ.		पृ.
कार्याख्यानाधि°	६२८	पूर्वविकल्पाधि°	६६१
कार्याधि°	७५०	प्रकृत्यधि°	३८३
कृतात्ययाधि°	५७०	प्रतीकाधि°	७१७
कृत्स्नप्रसक्त्यधि°	४५८	प्रदानाधि°	६५८
चमसाधि°	३४९	प्रमिताधि°	३०९
जगद्वाचित्वाधि°	३६५	प्रयोजनवत्त्वाधि°	४६१
जगद्व्यापारवर्जाधि°	७७०	प्राणाणुत्वाधि°	५५१
जन्माद्यधि°	१३२	प्राणाधि°	२२१
जिज्ञासाधि°	१	प्राणोत्पत्त्यधि°	५४७
ज्ञाधि°	५२४	फलाधि°	६१०
ज्योतिरधि°	२२२	ब्राह्माधि°	७६२
ज्योतिराद्यधिष्ठानाधि°	५५४	भूताधि°	७२९
तत्स्वाभाव्यापत्त्यधि°	५७८	भूमज्यायस्त्वाधि°	६७०
तदधिगमाधि°	७२०	भूमाधि°	२८०
तदन्तरप्रतिपत्त्यधि°	५६४	भोक्त्रापत्त्यधि°	४१६
तदभावाधि°	५८६	मध्वधि°	३२०
तदोकोधि°	७३७	मनोधि°	७२८
तद्भूताधि°	७०३	महद्दीर्घाधि°	४७९
तन्निर्धारणानियमाधि°	६५७	मुक्तिफलाधि°	७१२
तेजोधि°	५१६	मुग्धाधि°	५८९
दक्षिणायनाधि°	७४०	यथाश्रयभावाधि°	६७१
दहराधि°	२९६	योगप्रत्युक्त्यधि°	४०२
देवताधि°	३११	रचनानुपपत्त्यधि°	४६५
द्युभ्वाद्यधि°	२७६	रश्म्यनुसाराधि°	७३८
नातिचिराधि°	५७८	लिङ्गभूयस्त्वाधि°	६५९
निशाधि°	७३९	वरुणाधि°	७४७
परसंपत्त्यधि°	७३६	वाक्यान्वयाधि°	३७१
पराधि°	६०५	वागधि°	७२७
परायत्ताधि°	५३६	वायुक्रियाधि°	५५२
पश्वपत्त्यधि°	५००	वाय्वधि°	७४५
पारिप्लवार्थाधि°	६९४	विकल्पाधि°	६७४
पुरुषविद्याधि°	६३२	विधुराधि°	७०१
पुरुषार्थाधि°	६८०	वियदधि°	५१३

http://acharya.org

	पृ.		पृ.
विलक्षणत्वाधि°	४०३	सप्तगत्यधि°	५४९
विहितत्वाधि°	७००	समन्वयाधि°	१४६
वेधाद्यधि°	६३४	समानाधि°	६२९
वैश्वानराधि°	२६६	समुदायाधि°	४८३
शब्दादिभेदाधि°	६७३	सर्वत्र प्रसिद्ध्यधि°	२३२
शमदमाद्यधि°	६९७	सर्वथानुपपत्त्यधि°	४९५
शरीरे भावाधि°	६६७	सर्ववेदान्तप्रत्ययाधि°	६१४
शास्त्रयोनित्वाधि°	१३६	सर्वव्याख्यानाधि°	३९५
शिष्टापरिग्रहाधि°	४१६	सर्वान्नानुमत्यधि°	६९८
श्रेष्ठाणुत्वाधि°	५५४	सर्वापेक्षाधि°	६९५
संकल्पाधि°	७६५	सर्वाभेदाधि°	६२२
संख्योपसंग्रहाधि°	३५८	सहकार्यन्तरविध्यधि°	७०७
संज्ञामूर्तिक्लृप्त्यधि°	५५७	सांपरायाधि°	६३८
संध्याधि°	५८३	स्तुतिमात्राधि°	६९३
संपद्याविर्भावाधि°	७५७	स्मृत्यधि°	३९७
संबन्धाधि°	६३०	स्वाम्यधि°	७०५
संभृत्यधि°	६३१	हान्यधि°	६३५

http://acharya.org

ब्रह्मसूत्राणां वर्णानुक्रमेण सूचीपत्रम् ।

	पृ.
अंशो नाना°	५३९
अकरण°	५५३
अक्षरधि°	६४३
अक्षरमम्ब°	१९०
अग्निहोत्रा°	७२४
अग्न्यादिग°	५६७
अङ्गावबद्धा°	६६९
अङ्गित्वानु°	४७५
अङ्गेषु य°	६७५
अचलत्वं°	७१९
अणवश्च°	५५१
अणुश्च°	५५४
अत एव च नि°	३१७
अत एव च स°	२५४
अत एव चाग्नी°	६९५
अत एव चानन्या°	७६६
अत एव चोपमा°	५९५
अत एव न देवता°	२७१
अत एव प्राण.°	२२१
अत एव सर्वा°	७२८
अतः प्रबो°	५८७
अतश्चाय°	७४०
अतस्त्वित°	७०३
अतिदेशा°	६६२
अतोनन्ते°	६०२
अतोन्यापि°	७२५
अत्ता चराच°	२४४
अथातो ब्र°	१

	पृ.
अदृश्यत्वा°	२६०
अदृष्टानि°	५४५
अधिकं तु°	४५३
अधिकाररूप°	५१७
अधिकोप°	६८४
अधिष्ठाना°	५०३
अध्ययनमा°	६८७
अनभिभ°	७०१
अनवस्थिते°	२५५
अनारब्धका°	७२३
अनाविष्कु°	७१०
अनावृत्ति°	७७५
अनियम.°	६४२
अनिष्टादि°	५७४
अनुकृते°	३०८
अनुज्ञापरि°	५४४
अनुपपत्तेस्तु°	२४०
अनुबन्धा°	६६५
अनुष्ठेयं°	६९०
अनुस्मृतेर्बा°	२७३
अनुस्मृतेश्च	४८९
अनेन स°	६०९
अन्तर उप°	२४९
अन्तरा चा°	७०१
अन्तरा भूत°	६४६
अन्तरा वि°	५१९
अन्तर्याम्य°	२५६
अन्तवत्त्व°	५०३

http://acharya.org

	पृ		पृ.
अन्तस्तद्ध°	२१०	अविभागो°	७३६
अन्त्यावस्थि°	५००	अविरोध°	५२८
अन्यत्राभावा°	४७३	अशुद्धमि°	५८०
अन्यथात्वं°	६१७	अश्मादिव°	४५४
अन्यथानुमितौ°	४७५	अश्रुतत्वा°	५६९
अन्यथानुमे°	४१५	असंतते°	५४४
अन्यभावव्या°	२९२	असंभवे°	५१६
अन्याधिष्ठि°	५७९	असति प्र°	४८६
अन्यार्थं तु°	३७०	असदिति°	४०७
अन्यार्थश्च प°	३०७	असद्यप°	४५०
अन्वयादि°	६२७	असार्वत्रि°	६८६
अपरिग्र°	४८३	अस्ति तु	५१४
अपि चैवमेके	५९२	अस्मिन्नस्य°	२०९
अपि संरा°	६००	अस्यैव चोप°	७३२
अपि सप्त°	५७५	आ.	
अपि स्मर्यते°	३०९।५४२।६९९।७०२	आकाशस्त°	२१७
अपीतौ त°	४०८	आकाशे चा°	४८८
अप्रतीका°	७५४	आकाशोर्था°	३३३
अबाधाच्च	६९९	आचारद°	६८२
अभावं बाद°	७६६	आतिवाहिका°	७४८
अभिध्योप°	३८८	आत्मकृतेः	३८९
अभिमानि°	४०६	आत्मगृहीति°	६२७
अभिव्यक्तेरि°	२७२	आत्मनि चै°	४५९
अभिसंध्या°	५४६	आत्मशब्दाच्च	६२७
अभ्युपग°	४७५	आत्मा प्रक°	७५९
अम्बुवदग्र°	५९६	आत्मेति तूप°	७१५
अरूपव°	५९३	आदराद°	६५४
अर्चिरादि°	७४३	आदित्यादि°	७१८
अर्भकौकस्त्वा°	२४१	आध्यानाय°	६२६
अल्पश्रुते°	३०७	आनन्दम°	१७९
अवस्थिति°	५२८	आनन्दाद°	६२४
अवस्थिते°	३७९	आनर्थक्य°	५७३
अविभागे°	७६०	आनुमानिक°	३३८

http://acharya.org

	पृ.		पृ.
आपः°	५१७	उपसंहार°	४५६
आ प्रयाणा°	७२०	उपसंहारो°	६१७
आभास एव°	५४५	उपस्थिते°	६५६
आमनन्ति चै°	२७४	उपादानाद्वि°	५३४
आर्त्विज्यमि°	७०६	उभयथा च दो°	४८३।४८८
आवृत्तिर°	७१३	उभयव्यपदेशा°	६०२
आसीनः सं°	७१८	उभयथापि न°	४८०
आह च त°	५९४	उभयेपि हि°	२५९
इ.		ऊ.	
इतरपरा°	३०३	ऊर्ध्वरेतः°	६८९
इतरव्यपदे°	४५२	ए.	
इतरस्या°	७२२	एक आत्मन.°	६६७
इतरेतरप्र°	४८५	एतेन मा°	५१६
इतरे त्व°	६२५	एतेन यो°	४०२
इतरेषां°	४०२	एतेन शिष्टा°	४१६
इयदाम°	६४५	एतेन सर्वे°	३९५
ई.		एव चात्मा°	४९९
ईक्षतिकर्म°	२९३	एवं मुक्ति°	७१२
ईक्षतेर्ना°	१७०	एवमप्यु°	७६३
उ.		ऐ.	
उत्क्रमिष्य°	३७८	ऐहिकम°	७११
उत्क्रान्तिग°	५२६	क.	
उत्तरत्र°	३२६	कम्पनात्	३३१
उत्तराच्चे°	३०४	करणवच्चे°	५०३
उत्तरोत्पा°	४८६	कर्ता शास्त्रा°	५३२
उत्पस्यसं°	५०४	कर्मकर्तृ°	२४०
उदासीना°	४९२	कल्पनोप°	३५५
उपदेशभे°	२२५	कामकारे°	६८८
उपपत्तेश्च°	६०७	कामाच्च ना°	२०८
उपपन्नस्त°	६४०	कामादीत°	६५३
उपपूर्वम°	७०४	काम्यास्तु य°	६७५
उपमर्दं°	६८९	कारणत्वेन°	३६१
उपलब्धिव°	५३५	कार्यं बाद°	७५०

http://acharya.org

	पृ		पृ.
कार्याख्याना°	६२८	ज्ञेत एव	५२४
कार्यात्यये°	७५१	ज्योतिराद्यधि°	५५४
कृतप्रय°	५३७	ज्योतिरुप°	३५३
कृतात्यये°	५७०	ज्योतिर्दर्श°	३३२
कृत्स्नप्रस°	४५८	ज्योतिश्चरणा°	२२२
कृत्स्नभावा°	७०९	ज्योतिषि भा°	३१०
क्षत्रियत्वा°	३२६	ज्योतिषैके°	३६०
ग.		**त.**	
गतिशब्दाभ्यां°	३००	त इन्द्रिया°	५५६
गतिसामा°	१७६	तच्छ्रुते.°	६८३
गतेरर्थव°	६४०	तडितोधि°	७४७
गुणसाधार°	६७७	तत्तु समन्वया°	१४६
गुणाद्वा लो°	५२९	तत्पूर्वक°	५४९
गुहा प्रवि°	२४६	तत्रापि त°	५७५
गौणश्चेन्ना°	१७३	तत्स्वाभाव्या°	५७८
गौण्यसंभवाच्छ°	५१४	तथा चैक°	६९४
गौण्यसंभवात्त°	५४९	तथान्यप्रति°	६०७
च.		तथा प्राणाः	५४७
चक्षुरादि°	५५३	तदधिगम°	७२०
चमसव°	३४९	तदधीनत्वा°	३४३
चरणादिति°	५७२	तदन्तरप्र°	५६४
चराचरव्य°	५२०	तदभाव°	३२७
चिति तन्मा°	७६३	तदभावो°	५८६
छ.		तदभिध्या°	५१८
छन्दत उ°	६३९	तदनन्यत्व°	४१९
छन्दोभिधा°	२२३	तदव्यक्त°	६००
ज.		तदापीतेः°	७३१
जगद्वाचि°	३६५	तदुपर्यपि°	३११
जगद्व्यापार°	७७०	तदोकोग्र°	७३७
जन्माद्यस्य°	१३२	तद्गुणसार°	५३०
जीवमुख्यप्राणलिङ्गान्नेति चेत्त°	३६९	तद्धेतुव्य°	२०५
जीवमुख्यप्राणलिङ्गान्नेति चेन्नो°	२३०	तद्भूतस्य°	७०३
ज्ञेयत्वाव°	३४५	तद्वतो वि°	६८३

	पृ.		पृ.
तन्निर्धार°	६५७	न चाधिका°	७०४
तन्निष्ठस्य°	१७३	न तु दृष्टा°	४११
तन्मनः प्राण°	७२८	न तृतीये°	५७६
तन्वभावे°	७६७	न प्रतीके°	७१७
तर्काप्रति°	४१५	न प्रयोज°	४६१
तस्य च नि°	५५६	न भावोनु°	४९५
तानि परे°	७३६	न वक्तुरा°	२२७
तुल्य तु द°	६८५	न वा तत्स°	६७७
तृतीयशब्दा°	५७७	न वा प्रक°	६२०
तेजोतस्त°	५१६	न वायुक्रिये	५५२
त्रयाणामेव°	३४६	न वा विशे°	६३१
त्र्यात्मकत्वा°	५६६	न वियद°	५१३
द.		न विलक्षण°	४०३
दर्शनाच्च	५७७।६७८।७५३	न संख्योप°	३५८
दर्शयतश्चै°	७७३	न सामान्या°	६६५
दर्शयति च	६१६।६३१	न स्थानतो°	५८९
दर्शयति चाथो°	५९४	नाणुरत°	५२७
दहर उत्तरे°	२९६	नातिचिरे°	५७८
दृश्यते तु	४०७	नात्मा श्रुते°	५२०
देवादिव°	४५७	नाना शब्दा°	६७३
देहयोगा°	५८५	नानुमानम°	२७९
द्युभ्वाद्याय°	२७६	नाभाव उ°	४९३
द्वादशाह°	७६७	नाविशेषा°	६८७
ध.		नासतोदृ°	४९१
धर्मं जैमिनि°	६११	नित्यमेव°	४८२
धर्मोपपत्ते°	२८८	नित्योपल°	५३२
धृतेश्च म°	३०२	नियमात्°	६८३
ध्यानाच्च	७१९	निर्मातारं°	५८३
न.		निशि नेति°	७३९
न कर्मावि°	४६३	नेतरोनु°	२०६
न च कर्तुः°	५०४	नैकस्मिन्द°	७३०
न च कार्ये°	७५४	नैकस्मिन्न°	४९६
न च पर्या°	५००	नोपमर्दे°	७३२
न च स्मार्तम°	२५९		

http://acharya.org

	पृ.		पृ.
प.		प्रतिज्ञाहा°	५१५
पञ्चवृत्ति°	५५४	प्रतिषेधाच्च	६०४
पटवच्च	४५२	प्रतिषेधादिति°	७३३
पत्यादिश°	३३७	प्रतिसङ्ख्या°	४८७
पत्युरसा°	५००	प्रत्यक्षोप°	७७२
पयोम्बुव°	४६९	प्रथमेश्र°	५६७
परं जैमिनिर्मु°	७५२	प्रदानवदे°	६५८
परमत °	६०५	प्रदीपव°	७६८
परात्तु त°	५३६	प्रदेशभे°	५४६
पराभिध्या°	५८५	प्रसिद्धेश्च	३०३
परामर्श°	६८९	प्राणगतेश्च	५६७
परिणामात्	३९०	प्राणस्तथा°	२२६
परेण च श°	६६६	प्राणादयो°	३६०
पारिप्लवा°	६९४	प्रियशिर°	६२५
पुंस्त्वादिव°	५३१	**फ.**	
पुरुषविद्या°	६३२	फलमत उप°	६१०
पुरुषार्थो°	६८०	**ब.**	
पुरुषाश्मव°	४७४	बहिस्तूभ°	७०५
पूर्वं तु बा°	६११	बुद्ध्यर्थः पा°	६०६
पूर्ववद्वा	६०३	ब्रह्मदृष्टि°	७१८
पूर्वविक°	६६१	ब्राह्मेण जै°	७६२
पृथगुप°	५२९	**भ.**	
पृथिवी°	५१७	भाक्तं वाना°	५७०
प्रकरणाच्च	२४५	भावं जैमि°	७६६
प्रकरणात्	२७९	भावं तु बा°	३२१
प्रकाशव°	५९४	भावशब्दा°	६९४
प्रकाशादिवच्चा°	६०१	भावे चोप°	४४९
प्रकाशादिवत्तु°	५४२	भावे जाग्रद्वत्	७६८
प्रकाशाश्रयव°	६०३	भूतादिपाद°	२२४
प्रकृतिश्च°	३८३	भूतेषु तच्छ्रुतेः	७२९
प्रकृतैता°	५९८	भूमा सम्प्रसा°	२८०
प्रतिज्ञावि°	१७४	भूम्नः क्रतु°	६७०
प्रतिज्ञासि°	३७८	भेदव्यपदेशाच्च	२०८

	पृ.
भेदव्यपदेशाच्चा°	२१६
भेदव्यपदेशात्	२७९
भेदश्रुते°	५५६
भेदादिति°	५९१
भेदान्नेति°	६१५
भोक्त्रापत्ते°	४१६
भोगमात्र°	७७५
भोगेन त्वि°	७२५
म.	
मध्वादिष्व°	३२०
मन्त्रवर्णा°	५४२
मन्त्रादिव°	६७०
महद्दीर्घव°	४७९
महद्वच्च	३४९
मासादि भौ°	५६१
मान्त्रवर्णिक°	२०५
मायामात्र°	५८४
मुक्तः प्रति°	७५९
मुक्तोपसृप्य°	२७८
मुग्धेर्धस°	५८९
मौनवदित°	७१०
य.	
यत्रैकाग्र°	७२०
यथा च त°	५३६
यथा च प्रा°	४५२
यदेव वि°	७२५
यावदधि°	६४१
यावदात्म°	५३०
यावद्विका°	५१५
योगिनः प्र°	७४१
योनिश्च हि°	३९५
योनेः शरी°	५८२

	पृ
र.	
रचनानु°	४६५
रश्म्यनुसा°	७३८
रूपादिम°	४८२
रूपोपन्यासा°	२६६
रेत.सिग्यो°	५८१
ल.	
लिङ्गभूय°	६५९
लिङ्गाच्च	७१४
लोकवत्तु°	४६२
व.	
वदतीति°	३४५
वाक्यान्वया°	३७१
वाङ्मनसि°	७२७
वायुमब्दा°	७४५
विकरण°	४६१
विकल्पोवि°	६७४
विकारश°	२०३
विकाराव°	७७२
विज्ञानादि°	५०४
विद्याकर्म°	५७५
विद्यैव तु°	६६२
विधिर्वा धा°	६९२
विपर्यये°	५१८
विप्रतिषे°	५०६
विभाग. श°	६८६
विरोधः क°	३१५
विवक्षित°	२३८
विशेषं च°	७५६
विशेषणभेदव्य°	२६२
विशेषणाच्च	२४६
विशेषानु°	७०२
विशेषित°	७५०

http://acharya.org

पृ.		पृ.
७००	श्रेष्ठश्च	५५१
५९७	स.	
६३४	स एव तु°	५८७
७४९	सकल्पादेव°	७६५
४९४	सज्ञातश्चे°	६२१
५६३	सज्ञामूर्ति°	५५७
२६६	संध्ये सृष्टिरा°	५८३
४६२	सपत्तेरिति°	२७३
६६७	सपद्यावि°	७५७
४७०	सबन्धादे°	६३०
५२९	संभृतिद्यु°	६३१
६४९	संभोगप्रा°	२४३
५३५	सयमने°	५७४
६२१	सस्कारप°	३२७
श.	सत्त्वाच्चाप°	४५०
५३५	सप्त गते°	५४९
३१५	समन्वार°	६८३
२००	समवाया°	४८१
६९९	समाकर्षात्	३६३
२७०	समाध्यभा°	५३५
३०९	समान एवं°	६२९
५१५	समाननाम°	३१८
६९७	समाना चा°	७३०
२२९	समाहारा°	६७७
१३६	समुदाय°	४८३
६७६	सर्वत्र प्र°	२३४
३२२	सर्वथानु°	४९५
६८०	सर्वथापि°	७०१
३२८	सर्वधर्मो°	४६४
१७७।६११	सर्ववेदा°	६१४
४५८	सर्वान्नानु°	६९८
२५५	सर्वापेक्षा°	६९५
६६४	सर्वाभेदा°	६२२

http://acharya.org

	पृ
सर्वोपेता°	४६०
सहकारि°	७००
सहकार्य°	७०७
सांपराये°	६३८
साक्षाच्चोभ°	३८८
साक्षादप्य°	२७२
सा च प्रशास°	२९२
सामान्यात्तु°	६०६
सामीप्यात्तु°	७५१
सुकृतदु°	५७३
सुखविशिष्टा°	२५०
सुषुप्त्युत्क्रा°	३३६
सूक्ष्मं तु तद°	३४३
सूक्ष्मं प्रमा°	७३२
सूचकश्च°	५८६
सैव हि स°	६५१
सोऽध्यक्षे त°	७२९
स्तुतयेनु°	६८८
स्तुतिमात्र°	६९३
स्थानविशे°	६०७
स्थानादिव्य°	२५०

	पृ.
स्थित्यदनाभ्या°	२८०
स्मरन्ति च	५४३।५७५।७१९
स्मर्यते च	७३५
स्मर्यतेपि च लो°	५७७
स्मर्यमाणम°	२६८
स्मृतेश्च	२४१।३२८।७५२
स्मृत्यनव°	३९७
स्याच्चैकस्य°	५१४
स्वपक्षदो°	४१४।४६०
स्वशब्दोन्मा°	५२७
स्वात्मना चो°	५२७
स्वाध्यायस्य°	६१६
स्वाप्ययस°	७६९
स्वाप्ययात्	१७५
स्वामिनः फ°	७०५
ह.	
हस्तादय°	५५०
हानौ तूपा°	६३५
हृद्यपेक्ष°	३११
हेयत्वाव°	१७४

http://acharya.org

॥ श्री ॥

श्रीभाष्ये प्रसङ्गादुद्धृतानां श्रुतिसूत्रादीनां वर्णानुक्रमेण सूचीपत्रम्।

अंशो नाना ६०४
अकृत्स्नो ९।६१६।६१७
अक्षय्यं ह वै १२४
अक्षरं त ६८।१०१।११८।३४४।३८७ ३९१।३९२
अक्षरात्प २६०।२६१।२६२।२९०।६०८ ६०९
अखिलभुव १
अग्नये पथि १९५
अग्निमग्न ३१५
अग्निर्ज्योति ६४३।७४१।७४२
अग्निर्मूर्धा २६६।२६९
अग्निर्वाग्भू ४०६
अग्निर्वै होत्रं ६४५
अग्निलोकमा ७४९
अग्निहोत्रा ११
अग्नेरापः १७६।५१७
अग्नेरूर्ध्वज्व ४८०
अग्राह्यो न ६५६
अङ्गुष्ठमात्रः ३०९।३१०।३३१।३३२
अङ्गुष्ठमात्रो ३१०
अचेतना परा ५०६
अजरोमृतो ३३७
अजामेकां ११७।३५२।३५४।३५७ ३८७
अजायमानो २१५।२७७।५०६
अजो नित्यः ५२१
अजोपि स २१५।२७८
अजो ह्येको ११७।३५२।३५४।३५७
अज्ञानं चे ८३
अणीयान्व्रीहे २४१
अणोरणीया ३४८।३५३
अण्डजं जीव ५७७
अतः प्रत्यक्ष ५३
अतस्तस्या ९७
अतीतस ६५।७८
अतोन्यदार्तम् ६४६।६४८
अतो यथार्थम् ९७
अतो वै खलु ५७८
अतोस्मि लो ५२।६५
अतोहम ४१
अत्त्यन्नं पश्य ६७०
अत्र ब्रह्म ७३१
अत्रायं पु ४२
अत्रैव सम ७३४
अथ खलु क्रतु २३४।२४२।६२९
अथ खलु प्राण २३०।२३५
अथ तत ऊर्ध्व उ ३२१
अथ तत ऊर्ध्वमु ३२१।३५६
अथ तस्य १४।६४।५८५
अथ नामधेयं ५९९।६०२
अथ परा १३।५८।२६०।२६३।६४३
अथ मर्त्यो ७३०।७३२
अथ मुनिः ७०८

http://acharya.org

अथ य आत्मा ३०२।६०५
अथ य इमे ५६९।५७६
अथ य इह क ५७१
अथ य इहात्मा २९७।३००।६५५
अथ य एत २७४।२९३
अथ य एष सं ३०३।३०७
अथ यत्रान्यत्प २८०
अथ यत्रैतत्सुप्तः ५८६
अथ यत्रैतद ७३८
अथ यत्रैतदाका ३०५
अथ यदतः २२२।२२३।३२३।३५२
अथ यदा सुषु ५८६
अथ यदिद २९६।६५३
अथ यदु चै ७४३
अथ येन्यथा २८८
अथ यो दक्षिणे ७४०
अथ योन्यां १७।७१६
अथ यो वेदे ४२।३०५।५२६
अथ यो हैता ५५१
अथ रथा ९७।५८३।५८४।७६७
अथर्वाङ्गि १८२
अथ वेशा ९७।५८३।५८५।७६७
अथ सोभ १७।६४।५८५।७७३
अथ स्वप्ने पुरु ५८६
अथ ह य ए ५५३।६१८।६१९।६२०
अथ ह शौन ३२६।३२७
अथ हास्य वेद ३२८
अथ हेममास ६१८।६१९।६२०।६२१
अथ हेमा देव ६२३
अथ हैनं गा २५१
अथ हैनं वा ६२३
अथाकामय ७३३।७३४
अथात आत्मा २८९
अथात आदे ५९८।६०२
अथातो धर्म २
अथातोह २८९
अथानन्दा ९७।५८३
अथास्मिन्प्राण १७६।३६६।३६९।३७०
अथैतरे दु ख ६०९
अथैतमेवाध्वा ५७८।७४०
अथैतयो पथो ५७७
अथैतैरेव रश्मि ७३८।७४३
अदितिः पाशा ७५३
अदृश्यत्वादि २७९।३०९
अदृष्टो द्र २५९।२६०।३०२
अद्भिः परिद ६२९
अद्भ्यः पृथि १७६।५१७
अद्भ्य. संभू ६०८
अधस्तात्समिधं ६९२
अधिकं तु ७८।४४३।४४५।५३९।६८१
७१५।७६२
अधिकोपदे ७१५।७६२
अधिष्ठानं तथा ३४१।५३४
अधीता भग ५०७
अधीहि भग १३२
अध्यात्मयोगा २४६।३४७
अनन्तश्चात्मा ३५०
अनश्नन्नन्यो ४०९
अनात्मन्यात्म ५३
अनादिनिध ३१६
अनादिमाय १६।१०२
अनाद्यनन्तं ३४५
अनावृत्ति. श २
अनाशी पर १०९
अनाश्रमी न ७०३
अनीशया ४०८
अनीशश्चात्मा ३५०।४०३।४०८
अनुपपत्तेस्तु ६८१

http://acharya.org

अनु म एतां ९।३२५।७१४
अनुविद्य ८
अनृतेन हि १६।८३।१०१।३००
अनेन जीवे १०३।११२।११९।१७७
१८०।१८६।१९७।२२९।३१२।३३४
३६४।३८०।४२३।४२४।४३९।४४२
५५७।५५९।५६०।५६२।५९२।६०३
७३०
अन्तः प्रविष्टः ७८।११२।११८।१७७
१९८।२२९।२५८।३६४।३८०।५३६
७६१
अन्त· शरीरे २५८
अन्तर्बहि १७८।६१०।६६१
अन्तवदे ४१५।२९३
अन्धो भवि ६७२
अन्नं ब्रह्मेति २०९
अन्नमय हि ५६१।५६२।७२८
अन्नमशितं ५६०।५६१।५६२।५६३
अन्नात्प्राणो २६३
अन्नाद्धै प्र १८३।१८५
अन्यत्र ध १५३।३४७
अन्यत्र भूता १५३।३४७
अन्यदेव १५४
अन्यन्नवतरं ७३३
अन्यूनश्चा ५९५
अन्योन्तर आत्मान १८०।१८१।१८२
१८४।२०८।३६३।३९२।६२७
अन्योन्तर आत्मा प्रा ६२७
अन्योन्तर आत्मा म ६२७
अन्योन्तर आत्मा वि ४२।१८५
अप एव ३१९।३९५।३९८।४४७
अपः प्रण ५६८
अपक्षयवि ६७
अप पुनर्मृत्युं ७३३।७३५
अपरा ऋग्वे २६३
अपरेय ११७।३४४
अपसर्पेद ४०
अपहतपाप्मा १११।१२१।२०८।२१४
३८९।४०८।४०९।४५४।४६१ ५९०
६५९।६८४
अपहते पाप २५२
अपाणिपादो २५८।४०९।४१० ४६१
अपाहर त्वं ३२५
अपि तु वाक्य ६३८
अपीतौ त ४५६
अप्रतर्क्य ३८७
अप्राणो ह्य १५२।२३४।२३६।२,६
४०९
अभ्रं भूत्वा ५७८
अभयं तिती २४७
अभयं वै ब्रह्म ६५३
अभिमानिव्य ५५५
अभिसमावृत्य ७०९
अभेदव्यापि १५
अभ्युपगमे ४१५
अमुष्मादादि ७३९
अमूलमना २५८
अमृतत्वस्य ३७२।३७३।३७६
अमृतस्य पर ६०६
अमृतस्यैष २७७।६०६ ६०७
अमृतो हिर २३५
अमौनं च ७०८
अयं लोको नास्ति ५७४
अयं वाव लोक ६६६।६६९
अयं सोमि ३१७
अयमग्निर्वैश्वा २६६
अयमात्मा ब्र ६।१५५।१६१।१६७।४५२
५४०।५४३।७६१

http://acharya.org

अरण्यमिया ७०४
अरा इव २७६
अरुणयैक १९३
अरुन्मुखा २३०
अर्थस्वरूपं १४
अर्चनीयश्च ५०९
अर्चिषमेवाग्नि ७४३
अर्चिषोहः ७४३।७४५।७४७
अर्थार्थी राज १४७
अर्थेभ्यश्च परं ३४२
अर्थैकत्वे १९३।१९४
अर्वाग्बिल ३५२
अवकीर्णिपशु ७०४
अवस्थिते ४५४।६८१।७६१
अवान्तरतपा ५१०
अविज्ञातं १४।६२
अविद्यया मृ १२
अविद्या कर्म ६८।७८।८२
अविद्यान्तर्ग ७१
अविद्यायोग ५३
अव्यक्तं पुरु ३८७।३९९
अव्यक्तम१०१।११८।२९१।३४४।३८७ ३९१।३९२
अव्यक्तादिविशे ३९४
अव्यथितो न ६५६
अशब्दमस्प २३९।३४५।३४८
अशरीरं वा १५२।१८१।२११।३०४ ४१७।६३९।७६६
अशरीरं श १५२।४१०।४१४
अशीर्यो न हि ६५६
अश्व इव ३३३।६३५।६३८।७३२।७५४
अश्वपतिः के ६८२
अश्वपतिर्वै २६७
अष्टवर्षं ३
अष्टौ ग्रहाः ५५०
असंततेश्वा ५४२
असङ्गो न हि ६५६
असङ्गो ह्य १५२
असत्यमप्र ५३८
असदिति ४१९।४५६
असदेवेद ३६२।३६४।४५०।४५१
असद्वा इद ३६१।३६३।४५०।५४७ ५४८।६६२
असन्नेव ६२।१८२।१८३
असौ वा आदि ३२०।३२१।३५६
असौ वै लोको २६९
अस्ति ब्रह्मे ६२।१८२
अस्ति भगवो वाचो २८१
अस्ति भगवो नाम्नो २८१
अस्ति हि मघवा ३२२
अस्थूलमन १९।२१२।२९०।६४३
अस्माच्छरी ३८०।७५५।७६६
अस्मान्मायी १०२।११६।३५०।३५४ ३५५।३८३।३८८।३९४।४५४
अस्मिन्कामाः २९९
अस्य लोकस्य २१७
अस्य सोम्य पुरु ७२७
अहं कक्षीवा २३०
अहङ्कार इ ११७।३४४
अहंकारवि ५३३
अहं कृत्स्न ५३।६५।३४४।३९९
अहं तु ते २५३
अहं बीज ५३
अहंबुद्ध्या ४०
अहं वै त्व १७।६५१।७१५।७१६
अहं वैश्वा २२३।२७१
अहंश्रेयसे ६२३
अहं सर्वं ६३।३९९।५३८

http://acharya.org

अहं हि सर्वं ४०१।६१३
अहमर्थवि ४०
अहमर्थो ४०
अहमात्मा १५।५२।८२
अहमेव च स ५२
अहमेवाध २८३।२८९
अहमेवेदं २८३
अहरहर्ग ३०१
अहिकुण्डलन्यायः ६०२
आकाश एव तदोतं २९१
आकाशं प्र २१७।३०३
आकाशः परा २१७
आकाशमिन्द्रि ३९२
आकाशमेकं ५९६।५९७
आकाशाद्वायुः १७६
आकाशाद्वायुम् ५७८
आकाशो ह वै २१९।३३३।३३४।५९३
आकाशो ह्ये २१७
आख्यानानि शं ६९४
आगमोत्थं २६३
आचारहीनं ५७३
आचार्यकुला ६८३
आचार्यस्तु २५१।२५२।२५३
आचार्याद्धैव २५३
आजहारेमाः ३२३।३२५
आत्मत आका २८९
आत्मतः प्राणः २८५।२८९
आत्मन आका २१८।२२०
आत्मनस्तु कामा ३७२।३७५।३७६ ३७७
आत्मनि खल्वरे ३८१।४४३
आत्मनो ब्र १५।८१
आत्मनो वा अरे ३७४
आत्मप्रमाणां ५१२
आत्मभावं ७९
आत्मान र २४७।३३९।३४१।३४८ ३५७।६२६
आत्मानमेव ८।१५१।१६८
आत्मानमेवेमं २६६।२६९।६७०।६७२
आत्मा नारा १२३
आत्मा वा अरे ८।९।१२८।१५१।३७२ ३७३।३७५।३७७।३८१।६९४।७१४
आत्मा वा इद २०।१४७।१७६।२१४ २१६।२१८।२२०।३७८।४०८।४४६ ४५८।५४८।६२७।७७१
आत्मेति तू १८।११६।६५१।६६७
आत्मेत्येव तु १८।११६
आत्मेत्येवो ९।१७।१५१।३६४।७१६
आत्मेन्द्रिय १५३
आत्मैक एव ४५८
आत्मैवेदं २८१।२८९।४४३।६०३।६१०
आदित्यवर्णं २२५
आदित्यश्चक्षु ४०६
आदिसर्गमहं ३१९
आदौ वेदम ३१६
आनन्दं ब्र ६१।६३।२०७।२०९।५३० ५९५।६८४
आनन्दमय २१०
आनन्दमयो २८८
आनन्दादयः ८०
आनन्दाद्ध्येव २३७
आनन्दोजरो २२७।२२८
आनन्दो ब्र १४।६३।१४७।२१०।२३१ २३७।३८९।५३०।६२६
आनीदवातं ५५१।५५२
आपः पीताः ५६१।५५३
आपः पुरुष ५६६
आपस्तेजसि ३९२

http://acharya.org

आपोमयः प्रा ७२८
आपो वा अका ४०६
आपो वास· ६२८।६२९
आ प्रायणा ११
आ ब्रह्मभुव ७५१।७७६
आब्रह्मस्त ७१
आभास एव ५४६
आभिर्मुद्रित ५०१
आरण्यकं च ५०९
आरम्भण ११
आराग्रमात्रो ५२८
आरूढो नैष्ठि ७०४
आर्षं धर्मो ४१५
आविः संनि २६५
आविष्य मति ५०८
आविर्भावति ६९
आवृत्तिरस ९।६९६
आसीदिदं ३१९।३८७।३९८
आस्थितः स हि ७७६
आहारशुद्धौ ११।६९९।७११
इच्छागृही ६६
इतरपरामर्शा ६८१
इतरव्यप ४१४
इतरस्याप्येव ७२४
इति तत्प्रा ४०
इति तु काम ७३३
इति तु पञ्च ५६६।५६८
इति मत्वा भ ५३८
इति यस्य स्या २४३
इतिहासपुरा ७२
इतीरित १५
इदं ज्ञान ७९।३०९।७६१
इदं पुच्छं १८२
इदं ब्रह्मेदं ३७४
इदं महोप ५०९
इदं वाग्रे ४५०।४५१।४५८
इदं शतस ५०८
इदं श्रेय ५०९
इदं सर्वं १४।१६७।३७३।३७४।४४३
इदं सर्वम ११९।१९७।२०९।३६३ ३९२
इन्द्र आगच्छ ३१५
इन्द्रः शची २२४
इन्द्राय राज्ञे ६५९
इन्द्रियाणि त ३९२
इन्द्रियाणि द ५५१।५५६
इन्द्रियाणि हया ३३९
इन्द्रियेभ्यः परा ३३८।३४०।३४१।३४२
इन्द्रो माया १६।१०२।४२३
इन्द्रो ह वै ३१३।६३४
इमाँल्लोका ७९।७७२
इमास्तिस्रो ३५६
इयमेव जुहू· ६९३
इयाज सो १२।६८२
इष्टापूर्त ३७२।६१२
ईक्षतेर्ना १७८।४६५
ईशानो भूत ३०९।३१०
ईशावास्यमिदं ६८८
ईश्वरः सर्व ८२।२४१।३४१।५३७
उक्तानुशास ३८२
उक्थमुक्थ ६६९
उच्छिष्टं मे पीतं ६९८
उत तमादेश ३८५।६४८
उत्तमः पुरु ६५।८२।१२४।५९५
उत्तराम्बेदा ७६०
उत्तरेषां चैत ७०५
उत्पन्नः स ३१९
उदाराः सर्वे ७७६

http://acharya.org

उदेति ह वै २१०
उद्गीथमुपा ६६९।६७६।६७८।६८६
उद्गीथेनात्य ६२१
उद्दालको वै ६७२
उद्दालको ह २६७
उप त्वा नेष्ये ३२७
उपरि हि देवे ६९२
उपलब्धिव ५४६
उप वयं तं २५२
उपविश्यास ७२०
उपसंपद्या ७५८
उपसंहार ४७०
उपासनं स्या ९
उपासीत ६९४
उभयेपि हि ७८
उभावग्निश्च २९९
उभे अस्मि २९९
उभौ तौ न वि ५३३
उर एव वेदि २७५
ऊर्ध्वमेकः स्थि ७३५
ऊर्ध्वरेतःसु ६९५
ऋग्यजु सा ५०९
ऋग्वेदं भग ५०७
ऋतं पिब ७७।१०१।२४५।२४८।३४८
ऋतं वदि ६३५
ऋतमवादि ६३५
ऋत्विग्भ्यो दक्षि ७०६
ऋत्विज उप ६३७
ऋत्विजो वृणी ७०६
ऋषयः काव ६८५
ऋषयो वाव ५४७
ऋषिं प्रसूतं ३९८।४०१
एक एव हि ५९६
एकं वा संयोग ६१४
एकं सदै १६
एकदेशस्थित ६८।५४४
एकधा बहुधा ५९६
एकधैवानु ६५४।६५५
एकमेवा ६।१३।२०।५९।११९।१३४ १४६।१५१।१७०।१८९।३१२।५१५ ७७१
एकया यात्य ७४१
एकस्तु पिब ३४९
एकस्वरूपं ६७
एकस्वरूपभे ८१
एकादशं मन ५५१
एकान्तिनः सदा ६९१
एको देवः १५३।४२३
एको देवो ब ४२३
एको ह वै १४७।२१४।४४६।४५७।५०२ ७७१
एत एव लोका ७४९
एतं त्वेव ते भूयो ७५९
एतं देवयानं ६३९
एतं ब्रह्मलोकं १०१
एत संयद्वाम २५०
एतं सेतुं ६०५।६०६
एतं हि सर्वा २५०
एतच्छ्रेयो २६५
एतत्तु य १७।१०७
एतत्सत्यं ब्रह्म २९९।६५६
एतदमृत २५१।२८८।२९५।३०३
एतद्ब्रह्म २३५
एतद्योनीनि ३४४
एतद्यो वे ४१
एतद्विद्या २४८।३४७
एतद्वै तदक्ष ६४३
एतद्वै सत्यका २९६

एतमानन्द ७९।२०९
एतमितः प्रेत्या २४०।२४३
एतमेव तद ६२८।६२९
एतमेव प्रव्रा ३३७।६८९।६९५
एतमेव लोक ५०२
एतमेव विदि ३३७
एतस्माज्जाय ५०४।५१३।५१७।५१८ ५१९।५४८।५५१।५५२।५५६
एतस्माज्जीव २९४।२९५
एतस्मादात्मनः प्रा ३७०
एतस्मिन्नु खल्व २९२
एतस्य वा अक्ष २९२।२९३।३०२।३३२ ३८५।५५५।६४३।६८५।७७३
एतस्यैवाक्षर ६२०
एता ह वै देवं ६२३
एतेन परं १५८
एतेन वै चैत्र ३२७
एतेभ्यो भूते ५३१।७७०
एतेषां पुरु ३६५
एवं त्वयि नान्य ६८८
एवप्रकार ६७
एवंभूतस्य ३१९
एवं वा अरे ४२
एवंविदि पाप ७२१
एवंविदे चि ६६४
एवंविद्ध वै ६७८
एवं सर्वस्य ९७
एवं ह्यस्य सर्वे ७२१
एवं हैतमा ६४६
एवमेक सां ५११
एवमेवंविदि ७४३
एवमेव खलु ३०१
एवमेवास्य ४२।५२६
एवमेवेम ७२९
एवमेवेमाः ३००
एवमेवैता भूत ४०३
एवमेवैष ए ५३४।५५५
एवमेवैष प्र ३६६
एवमेवैष सं ३०४।७५७।७५९
एवमेष म ६६
एष आत्मा ६१।१६५।१७७।२१२।२९७ २९८।२९९।६५४
एष आत्मेति २५०
एष उ एव २५०
एष एव २०२।२२८
एष एवासा १२।२२८।५३७
एष त आत्मा २५६।२५९।६४६।६४९
एष तु वा २८२।२८४।२८५।६७१।६७३
एष देवप २५५।७४३।७५१
एष ब्रह्मलोक ३०१
एष म आत्मा २३५।२४०।२४१।२४२ २४३
एष लोकाधि २२८
एष वः पन्थाः २६४
एष वः पुण्यः २६४
एष वै सुतेजा ६७१
एष सप्र २८३।३७९।६३९।७५३
एष सर्वं ११२।११८।१२३।१७२।१७८ १९८।२०१।२१२।२१६।२२९।२५८ ३४४।३८०।३९१।४१२।४५४
एष सर्वेश्वर ३०२।३३७।६५५।६८५ ७७४
एष सर्वेषु ३४२।३४६।४२३
एष सोमो ५६९
एष हि द्र ४२।५२६
एष हि सर्वा २५०
एष हि सर्वे २५०
एष ह्येव साधु ५३७

http://acharya.org

एष ह्येवा २०५।३७७।३९२।५८५।६११
७७४
एषां लोकाना ६०६
एषा सोम्य ते २५१
एषोणिमा ६४९
एषोणुरात्मा ५२७
ऐतदात्म्य ११२।११३।११९।१२३
१७३।१७७।१८९।१९८।२२९।३८६
४२३।४३९।४४३।५१५।५२१।६४९
६५१।६८१।७१६।७६१
ऐश्वर्यस्य ६६
ओतं मन २७६
ओमित्याश्रा ६७७
ओमित्येतद ६२०।६५७।६६९।६७५
ओमित्येवा ८
ओषधीर्लोमा ५६७
औदुम्बरीं ३९७
औदुम्बर्यः कु ६३७
औपमन्यव २६९
क इत्था वेद २४५।३४८
कं च तु खं २५४
कं ब्रह्म २५०।२५१।२५३।२५५
कं वर एन ३२४
कण्ठिका रुच ५०१
कतम आत्मा ४२।३३६।५२६।५२८
कतमं वाव २९४
कतमा सा २२१
कथं नु भग ४३९
कथं सर्गो ७४।४५९
कदाचिच्चक्षु ९७
कपालं भस्म ५०१
करणानामभू ४७
कर्तव्यत्वेन ५०५
कर्तारमीशं ३९५
कर्तृकर्म २
कर्मणैव हि ६८२।६८८
कर्माध्यक्षः १५३
कल्पक्षये ११७।३५१
कल्पे कल्पे ३१९
कविर्मनीषी १५३
कस्मिन्नु खल्वा २९०।२९१
कस्मिन्नुत्क्रान्त ७२९
कस्मिन्नु भग २६२
कस्मिन्वा प्रति ७२९
कस्य वा इ देवा ३१५
कापालं व्रत ५०१
कामं कामं ५८४
काम सकल्पो ५५४
कामो म उद ६९८
कारणं गुण ३५१।५३४
कारणकार्य ४६७
कारणमस्त्य ४६७
कार्यकारण ३५१।५३३
किंकारण ब्र ३५४
किं तदत्र ६१६
किं प्रजया ६८८
किं मे वास: ६२८।६२९
कि स्विद्वनं ३८८।४५९
किमेतान्येक ५१०
कुत: सृष्ट ३९९
कुतस्तु खलु ४५१
कुर्यादन्यत्र ७०२
कुर्वन्नेवेह ६८३।६८७।६८८
कुशा वानस्प ६३७
कृतिस्त्वेव २८६
कृत्यल्युटो १८५।४४०
कृयोगा ष २
कैवल्यं मा ४७६

को न आत्मा २६७।२६८
कोपाय च यतः ५९२
को वै न. श्रेष्ठः ६२३
को ह्येवान्या २०५।३०३।६४८
क्रमागतैः ७०५
क्रियागुणै १६२
क्रियावाने ११
क्रीडतो बाल ३९४
क्रीडा ह्यरे ३९४
क्रमतन्द्रा ५९५
क्लैष एतद्वा ३६९।३७०
क्लैष तदाभू ३७१
क्षरं प्रधान ११६।१२२।३५०
क्षरः सर्वाणि ८२।२९१
क्षराक्षर ६८
क्षिपाम्यजस्र ४७२।५३९
क्षीयन्ते चा ९।१७।६८९।७२१
क्षेत्रज्ञं चा १५।८२
क्षेत्रज्ञः कर ८०
ख वायुः ५१३।५१७।५५२
गायत्री वा इ २२३
गुणकर्तृत्वे ४७७
गुणमुख्यव्य ६४५
गुणवत्यगुण ४७७
गुहां प्रविश्य २४६
गृहस्थो ब्रह्म ५०८
गृहीत्वैता ५६७
गोदोहनेन ६७६।६७७
गोबलीवर्दन्यायः ५७३
गौरनाद्यन्त ३४९।३८३।३८६।३८७
घ्नन्ति त्वेवैनं ३०८
चक्षुश्च द्र २५८
चक्षुषो वा मू ७३१
चतुर्थो वर्णो ३२७
चतुर्विंशतिसं ३४९
चतुर्विधा भ ७११
चतुर्विधो ८१
चतुष्पाद्ब्रह्म ६०५।६०६
चत्वार पञ्चद १९९
चन्द्रमसो विद्यु २५५
चेष्टा तस्या ६७
छन्दांसि यज्ञाः ३५०
छायातपौ ७७।२४५
छेत्तुश्छेद्य ४१
जक्षत्क्रीड ७६३
जगच्च सः ७२।७३
जगतामुप ६७।२१५
जगत्सर्वं श ४१२
जगद्व्यापारव ७९।१६२।१६३।१८६ २३८।३०७
जनकस्य कुले ५८४
जन्माद्यस्य १३५।३६२।५०३
जप्येनापि च ७०२
जयतीमॉल्लो ६५२
जलाधारे ५९७
जहात्येनां ३५७
जात्याश्रय ११
जानात्येवा ४२।५२६।५२९
जायस्व म्रियस्व ५७७
जीवभूतां ११७।३४४
जुष्टं यदा ११७।२७९
ज्ञाज्ञौ द्वाव ६१।११६।१६२।३५०।४५३ ५२१।५३९।५४५
ज्ञातु द्रष्टुं ११।६०१
ज्ञात्वा देवं ७१४
ज्ञान ब्रह्मेति चे ८३
ज्ञानं ब्रह्मेति वि ८३
ज्ञानं विशु १६।१०३।१०७

http://acharya.org

ज्ञानप्रसादेन ६३१
ज्ञानमात्मनि ३४२
ज्ञानयोगेन ५०९
ज्ञानरूपं परं ८३
ज्ञानवैरा ६६
ज्ञानशक्ति ६६
ज्ञानस्वरूपम् ७१।७३।५२५
ज्ञानस्वरूपमखि १४
ज्ञानस्वरूपमत्य १४।५३०
ज्ञानस्वरूपो १६।१०३।१०५
ज्ञानात्मकं १५
ज्ञानान्येतानि ५१०
ज्ञोत एव ४३।४५
ज्ञोत एवेत्य ४१
ज्यायान्पृथि २४२।२४३।२९७।६३२
ज्योग्जीवति २५२
ज्योतिश्चरणा ३०९
ज्योतिष्टोमे १९
ज्योतींषि वि १०३।१०४।१०५।१०९
त इह व्याघ्रो १७६।५८८
त इह व्रीहि ५७९
त एतस्यैव ५५७
त एते सर्व ५५१
तं दुर्दर्शं २४६।२४९।३४७
तं देवा ज्यो ३२०।३२१।३३३।३५३
३६०
तं देवा भक्ष ५६९
तं पृथिव्य ४०६।७४९
तं प्रति ब्रू ७३२
तं मा भग १५४
तं यथायथो ६६७।६६८।७५५
तं यष्टिना ३६६
तं वा एतं देवा ३०६
तं विद्याकर्मणी ६८३।६८६
तं विद्याच्छु ३१०
तं षड्विंशक ३५०।३५९
तं स्वाच्छरीरा ३१०
तं ह्योपनिन्ये ३२७
तच्चक्रवदु ५७२
तच्छायैर्वि १५८
तच्छ्रेयोरूप ४४६।७७१
तज्जलान् २३६।२३७
ततः परिवृत्तौ ५७२
ततः सर्वासु ६७
ततः स्वयं ३९८।४४६
ततस्तु तं पश्य ७१४
ततो यदुत्तर ६०६।६०७।६०८।६०९
ततो हि शै १६
तत्केन क १६२
तत्क्रतुन्यायः ७५५
तत्तदेवा ८२
तत्तु नाशि १०९
तत्तु सम ४९८
तत्तेज ऐ १७२।१७३।५१८।५५९
तत्तेजोसृ ६०।११९।१३४।१४६।१७०
१८६।१८९।२१६।३१२।३६३।४३९
५१३।५१४।५१५।५१८।६८४।७७१
तत्त्वमसि ६।७।१७।१०३।११०।११२
११३।११९।१५५।१५६।१६१।१७३
१७४।१८०।१८६।१८७।१८९।१९६
२००।३२९।४३५।४३९।४४३।४५२
५४०।५४३।६५१।६६१।६८१।७६१
तत्पुरुषोमान ७४३।७४७।७४९।७५१
७५२
तत्प्रकृत ७३।२०२
तत्प्राप्तिहेतु २६३
तत्त्याज भे ७७
तत्र चान्द्रम ७४१

http://acharya.org

तत्र पूज्य ६७
तत्र प्रयाता ६४३।७४१
तत्र सुप्तस्य ३१९
तत्रापि दहरं १२८।६१७।६६०
तत्रैकाग्रं मनः ७२०
तत्रैवं सति ५३४
तत्सत्यं ११९।१५१।६४९।६५१
तत्सप्तधातु ५३१
तत्सर्वं ब्रै १०४।४१२
तत्सुकृत ६३६।६३८।६३९।७२३
तत्सृष्ट्वा ११२।११९।१९७।२३१।२५८
३६३।३६४।३९२।४४२।५५६
तथाक्षरात्सं २६१
तथाक्षराद्वि ३७८
तथात्मैको ५९६
तथा पुरुष ६७
तथा विद्वा ७९।२७८।३७९।६३६।६८०
तथा ह्येयगुण ७६०
तथैतः प्रेत्य ७१५
तथेति तेभ्य ६१९।६२१
तदण्डमभ ३१९
तदनन्यत्व १८९।४८७।५३९।६०३
तदनुप्र ११२।११९।१९७।२३१।२५८
३६३।३९२।३९३।४४२।५५६
तदन्तरप्र ४११
तदपोस्य ५१७।५५९
तदप्येष ३६३
तदसदेव ४५१
तदस्मै देवा ३१४
तदस्यामृत ३०४
तदात्मन्येव २६७
तदात्मानं ३८९।३९५।५०२
तदा विद्वा ८०।२७८।३०८।६७५।७६१
तदा हि संक १६
तदाहुः किं ५४७
तदाहुः के ५४७
तदिदमेवोक्थ ६६९
तदेकं सन्न ४४६।७७१
तदेतत्सत्य २६४।२६५
तदेतदक्षय ६९
तदेतदृचा २२३
तदेनं वाक्स ३६६
तदेव कोपाय ३७७।५९२
तदेव प्रीतये ३७७।५९२
तदेव ब्रह्म १५४।१५९
तदेव वीर्य ६८६।७०६।७१२।७२५
तदेव शुक्रं ९८।५८४।७६८
तदेव सद ९६
तदेव सर्वं ६७
तदेवाग्नि ६१२
तदेवानु ११२।११९।१९७।२३१।२५८
३६३।३६४।३९२।३९३।४४२।५५६
तदेवार्थस्व १४
तदेषाभ्यु २०५
तदैक्षत ६०।६१।११०।११९।१२१
१३४।१४६।१७०।१७१।१७३।१८०
१८६।१८७।१८९।२२०।३१२।३६३
३८८।४३९।४४२।४४६।५०२।५१३
६८४।७७१
तदैतेषां प्राणा ३७१
तदैषोह १५
तद्ध देवा उद्गी ६१८।६१९।६२१
तद्धैद त ११९।३६२।३६४।४५१।४६४
५२३।५४९
तद्धैतत्प ५२।२३०।६०१
तद्धोभये ३१३
तद्ध्यानं प्र ७१५
तद्ब्रह्म ७२।१३३।२१७।२३७।७७१

http://acharya.org

तद्ब्रह्म तद ३३४
तद्ब्रह्म पर ६७
तद्भावभाव ८१
तद्य इत्थं विदुः ५७६।६४२।७५५
तद्य इह रम ५७१
तद्य इहात्मान ६५५।६५६।६५८
तद्यत्प्रथम ३२०
तद्यत्सत्य ६३०।६५२
तद्यथा पुष्कर ७२१
तद्यथा महापथ ७३९
तद्यथा रथस्या २२७।२२८
तद्यथा श्रेष्ठी ३६६
तद्यथा हिरण्य ३००
तद्यथेषीक २६८।२७४।७२१
तद्यथेह ४।५
तद्यद्भक्तं २७०
तद्योऽहं सो १७।६५१
तद्रूपप्रत्यये ७१५
तद्वा एतदक्षरं २९२
तद्भाव वि १२८
तद्विजिज्ञा ७१।१३२।२३७।७७१
तद्विज्ञाना ४
तद्विद्वांसः ६२८
तद्विश्वरूप ६७।७०।२१५
तद्विष्णोः परमं २९६
तन्नामरूपा ११९।१२१।३६२।३६४
४५१।४६४।५२३।५४९
तन्निर्धारणा ६७६
तन्मात्राणि भू ३९२।३४४
तन्मे व्याच ६४६
तपःश्रद्धे २६५
तपसा ची २६३।५१५
तपसा ब्रह्म ७०२
तम आसीं १६।३८७
तम एकी ५१९
तम· परे १०१।३४४।३८७।३९२
तमभ्याप ३
तमन्तर्यामि २५७
तमसस्तन्म ३८७
तमीश्वरा ६१।११९।२१४।४४६।४४८
५९४
तमुत्क्रामन्तं ५५४।५६७।७२९।७३३
तमेतं वे ११।२६३।३३७।५०२।६९६
७००।७०७।७२४।७५३
तमेवं विदि ४
तमेवं विद्वा ४।१०।११०।२७७।३७४
५०२।६८०
तमेव भान्त ३०९।३३३
तमेव मन्थ ३५८।३५९
तमेव विदि ६।१०।१७।१५४।१६२
३७४।६०८।७१३
तमेव शर २४१।३४१
तमेवैकं २७६
तमोंकारे २९५
तया तिरो ६८
तयोः सैव ६८
तयोरन्यः ७७।११७।१५३।१६२।२४३
२८०।४०८।४५३।५४५।५९२
तयो·र्वैमाय ७३१।७३७।७५१
तरति शोक २८१।२८३।२८५
तल्लब्धिर्वि ११
तवैष महिमा ७५
तस्माच्च विप ४७६
तस्माच्चैत्ररश्मो ३२७
तस्माच्छूद्रस ३२८
तस्माच्छूद्रो बहु ३२८
तस्माच्छूद्रो य ३२२
तस्मात्कायाः ४००

http://acharya.org

तस्मात्तत्संयो ४७७
तस्मात्तद ७१
तस्मात्तेषां ३०६
तस्मात्सर्वेषु ७४२
तस्मादवाप्यते ५०५
तस्मादव्यक्त ३८७।३९९
तस्मादुपशान्त ७२८
तस्मादेत एते ५५७
तस्मादेतद्ब्र २६१।३३४।५१५।५१८
तस्मादेनं १७५
तस्मादेवंविद ६२८
तस्मादेवंविच्छा ६९७
तस्माद्दुःखा ३७७।५९२
तस्माद्ब्रह्मणो ७४०
तस्माद्ब्राह्मणः पा ६४९।७०७।७१०
तस्माद्ब्राह्मणः सु ७००
तस्माद्वा एतदशि ६२८।६२९
तस्माद्वा एतस्मादात्मन आ १४७।१७६ २०१।२०६।२०८।२१७।३६३।५१३ ५१४।५१८।६०७।६२८
तस्माद्वा एतस्मादात्मनः १८२
तस्माद्वा एतस्मादात्मनः प्रा १७६
तस्माद्वा एतस्माद्वि १८०।१८४।२०८ ३६३।३९२
तस्माद्वा एतस्मान्म ४२
तस्माद्विद्वा २९६
तस्मान्न ब ४७६
तस्मान्न वि १६।१०३।१०६
तस्माल्लोका ५२७।५७१।७३३
तस्मिंश्चान्यो १०२।३९४
तस्मिन्जज्ञे ३१९
तस्मिन्कामाः १७७
तस्मिन्नण्डे ५५९
तस्मिन्नयं ३३५
तस्मिन्नेतस्मि ५६५।५६८
तस्मिन्पद्मे ३१९
तस्मिन्यदन्तरिति ३००
तस्मिन्यदन्तस्तद ६२।२९६।२९७।२९८ ६१६।६५३।६५४
तस्मिन्यदन्तस्तदु ६६०।६६१
तस्मिन्यावत्सं ५६९
तस्मिँल्लोकाः ९८।५८४।५८५।७६८ ७७३
तस्मै मृदित १५४
तस्मै स विद्वा ४
तस्मै स हो २६२
तस्य तस्या ६१२
तस्य ताव १५८।१७३।१७४।२२६ ६३९।७२४।७२५।७२६।७३२।७३४ ७४०
तस्य धीराः २७७
तस्य ध्यानान्त ७७१
तस्य नाम ११०
तस्य पुत्रा दाय ६३६।६३८।७२५
तस्य प्राण एव ६२७
तस्य प्रियमेव ६२५
तस्य प्रिया ६३६
तस्य भासा ३०९।३३३
तस्य यः स्थवि ५६०
तस्य यथा कप्या २१०
तस्यर्क्च साम २१०
तस्य सर्वेषु २८८।५८८।६४०।६५७ ६७१।७७२
तस्य सूज्यस्य ५४४
तस्य ह वा १२२।१७६।२७४।२८९ ३७३।३७४।५९८
तस्या आहुतेः ५६५।५६८।५६९
तस्याः शिखा २७७।६६१

http://acharya.org

तस्यात्मपर १५।७५।७६
तस्यान्ते सुषि ६५४
तस्याभिध्याना ३५०
तस्यावयव ३५०
तस्येदमेव १८१।६२६
तस्यैतस्य तदे २१०।६३१
तस्यैवं विदुषो ६३२।६३३
तस्यैवात्मा पद ७२१
तस्यैष एव शा १८०।२०१
तस्यैष घोषो २६६
तस्योपनिषदहः ६३०
तस्योपनिषदहम् ६३०
ता अन्नमस्र ५१७।५५९।७२८
ता आप ऐ १७२।१७३।५१८।५५९
ता आसु नाडीषु ७३९
तां चेदविद्वा २२१
तां मनसा ६३८
तानहं द्विष ४७२।५३९
तानि लयोपा ५७२
तानि त्रेतायां २६४
तानि सर्वा १०४।४१२
तानि सेवित ५७२
तान्याचरत २६४
तान्हैतानेव ६६४
ताभिः प्रत्यव ५८६
तावानस्य २२४।२२५
तासां त्रिवृ ९६।३५६।४४२।५५९।५६०
५६१।५६२।५६६।७३०
तासु तदा भ ३६६
तेजः परस्यां ६५१।७२७।७३६।७६९
तेजस्वि नाव ६३५
तेजोतस्व ५१६
तेजोबलै ६६।५९०
तेजो वायौ ३९२
तेजोशितं त्रे ५६१।५६३
ते तरन्त्यखि ४०१
ते देवाः प्राणे ४०६
ते धूममभि ५७६
ते ध्यानयोगा ३५४
तेन प्रद्योते ५२६।७३१।७३३
तेन माया १०२
तेन स ऊर्ध्वं ७४४।७४५।७४६
तेन संपन्नो २९७
तेनेदं पूर्ण ६०९।६१०
तेनेन्द्रो व ३१३
तेनेयं त्रयी ६७७
तेनोभौ कुरु ६५७।६७६
तेपि मामेव ४०१
ते ब्रह्मलोके ७५२
तेभ्य एष प्राण ६१९
ते मनसैवा ६६३
तेमुष्मिन्नादि ७३९
ते यदन्तरा ३३३।३३५।५९३
ते ये शतं ६१
तेर्चिषमभि ५७६।७४२।७४३।७५५
तेर्चिषमेवा २५५
ते वा एते प २२४
तेषां खल्वेषां ५७७
तेषा तत्पर ६९१
तेषां सत १०।४७३।५३८
तेषां सत्या १६
तेषां सर्वेषु २९९।३००।६५५।६५६
तेषामहं ५३
तेषामेकैक ६६२।६६५
तेषामेवानु ४७३।५३८
तेषामेवैतां ६१४।६१६
तेषामेष सत्यं ५९९।६००
ते ह देवा ऊ ६१७।६१९

http://acharya.org

ते हेमे प्राणा ४०६
ते हैते विद्या ६६३।६६४
ते होचु· ३१३
तैजसानीन्द्रि ५५१
तौ ह द्वात्रिं ३१३
तौ ह प्रजापतिं ३१३
तौ ह सुतं ३६६।३७०
तौ हासंविदा ३१३
त्रयाणामेव ६६७
त्रयो धर्म ६८९।६९०।६९१।७१०
त्रिगुणा क ५०६
त्रिणाचिके ३४७
त्रिपादस्या २२५
त्रिवृत्करण ९६
त्रिशीर्षाणं २२७।२३०
त्र्यात्मकत्वा ९६
त्वं चाहम १७
त्वं वा अहम ६५१।७१५।७१६
त्वं हि नः पिता १५४
त्वमेव मे २२६
त्वमेव वरं २२८
ददामि ब्रु १०।४७३।५३८
दर्भमयी र २०३
दर्शपूर्णमा १२२
दशेमे पुरु ५५१
दहर उत्त ६५३
दहरं विपा ६६०
दहरोस्मि १२८।२९६।२९८।३०३
३०७।३७१।६५३
दिक्संख्ये सं ३५९
दिवं च पृ ३९३
दिवः पर. २२५
दिवः परो २२५
दिवमेव २६९
दिवा च शुक्ल ७३९।७४०
दिव्यो देव २५८
दिव्यो ह्यमू २६६
दिशः श्रोत्रे वा २६६।२६९
दिशः श्रोत्रे वि २६९
दीक्षाप्रवेश ५०१
दुर्गं पथ ३४८
दुश्च्यवनो २२४
दृश्यते त्व ३४२।३४६
दृश्यन्ते तानि ३९३
देवच्छन्दांसि ६३७
देवताधिकरण ६१८
देवतासायु ७९
देवतिर्य ६७।२१५
देवलोकादादि ७४३।७४५।७४७
देव सवित· ६३४
देवादिभेदे ८१
देवान्देवय ५७०।६१३
देवासुरा ह ६१८।६२०
देवा ह वै सत्रं ६३४
देशकालवै १२
देहयोगाद्वा ५९०
देहेन्द्रिय ५४
दोषप्रहाणा ७६०
दोषहानौ तु ९७
द्या मूर्धानं २६९
द्युभ्वाद्यायतनं ३०९
द्युलोकाग्नौ ५६९
द्रव्यसंस्कार ६८१
द्रष्टा श्रोता २५७
द्वया ह प्राजा ६१७
द्वादशाहम ७६७
द्वादशाहेन ७६७
द्वा सुपर्णा ७७।२८०।५९२

http://acharya.org

द्वितीय विष्णु ७०
द्विषन्तः पाप ६३६।६३९
द्वे रूपे ब्र ६८
द्वे वाव ब्र ५९८।६०१।६०२
द्वे विद्ये २६२
धर्मेण पाप १२।७०१
धूत्वा शरीर ३३५।७३२।७५४
धूमो भूत्वा ५७८
धूमो रात्रि ७४१।७४२
ध्यानक्रियाभ्यां ३४९
ध्यायतीव पृ ७१९
ध्यायतेध्यासि ३४९।३८३
ध्यायेन्नारा ४०१
ध्रुवा स्मृतिः ९
न कर्माविभा ३९२।४१८।४५५।५२४
न कलञ्जं १४७
न चक्षुषा १५९।२३५।६००
न च पुनरा ७०९।७७६
न च मत्स्था ६५
न चास्योपदि ३२८।३२९
न चैतेषु सम ५०७
न जायते ३४८।३७८।४६४।५०४
५२१।५२३।५३३
न तत्र रथा ९७।५८३।५८४
न तत्र वेशा ९७।५८३
न तत्र सूर्यो ३३३
न तत्रानन्दा ९७।५८३
न त्वेवाहं ५२
न तत्सम ४४८
न तदश्ना ६४३
न तदस्ति १५।८२
न तद्योग ७०
न तस्मात्प्राणा ७३४
न तस्य कश्चि १७७
न तस्य कार्यं ६१।२१४।४०८।४६१
५९४
न तस्य प्राणा ७३३।७३४।७३५
न तस्येशे ११०।६०८
न तु दृष्टा ४४४।४५६
न तु मामभि ४०१
न दृष्टेर्द्र १४।६२।१४८।१५४।६४६
६४८
नन्दिग्रहि १८५
न पश्यो मृ ४।१७।४२।२८८।५२६
५३१
न पुनर्मृ ४।१७
न प्रेत्य स२४८।३७२।३८२।५२५।५३१
न ब्रह्मा ने २१४।४४६।५०२।७७१
न भूतसघ २१६।४१३
नम ऋषिभ्यो ३१७
न मतेर्म ६२।१४८।१५४।६४६
न मे स्तेनः २६७
नरकस्वर्ग ५९२
न वधेनास्य ६५६
नवनीतं य ५०९
न वा अजीवि ६९८
न वा अरे पत्युः ३७२।३७६
न वा अरे सर्वस्य ३७२
न वा उ वैत ५८१
न वाचं वि २३०
न वा विशेषा ६५२
न विज्ञातु ४२
न विज्ञाते ६४६
न वियद १४६
न विलक्षण ९४।१७२।४७७।४८०
न शूद्रे पा ३२७
न श्रुतेः श्रो ६४६
न संदृशे ६००

न स वेद ९
न स्थानतो १४।६५
न ह वा अस्मा ३२१
न ह वा अस्यान ६९८
न ह वा एवंविदि ६९८
न ह वै देवा ५७०
न ह वै सश १५२।१८१।२११।३०४
४१७।७६६
न हिंस्यात्स ५८०
न हि विज्ञातु ५२९
न ह्यध्रुवैः ४
न ह्येतस्मा ५९८।५९९।६०२।६०८
नातो मिथ्या ९७
नात्मा श्रुतेः ४५।५०६।५२६।५४२
नात्मा श्रुतेरि ४१
नात्युच्छ्रित ७१९
नाध्वर्युरुप ६३७
नानन्त्रं परि ६९८
नाना वा देव ६५९
नानाविधैरु ४७७
नानावीर्याः ९६।५६२।७३०
नान्यं गुणेभ्यः ५३३
नान्यः पन्था ४।१०।१७।११०।२५७
३७४
नान्यत्किंचन ४४६।७७१
नान्यदतोस्ति २९२।२९३
नान्योतोस्ति १६३।१६२।२५७।२५८
२५९।३४१।४२३
नाप्नुवन्ति ७७६
नाभुक्तं क्षीयते ७२१।७२२
नाम ब्रह्म २५३
नाम रूप च ३१६।५५८
नामरूपयो ३३३
नामरूपाद्भि ८०
नामरूपे व्या ३८१
नामादिपरं २८४
नामानि कृत्वा ३३५
नायमात्मा प्र १०।२४५।३४८।६०१
६०७।७०८
नायमात्मा ब १२
नारायणपरं ५०२
नारायणपरो ५०२
नारायणो ज ३९९।४४७
नाविरतो दु ७११।७२२
नाशक्नुव ९६।५६२।७३०
नाशयाम्यात्म ४७३।५३८
नाशान्तमान ७११
नासदासी १६।१०१
नास्त्यकृतः ४
नास्य जरयै ६०४।६५६
नास्यापर २५२
नास्याब्रह्मवि २५२
नाहं वेदै ११।६०१।७०८
नाह खल्वय ५२५।५८८।७६९
नाहमत्र भोग्यं ५८८।७६९
निचाय्य त ८
निचाय्यतत्वा ३०८
नित्यं विभुं १३।२६०।६१०
नित्यं वृद्ध २०२
नित्येष्वपि ५८०
नित्यो नित्या ६१।११६।१६१।४५४
५२१।५२३।५४२।६०२
नित्योपलब्ध्य ५३५।५४६
नित्यो व्यापी ५४
निदिध्यासित ७१९
निबध्नन्ति म ३५१
निमित्तमात्रं मु ४६३
निमित्तमात्रमे ४६३

http://acharya.org

निरञ्जन. प ८०।७७०
निरञ्जनम् १९।२१।६०।२१४
निरवद्यः पर' ५९५
निरस्ताखि ४०
निरुक्तं चा २३१।३९२
निर्गुणम् १९।२१।६०।२१४
निर्गुणस्या ७४।४५९
निर्दोषं हि ७६
निर्मातारं ९८
निलयनं चा २३१।३९२
निषादस्थपतिन्याय. ३०१।७५३
निष्कलं नि ६।१४।६०।३८३।३८९।५९५
निष्ठा त्वेव २८६
निष्पाद्य मुक्ति ८०
नीयते तप ४६३
नेतरोनुप ६८१।७१५
नेता गम ६६
नेति नेति ५९३।५९४।५९८।५९९।६००
नेति होवाच या ७३४
नेदं यदिद १५९
नेमा विद्युतो ३३३
नेह नाना १४।६३।१२२।१५१।४२३
४३६।४४३।६५४।६५५
नैकस्मिन्नसं ३०
नैतदचीर्ण ६१६
नैतदब्राह्मणो ३२७
नैते सृती ७४२
नैवेह किंच २५८
नैसर्गिको ७१
नो इतराणि ५७२
नो एवासाधु ३३७
नो एवेमानि ५८८।७६९
नोपजनं ४२।५२६।५३२।६५७
पड्गवन्धवद्‌ ४७४।४७७
पञ्चमहा ११
पञ्चम्यामाहु ५७६
पञ्चरात्रस्य ५१०
पति पती ६१
पति विश्व ११६।१२३।१७८।६०२
पत्युरसाम ५०४
पद्भ्यां पृथि २६६।२६९
पद्मकोशप्र ६६०।६६१
पद्माकारा १०४
पद्यु ह वा ३२८
पयोम्बुव ४७४
परं ज्योति ८०।३३३।६४०।६५३।६५६
६५७
परः परा ६६।६७।७३।७८।५९०
परमब्रह्म ६६
परमात्मा च ६८।३४५
परमात्मात्म ७८
परमात्मा पर २३६
परमार्थश्च १०९
परमार्थस्त्व १४।७५
परस्पराज्ञा ५११
परस्य ब्रह्म ६८।५४४
परस्यान्ते ७५२
परात्तु त ३४०
परात्पर पुरु ६०६।६०७।६०९
परात्परं यन्म ६०६
पराभिध्याना ५९१
परास्य श १९।६१।१११।१२१।१७२
२१४।४४७।४६१।५९४।६८४
परिणामत.् स ४७०
परिणामादि १०९
परित्राणाय २१५
परीक्ष्य लो ४।२६५
परो नारायणो ३१९

http://acharya.org

पर्णमयी २०३
पश्चादुद्ध्रू ७१
पश्यंश्चक्षु. ३६४
पश्यत्यकृत ५३४
पश्यत्यचक्षुः २५८।४६१
पादोस्य विश्वा २२५।५४२।६०६
पादोस्य सर्वा २२३।२२४
पाराशर्यं १
पिण्डः प्रुथ ७७
पितृलोकादा ५६९
पितृहा मा २८१
पिबन्त्येनाम ३४९
पुण्यः पुण्येन ४६३
पुराणे चैव ९६
पुरुष एवेदं २७१
पुरुषं निर्गुणं ३५०
पुरुषः प्रकृ ३५१
पुरुषः स ११
पुरुषः सुख ३५१।५३२
पुरुषविमोक्ष ४७६
पुरुषश्चा ६८।३४५
पुरुषस्य तथा ४७७
पुरुषस्य दर्शना ४७४।४७५।४७७
पुरुषान्न परं ३३८।३३९।३४१।३४६
पुरुषोमानवः ७५०
पुरुषो वाव यज्ञः ६३२
पुरुषोस्ति भो ४७६।५३५
पूः प्राणिनः ३९९
पूर्वाचार्य १
पृथगात्मानं ४।११७।१२४।४५३।५४५
७१६
पृथिवी पुच्छं १८२
पृथिवीमय ७२९।७३०
पृथिव्यप्सु ३।४४।३९२।५११
पृथ्वादिभ्य २८०
प्रकाशादिव ६०४
प्रकाश्यन्ते न ७६०
प्रकृतिं पुरु ११७।३५१।४६४
प्रकृतिं स्वा ११७ २१५।२७८।३५१
प्रकृतिर्या ६७।३४५
प्रकृतिश्च १४६।६०३
प्रकृते. क्रिय ५३३।५३४
प्रकृतेः सुकु ४७८
प्रजापतिः प्रजा ५२१।५२३
प्रजापतिर्वै संव ६३४
प्रजापतेः सभा ७५१।७५३
प्रतर्दनो ह २२६।६९४
प्रतिपदवि २
प्रतिप्रतिगुणा ४७५
प्रत्यस्तमित १४।६९।७०
प्रधानं च ६८
प्रधानकार ४६३
प्रधानक्षेत्र ११६।१२३।१६२।३५१
४५४।६०२
प्रमादं वै १७
प्रयाता यान्ति ७४१
प्रलये च क ३९९
प्रविश्य नाम ५५९
प्रस्तोतर्या देव २२१
प्राचीनशाल ६७०।६७२
प्राजापत्यं ब्राह्म ६९१
प्राज्ञेनात्मनान्वा ७८।१६२।३३६।४५३
प्राज्ञेनात्मना स ७८।१६२।१७५।१७६
३३६।३७०।४५३।७६९
प्राण इति ह्री २२१
प्राणं च ह्यस्मै २५५
प्राणमनूत्का ५५१
प्राणसंशयमा ६९९

http://acharya.org

प्राणस्तेजसि ७२७।७२९।७३०
प्राणस्य प्राण २३५
प्राणस्य प्राणमु ३६०
प्राणाधिपः ३१०
प्राणापान २७१
प्राणा वाव ५४७।५४८
प्राणा वै सत्यं ५९९।६०२
प्राणिनः कर्म ७१
प्राणेभ्यो देवा ३६६।३७०
प्राणे सर्वं प्र ५५४
प्राणोपानो ५५४
प्राणो ब्रह्म कं २५१।२५४
प्राणो ब्रह्मेति २०९
प्राणो वाव ६२२
प्राणोस्मि प्र २२६।२२७
प्राणो ह पिता २८१
प्रातः प्रातर ५०७
प्रापणीयस्त ८०
प्राप्यान्तं कर्म ५७१।७२४।७३३
प्रायश्चित्तं न प ७०४।७०५
प्राह षोडशं ६३२
प्रियो हि ज्ञा १०।७७६
प्रेत्याभिसंभ ६६८
प्लवा ह्येते ४।२६५
फलमत १३१।७१३
फलवत्संनिधावफलं तदङ्गमिति न्याय. ६३३
फलसंविधि ४७१
बभूव भूय ७२
बहुदायी ३२६
बहुधा जाय २७७
बहु स्याम् ५२।६०।६४।११९।१२२ १८६।१८९।१९७।२१२।२२०।२२१ ३९३।५०२।५१३।५१८।६०७।६२७ ६८४।७७१
बहु स्यामिति ९६
बहूना जन्म ७७६
बहूनां यज ३१५
बहोर्लोपो २८१
बह्वीः प्रजाः ३५२।३५३
बह्वथः स्याम ५१८
बाध्यबाधक ९७
बाल. क्रीडन ३९४
बालस्य र १०२
बालाग्रशत ५२८।७६९
बाल्यं च पाण्डि ७०७।७०८
बाल्येन तिष्ठा ७०८।७११
बिभेत्यल्प ७२
बीजाङ्कुरन्याय १६३।४२४।४२६
बुद्धिं तु सार ३३९
बुद्धिश्च न वि ५४९
बुद्धे क्षेम १५८
बुद्धे चेत्क्षेम १५८
बुद्धेरात्मा ३४२।३४६।३४९
ब्रह्मचर्यं समा ६९२
ब्रह्मचारिन्वेद ३२६
ब्रह्मचार्याचार्य ७०३
ब्रह्मजज्ञं २४६
ब्रह्मजिज्ञा १३५
ब्रह्म ज्येष्ठा ६३२
ब्रह्मणा सह ७५२
ब्रह्मणे त्वा मह ६३३
ब्रह्मणोनन्तु ८३
ब्रह्मणो महि ६३३
ब्रह्मणो हि प्रति ७७४
ब्रह्म ते ब्रवा ३६५।३६७।३६९
ब्रह्म दाशा १६१।५४०
ब्रह्म पुच्छं १८१।१८२
ब्रह्म भूतानां ६३२

http://acharya.org

ब्रह्मलोकमति ७३५
ब्रह्मलोकमभि ३३५
ब्रह्मलोकमवा ४०१
ब्रह्मलोकान् ७५३
ब्रह्मवत्त ८३
ब्रह्म वनं ३८९।४६०
ब्रह्म वा इद १४६।४४६।७७१
ब्रह्मविदा ४।६।६२।७९।१२८।१५९ १६८।१८०।१८१।१८२।१८६।२०५ २०७।६२६।६७४।६८०।६८१।७१३ ७१४।७२१
ब्रह्मविद्याम १२
ब्रह्म वेद ६।१७।६२।८०।१२४।१५९ १६२।७१३।७१४।७२१
ब्रह्मसंस्थो ६९०।६९१।६९५।७१०
ब्रह्मेमे द्यावा १६१
ब्रह्मैकमेव ४५८
ब्रह्मैवेदं ४४३।६०३।६१०
ब्रह्मोत्पन्नः ३१९
ब्राह्मं संन्या ६९१
ब्राह्मणाः पुत्रे ७१०
ब्राह्मणाना हि ५०५
ब्राह्मणा वि ७
ब्राह्मणै. क्ष ५०९
ब्राह्मणो यजे ५९२
भक्त्यानुकम्पया ५०८
भक्त्या त्वन ११।६०१।७०८
भगवच्छब्द ६६
भगवास्त्वमे ६४९
भगासनस्थ ५०१
भयादस्याग्नि ३३२
भयादिन्द्र ३३२
भवत्समेद्दी ८१
भवत्यात्मना ६१८
भवन्ति तप ७४।४५९
भविष्यति प्रमा ५०९
भवेयमिति ४०
भस्म यज्ञोप ५०१
भागो जीव. ५२८।७६९
भाति च तप ९।७१४
भिद्यते हृ ९।१७।६८९
भीषास्माद ३३२।५५५।६८५।७७३
भीषास्माद्वा ६१।३३२।३६३।५५५ ५८५।५९५।६८५।७७३
भीषोदेति ३३२।५५५।५९५।६८५ ७७३
भूतग्राम ११७।३५१
भूतभृन्न ६५
भूतादिर्महृ ३४४।३९२
भूमा त्वेव २८२।२८६
भूमा त्वेवेति २८४
भूमिरापो ३४४
भूय एव मा ६४९
भूरि त्वष्टे १०२
भृगुर्वै वा १३२
भेदव्यपदे ७८।१८६।६८१
भेदाना परि ४६७
भोक्ता भोग्यं ११७
भोगमात्र ७९।१६२।१८६
भो भो मल्लाक्ष ३२४
भ्रान्तिज्ञानेन १४
भ्रामयन्सर्वं २४१।३४१।५३७
मघवन्मर्त्य ३०४
मतिस्त्वेव २८६
मत्तः पर ६५।३४४
मत्तः सर्वं २३०
मत्वा धीरो ३४७
मत्स्थानि स ६५

http://acharya.org

मनः प्राणे ७२७।७२८।७२९
मन.षष्ठा ५५७।५६७
मन सर्वे ३२६
मनश्थितो ६६१
मनसस्तु परा ३३८
मनसा तु १५९।२३५
मनसैतान्का ५३२।७७०
मनसैवानु ६५४
मनसैवैता ५२६
मनसैषु ब्रह्मा ६६३।६६५
मनीषिणो मनसा पृ ३८८।४५९
मनीषिणो मनसा वि ३८९।४६०
मनुर्वैवस्व ६९४
मनोनुकूले ७२०
मनो ब्रह्म २५३
मनो ब्रह्मे ९।१६७।२१०।७१४।७१७
मनोमय प्राण ६२९
मनोमय. प्राणशरीर· २३५
मनोमयः प्राणशरीरने २३५
मनोमयः प्राणशरीरो २३४।२३८।२४२
४६१
मनोमयोयं पु ६३०
मनो वाव २८१
मन्त्रकृतो ३१७
मन्त्रेषु क २६४
मन्दाग्नि १४७
मम माया १६।१०२
मम योनि ११८
ममैवांशो ५४२
मयद्वैत २०२
मयाध्यक्षेण ११७।३५१।३८४।५९५
७७४
मयि नष्टेपि ४०
मयि सर्वे ६५।३४४
महः पुच्छं १८३
महतः परं ध्रु ३४६
महतः परम ३३८।३३९
महदाद्या ९६।५६२।७३०
महद्भयं व ३३२
महद्भूतमन ३७५
महानव्यक्ते ३४४।३८७।३९२
महान्तं विभु १५२।२४५
महाभूता ५३।३९८
मही घट १०३।१०६।१०८
मां च योव्यभि ७७४
मामात्मपर ५३८
मामुपास्व २२६।२२८।२२९
मामुपेत्य तु ७७६
मामुपेत्य पु ७७६
मामेव विजा २२७।२२९
मायां तु प्र १६।१०१।११६।३५०।३५४
३८३
मायामात्र १४।६५।९८
माया वयुन २१५
मा विद्विषा ६३५
मासेभ्यः संव ७४३।७४५
मासेभ्यो देव ७४३।७४५
मिथ्यैतदन्य ७८।१२४
मुक्तोपसृप्य ७९
मुद्रिकाषट्क ५०१
मुमुक्षुर्ब्रह्मो ५२३
मुमूर्षता प्र ७३९
मूर्धा ते व्यप ६७२
मूर्धा त्वेष ६७१
मूलप्रकृ ३५८।४६५
मृत्युर्धावति ३३२।५५५।६८५।७७३
मृत्युर्यस्योप २४४
मृत्यो. स मृ १४।६३।१२१।४२३।४४३
६५४

http://acharya.org

मूर्षा वै खलु ३६८
मेघो भूत्वा ५७८।५७९
मैत्रेय भ ६६
मैत्रेय्यात्मनि ३७२
मोहो वै मृत्युः १७
य आकाशे ५१८
य आत्मनि ७८।११२।११८।१६२ १८५।१९८।२१६।२२९।२५७।२५९ ३०२।३४१।३८०।३८६।४१२।४५३ ५२५।५३६।५५५।५९०।५९१।५९६ ६४८।६८१।७५६।७६१।७७१
य आत्मा ७५९
य आत्मान ७८।११२।११८।३०२ ४१२।४५३।५३६।७१६।७६१
य आत्मापह १५१।३०४।७५९।७६२ ७६४
य आत्मा सर्वा ६४६।६४७।६४९
य आदित्ये २१६।५५५।६१२
य इच्छेत्सिद्धि ५०८
य इत्थं विदु ६४३
य इमं च २५७
य इहात्मान ७९
य एतद्विदु ६०९
य एनं विदु ११०
य एवंविदि ६१९
य एवं वेद ६१९।६२१
य एवमेत ६४२।७४३
य एवासौ तप ७१८
य एष एत ६५२
य एष विज्ञा ३७१
य एष तु ९८।५८३।५८४।७६८
य एषोक्षिणि २४९।२५०।२५१
य एषोन्तरक्षि २१०
य एषोन्तरादि २१०
य एषोन्तर्हृ ३७१।६५३
यं कामं काम २९७
यं पृथिवी ११२।११८।२५८।२५९
य मृत्युर्न ११२।११८
यः पुनरेतं २९३
यः पूर्वस्य २०१
यः पृथिवीम ११२।११८।१९८।२५८ ३८६।४१२
यः पृथिव्यां ११२।११८।१९८।२५६ २५७।३८६।३९१।४१२।५१८।५९० ५९१।५९६।६४७।६८१।७७१
यः प्राणः स वा ५५२
यः प्राणेन प्रा ४६७।६४६।६४८
य॰ सत्येनाति २८२
यः सर्वज्ञः १९।६१।१२१।१६५।१७२ २६१।२६४।२७७।३३४।४०८।४४७ ५३०।५९५।६८४
य. सर्वेषु २५६
यः सेतुरी २४७
यक्ष्यमाणो २६७।६८२
यच्च किंचि १७८।६१०
यच्चान्यथात्वं १०६
यच्चास्येहास्ति ११७।२९९
यच्चैतत् १०७
यच्छेद्वाङ्म ३४२
यज देवपू ६११
यजमानं देवा २९३
यजेत स्वर्ग ५३३।६११।६६८
यज्ञः पशुः १०७
यज्ञादिश्रुते ११
यज्ञेन दानेन ७०२
यज्ञो दानं तपः क ६९७
यज्ञो दानं तपश्चै ६९७
यज्ञोध्ययनं ६९१

http://acharya.org

यज्ञैस्त्वमिज्य ४०१
यतः प्रवृ ४००।४७२।६९७
यतः प्रसूता ५२१
यतश्चैत ७२
यतस्ततो ७१
यतोतो ब्र ७४।४५९
यतो वा इ २०।७१।१३२।१३५।१३६
१४६।१७०।२१४।२१६।२१७।२३२
२३७।५२१।६२५।७७१
यतो वाचो ६१।६२।१८४।२०६।२०७
२०८।५९५।६८४
यत्किंच यज्ञे ६६३
यत्किंचित्स्र ५४४
यत्किंचेह क ५७२
यत्तच्छान्त २९५
यत्तत्कवयो २९५
यत्तदग्रे १३।२६०।२६३।३४६।६४४
यत्तु काला १०९
यत्प्रयन्त्य ७१।१३२।२३७।७७१
यत्र काले ७४१।७४२
यत्र त्वस्य १४।६३।१२२।१६२।३८६
४२३।४२९।४४४
यत्र नान्य २८०।२८६
यत्र यन्ति ५८१
यत्र हि द्वैत १४।६३।१२२।३७३।३८२
४२३।४२९।४४४
यत्रान्यत्प २८१
यत्रायं पुरु ७३३
यत्रास्य पुरु ५६७
यत्रैतत्पु १७५।५८७
यत्रैष सुप्तो ३७१
यत्साक्षादप ६४६।६४७
यत्सायं प्रातु ६३३
यथर्तुष्व ३९३
यथाक्रतु ६२।१७४।२३४।२४२।२९४
६६७।६६८।७१५।७५५
यथा खलु सो ५६०
यथागम ५११।५१२
यथाग्नेर्ज्वल ३६६
यथा न क्रियते ७६०
यथा नद्यः ७९।२७८।३७९।६८०
यथा पशुरे ५७०
यथा पादोदर २९३।२९५
यथा पुष्कर २५३।७४३
यथा पृथि २६१
यथार्थ स ९६
यथा लोके राजा ४१८
यथा व्रीहिर्वा २४१
यथाश्मानमाख ६१८
यथासक्तो ६८
यथा सत· २६१
यथा सुदीप्ता २६५।३७८
यथा सोम्य मधु ६५१
यथा सोम्यैके १७१।१८८।१८९।३८४
४४०।५२३
यथा ह्येवेह २९९
यथेतमाका ५७८
यथेदं तच्छिर ३५२
यथोदपान ७६०
यथोर्णनाभिः २६१।२६३।३९५
यदग्ने रो ९६।५१७।५६०
यदनेन हवि ३१४
यदम्बु वै १०४।४१९
यदष्टाकपाल्यो ६७२
यदहं वसि ६२३
यदहरेव ६९२
यदा कर्मसु ५८६
यदा तत्पर्यं ७४०

http://acharya.org

यदा तमस्त ३८७
यदा तु शु १६।१०३।१०५
यदा न कश्च ५८६
यदा पश्चाव ५४९
यदा पश्यः २७८।३०८।६७५।७१३
 ७६१
यदा वै पुरु ७४४।७४५
यदा वै विजा २८२
यदा सर्वे प्रमु ७३०।७३१।७३२
यदा सुप्तः ३७०
यदा सुषुप्तः १७६
यदा ह्यवैष एतस्मिन्नद १७।६४।५८५
 ७७३
यदा ह्येवैष एतस्मिन्नुद १४।६४।५८५
यदिच्छन्तो ३४८।६९५
यदिदं किं १९७।२०९।३३२।३६३
 ३९२
यदिदमस्मि २९८
यदि वेतरथा ६९२
यदूर्ध्वं गा २९०।२९१
यदेतद् १४।७५
यदेव क २५४
यदेव भग ३७४
यदेव विद्य ६५७।६७६।६७८।६८३
 ६८६।७०६।७१२।७२५
यदेव साक्षा ६४६।६४९
यदेष आका २०५।२०९।२१९।३०३
 ५३०।६४८
यद्भूतयोनिं ३९५
यद्यद्विभू ८२
यद्यन्योस्ति १५।७६
यद्यपि सवित्त ८०
यद्वाचान १५९
यद्वाव कं २५५
यद्वै किंच ४०२
यन्मुहूर्तं ६४
यन्मयं च ७२
यमग्निर्न ५५५
यमात्मा ७८।११२।११८।२५९।२६०
 ३०२।४५३।५३६।७१६।७६१
यमेवैष १०।२४५।२६२।६०१।६०७
यया क्षेत्रज्ञ ६८।७८
यया तद २६१।२९०
यश्चक्षुषि २५०।२५५।२५६।५९०
यशोहं भवा ७५४
यश्चायं दक्षि ६३०।६५२
यस्तद्वेद ९।७१४
यस्तमात्मान ३०४।३०६
यस्तर्केणा ४०४।४१५
यस्तेजसि ५१८
यस्त्वेतमेव २६६।२७२।२७३।२७४
 ६७१
यस्मात्क्षर ५२।६५
यस्मात्परं ना ६०८।६०९
यस्मात्सम्य ५०५
यस्मात्प्राणी ६०८।६०९
यस्मिन्द्यौः २७६
यस्मिन्नुल्का ५५३
यस्मिन्पञ्च ३५८।३५९।३६०।३६१
यस्य चक्षु. ३९१
यस्य चन्द्र ३९१
यस्य चित्तं ३९१
यस्य चैतत्क ३६५।३६७।३६९
यस्य ज्ञानमयं २६३।३९३
यस्य तमः ३९१
यस्य तेजः २०१।३४४।३९१
यस्य त्वक्श ३९१
यस्य दिशः ३९१

http://acharya.org

यस्य देवे ७०८
यस्य द्यौ॰ श ३९१
यस्य पृथिवी ११२।११८।१२३।१९८
२०१।२५८।३४४।४१२।५१८
यस्य प्राण॰ ३९१
यस्य बुद्धि॰ ३४४।३९१।५१८
यस्य ब्रह्म च २४४
यस्य मनः ३९१
यस्य मृत्यु ११२।११८।१७२।२०१
२५८।३४४।३९१
यस्य रेत॰ ३९१
यस्य वाक्श ३९१
यस्य वायु २०१।३४४।३९१।६१२
यस्य विज्ञानं ३९१
यस्य श्रोत्रं ३९१
यस्य सर्वाणि ३९१
यस्याकाश॰ २०१।३४४।३९१
यस्याक्षरं १२३।१७२।१९८।२०१।२१६
२९१।३९१
यस्याग्निः ३९१।५५५
यस्याग्निरा २६९
यस्यात्मा ७८।११२।११८।१२३।२०२
३९१।४५३।४५४।५३६।५४४।७१६
७६१
यस्यादित्यः ३९१
यस्यानुवित्तः ५२७
यस्यान्तरिक्षं ३९१
यस्याप॰ श २०१।२५८।३४४।३९१
यस्यामतं १४।६२
यस्याव्यक्त १२३।१७२।२९१।३४४
३९१।५१८
यस्याहंकारः ३४४।३९१।५१८
याज्ञवल्क्येति हो ७३३
या दृष्टासीति ४७८
यान्ति मद्याजि ६१३
यान्यनवद्या ५७२
यान्यस्माकं ५७२
यान्येतानि देव ४४६।७७१
या प्राणेन २४६
यावज्जीवम ६८९।७००
यावत्संपात ५७०।५७१।५७२।७२४
यावदस्मिञ्छ २३०
यावदेकैकस्मा २६८
यावन्नाम्नो गत ७५६
यावमुष्य गेष्णौ २१०
यावान्वा अय २९७।२९९।६३२
युक्तं तद्गुण ८०
युक्तश्छन्दां ३
ये चामी अर ७४३
ये चेमेऽरण्ये ६४२।६४३।६८९।६९०
६९१।६९५।७५५।
ये तु ज्ञान १५।७५
येन जाता ७१।१३२।२३७।७७१
येन स्यात्तेने ७०९
येनाक्षरं ४
येनाश्रुतं १७२।१८७।१८८।३८४।४३९
५१५।५२३
येनाहं नाम्नृ ३७४
येनेदं सर्व १५४।३८२
येप्यन्यदेव ४०१
येयं प्रेते २४७।२४८।३४७
ये वै के चा ५२७।५७४।५७६
यैः स्वधर्मप ४०१
योकामो नि ७३४
योक्षरमन्त १९८।३८०।३८६।४५४
योग्निमन्त ५५५
योग्नौ तिष्ठ ५५५।६१२
योपानेनापा ६४६

http://acharya.org

यापामन्तर ११८
योप्सु तिष्ठ ४७०।५१८।५९६
यो ब्रह्माणं २९५।३१९।७५१
यो मामज ६५।५९५
यो मामेव २४१
यो मृत्युम ११८।२१६।३९१।४५४
योयं पवत ७४७
योयं मध्यम. ५५३
योयं विज्ञान ५२६।५२७।५२८
यो योनिं ३५४
यो यो यां यां ६१२
यो यो ह्यन्न ५६९।५८१
यो रेतसि ५९०
यो लोकत्र ६५।५९५
यो वा एतदक्षरं २९३
यो वायौ ५१८।५५५।६१२
यो विज्ञाने १८५ २५७।२६०।४१२ ५२५।५३०
यो वै बालाके ३६५।३६८
यो वै वेदां ३१९
योव्यक्तमन्त ३८६।४५४
योशनायापि ६४६
यो ह वै ज्येष्ठं ६२२
रङ्गस्य दर्श ४७७
रजतांशो गृ ९७
रथस्यारेषु २२७
रमणीयचर ५७९
रश्मिभिरे २५०।२५६
रसं ह्येवा ७९।२०९।७५७।७७३
रसो वै सः ७९।२०९।७७३
रात्रिसत्रन्वायः ६५८
रुद्राक्षकङ्कणं ५०१
रूपवर्णादि ६७
रूप्यशुक्त्यादि ९७
रूप्यादिसद्द ९७
लभते च ६१२
लम्भुको ह वासो ६२८
लिप्यते न स ६९९
लीनमासी ७२
लोकं पृणान ६६६
लोकवत्तु ३९४
लोकान्नु सृ ६२७।७७१
लोकेषु पञ्चवि ६६९
वक्तारं वि २३०
वचनानि त्व ६६५
वचसामा १४
वज्रहस्तः ३१३
वरं वृणीष्व २२६
वरुणं पित १३२
वर्जितः श ६७
वर्णा आश्रमा ५७१
वसन्ति स ६६
वसूनामेवै ३२०
वस्त्वस्ति किं १०३।१०६।१०८
वस्त्वेकमेव ५९२
वाक्पादः प्रा ६०७
वाग्वाव नाम्नो २८१
वाङ्मनसि ७२७।७२९।७३६।७६९
वाचारम्भणं १४।४३९।४४०
वायव्यं श्वेत ६१२
वायुः प्राणो २६६।२६९।४०६
वायुमेव स्वेन ६१२
वायुराकाशे ३९२
वायुर्भूत्वा ५७८
वायुर्वै क्षे ३१४।६१२
वायुश्चान्त १३२।५१४।५१६।५४७
वायोरग्निः १७६।५१४।५१७
वासुदेवः स ५७६

http://acharya.org

विकल्पोवि ८३
विकारजननी ३४९।३८३।३८६।३८७
विकारांश्च गु ३५१
विकार्यमात्म ७९
विजानाम्यहं २५४
विज्ञातम ६२
विज्ञातार ४१।४२।६३।१२१।३७२ ३८२।५२६
विज्ञानं चा ११९।१८५।२३१।३९२ ४०३
विज्ञानं पर १५
विज्ञानं प्राप ८०
विज्ञानं ब्रह्मे २१०
विज्ञानं यज्ञं १८४।१८५।५२५।५३० ५३५
विज्ञानघन ४२।३७२।३८२।७६३।७६४ ७६५
विज्ञानमा १७।२०९।२१४।४३६
विज्ञानमेकं १६।१०३।१०७
विज्ञानसार ३४७।३४५
विज्ञाय प्र ८।१२८
विद्यया ह्येवै ६६३।६६४
विद्यां चावि १२
विधिस्तु धार ६९२
विधूय पापं ३३४
विनाशमेवा ५८८।७६९
विभेदजन १५।७७।८१
विमोकः का ११
विरोधे त्वन ३९७।५०३
विविदिष ६।११।१५९।६९५
विविधा च पृ ३४१।५३४
विवेकदं परं ५०५
विशेषाभावाद्विपरीतं कस्मान्न भवतीति न्यायः ७६४
विश्वं नाराय ५११।६५९
विश्वमेवेदं ६६१
विश्वरूपो १०४
विश्वस्मा अग्नि २६७
विश्वात्मानं १७७
विष्टभ्याह ६५।८२।५५६।५९५।७७४
विष्णुनामा ६८।३४५
विष्णुशक्तिः ६८
विष्णुशक्त्या ६८
विष्णोः सका ७३।३९९।४४७
विष्वाधार १०९
विष्वश्वो विप ५७१
वीरहा वा एष ६९०
वृक्ष इव स्त ६०९
वृत्तात्कर्मा २
वेणुरन्ध्र १५।७६
वेत्थ यथा ५६५।५६८।५७६
वेदनमुपा ९
वेदमधीत्य ६८७
वेदशब्देभ्य ३१६।५५८
वेदानिमं १५८
वेदान्तेषु यथा ५०८
वेदाहं स ५३
वेदाहमेतं ११०।२१४।२२५।५०२ ६०८।६८०
वेदेन नाम ३१६
वैवस्वतं सं ५७४
वैश्वानरं द्वाद ६७२
वैश्वानरमु ६१५
वैश्वानरस्य २६७
वैषम्यनैर्घृ ४५५।५२४
व्यक्तं विष्णु ३४५
व्यङ्क्त्य ४७
व्यङ्ग्यत्वेनतु ४७

व्याधिभिः प्र २५१
व्याप्तिरूपेण ५०६
व्रीहिर्वा यवो २४१
व्रीह्यभावे ९६
शं नो मित्रः ६३४।६३५
शक्तयः सर्वे ७४।४५९
शक्तिः सापि ६९
शक्तौ हस्ति ४४७
शतं चैका च ७३१।७३७
शतायुषः पु ५८४
शब्दान्तरे कर्मभेदः ६७४
शब्दोयं नो ६७
शमीमय्यः २०३
शरीरं यद ५६७
शरीरजैः क ५८१
शाखाचन्द्रन्यायः १८१
शाखान्तराधिकरणन्यायः ६१७
शान्त उपा ११।२३४
शान्ताङ्गार ४६
शान्तो दान्त ६।१२।७०७
शाश्वतस्य च ७७४
शास्त्रदृष्टया तू ५०२
शास्त्रफलं प्र ५३४।७०७
शास्त्रयोनित्वा ४८१।५०३
शुक्तिभूयस्त्व ९७
शुक्त्यादौ र ९६
शुक्रं प्रविष्य ६३४।६३५
शुक्ल कृष्णं ९६
शुक्लकृष्णे ७४१
शुचेर्दश्च ३२४
शुचौ देशे प्र ७१९
शुद्धे महा ६६
शुनि चैव ७६
शौनको ह वै २६९
श्रद्धां जुह्व ५६८
श्रद्धा सत्य ६४२
श्रद्धा त्वेव २८६।६४३
श्रद्धा वा आपः ५६८
श्रावण्या प्रौ ३
श्रावयेच्चतुरो ३२२
श्रुत ह्येव १५४।२८१
श्रुतानि च म ५०७
श्रुतिशिर १
श्रुतिलिङ्गवा ६६०
श्रुतिस्मृतिभ्यः ९६
श्रुत्येव द ९६
श्रूयतां चा ५३
श्रेयोमार्गं प्र ५०७
श्रोतव्यो म १५९।७०७
श्रोत्रं च श्रोत २५८
श्रोत्रियस्य चा ६७४।७५७
श्वेतकेतुर्हा ६९४
श्वेतोऽश्वो हरि ६३४
षोडशकलं ६०५।६०६
षोडशकश्च ३५८।४६५
स आगच्छति ६३८
स आत्मा ११९।१५१।६२९।६५१
स आदित्यमा ७४५।७४६
स आपः प्रदु ६०८
स इमाँल्लो १७१।१७६।२१७।७७१
स ईक्षांचक्रे १७१
स ईश्वरो ६६
स उत्तमः ४२।३०५।६५७
स एकधा ४१३।४१७।६४०।७६६
स एकाकी ४४६।५०२।७७१
स एको ब्र ६३।५३०।५९५।६७४
६८४।७५७
स एको मानु २०४

http://acharya.org

स एतं देव ६३८।७४३।७४६।७४७
स एतस्माज्जीव २९४
स एतास्तेजो ७३३
स एत्य ब्रह्मलो ७४४
स एना॰ श्वोभू ३१५
स एनान्ब्रह्म ७५०
स एव सर्वं १०४
स एवाधस्ता २८८
स एवेदं २८८
स एवैनं ३१४।६१२
स एष इह प्र ३६४
स एष एव मृत्यु ६६६
स एष नेति ३८२।६५४।६५५
स एष प्राण २२७।२२८
स एष महा ६०४
स एष रसाना ६९३
स एष वैश्वा २६७
स एष सर्वे २१०।२१२
स एषोग्नि २७०।२७१
स एषोन्त २७६
स ऐक्षत ५२।६१।१७१।१७६।२२१ ४४६।६२७।७७१
संकल्पादेव ७६२
संकल्पादेवास्य ७६५
संकल्पाहंका ३१०
संघातपरा ४७६
सज्ञामूर्तिं ५६५
संज्ञायते ये ६६
संततं शिरा २७७
सदृश्यते ६६
संध्यं तृती ५८३
सध्याहीनोशु ५७३
संध्ये सृष्टि ९८
संन्यस्याग्नि न ७०४
संपद्यावि १६३।३८०
संभवः सर्वे ११८
सभर्तैति ६६
संभोगप्राप्ति ४१६।५८९
संयुक्तमेत ३५०
संवत्सरादादि ७४३।७८ ,
ससरति बध्य ४७६
संसारतापा ६८
स कारणं ११६।१६२।१७७।२१४।२३७ ४४६।४५३।५९४।६८५
सकृत्प्रत्य ९
सकृद्दिवा ३२१
स क्रतु २३४।२३६।२४२
स खल्वेवं ७०९।७२०।७७६
स गुणान्सम ७७४
स च भूते ६६
स चानन्त्याय २३६
सच्च त्यच्चा ११२।११९।१९७।२३१ २५८।३६३।३९२।४४२।५५६
सत आगम्य ३०१।५८७
स त आत्मा ११२।११८।२५७।२६० ३८०।३८६।४५३।५३६।५५५।५९१ ६४६।७१६।७६१
स तत्र प ७९।३०५।३०७।४१७।५८८ ६४०।६५७।७६५
स तप ११९।३९२
स तपो ११९।३९२
स तया श्र ६१२
सतासती ३१६
सता सोम्य १७५।१७६।३७०।५८७
सति संपद्य ३०१
सत्त्वं रज ३५१
सत्त्वात्संजा १२
सत्त्वेव सोम्ये ४५१

सत्यं चानृतं च ११९।२३१।३९२।३९४
सत्यं ज्ञान ६।१३।१७।१९।२०।५०।६०
१२१।१३३।१३५।१४७।१५१।१५५
१६७।१८०।१८२।१८३।२०५।२०६
२१४।२३१।२८४।३६३।३८९।३९२
४३१।४३८।५३०।५९३।५९४।६०६
६२५।६४३।६४७
सत्य त्वेव २८५।२८६।६४३
सत्य ब्रह्म ६३०
सत्यं ब्रह्मेत्यु ६२९
सत्यं वदि ६३५
सत्यकामः १९।६१।१११।१२१।४६१
५२६
सत्यमवादि ६३५
सत्यसकल्पः ७६३
सत्यार्जव ११
सत्येन ल ११
स त्वमग्निं ३४६
सदा तद्भा ११
सदाप्रमा १७
स दिदृक्षु. ४४७
सदेव नीयते ७६०
सदेव सो ६।१३।२०।५८।६०।११९
१२३।१३४।१४६।१५१।१७०।१७१
१८७।१८९।२१४।२१६।२१८।२२०
२२१।३१२।३६१।३८५।४०८।४३९
४४१।४४३।४४६।४५०।४५१।४५५
४५७।४५८।४६३।५०२।५१५।५४८
७७१
सद्भाव ए १७।१०४।१०७
स न साधुना ३३७
सम्मूलाः ११२।११९।१७७।१८९।४३९
५२१।७१६
स पर्यगा १५३
सप्त इमे लो ५४९
सप्त प्राणाः प्र ३५३
सप्तभङ्गीन्याय· ४९८
सप्त वै शीर्ष ५५०
स प्राणम १७१
स प्रीतोलं ४७१
स ब्रह्मविद्यां २६२
स ब्रह्म स शिव. ६६१
स ब्राह्मणः केन ७०९
स भुव इति ३१६
स भूमिम ३१६
स भूरिति ३१६
सम एभि ५५४
समयाविषिते ६३७
समस्तक ६५।७८।५९०
समस्तश ६७।२१५
समस्तहेय ६७।५९१
समस्ता. श ६७।७०।२१५
समाने वृक्षे ११७।२७९।४०३
समृद्धि तत्र ५८६
समेत्याऽन्यो ९६।५६२।७३०
समे शुचौ श ७२०
स य इदमवि २७३
स य एतदे ३२०
स य एषो २३५
स यथा प्रयोग्य ३०५
स यथा महारा ५३४
स यथाद्रैंधा ३८१
स यथा सर्वासा ३८१
स यथा सै ४२।३८१।७६३।७६
स यदा प्रतिबु ३६६।३६७
स यदि पितृ ४१७।६५६।७६५
स यदोत्क्र २६६
स यो नाम ब्र ७१७

http://acharya.org

स यो ह वै १९४।६५२
स यो हैत २७०।६६६
सर्गेपि नोप ७९।३०९।७६१
सर्वं खल्विति स २३८
सर्वं खल्विदं ६४।११२।१२३।२३४ २३६।२३७।२४२।३३७।३८६।४४३ ५११।५२१।६५१।६८१।७१६।७६१
सर्वं तं परा १२२।३७३।३७५।३८६ ४४३।७१६
सर्वं तद २९९
सर्वं ह पश्य. २८८।५३१।५८८।७७०
सर्वकर्मा ६४५
सर्वगतं २४२
सर्वगत्वाद २३०
सर्वज्ञ सर्वं ५९५
सर्वत एव मे ३२६
सर्वत्रासौ ६७
सर्वभूतानि ११७।३५१
सर्वभूतेषु ६८
सर्वमायु २५२
सर्ववर्णानां ५८०
सर्ववेदान्तप्रत्ययन्यायः ६७३
सर्वशाखाप्रत्ययन्याय २०।५९।६०।६६९
सर्वसाधारणीं ३४९
सर्वस्य चाहं ८२।२४१।३४१।५३७
सर्वस्य वशी ६३०।६५३।६५५
सर्वस्याधिपतिः ३३७
सर्वांश्च लोका ३०७
सर्वाणि रू १७७।२१४।३३५
सर्वाणि ह वा २१७।२१८।२१९।२२१ २३५।३०३।५४८
सर्वात्मा ७८
सर्वान्कामा ५८३
सर्वान्पाप्मनो ३६९
सर्वापेक्षा च ५।६८५
सर्वा ह वै देव ४०६
सर्वे चैते वशं ५७५
सर्वे निमेषा ११०।२१४।६०८
सर्वे पाप्मान. प्रदू ७२३
सर्वे पाप्मानो ७२३
सर्वे प्राणा ७२९
सर्वे वेदा ३४८
सर्वेश्वरः ६६
सर्वेषा तु स ३१६
सर्वेषु च नृप ५११
सर्वेषु लो २७४।७७३
स वा एष एते ३०५
स वा एष एवं २८४।२८५।२८८
स वा एष दिव्येन ७७०
स वा एष पुरु १७९।१८६
स वा एष म ३३७।३८३।३९०।५२३ ५२७।६११।६५३
स वायुमाग ७४६
स विजिज्ञा ८।१५१
स वै वेदि ३६५
स सर्वभूत ६५।७८
स सर्वांश्च ३०४।३०६
स सर्वेषु लो २६८।६७१
स सामभिरु २९५
स सेतुर्वि ३०२
स स्वराड्भ ४।२८८।५८८।६४०।६५७ ६७१।७६६।७७२
सहकारि ११
सह नाववतु ६३४
सह ब्रह्मणा ५३०
स ह संजिहान ३२६
सहस्रशीर्ष ६५९।६६१
सहस्रशीर्षा २७१

http://acharya.org

स हि कर्ता ९७।५८३।५८५।७६७
सहोपलम्भ ४९४
स होवाच २२६।६२८
स होवाचैत २९०
स स्थनादिर ५०६
साख्यं योगः ५१०।५१२
सांख्ययोगकृ ५०९
साख्यस्य वक्ता ५१०
साक्षाद्दृष्ट ५१
सात्वत विधि ५०९
साभुकारी ४६३
सा हानिस्त ६४
सितासिता च ३४९
सिद्धं तूपा ९
सुखं त्वेव २८६
सुपां सुलुक् ३४२
सुहृदः साधु ६३६।६३९।७२५
सूत्रकारो ९६
सूयते पुरु ३४९।३८३
सूर्यश्चक्षु २६९
सूर्याचन्द्र ३५५।३९३।४६४
सृजते स हि ५८३
सृष्ट्वा नारं ३१९
सेयं देव ६१।४४२।५५९।५६०।६५१
सैषा चतुष्प २२४
सैषा देवता २२१
सैषानन्दस्य १८४
सैषानस्त ५४७
सैषा विरा २२४
सोकामयत ११९।१२१।२०६।२०८ २१२।२२०।२२१।३६३।३८८।३८९ ३९२।५०२।६०७।६२७।६२८
सोक्षरः पर ६५९
सोध्वनः पार २४४।२४७।२४९।३३९ ३४५
सोन्तरिक्ष ३१६
सोन्वेष्टव्यः ८।१२८।१५१।३०४
सोभिध्याय ४१२।३१९।३९५।३९८ ४४७
सोमाभावे ९६
सोमावयव ९६
सोरोदीत् ६९५
सोविद्याग्र २६५
सोश्नुते स ६१।७९।१६२।३६३।७६१ ७७५
सोहं भगव १५४।२८५।२८६
सोहं भगवो ५०७
सोहं स च १५।७७
सोहमिच्छा ७२
स्तब्धोस्युत ३८४।४३९
स्थानादिव्य २५६
स्थितिसंयम ७३।३९९
स्थिलदना ५८९
स्मृतिलम्भे ९
स्त्रीपुंसौ ब्र १६१
स्त्रीभिर्वा ३०५।६५७।७६५
स्वं ह्यपीतो १७५
स्वकर्मणा त ४००।४७२।६९७
स्वप्नान्तं मे १७५
स्वमपीतो १७५
स्वयंज्योति ४६
स्वर्गकामो १४७।५८०
स्वर्गलोका अमृ ३४६
स्वसंबन्धवि ४०
स्वसंबन्धि ४०
स्वाध्यायोध्ये ३
स्वेन रूपेणाभि ७५८।७५९

http://acharya.org

स्वे महिम्नि २९८
हन्ता चेन्म ५३३।५३४
हन्तासुरान्यज्ञ ६१८।६२०
हन्ताहमि ५२।११९।१२०।१७३।१८९
४०६।४४२।६०३
हन्ति पाप्मानं ६५२
हरिव आ ३१५
हव्यकव्यभु ४०१
हिता नाम ३६६
हिरण्यशरीर ५८१
हिरण्येन षोड ६३७
हृदयं गार्ह २७०
हृदा मनीषा १५९।२३५
हृदि ह्ययमा ५२८
हेतुनानेन ११७।३५१।५९५।७७४
होतृषदना ६७७

http://acharya.org